[illegible] कान्यनिर्वचनीया लक्ष्मीः शोभा अवाप्यत प्राप्ता । उत्प्रेक्ष्यते—[illegible] नागलोकमर्त्यलोकनाम्ना भूमीनां त्रितयं त्रिकम् । त्रैलोक्यमित्यर्थः । [illegible] विद्यमानसकलपदार्थाधारते मन्त्रतन्त्रादिविधिनाराध्यमानैः [illegible] (पण्यन्ते) पणायन्ति ते कुत्रिकापणास्तेषां वंशैः कुलैर्वृन्दैरिव । [illegible], व्याल्लोकस्यापि नागलोके पाताले, अवनौ भूमण्डले च [illegible] प्रशस्या वस्तुव्रजा धनधान्यवस्त्रादिपदा-[illegible] गर्भागाराणि अपवरकादिस्थानानि येषां तैः । [illegible] इति [illegible] । कुत्रिकापणपरिभाषा इति तदर्थः ॥

[illegible] हिमवालुकाभिः ।
[illegible] दिशोऽप्यशेषाः ॥ १०६ ॥

[illegible] आपि दिशोऽप्यगमन्त सुरभी-[illegible] चन्द्राः [illegible] । यथा [illegible]—[illegible] । [illegible] ॥

[illegible] ।
[illegible] ॥ १०७ ॥
[illegible] ।

सान्द्रचान्द्रक्षोदेषु स्निग्धेषु निबिडेषु वा कर्पूराणां चूर्णेषु । केन । मौग्ध्येन ज्ञानेन । कास्विव । वालुकास्विव । यथा गाङ्गासु गङ्गासम्बन्धिनीषु पुलिनसिकतासु कुमाराः क्रीडन्ति, तथैव घनसारचूर्णेषु रमन्ते इति कर्पूरपारीप्राचुर्यात्तत्क्षोदास्तु वहिः क्षिप्यन्ते । कैः । स्फुरन्तो दीप्यमाना ये इन्द्रनीला नीलमणयो मरकतरत्नानि तैः । कैरिव । काचगोलैरिव । यथा—शिशवः काचानां क्षारमृद्विकाराणां गोलैर्गुटकैः शङ्गा इति प्रसिद्धैः खेलन्ति । किंभूतैः । नीलैर्हरिद्वर्णैः । अनेन विशेषणेन मणिरत्नबाहुल्यमपि प्रतिपादितम् ॥ इति दृष्टाः ॥

यच्चान्द्रचामीकरवेश्मचन्द्रचण्डार्चिषौ गर्भगताङ्घ्रिरावैः ।
मिथः किमित्युन्नयतोऽभियातिर्जेयः कथं राहुरजय्यवीर्यः ॥ १०८ ॥

यस्याः पुर्याश्चान्द्राणां चन्द्रकान्तमणीनां (चान्द्राणां सौवर्णानाम् ?) । 'चन्द्रोऽम्बुकाम्ययोः । स्वर्णे सुधांशौ कर्पूरे कम्पिल्ले मेचकेऽपि च' इत्यनेकार्थः । (चामीकराणां सौवर्णानाम्) चन्द्रोपलैः स्वर्णैश्च घटिते क्वापि वेश्मनि गृहे एव चन्द्रचण्डार्चिषौ विधुभास्करौ तौ गर्भे गृहमध्ये गतानां प्राप्तानामङ्घ्रिणां मनुष्याणां रावैर्मिथोवार्तादिशब्दैः मिथः परस्परमित्यमुना प्रकारेण । किमुत्प्रेक्ष्यते—उन्नयतः किमु । विचारयत इव । 'वितर्कः स्यादुन्नयनं परामर्शो विमर्शनम्' इति हैम्याम् । इति किम् । यत् अजय्यं जेतुमशक्यं वीर्यं पराक्रमो यस्य तादृशो राहुरभियातिः शत्रुः । कथं केन प्रकारेण आत्मभ्यां मावाभ्यां वा जेयो जेतव्यः । पराभवगोचरीकर्तव्य इति ॥

शशाङ्कबिम्बं कुलिशाङ्गणान्तर्दृष्ट्वा वृणानानिह मुग्धडिम्भान् ।
विलोभ्य केलीकलहंसबालैराश्वासयन्ति स्म कथंचिदम्बाः ॥ १०९ ॥

इह पुरि मुग्धानविदग्धान् डिम्भान् बालकान् केलीकृते क्रीडार्थम् । 'नित्योद्द्योतपद समस्तकमलाकेलीगृह राजते' इति पूर्वाचार्यप्रणीतचिन्तामणिपार्श्वनाथस्तोत्रे । रक्षिता ये राजहंसबालकास्तैर्विलोभ्य लोभयित्वा अम्बा जनन्यः कथंचिन्महता कष्टेन आश्वासयन्ति । किंकुर्वाणान्बालान् । वृणानान् याचमानान् । किं कृत्वा । दृष्ट्वा प्रेक्ष्य । किम् । शशाङ्कबिम्बं चन्द्रबिम्बम् । क्व । कुलिशैर्हीरकैर्बद्धानाम् । 'पुर्वीमुरा तु हीरक । वराटकः रत्नमुख्य वज्रपर्यायनाम च' इति हैम्याम् । बद्धानां निर्मितानामङ्गणानां गृहाजिराणामन्तर्मध्ये ॥

चन्द्रोदये चन्द्रिरकान्तगर्भसंदर्भशृङ्गस्रवदम्बुपूरैः ।
शिरःस्फुरत्सिद्धधुनी धरेन्द्रो यत्रानुचक्रे कलधौतसौधैः ॥ ११० ॥

यत्र पुरे चन्द्रोदये विधोरभ्युद्गमकाले कलधौतसौधे रूप्यमन्दिरे । शिरसि मस्तके स्फुरन्ती प्रसरन्ती वहन्ती वा सिद्धधुनी गङ्गा यस्य तादृशो धराणां पर्वतानामिन्द्रो र

१ समासान्तविधेरनित्यत्वेन निर्दोषम्

हिमाचलः । 'अद्रिराण्मेनकाप्राणेशो हिमवान्' इति हैम्याम् । अनूनके महर्षीकृतः । किंभूतैः सौधैः । चन्दिरकान्तानां चन्द्रोपलानाम । चन्दिर इति चन्द्रमा' देशनाममालायाम्, अन्येष्वपि ग्रन्थेषु दृश्यते । गर्भे मध्ये संदर्भो रचना येषां तादृशेभ्य' श्च्योतन्तः स्रवन्तो निःसरन्तोऽम्बुपूराः पय'प्रवाहा येषु तैः ॥

वातातिवेल्लद्ध्वजपल्लवाग्रकरेण रावेण च किङ्किणीनाम् ।
या वैभवस्पर्धितया मघोनः पुरीं सयादाह्वयतीव योद्धुम् ॥ १११ ॥

या नगरी वैभवेन स्वलक्ष्म्या सार्धं स्पर्धितया सहापभावेन मघोनः शक्रस्य पुरीममरावतीं स्मयादहंकारायोद्धु संग्रामं कर्तुम् । उत्प्रेक्ष्यते—आह्वयताकारयतीव । केन । वातेन वायुना अत्यतिशयेन वेल्लन्तश्चलीभवन्तो ये ध्वजपल्लवाः पताकावस्त्राणि तेषामग्रः स एव करो हस्तस्तेन । च पुनः केन । किङ्किणीना क्षुद्रघण्टिकाना रावेण शब्देन ॥

श्रीवत्सरामाङ्गजकम्बुतार्क्ष्यचक्राङ्कितैर्मारकितैर्निकेतैः ।
जज्ञे मुकुन्दैरिव यत्र चित्रमेतत्परं धेनुकमद्विपद्भिः ॥ ११२ ॥

यत्र मरकतानामिमानि मारकतानि अश्मगर्भसंबन्धीनि तैर्निकेतैर्गृहै' । 'शङ्के स्वसंकेतनिकेतमासाः' इति नैषधे । मुकुन्दैः कृष्णैरिव जज्ञे जातम् । अत्र बहुवचनं बहुवासुदेवापेक्षया, महत्त्वख्यापनार्थं वा । यथा च जिनशतके—'यत्क्रमाश्चक्रिणो वा' इति । किंभूतैर्गृहैः कृष्णैश्च । श्रीर्लक्ष्मी', वत्सास्तर्णकाः, श्रीवत्सो हृदयचिह्नम् । उत्तमपुरुषाणा वक्षसि लक्षणविशेषः । रामा' स्त्रियः, रामो बलभद्रश्च । अङ्गजा नन्दनाः, अङ्गजः कामश्च । कम्बवः शङ्खा', कम्बुः पाञ्चजन्य. । गृहेषु कम्बवो दृश्यन्ते । यथा नैषधे—'बहुकम्बुमणिर्वराटिका—' इति । तार्क्ष्या अश्वाः, तार्क्ष्यो गरुडश्च । तेषा चक्राणि समूहाः, चक्रं सुदर्शनं च । तैरङ्कितैः सहितैः । पर केवलमिद चित्रमाश्चर्यम् । यन्निकेतैर्धेनुक धेनुसमूहो गोकुलमाद्विपद्भिः पालयद्भिः । 'धेनूना धेनुक धेन्वन्तानां गोधेनुकादयः' इति हैम्याम् । कृष्णैस्तु धेनुकनामा असुरस्त द्विपद्भिर्द्वेषयद्भिस्तस्य द्विपद्भिः शत्रुभिर्वा घातुकैः ॥

एतज्जगज्जित्वरलक्ष्मिवीक्षाक्षणोदिताद्वै(द्भू)तकुतूहलेन ।
शङ्के त्रिदश्यः स्तिमितीभवन्त्यो विभान्ति यद्वेश्मसु शालभञ्ज्यः ॥११३॥

यद्वेश्मसु पुरीमन्दिरेषु शालभञ्ज्यः पुत्रिका विभान्ति । तत्रैव शङ्के मन्ये । एतस्याः पुर्या जगता त्रिभुवनपुरीणा जित्वर्या जयनशीलाया लक्ष्म्याः वीक्षा विलोकन स एव क्षण उत्सवस्तेनोदितमुद्भूत यत्कुतूहल कौतुक तेन स्तिमितीभवन्त्यो निश्चला जायमानास्त्रिदश्यो देव्य इव । लक्ष्मीशब्दः समासमध्ये ह्रस्वोऽप्यायाति । यथा ऋषभनमस्तवे—'वरणलक्ष्मिकरग्रहणोत्सवे' इति ॥

विष्णोर्निहन्तुं नरकं गतस्यौत्सुक्यात्क्रमान्निर्गलितेव गङ्गा ।
ज्यौत्स्नीषु यच्चान्द्रगृहच्युताम्भोधारा भुवं भूषयति स्म यस्मिन् ॥ ११४ ॥

यस्मिन् पुरे ज्योत्स्नीषु पूर्णिमारात्रिषु यस्य पुरस्य चान्द्रगृहेभ्यः चन्द्रकान्तमणिनिर्मितमन्दिरेभ्यश्च्युतानां चन्द्रकिरणसंपर्केण निःसृतानामम्भसां पानीयानां धारा प्रवाहः । 'प्रवाहः पुनरोघः स्याद्वेणी धारा रयश्च सः' इति हैम्याम् । भुवं भूमीं भूषयति स्म अलंकुरुते स्म । उत्प्रेक्ष्यते—औत्सुक्यादाभस्मान्नरकं नरकनामानं दैत्यमसुरं निहन्तुं गतस्य विष्णोः कृष्णस्य क्रमाच्चरणात् निर्गलिता निर्गत्य पतिता। 'विदर्भसभ्ये मकरन्दलीला मन्दाकिनी यच्चरणारविन्दे' इति नैषधे । गङ्गा भूमीमभ्येतीव ॥

ज्योतिस्तरङ्गीकृतयन्निकेतहरिन्मणीशालिशिखा चकासे ।
इदंपदव्येव पतङ्गपुत्री नभः प्रयान्ती मिलितुं स्वतातम् ॥ ११५ ॥

ज्योतिर्भिः कान्तिभिस्तरङ्गीकृतानां कल्लोलयुक्तीकृतानां यन्निकेतानां नगरीगृहाणां हरिन्मणीभिर्नीलरत्नैः शालते शोभते इत्येवंशीला शालिनी शिखा उपरितनप्रदेशः चकासे शुशुभे दिदीपे वा । उत्प्रेक्ष्यते—इदंपदव्या एतन्नगरमन्दिरशिखरमार्गेण । 'इदयशांसि द्विपतः सुधासुचे' इति नैषधे । 'अस्य कीर्तय' इति तद्वृत्तौ । समासान्त एव इदंशब्दः । स्वतातं भास्करम् । 'सूर्यजा यमी' इति हैम्याम् । तथा 'यावद्गङ्गा तपनतनयाभारतीनां समाजे' इति पूर्वकविकृतौ । मिलितुं प्रयान्ती गच्छन्ती पतङ्गपुत्री यमुनेव ॥

गाङ्गेयगारुत्मतपद्मरागचन्द्राश्मवेश्मावलिरुल्ललास ।
प्रेयांसमुद्दिश्य महीमहेन्द्रं पुरश्रिया क्लृप्त इवाङ्गरागः ॥ ११६ ॥

गाङ्गेयानि सुवर्णानि, गारुत्मतानि हिरण्मणयः, पद्मरागा रक्तोपलाः, चन्द्राश्मानः शशिकान्तमणयः । तैर्निबद्धा घटिता वेश्मावलिः सौधश्रेणिरुल्ललास स्फुरति स्म । उत्प्रेक्ष्यते—महीमहेन्द्रं भूमीवासवं राजानं स्वप्रेयांसं निजकान्तं प्रत्युद्दिश्य पुरश्रिया नगरलक्ष्म्या अङ्गरागो विलेपनं क्लृप्तो रचितः । अन्यापि स्त्री भर्त्रा सह चिकीर्षुर्नेपुण्यमङ्गरागं कुरुते ॥

वेश्माश्मगर्भाङ्कसिताश्मकुम्भं निभाल्य मुग्धाभ्रधुनीरथाङ्ग्यः ।
शशी स विश्लेषयिता द्विपन्नः क्रुधेति तं घ्नन्ति किमङ्घ्रिघातैः ॥ १

यस्येति संबन्धात् । वेश्मनि क्वापि नगरीगृहे अश्मगर्भाणां मरकतमणीनाम यस्य तादृशं सिताश्मनां स्फटिकरत्नानां कुम्भं कलशं निभाल्य दृष्ट्वा मुग्धा अभ्रधुन्या गगनापगाया आकाशगङ्गायाः रथाङ्ग्यश्चक्रवाक्योऽङ्घ्रीणां पदानां घ्नन्ति प्रहरन्ति । किमुत्प्रेक्ष्यते—इति क्रुधा घ्नन्ति । इति किम्—यत् नोऽस्माकं अहितः अत एव विश्लेषयिता वियोगकारकः स प्रसिद्धः शशी मृगाङ्कः इति

अर्कांशुसंपर्कचयार्ककान्तोद्भूतानलोमावनसंनिभस्य ।
गेहाग्रशृङ्गस्थगजद्विपद्भिर्द्वेष्यैरघृष्यस्य कथंचनापि ॥ ११

[illegible] रेः [illegible] शङ्के शरणं [illegible] ।
[illegible] रेणुभिर्णिरैमगोराः ॥ ११९ ॥

[illegible] रेणुभिरि [illegible] । [illegible] शङ्के [illegible]
[illegible] ॥ [illegible] 'गजानाम[illegible]
[illegible] इति पाठः [illegible] ।
[illegible]
[illegible]

मा कृथाः । अन्तस्तत्त्वविचारणान्धबधिरे तद्दानरेणाधुना रे माणिक्य, तदेतदेव सुकृतं यच्चूर्णित नाश्मना ॥' इत्यत्र केवलमाणिक्यमेव । 'शिशुतरमहोमाणिक्यानामहर्मणिमण्डली' इति नैषधे । प्रत्यग्रकिरणपद्मरागाणामिति तद्वृत्तिः । उत्प्रेक्ष्यते—भूप नृपतिं भर्तारमनुलक्षीकृत्य पुरश्रिया उद्गीर्णो अत एव प्रकटीभवन् प्रकटो जायमानः अनुराग इव ॥

प्रीतादुपास्त्याधिगता गिरीशान्निरङ्कनैकाङ्गविधानविद्या ।
प्रपञ्चिता कौतुकिना किमेषा चन्द्रेण यच्चान्द्रगृहच्छलेन ॥ १२१ ॥

कौतुकिना कुतूहलाकलितेन चन्द्रेण एषा प्रत्यक्षलक्ष्या । निर्गतोऽङ्को लक्ष्म येभ्यस्तानि नैकानि बहूनि यान्यङ्गानि शरीराणि तेषां विधानं निर्माणं यया तादृशी विद्या । यस्यां नगर्याश्चान्द्रगृहाणां चन्द्रकान्तमणिमयमन्दिराणां छलेन कपटेन । किमुत्प्रेक्ष्यते—प्रपञ्चिता विस्तारिता । किंभूता विद्या । अधिगता प्राप्ता । कस्मात् । गिरीशादीश्वरात् । किंभूतात् । उपास्त्या नित्यसेवया प्रीतात् । प्रसन्नीभूतादित्यर्थः । सतुष्टात् ॥ इति गूढा' ॥

यस्मिन्दिदीपे मधुदीपरूपश्रीगर्वनिर्वासिविलासिवृन्दैः ।
रूपस्मयं वीक्ष्य जयस्य तस्य मदच्छिदे किं विधिना प्रणीतैः ॥१२२॥

यस्मिन् पुरे मधुदीपस्य मदनस्य रूपश्रिया शरीरसौन्दर्यलक्ष्म्या गर्वमभिमानं निर्वासयन्ति निर्दलयन्तीत्येवंशीला ये विलासिनो भोगिनस्तेषां वृन्दानि तैर्दिदीपे चकासे । 'मधुदीपमारौ मधुसारथिस्मरो' इति हैम्याम् । किमुत्प्रेक्ष्यते—जयस्येन्द्रपुत्रस्य रूपस्मयं निजाद्भुतश्रिमगर्वं वीक्ष्य दृष्ट्वा तस्य जयन्तस्य मदच्छिदे उन्मत्ततोच्छित्यै विधिना धात्रा कृतैः प्रणीतैरिव ॥

मेरोः शिखाग्रावसथव्यथाभिरुत्तीर्य सातस्थितिमीहमानाः ।
यस्मिन्समेताः किमु नाकिशाखिव्रजा वदान्या व्यलसन्युवानः ॥१२३॥

यस्मिन् युवानस्तरुणा व्यलसन् शुशुभिरे । किंभूताः । वदान्या दानशीला दानशौण्डा वा । किमुत्प्रेक्ष्यते—शिखाग्रे शिखरोपरि य आवसथो वसतिः स्थानं वासस्तेनोद्भवन्तीभिः प्रकटाभिर्जायमानाभिर्व्यथाभिरार्तिभिः कृत्वा मेरोः काननाचलादवतीर्य भूमीमण्डले समेत्य सातस्थितिं सुखनिवासमीहमाना इच्छन्तो नाकिनां शाखिनो देवतरवः कल्पद्रुमास्तेषां व्रजा गणा यस्मिन् समेता इव सगता इव ॥

जितस्मरान्पौरजनान्निपीय मा तद्रूपस्यन्त्यसती सती स्तात् ।
इतीव योषावपुषा स्ववर्ष्म द्विषा मखस्य व्यतिसीव्यते स्म ॥ १२४ ॥

मखनाम्नो दैत्यस्य द्विषा वैरिणा शंभुना । उत्प्रेक्ष्यते—इति हेतोर्योषावपुषा शरीरेण समं स्ववर्ष्म निजशरीरं व्यतिसीव्यते स्म परस्परं स्यूतं योज्यते स्म । इति यत् जितो रूपाभिभूतः स्मरः कामो यैस्तादृशान् पौरजनान् नगरतरुणान् निपीय अवलोक्य सती पार्वती तद्रूपस्यन्ती रागोद्रेकात् कामातुरा तेषां कामुकी ... सती असती व्यभिचारिणी मा स्तात् भवतात् ॥ इति नागराः ॥

तत्र देशे महमुन्द इति नामाभिधान यस्य तादृशो भूमान् पातिसाहिरिति म्लेच्छवशप्रसिद्धमधिपतिनाम । सोऽस्ति तत्समयानुसारेण बभूव । किंभूतः । स्थाम्नां पराक्रमाणामेकाद्वितीया भूः स्थानम् । पुन किंभूतः । भूवलयस्य भूमण्डले या एकोऽसाधारणो वीरः सुभटः । स कः । यस्य करेण राजदेयांशेन पीडिता सयुक्ता जाता भूर्वसुधा दिने दिने श्रियं लक्ष्मीं धनधान्यादिकां दधौ धारयति स्म अनेकलक्ष्मीवती भवति स्म । केव । वधूरिव । यथा नवोढा नवपरिणीता वधूर्वशा करेण पीडिता आश्लेषणादिकं नीता सती दिने दिने श्रिय शरीरोपचयलक्षणां शोभां धत्ते ॥

प्रजां द्विजिह्वैरिव पीड्यमानां कलेर्विलासैरवसाय विश्वाम् ।
तां शासितुं दाशरथिः किमात्तजन्मा स्वयं साहिरसौ बभासे ॥१३०॥

असौ महमुन्दनामा साहिः पातिसाहिः बभासे राजते स्म । किमुत्प्रेक्ष्यते—तां विश्वां वसुधां शासितुं पालयितुं स्वयमात्मना पुनर्द्वितीयवारमात्तजन्मा गृहीतावतारो दाशरथी राम इव । किं कृत्वा । अवसाय विज्ञाय । काम् । विश्वां पृथ्वीम् । किं क्रियमाणाम् । कले' कलियुगस्य विलासैर्विलसितै' पीड्यमानां सताप्यमानाम् । कामिव । प्रजामिव । यथा प्रजा प्रकृति पुरदेशलोका द्विजिह्वैः पिशुनै' पीड्यमानाः कथितप्रशास्ति ॥

निस्त्रिंश[1]मन्थानगमथ्यमानमहाहवक्षीरधिजन्मना यः ।
वव्रे बलिध्वंसविधानधुर्यो जयश्रिया शत्रुरिवासुराणाम् ॥ १३१ ॥

यः साहिर्जयश्रिया विजयलक्ष्म्या वव्रे वृत. । क इव । असुराणा शत्रुरिव । यथा कृष्णो जयेनोपलक्षितया श्रिया व्रियते । किंभूतः । यः बलिना बलवताम् । बल सैन्ये पराक्रमे च । रिपुनृपाणां बलेर्दैत्यस्य ध्वंसविधान वधकरण तत्र धुर्य. समर्थ. शत्रुवधविधायिना धुरि गण्यः । किंभूतया जयश्रिया । निस्त्रिंशः खड्ग' स एव मन्थानगः मन्दराद्रिः । 'मन्थानगः स भुजगप्रभुवेष्टिघृष्टिलेखाचलद्धवलनिर्झरवारिधारः' इति नैषधे । वासुकेर्वेष्टनघर्षणजातासु लेखासु भ्रमन्त्यो धवला निर्झरवारिधारा यस्य स मन्थाः । मथिन्शब्दस्य 'पथिमथ्यृभुक्षामात्' इत्यात्वे धेन्र्यादेशे रूपम् । नग शैल' मन्दराद्रिः—इति तद्वृत्तिः । तेन मथ्यमानो विलोड्यमानो यो महाहवो महासग्राम. स एव क्षीरधिः दुग्धसमुद्र तस्माज्जन्मोत्पत्तिर्यस्या' सा तया ॥

अश्यामितास्यं कमलातिदानैर्जितैः प्रसत्तिप्रणिनीपयास्य ।
अभ्रैरिवाभ्राद्भुवमभ्युपेतैर्यद्भूभुजो गन्धगजैर्विरेजे ॥ १३२ ॥

यस्य भूभुजः साहेर्गन्धगजै' गन्धोपलक्षितै' सिन्धुरैः विरेजे शुशुभे । उत्प्रेक्ष्यते—अभ्रादाकाशाद्भुव भूमीमभ्युपेतैः समागतैर्भूमीमभिलक्षीकृत्य । 'अभिरभागे' भागवर्जितेऽर्थेऽभि

१. 'मन्थानग' इत्यस्य समासघटकत्वेन सुपरत्वाभावादात्वानुपपत्तेश्चिन्त्यमेतत् नैषधे तु समासाभावान्न कोऽपि दोष .

कर्मप्रवचनीयः स्यात्तत्र द्वितीया । हरिमभीति प्रक्रियायाम् । पृथिव्यामायातैरभ्रैर्मेघैरिव । [illegible]न्या । अस्य भूभुजः प्रसत्तेः प्रसादस्य प्रणिनीषया कर्तुमिच्छया । किमभ्रैः । जितैरभि- [illegible]तैः । कैः । कमलानां लक्ष्मीनामुत्सर्गपयसां च दानैर्विश्राणनैः । कथम् । अश्यामिता- स्यमुज्ज्वलीकृत वक्त्र यत्रैवंविध यथा स्यात्तथा ॥

अजय्यवीर्यं निजनिर्जयायोद्यतं यमालोक्य विपक्षलक्षैः ।
स्वक्षत्रवृत्तीरपहाय भेजे क्षेत्रस्य वृत्तिः कृषिकैरिवात्र ॥ १३३ ॥

अत्र भुवि विपक्षाणां माहिशत्रूणा लक्षैः स्वस्यात्मनः क्षत्रवृत्तीः क्षत्रियत्वेन या आ- [illegible] ।'क्षत्र तु क्षत्रियो राजा' इति हैम्याम् । ता अपहाय साहितः स्वमारणभी- [illegible] क्षेत्रस्य केदारस्य वृत्तिर्जीवन भेजे सिषेवे । कैरिव । कृषिकैरिव । यथा [illegible]ः क्षेत्रवृत्तिर्विधीयते । किं कृत्वा । निजस्यात्मनो निर्जयायाभिभवायोद्यत प्रग- [illegible], [illegible] अजय्य अतुमशक्य वीर्यं पराक्रमो यस्य तादृश पातिसाहिमालोक्य दृष्ट्वा ॥

[illegible]र्जम्बालितैरिवोर्वी मदाम्बुभिर्यस्य बभे द्विपेन्द्रैः ।
[illegible] यात्रासु [illegible]तैर्दिगीशैर्दिग्वारणेन्द्रैरुपदीकृतैः किम् ॥ १३४ ॥

[illegible]भे व्यराजि । किं कुर्वद्भिः । जम्बालान्कुर्वन्तीति जम्बाल- [illegible]ति जम्बालयन्तः, तैर्जम्बालयुक्तां विदधद्भिः । काम् । उर्वी पृथ्वीम् । [illegible]रिव । जलदैरिव । यथा मेघैर्भूर्जम्बालकलिता क्रियते । [illegible] जयनशीलासु यात्रासु अभिषेणनेषु । सेनामग्रगेण [illegible]ः । [illegible]ः स्पर्धाकृतैर्दिगीशैर्दिग्पतिभिरुपदीकृतैर्ढौकितैर्दि- [illegible] ॥

[illegible]त्राण्यो मा क्वापि कुर्यात्पराजयन्माम् ।
[illegible] राजा नवो भ्रमागोचरयांचकार ॥ १३५ ॥

[illegible] ।'अपि भ्रमाभिनिभिगाहना[illegible]' इति [illegible] । [illegible] । [illegible] । राजा किं कर्तुमिच्छुः । जी- [illegible] । [illegible]—इत्यमुना प्रकारेण [illegible] [illegible] [illegible] [illegible] [illegible]

[illegible] ।

स्त्रैणस्याञ्जननीलिमाङ्कितपतद्बाष्पाम्बुपूरैरिव
क्षमापीठे प्रसरद्भिराविरभवत्पाथोजबन्धोः सुता ॥ १३६ ॥

यस्य साटे· प्रत्यर्थिपृथ्वीभुजां वैरिनृपाणां स्त्रैणस्य स्त्रीणां समूहस्य अञ्जनानां नयनक- [illegible] नीलिम्ना श्यामत्वेनाङ्कितैर्युक्तैः तथा पतद्भिः दुःखमसा[illegible]लोचनेभ्यो निःसरद्भिः बाष्पा- म्बुपूरै रोदनजलपूरैः । इवोत्प्रेक्षते—पाथोजबन्धोर्भानोः सुता पुत्री यमुना आविरभूत् प्रकटीभूता । [illegible] ‘यदि [illegible] तदा [illegible] प्रतापनृपनागरीनयननीरकज्जलैर्नानुसरणचातुरी [illegible] ॥’ इति [illegible] बाष्पजलेभ्यो नदीप्रादुर्भावः । तथा—‘[illegible] [illegible] वारिधयस्तवारिवनितानेत्राम्बुभिः पूरिताः’ इति [illegible] समुद्रप्रादुर्भावोऽपि वर्णितः । किंभूतैः पूरैः । क्षमापीठे भूमण्डले प्रसरद्भिः [illegible] विस्तारं गच्छद्भिः । किंभूतस्य यस्य । [illegible] [illegible] [illegible] इति [illegible] नियमं [illegible] । [illegible] [illegible] । संग्रामे [illegible] [illegible] [illegible] मध्यभागस्तस्याङ्गुलस्य [illegible] प्राप्तताम् । [illegible] नामित्यर्थः ॥

सुत्रामाम्बुधिधामदिग्गिरिकुलालङ्काधिनेतोभयः
पृथ्वीपाललुलाटचुम्बितपदप्रोद्दामकामाङ्कुशः ।
या स्वर्णाचलसार्वभौम इव यो निःशेषविश्वंभरा
शासच्छात्रवगोत्रजिज्जगते श्रीगुर्जरोर्वीपतिः ॥ १३७ ॥

[illegible] [illegible] [illegible] या [illegible] गुर्जराणां गुर्जरमण्डल[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] प्राचीप्रतीच्योर्गिरी पर्वतौ उदयास्ताचलाभिधानौ [illegible] [illegible] समुद्रं [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] । शासत् पालयन् [illegible] [illegible] । यथा [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ‘[illegible]’ [illegible] [illegible] [illegible] [illegible] [illegible]

[illegible] [illegible]

[illegible]

तद्ब्राह्मीक्रमसेविदेवविमलव्यावर्णिते हीरयु-
क्सौभाग्याभिधहीरसूरिचरिते सर्गोऽयमाद्योऽभवत् ॥ १३८ ॥

इति पण्डितश्रीसीहविमलगणिशिष्यपण्डितदेवविमलगणिविरचिते हीरसौभाग्यनाम्नि महाकाव्ये प्रथमप्रारम्भे जम्बूद्वीप-भरतक्षेत्र-गुर्जरदेश-प्रह्लादनपुर-महमुन्दपातिसाहि-वर्णनो नाम प्रथमः सर्गः ।

हीर इति शब्देन युनक्ति योगं प्राप्नोतीति हीरयुक् तादृश सौभाग्यमिति अभिधा नाम यस्य । एतावता हीरसौभाग्यकाव्यम् । तच्च तद्धीरसूरेर्हीरविजयसूरीश्वरस्य चरितं च । पश्चात्कर्मधारयः । तत्र तस्मिन् हीरसौभाग्यकाव्ये अयं प्रत्यक्षलक्ष्यो वर्णनागोचरीकृत । तथा आद्यः प्रथमः सर्वसर्गाणां धुरि अभिहितः सर्गः अधिकारविशेषः अभवत् बभूव । किंभूतः । स पूर्वोक्तश्चासौ ब्राह्मया वाग्देवतायाः क्रमौ चरणौ सेवते आराधयतीत्येवं-शीलश्च तादृशेन देवविमलेन व्यावर्णिते । विशेषवर्णनागोचरतां प्रापिते इत्यर्थः । यत्तदोर्नित्याभिसंबन्धात् स कः । यः देवविमल शिवा इत्याह्वा नाम यस्य तादृशः साधुः साहेरु-मथवा प्रधानत्वादिन्द्रः साधुरिति वणिजां नाम प्राकृते तु असुकसाह इत्युच्यते । तथा श्रीसुमतिसाधुसूरिकृतसोमसौभाग्यकाव्ये वणिजः साहस्य साधुरिति संज्ञा दृश्यते । सात्रापि । तथा—'अपलपति रहसि दत्तं प्रकटितदत्तेऽपि सशपथं कुरुते । क्रयविक्रयं च लुण्ठति तथा लोके वणिक्साधुः ॥' इति सुभाषिते । पुनः शिवासाहपत्नी नाम्ना सौभाग्यदेवी यं प्रासूत जनयामास । यं किंभूतम् । श्रीमन्तो विद्वद्वृन्दारकत्वेन शोभाभाजो ये कोविदा पण्डितास्तेषु सिंह इव सिंहः परवादिपुञ्जकुञ्जरेन्द्रैरप्यजेयः कथमप्यनाकलनीयश्च । मुख्य इत्यर्थः । सीहविमलनामा प्राज्ञः । तस्यान्तेवासिनां शिष्याणां मध्ये वास्तोष्पतिरग्रणीः प्रथमशिष्यत्वेन प्रधानः ॥

इति पण्डितश्रीसीहविमलगणिशिष्यपण्डितदेवविमलगणिविरचिते स्वोपज्ञहीरसौभाग्यकाव्यवृत्तौ प्रथमप्रारम्भे जम्बूद्वीप-भरतक्षेत्र-सतीर्थसरिद्गिरिकेदारगोधनवन्धुरगुर्जरदेश-प्रह्लादनपार्श्वनाथोपवनपरिखाप्राकारगृहहट्टयुवयुवतीयुक्तप्रह्लादनपुर-महमुन्दपातिसाहिवर्णनो नाम प्रथमः सर्गः ॥

द्वितीयः सर्गः ।

पुरेऽथ तस्मिन्व्यवहारिपुंगवो बभूव कुंरा इति नाम धामवान् ।
महीरुहां स्वःशिखरीव विश्रुतो रसास्पृशां न्यक्कृतविश्वनिःस्वतः ॥ १ ॥

अथ देशग्रामादिवर्णनानन्तरं मातृपितृमातृस्वप्नादिवर्णनादि प्रारम्भे । तस्मिन्पूर्ववर्णितप्रह्लादनपुरे कुंरा इति नाम व्यवहारिषु महेभ्येषु पुंगवः श्रेष्ठो बभूव संजातः । 'पुंगवो गवि भेषज्ये प्रधाने चोत्तरस्थिते' इत्यनेकार्थः । किंभूतः । धामवान् गृहमेधी । अथवा तेजस्वी प्रभाववान् । 'धाम स्थाने गृहे गेहे प्रभावे जन्मतेजसो ' इत्यनेकार्थतिलकः । पुनः

किम्भूतः । विश्रुतो विख्यातः । केषां मध्ये । स्मास्पृशां पुरुषाणाम् । क इव । स्वर्गिसरीव । यथा महीरुहाणां वृक्षाणां मध्ये कल्पवृक्षो विख्यातोऽस्ति । अत्र च किम्भूतः कल्पद्रुः स च । न्यकृता निराकृता जगज्जनानां समस्तार्थिनां निःस्वता दारिद्र्यं येन ॥

अरिष्टकेतुं नवभोगसङ्गिनं त्रिरेखपाणिं पुरुषोत्तमं पुनः ।
भ्रमाद्विवोढुर्जलधेरिवोद्वहा महेभ्यमभ्येत्य बभाज यं मुदा ॥ २ ॥

जलधेरुद्वहा समुद्रपुत्री लक्ष्मीर्यं महेभ्यं व्यवहारिणमभ्येत्य समागत्य मुदा प्रीत्या बभाज समाश्रिता । उत्प्रेक्ष्यते—विवोढुः स्वभर्तुः कृष्णस्य भ्रमात् भ्रान्तेरिव । किम्भूतं महेभ्यम् । अरिष्टपूर्वद्वयेषु अरिष्टनाम्नि वृषभरूपे दैत्ये च केतुं धूमकेतुनामग्रहस्य सदृक्षम् । [illegible] स्यात् । पुनः किम्भूतम् । नवानां नूतनानां स्तुतियुक्तानां वा भोगाः [illegible] सुखानां [illegible] सङ्गमोऽनुभवः प्राप्तिरस्येति । पक्षे—भोगः सर्पकायः अर्थात् शेषनागशरीरं तत्र [illegible] तच्छयनत्वात् । पुनः किम्भूतः । त्रिरेखाः आकृत्या शङ्खः पाञ्चजन्यश्च पाणौ हस्ते [illegible] । पुनः किम्भूतः । पुरुषेषु समस्तेषु मानवेषु उत्तमं श्रेष्ठं नाम च ॥

कुबेर इत्यात्मजनावमानना व्यपोहितुं [illegible]श्वरः स्वयम् ।
वितीर्णसौवर्णमणीगणोऽर्थिनां प्रणीय यन्मूर्तिमिवावतीर्णवान् ॥ ३ ॥

[illegible] महेभ्यो भातीति सम्बन्धः । उत्प्रेक्ष्यते—[illegible] धनदः [illegible] मूर्तिं शरीरं प्रणीय निर्माय स्वयमात्मना अवतीर्णवान् [illegible] । [illegible] कर्तुम् । व्यपोहितुमपकर्तुम् । [illegible] कुबेरः कुत्सितशरीर [illegible] तथा—'जातो न [illegible] न गुणे [illegible] सौन्दर्यं [illegible] क्षितकुत्सबेर ॥ [illegible] कुबेरः ॥' इति [illegible] वर्णो प्रवर्णो न, नापि [illegible], न [illegible] गुणे [illegible] तात्पर्येण [illegible] । अत एव [illegible] येन ईदृशः कुबेरस्तां [illegible] नाम [illegible] । [illegible] 'स्थितोऽन्यतरस्याम्' इति [illegible] प्रयोगः । सत्यभामा भामेतिवत्—इति [illegible] भवगणनाम् । [illegible] । किम्भूतः । [illegible] सौवर्णं सुवर्णानां समूहः । तथा मणीनां रत्नानां गणो [illegible] स्तुतिता ॥

[illegible]

[illegible]

[illegible]

च। तमसामज्ञानानां दुष्कृतकर्मणां वा ध्वान्तानां च नाशन उत्कीरकम्। पुनः किंभूतः। श्रितमर्थाभिर्मित शंभोर्जिनेन्द्रस्य जैनश्रावकत्वात्, शिवस्य न शिरश्चन्द्रत्वात्, शीघ्र नमाराधनं सेवा येन सः। पुनः किंभूतः। कौ पृथिव्यां मुदं प्रीतिं प्रमोदं कैरवाणि कुमुन्दि विकाशयति प्रकटीकरोति विदधाति प्रबोधयतीत्येवंशीलः। पुनः किंभूतः। वचनमेव वाणीतुल्यं च अमृतं सुधां किरन् विस्तारयन् वर्तते यः तदत्र आश्चर्यमिदं चित्रमाश्चर्यमस्ति। यत्स महेभ्यो मुक्तास्त्यक्ता दोषा अपगुणा येन। शशी तु सह दोषया रात्र्या वर्तते यः स सदोषः॥

अलम्भि दम्भोलिशयेभशालिनी न कीर्तिरेतस्य परश्शतैः परैः।
शरत्प्रसन्नीकृतचन्द्रगोलिका सुधामरीचेर्ग्रहतारकैरिव॥ ५॥

तस्य कुराव्यवहारिण. दम्भोलिर्वज्रं शये यस्य स शक्रः तस्य य इभ ऐरावणस्तद्वत् शालिनी श्वैत्यात् शोभमाना कीर्तिः परश्शतैः शतात्परैः परश्शतैः सहस्रलक्षकोटिमितैरन्यैः परैरिभ्यैर्नालम्भि न प्राप्ता। कैरिव। ग्रहतारकैरिव। यथा सुधामरीचेरमृतकिरणस्य चन्द्रस्य शरदा घनात्ययेन प्रसन्नीकृता जलधररोधापसारणाद्विमलीकृता चन्द्रगोलिका चन्द्रिका ग्रहा मङ्गलादयः, तारका नक्षत्रतारास्तैर्न लभ्यते नैव प्राप्यते॥

वहन्सुपर्वद्रुमरामणीयकं सनन्दनो गोत्रपराध्र्यतां दधत्।
सुजातरूपः सुमनोमनोरमोऽनुयाति यः स्वेन सुपर्वपर्वतम्॥ ६॥

यो महेभ्यः स्वेनात्मना सुपर्वपर्वतं सुरगिरिं मेरुमनुयाति अनुकरोति। मेरुणा सदृशीभवतीत्यर्थः। किं कुर्वन्। वहन् कलयन्। किम्। सुपर्वद्रुमाः कल्पवृक्षा- दानरूपभूषणसुषमाभिस्तद्वत्तैश्च रामणीयकं मनोहरताम्। पुनः किंभूतः। सहनन्दनाभ्यां हीरकुमारश्रीपालाभिधाभ्यां वर्तते यः। भाविनि भूतोपचारात्। पक्षे—नन्दनवनेनान्वितः। पुनः किंभूत.। गोत्रे स्ववंशे, गोत्रेषु सर्वशैलेषु हीरसूरिपुरंदरपितृत्वेन लक्षयोजनप्रमाणतया सर्वोन्नतत्वेन च पराध्र्यता प्रकृष्टता महिमानं दधत् बिभ्रत्। पुन. किंभूतः। सुशोभनं जातमुत्पन्नं रूपं वपुः सुभगता यस्य। मेरौ तु सुष्ठु जातरूपं स्वर्णं यत्र। पुनः किंभूतः। सुमनोभिर्हारादिकुसुमैर्मनो हरती(?)त्येवशीलः। सुष्ठु निष्पापं मनो येषां साधूनां तेषां मनसि सुगुणधर्मित्वेन रमते इति वा। सुमनसां महात्मनां मध्ये अभिरामो वा। सुमनस्त्वेन मनोज्ञो वा। मेरुस्तु सुमनोभिर्देवैः सुन्दरः॥

जगज्जनावाङ्मनसावगाहिना गम्भीरभावेन जितेन साधुना।
सुधास्रवन्तीपतिना हृदा दधे किमेष रोषो वडवार्चिषो मिषात्॥ ७॥

येन साधुना कुरासाहेन गम्भीरभावेन स्वगाम्भीर्येण जितेनाभिभूतेन सुधास्रवन्तीपतिना क्षीरसमुद्रेण। किमुत्प्रेक्ष्यते—हृदा हृदयेन कृत्वा वडवार्चिषो वडवानलस तेजसः। ...ात् रोषः कोपः एष प्रत्यक्षः किं दधे धृत इव। किंभूतेन गम्भीरभावेन।

जगता पातालभूमिस्वर्लोकानां जनानामसुरनरसुराणां न वाङ्मनसौ वचनचित्ते अवगाहते गोचरयतीत्येवंशीलस्तेन । वक्तुमशक्येनेत्यर्थः ॥

समाप्य कामान्मरुतां स्वदारुतां निरस्य तेषां च वरात्प्रसेदुषाम् ।
मिषादमुष्येप्सितदित्सया विशामिवावनौ स्वःफलदोऽवतीर्णवान् ॥ ८ ॥

इभ्यो भातीति सम्बन्धः । उत्प्रेक्ष्यते—अमुष्य व्यवहारिणो मिषाद्दम्भादवनौ पृथिव्यामवतीर्णवानागतः स्वःफलदः कल्पवृक्ष इव । कया । विशां नरेन्द्राणामीप्सितानां कामितानां मनोभिलाषाणां दित्सया दातुमिच्छया । किं कृत्वा । मरुतां देवानां कामान्सर्वाभिलाषान्समाप्य संपूर्णीकृत्य । दत्त्वेत्यर्थः । पुनः किं कृत्वा । प्रसेदुषां स्वाभिलषितसकलार्थाधिगमेन प्रसन्नीभूतानां तेषां देवानां वरादिष्टप्रदानरचनात्स्वस्यात्मनो दारुतां काष्ठभावं निरस्यापाकृत्य ॥

अतिस्मरैतत्तनुकामनीयकैः सहाभ्यसूयां दधतौ निजश्रिया ।
अनौचितीक्रुद्धजगत्कृतार्कजावकारिपातां वडवासुताविव ॥ ९ ॥

निजश्रिया स्वरूपसौन्दर्यलक्ष्म्या अतिक्रान्तोऽधःकृतो निर्जितः स्मरः कामो यैस्तान्यतिस्मराणि । एतस्य कुराव्यवहारिणस्तनोः शरीरस्य कामनीयकैः रमणीयताभिः । 'कामनीयकमग्र्यकृतकामम्' इति नैषधे । सह सार्धमभ्यसूयामीर्ष्यां दधतौ बिभ्राणौ अर्कजौ अश्विनीपुत्रौ । उत्प्रेक्ष्यते—अनौचित्या अयुक्ततया क्रुद्धेन कुपितेन जगत्कृता ब्रह्मणा वडवासुतावश्वाविवाकारिपातां कृतौ ॥

मिथः परिस्पर्धितया वदान्यतागुणैर्विजित्य व्यवहारिणामुना ।
इमा अरक्ष्यन्त सुधाशधेनवः स्वगोधनस्योपधिनेव धामनि ॥ १० ॥

अमुना कुरानाम्ना महेभ्येन स्वगोधनस्य निजगोकुलस्योपधिना कपटेन धामनि अर्थादात्ममन्दिरे इमाः सकलजगज्जनदृग्गोचराः सुधाशधेनवः कामगव्य इव आरक्ष्यन्त रक्षिताः । किं कृत्वा । वदान्यता दानशीलत्वं तस्या गुणैरुत्कर्षैः स्फूर्तिभिर्वा मिथः परस्परं परिस्पर्धितया समन्तात्स्पर्धनशीलत्वेन विजित्य पराभूय गृहे रक्षिताः ॥

सुपात्रसस्नेहगुणाढ्यवृत्तिभृत्तमःप्रतीपः स्वकुलप्रकाशकृत् ।
प्रदीपदेश्योऽपि परं न धूमभाक्कुलं न चाश्यामलयत्कदापि यः ॥ ११ ॥

यो महेभ्यः प्रदीपस्य देश्योऽपि सदृशोऽपि सन् । 'देश्य देशीय' इति पाणिनिः । परं केवलं कदापि कस्मिन्नपि प्रस्तावे न धूमभाक् न निषेधे कोऽप्यस्य । धूमशब्देन कोपः । यथा भक्तामरस्तोत्रे—'निर्धूमवर्तिरपवर्जिततैलपूरः—' इति । दीपस्तु धूमयुक्तः । च पुनः कदाचिदपि कुलं वंशमपवादादिना नाश्यामलयत् मलिनं चकार । दीपस्तु यत्र स्थीयते तत्स्थानं वा श्यामलयति । 'देशः ... गृहे देशे जनपदेऽन्वये' इत्यनेकार्थे । ... ।

महाव्रताणुव्रतधारकादिसघो यस्य, तथा सहस्नेहेन देवे गुरौ स्वजनादिषु प्रीत्या वर्तते य. सः, तथा गुणैरौदार्यादिभिरग्र्यां मुख्या वृत्तिं वाणिज्यादिकामाजीविका वा बिभर्तीति । 'वृत्तिस्तु वर्तने । कैशिक्यादौ जीवने च' इत्यनेकार्थ । सर्वेष्वप्यग्रेसरो वा। पश्चात्कर्मधारयः । पुनः किंभूतः । तमसामज्ञानानां पापानां वा प्रतीपः शत्रुः स्वय पुण्यकर्माण्याचरन् परानपि धर्मे दृढीकरोति । पुनः किंभूतः । स्वस्यात्मनः कुलमौकेशवंशस्तत्र प्रकाशकृत् उद्योतकर्ता । स्वेन सूरिसिंहेन सूनुना वा । दीपोऽपि पात्रकलित., स्नेहेन तैलेन युक्तः । 'तैल स्नेहोऽभ्यञ्जन च' इति हैम्याम् । तन्तुप्रधानदशाधारक. । 'वृत्तिर्वर्तिश्च तद्दशा' इति हैम्याम् । तथा ध्वान्तोच्छेत्ता, यस्मिन् गृहे येन वा प्रबोधितस्तदेव तस्य वा गेह तत्रोद्योतकारकः ॥

धुनीधवं येन गभीरनिःस्वनैर्विजित्य मुक्तामणिविद्रुमावलिः ।
ततः समग्रा जगृहे तदाद्यसौ बभूव किं निःस्वतया जडाशयः ॥१२॥

येन कुराव्यवहारिणा गभीरैः सजलजलधरगर्जितसान्द्रमधुरैर्निःस्वनैः स्वशब्दैर्धुनीधवं नदीपतिं समुद्रं विजित्य ततः समुद्रात् मुक्ताफलानि मुक्तामणयो रत्नानि विविधजातीनि विद्रुमाः प्रवालानि तेषामावलि· श्रेणिः समग्रा समस्तापि जगृहे गृहीता । [illegible]प्रेक्ष्यते—असौ समुद्रस्तदादि त दिनमारभ्य निर्गत स्व समग्रद्रव्यं यस्मात्स नि स्वस्तस्य भावस्तया निःस्वतया दरिद्रत्वेन जडः किं कर्तव्यतामूढ आशयश्चित्तं यस्य । अथ [illegible] करिष्यते, क्व गमिष्यते, कस्य पुनः पूत्करिष्यते, कथं वा स्व प्रत्यानेष्यते इति विमर्शानभिज्ञो बभूव । डलयोरैक्यादिय घटना ॥

व्यमोचि नामुष्य कदाचिदन्तिकं रथाङ्गपाणेरिव पद्मसद्मना ।
गुणव्रजेनेव नियन्त्र्य मुक्तया वितीर्णवाचेव यदृच्छयाथ वा ॥ १३ ॥

पद्मं कमलं सद्म गृहं यस्याः सा तया पद्मसद्मना लक्ष्म्या अमुष्य कुरासाधोः कदाचिदपि [illegible] समये अन्तिकं समीपं न व्यमोचि न मुक्तम् । कस्येव । रथाङ्गपाणेरिव । [illegible] रथाङ्गं चक्रं पाणौ हस्ते यस्य तस्य कृष्णस्य स्वभर्तृत्वेन कदाचिदपि काले [illegible] श्रिया पार्श्वं न विमुच्यते नैव त्यज्यते । उत्प्रेक्ष्यते—अनेन व्यवहारिणा गुणा[illegible]गाम्भीर्यादीना रश्मीना वा व्रजेन समूहेन । 'गुणो भीमे हृषीके ज्यारज्जुशौ[illegible] । सूदेऽप्रधाने मर्यादा निर्देष्यपमत्त्वयो ॥' इत्यनेकार्थतिलकः । नियन्त्र्य [illegible] मुक्ता [illegible] । अथ वेति पक्षान्तरे । उत्प्रेक्ष्यते—यदृच्छया तन्महेभ्यभू[illegible]स्वेच्छया वितीर्णा विश्राणिता दत्ता वाक् वाग्बधो यया तादृशयेव । [illegible] ॥ इति कुरासाह ॥

[illegible] [illegible]नम्रमना पयःश्रुतं शैवलिनीपतेरिव ।
[illegible] [illegible] मुमुम्नी बभूवुर्या कुमुद्वतीव द्विजचक्रवर्तिन· ॥ १४ ॥

[illegible] मुमु[illegible] [illegible] [illegible] बभूवुर्या [illegible] ।

ेव । कुमारीव । यथा द्विजचक्रवर्तिनश्चन्द्रस्य । 'कन्दर्पेऽत्यदर्पे विकिरति किरणान्शर्वरीसार्वभौम.' इति नाटकग्रन्थे । यथा शर्वरीसार्वभौमस्तथा द्विजचक्रवर्तीति । कुमारीनी नाम प्रिया वर्तते । अमुष्य किं कुर्वतः । तनूमतां मनश्चित्तं समुत्कण्ठयतः सम्यगुत्कण्ठया स्वदर्शनात्मगुणगणाकर्णनविधायत्वात्सुत्रयेन कलितं कुर्वतः । ...व । पयःपूरमिव । यथा विधुः शैवलिनीनां नदीनां पत्युर्भर्तुः समुद्रस्य पानीयपूरं कण्ठात्कण्ठादूर्ध्वं नयति । वृद्धिमन्तं करोतीत्यर्थः । कण्ठादूर्ध्वं करोतीत्युत्कण्ठयति । 'तत्करोति तदाचष्टे' इति णिजिति पाणिनिः । सारस्वते तु 'णिजिट्करणे' इति । 'उत्कण्ठयति मा भक्तिरिन्दुरुल्लेखेव सागरम्' इति वाग्भटालंकारे ॥

चलेति विश्वे वचनीयताश्रुतेः प्रियेण बाणद्विपता तिरस्कृता ।

उदीतदुःखादिदमात्मना जनुः परं प्रपेदे किमु पद्ममन्दिरा ॥ १५ ॥

नार्यो भातीति संबन्धः । किमुत्प्रेक्ष्यते—पद्ममन्दिरा लक्ष्मीरिदमात्मना एतत्स्वरूपेण । नारीवपुषा इत्यर्थ. । परमन्यज्जनुर्जन्म प्रपेदे प्रतिपन्नवतीव । कस्मात् । उदीतदुःखात्प्रकटीभूतासातात् । 'उदीतमातङ्कितमानशङ्कित–'इति नैषधे । किंभूता । बाणनाम्नो दैत्यस्य द्विपता वैरिणा कृष्णेन प्रियेण भर्त्रा तिरस्कृता धिकृता । कस्याः । इयं श्रीश्चलास्थिरातिचपला इत्यमुना प्रकारेण विश्वे लोके जगति वचनीयताया अर्थात्लक्ष्म्या अपवादस्य श्रुतेः श्रवणात् ॥

ततं वचो यत्र घनं पदाङ्गदध्वनिश्च काञ्च्याः सुषिरं स्वनः पुनः ।

तया बभे जङ्गमरङ्गशालया किमत्र शृङ्गारनटस्य नृत्यतः ॥ १६ ॥

तया मृगदृशा नार्यादेव्या बभे शुशुभे । अत्र जगति । नृत्यतस्ताण्डवं कुर्वतः शृङ्गारनाम्नो नवरसेष्वादिभूतस्य रसस्यैव । नटस्य नर्तकस्य जङ्गमया चलन्त्या रङ्गशालया नर्तनभवनभुवेव । यत्र रङ्गशालाया वचः अर्थात्तस्या वचनं ततं वीणाप्रभृतिकं विस्तीर्णं च । च पुनर्यत्र पदाङ्गदानां नूपुराणाम् । 'नूपुरं तु तुलाकोटिः पादतः कटकाङ्गदे' इति हैम्याम् । ध्वना रावः । घनं तालप्रभृतिकं बहलं चास्ति । पुनर्यत्र काञ्च्या मेखलायाः स्वनः शब्दः सुषिरं वंशादिकं किंकिण्यादिजं च वर्तते । 'ततं वीणाप्रभृतिकं तालप्रभृतिकं घनम् । वंशादिकं तु सुषिरम्' इति हैम्याम् ॥ इति नार्यावर्णनम् ॥

जगत्त्रयीजन्मजुषां मृगीदृशां विजित्य राजीर्निजजित्वरश्रिया ।

अधारि किं मूर्धनि पद्मचक्षुषा जयाङ्कवालव्यजनं कचच्छटा ॥ १७ ॥

यया पद्मचक्षुषा कमललोचनया नार्यादेव्या मूर्धनि स्वमस्तके कचच्छटा केशपाश. 'पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे' ... 'चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः । ...' 'पाशः रचना भार उच्चयः । हस्तः पक्षः कलापश्च केशभूयस्त्ववाचकाः ॥' इति हैम्याम् । तथा छटाशब्दः समूहवाचकश्च । 'तटान्तविश्रान्ततुरङ्गमच्छट' इति नैषधे । किमुत्प्रेक्ष्यते—जयाङ्कवालव्यजनं वैरिविजयसूचकचिह्नचामरं किं धृतमिव अर्थात्स्वमस्तके । जयचिह्नं हि चामराङ्कुशादिकं मौलावेव ध्रियते । नाहदिकादीनाम्

यापि तथैव दर्शनात् । किं कृत्वा । विजित्य परिभूय । कया । निजस्यात्मनो जित्वर्या जयनशीलया श्रिया शोभया पुंवद्भावे ईकारलोपः । काः । राजीः श्रेणीः । कासाम् । मृगीदृशां हरिणनयनानां स्त्रीणाम् । किंभूतानाम् । जगतां नागलोकस्वर्लोकभूलोकानां त्रयी त्रिकं तत्र जन्मावतारं जुषन्ते भजन्ते तादृशीनाम् । त्रिभुवनोद्भवानामित्यर्थः । एतावता सुरासुरनररमणीश्रेणीर्निर्जित्य जयचामरं बिभर्तीत्यर्थः ॥

विधुं द्विधाकृत्य विधिर्व्यधत्त यल्ललाटमर्धेन शिवे न्यधात्परम् ।
न चेन्मृगाङ्कार्धधरः कथं हरः किमर्धचन्द्रोपमितं च तद्वहेत् ॥ १८ ॥

विधिर्विधाता विधुमर्थादीश्वरमस्तकस्थसपूर्णचन्द्रमादाय द्विधाकृत्य द्वौ खण्डौ विधाय अर्धेन विधोस्तदेकभागेन यस्या ललाटं भालं व्यधत्त चक्रे । अत्र गर्भितोत्प्रेक्षा । कृतवानिव । पुनः परं द्वितीयमर्धं शिवे ईश्वरे न्यधात्स्थापयामास । एवं चेन्न स्यात्तदा हरः शिवो मृगाङ्कार्धधरो अर्धचन्द्रभृत् । 'लब्धार्धचन्द्र ईशः' इति चम्पूकथायाम् । कथं केन प्रकारेण । च पुनस्तद्भालं तस्या ललाटमर्धचन्द्रोपम(मितं)मष्टमीमृगाङ्कोपमानं च कथं कया रीत्या वहेद्धरेत् ॥

मृगीदृशो हेलितकेलतीश्रियो ललाटपट्टे कुरलेन निर्ममे ।
स्मितारविन्दस्य धियेव तस्थुषा यदानने पौष्पपिपासयालिना ॥ १९ ॥

तस्या मृगीदृशो नार्यादेव्या ललाटपट्टे भालस्थले कुरलेन भ्रमरालकेन निर्ममे चभामे । 'अक्षराजवलयेन निर्ममे' इति रघुवंशे । किंभूताया मृगीदृशः । हेलिता अपगणिता केलत्याः कन्दर्पपत्न्या रत्याः श्रीः शोभा यया । 'केलतीमदनयोरुपाश्रये' इति नैषधे । उत्प्रेक्ष्यते—स्मितस्य विकसितस्यारविन्दस्य पद्मस्य धिया बुद्ध्या यदानने नार्यामुखे पौष्पस्य पुष्पाणामयं पौष्पो रसः यथा पुष्पोद्भवरजस्तथा पुष्पोद्भवो मकरन्दोऽपि तस्य पिपासया पातुमिच्छया तस्थुषा स्थितवता अलिना भ्रमरेण च । किं च पौष्पं मकरन्द इति भोजप्रबन्धादिककाव्येषु दृश्यते । तथापि सति परः पाठः—'स्मितारविन्दस्य धिया यदानने स्थितं रसस्येव पिपासयालिना' । उत्प्रेक्ष्यते—स्मितारविन्दस्येव प्रोज्जृम्भिताम्भोजस्य धिया यदानने नार्यावदने रसस्य मकरन्दस्य । 'रसो मधु मकरन्दो मरन्दश्च' इति हैम्याम् । पिपासया पानस्याभिलाषेण स्थितमर्थादागत्य अलिना भृङ्गेण स्थितं इव ॥

अमूदृशाम्भोजदृशा स भूयते न जातुचिद्यौवतनिर्मितौ मम ।
इतीव रेखेयमिदंमुखे मषेर्मिषाद्भ्रुवोर्नाभिभुवा व्यधीयत ॥ २० ॥

नाभिभुवा धात्रा इदमुखे अस्या नार्यादेव्या वदने । उत्प्रेक्ष्यते—इति हेतोर्भ्रुवोर्मिषाच्छलान्मषेर्मषिनाम्नः इयं दृश्या रेखा व्यधीयत कृतेव । इति किम् । यन्मम यौवतनिर्मितौ त्रिभुवनस्त्रीसमूहनिर्माणे अमूदृशा एतत्सदृक्षया अम्भोजदृशा पद्मलोचनया

स्त्रिया जातुचित्कदाचिदपि न भूयते स्म न जाता। त्रैलोक्येऽप्येवंविधा मया कापि युवती निर्मिता नास्तीत्यर्थः ॥

स्वकामिनीकैरविणीतनूभवे विरञ्चिना लोचनतामवापिते ।
विधातुमङ्के किमु लोलकैरवे यदास्यभावः शरदिन्दुना दधे ॥ २१ ॥

शरदिन्दुना घनात्ययसमयसम्बन्धिना चन्द्रेण यदास्यभावो नार्यास्यता दधे अङ्गीकृता । उत्प्रेक्ष्यते—लोले चपले कैरवे कुमुदे अङ्के उत्सङ्गे विधातुं कर्तुमिव । उत्सङ्गग्रहणे हेतुमाह—स्वस्यात्मन कामिन्याः प्रियायाः कैरविण्याः कुमुद्वत्यास्तनूभवे अङ्गजाते । स्वसुतयोरुत्सङ्गे करणं तु न्याय्यमेव । पुनः किंभूते कैरवे । अवापिते नीते । काम् । लोचनताम् । अर्थान्नार्यीदेव्या नेत्रत्वम् । केन । विरञ्चिना वेधसा ॥

विभाति यद्भ्रूयुगभासिनासिका विजित्य विश्वत्रितयं मनोभुवा ।
यदङ्गरुक्पुञ्जपयोधिसंनिधौ कृतो यशःस्तम्भ इव ध्वजाङ्कितः ॥ २२ ॥

यस्या भ्रुवोर्युगेन भासते दीप्यते इत्येवंशीला नासिका विभाति । उत्प्रेक्ष्यते—मनोभुवा स्मरेण यशःस्तम्भः कृतः कीर्तिस्तम्भ आरोपित इव । किंभूतः । ध्वजाङ्कितः पताकाकलितः । कस्मिन्रोपितः । यस्या नार्थीदेव्या अङ्गं शरीरं तस्य रुचां कान्तीनां पुञ्जः समूहः स एव पयोधिरतिबहुलत्वात्समुद्रस्तस्य संनिधौ पार्श्वे । किं कृत्वा । विश्वानां स्वर्भूमीपाताललक्षणानां जगतां त्रयं विजित्य निर्जीजसं स्वाज्ञावशंवदं विधाय। अपरोऽपि विजयी राजा जगज्जित्वा समुद्रतटे कीर्तिस्तम्भानारोपयतीति रीतिः ॥

विडम्बिताखण्डमृगाङ्कमण्डले कपोलपाली स्फुरतस्तदानने ।
मणीमये दर्पणिके यदोकसोरिमे रतिप्रीतिमृगीदृशोरिव ॥ २३ ॥

तस्या देव्या आनने मुखे विडम्बितं निजाश्रिया पराभूतं । [illegible] वा अखण्डः संपूर्णो मृगाङ्कस्य चन्द्रमसो मण्डलं बिम्बं याभ्यां तादृशौ कपोलपाली [illegible] स्फुरतो लसतः । उत्प्रेक्ष्यते—यदोकसोर्या नार्थी एवौको गृहं ययोस्तादृश्यो रतिप्रीत्योरिव मृगीदृशोः कामस्य कान्तयोः । एतावता या नार्थी [illegible] रतिप्रीत्योर्निवासभूमिः [illegible] प्रमोदस्य, सपत्न इत्यर्थः । इमे [illegible] मणीमये रत्नरचिते दर्पणिके आदर्शे इव । 'मणिमयो विमलदर्पणिकायाम्' इति नैषधे ॥

किमिन्दुना पाशयितुं जगत्त्रयीयुवव्रजान्वागुरिकेन(ण) रूपतः ।
स्मरेण यादःपतिपाशजित्वरौ दधे श्रुतिपाशौ सुदृशा श्रुतिद्वयी ॥ २४ ॥

सुदृशो नार्यीदेव्याः श्रुतिद्वयी कर्णयुगली । [illegible] । उत्प्रेक्ष्यते—[illegible] स्मरेण इव पाशौ [illegible] [illegible] दधे [illegible] । [illegible] यथा—स्मरेण [illegible] श्रुतिपाशौ [illegible] दधे । [illegible] । सुदृशो [illegible] [illegible] [illegible] । '[illegible]' इति [illegible] ।

दानि तथैव दर्शनात् । किं कृत्वा । विजित्य परिभूय । कया । निजस्यात्मनो जितर्या जनदर्शितया श्रिया शोभया पुंवद्भावे ईकारलोपः । काः । राजीः श्रेणीः । कासाम् । मृगीदृशां हरिणनयनानां स्त्रीणाम् । किंभूतानाम् । जगतां नागलोकस्वर्लोकभूलोकानां [illegible] त्रिके तत्र जन्मावतारं जुषन्ते भजन्ते तादृशीनाम् । त्रिभुवनोद्भवानामित्यर्थः । एतावता [illegible]रमणीश्रेणीर्निजित्य जयचामरं बिभर्तीत्यर्थः ॥

विधुं द्विधाकृत्य विधिर्व्यधत्त यल्ललाटमर्धेन शिवे न्यधात्परम् ।
न चेन्मृगाङ्कार्धधरः कथं हरः किमर्धचन्द्रोपमितं च तद्भवेत् ॥ १८ ॥

विधिर्विधाता विधुमपीदीश्वरमस्तकगमपूर्णचन्द्रमादाय द्विधाकृत्य द्वौ खण्डौ विधाय [illegible] एकभागेन यस्या ललाटं भालं व्यधत्त चक्रे । अत्र गमितोत्प्रेक्षा । [illegible] । परः परं द्वितीयमर्धं शिवे ईश्वरे न्यधात्स्थापयामास । एवं चेन्न स्यात्तदा हरः [illegible] अर्धचन्द्रभृत् । 'लब्धार्धचन्द्र ईश.' इति चम्पूकथायाम् । कथं [illegible] । न पुनर्मृगाङ्कात् तस्या ललाटमर्धचन्द्रोपम(मित)मष्टमीमृगाङ्कोपमानं च [illegible] ॥

[illegible]श्रियो ललाटपट्टे कुरलेन निर्ममे ।
[illegible] तन्मुखा यदानने पौष्पपिपासयालिना ॥ १९ ॥

[illegible] ललाटपट्टे भालस्थले कुरलेन भ्रमरालकेन निर्ममे [illegible] इति [illegible] । [illegible] मृगीदृशः । हेलिता [illegible] श्री शोभा यया । 'केलीमदनगोरुणाश्रये' इति [illegible] पद्मस्य श्रिया [illegible] यदानने [illegible] पुष्पोद्भवो मकरन्दोऽपि [illegible] अलिना [illegible] । तथापि [illegible] पाठः—'[illegible]' । [illegible] मकरन्दः [illegible] अलिना [illegible]

[illegible] ॥ २० ॥

[illegible]

रिणा जातुचित्कदाचिदपि न भूतले स्म न जाता। त्रैलोक्येऽप्येवंविधा मया कापि युवती निर्मिता नास्तीत्यर्थः ॥

स्वकामिनीकैरविणीतनूभवे विरञ्चिना लोचनतामवापिते ।
विधातुमङ्के किमु लोलकैरवे यदास्यभावः शरदिन्दुना दधे ॥ २१ ॥

शरदिन्दुना घनात्ययसमयसंबन्धिना चन्द्रेण यदास्यभावो नार्थीवदनता दधे अङ्गीकृता । उत्प्रेक्ष्यते—लोले चपले कैरवे कुमुदे अङ्के उत्सङ्गे विधातुं कर्तुमिव । उत्सङ्गग्रहणे हेतुमाह—स्वस्यात्मनः कामिन्याः प्रियायाः कैरविण्याः कुमुद्वत्यास्तनूभवे अङ्गजाते । स्वसुनयोरुत्सङ्गे करणं तु न्याय्यमेव । पुनः किंभूते कैरवे । अवापिते नीते । काम् । लोचनताम् । अर्थान्नार्थीदेव्या नेत्रत्वम् । केन । विरञ्चिना वेधसा ॥

विभाति यद्भ्रूयुगभासिनासिका विजित्य विश्वत्रितयं मनोभुवा ।
यदङ्गरुक्पुञ्जपयोधिसंनिधौ कृतो यशःस्तम्भ इव ध्वजाङ्कितः ॥ २२ ॥

यस्या भ्रुवोर्युगेन भासते दीप्यते इत्येवंशीला नासिका विभाति । उत्प्रेक्ष्यते—मनोभुवा स्मरेण यशःस्तम्भः कृतः कीर्तिस्तम्भ आरोपित इव । किंभूतः । ध्वजाङ्कितः पताकाकलितः । कस्मिन्रोपितः । यस्या नार्थीदेव्या अङ्गं शरीरं तस्य रुचा कान्तीनां पुञ्जः समूहः स एव पयोधिरतिबहुलत्वात्समुद्रस्तस्य संनिधौ पार्श्वे । किं कृत्वा । विश्वानां स्वर्भूर्मीपाताललक्षणानां जगतां त्रयं विजित्य निजौजसा स्वाज्ञावशंवदं विधाय। अपरोऽपि विजयी राजा जगज्जित्वा समुद्रतटे कीर्तिस्तम्भानारोपयतीति स्थितिः ॥

विडम्बिताखण्डमृगाङ्कमण्डले कपोलपाली स्फुरतस्तदानने ।
मणीमये दर्पणिके यदोकसोरिमे रतिप्रीतिमृगीदृशोरिव ॥ २३ ॥

तस्या देव्या आनने मुखे विडम्बितं निजश्रिया पराभवं विडम्बनां प्रापितमनुकृतं वा अखण्डं संपूर्णं मृगाङ्कस्य चन्द्रमसो मण्डलं बिम्बं याभ्यां तादृशे कपोलपाली गण्डस्थले स्फुरतो लसतः । उत्प्रेक्ष्यते—यदोकसोर्या नार्थी एवौको गृहं ययोस्तादृशयो रतिप्रीत्योरेव मृगीदृशोः कामस्य कान्तयोः । एतावता यां नार्थीं निभाल्य(ल्य) रतिश्चित्तनिर्वृतिः, प्रीतिः स्मेरः प्रमोदश्च, संपद्यत इत्यर्थः । इमे दृग्लक्ष्ये मणीमये रत्नरचिते दर्पणिके आदर्शिके इव । 'यन्मतौ विमलदर्पणिकायाम्' इति नैषधे ॥

किमिच्छता पाशयितुं जगत्त्रयीयुवव्रजान्वागुरिकेन(ण) रज्जुवत् ।
स्मरेण यादःपतिपाशजित्वरी दधे द्विपाशी सुदृशः श्रुतिद्वयी ॥ २४ ॥

सुदृशो नार्थीदेव्याः श्रुतिद्वयी श्रवणयुगली । भातीति संबन्धः । उत्प्रेक्ष्यते—स्मरेण मदनेन द्वयोः पाशयोः समाहारो द्विपाशी बन्धनग्रन्थी किं दधे धृतेव । अन्योऽप्यर्थो यथा—स्मरेण किं द्विपाशी बन्धनग्रन्थिद्वितयी किं दधे । सा का । सुदृशो नार्थीदेव्याः श्रुतिद्वयी । 'धुरमप्सरसोऽवतीर्य व शतमध्यासत तत्सखीजनः' इति नैषधे । धु-

मुत्प्रेक्ष्यते—अप्सरसोऽवतीर्य यां कुण्डिनपुरीमध्यासत । कः । तत्सखीजन'—इति तद्व्याख्या । मरेण किं कुर्वता । इच्छता वाञ्छता । किं कर्तुम् । पाशयितुं पाशे पतितान् पाशेन बद्धान् वा कर्तुम् । कान् । जगत्रयीयुवव्रजान् त्रिभुवनतरुणगणान् । किंवत् । रङ्कुवत् । या वागुरिकेण जालिकेन रङ्कून् जातिविशेषमृगान् । 'मृगभेदा रुरुन्यङ्कुरङ्कुगोकर्ण-म्बराः' इति हैम्याम् । पाशयितुं काङ्क्षता पाशो ध्रियते । किंभूता द्विपाशी । यादःपते-रुणस्य पाशस्य जित्वरी जयनशीला ॥

वियोगवत्यौपधियोषया यदाननीभवत्कान्तसितद्युति प्रति ।
स्थितस्तदङ्के प्रहितस्तनूजवत्प्रवाल आह्वातुमिवाधरोपधेः ॥ २५ ॥

वियोगो विरहो वीना भृङ्गप्रमुखखगाना योगः सम्बन्धो यस्यास्तादृश्या, औषधिरेव योषा स्त्री तया । यदाननीभवन्तं नार्यावक्त्रसपद्यमानं कान्तं स्वभर्तारं सितद्युतिं चन्द्रं प्रति आह्वातुमाकारयितुं प्रहितः प्रेषितस्तनूजवत् पुत्रवत् । प्रवालः प्रकृष्टो दक्षः । श्लेषे बवयोरैक्यात् बालः शिशुः, पल्लवश्च । उत्प्रेक्ष्यते—अधरोपधेरोष्ठकपटात् तदन्तिके चन्द्रोत्सङ्गे स्थित इव । बालः सुतः पितुरुत्सङ्गे तिष्ठतीति स्थितिरेव ॥

निपातुकेन द्विजकान्तिमिश्रितस्मितेन यस्या रदनच्छदे बभे ।
जलेन वातूलतरङ्गितात्मना सुधापयोधेरिव हेमकन्दले ॥ २६ ॥

यस्या रदनच्छदेऽधरे निपातुकेन निपतनशीलेन द्विजाना दन्ताना कान्त्या मिश्रितेन [illegible] स्मितेनेपद्धसितेन । 'ताम्रोष्ठपर्यस्तरुचः स्मितस्य' इति रघौ । बभे शुशुभे । केनेव । [illegible] । यथा सुधापयोधेः क्षीरार्णवस्य पयसा हेमकन्दले विद्रुमे दीप्यते । किंभूतेन । [illegible] तरङ्गितः कल्लोलयुक्तीभूत आत्मा स्वरूपं यस्य ॥

स्वकान्तवक्त्रामृतकान्तिदर्शनादुदन्तरुद्वेलितरागसागरात् ।
निरित्वरी विद्रुमकन्दली च यद्विलासवल्या दशनच्छदो बभौ ॥ २७ ॥

[illegible] । 'विलासो हावे लीलायाम्' इत्यनेकार्थः । तत्र 'हावः शृङ्गारभावाप्तौ रम्योक्त-[illegible] । प्रियस्यानुकृतिर्लीला विलासाङ्गेपचेष्टितैः ॥' इति तदवचूरिः । स वि-[illegible] सा यस्या विलासवल्ली दशनच्छदोऽधरो बभौ भाति स्म । उत्प्रेक्ष्यते—स्वस्या-[illegible] सुभगो योऽयमामृतकान्तेर्मुखेन्दोर्दर्शनादवलोकनात् हृदन्तर्मनोमध्ये [illegible] सञ्जातमस्मिनिति भावप्रधानो निर्देशः । तस्मादुत्क-[illegible] सागरात् निरित्वरी निर्गमनशीला विद्रुमकन्दली प्रवा-[illegible] ॥

द्विजाधिपत्यं मुख एव लभ्यते मृगीदृशोऽस्या न कुमुद्वतीपतौ ।
[illegible] दिवानिशं निपीडनाया निपतं स नीयते ॥ २८ ॥

अस्या मृगीदृशः मारलोचनाया मुखे वदने एव मुख्यतः प्राधान्यात् [illegible] पर्यभिश्रयमासे । पर कुमुद्वतीपती कुमुदिनीवल्लभे चन्द्रे न, यतस्तस्मात्कारणात् श्रीर्मुख एव । मुखशब्दः पुनरुक्तः । दिवानिशम् अहोरात्रम् [illegible] सेवायाः विषयं गोचरं नीयते स्म प्रापितः । चन्द्रस्य तु नक्षत्राणि यथा प्रत्यक्षा दृश्यन्ते, तथा न श्रियेति ॥

यदाननान्तर्वसतेः सुधारसाद्विवोद्गतः पाटल एष कन्दलः ।
विलासदोलेव निखेलितुं गिरोऽथ वा मृगाक्षीरसना स्म शोभते ॥२९॥

मृगाक्ष्या नार्यादेव्या रसना जिह्वा शोभते स्म । उत्प्रेक्षते—यस्या आननं मुखं तस्यान्तर्मध्ये वसतिर्वासो यस्य तादृशात् सुधारसादमृतनिस्यन्दादुद्गतः [illegible] वा पाटलो रक्त एव जिह्वालक्षणः कन्दलो नवाङ्कुर इव । अथ वा पक्षान्तरे [illegible] शोभाया गिरो वाग्देवताया निखेलितुमान्दोलितुं दोलान्दोलनलीला [illegible] लैव [illegible] ॥

यदीयवाचं विधिना विधित्सुना सुधागुणास्तामभिगम्य [illegible] ।
सुधाशना अध्वरभोजिनस्तदादितो नभुस्तदभावतः [illegible] ॥ ३० ॥

सुधाशना पीयूषभोजना देवास्तदादितः तद्दिनमारभ्य [illegible] तद्दिनादौ कल्पितार्थः । [illegible] शुअन्तलेवशीला अध्वरभोजिनो यज्ञाहारा बभूवुः सञ्जाता इव । [illegible] क्षारवा । [illegible] । [illegible] निर्गतरजुणो [illegible] यस्या सा । 'तपो पुष्टो' इति [illegible] । विधिना [illegible] । [illegible] वाणीम् । [illegible] ॥

[illegible] ।
इदं दृशा मा कुदृशा [illegible] ॥३१॥

[illegible]

[illegible] कान्त्या जगृहे क्रुधा यदाननेन लक्ष्मीः क्षणदापतेस्तथा ।
[illegible] कुतस्ततः सुधा निरित्वरी क्षुद्रतदङ्करन्ध्रतः ॥ ३२ ॥

[illegible] कान्त्या स्वशोभया । 'आभा [illegible] विभूषा श्रीरभिख्याकान्ति[illegible] [illegible] कान्त्या [illegible] । 'कान्तिः शोभाकामनयोः' इत्यनेकार्थ. । कामना इच्छा । [illegible] । तथा—'कान्तिः शोभाकामनयोः' इत्यनेकार्थः । कामना इच्छा । [illegible] कान्तिः' इति [illegible] । विजित्य क्षणदापतेर्निशापतेश्चन्द्रस्य [illegible] क्रुधा [illegible] कोपेन लक्ष्मीर्जगृहे आदत्ता । तथा कथम् । [illegible] तस्य चन्द्रस्य [illegible] हृदयमस्फुटन् स्फु[illegible] कारणात् क्षुद्रो [illegible] चन्द्रस्याङ्कः कलङ्कः स एव [illegible] सुधा निरित्वरी निर्गमनशीला स्यात् ॥

[illegible] मरोजमा निरोजताभाजि [illegible]ण लक्ष्मणा ।
[illegible] नाभ्रभ्रमणी कदाचन ॥३३॥

[illegible] । 'ओजो दीप्तिप्रकाशयो' । [illegible] [illegible] [illegible] ॥

[illegible] ।
[illegible] ॥ ३४ ॥

[illegible]

इति नैषधे । निभरावभृत्रुपी बिभर्ति स्म । केव । धुनीव । यथा सरित् रोधसि तटे विहसन्तीमुन्मिषन्तीं मृणालिका बिसलता धत्ते । या किं कुर्वती । अनन्यस्यासाधारणस्य लावण्यस्य रूपातिशयस्य तरङ्गाणां चङ्गतां चारुताम् । 'राजते जिनवचनपद्धतिरुक्तिचङ्गिममालिनी' इति पद्मसुन्दरकविकृतसस्कृते चङ्गशब्देन मनोज्ञ । पुनः किं कुर्वती । नितम्ब आरोहः स्त्रीकट्याः पश्चाद्भागः । 'नितम्बारोहौ स्त्रीकट्याः पश्चाज्जघनमग्रतः' इति हैम्याम् । स एव लीलाकारि विलासविधायकमर्थान्मध्यपदलोपाद्वा पुलिनं तटं बिभ्रती धारयन्ती ॥

सकुङ्कुमैतद्वदनेन निर्जितं जिगीषया तच्छलदर्शनोत्सुकम् ।
किमागतं कोकनदं तदन्तिके चकास्ति तस्या नवपाणिपल्लवः ॥ ३६ ॥

तस्या नाथीदेव्या नवन नवः स्तुतिः । 'णु स्तुतौ' । सल्लक्षणतया दातृतया वा स्तुतियुक्तो यः पाणिपल्लवः करकिसलय स चकास्ति । किमुत्प्रेक्ष्यते—कोकनद रक्तोत्पल तस्य मुखस्य समीपे पार्श्वे आगत समेतमिव । किंभूतम् । सह कुङ्कुमेन घुसृणेन वर्तते तादृशा । रक्तीभूतेनेत्यर्थ । एतस्या. कुराकान्ताया वदनेन मुखेन निर्जित पराभूतम् । 'अयमुदयति घुसृणारुणतरुणीवदनोपमश्चन्द्रः' इति विदग्धमुखमण्डनकाव्ये । तथा— 'स्पर्धामिलत्कुङ्कुमरोपभासा' इति नैषधेऽपि । अत एव । पुनः किंभूतम् । तस्य मुखस्य च्छलस्य स्खलितस्य दर्शने अवलोकने उत्सुकमुत्सुकीभूतम् । कया । जिगीषया अर्थात्स्वशत्रोस्तन्मुखस्यैव जेतुमिच्छया । प्रतिपक्षो हि छले प्राप्ते परिभूयते ॥

पृथक्पृथक्पञ्चमुखद्विषन्मुखान्निहन्तुकामेन रुषा मनोभुवा ।
शराश्रये यत्करनाम्नि कल्पिता अमी शराः पञ्च किमङ्गुलीमयाः ॥ ३७ ॥

मनोभुवा चेतोजन्मना स्मरेण यस्या हीरजनन्या करः पाणिरेव नाम यस्य तादृशे तस्मिन्वा शराश्रये तूणीरे । किमुत्प्रेक्ष्यते—अङ्गुलीमया. करशाखारूपा. पञ्च कल्पद्रुमसङ्ख्याका' अमी जनदृग्गोचरा' कल्पिता रचिता इव । स्मरेण किं कर्तुकामेन । रुषा स्वव्यापादनापादनोदितद्वेषाकोपेन पञ्चमुखः शम्भुरेव द्विषन् वैरी तस्य मुखान् पञ्चसङ्ख्याकानि वक्त्राणि । मुखशब्दः पुनपुसके । पृथक् पृथक् भिन्नानि भिन्नानि कृत्वा निहन्तुकामेन छेत्तुमिच्छता । एतावता पञ्च शिरांसि छेत्तुमित्यर्थः । मुखशब्देन शिर नमेतमेव । यथा दशमुखस्य । 'हरिहरि हरिणीदृशो निमित्त दश दशकन्धरमौलयो लुठन्ति' इति खण्डप्रशस्तौ । यथा तत्र दश मौलयस्तथात्रापि पञ्चापि मस्तकानि इति ॥

यदीयपृष्ठे कनकत्विषि सितप्रसूनशून्येतरकुन्तलच्छटा ।
शिलातले स्वर्गिगिरेरिव ग्रहाङ्किताभ्रवीथी प्रतिबिम्बिता व्यभात् ॥ ३८ ॥

कनकत्विषि काञ्चनकान्तिनि यस्या इद यदीय नाथीसम्बन्धि तच्च तत्पृष्ठं च तनोः पश्चिमः प्रदेशः । 'पृष्ठं तु चरम तनो' इति हैम्याम् । तत्र सितैर्विकस्वरैः प्रसूनैः पुष्पैः

[illegible]न्येनरा निर्भरभृता कुन्तलच्छटा केशश्रेणिर्व्यभाद्बभासे । केव । अभ्रवीथीव। ···· ········ यथा स्वर्गगिरेर्मेरोः काञ्चनेन स्वर्णत्वेन त्विषते दीप्यते इति काञ्चनत्विट् तस्मिन् तादृशे शिलातले प्रतिबिम्बिता । 'तत्कम्बुप्रतिबिम्बित किमु शरत्पर्जन्यराजि-[illegible]:' इति नैषधे । अभ्रवीथी गमनपद्धतिर्विभाति । 'वीथी वर्त्मनि पङ्क्तौ च गृहाङ्गे ना-[illegible]' इत्यनेकार्थः । किंभूता अभ्रवीथी । ग्रहैरुपलक्षणान्नक्षत्रताराग्रहैः अङ्किताः [illegible]ताः ॥

परानवाप्यान्निजवासपत्तनान्मनोभिधानान्मदनावनीभुजः ।
जगद्विजेतुं चलितस्य हृत्सुमस्रजा पुरो वन्दनमालिकायितम् ॥ ३९ ॥

[illegible] नार्यादेव्या हृत् हृदयं तत्र वक्षसि सुमस्रजा पुष्पमालया मदनावनीभुजः स्मर-[illegible] पुरोऽग्रे पुरस्ताद्वन्दनमालिकायित मङ्गल्यदामवदाचरितम् । मङ्गलाय जातमि-[illegible] । किंभूतस्य मदनस्य । चलितस्य प्रस्थितस्य । कुतः । परैरन्यराजन्यजनैरवाप्तु-[illegible] न प्राप्तमनवाप्य तस्मात्प्राप्तुमशक्यात् मनोभिधानादर्थात् नार्याचित्त-[illegible] [illegible]गीयस्य पत्तनादधिष्ठाननगरात् । राजधान्या इत्यर्थः । एतावता स्वभर्तारं [illegible] पुमा तन्मनः सर्वथापि ग्रहीतुमशक्यम् । एतेन विशेषणेन तस्याः स-[illegible] । [illegible] किं कर्तुम् । विजेतुं स्ववशीकर्तुम् । किम् । जगत् त्रिभुवनम् ॥

[illegible]निकेतनोल्लिनं अपाङ्गमाकारयितुं सुहृत्तया ।
[illegible] प्रहितोडुमण्डली विभाति यद्वक्षसि मौक्तिकावली ॥ ४० ॥

[illegible] हृदये मौक्तिकावली हारलता हारमौक्तिकपङ्क्तिर्विभाति । उत्प्रेक्ष्यते— [illegible] अपाङ्गं मच्छलाञ्छन काममाकारयितुं स्वपार्श्वे [illegible]मण्डली तारकश्रेणिरिव । किंभूतं अपाङ्गम् । यदीय नारीसं-[illegible] तत्र [illegible]शीलम् । 'भीम कृत्वाङ्गो-[illegible] ॥

[illegible] प्रभास्मपि [illegible] नदीयौ स्फुरतः सचूचुकौ ।
[illegible]नौ(णौ) सुवर्णप[illegible]कुम्भलानिव ॥ ४१ ॥

[illegible] शोभा दधतौ धारयन्तौ [illegible] स्फुरतः । किंभूतौ । सह चूचुकाभ्यां स्तना-[illegible] [illegible] [illegible] ॥

[illegible] ।
[illegible] ॥ ४२ ॥

गम्या एणचक्षुषो मृगेक्षणाया रोमावलिर्लोमलेखा । इत्युत्प्रेक्ष्यते—आत्मजन्मना स्मरेण हरिन्मणीनां मरकतरत्नानाम् । नीलरत्नघटित इत्यर्थः । सेतुः पद्येव व्यधायि निष्पादितः । कया । तनूलता नार्यीकाययष्टिः तस्या अगाधमतिशायि अलब्धमध्य तथा तरङ्गितं कल्लोलित यत् प्रभाणां कान्तीनां प्रतानं वृन्दं स एव पाथोधि समुद्र तस्य पानीयानां तितीर्षया तरीतुमिच्छया । अथ वा 'रिरसया' इति पाठे तु समुद्रजले सहावरोधेन खेलितमिच्छया । श्रूयते हि 'स्तम्भतीर्थे ग्राममोहल इति नाम्न स्वमन्दिराज्जलधिजले खेलनार्थी केनापि पातिसाहिना सेतु कारितोऽभूत्तदाकृतिरधुनापि किंचित् दृश्यते श्रूयते च' इति । अत्रोत्प्रेक्षार्थे स्मरेण, वास्तवार्थे त्वात्मजन्मना धात्रा । 'मनःशृङ्गारसङ्कल्पात्मनो योनि.' इति स्मराभिधानम् । तथा 'नाभिपद्मात्मभूरपि' इति धातुरभिधा । इद द्वयमपि हैम्याम् ॥

द्रवीभवद्भूरिसिताभ्रचन्दनप्रगल्भवाल्हीककुरङ्गनाभिभिः ।
विलिप्य काचित्कुतुकात्पृथग्वली. कदाचिदेतामिदमूचुषी सखी ॥४३॥

काचित्सखी कदाचित्प्रसाधनसमये एतां नार्यादेवीमिदमग्रे वक्ष्यमाणमूचुषी कथितवती । किं कृत्वा । कुतुकात्कौतूहलाद्वलीरुदरवर्तिमाससकोचलक्षणा रेखा विलिप्य लिप्त्वा । काभि । द्रवीभवन्त्य. सपङ्कजलभाव भजन्त्यो याः भूरि प्रचुर , सिताभ्र कर्पूरो यत्र तादृक्चन्दन श्रीखण्डम्, तथा प्रगल्भ मनोज्ञं वाल्हीक कुङ्कुमम्, तथा कुरङ्गनाभिः कस्तूरिका, ताभि. । कथम् । पृथक् एका वलीं चन्दनेन, द्वितीया वलीं कुङ्कुमेन, तृतीया वलिं कस्तूरिकयेत्यर्थ. । इद किमुवाच तदेवोच्यते ॥

त्वया स्वकीर्त्या सुमनस्तरङ्गिणी वचोविलासेन पुनः सरस्वती ।
यमस्वसा कुन्तलभङ्गिभिर्जिता भजन्त्युपेत्य त्रिवलीछलादिव ॥ ४४ ॥

हे सखि, त्वया भवत्या स्वकीर्त्या अद्वैतपतिव्रताव्रतोद्भूतात्मयशसा सुमनस्तरङ्गिणी सुरसरिद्गङ्गा । पुनर्वचोविलासेन वचनचातुर्येण सरस्वती ब्रह्मपुत्री । पुन कुन्तलाना केशाना भङ्गिभी रचनाभिर्यमस्वसा यमुना तिस्रोऽपि नद्यो जिता सन्त्य उपेत्य पार्श्वे आगत्य त्रिवलिच्छलादुदरस्थवलित्रिककपटाद्भजन्तीव सेवन्ते इव । इत्यनयासाधारणयोत्प्रेक्षया तत्तनलतायां त्रिवेणीसङ्गमोऽपि सूचितस्तेन च सा तीर्थभूतापि प्रतिपादिता । तीर्थे च महापुरुषागमन सभवत्येव । तेन महापुरुषस्य हीरविजयसूरेरत्रावतरण युक्तमेवेति ॥ युग्मम् ॥

निरीक्ष्य लक्ष्मीं निजभर्तृमातर स्थिता सदाध्यास्य विजृम्भि पङ्कजम् ।
इवानुकर्तुं रतिरात्मनापि ता यदीयनाभीनलिने निषेदुषी ॥ ४५ ॥

रति कन्दर्पपत्नी यदीयनाभीनलिने नाभीतुन्दकूपिकाकमले । 'नाभिः स्यात्तुन्दकूपिका' इति हैम्याम् । 'नाभीविलेपात्पुनरुक्तयन्तीम्' इति नैषधे । निषेदुषी स्थितवती । इत्युत्प्रेक्ष्यते—आत्मना स्वेन स्वयमपि लक्ष्मीमनुकर्तुं कमलायाः सदृशीं भवितुमिव ।

किं कृत्वा । निरीक्ष्य दृष्ट्वा । अर्थात् काम् । तां लक्ष्मीम् । किंभूताम् । निजस्तात्मनो भर्तुः कन्दर्पस्य मातरं जननीं स्वश्रूम् । पुनः किंभूताम् । स्थितां वसन्तीम् । किं कृत्वा । विजृम्भि पङ्कज स्मेरारविन्दं सद्म निलयमध्यास्य आश्रित्य ॥

अगण्यलावण्यतरङ्गचङ्गिमानुषङ्गिशोचिः सुरसिन्धुसंनिधौ ।
निखेलितुं किं पुलिनं स्मराभ्रमूप्रियस्य यस्या जघनं विधिर्व्यधात् ॥४६॥

विधिर्ब्रह्मा यस्या जघनं स्त्रीकट्या अग्रेतनप्रदेशः । 'पेडू' इति जने प्रसिद्धम् । तद्व्यधात् चकार । किमुत्प्रेक्ष्यते—स्मरः काम एवाभ्रमूप्रिय ऐरावणस्तस्य । अभ्रमूशब्दो दीर्घोकारान्तः । तस्य शास्त्रोक्तानि प्रागुक्तानि सन्ति । खेलितुं क्रीडितुं पुलिनं जलोज्झिततटमिव । कुत्र । अगण्यं प्रमातुमशक्यमेतावत्तया सम्यङ्निश्चेतुमशक्यं वा यल्लावण्यं यद्यपि 'सद्गमनसन्निरीक्षणसज्जल्पनमिति वदन्ति लावण्यम् । स्पृहणीयो रतिसुभगः स्वर्गगुणो भवति सौभाग्यम् ॥' एवं प्रतिपादितमस्ति, तथाप्यत्र तु कोऽप्यद्भुतरूपातिशय एव लावण्यमुच्यते न प्राक्तनः । वपुः सुभगता । तस्य तरङ्गाणां लहरीणाम् । 'रूपचतुरपणविभववणयौवनलहरइं जाइ । एणइ अवसरि रडापणुं पगिपगि पडकइ माइ ॥' इति दोधकेऽप्युक्तम् । चङ्गिमश्चारुत्वस्यानुषङ्गोऽस्त्यस्य चङ्गिमस्तु प्रागुक्तम् । अत्रेमन्प्रत्ययः । तादृक् । शोचिरेव कान्तिरूपा सुरसिन्धुर्गङ्गा तस्याः संनिधौ पार्श्वे ॥

अजय्यवीर्यं मृडमन्यहेतिभिर्विजित्वरीभिर्जगतोऽपि जानता ।
स्मरेण धात्रा किमु कार्यते स्म यन्नितम्बचक्रं युवयोगिधैर्यजित् ॥ ४७ ॥

स्मरेण कामेन कर्त्रा धात्रा विश्वसृष्टिकृता पार्श्वे । किमुत्प्रेक्ष्यते—यस्या नितम्बः कटीपश्चाद्भाग आरोहः एव चक्रं कार्यते स्म । कारितम् । स्मरेण किं कुर्वता । जानता अवधारयता । किं कर्मतापन्नम् । मृडमीश्वरम् । किंलक्षणम् । अजय्यं जेतुमशक्यं वीर्यं विक्रमो यस्य तम् । काभिः । अन्याभिरपराभिर्हेतिभिर्धनुर्बाणकृपाणकुन्तशक्तिप्रमुखप्रहरणैः । किंभूताभि । जगतः समस्तस्य विश्वजनस्य विजित्वरीभिर्जयनशीलाभिः । तर्हि चक्रेणापि किं भावि । अत एव किं चक्रं युवानो यावास्त्रिजगत्तरुणा योगिनः समाधिभाजः तेषां धैर्यं सत्त्वमतिशयवद्वीर्यमवष्टम्भं जयतीति । शंभुरपि योगी । अतस्तद्धैर्यविध्वसकारकं चक्रं कारितमिति ॥

करीन्द्रहस्तात्कदलीप्रकाण्डतो निरस्य कार्कश्यमसारतां पुनः ।
इमौ किमादाय परम्परोपमं यदूरुयुग्मं विधिना विनिर्ममे ॥ ४८ ॥

विधिना विधात्रा यस्या ऊरुयुग्मं विनिर्ममे कृतम् । किंभूतम् । परस्परमन्योन्यमेवोपमा सादृश्यं यस्य तत् । किमुत्प्रेक्ष्यते—इमौ करीन्द्रहस्तकदलीप्रकाण्डौ आदाय गृहीत्वा किमु स्वेच्छे । किं कृत्वा । निरस्य अपाकृत्य कर्षयित्वा । किम् । कार्कश्यं कठिनत्वम् । कस्मात् । करीन्द्रः प्रधानहस्ती भद्रजातीयगन्धसिन्धुरस्तस्य हस्तः शुण्डादण्ड-

रतस्मात् । पुनः किं कृत्वा । निरस्य अपास्य । काम् । असारताम् । कुतः । कदली-प्रकाण्डतः रम्भाद्रुमस्य मूलशाखान्तरालप्रदेशस्यान्तरालभागात् ॥

यदूरुजङ्घायुगयोर्विवृत्सतोः परस्पराद्वैतविरोधिताजुषोः ।
द्विराजताया भयतस्तदन्तरानिवासिजानू किमलक्ष्यतां गतौ ॥ ४९ ॥ ✓

यस्या ऊरुजङ्घायुगयोरन्तराले मध्ये निवासिनौ नितरां वसनशीलौ जानू ऊरुपर्वणी अलक्ष्यतामदृश्यभावं गतौ प्राप्तौ । किं कर्तुमिच्छतोः । विवृत्सतोः वर्धितुमिच्छतोः । किंभूतयोर्यदूरुयुगयोः—परस्परमन्योन्यं या अद्वैतता असाधारणत्वं तया विरोधिताः वि-रोधाय । ऊरुः जङ्घे आक्रम्य तदुपरि स्यते । इदमेव परमविद्वेषितामूलम् । तां जुषेते सेवेते । किमुत्प्रेक्ष्यते—द्वौ राजानौ यत्र तद्द्विराजं द्विराजस्य भावो द्विराजता द्वैराज्यस्य भयतो भयात् किमदृश्यतां यातावित्र ॥

रतीशगेहेऽजनि यत्र जङ्घयोर्गृहाश्रयस्थूणिकयोरिव द्वयम् ।
यदीयगुल्फावपि गुप्ततां गताविवाङ्घ्रिशोभिः सलिले निमज्जनात् ॥५०॥ ✓

यत्र देहे जङ्घयोर्द्वयमजनि । उत्प्रेक्ष्यते—रतीशस्य स्मरस्य गेहे मन्दिरे गृहाश्रययो-र्गृहाधारभूतयोः स्थूणिकयोः स्तम्भयोर्द्वयमिव । अपि पुनर्यदीयगुल्फौ नारीचरणग्रन्थी गुप्ततां प्रच्छन्नतां प्राप्तौ । स्त्रीणां गुल्फावदृश्यावेव वर्ण्येते । यथा नैषधे—'अरुन्धती [illegible] मणुरतिलक्ष्मीजम्भद्विषद्दारनवाम्बिकानाम् । चतुर्दशीयं तदिहोचितैव गुल्फद्वयाता यददृश्यसिद्धिः ॥' एतद्वृत्तिः—'वसिष्ठपत्नी च, रतिश्च, लक्ष्मीश्च, जम्भद्विषद्दारा इन्द्राणी सा च, नवाम्बिकानवदुर्गास्ताश्च, एतासामिव भैमी चतुर्दशी चतुर्दशसंख्यापूरणी [illegible] चतुर्दशी तिथिश्च तत्तुल्येत्यर्थः । तदिहास्या भैम्यागुचितैव यतो [illegible]रदृश्यसिद्धिरदृश्य-गात्रत्वानम् अन्तर्धानविधिविद्या गुल्फद्वयेनाप्ता । अरुन्धत्यादिनामग्रहणे अदृश्यसिद्धि-र्युक्तैव । चतुर्दशीतिथौ चादृश्यसिद्धिर्जायते इत्यागमशास्त्रसंप्रदायः । गुल्फयोरप्यनभिव्य-क्तत्वं सुलक्षणम्' इति । तत्रोत्प्रेक्ष्यते—अङ्घ्र्योश्चरणयोः शोचिः कान्तिरेव [illegible] पा-नीय तस्मिन्निमज्जनाद्बुडनादिव । जले निमग्नं न दृश्यते इति प्रसिद्धिः ॥

पदारविन्दोन्नतताभिरात्मनः पराजितैः कुञ्जरराजगामिनः ।
अगोपि मन्दाक्षनिरीक्षितात्मभिर्वने वसद्भिः कमठैरिवाननम् ॥ ५१ ॥

कमठैः कच्छपैराननं स्वमुखमगोपि गुप्तीकृतम् । कीदृग्विशेषणानि [illegible] । यो जले विपिने वा वसद्भिरित्यादि [illegible] । 'वा प्रस्रवणे गेहे प्रवाहेऽम्भसि वा[illegible] [illegible]ऽपि च [illegible] (प्रस्रवणे निर्झरे)' इत्यनेकार्थे । किमुत्प्रेक्ष्यते—कुञ्जरराजगामिन्याः [illegible] [illegible] पदारविन्दयोः स्वचरणयोः उन्नततानि पराजितैः [illegible] मन्दाक्षेण [illegible] [illegible] निरीक्षितो [illegible] आत्मा [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इत्यनेकार्थे । [illegible] इत्यर्थः ॥

यदीयपादौ सरलाङ्गुली द्युता करम्बितौ आंकृतिकारिनूपुरौ ।
श्रियानुयातः कमले दलद्दले मरन्दनिःस्यन्दिनदत्सितच्छदे ॥ १२ ॥

यदीयौ पादौ नार्यीसम्बन्धिनौ चरणौ श्रिया शोभया कमले पद्मे अनुयातः अनुकृतः। सदृशौ भवत इत्यर्थः। किंभूतौ पादौ। सरला अकुटिला अङ्गुल्यः पादशाखा ययोः। पुनः किंभूतौ। द्युता कान्त्या करम्बितौ व्याप्तौ। पुनः किंभूतौ। आंकृतिं रणज्झणिति शब्दं कुरुत इत्येवंशीलौ नूपुरौ मञ्जीरौ ययोः। कमले किंभूते। दलन्ति विजृम्भमाणानि दलानि पत्राणि ययोः। पुनः किंभूते। मरन्दं मधु निःस्यन्देते क्षरत इत्येवंशीले। तथा—नदन्तः शब्दायमानाः सितच्छदा हंसा ययोस्तौ पद्माकरमाश्रयः ॥

प्रभाप्रथातैलकरम्बितान्तरे यदङ्घ्रिपात्रेऽङ्गुलिवर्तिवर्तिनः ।
नखाः प्रदीपा इव विस्फुरत्त्विषोऽपुपन्विभूषामभिभूततामसाः ॥ १३ ॥

नखा अर्थान्नार्थीकामाङ्कुशाः प्रदीपा इव विभूषा शोभामपुषन् पुष्टामकार्षुः । क । यदङ्घ्रिपात्रे यस्याश्चरणनाम्नि अमत्रे भाजने । किंभूते । प्रभाणां कान्तीनां प्रथा विस्तार एव तैलं स्नेहस्तेन करम्बितमर्थात्संपूर्णमन्तरं मध्यं यस्य तस्मिन् । नखाः किंभूताः । अङ्गुलय एव वर्तयो दशास्तासु वर्तन्ते तिष्ठन्तीत्येवंशीलाः । पुनः किंभूताः । विस्फुरन्ती विद्योतमाना त्विट् ज्योतिर्येषां ते । पुनः किंभूताः । अभिभूता ध्वस्तास्तामसास्तमसां ध्वान्तानां समूहा यैस्ते । 'तामसास्तिग्मरोचिषः' इति वीतरागस्तवे ॥

व्यलीलसत्पाटलिमा पदाम्बुजद्वयस्य यस्याः सरसीजचक्षुषः ।
स्वमार्दवेनाभिभवं विधित्सतः प्रवालपुञ्जैरुपदीकृतः किमु ॥ १४ ॥

सरसीजं कमलं तद्वच्चक्षुर्लोचनं यस्यास्तादृश्या यस्याः पदाम्बुजयोश्चरणकमलयोर्द्वयस्य युगलस्य पाटलिमा रक्तता व्यलीलसद्भासते स्म । किमुत्प्रेक्ष्यते—स्वमार्दवेन निजसुकुमारतया अभिभवं पराभूतिं विधित्सतो विधातुमिच्छतः चरणारविन्दद्वन्द्वस्य प्रवालपुञ्जैः पल्लवपटलैः उपदीकृतः किमु । ढौकित इव ॥

असौ जयन्ती जलजं स्वपाणिना रदैश्च तारश्रियमात्मना रमाम् ।
मृगाङ्कमास्येन रुचा च चम्पकं स्मरस्य हेतिः किमु विश्वजित्वरी ॥ १५ ॥

असौ नार्यीदेवी । किमुत्प्रेक्ष्यते—विश्वजित्वरी जगज्जयनशीला स्मरस्य कामस्य हेतिः किमु शस्त्रमिव । जगज्जिष्णुतां दर्शयति—असौ किं कुर्वती । जयन्ती पराभवन्ती । किम् । जलजं कमलम् । केन । स्वपाणिना निजहस्तेन । पुनः काम् । तारश्रियं तारकाणां निर्मलमौक्तिकानां वा । 'तारो निर्मलमौक्तिके' इत्यनेकार्थवचनात् । यद्वा रजतानां श्रियं शोभाम् । नक्षत्रवाची तारशब्दोऽकारान्तोऽप्यस्ति । 'प्रथममुपहृत्यार्घं तारैरखण्डिततण्डुलैः' इति नैषधे । कैः । रदैर्दन्तैः । पुनः काम् । रमां लक्ष्मीम् ।

ेन । आत्मना स्वरूपेण शरीरेण वा आत्मशब्देन च वपुः । प्रागनेकार्थोक्तेन दर्शितम-स्तीति । पुनः कम् । मृगाङ्कं चन्द्रम् । केन । आस्येन वदनेन । अपि पुनः किम् । चम्पकं हैमपुष्पकम् । चम्पककुसुममित्यर्थः । जातावेकवचनम् । कया । रुचा कान्त्या ॥ इति नार्यीसर्वाङ्गवर्णनम् ॥

अथो मिथः प्रीतिपरीतदम्पती इमौ कलाकेलिविलासशीलिनौ ।
विलेसतुः केलिसरःसरिद्वनीगिरीन्द्रभूमीषु रतिस्माराविव ॥ ९६ ॥

अथो कुरानार्यादेव्योर्गुणवर्णनानन्तरं तयोर्विविधक्रीडावर्णनारम्भः । मिथः परस्परं प्रीत्या स्नेहेन प्रमोदेन वा परीतौ व्याप्तौ दम्पती स्त्रीभर्तारौ इमौ नार्यीकुराख्यमहेभ्यौ अथवा इमौ पूर्वं व्यावर्णितस्वरूपौ दम्पती नाथीकुराव्यवहारिणौ केलये क्रीडार्थं ये सरांसि पद्माकराः सरितो नद्यः वन्य उद्यानानि गिरीन्द्राः सर्वक्रीडास्पदोपेताः पर्वताः तेषां भूमीषु स्थानकेषु विलेसतुः विविधक्रीडां चक्रतुः । इमौ किंभूतौ । कलाकेलेः कामस्य विलासं लीलां शीलनौ भजत इत्येवंशीलौ । इवोत्प्रेक्ष्यते—इमौ रतिस्मरौ केलती-कामाविव ॥

सकाकतुण्डैणमदद्रवाङ्कितोरसोः परिक्षालनतः कदापि तौ ।
सुतामिवार्कस्य विहारवाहिनीं विनिर्मिमाते जलकेलिलालसौ ॥ ९७ ॥

कदापि कस्मिन्नपि प्रस्तावे दम्पती नाथीकुराख्यौ सह काकतुण्डेन कृष्णागुरुणा वर्तते तादृशस्यैणमदस्य कस्तूरिकाया द्रवः पङ्कस्तेनाङ्कितयोर्व्याप्तयोरुरसोर्वक्षःस्थलयोः परिक्षालनतो धावनतः विहारवाहिनीं विलासनदीम् । 'विहारस्तु जिनालये । लीलायां भ्रमणे स्कन्धे' इत्यनेकार्थः । 'निद्रां विहारार्धपथे गतानाम्' इति रघौ । अर्कस्य सुता-मिव यमुनामिव कस्तूरीद्रवैः श्यामलीकृतजलाम् अत एव यमुनोपमां निर्ममाते कुर्वाते । किंभूतौ । जलकेलौ सलिलक्रीडायां लालसौ लोलौ । 'लालसा लोल्ययाच्ञयोः । तृष्णाति-रेके औत्सुक्ये' इत्यनेकार्थः ॥

कुमुत्स्मिता षट्पदपङ्क्तिकुन्तला सितोत्पलाक्षी कजकुड्मलस्तनी ।
प्रियेव पाथःप्लवने सहंसिका तरङ्गबाहुः सरिदालिलिङ्ग तम् ॥ ९८ ॥

सरित् क्रीडानदी पाथःप्लवने जलकेलिसमये स्नानविधाने तं महेभ्यं कुराख्यमालिलिङ्ग । केव । प्रियेव । यथा पाणिगृहीती पत्नी स्वपतिमाश्लिष्यति । किंभूता नदी प्रिया च । कुमुत्कैरवम् । जातावेकवचनम् । तदेव तद्वद्वा स्मितमीषद्धसितं यस्याः सा । भर्त्रा श्लेष-णसमये स्त्रियाः किंचित्स्मितं जायते । पुनः किंभूता । षट्पदानां भ्रमराणां पङ्क्तयः श्रेणयस्ता एव तद्वद्वा श्यामाः कुन्तलाः केशा यस्याः । पुनः किंभूता । स्मितं विकसितं यदुत्पलं तदेव तद्वद्वा अक्षिणी चक्षुषी यस्याः । 'किमु कुवलय... सन्ति... तेमे निनार्यसि दशप-तिरहल्या तापसीं यत्सिषेवे' इति चम्पूकथायाम् । ... भकुम्भिन... कुड्मलौ कमल-मुकुलौ तावेव तद्वद्वा स्तनौ कुचौ यस्याः । पुनः ... हंसकः । 'हंसको

[illegible] हुगली नाम्नी निशो गत्रेगन्निमे पश्चिमे चतुर्थे प्रगे [illegible] तिरम्भो [illegible] यस्मात् । स इन्द्रस्तस्य कुम्भिनमैरावत [illegible] । [illegible] । स्वत एव सरस्तटाकस्त्वमवगाहते भजते इत्यो- [illegible] इन्द्रोऽकारप्रश्लेषेण अस्वप्नाना सरो नन्दीसरोनामान [illegible] इतस्ततः स्वेच्छया गच्छतीत्येवशीलः स्यात् । [illegible] । [illegible] । अतएव मुग यथा स्यात्तथा । सातेनेलर्थ । [illegible] । [illegible] । अन्तर्हितेति । यथा पद्मिनी यान्ती स्यादिति ॥

[illegible]—

[illegible] दिग्गजान्तैर्नगाद्रैश्चमैर्विराजितम् ।

[illegible] सिन्दूररुचि च विभ्रतम् ॥६७॥

[illegible] शोभितम् । इत्येतेऽपि [illegible]

[illegible] समग्रान् सर्वान् । पुण्डरीक-

[illegible] दिग्गजातिशिन [illegible]

[illegible] । बिभ्रत धारयन्तम् । काम् । [illegible]

[illegible] । कस्मिन् । स्वमूर्ति निजनभसि ।

[illegible] अभिरामम् [illegible]

[illegible] निर्मितम् [illegible] ।

[illegible] ॥ ६८ ॥

[illegible]

[illegible] ।

[illegible] ॥ ६९ ॥

[illegible]

कुतूहलेनेव महीविहारिणं महीधरं कैरवबन्धुधारिणः ।
किमेतयोर्भाग्यनभोमणेरहः शरद्विधोर्वा किमु पिण्डितं महः ॥ ७० ॥

अथ वा उत्प्रेक्ष्यते—कुतूहलेन कौतुकेन मर्त्यां पृथिव्यां विहरति खेलति इत्येवशील कैरवबन्धु चन्द्र धरतीत्येवशीलस्तस्य शम्भोर्महीधरं शैल कैलासमिव । अथ वा किम् । उत्प्रेक्ष्यते । एतयोर्नार्थीकुराल्यवहारिणोर्भाग्य पुण्य तदेव नभोमणिः सूर्यस्तस्याहर्दिनमिव । अहो भानोरुदय । तथा एतस्मात्स्वप्रात्तयोर्भाग्याभ्युदयो भविष्यति । अथ वा शरद्विधोर्मेघात्ययोदितचन्द्रस्य पिण्डित पिण्डीभूत महः कान्तिरिव ॥ आदितः पञ्चभिः कुलकम् ॥ इति गजस्वप्नः ॥

व्यमोचि तं स्वप्नमवेक्ष्य संलये विलोचनाम्भोरुहमुद्रणानया ।
पयोरुहिण्येव पयोजवान्धवोदये शचीकान्तहरिन्महीधरे ॥ ७१ ॥

अनया नार्थीदेव्या सलये निद्रायाम् । 'निद्रा प्रमीला शयनं सवेशः स्वापसलयौ' इति हैम्याम् । त पूर्वोक्त गजस्वप्नमवेक्ष्य दृष्ट्वा विलोचनाम्भोरुहयोर्नेयनकमलयोर्मुद्रणा निमीलन व्यमोचि मुक्तम् । निद्रा त्यक्तेत्यर्थः । कयेव । पयोरुहिण्येव । यथा शच्या इन्द्राण्या कान्तः शक्रस्तस्य हरित् दिक् पूर्वा तस्या महीधर उदयशैलस्तत्र पयोजबान्धवस्य भास्करस्य अभ्युदय विभाव्य पयोजिन्या पद्मिन्या नेत्रतुल्यपयोरुहयोर्मुद्रणा मुकुलन विमोच्यते ॥

सुखं शयाना निशि निद्रयाङ्गना निभाल्य तं स्वप्नमवाप संमदम् ।
यथा परब्रह्म समीररुन्ध(रोध)नैर्निबद्धपद्मासनयोगिमण्डली ॥ ७२ ॥

अङ्गना नार्थी समद हर्षमवाप लेभे । कि कृत्वा । निभाल्य दृष्ट्वा । कम् । त पूर्वव्यावर्णितस्वरूप हस्तिस्वप्नम् । किंभूता नार्थी । निशि रात्रौ निद्रया सुख सातेन शयाना स्वपन्ती । सुप्ता सतीत्यर्थः । केव । निबद्धेति । यथा निबद्ध रचित पद्मासनमासनविशेषो यैस्तादृशाना योगिना योगमार्गसाधकाना मण्डली श्रेणी समीराणा प्राणापानादीना पवनाना रुन्ध(रोध)नै रोधैः परब्रह्म परमात्मानमालोक्य परमं समद प्राप्नोति । योगिनो हि पद्मासनेनोपविश्य वातरुन्ध(रोध)नपूर्वकमेकताना योगध्यान कुर्वन्तः परमात्मानमात्मनि हृदयकमलकर्णिकाया वीक्ष्य । 'त्वा योगिनो जिन सदा परमात्मरूपमन्वेषयन्ति हृदयाम्बुजकोशदेशे' इति कल्याणमन्दिरस्तवेऽपि । 'परमानन्दभाजः सन्तो ध्यानाद्विरमन्ते' इत्येप व्यतिकरः कुमारसभवे ॥

गभीरिमाणं दधतः सपल्लवस्मितप्रसूनव्रजराजितान्तरात् ।
स्वहंसतूलीशयनोदरादसौ क्षणादुदस्थात्करिणीव सैकतात् ॥ ७३ ॥

असौ नार्थी स्वस्य हसतूलीनाम्नः शयनस्य । यद्वा आत्मनो हसाना पक्षरोमभिर्भृता तूली । अथवा हसनामलक्षणकेन पटशाटकेन । 'लयगेवाभरणालंकार मुयद' इति कल्पसू-

न्ते। '[illegible]नैवाभरणालंकारान्मुञ्चति। तान्याभरणानि कुलमहत्तरिका हंसलक्षणेन [illegible] प्रतीच्छति। तथा 'पञ्च मुट्ठिय लोयं करेइ।' शक्रोऽपि हंसलक्षणेन पटशाट-[illegible] क्षीरसमुद्रे वाहयति।'–इति कल्पवृत्तिः। निर्मिता तूली प्रस्तर-[illegible]। लोके 'तुलाइ' इति प्रसिद्धा। तत्संयुक्तस्य शयनस्य वा शय्यायाः [illegible]तत्कालमुदस्थादुत्थिता। किं कुर्वतः स्वहस्तेत्यादि। दधतो धारयतः। [illegible] निमग्नां 'मज्झत्ते गम्भीरे' इति कल्पादिमसूत्रवचनात्। पुनः [illegible]। [illegible] स्मितया कलिताः स्मिता विकसिता ये प्रसूनव्रजाः कुसुमसमू-[illegible]। यस्य। केव। करिणीव। यथा हस्तिनी उभयपक्षपरा-[illegible]। 'शय्या राजन्त्युभयपक्षविनीतनिद्राः' इति रघौ। उभ-[illegible] विनीता अपाकृता निद्रा यैः–इति तद्वृत्तिः। [illegible]ततादुत्तिष्ठते॥

[illegible] क्षिपन्ती पदपङ्क्तिमलम्।
[illegible] पतिव्रता महेभ्यपत्नी पदवीं व्यभूषयत्॥ ७४॥

[illegible] पतिं [illegible]भर्तारमुद्दिश्य। पतिपार्श्वे गन्तुकामे [illegible]। किंभूता। पतिरेव स्वभर्तैव व्रतं सतीत्वेन यस्याः [illegible] नान्यं पुमांसं कामयते सा पतिव्रता। प्रथमं तु [illegible] सतीत्वं पतिपादितम्। किं कुर्वन्ती। [illegible]। पुनः किंभूता। [illegible] [illegible]। यथा [illegible]

[illegible] ॥ ७५॥

[illegible]

[illegible] ॥ ७६॥

[illegible]

ह दृश्येषु लक्ष्मीवत्सु विभावरीवरश्चन्द्रो मृत्यो विमुद्रणाया जागरणस्य गोचर विषय न मित प्रापितः । प्रबोधित इत्यर्थः । कयेव । दिवमाननश्रियेव । यथा प्रभातलक्ष्म्यारुणांशुभिर्भानुकिरणैररविन्दानां पद्मानां वृन्दं विमुद्रणाया गोचरं गम्यते । विकास्यते इत्यर्थः ॥

सुमध्वजोर्वीधरजैत्रशस्त्रया रहस्यवत्स्वप्न उदात्तनेत्रया ।
विनिद्रता लोचनयोर्वितन्वते न्यवेदि तस्मै व्यवहारिभास्वते ॥ ७७ ॥

उदात्ते स्फारे कुमुदकमलकुवलयचकोरहरिणखञ्जनजयनशीले नेत्रे नयने यस्यास्तया तस्मै स्वकान्ताय स्वप्नो निद्रावस्थाया गजेन्द्रदर्शन न्यवेदि कथित । किंवत् । रहस्यवत् । यथा रहस्यं स्वप्रियाय निवेद्यते । तस्मै किंभूताय । व्यवहारिषु दीप्यमानत्वाद्भास्वते सूर्याय । पुनः किं कुर्वते । विलोचनयोर्नेत्रयोर्विनिद्रता निद्राभावात्स्मेरता तन्वते विस्तारयते । कुर्वत इत्यर्थः । तया किंभूतया । सुमध्वजोर्वीधरः स्मरराजस्तस्य जैत्र जगज्जयनशील यत् शस्त्रमायुध तद्रूपया ॥

किमावयोरेष फलं प्रदास्यति स्वपाणिसिक्तस्मयमानशाखिवत् ।
इदं निगद्य प्रमदाद्वसुंधराप्सरा व्यरंसीद्व्यवहारिवर्णिनी ॥ ७८ ॥

व्यवहारिण कुरासाधोर्वर्णिनी स्त्री नारी प्रमदादानन्दात् इदमेतद्वक्ष्यमाण निगद्य कथयित्वा अर्धोक्तं पुरः । व्यरंसीद्विरमति स्म । किंभूता । वसुधराया भूमेः [illegible] प्सरा' । 'वासु जलौकोऽप्सरसः' । 'सिकताः सुमन समा' । एतेषां शब्दानां [illegible] । इति लिङ्गानुशासने । इद किम् । यदेष गजस्त्वप्न आवयोर्दम्पत्योः [illegible] फल [illegible] किंवत । स्वपाणिना निजहस्तेन सिक्तो जलैनाभिषिक्तोऽत एव स्मयमान [illegible] स्थापनपाल्यपुष्पोपचितो जायमानः शाखिवृक्ष इव ॥

तदाननेन्दोरमृतोर्मिमालिनो गिर सुधाया भगिनीमिवोद्गताम् ।
निपीय कर्णैः पुटकैरिवान्तरा स कूणिताक्षः परमा [illegible] ॥ ७९ ॥

स [illegible] योऽन्तरा हृदयमध्ये परमा [illegible] [illegible]

पाषाणरेखासमश्री ॥' इति भोजप्रबन्धे [illegible] ।
तथान्यत्रापि काव्यकल्पलतायामन्या [illegible] न । यथा वा [illegible] ।
अमृतोर्मिमालिनि सुधासमुद्रे । 'तदेव गत्वा पतितं [illegible]
विधौ' इति नैषधे । अथवा 'तदाननेन्दोरमृतादि [illegible]' इति पाठः । [illegible]
तायाः । तदाननेन्दोर्वा किंभूताम् । अमृतादि [illegible] ॥

द्विजावलीचन्द्रिकयानुविद्धया स्मितश्रिया श्वेतितसृक्कदेशया ।
भुजान्तराभोगविलासिनीरिवोपचिन्वता चतुरमौक्तिकावलीः ॥ ८० ॥
निगद्यते स्म व्यवहारिणा क्षणं विमृश्य सा तेन सुकेशमानिनी ।
रथाङ्गनाम्नेव रथाङ्गबान्धवोदये रथाङ्गी सविधे समागता ॥ ८१ ॥
(युग्मम्)

तेन व्यवहारिणा कुरासाधुना क्षण स्वल्पकालं विमृश्य विचार्य सवः सु शोभनाः केशाः कुन्तला यस्याः सा सुकेशी । सुकेशीं स्वां मन्यते इति सुकेशमानिनी । 'क्यङ् मानिनोश्च' एतयोः परयोः पुंवद्भावः स्यात् । सा नारी निगद्यते स्म भाषिता । केनेव । रथाङ्गनाम्नेव । यथा रथाङ्गबान्धवस्य भानोरुदये सविधे आत्मनः पार्श्वे समागता समागता रथाङ्गी चक्रवाकी रथाङ्गेन चक्रवाकेन वाद्यते । तेन किं कुर्वता । चतुराः प्रधाना मौक्तिकावलीर्हारानिव उपचिन्वता पुष्णता । किंभूताः । भुजान्तरस्य हृदयस्याभोगो विस्तारस्तत्र विलसन्तीत्येवशीलास्ताः । तया [स्मितश्रिया ईषद्धसितलक्ष्म्या ।] किंभूतया [स्मितश्रिया ।] द्विजावलीचन्द्रिकया दन्तपङ्क्तिज्योत्स्नया । 'दशनचन्द्रिकया व्यवभासितम्' इति रघौ । अनुविद्धया व्याप्तया । पुनः किंभूतया । श्वेतितो धवलीकृतः सृक्कदेश ओष्ठप्रान्तदेशो यया । 'दन्तवस्त्र च तत्प्रान्तौ सृक्कणी' इति हैम्याम् ॥ युग्मम् ॥

अनेकपस्वप्ननिरीक्षणादवाप्स्यते तदन्वर्थसुतोऽचिरात्त्वया ।
महोदयः केवललम्भतो मुनीसमज्ययेवाम्बुजमञ्जुलोचने ॥ ८२ ॥

हे अम्बुज कमल तद्वन्मञ्जुनी मनोज्ञे लोचने नयने यस्यास्तस्याः संबोधनमम्बुजमञ्जुलोचने हे प्रिये, अनेकपस्य गजस्य स्वप्नस्य निरीक्षणाद्दर्शनात् अचिरात्स्तोककालादेव तस्यानेकपस्यान्वर्थोऽनेकान् बहून् पाति रक्षति स्वामितया ससाराद्धर्मोपदेशमहाव्रताणुव्रतादिप्रदानेन तारयतीत्यनुगतार्थो यस्य तादृश सुतः पुत्रस्त्वया भवत्या अवाप्स्यते । कयेव । मुनीसमज्ययेव । यथा मुनीना साधूनाम् । मुनीशब्दो दीर्घोऽप्यस्ति । यथा लिङ्गानुशासने— 'यानीमुन्यौ स्वातिगव्यूतिवस्त्यः' इति । भावचारित्र विना केवलज्ञान न स्यादिति मुनीपदोपादानम् । समज्यया सभया अर्थाद्वृन्देन केवलस्य एकागाकारस्य पञ्चमज्ञानस्य केवलज्ञानस्य आसादनात्तृतेर्महोदयो मोक्षोऽवाप्यते । य उदय आगत. कदापि न याति स एव महोदयः ॥

१. अयं पाठ उपचयने हेतुतया योज्यः.

जयन्तवज्जम्भनिशुम्भभामिनी पतिं चमूनामिव सर्वमङ्गला ।
वशेव शौरेः सुमनःशरासनं क्रमाच्च पुत्रं प्रसविष्यसि प्रिये ॥ ८३ ॥

हे प्रिये, गर्भत्वेन प्राप्तं च पुनः क्रमात्पूर्णसमयपरिपाट्या पुत्रं नन्दनं प्रसविष्यसि जनयिष्यसि । का किंवत् । जम्भनिशुम्भस्य इन्द्रस्य भामिनी प्रिया इन्द्राणी जयन्तवत् जयदत्तमिव । पुनः का कमिव । सर्वमङ्गला पार्वती चमूपतिं स्वामिकार्तिकमिव । पुनः का कमिव । शौरेर्विष्णोर्वशा लक्ष्मीः सुमनाः सुमनसो वा पुष्पं शरासनं धनुर्यस्य । सुमनः-शब्दस्य वा बहुत्वमिति लिङ्गानुशासने । 'पुष्पाण्यस्येषुचापास्त्राणि' इति हैम्याम् । कन्दर्पमिव ॥

इति प्रणीय श्रुतिगोचरं वचः प्रियस्य दध्रे पुलकोद्गमस्तया ।
तडिद्वतामुर्वरयेव जीवनं निपीय सस्याङ्कुरराजिराजिता ॥ ८४ ॥

तया नार्यादेव्या पुलकोद्गमो रोमाञ्चाविर्भावो दध्रे धृतः । किं कृत्वा । इति पूर्वोक्त-प्रकारेण प्रियस्य स्वभर्तुर्वचः वचनं श्रुतिगोचरं श्रवणगतं प्रणीय कृत्वा । श्रुत्वेत्यर्थः । कयेव । उर्वरयेव । यथा सर्वसस्यया भुवा तडिद्वतां मेघानां जीवनं जलं निपीय पीत्वा स-स्यानां सर्वधान्याङ्कुराणां प्ररोहाणां राजिभिः राजते इत्येवंशीला तस्या भावो राजिता सस्याङ्कुरराजिराजिता । सर्वधान्यप्ररोहश्रेणिशोभनशीलत्वं ध्रियते । 'उर्वरा सर्वसस्या भूः' इति हैम्याम् ॥

धवः सुधाधामसगोत्रवक्त्रयेत्यवादि बद्धाञ्जलिपाणिपद्मया ।
वरे सुरेन्दोरिव कान्त तावके वचःप्रपञ्चेऽव्यभिचारितास्तु मे ॥ ८५ ॥

सुधाधाम्नोऽमृतकिरणस्य चन्द्रस्य सगोत्रं स्वजनो बान्धवः । तुल्यमिति यावत् । वक्त्रं मुखं यस्यास्तया चन्द्रवदनया धवः स्वभर्ता इत्यमुना प्रकारेण अवादि भाषितः । तया किंभूतया । बद्धो रचितोऽञ्जलिर्योजनं याभ्यां तादृशौ पाणिपद्मौ करकमलौ यस्या । प-द्म(?)शब्दः पुंक्लीबलिङ्गयोः । इति किम् । हे कान्त, तावके त्वदीये वचःप्रपञ्चे वचन-विस्तारे वाग्वैभवे वा मे मम व्यभिचरति मृषा भवतीत्येवंशीलं व्यभिचारि न व्यभिचारि अव्यभिचारि तस्य भाव अव्यभिचारिता सत्यता अस्तु भवतात् । कस्मिन्निव । वरे इव । यथा सुरेन्दोरिन्द्रस्य प्रधानदेवस्य वा वरे अभीष्टवरप्रदाने अव्यभिचारिता भवे[त्] ॥

मिथः प्रथाभिर्वचसां वचस्विनौ कियच्चिरं तस्थतुरत्र दम्पती ।
वसन्तफुल्लत्सहकारकानने पिकाविवोदीरितपञ्चमस्वनौ ॥ ८६ ॥

अत्र इभ्यसद्मगृहे वचस्विनौ विशिष्टवाग्विलाससालिनौ दम्पती स्त्रीभर्तारौ मिथः परस्परं वचसां निजनिजवचनानां प्रथाभिर्विस्तारैः । वार्ताविनोदैरित्यर्थः । कियच्चिरं कियत्कालं यावत्सत्यत् स्थितौ । काविव । पिकाविव । यथा वसन्तेन मधुमासेन पु[ल्लन्तो] [illegible] सतां । मञ्जरीविराजमानानामित्यर्थः । सहकाराणाम् आम्राणां कानने उद्यान्ते [illegible]

पञ्चमनाम्नो रागस्य स्वनो ध्वनिर्याभ्यां तौ । पिकी च पिकश्च पिकौ । 'पुमान् स्त्रिया तल्लक्षणश्चेदेवविशेषः । स्त्रिया सहोक्तौ पुमान् शिष्यते न स्त्री, स्त्रीपुंसलक्षणश्चेदेव विशेषः। ब्राह्मणी च ब्राह्मणश्च ब्राह्मणौ तल्लक्षणः किम् । कुक्कुटमयूर्यौ' इति प्रक्रियाकौमुद्याम् । तेन पिकीशब्दस्य लोपे पिकाविति । किंचिच्चिरं तिष्ठतः ॥

मुदाथ नार्थी शयनीयमन्दिरं क्रमेण संक्रन्दनसद्मसुन्दरम् ।
व्यभूषयत्किंपुरुषप्रभोरिवारविन्ददृङ्मन्दिरकन्दरोदरम् ॥ ८७ ॥

अथ स्वप्नार्थकथनतत्तद्वार्तानन्तरं नार्थी मुदा प्रमोदेन क्रमेण भर्तृविसर्जनगृहमार्गगमनपरिपाट्या शयनीयमन्दिरं स्वशय्यागृहं व्यभूषयदलंकरोति स्म । किंभूतम् । संक्रन्दनः शक्रस्तस्य सद्म मन्दिरं तत्संबन्धि वा वैजयन्तप्रासादस्तद्वत्सुन्दरं रमणीयमिति गर्भितोपमा । केव । अरविन्ददृगिव । यथा किंपुरुषाणां किंनराणां प्रभोरिन्द्रस्य प्रकृष्टकिंनरस्य कस्यचिद्वा पत्नी मन्दरस्य मेरोरिन्द्रकीलशैलस्य वा कन्दराया गुहाया उदरं मध्यं विभूषयति । किंनराणामवस्थानं मन्दरकन्दरासु वर्ण्यते । यथा चम्पूकथायाम्— 'मन्दं मन्दरकन्दरासु शयितानुत्थापयन्किंनरान्' इति ॥ इति गजस्वप्नविचारकथनस्वशयनसद्मगमनम् ॥

सुखं स्वकीये सदने निषेदुषी मुदं महास्वप्नजुषं प्रपेदुषी ।
इदं कलाकेलिमरालमानसे व्यचिन्तयत्सा विदुषीव मानसे ॥ ८८ ॥

सा नार्थी मानसे स्वचित्ते इदं वक्ष्यमाणं व्यचिन्तयद् विमृशति स्म । केव । विदुषीव । यथा पण्डिता हृदये शास्त्रार्थादि विचिन्तयति । किंभूते मानसे । कलाकेलिः कामः स एव मरालो राजहंसस्तस्य क्रीडार्थं वासार्थं वा । 'मानसौकाः' इति हैमवचनात् मानसनाम्नि सरसि । सा किंभूता । सुखं निराधिव्याधिकं यथा स्यात्तथा स्वकीये निजे शयनीयसदने मन्दिरे निषेदुषी उपविष्टा । पुनः किंभूता । महानद्भुत आश्चर्यकारी यः स्वप्नः स्वापावस्थायामैरावणवारणविलोकनं तं जुषते सेवते तादृशीं महास्वप्नसंजातां मुदं प्रीतिमानन्दं प्रपेदुषी ॥

पुनः सृजन्त्या मयि मुद्रणां दृशोः परैरपस्वप्नविजृम्भितैरसौ ।
निहन्यतां मासहजैरिव ग्रहैस्त्रिकोणकेन्द्रोपगतः शुभग्रहः ॥ ८९ ॥

पुनर्द्वितीयवारं दृशोर्लोचनयोर्मुद्रणां निमीलनम् । निद्रामित्यर्थः । सृजन्त्या कुर्वत्या मयि परैरपस्वप्नविजृम्भितैर्दुष्टस्वप्नदर्शनविलसितैरसौ गजदर्शनलक्षणः शुभः स्वप्नो मा निहन्यतां मा व्यर्थीक्रियताम् । क इव । शुभग्रह इव । यथा असहजैः शत्रुभूतैर्भौममन्दादिभिर्ग्रहैः लग्नेनवपञ्चम त्रिकोणं प्रथमचतुःसप्तमदशमाख्यानि केन्द्राणि तेषु भवनेषु गतः प्राप्तः शुभो गुरुबुधादिः प्रशस्यग्रहो निहन्यते निर्बलीक्रियते ॥

इदं विमृश्येयमजूहवत्ततः सखीरनेपाः स्वकपारिपार्श्विकाः ।
द्विरेफगुञ्जारवमञ्जुवादिनीर्वसन्तलक्ष्मीः पिककामिनीरिव ॥ ९० ॥

इव परोक्षे विमृश्य विचार्य । इव नारी मुदा हर्षेण स्वकपारिपार्श्विका निजसमीपवर्तिनीः सखीः समस्ता अपि सर्वा अपि समाकारयामास । केव । वसन्तलक्ष्मीरिव । यथा विकस्वराणां भ्रमराणां गुञ्जारवेण गुञ्जितेन एव मनोज्ञ वदतीत्येवंशीला वसन्तश्रीः पिककामिनीः कोकिला आह्वयते ॥

ततो वयस्यो(?)ऽन्तिकमाश्रिता मधुव्रताङ्गनाश्चूतलतामिव सिताम् ।
वभाषिरे कोकिलकामिनीगणक्वणाद्वयीवादनिनादयानया ॥ ९१ ॥

ततः सखीसमागमनानन्तरमनया नार्यादेव्या वयस्यः (?) सख्यो वभाषिरे वादिताः । वयस्य.(?) किंभूताः । अन्तिकं नारीसमीपमाश्रिताः सेवमानाः अर्थात्सन्निधाने समागताः । का इव । मधुव्रताङ्गना इव । यथा भ्रमर्यः स्मितां विकसितां कलिकाकलितां चूतलतां माकन्दवल्लीमाश्रयन्ते । अनया किंभूतया । कोकिलकामिनीगणानां पिकीप्रकराणां क्वणेन रवेण सह अद्वयीवाद एकीभावो यस्य तादृशः कलकूजितमिवाद्वयीवादोऽसाधारणतया सम्भवन्नादृशो निनादो रवो ध्वनिर्यस्याः ॥

चकोरिके चन्द्रकले लवङ्गिके मृणालिके पुष्पलते कुरङ्गिके ।
कुरङ्गनाभे सुरभे शशिप्रभे विनोदिके मोदिनि वन्दि सुन्दरि ॥ ९२ ॥
तथा प्रथन्ता कथका यथा कथा ममाग्रतः श्रीजिनचक्रिसत्कथाः ।
यथा शुभस्वप्नदृशा मया निशापनीयते पद्धतिवत्पथिस्पृशा ॥ ९३ ॥

(युग्मम्)

पूर्वकाव्ये केवलानि सखीनां विशेषणान्येव सन्ति । चम्पूकथायामप्येवंविधान्येव सखीनामानि दृश्यन्ते । नैषधेऽपि च । एवंविधा अभिधाना हे सख्यः, यूयं ममाग्रतो मत्पुरस्तात् जिनानामृषभादीनां चक्रिणां भरतप्रमुखाणां चक्रवर्तिनां सत्कथा वार्ता । 'त्वत्सङ्कथापि जगतां दुरितानि हन्ति' इति भक्तामरस्तोत्रे । नत्रवार्तापीति तद्वृत्तिः । तथा तेन प्रकारेण प्रथन्तां विस्तारयन्तु । कथयन्त्वित्यर्थः । का इव । कथका इव । यथा कथका वाचका वक्तारः कथाः पूर्वपुरुषचरितानि प्रथयन्ति विस्तारेण वदन्ति तथा । कथम् । यथा शुभं प्रशस्तं स्वप्नं पश्यतीत्येवंशीला तथा शुभस्वप्नदृशा मया भवत्स्वामिन्या निशा अवशिष्टा रजनिरपनीयतेऽतिक्राम्यते परिपूर्णीक्रियते वा । किंवत् । पद्धतिवत् । यथा पन्थानं मार्गं स्पृशति भजतीति पथिस्पृक् पथिकी तया कथाभिर्वार्ताभिः कृत्वा पद्धतिर्मार्गोऽपनीयते उल्लङ्घ्यते तथा । 'कल्हंता, भरकन्ता, भयसतत्ता, कहाणयेलग्गा । पियदंसण ऊससिया, पन्थ वि मग्ग न याणति ॥' इति सूक्तोक्तेः ॥ युग्मम् ॥

कथानुषङ्गेषु मिथः सखीजनोदितेषु काचिद्वयसीदमालपत् ।
परेषु गान्धर्वरसेषु पञ्चमप्रपञ्चगीतिं विदुरेव गायनी ॥ ९४ ॥

मिथोऽन्योन्यं सखीरूपैर्जनैर्लोकैरुदितेषु उक्तेषु कथितेषु कथानुषङ्गेषु वार्ताप्रस्तावेषु

सत्सु काचिदनिर्दिष्टनामा वयस्या सखी इदमग्रे वक्ष्यमाणमालपत्यभाषे । केव । गायन्तीव ।
यथा परेष्वन्येषु गान्धर्वाणां गायनानां गीतानां वा । 'गीतं गानं गेयं गीतिर्गान्धर्वमिति'
इति हैम्याम् । रसेषु सत्सु विदुरा गीतिनिपुणा गायनी गान्धर्विका पञ्चमरागस्य प्राग्भारो
विस्तारो यत्र तादृशीं गीतिमालपति । गायतीत्यर्थः ॥

पुराभवन्नाभिमहीहिमद्युतेस्तनूभवः श्रीवृषभध्वजो जिनः ।
इवात्मभू राजसभावभासितः ससर्ज यो विष्टपसृष्टिमात्मना ॥ ९५ ॥

हे स्वामिनि, पुरा पूर्वं युगस्यादौ सर्वव्यवस्थाप्रादुर्भवनव्यतिकरे नवाशीतिपक्षाधिकचतुर-
शीतिपूर्वलक्षावशेषे तृतीयारकपर्यन्ते नाभिर्नामा मह्यां भूमौ हिमद्युतिश्चन्द्रस्तस्य ।
'इद तमुर्वीतलशीतलद्युतिम्' इति नैषधे । तनूभव पुत्रः श्रिया राज्यतीर्थकृल्लक्ष्म्या युक्तो
वृषभः ककुद्मान् कुरुदेशे ध्वजश्चिह्नं यस्य तादृक् जिनस्तीर्थंकरः एतावता ऋषभजिनो-
ऽभवद्बभूव । स कः । यत्तदोः सम्बन्धात् यो राज्ञा राजन्यानामिक्ष्वाकुवंशोद्भवानां
सभया समूहेन । 'सदेवमणुआसुराए परिसाए समणुगम्ममाणमग्गो' इति कल्पसूत्रे ।
'पर्षदा समूहेन' इति तद्वृत्तिः । 'सुरसमाजसमाक्रमणोचितः' । समाजः समूह इति रघु-
वंशे । 'उडुपरिषदः किं नार्हन्ती निशः किमनौचिती' इति नैषधे । नक्षत्रसमूहस्येति
तद्वृत्तिः । ततः सभावाचकाः शब्दाः समूहेऽपि दृश्यन्ते । अथवा सभाया परिषदि
अवभासितः शोभित उपविष्टः । तादृशः सन्नात्मना स्वेन विष्टपस्य विश्वस्य सृष्टिं सर्व-
व्यवहारशिल्पकलाराज्यस्थितिप्रजापालनादिसर्गं ससर्ज करोति स्म । क इव । आत्मभू-
रिव । यथा । ब्रह्मा राजसभावेन रजोगुणस्वभावेन भासितः सन् जगत्सर्गं चक्रे ॥

अमुष्य नाभेयजिनावनीनभोमणेरजायन्त शतं तनूरुहाः ।
पवेरिवास्राः क्रतवः शतक्रतोरिव च्छदानीव पुनः पयोरुहः ॥ ९६ ॥

अमुष्य एतस्य नाभेरपत्यं नाभेयो वृषभः स एव जिनानां सामान्यकेवलिनां मध्ये
अवन्या भूमेरति तेजस्त्वेन नभोमणेः सूर्यस्य । अथवा—अवनीनभोमणी राजा । 'मध्य-
दिनावधिविधेर्वसुधाविवस्वान्' इति नैषधे । तथा 'पाण्डोरवनिमार्तण्डस्य' इति पाण्डव-
चरित्रे । जिनराजस्येत्यर्थः । शतं शतसंख्याकास्तनूरुहाः । 'तनूरुहस्तु पुत्रे गरुति लोम्नि
वा' इत्यनेकार्थः । अजायन्त जाताः । कस्येव । पवेरिव । यथा वज्रस्य शतमस्राः कोट्यो
भवन्ति स्म । पुनः कस्येव । शतक्रतोरिव । यथा इन्द्रस्य शतमिताः क्रतवः प्रतिमा यज्ञा
वा आसन् । 'इन्द्रेण कार्तिकश्रेष्ठिभवे पञ्चमी प्रतिमा शतवारं व्यूढा' इति कल्पकिरणा-
वल्याम् । पुनः कस्येव । पयोरुह इवात्र षष्ठी । यथा कमलस्य शतं छदानि पत्राणि
जायन्ते ॥

जिनावनीन्दोः किल धर्मकर्मणोर्व्यवस्थयासादुदभावि भूतले ।
रथाङ्गपाथोरुहयोर्मुदोदितारविन्दिनीवल्लभमण्डलादिव ॥ ९७ ॥

मिलतीति श्रूयते निश्चितं वा । भूतले भरतक्षेत्रक्षोणीमण्डले अस्माज्जिनावनीन्दोरेतस्मादृषभतीर्थंकरात्सर्वं सुकृतं कर्म कृषिवाणिज्यादि तयोर्व्यवस्थया विवेकेन उदभावि प्रकटीभूतम् । कस्मात्क इव । उदितादभ्युदयं प्राप्तादरविन्दिनीवल्लभस्य पद्मिनीपतेर्भानोर्मण्डलाद् बिम्बात् रथाङ्गश्चक्रवाकः पाथोजं कमलम् । जातिवाचित्वादेकवचनम् । तयोर्मुदा हर्षेणोद्भूयते । यतो रथाङ्गानां प्रियाभिर्वियोगः कमलानां संकोचश्च रात्रौ भवेत्ततो दिवसे हर्षः । मुदेति कर्तृपदं तृतीयान्तम् ॥

बभूव नाभेयविभुः स आदिमः क्षितौ समग्रावनिभामिनीभुजाम् ।
पुलोमजाप्राणपतेर्मतङ्गजो महामृगाणामिव दानशालिनाम् ॥ ९८ ॥

हे नार्गदेवि, क्षितौ पृथिव्यां स पूर्वोक्तस्वरूपो नाभेय एव विभुः स्वामी ऋषभदेवः । समग्रा ये अवनीं भूमीमिव भामिनीं भुञ्जन्ति इति अवनिभामिनीभुजः । 'वसुमतीयुवतीभुजः' तथा 'यामिनीकामिनीपतिः' इत्यादि काव्यकल्पलतायाम् । राजानस्तेषां मध्ये आदिमः प्रथमः । अस्यामवसर्पिण्यां प्रथमं श्रीऋषभदेवस्यैव राज्यस्य जातत्वात् । शक्रेण प्रथमम् ऋषभदेवस्य राज्याभिषेकः कृत इति । क इव । मतङ्गज इव । यथा पुलोमजाया इन्द्राण्याः । 'हृष्यन्मुहुर्लोम पुलोमजायाः' इति नैषधे । प्राणपतिर्भर्ता शक्रस्तस्य गज ऐरावणः स महामृगाणां हस्तिनाम् आदिमो जज्ञे । तथा च चम्पूकथायाम्—'नारायणनाभ्यम्भोरुहकुहरकुटीमधिशयानस्य वेदत्रियां निगदतो भगवतः पितामहस्य बृहद्रथान्तरविकीर्णाभासनामानि सामानि गायतः सामशीकरसनिष्यन्दादुदपद्यन्त ऐरावतसुप्रतीकप्रभृतयोऽष्टौ दिग्गजेन्द्राः । तेभ्योऽभवन् भद्रमन्द्रमृगसंकीर्णजातयो गिरिचरनदीचरोभयचारिणः करिणः । प्रसिद्धं चैतत्सामजा गजा इति । केचित्पुनरन्यथा कथयन्ति । किल सकलसुरासुरकरपरिघपरिवर्त्यमानमन्दरमन्थानमथितदुग्धाम्भोधेरजनि जनितजगद्विस्मयोल्लसल्लक्ष्मीमृगाङ्कसुरभिसुरद्रुमधन्वन्तरिकौस्तुभोच्चैःश्रवसा सहभूः शशधरकरकान्तिरैरावतः । तत्प्रसूतिरशेषवनान्यलंकरोति' इति । किंभूतानां नृपाणां च गजानां च । दानैर्विश्राणनैर्मदाम्बुभिश्च शालन्ते शोभन्ते इत्येवंशीलाः ॥

पयोधिपुत्रीतनयावनीपतेरिवानुबिम्बेषु महीविहारिषु ।
शताङ्गजातेषु तदादिमप्रभोर्बभूव मुख्यो भरताभिधोऽङ्गजः ॥ ९९ ॥

तस्य पूर्ववर्णितस्वरूपस्य आदिमप्रभोर्ऋषभदेवस्य शतसंख्येष्वङ्गजातेषु भरत इत्यभिधा नाम यस्य तादृशोऽङ्गजः पुत्रो मुख्यः प्रथमः श्रेष्ठो वा बभूव । उत्प्रेक्ष्यते । शताङ्गजातेष्वनुबिम्बेष्विव । कस्य । पयोधेः क्षीरसमुद्रस्य पुत्री नन्दना लक्ष्मीस्तस्यास्तनयः कामः स एवावनीपती राजा तस्य । किंभूतेष्वनुबिम्बेषु । मह्यां भूमौ विहरन्ति क्रीडन्तीत्येवंशीलेषु । शतमपि सुताः स्मरप्रतिकृतय इव दृश्यन्ते इत्यर्थः ॥

यदीययात्रासु चमूसमुत्थितैर्दिवस्पृथिव्योः प्रविसारिपांसुभिः ।
अहस्त्रियामीयति पद्मिनीपतिः पतङ्गति ध्वान्तति तत्प्रभाभरः ॥१

यस्येमा यदीयास्तासु भरतचक्रिसंबन्धिनीषु यात्रासु दिग्विजयकृतप्रयाणेषु सम्मुत्थितैश्चतुरङ्गचक्रचलनादुद्धूतैरुद्गीनैर्वा दिवस्पृथिव्योराकाशभुवोः प्रविसरन्ति विस्तरन्तीत्येवंशीलैः पांसुभिर्धूलीभिरहर्दिवसस्त्रियामीयति निशेवाचरति । निःशेषतया रविप्रकाशस्य रुन्धनात् । पुनः पद्मिनीपतिः भास्वान् पतङ्गति खद्योत इवाचरति । किंचिद्दृश्यमानत्वेन । 'सर्वप्रातिपदिकात् क्विप् वा आचारे' इत्येके । तेन कृष्णवदाचरतीति कृष्णति' इति प्रक्रियाकौमुद्याम् । तथा पतङ्गति । पुनस्तस्य भानोः प्रभामण्डलान्तरति अन्धकार इवाचरति । भासां श्यामीभूतत्वेन ॥

हरेर्महिष्यां हरिति प्रयातवान्य आदितः सादितगोत्रशात्रवः ।
पतिः सुराणामिव दानवारियुग्गजेन्द्रसिन्धूद्भववाजिराजितः ॥ १०१ ॥

[illegible] आदितो दिग्विजयकरणव्यतिकरे प्रथमतो हरेरिन्द्रस्य महिष्यां [illegible] हरिति दिशि । प्राच्यामित्यर्थः । 'निजमुखमितः स्मेरं धत्ते हरेर्महिषी हरित्' इति [illegible] । प्रयातवान् गतः । क इव । सुराणां पतिरिव । यथा शक्रः पूर्वां दिशं प्रा[illegible] । किंभूतो यः शक्रश्च । सादितं हतं गोत्रं वंशो येषां तादृशाः शा[illegible] । यद्वा सादिता निर्मूलमुच्छेदिताः गोत्रसहिताः सवंशाः शात्रवाः [illegible] । पक्षे—सादिता गोत्राः पर्वता एव शात्रवो येन । पुनः किंभूतः । दान[illegible] योगं प्राप्नुवन्तीति दानवारियुजो निर्यद्बहुलमदसलिला ये गजेन्द्राः [illegible] सिन्धुराः [तै.] सिन्धुदेशे उद्भव उत्पत्तिर्येषां तादृशैर्वाजि[illegible] शोभितः । पक्षे—दानवानां दैत्यानामरिभिर्वैरिभिर्युनक्तीति । दै[illegible] । तथा गजेन्द्र ऐरावणः सिन्धूद्भवः समुद्रोत्पन्न उच्चैःश्रवा अश्वः तेन च [illegible] । '[illegible] शीतमयूखसहोदर हसन्तमुच्चैःश्रवसः श्रिय हयम्' इति [illegible] ॥

[illegible] ध्वजदण्डशोभीकृतस्फुरत्काञ्चनकुम्भकान्तिभिः ।
[illegible] शिरो तनोतीव सविद्युदम्बुदम् ॥ १०२ ॥

[illegible] उत्प्रेक्ष्यते । सविद्युदम्बुदं त[illegible] [illegible] । अञ्जननामा [illegible] [illegible] [illegible]

[illegible] ॥ १०३ ॥

भूरिधूलीपटलैर्धुरो वभे । उत्प्रेक्ष्यते । इति हेतोः विवर्णता विच्छायता श्यामत्वं निषेवे भेजे । सेवितं धृतमित्यर्थः । इति किम् । यदस्मात्कारणादस्मदाश्रया वयमेवाश्रयो निवासस्थानं शरणं वा येषां तादृशा इमे लक्षमिताः शतसहस्रसंख्याकाः क्षितिक्षितो राजानः । अन्ते अर्यादासुधीऽवमाने भवामान्तिमां चरमां सङ्ग्रामादिना मरणलक्षणां दशामवस्थामप्राप्स्यन्ति लप्स्यन्ते ॥

चमूध्वनिः प्राग्गिरिकंदरोदरे प्रियोपगूढं सुखसुप्तकिंनरान् ।
इदं यशो गापयितुं गुहागतप्रतिस्वनैर्जागरयन्निवोद्गतः ॥ १०४ ॥

अस्य भरतचक्रिणश्चमूध्वनिर्गजवाजिरथपत्तिचतुरङ्गकटककोलाहलशब्द उद्गतः प्रादुर्भूतः । उत्प्रेक्ष्यते । प्राग्गिरेः पूर्वाचलस्योदयाद्रेः कंदराणां गुहानाम् उदरे मध्ये प्रियोपगूढं प्रिया किंनरीमुपगूह्यालिङ्ग्य । 'कषपर्थे समासे णमुल्' इति प्रक्रियाकौमुद्याम् । चिरविरचितविविधनिधुवनविनोदखेदनिद्रालुतया क्रीडारसिकतया च स्वस्वसुखेन निरातङ्कया सुप्तान् किंनरान् प्रति इदं यशो भरतचक्रिकीर्तिं गापयितुं गानविषयां कारयितुं गुहासु गह्वरेषु गतैः प्राप्तैः प्रतिस्वनैः प्रतिशब्दैः कृत्वा जागरयन् प्रबोधयन्निव विनिद्रान् कुर्वन् उत्थापयन्निव ॥

प्रगल्भफालैर्गगने नखैः पुनर्महीतलस्योत्खननैर्हयव्रजः ।
जय स्रज स्वर्बलिवेश्मनोर्द्वयोरथेति संज्ञापयति स्वयं पतिम् ॥ १०५ ॥

हयव्रजो वाजिव्रातो गगने नभोङ्गणे प्रगल्भफालैः प्रकृष्टप्रकर्षोल्ललनैरुधैरुड्डयनैर्वा पुनर्नखैः खुरैर्महीतलस्य भूमेर्मण्डलस्य अधःप्रदेशस्य उत्प्राबल्येन खननैः क्षोदनैः । उत्प्रेक्ष्यते । य पतिं भरतचक्रिणं स्वं स्वामिनमित्यमुनाकारेण संज्ञापयतीव । इति किम् । यत् हे सार्वभौम, भूमिस्त्वया सर्वापि साधिता । अथ स्वः स्वर्लोकः, बलिवेश्म पातालम्, तयोर्द्वयोस्त्वं जयं स्रज साधय । स्वर्गपाताले अपि भूमिवत्स्वायत्तीकुरु इत्यर्थः ॥

पयोधिरोधःस्थलरोधिभिः प्रभोरसर्जि गर्जाञ्जनबन्धुसिन्धुरैः ।
चराचरे वर्षितुमुत्सुकैरितः किमम्बुदैरम्बुजिघृक्षयागतैः ॥ १०६ ॥ ✓

प्रभोर्भूतक्षेत्रस्वामिनो भरतभर्तुरञ्जनस्य कज्जलस्य श्यामत्वेन बन्धुभिस्तुल्यैः । अथवा अञ्जनाचलस्य श्यामत्वेन तुङ्गत्वेन वा सदृशैः । अथवा अञ्जनाद्रेः सहोदरैरन्यैरञ्जनाचलैरिवेत्यर्थः । तादृशैः सिन्धुरैः गन्धगजैर्गर्जा बृंहितं गर्जितमसर्जि चक्रे । किंभूतैः सिन्धुरैः । पयोधेः समुद्रस्य रोधस्तटस्तस्य स्थलं वेलाभूमिं रुन्धन्तीत्येवंशीलैः । उत्प्रेक्ष्यते । इतः समुद्रादम्बुजिघृक्षया पानीयानां ग्रहणेच्छया आगतैः किम् अम्बुदैर्मेघैरिव । किंभूतैः । चराचरे सर्वजगति भूमीमण्डले वर्षितुं जलवृष्टिं विधातुमुत्सुकैरुत्कण्ठितैः ॥

इवेक्षुडिम्भान्क्षितिरक्षिणो महौजसा समुत्खाय पुनः प्ररोपयन् ।
स पूर्वपाथोनिधिसैकतक्षिति(तौ) क्षितेर्विवोढा व्रजति स्म सस्मयः १०७

स क्षितेर्भूमेर्विवोढा भर्ता भरतभूपतिः पूर्वपाथोनिधेः प्राचीसमुद्रस्य । 'पूर्वपर्वततिरोहितात्मनः' इति वीरधवलनृपपुरोहितसोमेश्वरभट्टविनिर्मितवस्तुपालकीर्तिकौमुदीसोदरसुरथोत्सवकाव्ये । सैकते(तक्षितौ) जलोज्झितप्रदेशे व्रजति स्म जगाम । किंभूतः । सह स्मयेन गर्वेण वर्तते यः स सस्मयः । किं कुर्वन् । महौजसा सर्वेभ्यः सातिशायिना षट्खण्डमण्डितभरतभूमीवलयोद्भवयावद्वाजिवारणवेसरसैरभकरभवृषभयुगलमण्डलाकलितसबालवृद्धवयस्थवशासखपुरुषपौरुषानाक्रमणीयेन पराक्रमेण अधिकप्रतापेन वा । ओजःशब्देन प्रतापोऽपि कथ्यते । यथा नैषधे—'तदोजसस्तद्यशस स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा । तनोति भानोः परिवेषकैतवात्तदा विधिः कुण्डलना विधोरपि ॥' इति । क्षितिरक्षिणो भूपालान् । 'निपीय यस्य क्षितिरक्षिणः कथाः' इत्यपि नैषधे । समुत्खाय राज्याद्भ्रंशयित्वा । पुनः पश्चात्प्ररोपयन् । राज्यस्थाने वा स्थापयन् । कानिव । इक्षुडिम्भानिव । यथा कश्चित्कृषिकः इक्षूणामल्पपत्रकाणां डिम्भान् प्ररोहान् उत्खाय उप्तस्थानकादुत्खन्यान्यस्मिन्स्थाने प्ररोपयति । 'पलालजालैः पिहितेक्षुडिम्भः' इत्यपि नैषधे ॥

अजिह्मता सुह्मनृपैर्बिले बिलेशयैरिवैतद्वसुधाधवे दधे ।
विनम्रता च ध्रियते स्म वेतसै रये स्रवन्त्या इव भूरिवेतसैः ॥ १०८ ॥

एतद्वसुधाधवे एतस्मिन् भरतभूपाले सुह्मनामा देशस्तन्नायकैः सुह्मराजैरजिह्मता तरलत्वं दधे धृतं तत्कालमेवागत्य प्रणेमे । कैरिव । यथा बिलेशयैः भुजङ्गमैर्बिले भूगतरन्ध्रे स्वनिवसनस्थाने प्रवेशसमये अजिह्मता अवक्रत्वं ध्रियते । च पुनः अस्मिन् नृपे भूरिवैतसैर्वेतस्वदेशभूपालैर्विनम्रता विशेषेण नमनशीलत्वं ध्रियते स्म । कैरिव । वेतसैरिव । यथा स्रवन्त्या नद्या रये प्रवाहे मध्ये तटे वा उद्गमनशीलैर्वेतसनामवृक्षविशेषैर्विनम्रता ध्रियते ॥

अवापितो गोचरतां स मागधैरिव स्तवस्य प्रमदेन मागधैः ।
सृजद्भिरिन्द्रोऽद्रिगणैः कलिं गजैरिवोपलै रुद्धनतः कलिङ्गजैः ॥ १०९ ॥

स भरतचक्री मागधैर्मगधदेशोद्भवभूपैः प्रमदेन हर्षेण स्तवस्य स्तुतेर्गोचरतां विषयत्वम् । 'द्वीपाधिपानयनयोर्नय गोचरत्वम्' इति नैषधे । अवापितः लम्भितः । कैरिव । मागधैरिव । यथा मागधैर्बन्दिजनैश्चक्रवर्ती स्तूयते । पुनः कलिङ्गदेशजैर्भूपैः रुद्धनतः पूर्वं रुद्धः पश्चान्नतः नमस्कृतः । 'पीतप्रतिबद्धवत्साम्' इति रघौ । 'पूर्वं पीतः पश्चात्प्रतिबद्धो वत्सो यस्याः सा' इति तद्वृत्तिश्च । "पूर्वकालैकजरत्पुराणनवकेवलाः समानाधिकरणेन' एते समानाधिकरणेन समस्यन्ते स तत्पुरुषः । भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे प्रवृत्तिः समानाधिकरणम् । पूर्वकालार्थस्तु अपरकालार्थेन । यथा स्नातानुलिप्तः । पूर्वं स्नातः पश्चादनुलिप्तः । तथा 'तत्पुरुषः समानाधिकरणः कर्मधारयः' । समानाभिधेयो

यस्तत्पुरुषः न कर्मधारयादयः स्यात् । पीतश्वासौ प्रतिबद्धश्च । तथा [illegible]-
श्च । तथा [illegible] । इत्येषोऽपि विग्रहस्तेन कर्मधारयगर्भतत्पुरुष समास "
इति प्रक्रियाकौमुद्याम् । किं कुर्वन्ति । गजः साधनभूतैर्हेतुभिः [illegible]
कुर्वन्ति । कैरिव । [illegible] । यथा पर्वतप्रकरैः [illegible] । [illegible]
[illegible] स्थयते प्रणम्यते च ॥

चतुर्दिशामप्ययमर्णवावधीनिति प्रदेशान्ध्वजिनीभिरानशे ।
विभासिताभिः सितसिन्धुरश्रिया यथाभ्रिकाभिः प्रमदस्य [illegible]॥११०॥

अथ भरतसार्वभौम इत्यमुना प्रकारेण ध्वजिनीभिः सेनाभिः [illegible]
क्षिणपश्चिमोत्तरलक्षणानां दिशश्च चतुर्दिशामाम् । [illegible] । [illegible]
[illegible] । प्रदेशान् विभागान् आनशे व्याप्नोति स्म । [illegible]
समुद्रोऽवधिर्मर्यादा यस्य । अथवा अर्णवाः [illegible] समुद्राः । '[illegible]
[illegible]' इति रघुकाव्ये । तथा '[illegible] समुद्रौ [illegible]
[illegible] । दान दया सूनृतमातिथेयी चतुर्णां रक्षणमाविरासीत् ॥' इति [illegible] ।
'[illegible] रक्षिताः कीर्तय एव दारा यस्य । [illegible]
णामन्त पुरे दान, कृपा, सत्यवचनम्, आतिथ्यक्रिया, एतच्चतुर्णां [illegible]
[illegible] । [illegible] इति [illegible]
[illegible] समुद्रा मर्यादा येषां ते । [illegible] । [illegible]
[illegible] सिन्धुराणां हस्तिनां श्रिया शोभया विभासिताभिः [illegible] ।
[illegible] इव । यथा [illegible] ऐरावणेन । '[illegible]
[illegible] । [illegible] हस्ती [illegible]
[illegible]' इति [illegible]वचनात् । [illegible]
[illegible]प्रदेशान्व्याप्नोति । [illegible] ॥

[illegible] वेलातटतः [illegible] ।
गभीररावैरुदरं भरन्मुवो [illegible] ॥१११॥

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥

स चक्रिणां भारतभूमिभामिनीविशेषकाणां वृषभाङ्गजोऽग्रणीः ।
तदीयवत्सेव जिनावनीभुजामभूत्सुरश्रेणिनिषेवितक्रमः ॥ ११२ ॥

स जगद्विख्यातो वृषभस्यादिदेवस्याङ्गजः सूनुर्भरतचक्री भारत भरतक्षेत्रं तस्य भूमिः [illegible] भामिनी स्त्री तस्या विशेषकाणा तिलकाना भरत-सगर-मघवा-सनत्कुमार-शान्ति-[illegible]-अर-सुभूम-पद्म-हरिषेण-जय-ब्रह्मदत्ताभिधानाना द्वादशसंख्याकाना चक्रिणां मध्ये [illegible] प्रथमो वा अभूद्बभूव । क इव । तदीयवत्सेव । यथा तस्य भरतस्याय [illegible] पिता युगादिदेवः । जिनानां सामान्यकेवलिनाम् । अथ वा ऋषभ-अजित-[illegible]-अभिनन्दन-सुमति-पद्मप्रभ-सुपार्श्व-चन्द्रप्रभ-सुविधि-शीतल-श्रेयास-वासुपूज्य-वि-[illegible] शान्ति-कुन्थु-अर-मल्लि-मुनिसुव्रत-नमि-नेमि-पार्श्व-वर्धमाननाम्ना चतुर्वि-[illegible] मध्ये आदिम अजायत । किंभूतो भरतस्तत्पिता च । सुराणा सौ-[illegible] प्रमुखाना चतुःषष्टिदेवेन्द्रादीना च श्रेणिभिर्निषेवितौ परिचितौ क्रमौ [illegible] ॥

स आदिमोद्धारकरो जिनालयं व्यधापयन्मूर्धनि सिद्धभूभृतः ।
[illegible]पि सार्वभौमताममुष्य वक्तुं किमु हेमशेखरम् ॥ ११३ ॥

[illegible] पर्यन्ते । प्रथमस्योद्धारस्य चैत्यस्थापनारूपस्य कर्ता [illegible] यो भरतचक्री सिद्धभूभृतः शत्रुंजयस्य मूर्धनि ऋषभकूटनामनि शिखरे [illegible] प्रासाद व्यधापयद्बार्धकिरत्नपार्श्वे कारयति स्म । किमुत्प्रेक्ष्यते । [illegible] समग्रेषु त्रिजगद्वासिषु तीर्थेषु सार्वभौमता चक्रवर्तित्व वक्तु क-[illegible] । हेमशेखर सुवर्णोत्तम किमु कारयति स्म ॥

[illegible] कृत्यपाकयोरमूल्यमाणिक्यविनीलरत्नयोः ।
[illegible] कारिते [illegible] भरतावनीश्रियः ॥ ११४ ॥

[illegible]

[illegible] ॥ ११५ ॥

[illegible]

विंशतेस्तीर्थकृतामृषभादीनां वर्धमानान्तानां जिनानां गृहं प्रासादं व्यधापयत्कारितवान् । किं तत् । शाश्वतसार्ववेश्मवत् सिद्धायतनमिव । तच्चैत्यमद्य यावदद्यतनं दिवसं मर्यादीकृत्य वितिष्ठते स्थितमस्ति । किंवत् । ध्रुववत् । यथा ध्रुव उत्तानपादजस्तारकोऽद्याप्याकाशे विद्यते ॥

परान्परःकोटिजिनालयानयं हिरण्यमाणिक्यमयानचीकरत् ।
जिनेन्द्रमूर्तीरपि कोटिशस्तरीरिवाङ्गिनां संसृतिसिन्धुपातिनाम् ॥ ११६ ॥

अयं भरतचक्रवर्ती परान् अन्यान् परःकोटिजिनालयान् कोटेः परे परःकोट्यः । कोटिश इत्यर्थः । तादृशान् प्रासादानचीकरत् कारयामास । किंभूतान् । हिरण्यं सुवर्णं माणिक्यानि रत्नानि मणिविशेषा वा तन्मयान् तै रचितान् । अपि पुनः कोटिशो जिनेन्द्राणाम् अतीतानागतवर्तमानचतुर्विंशतितीर्थकृतां मूर्तीः प्रतिमाः कारयति स्म । उत्प्रेक्ष्यते । संसृतिः संसारः स एव सिन्धुः समुद्रः तत्र रागद्वेषादिना पतनशीलानामङ्गिनां प्राणिनां तरीस्तरीः नाव इव ॥

नृपोऽयमाद्योऽजनि संघनायकः कृशाङ्गि शत्रुंजयरूप्यशैलयोः ।
क्षमाभृतां भोगभृतां च योऽग्रणीरभूत्पुनः कुण्डलिनामिवाधिभूः ११७

हे कृशाङ्गि तन्वङ्गि, अयं नृपो भरतभूमीन्द्रः शत्रुंजयरूप्यशैलयोर्विमलाचलाष्टापदयोराद्यः प्रथमः संघनायकः संघपतिरजनि संजातः । पुनर्यः क्षमाभृतां राज्ञां भोगभृतां भोगिनाम् । 'भोगः श्रीभरतेश्वरे प्रतिपदं लब्धिस्तथा गौतमे' इति सत्सायचनात् । भोगो राज्यादिसुखं सर्पदेहश्च राज्यादिसर्वसुखभाजां वा अग्रणीर्मुख्योऽभूद्बभूव । क इव । कुण्डलिनामधिभूरिव । यथा नागनाथः शेषः पृथ्वीधारिणां कुलपर्वतादीनां तथा भोगं सर्पकायं बिभर्तीति भोगभृतस्तेषां वासुकिप्रमुखनागानामग्रणीः । शैला हि पादैर्धरां दधते, शेषस्तु सहस्रसंख्यैः स्वफणामण्डलैः सर्वां वसुंधरां धत्ते । अतोऽग्रणीत्वम् ॥

असौ प्रकामप्रमदं ददानया प्रसूतया ध्यानसुधापयोधिना ।
शिवश्रिया अग्रजयेव केवलश्रिया श्रितो दर्पणिकानिकेतने ॥ ११८ ॥

असौ भरतचक्री दर्पणिकानिकेतने आदर्शगृहे । 'यन्मार्ता विमलदर्पणिकायाम्' इति नैषधे । केवलश्रिया केवलज्ञानलक्ष्म्या श्रितो भेजे । किंभूतया । प्रकामं सर्वातिशायिनमनन्तं प्रमदं हर्षम् । परमानन्दमित्यर्थः । ददानया यच्छन्त्या । श्रीरपि प्रकृष्टस्य मानपादाम्भोजभक्तस्य कामस्य प्रकृष्टस्य स्वाङ्गजातस्य प्रमोदं दत्ते । पुनः किंभूतया । ध्यानं शुक्लप्रणिधानं तदेव सुधापयोधिः क्षीरसमुद्रः शुक्लध्यानस्य शुक्लत्वात्क्षीरसमुद्रत्वात् ध्यानसुधाम्बुधिः । 'शुक्लश्रेणिसुधाम्भोधेः पाण्डोः सागरोजस' इति पाण्डवचरित्रे । तेन प्रसूतया जनितया । श्रीरपि दुग्धाब्धेर्जाता । उत्प्रेक्ष्यते । शिवश्रिया मोक्षलक्ष्म्या अग्रजया ज्येष्ठभगिन्येव प्रथमोत्पन्नत्वात् केवलज्ञानानन्तरं मोक्षप्राप्तेः ॥

दिगन्तवासं किमपास्य काश्यपीविलासशीलैः ककुभां पुरंदरैः ।
तदष्टपट्टक्षितिपैरवाप्यतामुनेव सीमन्तिनि केवलेन्दिरा ॥ ११९ ॥

'केशेषु वर्त्म सीमन्त' इति हैम्याम् । प्रशस्यः सीमन्तोऽस्त्यस्यास्तस्याः संबोधनं हे सीमन्तिनि, तस्य भरतस्य अष्टसंख्याकैः पट्टेषु पदेषु क्षितिपैः । अथ वा । तत्पट्टधारिभि[illegible] [illegible]पदलोपे नृपैः । भरतादारभ्य अष्टपट्टधरै राजभिरित्यर्थः । अमुनेव भरतचक्रिणेव आदर्श[illegible] [illegible]हे केवलेन्दिरा केवलज्ञानलक्ष्मीरवाप्यत प्राप्ता । उत्प्रेक्ष्यते । दिगन्तवासं दिशा प्रान्ते [illegible] त्यक्त्वा काश्यपी भूमिस्तस्या विलासः स्थानवैशिष्ट्यं क्रीडनं वा तत्र शील स्वभावो येषां तैः । 'लीला केलिर्विलासश्च शृङ्गारभावजक्रिया' इत्यनेकार्थः । केलिः [illegible] विलासः स्थानवैशिष्ट्यमित्येव भूरिः ककुभां पुरंदरैरष्टदिक्पालैः किम् । 'आखण्डलो [illegible] शिखावान्पतिः प्रतीच्या इति दिङ्महेन्द्रैः' इति नैषधे ॥

ततोऽस्य संख्यातिगपट्टपङ्क्तिभिः प्रपद्य शत्रुंजयमूर्ध्नि केवलम् ।
महोदयश्रीः समसेवि भास्करैरिवोदयं द्यौरुदयावनीधरे ॥ १२० ॥

[illegible] अष्टपट्टधरदण्डवीर्यराजानन्तरमस्य भरतचक्रिणः संख्यामतिगच्छन्त्यतिक्राम [illegible] [illegible]गाः । कर्मणि ड[illegible] । ताभिः । असंख्याताभिरित्यर्थः । पङ्क्तिभिः पट्टधरराजा[illegible] [illegible] शत्रुंजयमूर्ध्नि विमलाचलशिखरे केवलं केवलज्ञानं प्रतिपद्यासाद्याधिगत्य महोदय[illegible] [illegible] समसेवि । समेविता । कैरिव । भास्करैरिव । यथा दिवाकरैरुदयावनीधरे [illegible] [illegible]मणा द्यौर्गगनमण्डली सेव्यते ॥

[illegible]रिक्ष्वाकुकुले सहस्रशः सहस्रशोचिःसदृशा महोजसा ।
[illegible] क्षितीन्द्रा जगतीहितावहा महेन्द्रशैले सुरभूरुहा इव ॥ १२१ ॥

[illegible] प्रतिजितशत्रुभूपतिरासीत्तेन स्वसुताजिततीर्थकृते राज्ये [illegible] [illegible] पितृभ्रातृसुमित्रधात्रीपतिपुत्राय सगरकुमाराय राज्य[illegible] [illegible] चारित्रमादाय सिद्धः सगरचक्रिणोऽनन्तरम् । इक्ष्वाकुकुले सौ[illegible] [illegible] सहस्रशः अर्थादसंख्याताः क्षितीन्द्राः पृ[illegible] [illegible] । [illegible] । महौजसा अतिशायिप्रतापे[illegible] [illegible] । पुनः [illegible] । जगतीहितावहाः विश्वाभि[illegible] [illegible] । यथा महेन्द्रशैले [illegible] जगदभिलषितपूरकाः [illegible]

[illegible]

[illegible] स्याममरा [illegible] ।
[illegible] ॥ १२२ ॥

अथ भरतचक्रिदिग्विजयादिकथितानन्तरम् अरविन्दचक्षुषः कमललोचनाया नाथीदेव्याः पुरोऽग्रे तस्यां प्रागुक्तायां सख्यामिदं पूर्वोक्तम् ऋषभभरतादिग्विजयचैत्यनिर्मापणादि वदन्त्या सत्याम् अपरा अन्या काचिन्निपस्तनी कलशोच्चकुचा कौतुकात् कौतूहलाद्गिरा वाचा आननं मुखं योजयति स्म । उवाचेत्यर्थः । केव । कीरकामिनीव । यथा मरालिकायां वदन्त्यां हंस्यां भाषमाणायां सत्यां शुकी वक्ति ॥

मृगाक्षि पश्यामरसिन्धुसारिणीं त्वमभ्रवीथीं सुमनोवनीमिव ।
मयूखलेखामकरन्दितारकामणीचकां मेचकिमालिमण्डलाम् ॥ १२३ ॥

मृगवदक्षिणी यस्यास्तस्याः संबोधनं हे मृगाक्षि स्वामिनि, त्वमभ्रवीथीं गगनपद्धतिं पश्य विलोकय । उत्प्रेक्ष्यते । सुमनोवनीमिव पुष्पवाटिकामिव । देववनं वा । किंभूता । अमरसिन्धुराकाशगङ्गा सैव सारिणी कुल्या यस्याम् । पुनः किंभूता । मयूखलेखा किरणश्रेणिरेव मकरन्दो मधु विद्यते येषु तादृशास्तारका एव मणीचकानि कुसुमानि यस्याम् । मेचकिमा गगनश्यामत्वम् । 'धृतगम्भीरखनीखनीलिमा' इति नैषधे । तथा 'अचिश्चण्डांशुरोचिर्गगनमलिनिमा कज्जलं दह्यमानम्' इति खण्डप्रशस्तौ । तदेव अलिना भ्रमराणां मण्डलानि वृन्दानि यस्याम् ॥

मृगेन्द्रमध्ये मृगयस्व तारकाञ्श्रमोदबिन्दुस्तवकानिवाङ्कके ।
विभावरीकैरवचक्षुषोऽमुना निखेलयन्त्या दयितामृतांशुना ॥ १२४ ॥

मृगेन्द्रः केसरी तद्वन्मध्यमुदरं यस्याः, यद्वा मृगेन्द्रमध्यवन्मध्यं यस्याः । मध्यमपदलोपी समासः । कृशोदरीत्यर्थः । त्वं तारकान्(?) ज्योतिश्चक्राणि मृगयस्व पश्य । 'पयःपारावारं परमपुरुषोऽयं मृगयते' इति खण्डप्रशस्तौ । इवोत्प्रेक्ष्यते । अमुना दृश्यमानेन दयितेन भर्त्रामृतांशुना सुधाकरेण चन्द्रेण सार्धं निखेलयन्त्या सुरतादिक्रीडां कुर्वत्या विभावरीकैरवचक्षुषो रजनीकुमुदनेत्राया रात्रिस्त्रियः अङ्कमेवाङ्ककम् । 'अकिंचने किंचन नायकाङ्कके' इति नैषधे । श्रमोदबिन्दुस्तबकान् परिश्रमसजातप्रस्वेदजलकणगुच्छानिव । 'श्रमोदबिन्दुप्रकरान्' इति पाठो वा । तदा परिश्रमसलिलकणनिकरानिव ॥

कुशेशयामोदिनि वीक्ष्यतामसौ शनैः शनैः पङ्कजकाननानिलः ।
त्वदाननाम्भोजजनुःप्रभञ्जनैर्जितोऽन्तिके किं समुपैति सेवितुम् ॥ १२५ ॥

कुशेशयं कमलं तद्वदामोदो वपुः परिमलोऽस्त्यस्यास्तस्याः संबोधनं हे कुशेशयामोदिनि । पद्मिनीत्यर्थः । हे स्वामिनि, वीक्ष्यतां विलोक्यताम् । अवधार्यतामित्यर्थः । असौ प्रत्यक्षं शरीरस्पर्शनानुभूयमानः पङ्कजकाननानिलो नलिनवनपवनः शनैः अन्तिके श्रीमत्याः पार्श्वे उपेत्यागच्छति किम् । उत्प्रेक्ष्यते । त्वदाननाम्भोजात्तव वदनारविन्दाज्जनुरुत्पत्तिर्येषां तादृशैः प्रभञ्जनैः त्वद्वक्त्रकमलसुरभिश्वाससमीरणैर्जितः सेवितुं त्वत्समीपे इव समुपैति ॥

[illegible] परम दीप्यतेऽन्तिके मणीकुट्टिमनिम्बितारकैः ।
[illegible] निभिन्नतुलैवनाकृते नभस्तः किमुपागतैरिह ॥ १२६ ॥

[illegible] स्तनौ कुचौ [illegible] इति, [illegible] परम निरीक्ष्य । [illegible] इति [illegible] सन्तो [illegible] । [illegible] सुगमेन [illegible] किमु नभस्तो गगनादिह [illegible]

[illegible] जन्मकोशाल्यमनानुपातिनः ।
[illegible] मणयन्ति गुञ्जितैः ॥ १२७ ॥

[illegible] इति [illegible] । [illegible] पातिनः । [illegible]

[illegible] ।
[illegible] ॥ १२८ ॥

[illegible]

सम्बोधन हे निजाक्षिलक्ष्मीहसिताब्जखञ्जने। तथा शोभने भ्रुवौ यस्यास्तस्याः सम्बोधनं हे सुभ्रु, तमस्विनीपतिश्चन्द्रोऽस्ततां याति । उत्प्रेक्ष्यते । त्रपाभरालज्जातिशयादिव किम् अधरीकृतो हीनो हित. जित इत्यर्थः । कैः । तवास्यविभ्रमैः भवन्मुखश्रीभिः । अत एव किंभूतः । विवर्णताया विच्छायताया आक्षेपो यत्र तादृशं मुखं यस्य ॥

निजास्यदासीकृतशारदोदयत्सितद्युते भृङ्गिततारतारके ।
विनिद्रतां वीक्ष्य तवेक्षणाम्बुजे ह्रियेव निद्राति कुमुद्वनं वने ॥१३०॥

निजेनात्मीयेनास्येन कृत्वा दासीकृतः किंकरतां प्रापितः शारदः शरत्कालसंबन्धी उदयनभस्युद्गच्छन् सितद्युतिश्चन्द्रो यया तस्याः संबोधने निजास्यदासीकृतशारदोदयत्सितद्युते हे स्वामिनि, वने कानने जले वा स्थलेऽपि कमलिनीकमलसद्भावो दृश्यते । यथा—'ददर्श तत्र स्थलपद्मिनीं नल.' इति नैषधे । तथा—'उत्फुल्लस्थलपद्माभभवच्चरणभूषिता' इति चम्पूकथायाम् । कुमुद्वनं कैरवकाननं निद्राति संकुचति । उत्प्रेक्ष्यते । भृङ्गिते भृङ्गाविवाचरिते श्यामलत्वात् तारे निर्मलतारिके कनीनिके यत्र तादृशं तव श्रीमत्या ईक्षणं लोचनमेवाम्बुजं कमलं तत्र विनिद्रतां विकाशतां वीक्ष्य विलोक्य यदा कमलं विकसति तदा कुमुदं संकुचतीति स्थितिः । ह्रियेव लज्जयेव क(त)स्मात्स्वस्य हीनश्रीकत्वात्त्रपा ॥

कृशाङ्गि राजन्यपयातवैभवेऽपराश्रये शोच्यदशावशंवदे ।
शनैः शनैस्तारगणा इवानुगा विभावयाभ्रे विरलीभवन्त्यमी ॥ १३१ ॥

हे कृशाङ्गि तन्वङ्गि, त्वमभ्रे नभसि विभावय पश्य । अपयातवैभवे गतश्रीके राजनि भूपाले चन्द्रे च अनुगाः सेवका इव अमी दृश्यमानास्तारगणा ज्योतिर्व्रजाः शनैः शनैर्विरलीभवन्ति स्तोका जायन्ते । किंभूते राजनि । अपरेषां सश्रीकाणामाश्रयो भाजनं यस्य । गताखिललक्ष्मीको हि तदर्थं सश्रीकं परं श्रयते इति स्थितिरेवेति । तत्त्वतस्तु अपरस्यां पश्चिमायामाश्रयो वेश्म यस्य । पुनः किंभूते । शोच्या शोचनार्हा दशा अवस्था तस्या वशंवदे आयत्ते ॥

प्रपूर्णपाथोरुहबन्धुगर्भिणी तनूभवत्तारकतारभूषणा ।
हरेर्हरित्पाण्डुरिमाणमानने बिभर्ति मत्तेभगतेव सुस्मिते ॥ १३२ ॥

सु शोभनं स्मितमीषद्धसनं यस्यास्तस्याः संबोधने हे सुस्मिते । एतावता पट्टहासनिषेधः । हरेरिन्द्रस्य हरित् दिक् पूर्वा आनने मुखे पाण्डुरिमाणमौज्ज्वल्यं धत्ते । किंभूता । प्रपूर्णं संपूर्णीभूतः प्रसवसमयं प्राप्तः पाथोरुहाणां पद्मानां बन्धुः भास्वान् स एव गर्भोऽस्त्यस्याः । अत एव । पुनः किंभूता । तनूभवन्त. स्तोकीभावं भजन्तः प्रभातत्वात्तारकास्तारा एव ताराण्येवोज्ज्वलानि भूषणानि यस्याः सा । केव । मत्तेभगतेव । यथा आपन्नसत्त्वा स्त्री वक्त्रे पाण्डुरतां धत्ते । किंभूता । संपूर्णा भाग्यवत्तया

[illegible] करोति । यथा—'धार्मिकधामगणा[illegible] [illegible] । [illegible] लोकमभूत्तु ॥' इति पाठान्तरे । [illegible] महत्तमविभो गर्भो भाविन्यमूनि । पुनः किमूता । [illegible] कौशिकाभरणानि यदा । 'शरीरमाराम[illegible] [illegible] ।

[illegible] प्रकाशानां [illegible] स्वतेऽखिला दिशः ।
[illegible] केन लसनोदये मुखम् ॥ १२३ ॥

[illegible] । तथापि [illegible] निशानायके चन्द्रे [illegible] यदा अपि दिशः [illegible] प्रकाशता [illegible] [illegible] । प्रभाते पुनः [illegible] [illegible] इत्यनेकार्थः । [illegible] [illegible] ।

[illegible] ॥ १२४ ॥

[illegible]

अब्जबन्धोर्भास्करस्य भागधेयया दिनलक्ष्म्या सम करपीडनोत्सवे पाणिग्रहणमहे धवलस्य गायनीभिर्गानकर्त्रीभिः । किं धवलमङ्गलगायनीभिरित्यर्थः ॥

हले हिमाम्भः पतितं विहंगमव्याहारलीलायितवल्लिपल्लवे ।
गायन्मृगाक्षीदशनच्छदे द्विजज्योत्स्नासितश्रीरिव लक्ष्यते क्षणम् १२६ ।

हे हले हे सखि, 'किं नन्दिः किं मुरारिः—[illegible] इति धनपालप्रोक्तभोजस्तुतौ । विहगमानां पक्षिणां व्याहाराणां [illegible]जितानामित्यर्थः । 'व्याहारो भाषितं वचः' इति हैम्याम् । लीलया [illegible] यत्र तादृश्या वल्ल्या लतायाः पल्लवे किसलये पतितं हिमाम्भः तुहिनजलं क्षणं [illegible] लक्ष्यते दृश्यते । केव । द्विजज्योत्स्नासितश्रीरिव । यथा गायन्त्या गानं [illegible] स्त्रिया दशनच्छदे अधरे पर्यस्ता द्विजानां दन्तानां ज्योत्स्ना [illegible] हसितस्य श्रीर्लक्ष्मी क्षणमीक्ष्यते ॥

हैमाब्जनिर्यासपिशङ्गितैः…………………… ।
………………………… …………………… ॥ १२७ ॥

हे स्वामिनि, हेम्न इमानि हैमानि अब्जानि तेषां निर्यासैः [illegible] पिशङ्गितैः पिञ्जरितैः सितच्छदैर्हंसैः कृत्वा पल्वलाः सरोवराजि [illegible] हंसैः स्वर्णशैलैरिव । 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः' [illegible] श्लेषैः प्रतिदिनैः पक्षिविशेषैः [illegible] प्रभातपवनसा[illegible] लक्ष्यते । [illegible] पल्लवाकरे [illegible] प्रदेशे [illegible]
[illegible] पादपनिर्यासैरिव ॥

वाता वान्ति सितकजसरित्सारि[illegible]
मन्दं मन्दं स्खलितगतयः [illegible] ।
जातिस्नेहात्किमिह मिलितुं कम्पितराननानाम्-
माजानेया अपि [illegible] ॥ १२८ ॥

हे स्वामिनि, वाताः प्रातर्वायवो वान्ति । [illegible]
[illegible] । तदेव दर्शयति—[illegible] वाताः । [illegible]
[illegible] यत्र तादृश्याः [illegible]
[illegible]
[illegible]
[illegible]
[illegible]

१ [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] ॥

[illegible] ।

[illegible] ॥ [illegible] ॥

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] ॥

[illegible]

[illegible] ।

[illegible]

[illegible] ॥ [illegible] ॥

[illegible]

[illegible]

[illegible]

आनन्दाद्वयवादमेदुरमना मध्ये सखीनामिति
प्रारब्धाभिनवोक्तियुक्तिरचना वाग्देवताश्रीजुषाम् ।
देवीनां जयवाहिनीव सुमनोवल्लीव वा वीरुधां
ताराणां विधुमण्डलीव महिला कामप्यवाप श्रियम् ॥ १४१ ॥

ना महिला नाथी देवी सखीना स्ववयसी(स्या)ना मध्ये स्थिता सती कामप्यनिर्वचनीयां श्रियं शोभामवाप लेभे । किंभूता सा । आनन्दस्य प्रमोदस्य योऽद्वयवादोऽद्वैतता तेन मेदुर पुष्टं मनो यस्याः । किंभूताना सखीनाम् । इति पूर्वोक्तप्रकारेणारब्धाः प्रकाशिता अभिनवा नूतना उक्तयो वार्तास्तासां युक्तीनां योजनानां न्यायानां रचनाः सदर्भास्तैः कृत्वा तासु वा वाग्देवतायाः सरस्वत्याः श्रीजुषा शोभाभाजा वाग्वादिनीवद्वा लक्ष्मीभृताम् । केव कासां मध्ये श्रियमाप्नोति । देवीना देवाङ्गनानां मध्ये जयवाहिनी इन्द्राणीव । पुनः केव । वीरुधां वल्लीनां मध्ये सुमनोवल्ली कल्पलतेव । ताराणां तारकाणाम् । 'भकनीनिकयोस्ताराः' इति लिङ्गानुशासने । पुंस्त्रीलिङ्गे ताराशब्दः । मध्ये विधुमण्डली चन्द्रबिम्बमिव । 'कुवलयमृणालमण्डला' इति लिङ्गानुशासने मण्डलशब्दस्त्रिलिङ्गे ॥

यं प्रासूत शिवाह्वसाधुमकृवा सौभाग्यदेवी पुनः
श्रीमत्कोविदसिंहसीहविमलान्तेवासिनामग्रिमम् ।
तद्भालीक्रमसेविदेवविमलव्यावर्णिते हीरयु-
क्सौभाग्याभिधहीरसूरिचरिते सर्गो द्वितीयोऽभवत् ॥ १४२ ॥

पण्डितदेवविमलगणिव्यावर्णिते हीरसौभाग्याभिधे महाकाव्ये हीरविजयसूरिचरिते द्वितीयः सर्गोऽभवत् जातः ॥

इति पण्डितश्रीसीहविमलगणिशिष्यपण्डितदेवविमलगणिविरचिते हीरसौभाग्यनाम्नि महाकाव्ये कुंरानाथीगजस्वप्न-तज्जागरिका-ऋषभदेवभरतदिग्विजय-सखीकथितभरतदिग्विजयादि-रात्रिविरामदिनकरोदयवर्णनो नाम द्वितीयः सर्गः ॥

तृतीयः सर्गः ।

कल्पद्रुमाङ्कुरमिवामरशैलभूमी
रत्नं विदूरधरणीव घनस्वनोत्थम् ।
अन्तर्मदोदयमिवेभकपोलपाली
नाथी ततोऽवहत दोहदलक्षणं सा ॥ १ ॥

ततः स्वप्नदर्शनधर्मजागरिकरणानन्तरं सा कुरामहभ्यपत्नी नाथीदेवी दोहदलक्षणं गर्भ-

त्रिधापि वार्ता दर्शिताः । अपि पुनर्विभाते दिनोदये समये आजानेयाः कुलीनाश्वा आननानां वक्त्राणां कम्पितैर्वल्गनैरूर्ध्वाधःकरणैर्हरेरिन्द्रस्य रवेर्वा हयांस्तुरङ्गान् । 'हरिं विदित्वा हरिभिश्च वाजिभिः' इति रघुवंशे । इति प्रसिद्धोच्चैःश्रवस्येकस्मिन्नश्वेऽपि इन्द्रस्याश्वबाहुल्यम् । तथा—'पर्ज(र्ज)न्यहर्यश्वऋभुक्षिवाहु-' इति हैम्याम् । उच्चैःश्रवाः श्वेताश्वः । हरयो नीलवर्णा अश्वा यस्येत्यन्यहरिद्वर्णवाजिसद्भावः प्रोक्तः । रवेस्तु तुरङ्गमानां सप्तत्वेन बाहुल्यमेवास्ते । आह्वयन्ते आकारयन्ति । किमुत्प्रेक्ष्यते । जातेरश्वाना कुलस्य स्नेहात्प्रीतेः मिलितुमिह भुवि उच्चैर्गमनशक्त्यभावाद्भूमीमण्डले स्वसमीपे वा किमाह्वयन्ते ॥

चन्द्राननेऽमन्दमरन्दबाष्पा कुमुद्वती मुद्रितनेत्रपत्त्रा ।
विधोर्वियोगादिव कोशमध्यावरुद्धगुञ्जन्मधुपैर्विरौति ॥ १३९ ॥

चन्द्रानने संपूर्णपार्वणेन्दुरिव वदनं यस्याः । अथवा चन्द्रवदाल्हादकं मुखं यस्याः संबोधने नार्थादेवि, कुमुद्वती कैरविणी कोशमध्ये स्वकुमुदमुकुलान्तराले अवरुद्धैश्चन्द्रास्तेन बद्धमुकुलमध्य एव स्थितैः । तथा—गुञ्जद्भिः शब्दायमानैर्मधुपैर्भृङ्गैर्विरौति शब्दायते । इवोत्प्रेक्ष्यते । विधोर्भर्तुश्चन्द्रमसो वियोगाद्विरहादिव रोदिति । रोदनलक्षणमाह—किंभूता कुमुद्वती । अमन्दो बहुलो यो मरन्दो मधु स एव बाष्पो नेत्राम्बु अश्रुजलं यस्याः । पुनः किंभूता । मुद्रिते निमीलिते नेत्रे एव तत्तुल्ये वा पत्त्रे यस्याः सा ॥

उपगतमिहान्यस्माद्द्वीपात्प्रगेऽधिपतिं त्विषा-
मनुरतिपरीरम्भारम्भप्रसारिकरं पुरः ।
विकचवदना राजीविन्यः स्फुटोद्गतकण्टका
नयनकमलैरालोकन्ते वशा इव वल्लभम् ॥ १४० ॥

हे स्वामिनि, राजीविन्यः पद्मिन्यः प्रगे प्रभाते त्विषां पतिं सूर्यं नयनान्येव तत्तुल्यैर्वा कमलैः । कमललोचनैरित्यर्थः । आलोकन्ते पश्यन्ति । का इव । वशा इव । यथा कामिन्यो वल्लभं स्वकान्तं वीक्षन्ते । किंभूतं सूर्यं वल्लभं च । अन्यस्मादपरस्माद्द्वीपाद्वन्दिरात् । 'तेजोवमाने व्रजति द्वीपान्तरमहर्मणिः' इति सूक्तोक्तेः । तथा—'द्वीपमन्तर्जले तटम्' इत्युक्तेश्च । इतरस्मात्कस्माचिद्द्वीपान्तरात् इह द्वीपे उपगतमागमने । 'गमनार्थाः समभ्युपाद्न्य पराः कथिताः ।' 'उपगतोऽपि च मण्डलनाभिताम्' इति रघुवंशे । उपगतं प्राप्तं इति तद्वृत्तिः । पुनः किंभूतम् । पुरोऽग्रे अनुरत्या अनुरागेण । 'रागोऽनुरागोऽनुरतिः' इति हैम्याम् । यः परीरम्भ आलिङ्गनं तस्यारम्भाय उपक्रमार्थं प्रसारिणः प्रसरणशीलाः कराः किरणा हस्ताश्च यस्य । किंभूताः पद्मिन्यो वशाश्च । विकचवदना विकसितमुखाः । पुनः किंभूताः । स्फुटं प्रकटमुद्गताः प्रादुर्भूताः कण्टका अङ्कुरविशेषाः । नालेषु कण्टकाः स्युः । 'कण्टकाः पद्मनाले' इति वचनात् । तथा—उद्गतो रोमाञ्चो यासाम् । 'रोमाञ्चः कण्टको रोमविकारो रोमहर्षणम्' इति हैम्याम् । स्त्रीपुरुषयोरपि विशेषणमिदम् ॥ इति [illegible]रात्रिविरामप्रभातदिनकरोदयवर्णनम् ॥

[illegible] । 'ह्रस्वः स्यान्मात्रातोऽतिविष्वक्' इति हैम्याम् । 'रसाल [illegible] श्लोकार्धं । 'पत्राटनाद्यैः पिहितः क्वापि प्रकाशमानाद्यतीक्ष्ण-विम्बः' इति नैषधे । स धाम्नन्ती भूमी गुणमामानाद्यति इति सर्वत्र योज्यम् ॥ पुनः केव । शुक्तिरिव । यथा शुक्तिका स्वोदरे मौक्तिकम् । पुनः केव । घनावलीव । यथा वर्षमाना अम्बु जलम् । पुनः केव । [illegible] । यथा समुद्रवेला माणिक्य-खानी रत्नकन्दलीम् । पुनः केव । विद्वत्सभेव । यथा विदुषां पण्डितानां सभा समाजः गोष्ठी वा विद्यानां [illegible] रहस्यमुपनिषदं वा । 'श्रावीव दौर्जनी सन्नद्धन्दनीया समेखला' इति चम्पूकथायाम् । पुनः केव । प्रासादभूमिरिव । यथा प्रासादस्य जिनविहारस्य भूमिः गर्भागारक्षोणी आसन्नभगवतो बिम्बं प्रतिमाम् । पाश्चात्येऽपि मूलनायकसंविधानेनैकमेवास-दिन्नमिति । पुनः केव । शमीव । यथा शमी 'खेजडी'नामा तरुर्गर्भे सुप्तं कृशानुम् ॥ पुनः केव । [illegible] । यथा विद्रुमखानिका कृष्णलतायाः 'कालीवेलि' इति प्रसिद्धायाः [illegible] । पुनः केव । आत्रेयदृष्टिरिव । यथा अत्रेर्मुनिविशेषस्येयमात्रेयी सा चासौ दृष्टिश्च । नाभिनामकस्य सम्बन्धिनी दृक् । औषधीनां नाथं विधुम् । 'विधुरत्रिदृग्जः' इति हैम्याम् । 'अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः' इति रघौ । 'अत्रिजातस्य या मूर्तिः शशिनः सज्जनस्य च' इति चम्पूकथायाम् । पुनः केव । धात्रीव । यथा भूमि-र्निधानम् । पुनः केव । शैलगुहेव । यथा गिरिकन्दरा केसरिणं सिंहम् । पुनः केव । कंसारिनाभिपङ्कजकोशकुटीव । यथा कंसारेः कृष्णस्य नाभिस्तत्रोद्भूतं पङ्कजं कमलं तस्य कोशः कुड्मलः स एव कुटी पर्णतृणाच्छादितसदनं सा शंभुं ब्रह्माणम् । 'शंभुर्ब्रह्मार्हतोः शिवे' । 'नारायणनाभ्यम्भोरुहकुहरकुटीमधिशयानस्य' इति चम्पूकथायाम् । प्रागुक्त-महिम्नः । नाभिभवत्वेनेयमनुपमा । 'नाभिपद्मात्मभूरपि' इति हैम्याम् ॥ इति गर्भाधानम् ॥

एकातपत्रमिह यत्तनुजो विधाता
साम्राज्यमिन्दुविशदं जिनशासनस्य ।
शीतांशुमण्डलमितीव सितातपत्री-
कर्तुं स्वमूर्धनि तया स्पृहयाम्बभूवे ॥ ९ ॥

तया नाथीदेव्या स्वमूर्धनि निजमस्तके । उत्प्रेक्ष्यते । इति हेतोः शीतांशुमण्डलं चन्द्र-बिम्बं सितातपत्रीकर्तुं श्वेतच्छत्रं विधातुं स्पृहयाम्बभूवे आचकाङ्क्षे । इति किम् । यत्तनुजो यस्यास्तनुजः पुत्रो जिनशासनस्य इह भूमण्डले एकमद्वितीयमातपत्रं छत्रं विधाता करिष्यतीति । किंभूतम् । इन्दुविशदं चन्द्रकलोज्ज्वलम् ॥

प्रेम्णा गुणाननुगुणीकृतवेणुवीणा
एणीदृशः सुमनसामदसीयसूनोः ।
गास्यन्ति ताभिरिति कीव(?)तया विधातुं
सौहार्दमम्बुजदृशा हृदि काम्यते स्म ॥ १० ॥

तया अम्बुजदृशा नलिननयनया । उत्प्रेक्ष्यते । इति किं कारणात्ताभिः सुरीभिः सार्धं सौहार्दं मैत्र्यं विधातुं कर्तुं हृदि चित्ते काम्यते स्म वाञ्छयते स्म । इति किम् । यद्दर्शीपसूनोर्नाथीनन्दनस्य गुणान् शमदमसयमगाम्भीर्यधैर्यौदार्यस्थैर्यादिकान् सुमनसां देवानां तादृशापरानन्यागण्यग्रामगानश्रवणेन निजस्त्रैणोपरि नाभ्यसूयन्ति प्रत्युत प्रमोदन्ते इति सुमनसः । तेषामेणीदृशो वशादेव्यः प्रेम्णा हृदयहार्देन स्नेहेन गास्यन्ति । किंभूता देव्यः । अनुगुणीकृताः स्वस्वरानुयायिनीविहिता निजालापसदृशीकृता वेणवो वशास्तथा वीणा याभिः ॥

शौण्डीर्यचङ्क्रमणचारिमदानलीला-
श्रीभिर्यतो मम सुतस्तमधो विधाता ।
आरोढुमन्तरिति जम्भनिशुम्भकुम्भि-
कुम्भस्थले किमनया हृदि काम्यते स्म ॥ ७ ॥

[illegible] नार्थीदेव्या । किमुत्प्रेक्ष्यते । इति हेतोः जम्भनिशुम्भस्य शक्रस्य कुम्भिन ऐ[illegible] कुम्भस्थले स्कन्धप्रदेशे आरोढुं चढितुं काम्यते स्म चक्रमे । कुम्भस्थले चढिता [illegible] इत्यर्थः । यतो यस्मात्कारणात् । शौण्डीर्यस्य पराक्रमस्य । 'पौरुष[illegible] शौण्डीर्यं च पराक्रमे' इति हैम्याम् । तथा—चङ्क्रमणचारिम्णो मन्थरग[illegible]स्य, तथा—दानस्य विश्राणनस्य मदवारिणो वा, लीला आधिक्या[illegible] श्रीभिः कृत्वा मम सुतो नन्दनस्तमैरावणमधो विधाता अधः कर्ता । [illegible] ॥

[illegible] मधुरिवावनिजन्मनाना
कर्ता यश गुरमिदिग्वलयः प्रबोधम् ।
[illegible] प्रणेतुमृतुना किमिति स्मितास्या
[illegible] सह कामयते स्म चित्ते ॥ ८ ॥

[illegible] नार्थीदेव्याः सुतः पुत्रः, मधुरिव वसन्तसमयात् [illegible] क्रमात् । '[illegible]' इत्यभिधा[illegible] नामानि यथा '[illegible]' । [illegible] 'कुसुमानि भीमानुजगोजभाने' । [illegible] । तेषां प्रतापैः [illegible] । [illegible] कीर्तिभिः [illegible] । [illegible] [illegible] ॥

[illegible] मत्वा [illegible] स्मा [illegible] [illegible] भालवि [illegible] श [illegible] [illegible] इति [illegible] [illegible] [illegible]

[illegible] [illegible] [illegible] हवि [illegible] ॥

[illegible] [illegible] प्रथाक्षिति [illegible]

[illegible] [illegible] ॥ ९ ॥

[illegible] इव पाली [illegible] [illegible] पर्षदा- [illegible] [illegible] प्रतिबोधयति [illegible] सारतो [illegible] रवि- [illegible] दर्शिता- [illegible] [illegible] [illegible] तथा नैषधे—'एवं मह- [illegible] [illegible] [illegible] इति [illegible] रविबिम्बमनितम्बहोरार्ण [illegible] ॥

[illegible] सानुमन्तमधिरोढुमथात्मदर्शी-

[illegible] पुनरपापतिमुत्तरीतुम् ।

[illegible] अपि समाजयितुं जिनान्सा

गर्भानुभावत इयेष यथार्हदम्बा ॥ १० ॥

सा [illegible] गर्भानुभावत [illegible] सानुमन्तं सुमेरुम् । 'रत्नसानुः सुमेरुः [illegible] इति [illegible] । अधिरोढुमध्यासितुं चटितुम् । अथ पुन- [illegible] दर्पणं विधातुम् । [illegible] आननविलोकनायेति शेषः । पुनरन्यत् । [illegible] समुद्रमुत्तरीतुं [illegible] जलमाक्रम्य तीर्त्वा परतटे प्रयातुम् । [illegible] पुनः [illegible] शाश्वतजिनप्रासादेषु जिनान् शाश्वतनामभाजः ऋषभवर्धमानच- न्द्रानन [illegible] तीर्थंकरप्रतिमाः समाजयितुं पूजयितुम् । 'सभाजनं तत्र समर्ज्य तेषां सभाजने [illegible] इति नैषधे । सभाजनं पूजनमिति तट्टीका । 'सभाजनागे

सभाजयति' इति क्रियाकलापे। तथा 'श्रुत्वा विनिर्दिश्य ममा सभाजितम्' इत्यादि नैषधे। समया सभाजनेन सभाजितं पूजितमिति तद्वृत्तिः। अथ प्रस्तुतम्। इयं पूर्वोक्तं मन्दराधिरोहणादि सर्वमपि वाञ्छति स्म। केव। अर्हदम्बेव। यथा जिनजननी श्रीजिनगर्भानुभावात् पूर्वोक्तप्रकारानन्यानपि शुभदोहदोद्भूतप्रकारान् काङ्क्षति स्म॥ इति दोहदाः॥

तद्दोहदप्रकरपूर्तिविधौ सुपर्व-
वल्ल्या विधेरिह तथा स्पृहया व्यलासि।
श्रेयोवतामिव तति परिपूर्णकामा
जज्ञे यथानतिचिरादियमायताक्षी॥ ११॥

इहास्मिञ्जगति तस्या गर्भवत्याः दोहदानां गर्भानुभावोद्भूताभिलाषाणां प्रकरस्य समूहस्य प्रपूर्तिविधौ प्रकर्षेण संपूर्णीकरणप्रकारे सुपर्ववल्ल्या कल्पलतातुल्यया विधेर्जगत्सृष्टिकर्तुः स्पृहया वाञ्छया तथा तेन प्रकारेण व्यलासि विलसितं प्रवृत्तम्। तथा कथम्। यथा आयताक्षी आयते प्रख्यातिप्रमाणे कर्णान्त यावत्प्रसृते वा अक्षिणी नेत्रे यस्याः सा इयं नार्यी अनतिचिरात्स्तोककालादेव परिपूर्णकामा संपूर्णीभूताभिलाषा निवृत्तमनोरथा जज्ञे जाता। केव। श्रेयोवतां ततिरिव। यथा पुण्याढ्यानां जनानां श्रेणी अभिलाषाविर्भवनानन्तरं त्वरित प्रबलपुण्यवत्त्वात्पूर्णमनोरथा जायते॥

सा दोहदोदयकृशीकृततत्प्रपूर्ति-
संप्रापितोपचयसंचरचारिमश्रीः।
भाति स्म फाल्गुनविपत्रितचैत्रसान्द्री-
भूतावनीरुहततिर्विपिनस्थलीव॥ १२॥

सा नार्यी भाति स्म। किंभूता। पूर्वं तेषां दोहदानां जगत्प्रशस्यानामुदयेनाविर्भावेन कृशीकृता दुर्बला विहिता पश्चाच्च तेषां दोहदानां प्रपूर्त्या प्रकर्षेण पूरणेन संपूर्णीभवनेन संप्रापितः सम्यक्प्रकारेण लम्भित आसादितो वा उपचयः पुष्टिर्यस्य येन वा तादृशस्य संचरस्य देहस्य चारिम्णो मनोहरतायाः श्रीर्यस्याः, चारुत्वयुक्ता लक्ष्मीर्यस्याः सा वा, समासान्तविधेरनित्यत्वात्। केव। विपिनस्थलीव यथा वनभूमिर्भाति। किंभूता वनस्थली। प्रथमं फाल्गुनेन फाल्गुनिकमासेन विगतानि पत्राणि पर्णानि येभ्यस्ते विपत्राः। विपत्रान् करोतीति विपत्रयति। 'तत्करोति तदाचष्टे' इतीच्प्रत्ययः। विपत्र्यन्ते स्म इति विपत्रिताः। अथवा। विपत्रत्वं संजातमेष्वेषां वा। 'इतो जातार्थे' इतीत प्रत्ययेऽपि। विपत्रिताः पत्ररहिताः कृता इत्यर्थः। पश्चाच्चैत्रेण मधुमासेन सान्द्रीभूताः पत्रपुष्पवृन्दैर्घनच्छाया जाता अवनीरुहा वृक्षास्ते विद्यन्ते यस्या सा॥

निस्तीर्य दोहदभवार्तिमथैणचक्षु-
र्मन्दस्मितामवयवेषु बभौ वहन्ती।

स्मेरद्दलैरुपचिता नवशारदीन-
नालीकिनीवदतिवाहितवारिवाहा ॥ १३ ॥

अथ दोहदपूर्णभवनानन्तरम् । एणचक्षुर्मृगनेत्रा नाथी अवयवेष्वङ्गेषु मेदस्वितां पुष्टिं वहन्ती बिभ्रती सती बभौ राजते स्म । किं कृत्वा । दोहदेभ्यो गर्भानुभावोत्पन्नविविधाभिलाषेभ्यो भवामुत्पन्नामर्तिं पीडां चिन्तां वा निस्तीर्य निरस्य । किंवत् । नवशारदीननालीकिनीवत् । यथा नवा नूतना शारदीना शरत्कालसंबन्धिनी नालीकिनी कमलिनी स्मेरद्भिर्विकसद्भिः । 'स्मेरदम्भोरुहाराम' इति पाण्डवचरित्रे । दलैः पत्रैरुपचिता पुष्टा कृता । पुनः किंभूता । अतिवाहितो वारिवाहो मेघसमयो यया । 'वर्षासु कमलानि शीर्यन्ते विद्राणपङ्कजसरसि' इति चम्पूकथायाम् । 'त्रिदिवसमुद्भवन्ति प्रोन्मीलत्सु नीलनीरजेषु शरच्छ्रीकटाक्षेष्विव' इत्यपि चम्पूकथायाम् ॥

शुद्धां क्रिया विदधतामधिभूर्यदेष
भावीरितः किमिति भागवतैः प्रतापैः ।
आनन्दपूर्वविमलव्रतिवासवस्ता
प्राग्जन्मनः समय एव समुद्दधार ॥ १४ ॥

आनन्द इति शब्दः पूर्वे यस्य तादृशो विमलः एतावता आनन्दविमलनामा व्रतिनां साधूनां मध्ये वासवः शक्रः सुरीन्द्रः जन्मनः प्राक्समये एवार्थात् श्रीहीरविजयसूरिजन्मकालात्प्राक् पूर्वकमेव निर्दोषा निरवद्या क्रियामनुष्ठानमुद्दधार समुद्धरति स्म । एतावता हीरकुमारे गर्भेऽवतीर्णमात्र एवानन्दविमलसूरिः क्रियोद्धारं कृतवानित्यर्थः । किमुत्प्रेक्ष्यते । भागवतैर्भविष्यत्सूरिसंबन्धिभिः प्रतापैः प्रभावैर्माहात्म्यैः । 'स प्रतापः प्रभाववत्' इति हैम्याम् । इति हेतोः ईरितः प्रेरितः किम् । यत्कारणात् एष हीरविजयसूरिः शुद्धा निर्मला क्रियामनुष्ठानं विदधतां साधूनामधिभूरधिपतिर्भावी स्वामी भविष्यति । प्रागित्यव्ययम् ॥

कालागुरुद्रवकरम्बितगन्धधूली-
पत्रावलीकलितपाण्डुरगण्डभाजा ।
छायाधरः शरदपास्तपयोदरोधो-
ऽवश्यायदीधितिरहस्यत तन्मुखेन ॥ १५ ॥

तन्मुखेन नाथीवदनेन अवश्यायदीधितिर्हिमद्युतिः । 'अवश्यायस्तु तुहिनं प्रालेयं मिहिका हिमम्' इति हैम्याम् । अहस्यत हसितः । तिरस्कृत इत्यर्थः । किंभूतेन तन्मुखेन । कालागुरुद्रवेण काकतुण्डस्य पयसा पङ्केन वा करम्बिताया व्याप्ताया गन्धधूल्याः कस्तूर्याः पत्रावलीभिः कलितौ संयुतौ । तथा—गर्भानुभावात्पाण्डुरौ विशदौ गण्डौ कपोलौ भजतीति भाक् तेन भाजा उल्लसद्बहलमृगमदजललिखितविचित्रपत्रभङ्गभव्यविपुलकपोलमण्डलेन मुखेन । 'शशाङ्कमन्तःस्फुरत्कलङ्कमुपहसन्ती' इति चम्पूकथायाम् ।

किंभूतश्चन्द्रः । छायामन्तःश्यामतां धरतीति । पुनः किंभूतः । शरदा घनात्ययेन अपास्तो निराकृतः पयोदानां मेघानाम् । 'प्रावृषेण्यो घनो जलदाथी न शारदः' । यत उक्तम्—'अन्ये ते [खलु नीरदा] जलधरास्तृष्णा विनिघ्नन्ति ये भ्रातश्चातक किं वृथात्र रटितैः खिन्नोऽसि विश्राम्यताम् । मेघः शारद एष काशधवलः पानीयरिक्तोदरो गर्जत्येव हि केवलं भृशमपां नो बिन्दुमुत्यच्छति ॥' इति वप्पीहाष्टके । अतः पयोदनाम सार्थकम् । रोधो रुन्धनं यस्याः ॥

लीलाचलद्दलगणा विगलन्मरन्द-
लुभ्यन्निलीनमधुपा सितपद्मपङ्क्तिः ।
प्रस्पन्दमाननयनेन सविभ्रमभ्रू-
भाजा यदीयवदनेन विडम्ब्यते स्म ॥ १६ ॥

यदीयवदनेन गर्भसमयत्वात् पाण्डिममण्डितेन नार्यीमुखेन सितपद्मपङ्क्तिः कुमुदमण्डली। 'श्वेते तु तत्र कुमुदम्' इति हैम्याम्। विडम्ब्यते स्म अनुक्रियते स्म । 'पुण्डरीकातपत्रस्तं विकसत्कासचामरः । ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम् ॥' इति रघौ । शरदृतुस्तं रघुं राजानं विडम्बयामास । अत्र चामरादिभिरनुचकार, परं तल्लक्ष्मीं न प्रापेति तद्वृत्तिः । किंभूतेन वदनेन। प्रस्पन्दमाने स्वभावचपले नयने लोचने यस्मिन् । 'प्रस्पन्दमानपरुषेतरतारमन्तश्चक्षुस्तव प्रचलितभ्रमरं च पद्मम्' इति रघौ । पुनः किंभूतेन मुखेन । सह विभ्रमेण विलासेन वर्तते तादृशीं भ्रुवं नयनोर्ध्वरोमपद्धतिं भजतीति । किंभूता सितपद्मपङ्क्तिः । लीलया नातिशयेन मन्दमरुत्प्रेरणया चलता लोलीभवता दलानां पत्राणां गणो यत्र । पुनः किंभूता । विगलन्तो निष्पतन्तो ये मरन्दा मधूनि तदर्थं लुभ्यन्तो लोलुपीभवन्तोऽत एव निलीनाः कोशान्तर्निश्चलीभूय स्थिता मधुपा भ्रमरा यस्याम् । तादृशी कुमुदावली सगर्भत्वेन पाण्डुरमुखस्योपमानमिदम् । स्वभावमुखस्यान्योऽर्थः । निःसरन्मधुकृते लुब्धीभवतां निलीनानां च भृङ्गाणामासितमवस्थितं यत्र तादृक् पद्मपङ्क्तिः हसिता ॥

नीलारविन्दनयना कलमावदाता
बन्धूकदन्तवसना सितकान्तिवक्त्रा ।
कासस्मिता कुमुदिनीसुरभिर्मराल-
लीलागतिः सरसि वाजनि सा तदानीम् ॥ १७ ॥

सा नार्यी तदानीं तस्मिन् गर्भाधानसमये शरदिव घनात्ययसमय इव अजनि सजाता। किंभूता नार्यी देवी शरच्च । नीलारविन्दे इन्दीवरे । 'नीले तु स्यादिन्दीवरम्' इति हैम्याम् । उत्पले तद्वत्ते एव वा नयने यस्याः । पुनः किंभूता । कलमाः कलमनामशालयः तद्वत्तैश्चावदाता गौरकान्तिः । पुनः किंभूता । बन्धूकानि बन्धुजीवकतरुकुसुमानि म-

ध्याह्न एव विकसनशीलानि 'विपोरियां' इति लोके प्रसिद्धानि । 'बन्धूकप्रसवारुणाम्बरधराम्' इति लघुस्तवे । तथा 'बन्धूकबन्धूभवदेतदस्या मुखेन्दुनानेन सहोज्जिहानाम्' इति नैषधेऽपि । तद्वत्तान्येव वा दन्तवसनमधरो यस्याः । पुनः किंभूता । सिता उज्ज्वला कान्तिर्यस्य तादृक् वक्त्रं मुखं यस्याः । पक्षे सितकान्तिश्चन्द्र एव वदनं यस्याः । पुनः किंभूता । काशा ईषीकाः कासाः प्रसिद्धास्तद्वत्ते एव स्मितमीषद्धसितं यस्याः । पुनः किंभूता । कुमुदिन्यः कैरविण्यस्तथा ताभिश्च सुरभिः सुगन्धिः । पुनः किंभूता । मराला राजहंसास्तद्वत्तेषां च लीलया मन्थरतया गतिर्गमनं यस्यां वा । वर्षासु हंसा मानससरसि यान्ति । 'प्रोषितकलहंसवयसि' इति चम्पूकथायां मेघवर्णने । प्रोषिता मानसं प्रति प्रस्थापिताः कलहंसा एव वयांसि पक्षिणो येनेति तट्टिप्पनके । तथा 'शरदि पुनरत्रायान्ति' इति कविसमयः ॥

माणिक्यभूषणगणैर्न तदा कदाचि-
　त्खेदोदयाद्वपुरभूष्यत चन्द्रमुख्या ।
क्रीडागतामरकरावचिताम्बुजातां
　जानेऽनुयातुमनसा सरितं सुराणाम् ॥ १८ ॥ ✓

तदा गर्भसमये चन्द्रमुख्या नाथीदेव्या विधुवदनया कदाचिदपि माणिक्यानां मणीनामुपलक्षणात्स्वर्णरजतादीनां भूषणानामाभरणानां गणैः समूहैः वपुः स्वशरीरं नाभूष्यत न भूषितं नालंकृतवती(?) । अल्पशब्दस्त्वभावस्यैव वाची । नालंचक्रे । कस्मात् । खेदोदयात् गर्भधारणनिर्वेदाविर्भावात् । तत्राहमेवं जाने उत्प्रेक्ष्यते वा । क्रीडार्थं जलावगाहलीलाकृते आगतानाममराणामर्थाद्देवीसखानां देवानां करैर्हस्तैरवचितानि स्वप्रियाहारावतंसादिक्रियाकृते त्रुण्टितानि । गृहीतानीत्यर्थः । अम्बुजानि कमलानि यस्यां तादृशीं सुराणां सरितं देवनदीं स्वर्गङ्गामनुयातुं स्वेनानुकर्तुंकामयेव । अत्र जाने इवार्थे ॥

रेजे स्तनाननविनीलिममञ्जुलेन
　यस्याः समुज्ज्वलपयोधरयामलेन ।
केलीकृते मरकिताङ्कितसानुनेव
　रौप्येण शैलयुगलेन मनोभवस्य ॥ १९ ॥

यस्या गर्भवत्याः समुज्ज्वलेन गर्भानुभावात्पाण्डुरीभूतेन पयोधरयामलेन स्तनद्वन्द्वेन रेजे । तथा—'ऐरावतमरतकपिण्डपाण्डुरमुखचूचुकश्यामलिमालंकृतम् आपूर्यमाणमन्तःक्षीरेण क्षणमविरतं पयोधरद्वन्द्वमुद्वहन्ती' इति चम्पूकथायाम् । किंभूतेन । स्तनाननयोश्चूचुकयोर्विनीलिम्ना प्रकृष्टश्यामत्वेन मञ्जुलेन मनोज्ञेन । इवोत्प्रेक्ष्यते । मनोभवस्य कामस्य केलीकृते क्रीडार्थं रौप्येण रजतस्वरूपिणा शैलयुगेन गिरियुग्मेनेव । किंभूतेन । मरकतैरश्मगर्भमणिभिरङ्कितं चिह्नितम् । खचितमित्यर्थः । सानु शिखरं यस्य ॥

यस्याः समेचकिमचूचुकचक्षुरेण
व्यभ्राजि शुभ्रिमभृता स्तनयोर्द्वयेन।
यन्मानसाश्रयनिवासिरतीशरत्यो-
र्विप्रौ विनोदमधुपाङ्ककुमुद्युगेन ॥ २० ॥

प्रेम्णा प्रणेतुमजरामरतां प्रसह्य
विश्राणितेन विधिना कुसुमायुधेन।
रौप्येण नीलदृषदां दधता पिधानं
पीयूषपूर्णकलशीयुगलेन किं वा ॥ २१ ॥

[illegible] स्तनयोर्द्वयेन व्यभ्राजि शुशुभे। किंभूतेन। सह मेचकिमा श्याम- [illegible] मेचकिमनी कृष्णकान्तिनी तादृशे चूचुके स्तनवृन्ते ताभ्यां चक्षुरेण [illegible]। पुनः किंभूतेन। शुभ्रिमाणं पाण्डुरतां बिभर्तीति। तत्र नयमेव [illegible] [illegible] मानसं [illegible] तदेवाश्रयः स्थानं गृहं वा तत्र निवसनशीलयो- [illegible] विनोदार्थं क्रीडाकृते मधुकरा भ्रमरा अङ्के क्रोडे [illegible] [illegible] किं वा। अथ वा प्रसह्य प्रसभीभय विधिना [illegible] [illegible] विश्राणितेन प्रदत्तेन रौप्येण राजतेन रजतसंबन्धिना पीयूषपूर्ण- [illegible] कलशीयुगेन कुम्भीद्वयेनेव। कुम्भकलशशब्दौ पुंसि [illegible] इति नैघण्टौ। कलशीयुगे [illegible] पिधानं दधता बिभ्रता। किं कर्तुं [illegible] [illegible] प्रणेतुं कर्तुम् ॥ युग्मम् ॥

[illegible] पयोधि-
[illegible] मधिकस्याः।
[illegible]
[illegible] ॥ २२ ॥

[illegible]

दम्भोलिभूषणभरोद्भवदंशुचाप-
चक्राङ्कितेन पयसा परिपूरितेन ।
आदीयते किमु समुन्नमता चकोर-
चक्षुःपयोधरयुगेन पयोधरश्रीः ॥ २३ ॥

चकोरी चकोरश्च चकोरौ । 'पुमान् स्त्रिया' स्त्रिया सहोक्तौ पुमान् शिष्यते न स्त्री इति प्रक्रियासूत्रेण चकोरौ तयोश्चक्षुषी इव रक्ते चक्षुषी नेत्रे यस्यास्तस्याः । पयोधरयुगेन स्तनद्वन्द्वेन । किमुत्प्रेक्ष्यते । पयोधराणां जलवाहानां मेघानां श्रीः लक्ष्मीः शोभा वा आदीयते किमु गृह्यते इव । किंभूतेन पयोधरयुगेन । दम्भोलीनां वज्ररत्नानामाभरणानां भरात्सन्दोहादुद्भवन्तः प्रकटा जायमाना ये निःसरन्तो वा अंशवः किरणास्ते । अर्थात् प्रारब्धेन चापचक्रेण धनुर्मण्डलेन अङ्कितेन कलितेन । 'उल्लसन्मयूखमञ्जरीरचितेन्द्रचापचक्राण्याभरणानि' इति चम्पूकथायाम् । तथा 'इता विभूषामणिरश्मिकार्मुके' इति नैषधेऽपि । पुनः किंभूतेन । सं सम्यक् समीचीनं यथा स्यात्तथा उन्नमता उच्चैर्भवता उन्नतीभवता च । पुनः किंभूतेन । पयसा स्तन्येन पानीयेन च परि सामस्त्येन पूरितेन भृतेन ॥ इति कपोलस्तनादिपाण्डिमा स्तनयोः पयःपूर्णत्वं च ॥

संपूर्णचन्द्रवदना प्रसवोन्मुखत्वं
पूर्णेऽथ गर्भसमये बिभरांबभूव ।
वर्षाभिमुख्यमुपकण्ठवितिष्ठमान-
ज्येष्ठोन्मुखीकृतजनाम्बुदमण्डलीव ॥ २४ ॥

अथ सार्धसप्तदिनाधिकनवमासपूर्णीभवनोत्तरं संपूर्णः षोडशकलाकलितः पूर्णिमासंबन्धी । चेदेकयापि कलया चन्द्रेन्दुर्हीनः स्यात्सा तिथिरनुमितिरित्युच्यते । 'कलाहीने त्वनुमितिः' इति हैमीवचनात् । पूर्णिमायामेव संपूर्णश्चन्द्रः स्यादतः संपूर्णचन्द्रवदनेति । तेन पूर्णिमायामभ्युदितो यश्चन्द्रस्तद्वद्वदनं वक्त्रं यस्याः पार्वणेन्दुमुखी सा नाथी गर्भस्य समये काले पूर्णे परिपूर्तिभावं प्राप्ते सति सार्धसप्तदिनाधिकनवसु मासेषु संपूर्णीभूतेषु सत्सु प्रसवस्य संतानजननस्य उन्मुखतां बिभरांबभूव धारयामास दधाति स्म । केव । अम्बुदमण्डलीव । यथा मेघमाला कादम्बिनी वर्षणं वर्षं वृष्टिस्तस्याभिमुख्यं वर्षणसंमुखतां धत्ते । किंभूता सा कादम्बिनी च । उपकण्ठे समीपे वितिष्ठमाना स्थितिं कुर्वाणा ज्येष्ठाः कुलवृद्धस्त्रियो ज्येष्ठमासश्च यस्याः । पुनः किंभूता । उन्मुखीभूता गर्भानुभावावगतलोकोत्तरप्रभावसंतानावलोकनार्थमुत्कण्ठीकृता उच्चमुखाश्च कृताः । वर्षाकाले हि लोका उन्मुखीभूय मेघागमं विलोकन्ते । यथा चम्पूकथायाम्— 'तिरस्कृतशशाङ्ककान्तिकलापोन्मुखरमण्डला' । अथ तट्टिप्पनकम्—स्त्रियः वर्षाश्च किंभूताः । तिरस्कृतः शशाङ्कस्य कान्तिकलापः शोभासमुदायो येन तादृशमुन्नमुन्नत

[illegible] यासां तथा तिरस्कृता आच्छादिता शशाङ्कस्य चन्द्रस्य कान्तिर्याभि[illegible] [illegible] पयोवाहपानीयाय लापाः कुटुम्बीजनजेगीयमानरासकालि[illegible] [illegible]नन्दिलोकनार्थमूर्ध्वं मुखं वदनं येषां तादृशा मण्डला देशा यान्तु इति। [illegible] [illegible] विलोकय यथा ॥

[illegible] सुधागनचिकित्सकयोरिवार्भ-
भृत्याविनिर्मितिविशारदतां दधानैः।
[illegible]ऽग्निलभिषग्वृषभैर्महेभ्य-
जम्भद्विषद्भवनगर्भभुवः प्रदेशाः ॥ २५ ॥

[illegible] भृत्यायां विनिर्मितौ करणे विशारदता पाण्डित्यं दधानैरिभ[illegible] [illegible] पुत्रवास्ते। दासीप्रमुखैरित्यर्थः। [illegible] [illegible] निर्गमनरहितस्य गर्भनेदमनि' इति रघो। महेभ्येषु महा[illegible] [illegible] गर्भा [illegible] भवनस्य गेहस्य गर्भभुवो [illegible] [illegible] आशिश्रियिरे। संश्रिता। उत्प्रेक्ष्यते। [illegible] [illegible] सालोक्यपयोर्दिव्यगोत्रे समुत्पन्नौ [illegible] ॥

[illegible] शिशिरानि शीलति गुणनाम
[illegible] निज दधाश कन्याम।
[illegible] निसर्गानिपुणे [illegible] च
[illegible] स्वाभिधिलासशालि ॥ २६ ॥

[illegible] निर्मिति [illegible]
[illegible] सकलाश्रयेव।
[illegible]
[illegible] ॥ २७ ॥

[illegible]

[illegible] ॥ २८ ॥

[illegible]

[illegible] ॥

[illegible] ।
[illegible] ॥ १६८ ॥

[illegible] ॥ [illegible] ॥

[illegible] ।
[illegible] ॥ १६९ ॥

[illegible] ॥
इति [illegible] ॥

[illegible] ।
[illegible] ॥ १७० ॥

[illegible] ॥

[illegible] ।
[illegible] ॥ १७१ ॥

[illegible]

[illegible]

[illegible] ॥ २०६ ॥

[illegible]

[illegible] ॥

[illegible] धौतिका

[illegible] च [illegible] ।

[illegible]

[illegible] स्फुरति नमः [illegible] ॥ २०९ ॥

[illegible] —'[illegible] गर्जति [illegible]' इति [illegible] पुष्पा इवेति [illegible] गर्जन्ति [illegible] पुनरधुना इदानीं [illegible]

पाणां सहस्रद्वयेन विंशतिशत्या व्ययेन संगृहीतैरानीतैः कथीपका इत्याख्या नामवि शेषा येषाम् । 'कथीपो' इति प्रसिद्धाः । ते आदिमाः प्रथमा येषां तादृशैर्दिव्यैर्देवदुकूलोपमैर्वस्त्रैः कृत्वा श्राद्धा द्वीपोन्नतपुरश्रावकाः मुनीन्द्रोहीरसूरेर्मण्डपिकां 'माडवो' इति प्रसिद्धां व्यधुश्चक्रिरे । के इव । महेन्द्रा इव । यथा पुरंदरा आप्तभर्तुः तीर्थकरस्य शिविकां याप्ययानं विदधते ॥

ते त्यारिकाभिर्व्रतिपस्य सार्धसहस्रयुग्मप्रमिताभिरङ्गम् ।
अपूपुजन्भक्तिभरोल्लसन्तो जिनेशितुर्मूर्तिमिव प्रसूनैः ॥ १७२ ॥

ते श्राद्धाः सहार्धेन वर्तते तत्सार्धम्, सहस्रयोर्दशशत्योर्युग्मं युगलम्, सार्धं च तत्सहस्रयुग्मं च । तेन प्रमिताभिः प्रमाणं प्रापिताभिः पञ्चविंशतिशतप्रमाणाभिस्त्यारिकाभिः कृत्वा व्रतिपस्य सूरेः अङ्गं शरीरमपूपुजन्नर्चयन्ति स्म । कामिव । मूर्तिमिव । यथा श्राद्धा जिनेशितुस्तीर्थंकरस्य प्रतिमां प्रसूनैः कुसुमैः पूजयन्ति । किंभूताः । भक्तेः सेवासक्तेः भरेणातिशयेनोल्लसन्तः रोमाञ्चकञ्चुकीभवन्तः ॥

नभोनभस्याविव निःसरद्भिः पयःप्रवाहैर्नयने वितन्वन् ।
यावज्जनो मण्डपिकाममुष्यालंकारयामास शरीरयष्ट्या ॥ १७३ ॥

जनः श्राद्धलोकः यावद्यावता समयेन अथवा यस्मिन् समये अमुष्य स्वर्गतस्य सूरेः शरीरयष्ट्या तनूलतया कृत्वा मण्डपिकामलंकारयामास भूषयति स्म । वसनाद्यैर्भूषितायां मण्डपिकायां सूरिशरीरं शाययति स्मेत्यर्थः । जनः किं कुर्वन् । नयने स्वनेत्रे नभोनभस्याविव श्रावणभाद्रपदाविव वितन्वन् विदधत् । कैः । निःसरद्भिर्दुःखप्रकर्षाविरलधारानिवहनिःसरद्भिः पयःप्रवाहैर्बाष्पजलप्लवैः ॥

विमानघण्टापटुनादसान्द्रध्वनत्सुघोषेव गभीररावा ।
घण्टावली तावददृश्यमानाप्यध्वानितादिध्वनदभ्रमार्गे ॥ १७४ ॥

तावता समयेन तस्मिन् समये वा अध्वानिताः केनापि मानवैरवादिताः केनापि जनमात्रैरताड्यमानापि स्वयमेवादृश्यमाना नापि केषांचिच्चक्षुर्गोचरे भवन्ती तादृशी घण्टानामत्र मण्डले देवगृहे वादनवाद्यविशेषाणां द्वीपबन्दिरादौ च घटिकायामादिमानविशेषकृत्ये वादनीयानां 'घाट' इति प्रसिद्धनाम्नाम् आवली श्रेणी अदिध्वनत् गाढं शब्दायते स्म । क्व । अभ्रमार्गे मेघाध्वनि व्योमाङ्गणे । किंभूता । गभीरो मन्द्रो रावो ध्वनिर्यस्याः । केव । विमानानां सौधर्मदेवलोकसंबन्धिनां द्वात्रिंशल्लक्षमितानां देवनिवसनकृते नगरूपाणां घण्टानामेकसमयध्वनन्महद्घण्टिकानां पटुभिरतिप्रचुरैश्च सुघोषालीनतया [illegible] देवानां [illegible] निर्माणप्रगुणीकार[illegible]. नादैः निःशब्दैः प्रकटध्वनिभिः सान्द्रध्वनत् [illegible] गभीरा घण्टेव ॥ इति मण्डपिकाकरणसूरिशरीरशायनम् ॥

[illegible] सौभाग्ये [illegible] [illegible] [illegible]
[illegible]
[illegible]
[illegible] पुनः
[illegible]ऽज्ञानं पापं च। 'तमो गुणोऽपि [illegible] शोके [illegible] च। गुणभेदे [illegible]
पापे च' इत्यनेकार्थतिलके। [illegible] भजते। [illegible]
[illegible] अधुना पु[illegible]
[illegible] प्रादुरासीदिति ॥ इति विजयसेनसूरेर्गुणे [illegible] ॥

कातर्यमुत्सृज्य विधाय धैर्यं दुःखं तनूकृत्य स कृत्यविज्ञः।
गणं गणेन्द्रो गुणिनां वरेण्यः प्राचीनसूरीन्द्र इवावति स्म ॥ २०७ ॥

स गणेन्द्रो विजयसेनगणनायकः प्राचीनसूरीन्द्र पूर्वाचार्य इव गणं तपागच्छम् अवति स्म पालयामास। किंभूतः। गुणिनां गुणवतां वरेण्यः श्रेष्ठः। किं कृत्वा। कातर्यं कातरत्वं श्रीगुरुविरहेण विधुरीभावमुत्सृज्य त्यक्त्वा। च पुनः किं कृत्वा। धैर्यं धीरभावं विधाय आलम्ब्य। पुनर्दुःखं गुरुविरहावाप्तं तनूकृत्य स्वल्पं प्रणीय। किंभूतः। कृत्येषु धर्मादिकार्येषु विज्ञश्चतुरः ॥

श्रीसूरिहीरविजये भजति द्युलोक-
मभ्युद्गते विजयसेनगणावनीन्द्रे।
प्रीतिं जना दधति शीतरुचौ प्रयाते
क्षेत्रान्तरं समुदितेंऽशुमतीव कोकाः ॥ २०८ ॥

श्रिया युक्तः सूरिर्हीरविजय एतावता हीरविजयसूरिवरे द्युलोकं स्वर्गं भजति तथा विजयसेननाम्नि गणावनीन्द्रे गणनायके अभ्युद्गते उदयं भजमाने सति जना भविकलोकाः प्रीतिं धर्मस्नेहं प्रमोदं वा दधति बिभ्रति। के इव। यथा शीतरुचौ चन्द्रे क्षेत्रान्तरमन्यक्षेत्रं पश्चिममहाविदेहक्षेत्रं प्रयाते। तथा अंशुमति भानुमालिनि समुदिते सति कोकाः चक्रवाकाः प्रीतिं परस्परवियोगापगमादान दधते ॥

तत्पट्टोदयभूधरभास्वान्श्रीविजयदेवसूरीन्द्रः।
भजते तपगणराज्यश्रियमुर्वीसार्वभौम इव ॥ २०९ ॥

तस्य विजयसेनसूरेः पट्टः पदं स एवोदयभूधर उदयाचलस्तत्र भास्वान् सहस्रकिरणः श्रिया तपागणलक्ष्म्यान्वितो विजयदेवसूरीन्द्रः अधुना इदानींतनसमये धृतिविधानावसरे तपगणस्य तपागच्छस्य राज्यश्रियं भजते। क इव। उर्वीसार्वभौम इव। चक्रवर्ती उर्वीं भजते पालयति ॥

वाद्यौघमाद्यन्निनदैर्जिनस्येवामुष्य निर्वाणमहं प्रणेतुम् ।
किमाह्वयन्तस्त्रिदशानशेषानादाय तां श्राद्धजनाः प्रचेलुः ॥ १७५ ॥

श्राद्धजनाः श्रावकव्रजा. ता मण्डपिकामादाय स्कन्धेषु समधिरोप्य प्रचेलु सस्कारभूमिं प्रति प्रचलन्ति स्म । उत्प्रेक्ष्यते—वाद्यौघाना वादित्रसंदोहानां माद्यद्भिर्बहलीभवद्भिर्निनदैः शब्दैः कृत्वा अशेषान् सर्वानपि महेन्द्रप्रमुखान् त्रिदशान् देवान् किमाह्वयन्त आकारयन्त इव । कि कर्तुम् । अमुष्य सूरेर्जिनस्य तीर्थकरस्येव निर्वाणमह परलोकगमनमहोत्सव प्रणेतु विधातुम् ॥

ध्वजव्रजैरूर्जितसांध्यरागोपयुक्तवद्विष्णुपदं सृजन्तः ।
आदाय तां मण्डपिकां मुनीन्दोः संस्कारभूमीमनयञ्जनास्ते ॥ १७६ ॥

ते जना द्वीपोन्नतनगरश्राद्धलोका मुनीन्दोर्हीरसूरेर्मण्डपिकामादाय गृहीत्वा सस्कारस्य परलोकोपगतशरीरिशरीरस्य कृशानुना सस्कृतिकरणस्य भूमीं स्थानकमगमन् गच्छन्ति अनयन् प्रापयन्ति स्म वा । कि कुर्वन्त' । सृजन्तः विदधतः । किम् । विष्णुपद हरिचरणमाकाशम् । किंवत् । ऊर्जितेन प्रबलेन सन्ध्याया दिवसावसाने भव. सांध्यः स चासौ रागश्च सायंतनसन्ध्यासबन्धिरक्तिम्णा युक्तवत्कलितमिव । कैः । ध्वजव्रजैः. पताकाप्रकारैः । विविधवर्णवैजयन्तीराजिभि. सन्ध्यायामनेके नीलपीतरक्तादिका रङ्गा भवेयु ॥

महीन्दिरायाः शिरसीव नीलमणीप्रणीतातपवारणस्य ।
रसालसालस्य तलेऽखिलास्ते स्वांसस्थलान्मण्डपिकाममुञ्चन् ॥ १७७ ॥

अखिलाः समस्ता अपि श्राद्धजना द्वीपोन्नतपुरलोका. स्वांसस्थलान्निजस्कन्धप्रदेशात । आत्मीयस्कन्धेभ्य इत्यर्थः । रसालसालस्य सहकारमहीरुहस्य तले अध प्रदेशभूमौ मण्डपिकाममुञ्चन् शुद्धधरणीमण्डले स्थापयन्ति स्म । कथंभूतस्य रसालसालस्य । नीलमणीप्रणीतातपवारणस्य ··· ·· ·· ·········· । उत्प्रेक्ष्यते—महीन्दिराया ·············· ॥

अथोपस्कारमेलनम्—

संस्कारोपस्करमथ तत्रानिन्युर्जना गतोत्साहाः ।
चन्दनदलिकादिममिव गीर्वाणा' सार्वनिर्वाणे ॥ १७८ ॥

अथ संस्कारभूमौ मण्डपिकाया आनयनानन्तरं गतोत्साहा. [illegible] । 'उत्साह प्रगल्भता । अभियोगोद्यमौ प्रौढि ' इति [illegible] । जनाः [illegible] स्कारोचितसहकारतरुसमीपभूमौ सस्कारोपस्करं सूरिशरीरसंस्कारकरणमुपकरणमानिन्युरानयन्ति स्म । सस्कारोपस्करं [illegible] भूतम् । चन्दनदलिकादिकम् [illegible] । [illegible] इव । गीर्वाणा इव । यथा देवा [illegible] सार्वस्य [illegible] निर्वाणे [illegible] तदर्थमसंस्कारोपस्करं गोशीर्षचन्दनादिकमानयन्ति ॥

सीहगिरेरिव वज्रस्वामी तस्यैव पदपयोधिविधुः।
श्रीविजयदेवसूरिक्षोणीन्द्रः पर्वतायुः स्यात्॥ २१०॥

श्रीसीहगिरिसूरेरिव श्रीमान् वज्रस्वामी तस्य विजयसेनसूरेः पदं पट्टः स एव पयोधिः समुद्रः तदुल्लासविधाने विधुः शारदीनशर्वरीवरयिता एष सकलकुवलयप्रतिबोधविधायकः श्रीमान् सर्वत्र शोभाविभ्राजिष्णु विजयदेवसूरिः पर्वतायुः पर्वतानां महागिरीणामिवासंख्यवर्षायुस्तत्त्वाद्भवतात्॥

अथाशीर्वचनम्—

यावन्मार्तण्डमुख्यग्रहगणकलितो भूभृतां चक्रवर्ती
प्रीतिं पीयूषपूरैः सृजति जनदृशां शार्वरीसार्वभौमः।
यावत्पाथोजपाणिर्हरिदलसदृशामास्यपद्मप्रकाशी
यावद्भूपीठभारं भजति निजफणामण्डलैः कुण्डलीन्द्रः॥ २११॥

तावदिति काव्यसंबन्धोऽग्रे वक्ष्यते। यावन्तं समयं भूभृतां सर्वपर्वतानां सर्वोत्तमत्वात् लक्षयोजनमितत्वात्तीर्थकृतां जन्माभिषेकस्थानत्वाच्च परशासनेऽपि 'दिवमङ्गादमराद्रिरागताम्' इत्युक्तत्वेन स्वर्गाधारत्वाच्च चक्रवर्ती सुमेरुः। अथ वा 'सातकुम्भावनीभृत्' इति पाठः। सुवर्णाचलो वर्तते। किंभूतः। मार्तण्डो भास्करो मुख्योऽग्रणीः प्रधानो येषु तादृशाः ग्रहाः सोमनक्षत्राद्या अष्टाशीतिसंख्या उपलक्षणात्पक्षनतारकास्तेषां गणाः समूहास्तैः कलितो युक्तः। तथा यावन्तमनेहसं शर्वरीसार्वभौमश्चन्द्रमाः। किंभूतः। जनदृशां लोकलोचनानां पीयूषपूरैः सुधारसप्रसरैः प्रीतिं सृजति। प्रीणातीत्यर्थः। तथा यावत्पाथोजपाणिः सहस्रकिरणो विद्यते। किंभूतः। हरितो दिश एवालसदृशो मृगाक्ष्यस्तासामास्यानि मुखान्येव पद्मानि विकाशयतीत्येवंशीलः। तथा यावत्कुण्डलीन्द्रो नागराजः शेषनागः भूपीठभारं मेदिनीमण्डलभारं भजति। वहतीत्यर्थः। कैः। निर्जरात्मीयैः फणामण्डलैः सहस्रफणैः॥

यावज्जम्भारिधूमध्वजजलजसुहृत्सूनुरक्षःस्रवन्ती-
कान्तावासाहिकान्तत्रिनयनसवयःपार्वतीशा दिगीशाः।
यावत्पाथोधिपृथ्वीधरगुरुगुरुतां बिभ्रती रत्नगर्भा
जन्तून्यावत्पुनाति त्रिभुवनभवनान्भारती विश्वभर्तुः॥ २१२॥

यावन्तं कालं जम्भारिः पुरंदरः, धूमध्वजो वह्निः, जलजानां पद्मानां सुहृन्मित्रं भास्वान्, तस्य सूनुर्नन्दनो यमः, रक्षो नैर्ऋतिः, स्रवन्तीकान्तो नदीपतिः समुद्रः तत्र वासो वेश्म यस्य सोऽर्णवमन्दिरो वरुणः, अहिकान्तो वायुः, त्रिनयनस्य सवया मित्रं धनदः, पार्वत्या गौर्या ईशो वल्लभः शम्भुः। 'दण्डधरोऽर्कसूनुः', तथा 'वरुणस्त्वर्णवमन्दिरः

व्यालानुषङ्गवशतो वसतेर्वनान्ते
पुष्पश्रिया फलभरैरपि वन्ध्यभावात् ।
आगान्मुमूर्षुरतिदुःखगणेन गन्ध-
सारः किमत्र तिथिसंख्यमणप्रमाणः ॥ १७९ ॥

अत्र संस्कारभूमौ तिथीनां पञ्चदशकर्मवादिनां सख्या मान येपा तादशाना चत्वारिंशत्सेरप्रमाणानां मणानां मानविशेषाणा प्रमाण यस्य । पञ्चदशमणा इत्यर्थः । गन्धसारश्चन्दन आगात् । उत्प्रेक्ष्यते—अतिदुःखगणेन अत्यभ्यधिकानां हृदयंतुदाना दु खानामसातानां गणेन भरेण कृत्वा मुमूर्षुर्मर्तुमिच्छुरिव । दु खं कुत । व्यालाना दुष्टद्विजिह्वानामनुषङ्गस्य सर्वदा सङ्गस्य वशत आयतत्वात् । पुन कस्य । वनानामन्ते काननानां प्रान्ते मध्ये वा वसतेर्निवासात् च । अपि पुन पुष्पश्रिया कुसुमलक्ष्म्या अथ च पुष्पवद्दशदिक्षु विकरान्त्या व्यापारव्यवहारैः सर्वत्र जनस्थलदेशेषु विस्तृतया इन्दिरया समृद्ध्या । अपि पुनः फलाना सस्याना पुत्रपौत्रादीना भरैर्द्वारिकाप्राप्तयादववशवद्वृन्दैर्वन्ध्यभावान्मोघत्वात् । 'यद्यपि चन्दनविटपी विधिना फलपुष्पवर्जितो विहितः । निजवपुषैव परेषां तथापि संतापमपनयति ॥' इति सूक्तवचनात् । इत्यादिकारणात्सजातमुमूर्षा ॥

घृतमिव पितृनिधनभवोऽगुरुद्रवस्तत्र पञ्चसेरमितः ।
सुहृदिव सस्नेहोऽगुरुरप्यानीतो मणत्रितयः ॥ १८० ॥

तत्र संस्कारोपस्करे सस्कारभूमौ वा अगुरुद्रवः 'चूओ' इति प्रसिद्धनामा पञ्चभिः सेरैर्मितः प्रमाणीकृतः पञ्चसेर आनीत । किंभूत । पितुर्गुरोर्निधनात मरणात् निदानाद्भव उत्पत्तिर्यस्य । किमिव । घृतमिव । यथा आज्य पितुर्दध्नो मथनानाशात् अथ वा मक्षणस्य विनाशात्तापनगालनात्संजातम्, तथा चूआकोऽपि तातस्य कृष्णागुरोर्गालादुत्पन्नः । अपि पुनः सुहृदिव सखेव सह स्नेहेन प्रेम्णा चूआनामतैलद्रवेण च युक्तः कथितः । मणानां त्रितय त्रिक यस्य तादृशोऽगुरु कालतुण्डः समानीत ॥

श्यामत्वमात्मपितृघातजपातकं च
गौरीशविग्रहहुताशनसेवनाभिः ।
सारङ्गनाभिनिवहः प्रणिहन्तुकाम-
स्तत्राजगाम किमु सेरयुगप्रमाणः ॥ १८१ ॥

[illegible]

परिचर्याभिः । 'क्षितिजलपवनहुताशनयजमानाकाशसोमसूर्याख्या । अष्टौ शिव ' भगे इति वचनात् पतिसेवाभिरभिमते प्रवेदे प्रणिहन्तुकामः किमु निवारयितुमिच्छुरिव,

दिवं गतस्यापि विभोरमुष्य श्लोकस्त्रिलोक्यामपि पोस्फुरीति ।
विवक्षयेतीव पुरो नराणामागात्त्रिसेरीप्रमितः सिताभ्रः ॥ १८२ ॥

त्रयाणां सेराणां समाहारस्त्रिसेरी तया प्रमित. प्रमाणीकृतः सेरत्रयमानः सिताभ्र. कर्पूरः समागात् । उत्प्रेक्ष्यते—नराणां समग्रजनानां पुरोऽग्रे इति विवक्षया वक्तुमिच्छयेव । इति किम् । दिवं गतस्यापि स्वर्गं यातस्यापि अमुष्य विभोः गुरो' श्लोको यशस्त्रिलोक्यामपि पोस्फुरीति जगत्त्रयेऽपि स्फूर्तिमियर्ति इति हेतोस्त्रिसेरीमितः ॥ इति कर्पूरोपरकरमेलनमानयनं च ॥

ज्योतिःकुमारा इव तीर्थभर्तुः प्रज्वाल्य पूर्वं ज्वलनं चितायाम् ।
सूरेः शरीरस्य शरीरिणस्ते संस्कारमातन्वत चन्दनाद्यैः ॥ १८३ ॥

ते शरीरिण' श्राद्धजनाः सूरेः शरीरस्य चन्दनाद्यै. श्रीखण्डागुरुचूआककर्पूरकस्तूरिकाभिः कृत्वा संस्कारं वह्निना संस्करणं भस्मसाद्विधानमातन्वत चक्रुः । किं कृत्वा । पूर्वं प्रथमं चितायां ज्वलनमग्निं प्रज्वाल्य संधुक्ष्योद्दीप्य वा । क इव । ज्योति'कुमारा इव । यथा अग्निकुमारास्तीर्थभर्तुश्चितायां पुरं प्रदत्तादेशा नयननिःपतद्बहलबाष्पप्लवा पूर्वं ज्वलनं प्रज्वालयन्ति ॥

सप्तसहस्राः सर्वाः संभूय त्यारिका इह व्ययिताः ।
सप्तापि दुर्गतीरिव निषेद्धुमेतैः समुत्सुकितैः ॥ १८४ ॥

ते' श्राद्धै' पूजादीनां वस्त्रादीनां सर्वाः समस्ता अपि संभूय मेलयित्वा इह सूरिशरीरसंस्कारसमये सप्तसहस्रप्रमाणा त्यारिका व्ययिता व्ययीकृता. । उत्प्रेक्ष्यते—सप्तसंख्या अपि दुर्गती. नरकान्निषेद्धुं निवारयितुं समुत्सुकितैरुत्कण्ठितैरिव ॥ इति सूरिशरीरसंस्कारकरणम् ॥

चैत्ये श्रीफलतन्दुलाञ्जिनपुरस्ते ढौकयित्वा ततः
संस्तुत्य प्रणिपत्य भक्तिभरिता जग्मुर्गृहानात्मनाम् ।
गीर्वाणा इव वासवप्रभृतयो नन्दीश्वरेऽष्टाहिका
निर्माय्यानुसमेतयौवतयुता निर्वाणकल्याणके ॥ १८५ ॥

ते समस्ता अपि संस्कारकारिण. उपलक्षणात्परेऽपि द्वीपोन्नतादिनगरश्रावकास्तत संस्कारकरणानन्तरं चैत्ये जिनप्रासादे श्रीजिनपुरस्तीर्थकृत्प्रतिमानां पुरस्तात् श्रीफलानि नालिकेराणि तथा तन्दुलानक्षतान् उपलक्षणादपरगोधूमयुगंधरीप्रमुखधान्यश्रेणीं ढौकयित्वा ततस्तदनन्तरं च सस्तुत्याष्टस्तुतिभिर्देववन्दनां विधाय मध्ये अजितशान्ति-

प्रशस्तिवृत्तम् ।

श्रीपतिरिव सपदिः श्रीपतिनामा विशारदेन्दुरभूत् ।
दिग्गजिभवद्भूर्धुर्यन्याप्टो पण्डितोत्तंसाः ॥ १ ॥
वैराग्यैर्लब्धिभिरपि भाग्यैः सौभाग्यवैभवैरधिकैः ।
यस्य समो न परोऽभूद्भानोरिव कोऽपि तेजोभिः ॥ २ ॥
यन्मनुजशिष्यवृषभस्त्रिजगद्विद्वत्पुरंदरः समभूत् ।
चतुरास्यः कविरगणितयद्गुणगणनाचिकीरासीत् ॥ ३ ॥
श्रीगज्जगर्षिविबुधो जम्बुरिव शीललीलया जज्ञे ।
यत्तपसस्तेजोरविरसासहिर्गगन इव गतवान् ॥ ४ ॥
पट्टायानामिव यो विराधनाः प्रोज्झति स पड्विकृतीः ।
निर्विकृतिकान्यशेषाण्यपि विजहौ दुःकृतानीव ॥ ५ ॥
यावज्जीव गौतम इव षष्ठैः पारणां विभुर्विदधे ।
पुनरेकस्मिन्स्थाने भक्तजले विरचयाचक्रे ॥ ६ ॥
लुम्पाकैर्लुण्टाकैरिव लुण्ठितनिखिलबोधिवीजधनम् ।
व्याप्तं तद्वर्गेण च तमोगुणेनेव भूतपतिम् ॥ ७ ॥
सौराष्ट्रजनपदं यः प्रतिबोधितवाननन्यमहिमनिधिः ।
वज्रस्वामी सौगतजनैर्यथा बौद्धधरणिधवम् ॥ ८ ॥ (युग्मम्)
प्रस्रवणममृतमिव गदगणान्गुरोः शमयति स मूर्तिमताम् ।
देवा अपि यत्सेवा भक्ता इव कुर्वते तपसा ॥ ९ ॥
नृपमालदेवपृष्ठे प्रविष्टवान्यद्विवादढरितमनाः ।
योधपुरे किल पाशादिनचन्द्रो वाचकः सुचिरम् ॥ १० ॥
विष्णोः श्रीरिव हृदये रमते सैकादशाङ्कि(ङ्गि)कायस्य ।
भेजुरनेके मुनयोऽप्युपकारिणमिव गणाधीशम् ॥ ११ ॥
श्रीसीहविमलविबुधस्तस्य विनेयोऽजनिष्ट शिष्टबुधः ।
यद्धिषणाजितधिषणोऽध्येतुं दिवि कविसमीपेऽगात् ॥ १२ ॥

श्रान्ते च बृहच्छान्तिप्रमुखस्तुतिं कृत्वा ततस्तस्मादनु पश्चात् प्रणिपत्य । प्रणामकु-र्वसेवातः । अत एव कारणात्ते किंभूताः । भक्तिभरिताः सेवासक्त्या व्याप्ताः सन्तो नमस्यित्वा आत्मनां स्वेषां स्वेषां गृहान् जग्मुर्गताः । ते किंभूताः । अनु पश्चात् देव-गृहागमनानन्तरं समेतं समागतं यथौवतं युवतीसमूहस्तेन युताः सहिताः । के इव । गीर्वाणा इव यथा वासवप्रभृतयः पुरंदरप्रमुखाश्चतुर्निकायामराः निर्वाणनाम्नि तीर्थंकर्तॄ मोक्षगमनाभिधाने कल्याणकसमये नन्दीश्वरेऽष्टमद्वीपे अष्टाहिका स्वस्वजनरतिकरदधि-मुखप्रमुखपर्वतप्रासादेष्वष्टाहिकामष्टवासरीं यावन्महोत्सवमतिशायिनं महं निर्माय आत्मनां नगरभवनज्योतिर्विमानान् वानव्यन्तरभवनवासिज्योतिष्कविमानवासिनश्चतु-र्निकायिकाः सर्वे सुरा गच्छन्ति । तेऽपि किंविशिष्टाः । अनु पश्चात्पृष्ठे समेतं समागतं यथौवतं स्वस्वनिकायकामिनीकदम्बकं तेन कलिताः ॥ इति सूरिनिर्वाणप्रस्तावनम् ॥

तस्मिन्नेव निशावसानसमये दिव्यश्रियं संश्रय-
न्साहिश्रीमदकब्बरावनिपतेः श्रीहीरसूरीश्वरः ।
प्राग्वाग्बद्ध इवाभ्युपेत्य सविधे प्राचीनरूपाञ्चितो
मित्रस्येव निजं द्युलोकगमनं प्राक्स्नेहतः प्रोचिवान् ॥ १८९ ॥

श्रीपार्श्वदेवलोकलक्ष्म्या कलितो हीरविजयनामा सूरीणामाचार्यभट्टारकाणां मध्ये इष्टे ईशिता ऐश्वर्यवान् भवतीति ईश्वरः प्राक् स्नेहतः प्राचीनमिलनसंजातप्रीतिप्रकर्षात् पा-तिसाहेः श्रीमतश्चतुर्दिगन्तदेशाधिपत्यहस्त्यश्वरथपदातिपुरनगरग्रामकोटहेमरत्नमणिमौ-क्तिकप्रमुखाशेषसंपच्छालिनः अकब्बरनाम्नोऽवनिपते राज्ञः निजमात्मीयं [illegible] स्वर्लोके यानं प्रोचिवान् । कस्येव । मित्रस्येव । यथा प्रियसुहृदः [illegible] प्रोच्यते । किं कृत्वा । अभ्युपेत्य समेत्य । क । सविधे समीपे अर्थात् साहेः पार्श्वे । क इव । प्राग्वाग्बद्ध इव । यथा कश्चित्सुरः प्राक् पूर्वजन्मनि दत्तया वाचा बद्धो [illegible] चित्पार्श्वे समायाति । कदाभ्युपेत्य । तस्मिन्नेव निशावसानसमये । [illegible] [illegible] तस्या एव निशाया अवसाने प्रान्ते [illegible] [illegible] प्रोक्तवान् [illegible] । किंविशिष्टः सूरिः । प्राचीनेन हीरसूरि[illegible] [illegible] तस्मिन्[illegible] [illegible] । [illegible] [illegible] [illegible] ॥ इति [illegible] [illegible] ॥

[illegible]-
[illegible] ।
[illegible]
[illegible] ॥ १९० ॥

प्रचेताः', तथा 'वातोऽहिकान्तपवमानमरुत्प्रकम्पनाः', तथा 'पशुप्रमथभूतोमापति', एतानि चत्वार्यप्युक्तपदानि हैम्याम् । एते सर्वेऽपि दिगीशा दिक्पाला वर्तन्ते । तथा यावद्रत्नगर्भा भूरास्ते । किं कुर्वती । पाथोधीनां सर्वसमुद्राणां तथा यावद्वसुधावलयवर्तिनां पृथ्वीधराणां मेरुप्रमुखपर्वतानां च गुरुमतिशायिनीं गुरुतां गरिमाणं भारभरं बिभ्रती धारयन्ती । तथा यावद्विश्वभर्तुस्त्रैलोक्यनायकस्य तीर्थंकरस्य भारती सिद्धान्तरूपा वाणी त्रिभुवनभवनान् स्वर्गपातालभूमिषु गृहाणि येषां तादृशान्नाकिनागनागराजन्तून् प्राणिनः पुनाति पवित्रयति तारयति ॥

स्थेमानं गाहमानो बलमथनपथे यावदौत्तानपादि-
र्यावत्कल्लोलमालाविलिखितदिविषत्पद्धतिः सिन्धुकान्तः ।
यावत्सिद्धस्रवन्तीतपनतनुरुहाभारतीसंगमश्च
श्रीमत्पार्श्वप्रसादाज्जगति विजयतां हीरसौभाग्यकाव्यम् ॥ २१३ ॥

यावत्समयं बलमथनपथे गगनाङ्गणे उत्तानपादस्य राज्ञोऽपत्यमौत्तानपादिः ध्रुवः स्थेमानमतिशयेन स्थिरतां गाहते अवलम्बते । च पुनर्यावत् कल्लोलमालाभिस्तरङ्गराजीभिः विलिखिता स्पृष्टा व्याप्ता दिविषदां देवानां पद्धतिर्मार्गो व्योम येन तादृशः सिन्धुकान्तः । तथा च पुनर्यावत्सिद्धस्रवन्ती गङ्गा, तथा तपनतनुरुहा सूर्यपुत्री यमुना, तथा भारती सरस्वती, तासां तिसृणां संगमो वर्तते । तावन्तं समयं श्रीमतस्त्रैलोक्यलक्ष्मीकलितस्य पार्श्वस्य श्रीपार्श्वनाथस्यार्थात् श्रीमच्चिन्तामणिपार्श्वनाथस्य प्रसादाज्जगति महीमण्डले इदं हीरसौभाग्यं काव्यं विजयतां सर्वोत्कृष्टत्वेन प्रवर्तताम् ॥ इति ग्रन्थावसाने श्रीमत्पार्श्व इति मङ्गलाभिधानम् ॥

यं प्रासूत शिवाह्वसाधुमघवा सौभाग्यदेवी पुनः
श्रीमत्कोविदसिंहसीहविमलान्तेवासिनामग्रिमम् ।
तद्ब्राह्मीक्रमसेविदेवविमलव्यावर्णिते संमदा-
त्सर्गः सप्तदशो बभूव चरिते श्रीहीरसूरिप्रभोः ॥ २१४ ॥

अत्र हीरसौभाग्यनामकाव्ये संमदादानन्दाद्देवविमलेन व्यावर्णिते श्रीहीरसूरिप्रभोः श्रीहीरविजयसूरीश्वरस्य चरिते गुणोत्कीर्तनरूपे चरित्रे सप्तदशः सर्गो बभूव संजातः ॥

इति पण्डितश्रीसिंहविमलगणिशिष्यपण्डितदेवविमलगणिविरचितायां स्वोपज्ञहीरसौभाग्यकाव्यवृत्तौ श्रीशत्रुंजयोत्तरणप्रस्थानशत्रुंजयाभिनिवृत्तरणाजयपार्श्वनाथयात्राकरणतदग्रनगरस्थलमहिमवर्णनद्वीपमधर्मगुरुगमनोन्नतनगरपवित्रीकरणमहोत्सवानन्तरावनन्दि सान्नन्दानपुरे स्वर्गगमनविजयसेनसूरिगणधरत्वकरणविजयदेवसूरिपुरंदरगच्छप्रतिष्ठाकरणो नाम सप्तदश सर्गः ॥

[illegible]जालीयेन [illegible] वणिजा [illegible] [illegible] पुरोऽग्रे [illegible] दर्शनाय [illegible] शरीरस्य [illegible] मालोक्य दृष्ट्वा [illegible] इति शेषः। विलोकने। [illegible] न दीक्षितेन गृहीतप्रतिज्ञेन। [illegible] नागरिकनगर[illegible] दर्शन[illegible] ॥

दिव्यविमानविलोकनयानां पुनरेत्य [illegible] ।
न्यगदन्नगरजनानां [illegible] ॥ १[illegible] ॥

[illegible] ॥ [illegible] नगरजनानां पुरतः [illegible] विमान[illegible] ॥ [illegible] ॥ [illegible] दर्शनलोलुपानाम् ॥

[illegible]

[illegible]

[illegible]

प्रशस्तिसूत्रम्।

श्रीपतिरिव संपद्भिः श्रीपतिनामा विशारदेन्दुरभूत्।
दिक्कुम्भिवद्बभूवुर्यस्याष्टौ पण्डितोत्तंसाः ॥ १ ॥
वैराग्यैर्लब्धिभिरपि भाग्यैः सौभाग्यवैभवैरधिकैः।
यस्य समो न परोऽभूद्भानोरिव कोऽपि तेजोभिः ॥ २ ॥
यन्मनुजशिष्यवृषभस्त्रिजगद्विद्वत्पुरंदरः समभूत्।
चतुरास्यः कविरगणितयद्गुणगणनाचिकीरासीत् ॥ ३ ॥
श्रीमज्जगर्षिविबुधो जम्बुरिव शीललीलया जज्ञे।
यत्तपसस्तेजोरविरसासहिर्गगन इव गतवान् ॥ ४ ॥
पट्कायानामिव यो विराधनाः प्रोज्झति स्म षड्विकृतीः।
निर्विकृतिकान्यशेषाण्यपि विजहौ दुःकृतानीव ॥ ५ ॥
यावज्जीव गौतम इव षष्ठैः पारणां विभुर्विदधे।
पुनरेकस्मिन्स्थाने भक्तजले विरचयांचक्रे ॥ ६ ॥
लुम्पाकैर्लुण्टाकैरिव लुण्ठितनिखिलबोधिबीजधनम्।
व्याप्तं तद्वर्गेण च तमोगुणेनेव भूतपतिम् ॥ ७ ॥
सौराष्ट्रजनपदं यः प्रतिबोधितवाननन्यमहिमनिधिः।
वज्रस्वामी सौगतजनैर्यथा बौद्धधरणिधवम् ॥ ८ ॥ (युग्मम्)
प्रस्रवणममृतमिव गदगणान्गुरोः शमयति स्म मूर्तिमताम्।
देवा अपि यत्सेवा भक्ता इव कुर्वते तपसा ॥ ९ ॥
नृपमालदेवपृष्ठे प्रविष्टवान्यद्विवाददरितमनाः।
योधपुरे किल पाशादिनचन्द्रो वाचकः सुचिरम् ॥ १० ॥
विष्णोः श्रीरिव हृदये रमते संकाशशाह्नि(ह्नि)नायस्य।
भेजुरनेके मुनयोऽप्युपकारिणमिव गणाधीशम् ॥ ११ ॥
श्रीसीरविमलविबुधस्तस्य विनेयोऽजनिष्ट सिद्धबुधः।
यद्धिषणाजितधिषणोऽप्येतुं दिवि कविसमीपेऽगात् ॥ १२ ॥

शेषा इव त्रिभुवनाधिपतेः प्रमोदा-
ल्लोकाः सहैव जगृहुः सहकारिकास्ताः ।
प्रास्थापयन्पुनरकब्बरपातिसाहे-
रद्वैतविस्मयकरीरुपदा इवैताः ॥ १९१ ॥

ते लोकाः श्रावका अपरेऽपि च नगरग्रामलोका यवनाश्च सहैव समकालमागत्य गुरुमाहात्म्यादेककालोत्पन्नास्ताः मञ्जरीः सहकारिकाश्च 'कइरी' इति प्रसिद्धाः जगृहुर्गृह्णन्ति। कस्मात् । प्रमोदात् हर्षात् । का इव । शेषा इव । यथा त्रिभुवनाधिपतेः त्रैलोक्यनायकस्य परमेश्वरस्य शेषाः 'सेख' इति प्रसिद्धाः गृह्यन्ते । पुनस्ते तन्नगराधिपयवना अकब्बरपातिसाहेरेताः सहकारिकाः प्रास्थापयन् प्रेषयामासुः । किंभूताः । अद्वैत न विद्यते द्वैतं द्वितयं यत्र तदद्वैतमसाधारणं मनस्यसामान्यं विस्मयमाश्चर्यं चित्रं कुर्वन्तीति ता अद्वैतविस्मयकरीः । उत्प्रेक्ष्यते—उपदा ढौकनिका इव । अथ वोपमानम् । का इव । उपदा इव प्राभृतानीव । 'भेट' इति प्रसिद्धाः ॥ इति माकन्दस्य फलनं तत्फलग्रहणं साहेः प्रेषणं च ॥

लाडकीति प्रिया यस्य मूर्ता श्रीरिव वेश्मनि ।
स्वर्गवी किमुत स्वर्गाद्भूमण्डलमुपागता ॥ १९२ ॥
स द्वीपबन्दिरश्रेष्ठी मेघनामा परीक्षकः ।
आर्षभिर्वृषभस्येव सूरेः स्तूपमकारयत् ॥ १९३ ॥

मेघनामा परीक्षकः मेघपारिखनामा सूरेर्हीरविजयव्रतीन्द्रस्य स्तूपमकारयत्कारयामास । क इव । आर्षभिरिव । यथा ऋषभस्यापत्यं नन्दनः आर्षभिर्भरतचक्री वृषभस्य ऋषभदेवस्य अष्टापदपर्वते ऋषभदेवदेहसंस्कारस्थाने स्तूपं कारितवान्, तथा वृषभस्वामिप्रतिमां च तथा भ्रातॄणां नवनवतिप्रतिमा च आत्मप्रतिमां च स्तूपशतं च मा कश्चिदाक्रमणं करिष्यतीति तत्रैकं भगवतः स्तूपं शेषाण्येकोनशतभ्रातॄणाम्—इति हारिभद्र्यां मलयगिर्यां चावश्यकवृत्तौ । किंभूतः । द्वीपबन्दिरस्य । यत्र द्वीपान्तरेभ्यो यानपात्राः समायान्ति तेषु यान्ति च तद्बन्दिरमित्युच्यते । द्वीपनाम्नो नगरस्य श्रेष्ठी नगरमध्ये मुख्यपदभाक् । स कः । यस्य लाडकी नाम्नी प्रिया पत्नी वर्तते । उत्प्रेक्ष्यते—वेश्मनि मेघपरीक्षकसौधे मूर्ता मूर्तिमती लाडकीशरीरिणी श्रीर्लक्ष्मीरिव । उताथवा असौ लाडकीरूपा स्वर्गाद्देवलोकाद्भूमण्डले पृथिवीपीठे उपागता समायाता स्वर्गवी कामधेनुरिव ॥ युग्मम् ॥

आकृष्टा इव तिष्ठन्तः प्रभावैस्तत्प्रभोरिह ।
अर्हन्मूर्तेरिवैतस्य सुराः सांनिध्यमादधुः ॥ १९४ ॥

[illegible] यस्य । कलिलमिव । पङ्कमिव । यथा रते. पत्नौ भर्तरि मकरे [illegible] [illegible] आश्रयणं यस्य । इति मकरे चन्द्रमाः । पुन. शनौ शनैश्चरे [illegible] [illegible] गति । किंवत् । सलिलवत् । यथा पानीयं मीनं [illegible] कुरुते [illegible] [illegible] । इति मीने शनैश्चर. । इति नवापि ग्रहा जन्मकुण्डल्याम् । [illegible] [illegible] ग्रहेषु सूर्यादिनवग्रहेषु तस्य हीरकुमारस्य [illegible] [illegible] [illegible] कीर्तिप्रतापस्वरूपस्य [illegible] आयेषु [illegible] [illegible] । [illegible] तिथौ [illegible] । [illegible] । [illegible] [illegible] । [illegible]—हीरकुमारस्य जन्मानुभावेन [illegible] [illegible] मार्गशीर्षमासो [illegible] । कस्मिन् । [illegible], [illegible] [illegible], [illegible] पञ्च स्मरबाणा, [illegible] । [illegible] । [illegible] पुरन्दरो यो [illegible] [illegible] मार्गशीर्षमासे नाम्न्या तिथौ [illegible] [illegible] घटी १२ [illegible] मिथुनराशौ [illegible] [illegible] नाथी देवी सुतरत्नमजीजनत् । [illegible] [illegible] । [illegible] शुभगणितं [illegible] [illegible] । पुन [illegible] । [illegible] [illegible] । [illegible] । पुन' [illegible] । [illegible] [illegible] । [illegible] । [illegible] [illegible] । [illegible]—[illegible] [illegible] [illegible] [illegible]

सुरा देवास्तस्य गुरुपादुकापवित्रीकृतस्तूपस्य सांनिध्यं सनिधिता पार्श्ववर्तिकताम्। आराधकानां कामितपूरकतामिति यावत् । आदधुश्चक्रु: । लोकरक्षासमीहितपूरणादिकं सांनिध्यं विदधते । कस्या इव । अर्हन्मूर्तेरिव । यथा भगवत्प्रतिमायाः सुराः सानिध्यं कुर्वते । सुरा: किं कुर्वन्तः। तिष्ठन्त.। कुत्र ।इह सूरिस्तूपे । उत्प्रेक्ष्यते—तस्य प्रभोः हीरसूरेः प्रभावैर्माहात्म्यैराकृष्टा इव आकृष्यानीता इव ॥

तत्रार्चितुं स्तूपमकब्बरेण समीपभूमी कियती वितीर्णा ।
सिद्धाचले सिद्धनृपेण नाभिभवं यथा द्वादश संनिवेशाः ॥ १९१ ॥

तत्रोन्नतनगरसीमभूमीमण्डले स्तूपं तात्स्थ्यात्तद्व्यपदेशात्सूरिपादुका गुरुपादुकाधिष्ठानमर्चितुं पूजयितुमकब्बरेण पातिसाहिना कियती कियत्प्रमाणा द्वाविंशतिवीघाप्रमिता। क्षेत्रादिषु मानविशेषे वीघा इत्युच्यन्ते । ते च सोराष्ट्रगुर्जरजनपदेषु प्रसिद्धाः । समीपस्य अर्थात्स्तूपस्य पार्श्ववर्तिनी भूमी वितीर्णा प्रदत्ता। केनेव । सिद्धनृपेणेव ।अत्र यथा सिद्धाचले श्रीशत्रुंजयपर्वते नाभिभवं श्रीऋषभदेवमर्चितुं सिद्धराजजयसिंहदेवेन समीपभूमौ विमलाचलसमीपवर्तिनो द्वादश संनिवेशा ग्रामा वितीर्यन्ते स्म । 'देवकपत्तने स्वनिर्मापितप्रासादपूर्णीभवनानन्तरं सोमेश्वरयात्रानिमित्तप्रस्थितेनाध्वनि स्वसार्धं समानीतमाननीयश्रीहेमचन्द्रसूरीन्द्रेणार्धमार्गागतान्तातीततीर्थकृन्मुनिजनसिद्धिगमनक्षेत्रादिमाहात्म्यकथनादत्युन्नतरागेण प्रच्छन्नमागत्य विमलगिरियात्रां विधायादिदेवपूजाकृते द्वादश ग्रामान्दत्त्वा स्वानीकमलंकृतवान् ।' इति कुमारपालप्रबन्धचरित्रादिषु प्रोक्तमस्तीति ॥

माकन्दमोचाबकुलप्रियालकङ्केल्लिकुन्दादितरूपयुक्तम् ।
तस्याभितोऽभूत्सुमनोद्रुमाढ्यं वनं सुमेरोरिव भद्रसालम् ॥ १९६ ॥

तस्य स्तूपस्याभितः परितो वनं काननमभूत् । किंभूतं वनम् । माकन्दा सहकारा, मोचाः कदल्यः, बकुला: केसरा: 'वउलसिरी' इति प्रसिद्धाः, प्रियाला राजादना, कङ्केल्लयः अशोका:, कुन्दा मुचकुन्दाः, ते आदौ येषां तादृशैस्तरुभिर्द्रुमैरुपयुक्तम्। किमिव । भद्रसालमिव । यथा सुमेरोः सुवर्णाचलस्याभितः परितो भूमौ भद्रसालं नाम वनमभूत् । किंभूतम् । सुमनोद्रुमाः कल्पवृक्षाः आढ्ये उत्तरो मध्ये यस्य । तथा माकन्दादिपादपैः कलितं च । स्तूपवनं तु अर्थात्किंभूतम् । सुमनोभिः कुसुमैरुपलक्षणात्फलपल्लवपत्रैर्द्रुमाः पूर्वोक्ता इतरे च तरवः आढ्ये मध्ये यस्य तत् ॥

अन्वतिष्ठंश्चतुर्दिग्विभागागता यात्रिकास्तत्र यात्रां जिनेन्द्राङ्घ्रिवत् ।
कामिकस्वर्गिणेवामुना कामितं पूर्यतेऽन्यच्च सेवासु हैवाकिनाम् ॥ १९७ ॥

चतसृणां चतु.सङ्ख्याकानां पूर्वा–दक्षिणा–पश्चिमा–उत्तराणां दिशां हरितां विभागेभ्य: प्रदेशेभ्यः आगता आयाता यात्रिका यात्राकारका जनास्तत्र स्तूपे यात्रां महो-

जज्ञे चिराद्यदमुना विभुना ममान्न-
प्रीत्येत्यनृत्यदिव शांभवशासनश्री ॥ ३५ ॥

शंभोर्जिनस्येदं शांभवं शासनं मतं तस्य श्रीजिनशासनलक्ष्मीरनृत्यत् नृत्यति स्म । इवोत्प्रेक्ष्यते—इति कारणादन्तश्चित्ते प्रीत्या हर्षेण स्नेहेन प्रमोदेन वा । इति किम् । यच्चिरादनल्पकालादमुना कुमारेण मम जिनशासनश्रियाः विभुना स्वामिना जज्ञे संजातम् । अमुना किं कुर्वता । लब्धानां विविधानां श्रीगौतमनामिकाना श्रिया शोभया संपदा वा वसुभूतिपुत्रम् । 'श्रीइन्द्रभूतिं वसुभूतिपुत्रं पृथ्वीभवं गौतमगोत्ररत्नम्' इति पूर्वसूरिस्तवोक्ते । वसुभूतिनाम्नो ब्राह्मणश्रेष्ठस्य पुत्रं नन्दनं गौतमस्वामिनमनुसरता अनुकुर्वता । च पुनः किं कुर्वता । युगप्रधानैः वज्रस्वाम्यादिभिः सूरिभिः साम्यं साम्यमाकलयता बिभ्रता ॥

विश्वत्रयीश्रुतिपुटैकवतंसिकाना-
मस्माकमेष समजायत वासवेश्म ।
गम्भीरधीरिममुखाभिरध:कृतेन्दु-
श्रीभिश्च वल्गितमितीव गुणावलीभिः ॥ ३६ ॥

गम्भीरिमा गाम्भीर्यं भावप्रधानो निर्देशः । धीरिमा धैर्यं तावेव मुखे आदौ यासाम् । अथवा गम्भीरश्च धीरश्च गम्भीरधीरौ गम्भीरधीरयोर्भावो गम्भीरधीरिमाणौ तावेव मुखौ प्रथमौ यासां तादृशीभिर्गुणानामावलीभिः श्रेणीभिः वल्गितं प्रोल्लसितम् । 'सुविकासहाससहकारिकारणोपलम्भपूर्णमनोरथेन वल्गितमिव वसन्तमासेन' इति चम्पूकथायाम् । किंभूताभिर्गुणावलीभिः । अधःकृता तिरस्कृता निर्मलत्वेन इन्दुश्रीश्चन्द्रिकाशोभा याभिः । इवोत्प्रेक्ष्यते । इति हेतोर्वल्गितमिव । इति किम् । यद्विश्वेषां त्रिभुवनानां तात्स्थ्यात्तव्यपदेशात्त्रिजगज्जनानां श्रुतिपुटेषु कर्णपालीषु एकानामद्वैतानां वतंसिकानामुत्तंसानाम् । 'वष्टि भागुरिरल्लोपम्' इत्यलोपाद्वतंसिकानाम् । 'विदर्भपुत्रीश्रवणावतंसिका' इति नैषधे । त्रैलोक्याद्वैतकर्णाभरणानामस्माकं गुणावलीनामेष हीरकुमारः वासवेश्म निवसनसदनं समजायत संजातः ॥

आजन्म यद्विधुरिवैष उदेति कीर्ति-
ज्योत्स्नाः किरन्कुवलयैकविकाशकारी ।
अस्मादृशैः किमयशोऽञ्जनमादधानैः
किंचित्प्रकाशितनिशान्तदशान्तदीपैः ॥ ३७ ॥
भास्वन्मयूखविजिगीषुयदङ्गजात-
नैसर्गिकाङ्गभरसुभास्वदभीषुजालैः

ह्रदः अपटुरस्पष्टाक्षरमुपविष्टकण्ठपीठं वा यत्र तादृक् ध्वनितं शब्दो यस्य [illegible] सन्निदमग्रे वक्ष्यमाणमजीगदद्वदति स्म ॥

उच्छिन्नः सुरभूरुहोऽप्यपगता स्वर्धामधेनुः पुन-

र्भग्नः कामघटो मणिः सुमनसां चूर्णीबभूव क्षणात्।

दग्धा चित्रलता गतः शकलतां हा दक्षिणावर्तभृ-

त्कम्बुः स्वर्गिगृहं गते त्वयि गुरौ श्रीहीरसूरीश्वरः ॥ २०३ ॥

हे [illegible] गणलक्ष्म्या शोभया वा युक्त हीरविजयसूरीश्वरगुरो, त्वयि [illegible] [illegible] देवानां गृहं गते देवलोकं प्राप्ते सति अत्र जगति सुरभूरुह उच्छिन्न [illegible] पुनर्भग्निता। हा इति खेदे। सर्वत्र योज्यम्। अपि पुनः स्वर्धामानो देवा[illegible] [illegible]। कामधेनुरित्यर्थः। अपगता मृता। 'व्यापन्नोऽपगतो मृत' इति [illegible]। हा [illegible] [illegible]। कामघटः कामकुम्भो भग्नः विकरीभूतः। पुनर्हा दक्षिणदेशे [illegible] [illegible] तादृश कम्बुः दक्षिणावर्तशङ्खः शकलतां खण्डभाव गतः प्राप्तः ॥

हा हा भूभवनोभनैकविबुध श्रीगुरुचूडामणे

हा सिद्धान्तसमुद्रमन्दरगिरे हा शासनाहर्मणे।

हा हा योगिकलापुरंदरगुरो वैराग्यवारांनिधे

हा कारुण्यनिधे विधेर्वशतया त्वं कुत्र यातः प्रभो ॥ २०४ ॥

[illegible]

सनवनाटकगत्रभृत' इति पाण्डवचरित्रे । [illegible]
किमुत्प्रेक्ष्यते—त कुमार प्रेक्षित् किमु [illegible] ॥

आसीदसौ कलियुगे युगबाहुरस्मि
न्नर्हन्निवातिशयितातिशयाश्रितत्वात् ।
एतस्य जन्मनि जिनाधिपतेरिवान्त -
प्रीतेरितीव दिवि दुन्दुभय प्रणेदु ॥ ४० ॥

हीरकुमारस्य जन्मनि जननसमये दिवि आकाशे दुन्दुभयो म[illegible](ङ्ग)लभेर्यो नि[illegible] वा प्रणेदुर्वाद्यन्ति स्म । 'उन्नदित नियलदङ्गम[illegible]लवादिते' इति नलजन्मनि [illegible]थायाम् । तथा 'नि शेषदिविषद्वर्गप्रमोदपिशुनास्तदा । समाकर्णन्त सानन्द दुन्दुभिस्वनयो दिवि ॥' इति युधिष्ठिरजन्मनि पाण्डवचरित्रे च । जिनाधिपतेरिव यथा श्रीजिनेश्वरस्य जन्मनि व्योमनि दुन्दुभय प्रणदन्ति इत्योत्प्रेक्ष्यते । इत्यमुना प्रकारेण अन्त. स्वमनसि प्रीतेर्मुद: । इति किम । यदस्मिन् कलियुगे अतिशयितै स्फातिप्राप्तै रतिशयैर्महिमविशेषैराश्रितत्वादसौ शिशु अर्हन्निव तीर्थंकर इवासीत् । किंभूत । युगवद्बाहू यस्य धूसरप्रमाणभुज । आजानुबाहुरित्यर्थ ॥

एकांशवानपि कलौ शिशुनामुनाह-
मङ्गैश्चतुर्भिरुदयीह पुरा भवामि ।
धर्मेण पल्लवितमन्तरितीव जाते
विश्वासुमत्प्रमददायितदङ्गजाते ॥ ४१ ॥

विश्वेषां त्रयाणा सप्ताना वा चतुर्दशाना वा एकविंशतेर्वा । 'भुवनानि त्रिसप्तत्रीणि सप्त चतुर्दश' इति वाग्भटालंकारे । त्र्यत्यादावेकविंशतिरपि । जगतामसुमन्तो जन्तव तेषा प्रमोद हर्षं ददातीत्येवशीलस्तादृशे तदङ्गजाते नाथीकुराव्यवहारिणोरङ्गजाते पुत्रे जाते सति धर्मेण अन्तश्चित्ते पल्लवितम् । प्रहृष्टमित्यर्थ. । 'चिरात्पल्लवितमिव राजवशेन' इति चम्पूकथाया नलजन्माधिकारे । इति हेतोरिव । इति किम् । यद्यस्मात्कारणात्कलौ कलिकाले एको न द्वितीय अशो भागोऽर्थाच्चतुर्थपादो विद्यते यस्य स एकांशवानप्यहं धर्म. । 'पदैश्चतुर्भि सुकृते स्थिरीकृते कृतेऽमुना केन तप प्रपेदिरे । भुव यदेकाङ्घ्रि कनिष्ठया स्पृशन् दधावधर्मोऽपि कृशस्तपस्विताम् ॥' इति नैषधे । कृतयुगे किल धर्मश्चतुर्भि पादैर्विजयी भवेदधर्म. पुनरेकांशेन स्यात्, कलियुगे तु अधर्मश्चतुर्भि पादैर्धर्मस्त्वेकांशमात्र. एतदेव तपस्विना महत्तप. यद्भूमौ एकपादकनिष्ठाङ्गुल्या स्पृशन् तिष्ठति तथा कृतयुगेऽधर्म. कलियुगे तु धर्मस्तपस्वी कृशत्व भजते । प्रस्तुतम् । अमुना कुमारेण चतुर्भिरङ्गै सपूर्णावयवै सर्वात्मनैव इह भरतभूमौ उदयी

कूलंकषा मखभुजामिव केकियान-
मारवण्डलामृतमयूखमुखी जय वा ॥ २९ ॥
आमोदमम्बुरुहिणीव विजृम्भमाणा
पञ्चार्चिषं शुचिमरीचिचकोरचक्षुः ।
सौदामनीवलयमम्बुदमालिकेव
पृथ्वीव तीर्थमनघं कपिसुर्वरेव ॥ ३० ॥
पीयूषकान्तिमिव दुग्धपयोधिवेला
सिंहं महामृगरिपोरिव वा महेला ।
विश्वावबोधमिव वासरवक्त्रलक्ष्मीः
श्रीखण्डसालमिव वा मलयाचलोर्वी ॥ ३१ ॥
शृङ्गारयोनिमिव नीरजनाभपत्नी
राज्ञः प्रतापमिव वा जगतीजयश्रीः ।
आचार्यमध्वरभुजामिव फाल्गुनी सा
नाथी क्रमेण तनयं जनयांचकार ॥ ३२ ॥

(सप्तभिः कुलकम्)

सा नाथी क्रमेण परिपाट्या तनयं नन्दनं जनयांबभूव जनयति स्म । कस्मि-न्सति । लग्नं मूर्तं तनुभवनं गुरौ बृहस्पतौ, तथा शिखिनि केतुग्रहे । 'अश्लेषाभूः शिखी केतुः' इति हैम्याम् । शीलति भजति सति । किंभूतं लग्नम् । युग्मं मिथुनमिति नाम यस्य इति गुरुकेतूलग्ने । पुनः कस्मिन्सति । भूनीभवे मङ्गले कन्या भजत्याश्रयति सति । कस्मिन्निव । विङ्ग इव । यथा विटः कन्यां कुमारिकामपरिणीतां स्त्रियं भजते । इति कन्यायां मङ्गलः । पुनः कस्मिन्सति । सितमरीचेश्चन्द्रस्य सुते बुधे च पुनः सिते शुक्रे सति । किंभूते बुधे शुक्रे च । याते प्राप्ते । काम् । तुलां तुलानामलग्नम् । अर्थात्तुलायां बुधे शुक्रे च सति । अपि पुनः । सूरे सूर्ये अलिनाम वृश्चिकलग्नं तत्र यो विलासः । 'लस श्लेषणक्रीडनयोः' इति धात्वर्थात् । श्लेषणमाश्रयणं स्थितिः तत्र शील स्वभावो यस्य । क इव । सारस इव । यथा सारसपक्षी आल्या श्रेण्या कृत्वा यो विलासः क्रीडयां गमनमासनं च तत्र स्वभावो यस्य यथा । 'श्रेणीबन्धाद्वितन्वद्भिरस्तम्भां तोरण-स्रजम् । सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ॥' इति रघौ । इति चतुर्थे वृश्चिके सूर्यः । पुनः । राहौ विधुंतुदे धने धनलग्ने प्रपन्ने सति । कस्मिन्निव । सुकृतिनि । यथा पुण्यवान् धनं द्रव्यं प्रपद्यते प्राप्नोति । इति धने राहुः । च पुनः । विधौ चन्द्रे मकरो मकरलग्न

जनाभस्य पद्म ब्रह्मोत्पत्तिकमलं नाभौ यस्य स कृष्णस्तस्य पत्नी जाया लक्ष्मीरिव । यथा कृष्णकान्ता श्रीः शृङ्गारयोनिं मदनम् । पुनः केव । जगतीजयश्रीरिव । यथा राज्ञो विजयिनृपस्य जगत्या भूमेर्विजयलक्ष्मीप्रतापम् । पुनः केव । फाल्गुनीव । यथा पूर्वाफाल्गुनी अध्वरभुजा यज्ञभाजिना देवानामाचार्यं गुरुं बृहस्पतिम् ॥ सप्तभिः कुलकम् । जाते जन्मसमये ॥

श्यामीकृतानि कुदृशामपकीर्तिपङ्कै-
रस्तन्मुखानि विशदानि विधास्यते यत् ।
एष स्वकीर्तिविमलत्रिदशस्रवन्ती-
विस्फूर्तिभिः किमिति दिक्प्रमदाः प्रसेदुः ॥ ३३ ॥ ✓

दिक्प्रमदा दिगङ्गनास्तज्जन्मसमये प्रसेदुः प्रसन्नीबभूवुः । निर्मला जाताः । किमुत्प्रेक्ष्यते—इति हेतोः । इति किम् । यदेष हीरकुमारः कुदृशां दुर्वादिनां कुमतीनां वा अपकीर्तिभिः अपयशोभिरेव पङ्कैः कर्दमैः श्यामीकृतानि मलिनीकृतानि अस्तन्मुखानि स्वीयकीर्तिरेव विलसन्त्यास्त्रिजगति प्रसरन्त्यास्त्रिदशस्रवन्त्या गङ्गाया विस्फूर्तिभिर्विलासैर्विशदान्युज्ज्वलानि विधास्यते करिष्यतीति । पङ्ककलुषिताना हि गङ्गासलिलक्षालनेन निर्मलीभवनं युक्तिमदेव । पङ्कोऽघे कर्दमे च । गङ्गास्नानात्पापगमनेन निर्मलीभवत्वेन प्रसन्नता स्यादेव ॥

भावी यदेष पृथुकः सुमनोनिषेव्य-
स्तद्वृष्टयो दिव इतीव गृहे निपेतुः ।
हन्ता यतः स तमसां तमसामिवारि-
प्रागेव ते किमिति भीतिवशात्प्रणेशे ॥ ३४ ॥

यद्यस्मात्कारणात् नाथीनन्दनः पृथुकः बालकः सुमनोभिर्देवैर्निषेव्यः उपास्यो भावी भविष्यति । उत्प्रेक्ष्यते—इति हेतोः तद्वृष्टयः सुमनोवर्षणानि पुष्पवृष्टयः दिवो व्योममण्डलात् गृहे अर्थात्तद्भवने निपेतुः पतिताः । 'चित्रीयितमतिचञ्चलपतत्पुष्पवृष्ट्या' इति नलजन्मसमये चम्पूकथायाम् । पुनर्यत्कारणात्स कुमारस्तमसामज्ञानानां पापानां वा अरिर्हन्ता निवारकः भावी भविष्यति । क इव । तमसामरिरिव । यथा ध्वान्तानां शत्रुर्भास्वान् तमसामन्धकाराणां हन्ता घातको भवति । किमुत्प्रेक्ष्यते—इति भीतिवशाद्भयाधीनत्वात् प्रागेव पूर्वमेव तद्वपुःप्रभाभरैर्यानिरस्तैस्तमोभिः सूतिकागृहात्प्रणेशे प्रणष्टम् । पलायितमित्यर्थः । 'सुमनसः पुष्पे देवे महात्मनि च' 'तमोऽज्ञाने पापे ध्वान्ते राहौ च' इत्यनेकार्थौ ॥

लब्धश्रियानुसरता वसुभूतिपुत्रं
सारूप्यमाकलयता च युगप्रधानैः ।

हृत्सद्मसूत्रितजगत्त्रयविस्तरापि
विज्ञावली प्रभुरभून्न तदा प्रमातुम् ॥ ४९ ॥

तदा तस्मिन् काले पुत्रप्रसवप्रतिभागजनागमनानन्दनालोकनसमये तस्य कुरा- साधोः अङ्गजः स्वनन्दनस्तस्मिन् नन्दनत्वेन शशी संपूर्णशशिनन्दः। पूर्णेनन्दु एव शशी लक्ष्यते नान्यथा। अत एव शशी तस्य दर्शनतोऽवलोकनात्समुद्गत्य समुद्रस्येव वारां जलानामिव उद्गमन्तीना प्रकटीभवन्तीनाममन्दानाम कुण्ठानामनल्पानामनेकाना वा मुदामानन्दानामियत्ता इयत्परिमाणत्वमेतावन्मात्रता प्रमातु प्रमाणीकर्तु विज्ञावली प्राज्ञश्रेणी न प्रभुरभूत् न समर्थाबभूत्। ज्ञातु कदाचित शक्नोति स्मेत्यर्थः। किंभूता विज्ञावली। हृत्सद्मसु स्वेषा विज्ञाना मनोमन्दिरेषु सूत्रित सूत्रनामानीत गोचरीकृत। विज्ञात इत्यर्थः। जगत्त्रयस्य त्रिभुवनस्य विस्तर प्रपञ्चो यया। 'प्रक्रिया नातिविस्तराम्' इति सारस्वतप्रथमश्लोके। त्रैलोक्यसकलस्वरूपवेदनविदुरापीत्यर्थः। 'तेजःपालश्च विष्णोश्च कः स्वरूप निरूपयेत्। स्थित जगत्त्रयीमत्र यदीयोदरकन्दरे॥' इत्यर्बुदा- चललूणिगवसतिमध्यस्थवस्तुपालप्रशस्तौ॥

आस्वादयंल्लवणिमामृतमेतदास्या-
वश्यायभासि वसतिं गवि चानुतिष्ठन्।
पश्यन्सुतं द्युसदिवाजनि निर्निमेष-
नेत्रारविन्दयुगलः स महेभ्यकुम्भी ॥ ५० ॥

स कुरानामा महेभ्यकुम्भी व्यवहारिकुञ्जरः सुत स्वनन्दन पश्यन् विकचलोचना- भ्यामवलोकयन् दिवि स्वर्गे सीदति तिष्ठतीति द्युसत् देव इव निर्गतो निमेषो मीलन ययोस्तादृशे नेत्रे लोचने एवारविन्दे कमले तयोर्युगल द्वन्द्व यस्य। मेषोन्मेषरहितन- यनयामल इत्यर्थ। तादृशोऽजनि सजात.। किं कुर्वन्। एतस्यात्मनन्दनस्य आस्ये वदने एवावश्यायभास्तुहिनकिरणः चन्द्रस्तस्मिन्। 'अवश्यायस्तुहिन प्रालेय मिहिका हिमम्' इति हैम्याम्। लवणिमा लावण्यमेवामृत सुधारसमास्वादयन् पिबन्। पुन किंभूत। गवि भूमौ स्वर्गे च वसतिं वासमनुतिष्ठन् कुर्वन्। देवोऽपि चन्द्रामृतं पिबति। ['अजित- मेकसुराशितमप्यभूत्र पुनरेष पुनर्विशद विशम्। अपि निपीय सुरैर्जनितक्षय स्वयमुदेति पुनर्नवमार्णवम्॥' इति नैषधे। अस्यार्थ —'अर्णवादागतमार्णव कृष्ण विषमेकेन सुरेण हरेण अशित जग्ध पुनर्नाभूत्। पुनर्न जातमित्यर्थः। एष चन्द्र पुनः श्वेत विष सुरैर्व- ह्यादिभिर्देवैर्निपीय जनितक्षयम्। 'प्रथमा पिबते रविः' इत्यादि श्रुते। 'ईदृशमपि पुनर्जायते' इति। 'इज्येव देवव्रजभोज्यऋद्धिः शुद्धा सुधादीधितिमण्डलीयम्' इत्यपि नैषधे।] स्वर्गे च तिष्ठति निर्निमेषश्च स्यात्॥

पूर्वाद्रिपाटलशिलावलये शशीव
लीलामराल इव कोकनदच्छदे वा।

तत्कालमल्पतमतैलदशैरिवोप-
　　दीपैरितीव समजायत दीप्तिदुःस्थैः ॥ ३८ ॥

(युग्मम्)

उपदीपं सूतिकासद्मनि समीपे प्रदीपितं प्रदीपैर्दीप्तिभिर्ज्योतिर्भिर्दुःस्थैर्दरिद्रैः । निश्छायैरित्यर्थः । समजायत जातम् । किं कृत्वा । भास्वतो भानोर्मयूखा किरणास्तानपि विजिगीषुभिः स्वस्फूर्त्या विजेतुमिच्छुभिस्तादृशैर्यस्या नाथीदेव्या अङ्गजातस्य पुत्रस्य नैसर्गिकं स्वाभाविकैः । 'तदेव नैसर्गिकमुन्नतत्वम्' इति रघौ। अङ्गात् कायप्रदेशैर्भवैः समुत्पन्नैर्भास्वता दीप्यमानानामभीष्टणां कान्तीनां जालैर्वितानैर्वृन्दैः । इवोत्प्रेक्ष्यते । तत्कालं स एव कालो यत्र तत्तत्कालं तस्मिन्नेव समये अल्पतमा अतिशयेन स्तोकास्तैलदशाः स्नेहवर्तयो येषाम् । 'स्त्रियां वर्तिश्च तद्दशा' इति हम्याम् । तादृशैरिव । पुनरुत्प्रेक्ष्यते—इति हेतोः । इति किम् । यदेष हीरकुमार आजन्म जन्मसमयादारभ्य विधुश्चन्द्र इव कुवलयस्य भूमण्डलस्य, उत्पलस्य च एकमद्वितीयं यथा स्यात्तथा विकाश(स) प्रतिबोधं विकचतां च करोतीत्येवंशील उदेति प्रादुर्भवति । किं कुर्वन् । कीर्तिरेव औज्ज्वल्याद्विस्तारवत्तया वा ज्योत्स्नाश्चन्द्रिका किरन् विस्तारयन् । तर्हि किंचित्स्वल्पं प्रकाशितमुद्द्योतितं प्रकटीकृतं निशान्तं गृहं रात्रेरन्तो वा यैस्तथा दशाया अवस्थाया वर्तेश्च अन्ते प्रान्ते अवसाने दीप्रैर्दीपनशीलैरेवंविधैरस्मादृशैर्दीपैः किमिति प्रयोजनं न किमपीह कार्यम् । किं कुर्वाणैः । अयशोऽपकीर्तिं श्यामलत्वात्तदेवाञ्जनं कज्जलमादधानैः कुर्वाणैरस्माभिरद्भिः । अथवा—आ सामस्त्येन दधद्भिः ॥ युग्मम् ॥

स्वःकूलिनीजलविलोलनकॢप्तकेलिः
　　पाटच्चरो विकचवारिजसौरभाणाम् ।
उत्फुल्लवल्लिनवनाटकसूत्रधार-
　　स्तं प्रेक्षितुं किमु ववौ पवनोऽनुकूलः ॥ ३९ ॥

अनुकूलस्तज्जन्मसमये जनानामनुकूलत्वाद्रोचमानः पवनो वायुर्ववौ वाति स्म । किंभूतः । स्वःकूलिन्या गगनगङ्गाया जलस्य पयःपूरस्य विलोलनेन मध्ये प्रविश्यावगाहनादुत्सल्लोलीकरणेन कॢप्ता रचिता केलिर्विलासो येनेति शीतलता । पुनः किंभूतेन । विकचवारिजानाम् । अर्थात्स्वःकूलिन्या एव । रसैराम्भोरुहाणां सौरभाणां परिमलानां पाटच्चरस्तस्करोऽपहर्ता । 'सौराम्भोरुहपत्तने परिमलस्तेयी वसन्तानिलस्तन्त्रैरिव यामिकैर्भ्रमरैः प्रारब्धकोलाहलः । निर्यातस्त्वरया पतन्निपतितः श्रीखण्डपङ्कैर्वतिष्ठे केरलकामिनीकुचतटे खञ्जः शनैर्गच्छति ॥' इति भोजप्रबन्धे बाणपण्डितेन पानीयहारिणीरूपं विधाय कालिदासगर्वापहारार्थमुक्तम् । इति सुरभिता । पुनः किंभूतेन । उत्फुल्लवल्लीनां विकसितलतानां नवे नूतने नाटके नृत्यकरणे चपलीभवने सूत्रधारः सूचकः ताण्डवप्रारम्भकारको रङ्गकर्ता सः । 'लतायललासकलागारः' इति नैषधे । 'अहो ते वनपदि द-

हिमाम्भः' इति रघुवंशे । स्फुरन्नानभूत् ... ...। '... ... तपोवनावृत्तिपथं गताभ्याम्' इत्यपि रघौ ॥

अर्थिव्रजेन मिलितुं स्वककामुकेन
संकेतसौधमिव वारिधिनन्दनायाः ।
गीतिप्रतिध्वनितनर्तितकेलिकेकि
षष्ठीदिने रजनिजागरणं प्रणीय ॥ ९४ ॥

पातालभूतलसुरालयलोककोटी-
कोटीरहीर इव बालक एष भावी ।
उन्नीय नीतिकृतिनान्तरितीव पित्रा
सत्रा स्वगोत्रिभिरकारि स हीरनामा ॥ ९५ ॥

पित्रा कुराख्यव्यवहारिणा अन्तः स्वचित्ते । उत्प्रेक्ष्यते । इत्यमुना प्रकारेण उन्नीय विचार्येव । 'वितर्कः स्यादुन्नयनम्' इति हैम्याम् । उन्नयनम् । पूर्वमुन्नीय गोत्रिभिः सत्रा स्वस्वजनैः सार्धं स नाथीजनितः शिशुर्बालकः हीर इति नाम यस्य तादृशोऽकारि कृतः । हीरकुमारो नाम निर्मितः । किंभूतेन पित्रा । नीतौ न्याये योग्यताप्रापणे कृतिना कोविदेन । चतुरेणेत्यर्थः । योग्यत्वनयनमेव दर्शयति । इति किम् । यदेष बालकः अग्रे पातालस्य बलिवेश्मनः भूतलस्य क्षोणीमण्डलस्य सुरालयस्य देवलोकस्य लोकानां नागनागरनाकिनां कोटीनां शतलक्षलक्षितानां कोटिशः सङ्ख्याकानां कोटिकोटीनां कोटीरेषु मुकुटेषु हीरक इव सर्वोत्तममणिरिव । लोकप्रसिद्ध्या 'नगीनो' तद्वदसौ शिशुर्भावी भविष्यति इति वितर्क्येव । किं कृत्वा । प्रणीय विधाय । किम् । षष्ठ्या दिने दिवसे रजन्या रात्रौ जागरणमुत्सवविशेषम् । किंभूतम् । गीतीनां सोत्कण्ठकलकण्ठकण्ठीकण्ठालपितमधुरगानानां प्रतिध्वनितैः प्रतिशब्दितैः कृत्वा नर्तितास्ताण्डवाडम्बरकलिता जाताः कृता वा केलिकेकिनः क्रीडार्थस्वसद्मपालितबालमयूरा यत्र । उत्प्रेक्ष्यते । षष्ठीदिनरजनिजागरं स्वककामुकेन निजाभिलाषुकेण अर्थिव्रजेन याचकचक्रेण समं मिलितुं सङ्गं कर्तुं वारिधिनन्दनाया लक्ष्म्याः संकेतः 'अमुकस्मिन् स्थाने त्वया समेतव्यम्, मयापि तत्र समागम्यते' इति संकेतः । यूनो युवत्याश्च । तस्य सौधं गृहमिव । 'विशेषतीर्थेष्विव जह्नुनन्दना' इति नैषधे ॥ इति जन्मोत्सवनामकरणादिः ॥

पूर्वापराम्बुनिधिमञ्जुलमेखलाया
भूमेः स भर्तुरुचितैः समभूपि चिह्नैः ।
दानानुकम्पनसभाजननीरसिक्तैः
प्राचीनपुण्यविटपिप्रसवैरिवैतैः ॥ ९६ ॥

अभ्युदयवान् पुरा भवामि । भविष्यामीत्यर्थः । यावत्पुरानिपातयोर्योगे भविष्यत्काले वर्तमाना. इति प्रक्रियासूत्रेण पुरायोगे वर्तमानयोर्विभक्त्योर्भविष्यदर्थः प्रकाश्यते । 'पुरेदमूर्ध्वं भवतीति वेधसा पदं किमस्याङ्कितमूर्ध्वरेखया' इति नैषधे ॥

एतद्गुणाभिनवगानविधानपूर्व-

प्रारब्धताण्डवतरङ्गिरसाङ्गरङ्ग. ।

प्रारप्स्यते विबुधराजसमाजरङ्गे-

ऽस्माभिर्मुदेति दिवि किं ननृतेऽप्सरोभिः ॥ ४२ ॥

रम्भातिलोत्तमोर्वशीघृताचीप्रमुखाभिरप्सरोभिः स्वर्गाङ्गनाभि । किमुत्प्रेक्ष्यते । इत्यमुना प्रकारेण कृत्वा मुदा किं हर्षेणेव दिवि आकाशे ननृते नर्तितं ताण्डवममण्डि । इति किम् । विबुधानां पण्डितानां राज्ञामत एव पण्डितराजत्वानवस्थापि शृङ्गारादि-रसेषु कुशलत्वं ज्ञातृत्वं च यस्य तादृक् । वास्तवार्थे देवानां नायकस्तस्य समाजः समास एव रङ्गो नर्तनस्थानं तत्र एतस्य भाविसूरेः कुमारस्य गुणानां शमदमसंयमादि(दि)कानां षट्त्रिंशत्षट्त्रिंशिकासंख्यानां गणनातीतानां वा अभिनवानां पूर्वगीतापेक्षया नूतनानां गानानां गीतीनां प्राक्श्रुतगीतिश्रवणे तादृक् रसो न स्याद्यादृक् नवीनगानश्रवणे रस. समुत्पद्यते । तस्मादेतस्य ध्रुवपदगानानां विधानं निर्माणं तदेव पूर्वमादिर्यत्र तादृशं प्रारब्ध-मुपक्रान्तम् । 'प्रारम्भ. प्रोपत क्रम ' इति हैम्याम् । यत्ताण्डवं नाट्यं तस्य तत्र वा तरङ्गयुक्ता जातास्तरङ्गिताः कल्लोलिता ये रसा शृङ्गारादयो नव आस्वादो वा । 'रस स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे । बोले रागे देहधातौ तिक्तादौ पारदेऽपि च ॥' इत्यनेकार्थे । त एव अङ्गमवयवं शरीरं वा तादृशो रङ्ग. अस्माभिरप्सरोभिः अवाप्स्यते उपक्रस्यते । 'तदनन्तरमाकाशे संगीतमुदजृम्भत । रम्भोर्वशीप्रभृतयो नृत्यमप्सरसो व्यधुः ॥' इति पाण्डवचरित्रेऽर्जुनजन्माधिकारे । तथा 'स्वकान्तिसर्वस्वापहारभयादिव दिवि ननृतु-रप्सरस ' इति चम्पूकथायां दमयन्तीजन्मनि ॥ इति हीरकुमारजन्ममाहात्म्यम् ॥

प्रल्हादनाह्नगरं पुरमप्यमुष्य पुनर

मूर्त्या पवित्रयितुमन्तरिवेहमान ।

श्रीसोमसुन्दरयतिक्षितिशीतकान्ति-

र्जन्मापरं स्वयमसौ अग्रहयावभूव ॥ ४३ ॥

असौ सोमसुन्दरनामा यतीनां साधूनां मध्ये क्षिते. पृथिव्या शीतकान्तिश्चन्द्र एतावता राजा श्रीसोमसुन्दरसूरि स्वयमात्मना परमन्यजन्मावतारं ग्रहयावभूव जग्राह । उत्प्रेक्ष्यते । अमुष्य कुमारस्य मूर्त्या शरीरेण पुनरपि द्वितीयवारं प्रल्हादनमिति आह्वा नाम यस्य तादृशं नगरं पवित्रयितुं पावनीकर्तुमीहमानो वाञ्छन्निव । एकवारं सोमसुन्दरसूरिवपुषा प्रल्हादनपुरं पवित्रितं द्वितीयवारं हीरविजयसूरिमूर्त्या कृत्वा पवित्रीचिकीर्षुरिव ॥

आनन्दमेदुरितमानसपद्मचक्षु-
रङ्गान्तरं परिचरन्स महेभ्यसूनुः।
अभ्राभ्रिकान्तरमिवार्भकभानुमाली
कस्तूरिकामृगशिशुर्विपिनान्तरं वा ॥ ५९ ॥

[illegible]र्जनकयो: उत्सङ्गयोर्विलास बालक्रीडा कलयन् कुर्वन् उदलसत् उल्लसति स्म [illegible]। [illegible]। केलिकीर इव। यथा केलिकलित. क्रीडाकरः कीरः। अर्थात् बालशुक। [illegible] तोरिन्नाफलस्योरुत्सङ्गयोरुल्लसति। कुमार किं कुर्वन्। मनोरथगणान्। अ[illegible]। [illegible]शतानि फलयन् नवीकुर्वन् फलयन् वा। क इव। प्रावृट्पयोर [illegible]। [illegible] मेघ कुटजावनीजान् नीपद्रुमान् फलयति किशलयकलितान् [illegible] व्यवहारिनन्दन स हीरकुमारः आनन्देन हर्षेण मेदुरितं पुष्टी[illegible] प्रमोदप्रपूरितानां पद्मचक्षुषा कमललोचनानामेकस्मादङ्गादन्योऽङ्ग[illegible] परिचरन् सेवमान। 'भजते श्रयत्युपास्ते शीलत्युपतिष्ठते न शील[illegible] परि[illegible] न निषेवते न प्रसादयति॥' इति क्रियाकलापे। आरभामे [illegible] इव। अर्भकभानुमालीव। यथा अभ्रस्य मेघस्य अभ्रिकान्तरमेकस्मा अभ्र[illegible] बालरविः अभ्राभ्रिकान्तरं भजन् [illegible] भासते। 'नारी[illegible]' इति [illegible]। पुनः क इव। कस्तूरिकामृगशि[illegible] विपिनान्तरमेकस्माद्विपिनादन्यद्विपिन [illegible]। [illegible] इव। यथा गजराजस्य। 'पानीयं [illegible] [illegible] [illegible]। तथा [illegible]। पुनः [illegible] इव। [illegible]। यथा क्षीर[illegible] [illegible] [illegible]

[illegible]

[illegible]

[illegible] सुमतादिना तद्गमनागमनादीन् [illegible]

[illegible] पुनरेति [illegible]

[illegible] सुगत [illegible]

[illegible] अर्थात् [illegible]

[illegible] अर्थात् [illegible]

[illegible]

[illegible]

[illegible] ॥ ४७ ॥

[illegible] सपदि तत्प्रतानप्रमोदनमनसे [illegible] पुन-

[illegible] इति [illegible]

[illegible] पुत्रस्य सापि निजतनय प्रमृति

[illegible] पुत्रस्थापि [illegible] ॥

[illegible]

[illegible] ।

[illegible] पक्षपुटस्याऽऽलिलिङ्गे

[illegible] पुमानिव पत्न्यिापुण्यशाली ॥ ४८ ॥

[illegible] न विद्यते [illegible] 'मम [illegible] मम पुत्रम्' इति [illegible] ।

[illegible] प्रमोदाना पक्षपुटस्य आलिलिङ्गे आश्लिष्ट ।

[illegible] प्राप्तेन उदयानन्तरमागतेन पुत्रेण सुत-

[illegible] शोभते [illegible] पुमान् पिता क्षीरार्णवनन्दिन्या आलि-

[illegible] । न विद्यते तृप्ति सौहित्य-

[illegible], तृप्तिरहित [illegible] विशेषणम् । सूनोः स्वपुत्रस्य वदना-

[illegible] पिबन् सादरमवलोकयन् । किं कृत्वा । नभोगः स्वर्जनः सम तस्या

[illegible] प्रसवधर्म सूनिशानदनमाय [illegible] समागत्य ॥

तस्यास्तदास्यशशिदर्शनतोऽम्बुराशे-

र्वारामिवोत्कमदमन्दमुदामियत्ताम् ।

एनं हिरण्यमणिभूषणभूषिताङ्ग-
मिभ्याङ्गजं नयनयोरतिथिं प्रणीय ।
सोऽयं स्मरो हरहुताशहतोऽवतीर्ण
एतन्मिषेण समशायि कयाचिदेवम् ॥ ६३ ॥

हिरण्यमणिभूषणैः स्वर्णरत्नालंकारैर्भूषितादलंकृतकायमिभ्याङ्गजं कुबेरव्यवहारितनयमेनं हीरकुमारं नयनयोरात्मलोचनद्वन्द्वस्य अतिथिं प्राघुणकं प्रणीय कृत्वा। यत 'नयनातिथिं विधत्ते नेत्रप्राघुणकमातनोत्यपि च,' तथा 'दृग्गोचरीकरोति च लोचनविषयं च निर्माति,' तथा 'दृग्गोचरतां नयति च लोचनविषयत्वं च आनयति' इत्यादि क्रियाकलापे। कयाचिद्धात्र्या कामिन्या वा एवममुना प्रकारेण समशायि संशयश्चक्रे। 'नैषधेन समशायि चिराय' इति नैषधे। एवं किम्। हरहुताशहतः । त्रिलोचनेन स्वभालप्रादुर्भूततृतीयलोचनज्वलनज्वालाज्वालितः । अत एव एतन्मिषेण । हीरकुमारव्याजेन एतद्रूपेणेत्यर्थः । गृहीतावतारः आदत्तापरजन्मा सोऽयं प्राक्श्रवणगोचरीकृत स्मरः काम इव मकरध्वजरूपावतारः । हीरकुमार इत्यर्थः ॥

काचिद्दशा विकचचम्पकसूनशालि-
मालां विलम्बितवती शिशुकण्ठपीठे ।
तस्मिंश्चिकीर्षुरिव कौतुकिनाकिमुक्त-
प्रालम्बिकाङ्कितनवकल्पतरूपमानम् ॥ ६४ ॥

काचिद्दशा धात्री परा वा वनिता शिशोर्हीरकुमारस्य कण्ठपीठे विकचानां कुसुमितानां चम्पकानां हेमपुष्पकाणां सूनैः कुसुमैः कृत्वा शालते शोभते इत्येवंशीला मालां विकसितचम्पककुसुमाकलितहारलतां विलम्बितवती चिक्षेप । स्थापयति स्मेत्यर्थः । उत्प्रेक्ष्यते । तस्मिन् हीरकुमारे कौतुकिना कुतूहलाकलितेन नाकिना केनापि देवेन मुक्ता अवलम्बिता स्थापिता प्रालम्बिका हेमदामदीनारमालिका सुवर्णझुम्बनकमङ्के कण्ठेऽस्यास्तीति तादृशस्य नवस्य बालकस्य कल्पतरोर्देवद्रुमस्य उपमानं साम्यं चिकीर्षुरिव कर्तुमिच्छुः किमु ॥

चूडामणिस्त्रिभुवनस्य यदेष भावी
चूडामणिं किमिति कापि दधार मूर्ध्नि ।
सूरिश्रियास्तिलकवद्भविता कुमारो
भालेऽपरास्य तिलकं किमतश्चकार ॥ ६५ ॥

यद्यस्मात्कारणात् एष हीरकुमारस्त्रिभुवनस्य त्रैलोक्यस्य चूडामणिरिव चूडामणिः शिरोमणिर्भावी भविष्यति । किमुत्प्रेक्ष्यते । इति हेतोः कापि कान्ता धात्री वा अस्य शि-

[illegible]

[illegible] ॥ ११ ॥

[illegible]

[illegible]

[illegible] ॥ १२ ॥

[illegible] मदर्थाऽपि [illegible] नोद्दीपितादि [illegible] [illegible] ॥ प्रतिमा [illegible] दत्ता ॥

नृपो [illegible] विभवानुरूप-

[illegible] पट्याचभूव ।

[illegible]

निर्धूतदर्पण इव न्यूनस्याचभूव ॥ १३ ॥

[illegible] श्रीमन्तो [illegible] महान्यायहारिणस्तेषु तेषा [illegible] पुरन्दर [illegible] विभवानुरूप [illegible] पुनस्तु [illegible] पट्याचभूव चकार । 'गजति परो- [illegible] प्रणयति पटयति निर्माति निर्मीति च' इति क्रियाकलापे करणार्थाः क्रिया । [illegible] जात [illegible] प्रथमे दिवसे [illegible] चन्द्रसूर्यदर्शनादिको विधि प्रकारो यस्य तादृशोऽदर्शीयसूनुर्नाथीकु- [illegible] निर्धूतदर्पण इव [illegible] । 'निर्धूतहारगुलिकाविशद

वा । वालशब्दो लालाघण्टान्यायेन उभयत्र संबध्यते । मरालवालस्तम्बेरमौ हसवाल वालगजं च । उत्प्रेक्ष्यते । विगायति निन्दतीव । कैः । क्वाणैः शब्दैः । कासाम् । रणझण इति शब्दो जात आसु इति । रणत्कारकलिता इत्यर्थः । तादृश्यो राजता रूप्यसंबन्धिन्य । 'रौप्यघनघर्घटीजर्जरस्वरम्' इति हसविशेषण चम्पूकथायाम् । तथाविधाः किंकिण्यः लघुघुर्घुरिकास्तासाम् । किंभूताः । पादारविन्दयोरर्थात्कुमारचरणकमलयोर्युगल तस्योपरि लम्बन्ते गुणप्रोताः कृत्वा ऊर्ध्वं लम्बायमानाः सजायन्ते । अथवा पदोपरिप्रदेशमाश्रयन्ते इत्येवशीलाः । चरणोपरिबद्धानामित्यर्थः । इति धात्रीपरिपालनशृङ्गारकरणादि ॥

कुंराह्वयस्य हरति स्म मनो मनोज्ञं
तन्मुन्मुनालपनमिभ्यगभस्तिभर्तुः ।
किंचिद्विजृम्भियुवभावनवोढवाला-
नातिप्रगल्भकिलकिञ्चितवत्प्रियस्य ॥ ६९ ॥

मनोज्ञ जनमनोहर तस्य हीरकुमारस्य यन्मुन्मुनालपनमस्पष्टभाषणं तत्कुरा इति आह्वयो नाम यस्य तादृशस्य इभ्येषु व्यवहारिषु मध्ये तत्पुत्रप्रतापेन कृत्वा भास्कर इव दीप्यमानत्वात् भास्करस्य । सूर्यतुल्यस्येत्यर्थः । मनश्चित्त हरति स्म । किंचित्किमपि स्तोकमात्र विजृम्भी प्रकटीभवनशीलो युवभावस्तारुण्य यस्यास्तथा नवोढा नवपरिणीता वाला वधूनाम्ना नातिप्रगल्भ न अतिशयेन प्रगल्भ परिणतीभूत नातिचातुर्यं वा किलकिञ्चित [illegible]विशेष । 'लीला विलासो विच्छित्तिर्विव्वोकः किलकिञ्चितम् । मोट्टायित कुट्टमित [illegible] विभ्रमश्चेत्यलंकाराः स्त्रीणा स्वाभाविका दश ॥' इति हैम्याम् । [illegible] भर्तुश्चेतो यथा हरति । 'त्वयि वीर विराजते पर दमयन्तीकिलकिञ्चित[illegible]' इति नैषधे ॥

इक्ष्वाकुवंश इति नाभिमहीमघोना
विश्वप्रशस्यवृषभाङ्कतनूभवेन ।
उत्केश इत्युदयवाम्ननयेन तेन
मेने महेभ्यवृषभेण निजान्ववायः ॥ ७० ॥

[illegible] महाव्यवहारिपुङ्गवेन तेन हीरनाम्ना तनयेन पुत्रेण उत्केश इति नाम्ना [illegible] उदयवानभ्युदय वृद्धिं मानित ज्ञात । केनेव । नाभिमहीमघोना [illegible] त्रिभुवनजनानां प्रशस्येन [illegible] वृषभोऽङ्क उत्प्रेक्षे [illegible] वृषभदेवनाम्ना तनयेन नन्दनेन इक्ष्वाकुनामा वंश [illegible] ।

स हीरकुमारः पूर्वा प्राची अपरा प्रतीची प्रदक्षिणक्रमणेन पूर्वस्या दक्षिणस्यां गमनाद्दक्षिणा गृहीता पश्चिमाया उत्तरस्या गमनादुत्तरापि गृहीतैव एतावता चतसृणा दिशां ग्रहणात सागरान्तर्मुनिपयश्चत्वारोऽपि समुद्राः । 'पयोधरीभूतचतु समुद्राम्' इति रघुवंशवचनात् । एव मञ्जुला बन्धुरा स्वर्णमणिमाणिक्यमण्डिता मेखला काञ्ची यस्या मेखला तु परिधानाधारतया कटीजघनादिप्रदेशे परिधीयते ततश्चतुर्दिग्वर्तिसमुद्रोपादानम् । अन्यथा अपरोऽपि पाठः । यथा 'अर्णश्चतुर्जलधिमञ्जुलमेखलाया' । चत्वारः प्राची प्रतीची अपाची उदीचीति चतुर्दिग्वर्तिनो जलधयः समुद्रा एव मञ्जुला मनोहरा मेखला रसना यस्यास्तस्या भूमेः पृथिव्याः भर्तुः स्वामिनः चतुरुदपाथोनिधिपर्यन्तभूमीपालस्य चक्रवर्तिनः उचितैर्योग्यैः चिह्नैः सामुद्रकथितैर्लक्षणैः समभूषि अलकृतः । अर्थात् हस्तपादाद्यङ्गोपाङ्गेषु शोभित । उत्प्रेक्ष्यते । दानमभयसुपात्रपाणिप्रमुखाविश्राणनम्, अनुकम्पन म्रियमाणप्राणिमोचनदुःखितदीनवदापनयनादिदया, सभाजन देवगुर्वादिपूजनभक्ति', तद्रूपैर्नानाविधैः सिचाद्यैः प्राचीन पूर्वजन्मावतीर्णं यत्पुण्य स एव विटपा शाखाविशेषा. सन्त्यस्मिन् वा इति विटपी वृक्षस्तस्य प्रसवैः पुष्पैरिव । 'पुष्प सून सुमनसः प्रसवश्च मणीचकम्' इति हैम्याम् ॥

> सज्जातिलोचनचकोरनिपीयमानै-
> र्लावण्यचञ्चदमृतैरुपचीयमानैः ।
> वृद्धिं दधार पृथुकोऽप्रतिमैः प्रतीकै-
> र्द्वैतीयिकेन्दुरिव सान्द्रकलाकलापैः ॥ ९७ ॥

स पृथुकः हीरकुमारः न विद्यते प्रतिमा प्रतिबिम्ब सदृश वस्तु केनापि सादृश्य वा येषाम् । 'न तन्तुस्तस्य । प्रतिमा चराचरे' इति नैषधे । तैरसाधारणैः प्रतीकैरवयवैः । 'एकदेशे प्रतीकोऽङ्गावयवापघना अपि' इति हैम्याम् । कृत्वा वृद्धि पुष्टिं दधार धत्ते स्म । किंभूतैः प्रतीकैः । सज्जातीना स्वजनाना लोचनान्येव चकोरा ज्योत्स्नाप्रियास्तैर्निपीयमानैः सादरमतृप्त च अवलोक्यमानैः । पुनः किंभूतैः । लावण्यानि सुन्दरतातिशया एव चञ्चन्ति पुण्यानि चेतोहराणि वा अमृतानि सुधारसास्तैः पुष्टिं प्राप्यमानैः नीयमानैः । क इव । द्वैतीयिकेन्दुरिव । यथा श्वेतपक्षे द्वितीयाया भवो द्वितीयिकः द्वितीयासबन्धी वा चन्द्रः सान्द्राणा स्निग्धाना बहुलाना वा कलाना षोडशाशलक्षणाना भागाना कलापैः कृत्वा वृद्धि धत्ते । 'केनेयका' इति कप्रत्ययः । णित्व त्वेषा विकल्पकमिति क्वापि वृद्धिः । द्वितीयाया अय द्वैतीयकः ॥

> पित्रोर्मनोरथगणान्कुटजावनीजा-
> न्प्रावृट्पयोद इव पल्लवयन्कुमारः ।
> उत्सङ्गयोरुदलसत्कलयन्विलासं
> फुल्लल्लताफलदयोरिव केलिकीरः ॥ ९८ ॥

निर्झराणां प्रवेशात्तरङ्गैः कल्लोलैः नदीप्रवाहो वृद्धिं धत्ते । किंभूतः सिन्धुप्रवाहः । पत्ररथैः विहङ्गमैरभिगम्यः खगसेव्यः ॥

वाचस्पतेर्दिवि विधाय सुरान्विनेया-
नुर्व्यां नरानपि विधातुमुपेयुषः किम् ।
वप्रा व्यमोचि पठितुं सविधे द्विजस्य
कस्यापि वाङ्मयविदः समहं कुमारः ॥ ७४ ॥

हीरकुमारः समहं महोत्सवपुरःसरं कस्यापि अनिर्दिष्टनाम्नो द्विजस्य ब्राह्मणस्य सविधे समीपे पठितुमध्येतु वप्रा कुराव्यवहारिणा व्यमोचि मुक्तः । किंभूतस्य द्विजस्य । वाङ्मयं शिक्षाकल्पव्याकरणादिशैवशास्त्रं वेत्तीति वाङ्मयवित् तस्य । किमुत्प्रेक्ष्यते । स्वर्गे सुरान् देवान् विनेयान् शिष्यान् विधाय अपि पुनर्नरान् मनुष्यान् अध्यापनादिभिः शिष्यान् विधातुं कर्तुमुर्व्यामवन्यामुपेयुषः आगतस्य वाचस्पतेर्बृहस्पतेरिव ॥

तस्यार्भशक्र इव चित्रशिखण्डिसूनो-
र्लब्ध्वोपकण्ठमशठः स पठन्नकुण्ठम् ।
पोतः श्रुतिं स विधिवल्लिपिसंग्रहेण
प्रेम्णा विवेश नगरीमिव गोपुरेण ॥ ७५ ॥

स पोतो हीरकुमारः प्रेम्णा हार्देन हृदयाभिप्रायेण विधिवत् शास्त्रोक्तप्रकारेण लिपेरक्षराम्नायस्य संग्रहेण आगमनेन । शिक्षणेनेत्यर्थः । श्रुतिं शास्त्रं विवेश प्रविष्टः । शास्त्राभ्यासं कर्तुं प्रारब्धवानित्यर्थः । कामिव । नगरीमिव । यथा कश्चित् बालो गोपुरेण प्रतोल्या कृत्वा पुरीं प्रविशति । पोतः किं कुर्वन् । अशठः सरलाशयः सन् । अकुण्ठं घोषाभ्यसनादिना तीक्ष्णं सोत्साहं वा सु अतिशयेनात्मनः सर्वप्रयत्नेन पठन्नधीयमानः । किं कृत्वा । तस्याध्यापकस्य उपकण्ठं लब्ध्वा संप्राप्य । क इव । अर्भशक्र इव यथा बालक इन्द्रः । '[illegible]गुरुर्गुरुरम्य' इति नैषधे । एतेन काव्येन इन्द्रस्य बालत्वं तथा गुरुपार्श्वे अध्ययनमपि प्रोक्तम् । चित्रशिखण्डिसूनोर्बृहस्पतेः । 'विचित्रवाक्चित्रशिखण्डिसूनो' इत्यपि नैषधे । पार्श्वं प्राप्य पठति ॥

छाया तनोरिव न लङ्घयितापि वाचं
प्रासादि तेन विनयावनतेन सूरिः ।
संसर्गभावि च गुरौ सफलैः प्रयत्नै-
र्न्मस्मिन्नृपस्य भुवीव कृषीवलस्य ॥ ७६ ॥

[illegible] प्रसन्नीकृत । तेन [illegible]नेन । विनयेन [illegible] । गुरौ [illegible] । वचनमा

कयाचन अनिर्दिष्टनाम्न्या चकोरदृशा चलचञ्चच्चक्षुषा धात्र्या अन्यस्त्रिया वा क्रीडाकारिण्या सचरतीति सर्वत्र मध्ये प्रसरतीत्येवंशीलः सञ्चारी तादृशश्चन्द्रः कर्पूरो यत्र। 'चन्द्रोऽम्बुकाम्ययोः। स्वर्णे सुधांशौ कर्पूरे कम्पिल्ले मेचकेऽपि च॥' इत्यनेकार्थः। एतावता। घनकर्पूरमिश्रितैरित्यर्थः। मलयद्रुमस्य चन्दनतरोः सान्द्रैर्निबिडैः पङ्कैर्द्रवैः लिप्तः अङ्गरागकलितः कृतः। शिशोर्हीरकुमारस्य कायो देहश्चकासे विराजते स्म। 'चकास्ति चकाति भासते भ्राजते लसत्यपि शोभते। विलसत्येवमाद्याः स्युर्भ्राजनार्थप्रकाशकाः॥' इति क्रियाकलापे। कायः किंभूतः। विकचा विकसिता या गन्धफली चम्पककुड्मलः तद्वद्विलसतीत्येवंशीलः। 'इति चम्पककर्णीरागः कृता विधोर्गन्धफली विलसिप्रियम्' इति नैषधे। क इव। स्वर्णाद्रिशृङ्ग इव। यथा कनकाचलस्य मेरोः शिखरं चन्द्रिकया चन्द्रज्योत्स्नया अनुविद्धो व्याप्तः शोभते। 'भगयुगमय शृङ्गोद्योगसघा निदाघ'' इति लिङ्गानुशासने शृङ्गशब्दः पुनपुंसकलिङ्गे॥

नीलांशुकाकलितबालककामपाल-
मूर्तेरिवोपमितिमानयितुं कुमारे।
काचित्कदाचन कुरङ्गमदाङ्गरागं
कौतूहलेन कुरुविन्ददती ततान॥ ६१॥

कुरुविन्दाः पद्मरागमणयः तद्वद्दशना दन्ता यस्याः सा कुरुविन्ददती। 'को दशनेभ्यः कुरुविन्दमालाम्,' 'निर्से कुरुच कुरुविन्दसकान्तदन्ति' इति न। 'अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च' इति दन्तस्य दतृ। स्त्रीलिङ्गत्वादीप्। इति नैषधकर्त्री पाणिनिसूत्रम्। पदद्वयमपि न नैषधीयम्। काचित्तादृशी धात्री कदाचन कस्मिन्नपि समये कौतूहलेन कुरङ्गमदेन कस्तूरीद्रवेण कृत्वा अङ्गरागमर्थात्कुमारस्य विलेपनं ततान कृतवती। [illegible] ध्यते। नीलेन अंशुकेन वसनेन कलितस्य आवृतस्य। परिहितनीलाम्बरस्येत्यर्थः। [illegible]॥ बालकस्य कुमारावस्थालङ्कृतस्य कामपालस्य बलभद्रस्य मूर्तेः शरीरस्योपमितिमुपमानं कुमारे स्वाभाविककनककेतकगौरशरीरे हीरकुमारे आनयितुम्। प्रदापयितुमर्थेन [illegible]॥

काचिच्चकोरनयना व्यवहारिसूनो-
र्वक्त्राम्बुजं विकचनेत्रपुटैर्निपीय।
चेतस्यमीलयितनिर्मलितात्मदर्श-
सौराज्यदर्शनविधौ शिथिलीचकार॥ ६२॥

काचित् [illegible] धात्री परा वा [illegible] चकोरनयना [illegible] व्यवहारि [illegible]
[illegible] नन्दनस्य वक्त्राम्बुजं मुखारविन्दं [illegible]
[illegible]
[illegible]
[illegible]

[illegible]ऽपि पुनोऽपि सन् वक्रभाव कुटिलस्वभावं न बभार धत्ते स्म । पुनर्विष्णोर्नारायणस्य पद [illegible]मालम्बते आश्रयते सेवते इत्येवशीलोऽपि न नैव विष्णुभक्तः । महावीरग[illegible]त्वात् । अथ च पृथिव्याः सुतो मङ्गलनामा ग्रहः स तु वक्रभाव वक्रनामत्वम् । '[illegible] लोहिताङ्गो मङ्गलोऽङ्गारक कुजः' इति मङ्गलनामानि हैम्याम् । अथ च [illegible]मवलम्बते भजते इत्येवशीलोऽस्ति । ज्योतिश्चक्रस्य नभःस्थत्वात् ॥

यत्पाणिपद्मः स पुनर्भवोऽपि दत्ते नतानामपुनर्भवं यत् ।
[illegible]सीकृता येन भवं विहाय शिवं श्रयन्ते च तदत्र चित्रम् ॥८॥

[illegible] जगति चित्रं महदाश्चर्यं दृश्यते । तत्किम् । यत् यस्य गौतमशालिनः [illegible] सह पुनर्द्वितीयवारं भवनमुत्पत्तिस्तेन सह वर्तते यस्तादृशोऽपि [illegible] पुनरवतारे भवोऽवतारो यस्य स नतानां प्रणमज्जनानां दत्ते [illegible] मोक्षं ददाति । 'कामाङ्कुशो महाराजः करजो नखरो [illegible] पुनर्भवपुनर्नवौ ॥' इति हैम्याम् । तथा तत्रैव 'महानन्दो [illegible]' इति च । पुनर्येन गौतमेन शिष्यीकृताः शिष्यीकृता: [illegible] शिवं शम्भुं श्रयन्ते भजन्ते [illegible] शिवं मोक्षं यान्ति गौतमदीक्षितानां [illegible]

[illegible]

[illegible] ॥ ९ ॥

[illegible]

शीर्षे मूर्ध्नि मस्तके चूडामणिं शिखारत्नं दधार धृतवती स्थापितवती वा । पुनरयं हीरकुमारः यद्यस्मात्कारणात् सूरिश्रिया आचार्यलक्ष्म्यास्तिलक इव विशेषक इव भविता भविष्यति । किमुत्प्रेक्ष्यते । अपरा धात्री अस्य कुरानाधीनन्दनस्य अतः कारणात् भाले ललाटे तिलकं कुङ्कुमादिकस्य स्वर्णरत्नमयं भूषणं पुण्ड्रकं चकार रचयामास ॥

तत्कर्णयोर्मणिविनिर्मितकर्णपूर-
द्वन्द्वं कयाचन विलम्बितमुद्दिदीपे ।
नित्योदयः कथमभूस्त्वमिदं मुखेन्दुं
प्रष्टुं किमित्युपगतं शशिसूर्ययुग्मम् ॥ ६६ ॥

कयाचन मण्डनकारिण्या धात्र्यान्यया वा स्त्रिया तत्कर्णयोर्हीरकुमारश्रवणयोः अवलम्बितं न्यस्तं क्षिप्तं मणिविनिर्मितमर्थात्स्वर्णरजतचन्द्रकान्तपीतरत्नमयं कर्णपूरद्वन्द्वं कुण्डलयुग्ममुद्दिदीपे । शुशुभे । किमुत्प्रेक्ष्यते । इदं मुखेन्दुमस्य हीरकुमारस्य वदनचन्द्रं प्रति इति प्रष्टुमिवोपगतं समेतं शशिसूर्ययुग्मं चन्द्रदिवाकरद्वयम् । इति किम् । [illegible] हीरमुखेन्दो, त्वं नित्योदयः अहर्निशमभ्युदयोऽस्तराहित्यं यस्य तादृशः कथं केन प्रकारेण अभूः सञ्जातः तत्कारणमावयोर्वद । यथा आवामपि नित्योदयौ भवावः ॥

नेत्रामृताञ्जनमसौ जगतां यदस्या-
नञ्जाक्षिणी किमिति काचन कज्जलेन ।
सर्वाङ्गसूत्रमिह धारयति येन तस्यो-
रःसूत्रिका किमिति काचिदुरस्यधत्त ॥ ६७ ॥

यत्कारणादसौ हीरकुमारः जगतां त्रिभुवनजनानां नेत्राणां नयनानाममृताञ्जनं सुधा[illegible]मा अञ्जनमिवास्ति भावी वा । किमुत्प्रेक्ष्यते । इति हेतोः काचन मण्डनकारिणी [illegible] शिशोः अक्षिणी लोचने कज्जलेन आनञ्ज । पुनर्येन कारणेन असौ बालकः [illegible] सर्वप्रकाराचाराङ्गादिभिरुपलक्षितं सूत्रं सिद्धान्तम् । जातिवाचित्वादेकवचनम् । धारयि[illegible] धारयिष्यति । किमुत्प्रेक्ष्यते । इति हेतोः कापि धात्री तस्य हीरकुमारस्य उरसि हृदये उरःसूत्रिकां मौक्तिकप्रालम्बिकाम् । 'उरःसूत्रिका तु मौक्तिकैः' । [illegible] [illegible]हारमुक्ताहारं [illegible] वा अधत्त क्षिपति स्म ॥

पादारविन्दयुगलोपरिलम्बिनीना
[illegible] रणत्क्वणितराजतकिङ्किणीनाम् ।
दीक्षाविशेषकलितेन मरालचाल-
[illegible] [illegible] ॥ ६८ ॥

[illegible] कुमारो [illegible]

आसीदसीममहिमाप्यनयार्भकस्य
प्रोल्लेखितस्य निकषेण मणेस्त्विषेव ॥ ७९ ॥

स कुमार अनवद्यतमाम अतिशयेन प्रशंसनीया त्रिया लक्ष्म्या मप्राप्य तदपि विद्याधिगमदिवस एवावधिर्मर्यादा यत्रेति क्रियाविशेषणम । तद्दिनमारभ्येत्यर्थ । श्रिया शोभया लक्ष्म्या वा व्यरुचत शुशुभे । 'गहस्य गन्मा यरुनातिभक्त' इति रघुवंशे । इ इव । इन्दुरिव । यथा चन्द्र अनवद्यतमामतिनिर्मुक्तमेघोपरोधा त्रिया स्वाती नक्षत्र विशेष प्राप्य श्रिया शारदीनकौमुदीलक्ष्म्या विरोचते । 'द्युद्भ्यो लुङि' द्युतादिभ्य पर स्मैपद वा स्यात् । 'पुषादिद्युताद्य्लृदित परस्मैपदेषु' श्यन्विकरणपुषादेर्द्युतादेर्लृदितश्च परस्य च्लेरङ् स्यात् परस्मैपदेषु । अद्युतत् । अयोनिष्ट । अरुचत । अरोचिष्ट ।' इति प्रक्रियाकौमुद्याम् । अपि पुनस्तस्यार्भकस्य हीरकुमारस्य तया विद्यया कृत्वा न विद्यते सीमा मर्यादा यस्य स असीम । अद्भुत इत्यर्थ । तादृशो महिमा माहात्म्य यस्य तथा विध आसीत् बभूव । कस्येव । मणेरिव । यथा निकषेण शाणेन उल्लेखितस्य उत्तेजितस्य निर्मलीकृतस्य मणे रत्नविशेषस्य त्विषा कान्त्या कृत्वा अनन्य महत्त्व मूल्य महर्घ्यता भवति ॥ इति बालक्रीडा ॥

: नाभीभवेन तदुदाहरणीकृतै किं
सामुद्रशास्त्रगदितैर्नरलक्षणौघै ।
नालम्भि तत्र कुमरे व्यभिचारिभाव
प्रामाणिकै सदुपमानविधाविवेह ॥ ८० ॥

नाभीभवेन विधात्रा । किमुत्प्रेक्ष्यते । 'हाराग्रजाग्रद्गरुडाश्मरश्मिपीनाभनाभीकुहरान्धकाराम्' इति नैषधे । नाभीशब्दो दीर्घ ईकारान्तोऽस्तीति । तदुदाहरणीति । स हीरकुमार एव उदाहरण निदर्शन दृष्टान्तो येषा ते तदुदाहरणा । न तदुदाहरणास्तदुदाहरणा कृतास्तदुदाहरणीकृतास्तैः । समुद्रेण कविना कृत शास्त्र ग्रन्थविशेष । सामुद्रशास्त्र तत्र गदिता. कथितास्तैर्नराणा मनुष्याणा लक्षणाना स्वस्तिकचक्राङ्कुशादीनामोघै समूहैस्तत्र कुमरे हीरकुमारे व्यभिचारिभाव. परस्परविरोधित्व नालम्भि न प्राप्तम् । 'कुमार कुमरोऽपि च' इति शब्दप्रभेदे । अन्यत्रापि चरित्रादौ च । कस्मिन्निव । सदुपमानविधाविव । यथा । इह जगति प्रामाणिकैस्तार्किकै सति सर्वप्रकारैर्योग्ये विद्यमाने उपमानविधौ अन्यपदार्थस्य सादृश्यीकरणप्रकारे व्यभिचारित्व न लक्ष्यते ॥

तस्याभवल्लवणिमातिशय' स कोऽपि
प्रोत्तारयन्त्यदुपरि स्थविर' शिवाय ।
मुक्ता. क्षिपत्यनुदिन पवमानमार्गे
ता एव तत्र किमु तारगणा भवन्ति ॥ ८१ ॥

धात्र्योदितां प्रथमतः पृथुकप्रकाण्डः
कीरस्य शाव इव चारुमुवाच वाचम्।
तस्याः पुनः समवलम्ब्य कराङ्गुलीः स
लीलायितं वितनुते स्म गतौ स्विकायाम् ॥ ७१ ॥

स पृथुकप्रकाण्डः बालशार्दूलः प्रथमतः पूर्वम्। सार्वविभक्तिकस्तस्। सर्वाभ्योऽपि विभक्तिभ्यस्तस् स्यादित्येके। धात्र्या उपमात्रा उदिताम् उच्चरितां कथितां चारु मनोहरां वाचं वाणीम् उवाच वक्ति स्म। क इव। कीरस्य शाव इव। यथा शुकस्य बालकः प्रथमतः कथितां चार्वीं मनोज्ञां वाचं वदति। पुनः स कुमारः तस्या धात्र्याः कराङ्गुलीः हस्तस्य तर्जन्यादिका अङ्गुलीः समवलम्ब्य आश्रित्य। गृहीत्वेत्यर्थः। स्विकायामात्मीयायां गतौ गमने लीलायितं लीलया आचरितं चारुचङ्क्रमणविलासं तनुते स्म। लीलागमनमदर्शयदित्यर्थः। इव तत्रां सन्निहितं चरन्तं मुनेर्मनोवृत्तिरिव स्विकायाम् ॥

चूलाक्रियामहमथाङ्गभवस्य तस्य
संतन्वता पुलककोरकितेन तेन।
श्रीदायितं प्रदिशता मणिहेमजात-
माढ्यायितं समुदयेन च मार्गणानाम् ॥ ७२ ॥

अथ वाग्गमनपाटवभवनानन्तरं पुलकेन रोमहर्षेण कृत्वा कोरकाः कुड्मलाः संजाता अस्येति। 'पुलककोरकिततनु' इति चम्पककथायाम्। रोमाञ्चकञ्चुकितेन व्यवहारिणा तस्य हीरनाम्नोऽङ्गभवस्य स्वपुत्रस्य चूलाक्रियामहं शिरःशिखाकरणोत्सवं संतन्वता कुर्वता श्रीदायितं धनदेनेवाचरितं वदान्यतातिशयेन। तेन किं कुर्वता। प्रदिशता ददता। किम्। मणयो रत्नानि हेमानि सुवर्णानि तेषां जातं समूहम्। च पुनः मार्गणानां समुदयेन याचकनिकरेण आढ्यायितं स्वाभाविकमहेभ्य इवाचरितम्। ईश्वरीभूतमित्यर्थः ॥

शावः शुभैरवयवैः सवितुः प्रयता-
दृद्धिं दधावनुदिनं स्वजनैरुपास्यः।
गृभीभृतो वर्त्मनिर्झरतस्तर...
सिन्धुप्रवाह इव पर्वरगिनिपेव्य ॥ ७३ ॥

शावो हीरकुमारः सवितुः मातुः प्रयत्नात् [illegible] प्रसारितवयवैः [illegible] अनुदिनं निरन्तरं वृद्धिं पुष्टिं [illegible] स्वजनैर्ज्ञातिवर्गमानवैर्निजजनैर्वा उपास्य [illegible]
गृभीभृत् पर्वतस्य [illegible]

[illegible]

[illegible] [illegible] ।

[illegible] [illegible] [illegible]

[illegible] [illegible] ॥ ८४ ॥

[illegible] कुमारस्य मौलि [illegible] । [illegible] रंचन्निनो ध्यानस्य [illegible] [illegible] कुमारिकाण्यानां पाणिग्रहण[illegible] [illegible] लक्षण[illegible] [illegible] धो यस्य तादृग्भिमान् [illegible] [illegible] । 'भय भीर्भीतिरातङ्क.' इति हैम्याम् । [illegible] । अतएव प्रतिपक्ष[illegible] तनो. [illegible] कुसुम.शरस्य पुष्पबाणस्य कामस्य [illegible] किम् [illegible] । [illegible] स्वामिकतया मदन[illegible] युक्तमेत ॥

उत्तुङ्गभावमथ वर्तुलता दधान-

मुष्णीषमस्य सुषमा स बिभर्ति मौलौ ।

यस्मिन्समाजिगमिषोस्तरुणत्वलक्ष्म्या

माङ्गल्यकुम्भ इव केशरुहाश्रिताङ्कः ॥ ८५ ॥

अस्य कुमारस्य मौलौ मूर्धनि उष्णीषमाकारविशेषं सुषुमां सातिशायिशोभा बिभर्ति स्म दधार । 'सोष्णीषमूर्धा ध्वजचिह्नपाणि' इति चम्पूकथाया नलविशेषणम् । अत एव तीर्थकृद्वद्य इतरेषामप्युत्तमपुरुषाणामुष्णीषं वर्ण्यते । उष्णीषं किं कुर्वाणम् । दधानं बिभ्राणम् । कम् । उत्तुङ्गभावम् उन्नतत्वम् । अथ पुनर्वर्तुलतां वृत्ताकारत्वं च । इवोत्प्रेक्ष्यते—यस्मिन्हीरकुमारे समाजिगमिषो सम्यक्प्रकारेण आगन्तुकामायास्तरुणत्वलक्ष्म्या यौवनश्रिय केशा एव रुहा दुर्वा । 'दुर्वा त्वनन्ता शतपर्विका । हरिताली रुहा' इति हैम्याम् । ताभिराश्रित आकलित अङ्क उत्सङ्गे यस्य तादृशो माङ्गल्य कल्याणकारी कुम्भ कलश इव ॥

यश्चन्द्रिकाङ्कितचतुर्द्विजराजराज-

द्वालार्धशीतमहसो वहते स शश्वत् ।

शुद्धाशयोऽमृतरसायितवाग्विलासो

द्वासप्तति कलयतात्स कला कथं न ॥ ८६ ॥

यो हीरकुमार शश्वन्निरन्तर चन्द्रिकया ज्योत्स्नया अङ्कितान् कलितान् । 'दशनच

सर्पीश्च रै । नोत्तरति नातिक्रामति । स्माह । छात्राणाम् । यथा कोऽपि रसनो-
ऽत्रा नोत्तरति गुरोरनुगाध्यापकम् सर्वः सकलं प्रयत्नेरध्ययनसमग्रिन् हीरकुमारे
फल फलान्दरमपि सञ्जात सफलं । कस्येव । कृषीवलस्येव । यथा कृषिकस्य कर्ष-
कारिण. अनूपरभुवि सर्वसस्योत्पत्तिस्थानक्षेत्रभूमौ प्रयत्नः प्रयासः सफलीभूयते ॥

त साक्षिण प्रणयवान्स्वगुरु प्रणीय
स्वल्पैर्दिनै' स वहनैरिव धीविशेषै. ।
सप्राप पारमखिलागमसागरस्य
साधु. समाधिभिरिवानुपमैर्भवस्य ॥ ७७ ॥

प्रणय स्नेहो गुरुजनेषु विद्यते यस्य स हीरकुमारस्त स्वगुरु निजकलाचार्यं साक्षिण
प्रतिभुवम् । साक्षिमात्रमित्यर्थ' । प्रणीय कृत्वा स्वल्पैरतिस्तोकैर्दिनैर्वासरै. अखिलागमसाग-
रस्य समस्तागारसमुद्रस्य पार परतीर प्रान्त सप्राप लेभे । गृहमेधिवासोचित सर्वशा-
स्त्रमधीतवानित्यर्थ । कै । धीविशेषै. स्वप्रज्ञोत्कर्षै । बुद्धिविशिष्टगुणातिशयै. । कैरिव ।
वहनैरिव । यथा यानपात्रै कृत्वा सायान्त्रिक समुद्रस्य पारमभिलषितवेलाकूल प्राप्नो-
ति । अथ पृथगुपमापि । क इव । साधुरिव । यथा यती अनुपमैरसाधारणैः समाधि-
भिर्ध्यानविशेषै. । 'ध्यान तु विषये तस्मिन्नेकप्रत्ययसंतति । समाधिस्तु तदेवार्थमात्रा-
भासनरूपक' ॥' इति हैम्याम् । एतावता योग कृत्वा भवस्य ससारस्य । 'भव सत्तात्म-
जन्मसु । रुद्रे श्रेयसि ससारे' इत्यनेकार्थ' । पार मोक्षण प्राप्नोति ॥

अध्याप्य तेन विधिवत्सकला स विद्या
प्रत्यर्प्यते स गुरुणा जनकस्य तस्य ।
श्रीमान्मुरारिरिव तेन हिरण्यरत्न-
कोटीर्वितीर्य सुतसूरिरपि व्यधायि ॥ ७८ ॥ ✓

तेन गुरुणा कलाचार्येण विधिवत् शास्त्रोक्तप्रकारेण द्विसप्ततिकलानामादिमा कला
लिखितगणितादिरन्तिमा कला शकुनरुतमित्युक्तप्रकारेण । अथवा मातृकादिकचा-
णिक्याद्(न्त)पाठनकविधिना सकला' समस्ता अपि विद्या अध्याप्य पाठयित्वा तस्य
कुमारस्य कुराख्यस्य वा जनकस्य पितु' स हीरकुमार प्रत्यर्प्यते स्म पश्चार्दापत.। अपि
पुन तेन तज्जनकेन कुराभिख्येन सुतसूरि स्वपुत्रहीरकुमारस्य कलाचार्य हिरण्यानां
रत्नाना मणीना कोटीर्बहुशो लक्षशतानि वितीर्य दत्त्वा मुरारि. कृष्ण इव श्रीमान् लक्ष्मी-
पतिर्व्यधायि विहित ॥

चित्रामिवेन्दुरनवद्यतमा स विद्यां
लब्ध्वा श्रिया तदवधि व्यरुचत्कुमार ।

[illegible] मार्गे [illegible] पाति । 'गैलो पाल्यालिर्वंकग:' इति हैमनाम् । न पुनः [illegible] संख्यानां [illegible] [illegible] लक्षणेनात्मना मितेषु [illegible] । '[illegible]' इति रघुवंशे । '[illegible]' इति नैषधे । इति [illegible] । शिरोऽहि- रकुमारस्य [illegible] किंतु । [illegible] तिरयो नवाङ्गा दृश्यते । यथा '[illegible] [illegible] चाङ्क.' इति नैषधे । [illegible] कुमार[illegible] सूना ॥

> विद्वेषिभावमपहाय परस्परेण
>
> केशच्छटास्फटिकहाटककुण्डलाङ्गाः ।
>
> स्वर्भाणुशुभ्रकिरणाम्बुजबन्धवोऽमी
>
> यस्मिन्विधातुमिव साप्तपदीनमीयुः ॥ ८९ ॥

यस्मिन्कुमारे सम्यक्स्थाने केशच्छटा केशपाशः स्फटिकः श्वेतरत्नं तथा हाटकं काञ्चनं तयो रचनाविशेषेण सदृशीकृते कुण्डले कर्णाभरणे ते अङ्गानि कायास्वरूपाणि वा येषां तादृशा अमी प्रत्यक्षलक्षा । स्वर्भाणू राहुः, शुभ्रकिरणश्चन्द्रः, अम्बुजबन्धुर्भास्करः, राहुचन्द्रार्काः । उत्प्रेक्ष्यते—मिथः परस्परं साप्तपदीनं मैत्र्यं सौहार्दम् । 'सख्यं तु सौहृदं सौहार्दं साप्तपदीनम्' इति हैम्याम् । विधातुं कर्तुम् ईयुरागता इव । किं कृत्वा । परस्परेण अन्योन्येन विद्वेषिभावं विरोधिताम् अपहाय त्यक्त्वा ॥

> सक्तः श्रुतौ शिशुशशी यदसावितीव
>
> तच्चक्षुषी श्रुतियुगं परिषस्वजाते ।
>
> नीलोत्पले उदयतः कुमुदोर्यदाक्ष्णो-
>
> र्लक्ष्मीं तदा तरलतारिकयोः श्रयेते ॥ ९० ॥

यद्यस्मात्कारणादसौ अयं वर्ण्यमानः शिशुषु कुमारेषु दृश्यमानो नयनानामाह्लादकत्वात् शशी चन्द्र इव शिशुशशी श्रुतौ शास्त्रे सक्तः प्रह्व आसक्तोऽस्ति । उत्प्रेक्ष्यते—इति हेतोस्तच्चक्षुषी कुमारलोचने श्रुतियुगं श्रवणयामलं परिषस्वजाते आलिङ्गतः स्म । च पुनर्यदा यदि नीलोत्पले कुवलये कुमुदोः कैरवयोर्मध्ये उदयेते उद्गमं लभेते तदा तरले चपले तारिके कनीनिके ययोस्तादृशयोस्तदक्ष्णोः कुमारलोचनयोर्लक्ष्मीं श्रियं शोभां श्रयेते भजेते । कुमुदे कुमारलोचनतुलामाकलयतः ॥

---

१. पूर्वपदात्संज्ञायाम्' इति हेमाभिधानचिन्तामणि . 'क्षुभ्नादित्वान्न णत्वम्' इति नामालिङ्गानुशासनव्याख्यानामाशय

त्तमर्पीलक्ष्मं । नोऽद्दृष्टा नातिकामना । कामिव । छायामिव । यथा कोऽपि रातनोऽच्छाया नोऽद्दर्शयति गुरोर्ज्ञानाध्यापकस्य सर्वः सकलं प्रयत्नैरुद्यमैस्तस्मिन् हीरकुमारे सफलं फलवद्भिरभावि सजातं सपर्ण । कस्येव । कृषीवलस्येव । यथा कृषिकस्य कर्षणकारिण अनूपरभुवि सर्वसस्योत्पत्तिस्थानक्षेत्रभूमौ प्रयत्नं प्रयासैः सफलैर्भूयते ॥

तं साक्षिण प्रणयवान्स्वगुरुं प्रणीय
स्वल्पैर्दिनै स वहनैरिव धीविशेषैः ।
सम्राप पारमखिलागमसागरस्य
साधुः समाधिभिरिवानुपमैर्भवस्य ॥ ७७ ॥

प्रणय स्नेहो गुरजनेषु विद्यते यस्य स हीरकुमारस्तं स्वगुरु निजकलाचार्यं साक्षिण प्रतिभुवम् । साक्षिमात्रमित्यर्थ । प्रणीय कृत्वा स्वल्पैरतिस्तोकैर्दिनैर्वासरै. अखिलागमसागरस्य समस्तशास्त्रसमुद्रस्य पार परतीरं प्रान्त सम्राप लेभे । गृहमेधिवासोचित सर्वशास्त्रमधीतवानित्यर्थ । कै । धीविशेषैः स्वप्रज्ञोत्कर्ष । बुद्धिविशिष्टगुणातिशयैः । कैरिव । वहनैरिव । यथा यानपात्रं कृत्वा सायात्रिक. समुद्रस्य पारमभिलषितवेलाकूल प्राप्नोति । अथ पृथगुपमापि । क इव । साधुरिव । यथा यती अनुपमैरसाधारणै. समाधिभिर्ध्यानविशेषै. । 'ध्यान तु विषये तस्मिन्नेकप्रत्ययसतति' । समाधिस्तु तदेवार्थमात्राभासनरूपक.॥' इति हैम्याम् । एतावता योगं कृत्वा भवस्य ससारस्य। 'भव सत्तात्मजन्मसु । रुद्रे श्रेयसि ससारे' इत्यनेकार्थ । पार मोक्षण प्राप्नोति ॥

अध्याप्य तेन विधिवत्सकला. स विद्याः
प्रत्यर्प्यते स गुरुणा जनकस्य तस्य ।
श्रीमान्मुरारिरिव तेन हिरण्यरत्न-
कोटीर्वितीर्य सुतसूरिरपि व्यधायि ॥ ७८ ॥ ✓

तेन गुरुणा कलाचार्येण विधिवत् शास्त्रोक्तप्रकारेण द्विसप्ततिकलानामादिमा कला लिखितगणितादिरन्तिमा कला शकुनरुतमित्युक्तप्रकारेण । अथवा मातृकादिकचाणिक्याद्य(न्त)पाठनकविधिना सकला' समस्ता अपि विद्या अध्याप्य पाठयित्वा तस्य कुमारस्य कुरा॰यस्य वा जनकस्य पितु स हीरकुमार' प्रत्यर्प्यते स पश्चाद्दीयत' । अपि पुन तेन तज्जनकेन कुरामहेभ्येन सुतसूरि स्वपुत्रहीरकुमारस्य कलाचार्य. हिरण्यानां रत्नाना मणीना कोटीर्बहुशो लक्षशतानि वितीर्य दत्त्वा मुरारि. कृष्ण इव श्रीमान् लक्ष्मीपतिर्व्यधायि विहित ॥

चित्रामिवेन्दुरनवद्यतमां स विद्यां
लब्ध्वा श्रिया तदवधि व्यरुचत्कुमार ।

कुमारस्य स कोऽपि अद्वैतवैभवः लवणिमातिशयः लावण्याधिक्यं अभवत् बभूव। स कः। यदुपरि यस्य लावण्यातिशयस्योपरि स्थविरः पितामहः। 'स्थविरः शतानन्दः पितामहौक' इति हैम्याम्। 'प्रवया. स्थविरो जरन्' इत्यपि हैम्याम्। शिवाय कल्याणकारणाय नित्यं प्रतिवासरं प्रोत्तारयन् उत्तारणं सृजन् न्युञ्छनीकुर्वन्वा मुक्ता मौक्तिकानि पवमानमार्गे आकाशे क्षिपति । किमुत्प्रेक्ष्यते । ता एव मुक्तागगनाम्बरे तारगणा ज्योतिर्मण्डलानि भवन्ति सजायन्ते ॥

स्पर्धोदयादिव मिथः प्रवयं सृजद्भि-
रङ्गैः सचद्भिमवपुर्विभवेन तेन ।
ईर्ष्यां तमीप्रियतमः प्रणयन्विजित्य
लक्ष्मच्छलेन मुमुचे किमु लाञ्छयित्वा ॥ ८२ ॥

तेन हीरकुमारेण ईर्ष्याम्। अर्थात् स्ववपुर्धारिणा सममसूयाम् । प्रणयन् कुर्वन् तमीप्रियतमः रजनीजानिः चन्द्रः विजित्य। अर्थात्पराभूय। गृहीत्वा वा। किमुत्प्रेक्ष्यते— लक्ष्मच्छलेन लाञ्छनकपटेन लाञ्छयित्वा लाञ्छनं मष्या अभिज्ञानं मुखे कृत्वा मुमुचे त्यक्तः। 'किं नन्दि' किं मुरारिः किमु रतिरमणः किं विधुः किं विधाता' इति धनपालोक्तोपमानादत्र विधोरुत्प्रेक्षा। तेन किम्। अङ्गैः शरीरावयवैः कृत्वा सचद्भिना मनोहरत्वेन वर्तते यत्तादृशस्य वपुषः शरीरस्य विभवः शोभातिशयो यस्य। अथ वा वपुर्विभवेति साधनेन जित्वेति। किं कुर्वद्भिरङ्गैः। इवोत्प्रेक्ष्यते—मिथः परस्पर स्पर्धाया. संघर्षस्य उदयात् प्रादुर्भावादिव प्रवयं पुष्टिं सृजद्भिर्विदधद्भिः ॥

केशोच्चयः स्फुरति यस्य स नीलकण्ठ-
पृष्ठे प्रविष्ट इव येन जितः कलापः ।
आबाल्यतः कुटिलता मनसोपनीता
य मेजुषी पुनरियेत्य कचच्छटासु ॥ ८३ ॥

तस्य कुमारस्य स नागरादिप्रतिपक्षलक्षजित्वर प्रसिद्धः केशोच्चयः केशपाशः। 'पाशः स्युस्तत्परः पाशो रचना भार उत्करः । हस्तः पक्षः कलापश्च केशपूर्वा इ[illegible] ॥' इति हैम्याम् । स्फुरति भासते। स यः। येन केशोच्चयेन जितः [illegible] कलापः [illegible]। उत्प्रेक्ष्यते—नीलकण्ठः [illegible] प्रविष्ट इव। पुनर्येन कुमारेण आबाल्यतः शैशवं मर्यादी[illegible] मनसा [illegible] कुटिलता उपनीता [illegible] सती। [illegible]

शुद्धाशयस्य दशनैरिव धार्यते स्म

श्रीमत्कुमारवृषभस्य विशुद्धिमत्ता ॥ ९९ ॥

तस्य कुमारस्य रसज्ञया जिह्वया । उत्प्रेक्ष्यते—इति रज्यते स्म रक्तीभूतमिव । इति किम् । यत्कारणादसौ कुमार' पूज्येषु गुर्वादिषु अभ्यर्चनीयेषु विषये रङ्गित रागयुक्त जात मनश्चित्त यस्य तादृग्वर्तते । 'रङ्ग स्यान्नृत्ययुद्धवो रागेऽपि' इत्यनेकार्थः । पुनः शुद्धाशयस्य शुद्धो निर्मलो निष्पाप आशयश्चित्त मत्य च यस्य श्रीमतो लक्ष्म्या शोभया वा शालिन कुमारेषु बलवत्तया धर्मकर्मादिषु धुरीणतया वा वृषभ इव वृषभः प्रशस्यो वा तस्य दशनैर्दन्तैरपि विशुद्धिमत्ता अत्यौज्ज्वल्य धार्यते स्म धृता ॥

रक्ताङ्कपल्लवमुखान्द्विषतो जिगीषु-

र्धत्तेऽसिकं किमधरः सविधेऽदसीयः ।

भावी शिशुर्भुवि यदेष सुवृत्तशाली

भेजे तदस्य चिबुकोऽपि सुवृत्तभावम् ॥ १०० ॥

अदसीय कुमारसंबन्धी अधरः ओष्ठः असिकम् अधराध.प्रदेशविशेष धत्ते धारयति । उत्प्रेक्ष्यते—रक्ताङ्कपल्लवमुखान् विद्रुमकिसलयादिमान् द्विषतो वैरिणो जिगीषुर्जेतुमिच्छुः किम् । असिक असिरेव असिक । स्वार्थे क । स्त खड्ग बिभर्ति । अन्योऽपि वीरो रिपून् निर्जेतु करवाल कलयति यत्कारणाद्भुवि पृथिव्यामेष शिशुर्बालक' सुवृत्तेन शोभनाचारेण शालते शोभते इत्येवशीलो भावी । तत्कारणादस्य कुमारस्य चिबुकोऽपि असिकाधःप्रदेशोऽपि सु शोभन वृत्तमाचारो यत्र । तादृश भावमाशय सदाचारता वा । वास्तवार्थे तु शोभनवर्तुलता भेजे सिषेवे । 'तत्प्रान्तौ सृक्किणी असिक त्वध. । अधिकाधस्तु चिबुकम्' इति हैम्याम् ॥

द्वात्रिंशताजनि रदैरपि लक्षणानि

द्वात्रिंशदाकलयत. शिशुवासवस्य ।

पीयूषवर्षिसितरोचिरसूययान्त-

र्वाग्भिः सुधामिव ववर्ष मुखं तदीयम् ॥ १०१ ॥

करचरणयोश्छत्रचामरादीनि द्वात्रिंशत्संख्याकानि लक्षणानि आकलयत. बिभ्रतः । लक्षणानि यथा—'छत्र तामरस धनू रथवरो दम्भोलिकूर्माङ्कुशा वापी स्वस्तिकतोरणानि च सर पञ्चानन' पादप । चक्र शङ्खगजौ समुद्रकलशौ प्रासादमत्स्या यवा यूपस्तूपकमण्डलून्यवनिभृत्सच्चामरो दर्पण. ॥ उक्षा पताका कमलाभिषेक' सुदामकेकी घनपुण्यभाजाम्' इति पट्पदी । अथवा 'इह भवति सप्तरक्त' षडुन्नत पञ्चसूक्ष्मदीर्घश्च । त्रिविपुललघुगम्भीरो द्वात्रिंशल्लक्षण स पुमान् ॥' इति । शिशुषु महार्घकत्वेन वासवस्य शक्रतुल्यस्य दन्तैर्वदनदशनैरपि द्वात्रिंशता द्वात्रिंशत्संख्याकैरजनि संजातम् । उत्प्रेक्ष्यते—

न्द्रिकया व्यवभासितम्' इति रघौ । इति चन्द्रिकाशब्देन दन्तद्युतिश्चन्द्रिका च । चतुः-संख्याका द्विजानां राजानो द्विजराजा राजदन्ताश्चन्द्रश्च तथा राजत् दीप्यमान यद्भाल ललाटमेवार्धशीतमहा. सामिसोमस्तान् । सार्धचतुश्चन्द्रानित्यर्थ. । वहते स्म दधार । स कुमारो'द्वासप्ततिसंख्याका' कलाः कथ न कलयतात् धत्ताम् । अपि तु सार्धचतुश्च-न्द्रधारी गणनया द्वासप्ततिकलाकलित एव स्यात् । किंभूतः । शुद्धो निर्मलः निष्पापः विशदश्च आशयश्चित्त मध्य च यस्य । पुन किंभूत. । अमृतरसवत्सुधानिस्यन्द इवा-चरितो वाग्विलासो वचनवैचित्री यस्य । चन्द्रा अपि श्वेता अमृतयुताश्च स्युः ॥

भालस्थलप्रसृमरांशुपय'प्रवाहो-
पान्तप्ररूढलतिकेव विभाति यद्भ्रूः ।
शङ्खोऽप्यभूद्वदनवारिजपार्थिवस्य
चन्द्रादिवैरिविजये किमु वादनार्हः ॥ ८७ ॥

यद्भ्रूर्यस्य कुमारस्य भ्रूर्नयनयोरुपरि रोमपद्धतिर्भाति स्म रराज । उत्प्रेक्ष्यते—भा-लस्थलस्य ललाटपट्टस्य प्रसमरा विस्तरणशीला ये अंशव. किरणास्त एव पय'प्रवाहः सलिलानामोघस्तस्योपान्ते तटप्रदेशे प्ररूढा प्रोद्गता लतिका । अथवा फलिनी वल्ली स्वभावलतिका वा । अपि पुनर्यद्भ्रूके शङ्ख. भालश्रवणयोरन्तराले कश्चित् प्रदेशविशेषः अभूज्जज्ञे । 'शङ्ख कम्बौ निधिभेदे स्यात्स्यामलिकास्थनि' इत्यनेकार्थः । ललाटप्रान्त-वर्तिनि अस्थनीति तदवचूर्णिः । 'शङ्खो भालश्रवोऽन्तरे' इति हैम्याम् । उत्प्रेक्ष्यते—वद-नमर्थात् कुमारमुखमेव वारिजाना कमलाना राजा पार्थिवस्तस्य । चन्द्रादीनां विधुदर्प-णप्रमुखाणां वैरिणा शत्रूणा विजये जयप्राप्तौ पराभवनावसानसमये वा वादनस्य पूर-णस्य अर्हो योग्यः शङ्ख. कम्बु' किमु । विजयिराजानो हि रिपून्निर्जित्य स्वविजयसूचक शङ्ख वादयन्तीति प्राक्तननृपरीति' । यथा—स्वाविनयकरणप्रकुपितमतङ्गतापसप्रदत्त-मतङ्गजीभवनशापापनयनप्रादुर्भूतस्वाभाविकस्वरूपप्रसन्नीभवद्गान्धर्वदेवविश्राणितप्रयुक्त-संहारविभक्तमन्त्रप्रस्वापनशस्त्रानुभावपराभूतसमस्तप्रतिपक्षक्षितिपतिपताकिनीप्रारब्ध-दुर्धरमहायोधनपयोनिधिमध्यसमुद्धृतविजयश्रीस्वीकरणावसरे अजकुमार 'तत' प्रियो-पात्तरसोऽधरोष्ठे निवेश्य दध्मौ जलज कुमारः' इत्येतत्सर्वविस्तारो रघुवंशे ॥

लावण्यनीरनयनाब्जयदीयवक्त्र-
कासारपालिरिव कर्णयुगं विभाति ।
द्वीपेषु सूचयति किं स्वमितेषु भावि-
श्लोकं शिशो' श्रवणयोश्च नवद्वयाङ्क' ॥ ८८ ॥

कर्णयुग कुमारश्रवणयुग विभाति शोभते । उत्प्रेक्ष्यते—लावण्य मनोहरता स्वरूप-सौन्दर्य वा एव नीर सलिल यत्र तथा नयने लोचने एवाब्जे कमले यत्र तादृशस्य

यत्कारणादेष कुमार' वृषवद्वृषभ इव जिनस्यार्हतो धर्मे सुकृतकर्मणि धुर्यो धौरेयो धुरंधुरो भावी भविष्यति। इति हेतोः अस्य कुमारस्य स्कन्धोऽप्यसोऽपि। उत्प्रेक्ष्यते— तस्य वृषभस्य ककुदेनांसकूटेन उपमेय उपमातु योग्यः । किमभूद्बभूव। च पुनर्येन कारणेन अर्भो हीरकुमारो युगे कलिकाले विशिष्टातिशयमाहात्म्याभ्युदयात् प्रधानः प्रकृष्टः पुरा भवति अग्रे भविष्यति। पुरायोगे भविष्यदर्थे वर्तमाना 'यावत्पुरानिपातयोर्योगे लट्' आभ्या निपाताभ्या योगे भविष्यत्काले वर्तमाना स्यादिति प्रक्रियाकौमुद्याम्। 'पुरेदमूर्ध्वं भवतीति वेधसा' इति नैषधेऽपि। तेन हेतुना । उत्प्रेक्ष्यते— अस्यार्भकस्य बाहुर्भुजोऽपि युगवद्धूसरवत्प्रधानो व्यायत. आजानुबाहुत्वात् जज्ञे संजातः॥

उद्दामदुर्गतिपुरेऽर्गलतांगमी य-
त्तद्दोरितीव लभतेऽर्गलयोपमानम् ।
यस्येभशङ्खमकरान्कलयन्प्रवाल-
शाली पुन. श्रियमसूत शय. समुद्र ॥ १०५ ॥

यत्कारणात्कुमारः उद्दाममनेकलोकानामातङ्ककारत्वादुत्कटम्। 'अबाधोच्छृङ्खलोद्दामा· न्ययन्त्रितमनर्गलम्' इति हैम्याम्। उच्छृङ्खल यद्दुर्गतिर्नरकादिकुगति' सैव पुर नगर तत्रार्गलता परिघभावम्। 'द्वारेषु परिघोऽर्गला' इति हैम्याम्। अय गमी गमिष्यति। 'यथा वि· दूराद्रिरदूरतागमी' इति नैषधे। ये जना अमु स सम्यक् त्रिधा सेविष्यन्ते ता दुर्गति गन्तु न दास्यत्यसौ तत इद विशेषणम्। उत्प्रेक्ष्यते—इतीव हेतो.। तस्य कुमारस्य दोर्बाहुदण्डोऽपि अर्गलया नगरपरिघेण उपमान सादृश्य लभते प्राप्नोति। 'अमुष्य दोर्भ्यामरिदुर्गलुण्ठने ध्रुव गृहीतार्गलदीर्घपीनता' इति नैषधे। पुनर्यस्य सह मुद्रिकया ऊर्मिकया काल्लग[illegible]र्थयकेन वा वर्तते यः समुद्र' शयः पाणि श्रिय शोभाममूताजीजनत्। किं कुर्वन्। दयन्। कान्। कृतिभाजः रेखाकारीभूतान् इभा गजा, शङ्खा· कम्बव', मकरा यादोविशेषा, तान्। पुनः किंभूत'। प्रवाला पल्लवास्तद्वत् शालते रक्तत्वेन गुरुत्वेन शोभते इत्येवंशील' समुद्रोऽपि जलगजवारिजमकरकलितस्तथा विद्रुमशाली लक्ष्मी सूते च इत्युत्प्रेक्षा। उपमा वा॥

तस्य स्फुरद्द्युतिपयःपरिपूर्णबाहु-
मूलालवालविलसद्भुजगण्डभाजः ।
रेजु' शयावनिरुहोऽङ्गुल्योऽनुशाखा·
कामाद्र्कैः किसलयैरिव शाल्यमाना. ॥ १०६ ॥

[illegible] । तु [illegible]
[illegible]
[illegible]

[illegible] नयने भ्रमतः [illegible]
[illegible] सुरे कुलदा[illegible] ।
[illegible] मकरी [illegible]
[illegible] दीपशिखोपमानम् ॥ ९१ ॥ ✓

[illegible] मुखे वदने भ्रमतः [illegible] यन्तो [illegible] । उत्प्रेक्ष्यते—[illegible] शालिन्यादीनामि- [illegible] । '[illegible]' इति [illegible] । [illegible] मुखे [illegible] प्रदीपस्य पदार्थ- [illegible] हेतुना । उत्प्रेक्ष्यते— [illegible] दीपशिखोपमान [illegible] ॥

चापल्यकेलिकलिते असितासिते च-
न्नेत्रे मिथः सदृशवैभवभाजिनी तत् ।
मा द्वयता फलभुवेति तदन्तराले
नासानिभेन विदधे किमु सीमदण्डः ॥ ९२ ॥

यत्कारणात् यस्य कुमारनयने चापल्यं चपलता सैव केलिः क्रीडा तया कलिते युक्ते चञ्चलतया या चलतीजनितलात परिस्फुरणं तेन सहिते । पुनः असितः श्याम आरा यो मध्य सभावो या नयोस्तारके स्त वर्तेते तस्मात्कारणात् सदृश तुल्य वैभव शोभातिरेक भजत इत्येवंशीले भाजिनी कुमारलोचने मिथः परस्परं मा द्वयतां मा भेदं गच्छताम् इति हेतो फलभुवा ब्रह्मणा तदन्तराले तयोर्नेत्रयोरन्तराले मध्यभागे नासानिभेन नासापटेन । उत्प्रेक्ष्यते—सीमदण्डो विभागयष्टिः किमु विदधे कृत इव ॥

स्थाणोः शिरोनिवसनानशनाम्बुपानं
सतप्य दुस्तपतपो मणिदर्पणेन ।
प्रापे परं जनुरिवेदमगण्यपुण्य-
सम्प्रापणीयमदसीयकपोलरूपम् ॥ ९३ ॥

मणिदर्पणेन रत्नादर्शेन अस्य कुमारस्य इमौ अदसीयौ कपोलौ गण्डौ तयो रूपं स्व- रूपमिदं प्रत्यक्षम् । उत्प्रेक्ष्यते—परमन्यज्जनुरवतारं प्रापे प्राप्तमिव । किंभूतं जनुः । अगण्येन गणयितुं प्रमाणीकर्तुमशक्येन पुण्येन भाग्येन सम्प्रापणीयं सम्यक्प्रकारेण लब्धुं योग्यम् । किं कृत्वा । दुःखेन कष्टेन तप्यते विधीयते इति दुस्तपं तादृक् तप

प्रामाण्यमस्य वहतो महतां सदस्य-
प्रामाण्यमाश्रयदुरस्तद्विहासिनि नित्यम् ।
श्रीवत्स उल्लसति तस्य पुनः स वक्षः
स्थायी गभीरिमविलोकनकौतुकीव ॥ १०९ ॥

इह जगति । तदिति कर्तृपदम् । निजमाधर्गं निम्नगोऽस्मि गदस्य उरो हृदामप्रामाण्यं प्रमाणातीततामतिविशालतामनुपादेयतामाश्रयन्गोचते स्म । अस्य किं कुर्वत । महतां महात्मनां सदसि सभायाम् । समूहे इत्यर्थः । 'उडुपरिषदः किं नार्हत्वं निशः किमु नौचिती' इति नैषधे । परिषद्शब्दः समूहवाची प्रामाण्य यथार्थवादितां मुख्यतां वा नदय वत्त्याचरति । सन्मार्गं तदस्माकं महतां प्रमाण एवेति प्रमाणतां वहतो बिभ्रतः । पुनस्तस्य कुमारस्य श्रीवत्स. उत्तमपुरुषाणां हृदयमध्ये कश्चिदाकारविशेष. । उल्लसति शोभते । उत्प्रेक्ष्यते—स श्रीवत्सः गभीरिम्णः अर्थात्कुमारस्य गाम्भीर्यस्य विलोकने विभावने कौतुक कौतूहलमस्त्यस्येति कृत्वा वक्षसि गाम्भीर्याश्रये हृदये तिष्ठत्येवशीकः स्थायी वभूवेव ॥

सान्द्रीभवत्तनुविभाभरनिर्झरिण्याः
सावर्तशोण इव नाभिरमुष्य रेजे ।
वक्षःस्थलेन विपुलेन सहाभ्यसूया-
माबिभ्रतीव कटिरप्यभवद्विशाला ॥ ११० ॥

अमुष्य कुमारस्य नाभिस्तुन्दकूपिका रेजे भाति स्म । उत्प्रेक्ष्यते—सान्द्रीभवन्नीरन्ध्रो जायमानो यस्तनोर्वपुषो विभाभरः कान्तिसमूह स एव निर्झरिणी नदी तस्या सहावर्तेन पयोविभ्रमविशेषेण युक्त शोण ह्रद इव । अपि पुनरमुष्य कटिः श्रोणिर्विशाल विस्तीर्णा अभूद्बभूव । उत्प्रेक्ष्यते—विपुलेन विशालेन वक्ष स्थलेन हृदयेन सह सार्धमभ्यसूयामीर्ष्यां बिभ्रती दधानेव ॥

कार्कश्यसंहृतिलघूकृतहस्तिहस्ता-
वूरू कृताविव शिशोर्नलिनासनेन ।
स्थम्भोपमो जिनमतावसथे स भावी
स्थम्भोपमां किमिति तस्य बिभर्ति जङ्घा ॥ १११ ॥

नलिन[illegible] येन वेधसा कार्कश्यस्य कठिनतायाः संहृत्या संहरणेनापनयनेन कृत्वा लघूपौ [illegible] यौ हस्तिनः करिण हस्तौ शुण्डादण्डौ । उत्प्रेक्षते—शिशोः कुमारस्य ऊरू [illegible] मितावविव । पुनस्तस्य कुमारस्य उत्प्रेक्ष्यते—इति हेतो. किमु जङ्घा स्थम्भोपमा [illegible] विभर्ति । इति किम् । यत्स हीरार्भः जिनमतमर्हच्छासनमेव

कुमारेषु बालकेषु रूपेण श्रिया वा पुरंदर इव पुरंदरस्तस्य दन्तैर्दशनैरदीप्यत शुशुभे । उत्प्रेक्ष्यते—मुखाननैर्वदनाकरादभ्युद्गतैः प्रकटीभूतैर्वज्रैर्हीरकमणिभिरिव । वाथवा उत्प्रेक्ष्यते । वज्राब्जधाम्नः कुमारवदनकमलमेव धाम मन्दिरं यस्यास्तादृश्याः श्रुतदेवताया सरस्वत्या सेवया अर्थात् तद्वाहनत्वात्स्वस्वामिन्या उपासनया कृत्वा यत्सुख तस्यानुभवनार्थं तद्वा प्राप्तुमागतैः समकालं समेतैर्गौरपत्रै राजहंसैरिव ॥

विम्बाधरे निपतिताभिरभासि यस्य
निर्धौतमौक्तिकशुचिद्विजचन्द्रिकाभिः ।
कृत्तेन्दुदर्पणपयोजजये कृताभि-
र्नाभीभुवेव सुमवृष्टिभिरेतदास्ये ॥ ९७ ॥

यस्य कुमारस्य निर्धूतानि उत्तेजितानि यानि मौक्तिकानि तानीव शुचिभिरुज्ज्वलाभिर्द्विजानां दन्तानां चन्द्रिकाभिर्ज्योत्स्नाभिरभासि निर्बभे । किंभूताभिश्चन्द्रिकाभिः । निपतिताभि आगत्य स्थिताभि । कस्मिन् । विम्बाधरे गोल्हकतुल्ये ओष्ठे । उत्प्रेक्ष्यते—एतदास्ये कुमारवक्त्रे नाभीभुवा नारायणनाभ्यम्भोरुहजन्मना वेधसा कृताभिः कुसुमवृष्टिभिरिव । कदा । कृत्ताभिर्निर्मितो य इन्दोश्चन्द्रस्य दर्पणानामादर्शानां पयोजानां पद्मानां जयः परस्परविरोधायुद्धे पराभव तत्र । तत्समय इत्यर्थः । 'नाभीमवेप ध्यवागसोऽनु' इति नैषधे नाभीशब्दो दीर्घोऽप्यस्ति ॥

पूर्णामृतैररुणरत्नमनोज्ञमध्या
पङ्क्तीभवद्द्विजविराजिसवेशदेशा ।
यस्याननान्तरनिकेतनवाक्त्रिदश्या
वापीव खेलनकृते रसना बभासे ॥ ९८ ॥ ✓

यस्य कुमारस्य रसना जिह्वा बभासे रेजे । उत्प्रेक्ष्यते—आननमर्थात्कुमारवदनं तस्यान्तरं मध्यं तत्र निकेतनं सदनं यस्यास्तादृश्या वाचितदश्या भारत्या खेलनकृते जलक्रीडार्थं वापी दीर्घिकेव । किंभूता वापी । अमृतैः पीयूषैः सलिलैश्च पूर्णामृतमध्या । पुनः किंभूता वापी । अरुणरत्नैः पद्मरागमणिभिः मनोज्ञं रमणीयं यद्वा रचितं मध्यं यस्याः । मध्यमलोपीसमासः । पुनः किंभूता । पङ्क्त्या श्रेण्या भवद्भिर्विलसद्भिर्द्विजैर्दन्तैर्विहङ्गमैश्च । अर्थात् विशदतया राजहंसपक्षिभिः विराजी शोभनशील सवेशदेशः समीपविभागो यस्याः । वापी अपि जलाकीर्णा रत्नवद्गर्भा विहङ्गमकलिता च स्यात् ॥

पूज्येषु रञ्जितमना यदसौ कुमार-
स्तस्य स्म रज्यत इतीव रसज्ञयापि ।

शब्देनात्मा उत् ऊर्ध्वं बबन्धुः बध्नन्ति स्म । स्व पाणावनिन कृते सौन्दर्यः । किं कर्तुमिच्छवः । तिलक्षवः लघुमिच्छवो विधातु कामा. । कस्मात् । दुःखात् । काम । तनुलतां स्वशरीरयष्टिम । किंभूता. प्रनाला । पराभवादभिभूतिस्थानं गमिताः प्रापिताः । कया । स्वकीयया आत्मीयया लक्ष्म्या श्रिया शोभया वा । याभिः । यत्पादपङ्कजयुगाङ्गुलिभि. यस्य कुमारस्य पादौ चरणावित्र पङ्कजे पद्मे तयोर्युगल द्वन्द्व तस्याङ्गुलीभिः पदशाखाभि. ॥

कामद्विपेऽङ्कुश इवोद्भवितायमेव
कामाङ्कुशैः किमिति सूचयति स्म वेधाः ।
रत्नं यदेष भुवि सूरिभरेषु भावी
रत्नश्रियं किमु पुनर्निदधे स तेषु ॥ ११५ ॥

वेधा ब्रह्मा एतस्य कुमारस्य कामाङ्कुशैरिति नामभिर्नखै. । 'कामाङ्कुशो महाराज-करजो नखरो नख'' इति हैम्याम् । उत्प्रेक्ष्यते—इति सूचयति स्म किम् । लोकपुर' कथयति स्मेव । इति किम् । यदय हीरकुमारः कामद्विपे स्मरहस्तिनि विषये अङ्कुश' सृणिरिवोद्भविता प्रादुर्भविष्यति । सर्वथापि दुर्दम मदन यौवनेऽप्येष दमिष्यतीत्यर्थः । पुनः स ब्रह्मा तेषु कामाङ्कुशेषु । उत्प्रेक्ष्यते—इति हेतोः । अत्र इतिशब्द' पूर्वपदा-देव ग्राह्य । एककाव्यत्वात् । रत्नश्रिय माणिक्यलक्ष्मी निदधे स्थापितवान् । इति किम् । यदेष कुमारो भुवि पृथिव्या सूरिभारेष्वाचार्यव्रजेषु रत्न माणिक्यमिव भावी भविष्यति । 'नगीनो' इति प्रसिद्ध. ॥

यन्मूर्तिदीधितिझरेषु किमु प्ररोहा
रोमाणि कामपि रमां कलयाबभूवु' ।
ईदृग्विधा वयमिहैव न चापरत्र
वक्तुं गुणैः किमिति यत्रकृताः स्वरेखा' ॥ ११६ ॥

रोमाणि यस्य लोमलेखाः कामप्यसाधारणीं रमा श्रिय कलयाबभूवुः धारयन्ति स्म । उत्प्रेक्ष्यते—यस्य कुमारस्य मूर्ति शरीर तस्य दीधितय परित' प्रसरत्कान्तय' ता एव झरा निर्झरप्रवाहास्तेषु हस्तपहृदयादिवह्वङ्गत्वाद्बहुवचनम् । तेषु प्ररोहा नीलतृणाङ्कुरा. किमु । पुनर्यत्र कुमारे औदार्यधैर्यगाम्भीर्यादिगुणै. उत्प्रेक्ष्यते । इति वक्तु किमु ज-नाना पुर. कथयितुमिव स्वा स्वा. सरूपाणामेकशेषे एक एव स्वशब्दस्तिष्ठति रेखा लघुरूपा कृता किमु इति किम् । यत् ईदृशी विधा प्रकारो येषाम् अनन्यसामान्य-माहात्म्येन सकललोकचेतश्चमत्कारिणस्तादृशा वय सर्वेऽपि गुणा इहैव हीरकुमारे एव स्मो वर्तामहे, च पुनर्नापरत्र अपरस्मिन् स्थाने । एवंविधा वय सर्व-थापि न स्मः ॥

तारान्तराणि स्वर्गेण इति गम्योत्प्रेक्षा। पुनस्तदीय कुमारसंचरित सदनं वारिभर्या- पीनं एता सभा पीयूषं पायं कारोति स्म। उत्प्रेक्ष्यते—पीयूषममृतं गर्भतीलेवसी- रसाम्न निरन्तरनिपदबन्दस्य अन्तर्धित्तमाने अतुपमा ईर्ष्ययेव सुधामवर्षत् ॥

उद्धृत्य कण्टकगणान्किमु वारिजन्म
　　किं वात्मदर्शमपहृत्य विचेतनत्वम्।
संतक्ष्य लक्ष्मशितिमानमुतामृतांशुं
　　राजीवभूरकृत हीरकुमारवक्त्रम् ॥ १०२ ॥

राजीवभूर्वेधा किमु इति वितर्कयामि विचारं कुर्वे। 'वितर्के किमुत च' इति है- मनाम। वारिजन्म विकसितकमलम्। अर्थादादाय। कर्मद्वय वा। कृधातोर्द्विकर्मकत्वे- न हीरनाम्नः कुमारस्य वक्त्रं सुखमकृत विरचयांचकार। किं कृत्वा। कण्टकानां गणान् मजानुकूल निष्कास्य। 'शाशिनि खलु कलङ्कः कण्टकाः पद्मनाले जलधिजलमपेय पण्डिते निर्धनत्वम्। दयितजनवियोगो दुर्भगत्वं सरूपे धनपतिकृपणत्वं रत्नदोषी कृतान्तः ॥' इति सूक्तवचनात् पद्मे कण्टकाः। वा अथवा विचेतनत्वं चेतनाराहित्यम् अपहृत्य अ- ज्ञानता मुषित्वा आत्मदर्शं दर्पणं किमादाय, हीरमुखं चक्रे। उत अथवा लक्ष्मणो ला- ञ्छनस्य शितिमानं कृष्णतां संतक्ष्योत्तार्य किम् अमृतांशुं सुधाकरं हीरवदनं विधिर्वि- दधे ॥ इति सुगमम् ॥

निःशेषभूवलयकुण्डलिवेश्मनाकि-
　　लोकत्रिके प्रसृमरैर्यशसां विलासैः।
रेखा भविष्यति महत्सु यदस्य कण्ठे
　　रेखात्रिकं किमिति निर्मितवान्विधाता ॥ १०३ ॥

विधाता ब्रह्मा अस्य कुमारस्य कण्ठे गलकदले। उत्प्रेक्ष्यते—इति हेतो रेखात्रिकं निर्मितवान् किमु कृतवानिव। इति किम्। यत् निःशेषं समग्रं भूवलयं मेदिनीमण्ड- लम्, तथा कुण्डलिनां नागानां वेश्म गृहं पातालम्, तथा नाकिनां देवानां लोको विश्वं स्वर्गस्तेषां त्रिके त्रयेऽपि प्रसृमरैः प्रतिस्थानं विस्तरणशीलैर्यशसां कीर्तीनां विलासैर्वैचि- त्रीभिरस्य हीरकुमारस्य महत्सु उत्तमजनेषु रेखा भविष्यति। एतस्मात्परः कोऽप्येता- दृग्गुणगणकलितस्त्रिभुवनेऽपि नास्तीति प्रसिद्धिर्भाविनी ॥

भावी यदेष वृषवज्जिनधर्मधुर्य
　　स्कन्धोऽप्यभूत्किमिति तत्ककुदोपमेयः।
अर्भः पुरा भवति येन युगप्रधानो
　　जज्ञेऽस्य बाहुरपि तेन युगप्रधानः ॥ १०४ ॥

स्वस्पर्धिनः शरभवप्रमुखानशेषा-
न्कान्त्या विजित्य विजयीव निजप्रतीपान् ।
स व्यानशे विसृमरैः स्वयशोभिराशा-
देशान्मिलत्परिमलैरिव पुष्पकालः ॥ १२० ॥

स हीरकुमारः विसृमरैः प्रसरणशीलैः स्वस्यात्मनो यशोभिः कीर्तिभिः आशादेशान् दिग्विभागान् व्यानशे व्याप्नोति स्म । क इव । पुष्पकाल इव । यथा वसन्तर्तुः मिलद्भिः परस्परं सङ्गं कुर्वद्भिः परिमलैः विकसितविविधविशेषजातितरुलतोल्लसत्कुसुमसंभवैः रामोदैर्दिशां प्रदेशान् व्यश्नुते । किं कृत्वा । शरभवप्रमुखान् प्रतीपान् विजित्य पराजित्य । किंभूतान् । स्वेनात्मना सह श्रिया स्पर्धनशीलान् । क इव । विजयीव यथा जैत्रः । सर्वत्रापि जयवान् राजा समस्तान् प्रतिपक्षान् परिभूय विस्तरन् स्वयशोभिः सर्वाशा व्याप्नोति ॥

भूषाशनिस्फुरितशक्रधनुः समुद्य-
द्धाराङ्कितश्च जलमुक्छ्रितजैनपादः ।
युक्तं यदा स सघनः कमलोदयेन
चित्रं तदेव सुदिनेन यदत्र जज्ञे ॥ १२१ ॥

कमलोदयेन लक्ष्म्या अभ्युद्गमेन प्रादुर्भावेन घनो दृढ आस बभूव । अथ च कमलानां पानीयानामागमेन मेघो भवति । किंभूतः स मेघश्च । भूषाणामाभरणानामशनिभ्यो वज्ररत्नेभ्यः स्फुरितानि प्रकटीभूतानि शक्रधनूंषि इन्द्रचापचक्राणि यत्र । 'धृता विभूषा मणिरत्नकार्मुके' इति नैषधे । तथा 'एतान्युल्लसन्मणिमयूखमञ्जरीरचितेन्द्रचापचक्राण्याभरणानि' इति चम्पूकथायाम् । भूषाशब्दो भूषणवाची । 'न भूषणैरैषाधिचकास्ति किं तु सा' इति नैषधे । भूषणैः कृत्वा एषा अधिका न चकास्तीति तद्वृत्तिः । तथा समुद्यता दीप्यमानेन हारेण मुक्ताकलापेन अङ्कित कलितः । भूषायाः शोभायाः कारिणी अशनिर्विद्युद्यत्र । तथा प्रकटीभूतमिन्द्रधनुर्यत्र । तथा समुद्यन्त्यो निष्पतन्त्यो धारा जलवृष्टयस्ताभिरङ्कितः । पुनः किंभूतः । डलयोरैक्यात् जडानज्ञान् अज्ञानभाजो वा मुञ्चन् दूरं त्यजन् । घनस्तु जलानि पानीयानि वर्षन् । पुनः किंभूतः । श्रित आश्रितः जिनस्यार्हतो विष्णोश्च अयं जैनः पादश्चरणः तीर्थकृत्पादौ विष्णुपदं च येन एतद्युक्तमुक्तम् । परं तदेव चित्रमाश्चर्यमासीत् । यदत्र कुमारे सुदिनेन शासनदिवसेन जातं जज्ञे । घने मेघे तु दुर्दिनेन जायते ॥ इति कुमारगुणलक्षणभूषणादिवर्णनम् ॥

क्रीडञ्जयन्त इव यज्ञभुजां कुमारैः
पौराङ्गजैः सह वयोविभवानुरूपैः ।

ऽस्मिन् ते परिपूर्णे स्नावकेन पूरिते स्याम बाहुमूलं भुजकोटरः स एवालवालं स्था-
नं तत्र विलसन्ती शोभमाना । 'लस श्लेषणक्रीडनयोः' इति धातुः । अधोत् प्रकटीभवन्
यो भुजो बाहुः स एव शाखी. प्रकाण्डः मूलात् शाखावधिप्रदेशः तं भजतीति । कि-
भूता शाखा. । कामाङ्कुरैः शोभमाना । उत्प्रेक्ष्यते—किसलयैः पल्लवैरिव । अत्र
शाखिनोत्प्रेक्षा ॥

जानुस्पृशौ शिशुभुजौ विनियन्त्रणाय
पाशाविवाब्धिदुहितुस्तरलाशयायाः ।
हस्तौ समस्तकजराजतयाप्यमुष्या-
धात्राक्षतैरिव यवैः समपूजिपाताम् ॥ १०७ ॥

शिशुभुजौ कुमारबाहू जानू ऊरुपर्वणि स्पृशत इति जानुप्रलम्बौ अभूताम् । उत्प्रे-
क्ष्यते—तरलश्चपल आशयश्चित्त स्वभावो वा यस्यास्तादृश्या अब्धिदुहितुर्लक्ष्म्या विनि-
यन्त्रणाय विशेषेण बन्धनाय एकत्रावस्थितिनिर्मापणाय पाशौ बन्धनग्रन्थी इव । अपि
पुन । अमुष्य कुमारस्य करौ हस्तौ धात्रा ब्रह्मणा अक्षतैरखण्डैर्यवैः समपूजिपाताम्
अर्चिताविव । समस्तानि सकलानि यानि कजानि कमलानि तेषां राजत्वेन स्वामितया
आढ्यता तत्रेव्यत्वेन आधिपत्यम् ॥

वक्षःशिलाकलितमञ्जुलजातरूपो
नक्षत्रभूषिततनुश्च नभोगयुक्त. ।
स्वःशाखिरुग्महिमधीरिमराजमानः
शावः सुपर्वशिखरीव पुपोष भूषाम् ॥ १०८ ॥

शावः हीरकुमारः सुपर्वशिखरी मेरुरिव भूषां शोभां पुपोष । शुशुभे इत्यर्थः । किंभूतः
शाव. मेरुश्च । वक्षो हृदय तदेव विस्तीर्णत्वात्तदुपमेयत्वाच्च शिला पृथुलप्रस्तरः तया
कलित युत , तथा मञ्जुल मनोज्ञ जातमुत्पन्न रूप तनुवैभव सुवर्णं च यस्य पश्चात्कर्म-
धारय । पुन किंभूत. । न निषेधे क्षत्रियत्वेन राजन्यतया । 'क्षत्र तु क्षत्रियो राजा
राजन्यो बाहुसंभव.' इति हैम्याम् । तथा—'क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो
भुवनेषु रूढ ' इति रघौ । वणिग्जातित्वात् । नक्षत्रैर्ज्योतिश्चक्रैर्भूषिता अलंकृता तनुर्वे-
पुर्यस्य । पुन' किंभूत. । न नैव भोगेन वैषयिकसुखेन बालत्वाद्राज्यादिसुखेन वा व्यव-
हारित्वाद् युत । पक्षे—नभसि आकाशे गच्छन्तीति नभोगा विद्याधराः सुराश्च तै. क-
लितः तेषां क्रीडास्पदत्वात् । च पुन स्व शाखिन. कल्पवृक्षास्तद्वत्तेषां वा रुक् कान्ति-
र्यस्य यत्र वा । पुन. किंभूतः । महिम्ना माहात्म्येनाग्रे भविष्यता । भाविनि भूतोपचारात् ।
धीरिम्णा स्वाभाविकेन धैर्येण अग्रेऽपि उदेष्यता धीरत्वेन देवदानवमानवप्रभृतिबिभीषि-
कायामपि निश्चलत्वात् शोभमान ॥

अथानन्तरं कदापि कस्मिन्नपि समये असौ वर्ण्यमानः महेभ्यस्य कुंराव्यवहारिणः कलभः कुमारः। इभाद्गजाद्भव इभ्यः कलभः यथा कुले भवः कुल्यस्तथायमपीति। विमलां नाम्नीं निजभगिनीं मिलितुमुत्कण्ठित उत्सुको जज्ञे जातः। किंवत्। जयवत्। यथा जयो वासवसूनुः जयन्तीं स्वजामिं शक्रपुत्रीं मिलितुमुत्कण्ठावान् भवति। किं कृत्वा। निरस्य चिरकालेन शोक प्रेमवन्धाज्जात परिताप निरस्य त्यक्त्वा। शोकहेतुमाह— किं कृत्वा। कृत्वा विधाय। किम्। और्ध्वदेहिकं परलोकगमनदिवसे दानजलाञ्जलिप्रमुखम्। कयोः। पित्रोः स्वजननीजनकयोः। कथम्। सह। कैः। वंश्यैर्गोत्रिभिः। किंभूतैः। निजैरात्मीयैः। केन। विधिना यथोक्तलोकप्रकारेण। असौ किंभूतः। विधिमाचारं जानातीति विधिज्ञः। पित्रोः किं कुर्वतोः। समाधिं धर्मध्यानं भजतोः सेवमानयोः। पुनः किंभूतयोः। गतवतोः प्राप्तवतोः। कम्। दृग्गोचरं नयनविषयम्। कासाम्। त्रिदशानां देवानां पद्मदृशां स्त्रीणां देवाङ्गनानाम्। स्वर्गतयोरित्यर्थः। केन क्रमेण। आयुःपर्यन्तसमयपरिपाट्या। उत्प्रेक्ष्यते—सुरसद्मनि देवलोके विलसितुं क्रीडितुं सोत्कण्ठयोः सह उत्कण्ठया वर्तेते यौ तौ तादृशयोरिव। औत्सुक्ययुक्तयोरित्यर्थः। किं कृत्वा। अवनीवलये भूमण्डले विलासं भोगोपभोगादिक्रीडां निर्माय। कथम्। यथेच्छं स्वाभिलापपूरणपर्यन्तम्। कुमारावस्थायामपि तस्य शौण्डीर्यातिशयं दर्शयितुं कलभशब्दग्रहणम्। कलभस्त्रिंशदब्दकः॥

गन्तुं ततः स्पृहयता प्रति पत्तनं स्व-
भृत्येन तेन सतुरङ्गयुगः शताङ्गः।
आनाय्यते स्म नमुचेर्दमनेन जम्बू-
द्वीपं विमानमिव पालकनिर्जरेण॥ १२६॥

ततो भगिनीमिलनोत्कण्ठानन्तरं तेन हीरकुमारेण कर्त्रा स्वभृत्येन निजसेवकेन कृत्वा शताङ्गो रथ आनाय्यते स्म आनायितः। किंभूतः शताङ्गः। सह तुरङ्गयोरश्वयोर्युगेन युगलेन वर्तते यः सः। तेन किं कुर्वता। पत्तनमणहिल्लनाम पुटभेदनं गन्तुं प्रयातुं स्पृहयता इच्छता। केनेव। नमुचेर्दमनेनेव। यथा नमुचिनामा दैत्यविशेषस्तस्य दमनेन पुरंदरेण जिनेन्द्राणां जन्मादिकल्याणकेषु महोत्सवकरणार्थी जम्बूद्वीपं प्रति गन्तुमिच्छता पालकनाम्ना निर्जरेण पालकाख्यं विमानमानाय्यते॥

तं पारियानिकमसावधिरुह्य भूमी-
मार्गे नभस्वदतिपातितथाश्ववाहम्।
हैमं शताङ्गमथ सारथिना सनाथं
पाथोजपाणिरिव नाकिपथे प्रतस्थे॥ १२७॥

अथ भगिनीमिलनोत्कण्ठया अनुसेवकरथानयनानन्तरम् असौ कुमारः भूमि-

यस्य ऊरू तस्मिन् तदागमनेन स्पर्धयोपगत स्तम्भान कुम्भ' भावी भविष्यति । यथा स्तम्भौ प्रासादभारभृतौ भवति, तथानयापि श्रीजिनशासनप्रासादभारभृतौ भविता । 'च-तस्तम्भाविति' इति जिनशतके उदाहृता स्तम्भप्रासादयम् ॥

स्पर्धोद्यमान्निजविवृद्धिकृतौ यदूरू
जङ्घे पुनः सरसिजन्मभुवा विभाव्य ।
तद्द्वन्द्वविग्रहनिषेधविधिप्रभूष्णु-
सीमाकरं विरचितं किमु जानुयुग्मम् ॥ ११२ ॥

स्पर्धाया परस्पर संघर्षस्य उद्यमाद्विधानान्निजनिजयोरात्मात्मनोर्विशेषेण वृद्धियु-क्तौ यतः स्मः इति निजविवृद्धिकृतौ यस्य कुमारस्य ऊरू पुनर्यस्य कुमारस्य जङ्घे विभाव्य ज्ञात्वा सरसिजभुवा विधिना । उत्प्रेक्ष्यते—तयोर्द्वन्द्वयोर्युगलयोर्विग्रहस्य मिथः कलहस्य निषेधविधौ निवारणप्रकारे प्रभूष्णु समर्थम् । अत एव सीमाया अवधेर्विभागस्य करं विधायकं जानुयुग्मं विरचितं कृतम् ॥

शुश्रूषयासनतयानिशमाप्रसादा-
ल्लब्ध्वा प्रसन्नमनसो वरमात्मयोनेः ।
विश्वाहङ्कारविजयप्रभविष्णुलक्ष्मि
सेराम्बुजन्म किमु यत्पदतामवाप ॥ ११३ ॥

स्मेराम्बुजन्म विकचकमलम् । उत्प्रेक्ष्यते—यत्पदता कुमारस्य चरणत्वम् । पादाव-तारमित्यर्थः । किमवाप लभते स्मेव । किंभूताम् । विश्वेषु जगत्सु ये अहङ्कारा जैत्रप्रति-मानाः स्वश्रीपरिस्पर्धिनः । 'सकीर्णशकरशशाङ्ककलाङ्ककारैः' इति नैषधे । तेषां विजये प्रभविष्णु समर्था लक्ष्मीर्यस्यास्ताम् । किं कृत्वा । वरं स्वाभिलषितवाञ्छं लब्ध्वा प्राप्य । कस्मात् । आत्मयोनेर्विधातुः । किंभूतात् । प्रसन्नं प्रसादोपेतं हृष्टं मनो हृदयं यस्य । कया । आप्रसादात् प्रसादं मर्यादीकृत्य अनिशं निरन्तरमासनतया वि-नम्रभावेन शुश्रूषया । 'सेवा भक्तिः परिचर्या प्रसादना । शुश्रूषाराधनोपास्ति वरिव-स्यापरिष्टयः ॥' इति हैम्याम् । आसन्नीभूय प्रसादसमयं यावन्निज सेवां विधाय ॥

यत्पादपङ्कजयुगाङ्गुलिभिः स्वकीय-
लक्ष्म्या पराभवपदं गमिता प्रवालाः ।
दुःखादिव द्रुमशिखाशिखरान्तरेषु
तित्यक्षवस्तनुलतां निजमुद्वबन्धुः ॥ ११४ ॥

प्रवालाः पल्लवा द्रुमाणां वृक्षाणां शिखास्तासां शिखराणि अग्राणि तेषामन्तरेषु म-ध्येषु । उत्प्रेक्ष्यते—निजमात्मानम् । 'श्रुत्वा निजं भीमजया निरस्तम्' इति नैषधे । निज-

कादम्बिनीव सलिलैः सुरशैलशृङ्गं
हर्षाश्रुभिः स्वसहजं स्नपयत्यमन्दम् ।
संबिभ्रतं कनककेतककान्तकायं
तं स्वागतादि भगिनी परिपृच्छति स्म ॥ १३० ॥

भगिनी विमला तं स्वसहजं निजभ्रातरं प्रति स्वागतादि सुखागमनकुशलप्रश्नालापप्रमुखं परिपृच्छति स्म प्रश्नयामास । तं किं कुर्वन्तम् । कनककेतकवत् काञ्चनकेतकच्छद इव कान्तं मनोज्ञं कायं गाङ्गेयगौराङ्गयष्टिं संबिभ्रतं धारयन्तम् । भगिनी किं कुर्वती । अमन्दं बहु यथा हर्षाश्रुभिः प्रमोदनिष्पतन्नयनबाष्पपानीयैः स्नपयन्तीव इति गर्भोत्प्रेक्षा । केव । कादम्बिनीव । यथा मेघमाला सलिलैर्निजजलैः सुरशैलस्य मेरोः शृङ्गं शिखरं स्नपयति । 'चामीकराद्रिशिरसीव नवाम्बुवाहम्' इति कल्याणमन्दिरस्तोत्रे मेरावपि मेघसद्भावः ॥

विज्ञातपूर्वजननीजनकप्रवृत्तेः
प्रेम्णा निगद्य कुशलादिकमात्मजामेः ।
विद्याभृतां कुमरवत्कलधौतकान्तं
वैताढ्यशृङ्गमयमासनमध्युवास ॥ १३१ ॥

अथ कुमारः आसनं विष्टरमध्युवास उपविशति स्म । किंभूतमासनम् । कलधौतेन रजतेन काञ्चनेन वा कान्तं मनोज्ञम् । तद्घटितमित्यर्थः । 'कलधौतं स्वर्णरूप्ययोः' इत्यनेकार्थः । किंवत् । विद्याभृतां विद्याधराणां कुमरवत् यथा खेचराणां कुमारो [illegible] वैताढ्यस्य भरतादिक्षेत्रोभयभागकारिणः पर्वतस्य शृङ्गं शिखरमधिवसति । किं कृत्वा । कुशलप्रमुखस्ववृत्तान्तमात्मनः स्वस्य जामेर्भगिन्याः प्रेम्णा स्नेहेन निगद्य कथयित्वा । किंभूताया भगिन्याः । विज्ञातपूर्वा पूर्वमेवावबुद्धा जननी माता जनकः पिता तयोः प्रवृत्तिः परलोकगमनवार्ता यया तस्याः ॥

अनेन गोष्ठीमनुतिष्ठतात्मजामेर्मनो व्याहृतिर्विदुषीभिः ।
अनन्यगामि क्रियते स्म चित्तं रसातिरेकं गमितस्य यद्वत् ॥ १३२ ॥

अनेन [illegible] आत्मजामेर्भगिन्याः मनो [illegible] अनन्यगामि न क्रियते [illegible] [illegible] अन्यत्र [illegible] यथा श्रवणेक्षणा [illegible] क्रियते स्म । [illegible] । व्याहृतिर्विदु[illegible] [illegible] गोष्ठीमनुतिष्ठता [illegible] [illegible] [illegible] क्रियते ॥

स्कन्धोपधेः ककुदढौकनकं विधाय
यस्माच्छिशोर्गतिरशिक्षि ककुद्मतेव ।
अभ्यस्यते गतिरिवास्य गतानुकार-
कामेन विन्ध्यविपिनेष्वपि हास्तिकेन ॥ ११७ ॥

यस्मात् हीरनाम्न शिशोः कुमारात्। उत्प्रेक्ष्यते—ककुद्मता वृषभेन गतिर्गमनमशिक्षि शिक्षितेव । किं कृत्वा । स्कन्धोपधेरसकपटात्ककुदस्य नैचिकशिरसः ढौकनकं प्राभृतं विधाय कृत्वा । अपि पुनर्गजव्रजेन विन्ध्यस्य जलवालकशैलस्य विपिनेषु काननेषु गह्वरेषु वा । उत्प्रेक्ष्यते—गतिर्मन्थरगमनविलासः अभ्यस्यते अभ्यासः इव क्रियते । शिक्ष्यते वा । किंभूतेन हास्तिकेन । अस्य कुमारस्य गतस्य विलासेन मन्थरत्वेन वा गमनस्य अनुकरणमनुकारः सदृशीभवनं तत्र कामोऽभिलाषो यस्य तेन ॥

लिप्ता द्रवैरिव विलीनहिरण्यराशेः
सकल्पितेव नवगन्धकलीदलैर्वा ।
किं रोचनाभिरथ वा रचिता सिताब्ज-
गर्भैरिवाथ घटितास्य तनुश्चकाशे ॥ ११८ ॥

अस्य कुमारस्य तनुः शरीरं चकाशे दिदीपे । उत्प्रेक्ष्यते—विलीनस्य खादिराङ्गाराग्निगालितस्य हिरण्यस्य राशेः कनकनिकरस्य द्रवैः रसैः लिप्यते स्मेति लिप्ता दिग्धेव । वा अथवा नवैः सद्यस्कैर्नवीनैर्गन्धकलीदलैश्चम्पककलिकापत्रैः । 'न षट्पदो गन्धफलीमजिघ्रन्' इति सूक्तेः । सकल्पितेव विरचितेव । अथवा पक्षान्तरे रोचनाभिर्गोरोचननामगोपित्तविशेषद्रव्यैः किमुत्प्रेक्ष्यते—रचिता निर्मितेव । अथ पुनः सिताब्जानां विकचकमलानां गर्भैरन्तर्वर्तिसारदलैर्घटिता कल्पितेव ॥ इति हीरकुमारसर्वाङ्गवर्णनम् ॥

तस्मिन्पदं प्रविदधे गुणधोरणीभिः
सर्वाभिरर्णव इवार्णववर्णिनीभिः ।
आलोक्यते स च कदाचन नैपदोषै-
र्दोपातनैरिव तमोभिरभीशुमाली ॥ ११९ ॥

तस्मिन् हीरकुमारे सर्वाभिः समस्ताभिरौदार्यधैर्यादिगुणधोरणीभिः पदं स्थानं प्रविदधे कृतम् । कस्मिन्निव । अर्णव इव । यथा सर्वाभिरर्णववर्णिनीभिः समुद्रपत्नीभिर्नदीभिः अर्णवे जलनिधौ पदं स्थानं प्रविधीयते । स पुनरेष कुमारः दोषरूपगुणः कदाचन कस्मिन्नपि समये न आलोक्यते स न दृष्टः । क इव । अभीशुमालीव यथा भास्वान् दोषापातनै रात्रिजातैस्तमोभिरन्धकारैर्नालोक्यते न प्रेक्ष्यते ॥

कालक्रमेण परिवर्तमसौ दिनानां
श्रीमत्कुमारमघवा गमयांबभूव ॥ १२२ ॥

असौ हीरनामा श्रीमत्सु धनाढ्येषु शोभावत्सु वा कुमारेषु अपरिगृहीतकलत्रेषु मघवा सर्वोत्कृष्टविभूत्याधिक्यादिन्द्रः कालक्रमेण समयपरिपाट्या दिनाना दिवसाना परिवर्तं क्षेपम् । अतिक्रमणमित्यर्थ । गमयांबभूव अतिवाहयति स्म । वासरानतिक्रामति स्मेत्यर्थ । किं कुर्वन् । क्रीडन् खेलन् नानाविधबाललीला कलयन् । कथम् । सह । कैः सह । पौराङ्गजैर्नागरिककुमारैः । किंभूतैः । वयो यादृक्ष हीरकुमारस्य वयः बाल्यशेषरूप तथा विभवो द्रव्य तयोरनुरूपैः कथंचित्सदृशै । क इव । जयन्त इव । यथा पुरंदरनन्दनो जयन्तः यज्ञभुजा देवाना कुमारै पुत्रैः समं क्रीडति ॥

तस्यानुजो गजगतेः शतकोटिपाणेः
श्रीपाल इत्यजनि विष्णुरिवाद्रिदस्योः ।
द्वे अग्रजे स भवतः पुनरस्य जामी
राणी परा च विमला कमलानुरूपे ॥ १२३ ॥

तस्य हीरकुमारस्य श्रीपाल इति नाम्ना अनुजो लघुभ्राता अजनि संजातः । तस्य किंभूतस्य । गजगते गजवन्मत्तगजराज इव गतिर्गमन यस्य । पुन किंभूतस्य । शत शतशः कोटय द्रव्याणा शतलक्षाः पाणौ हस्ते यस्य शतैर्मिता वा कनककोटयो हस्तप्राप्या यस्य तदधिपत्वात् । कस्येव । अद्रिदस्योरिव । यथा गजेनार्थादैरावणेन गमनं प्रस्थान यस्य तथा शतकोटिर्वज्रं पाणौ यस्य तादृशस्य अद्रिदस्योः पर्वतरिपोरिन्द्रस्य विष्णु कृष्णनामा लघुसहोदरो जज्ञे । किंभूत । श्रिय लक्ष्मी भर्तृत्वेन पालयतीति श्रीपालः । कुमारोऽप्याकृत्या वज्रपाणिः । पुन. कुमारस्य द्वे उभे जामी भगिन्यौ भवत स्म संजाते । किंभूते । अग्रजे ज्येष्ठे वृद्धे । द्वे के । एका 'राणी', च पुन परा अन्या विमला इति नाम्नी द्वे । किंभूते । कमलाया रूपश्रिया लक्ष्म्या अनुरूपे सदृशे ॥

कृत्वा विलासमवनीवलये यथेच्छं
सोत्कण्ठयोर्विलसितुं सुरसद्मनीव ।
पित्रोरथ त्रिदशपद्मदृशां क्रमेण
दृग्गोचरं गतवतोर्भजतोः समाधिम् ॥ १२४ ॥
कृत्वौर्ध्वदेहिकमसौ विधिना विधिज्ञो
वंश्यैर्निजैः सह चिरस्य निरस्य शोकम् ।
उत्कः कदापि मिलितुं विमलां स्वजामि
जज्ञे महेभ्यकलभो जयवज्जयन्तीम् ॥ १२५ ॥

मार्गे एनीपथे प्रनरथे पन्नति । किं कृत्वा । त प्राह सेवकेनानाहित पारियानिकम्-
भ्ररसमधिरुह्य अध्यास्य । किंभूत पारियानिकम् । नभस्वन्त वायुम् अर्थाद्वायुवेगम-
तिपतति अतिक्रामतीत्येवंशीलो वातादप्यधिको रयो वेगो ययोस्तादृशाभ्यामश्वाभ्यां
तुरगाभ्यां वाह्यम् वहनयोग्यम् । पुन. किंभूतम् । सारथिना सूतेन सनाथ सहितम् ।
पुन किंभूतम् । हैम स्वर्णमयम् । क इव । पाथोजपाणिरिव । यथा भास्वान् सुवर्णसं-
बन्धिन स्यन्दनमाश्रित्य नाकिपथे गगने प्रतिष्ठते । सूर्यरथस्यापि विशेषणानि वायुरंहो
विजयि वेगवाजि वहनीय काञ्चनमयमरुणसारथियुक्त च पाथोजे कोकनदे इवारुणौ
मृदुलौ च सुकुमारौ पाणी हस्तौ यस्येति कुमारस्यापि विशेषणम् ॥

कालं कियन्तमुदयान्तरितं तपस्या-

साम्राज्यसंग्रहविधौ प्रविलम्बमानः ।

सम्प्राप्य पत्तनमसौ मुदित' स्वजामे-

श्चौलुक्यवद्भवनभूमिमलञ्चकार ॥ १२८ ॥

असो हीरकुमार पत्तनमणहिल्लपुरं सम्प्राप्य आसाद्य मुदितो हृष्ट सन् स्वजामे'
स्वभगिन्या भवनभूमिं गृहभूमिमलञ्चकार भूषयति स्म । किंवत् । चौलुक्यवत् । यथा
कुमारपाल पत्तनमागत्य प्रमुदित. स्वभगिन्या गेहमलङ्कृतवान् । किं कुर्वाणः । प्रवि-
लम्बमानः प्रविलम्ब्य विदधान' कालक्षेप निर्मिमाण । क कर्मतापन्नम् । कियत्परिमा-
णमस्येति कियान् त कियन्त काल कियत्समय यावत् किंकालम् । उदय. सूरिपदल-
क्षणो महोदय अन्तरित अन्तर व्यवधान सजातमत्रेत्यन्तरित' । कस्मिन् । तपस्या
दीक्षा सैव साम्राज्य सकललोकैश्वर्य तस्य सग्रह उपादान तस्य विधौ प्रकारे । चौलु-
क्यस्यापि गुर्जरमण्डलराज्यसग्रहे ॥

तं जङ्गमं त्रिदशसालमिव स्वपुण्य-

प्राग्भारमङ्गिनमुतागतमात्मधाम्नि ।

दृष्ट्वा निवातसरसीजसगर्भया स्वं

बन्धुं निपीय विमला मुमुदे हृदन्तः ॥ १२९ ॥

त हीरकुमार स्वबन्धु निजसहोदर दृष्ट्या नयनेन निपीय सादरमवलोक्य विमला
विजयसिंहमहेभ्यमहिला हृदन्तर्मनोमध्ये मुमुदे अहर्ष प्रीता । किंभूतया दृष्ट्या । नि-
वात वातरहित यत्सरसीज पद्म तस्य सगर्भया सदृशया सहोदरया वा । 'निवातपद्म-
स्तिमितेन चक्षुषा' इति रघुवंशे । त किंभूतम् । आत्मधाम्नि स्वगृहे विमलामन्दिरे
समागतम् । उत्प्रेक्ष्यते—जङ्गम प्रचलन्त त्रिदशसाल कल्पवृक्षमिव । उत अथवा अ-
ङ्गिन मूर्तिमन्त स्वपुण्यस्य निजसुकृतस्य प्राग्भारमतिशयमिव ॥

तोऽपि पुत्रोऽपि यत् [illegible] न कदापि भजते स्म । पुनर्निर्गो [illegible] पद नरकमालम्बते आश्रयते मोचने इत्येवशीलोऽपि न [illegible] । [illegible] पमारित्वात् । अत्र च [illegible] मङ्गलनामा यत् [illegible] । 'आरो वक्रो लोहिताङ्गो मङ्गलोऽङ्गारक [illegible]' इति मङ्गलनामानि हैम्याम् । तथा च [illegible] भजते इत्येवंशीलोऽपि । [illegible] ॥

यत्पाणिपद्मः स पुनर्भवोऽपि दत्ते नतानामपुनर्भवं सः ।
शिष्यीकृता येन भवं विहाय शिवं श्रयन्ते च तदत्र चित्रम् ॥८॥

तत्प्रसिद्धमत्र जगति किं महदाश्चर्यं दृश्यते । तत्किम् । यत् यस्य गौतमस्वामिनः पाणिपद्मः करकमलः सह पुनर्भवेन [illegible] वर्तते यत्नादृशोऽपि सन् न विद्यते पुनरन्यावारं भवोऽवतारो यस्य स नतानां प्रणमज्जनानां दत्ते वितरति । तत्त्वतस्तु कामाङ्कुशकलितो मोक्षं ददाति । 'कामाङ्कुशो महाराजः करजो नखरो नखः । करशूको भुजाकण्टः पुनर्भवपुनर्नवौ ॥' इति हैम्याम् । तथा तत्रैव 'महानन्दोऽमृत सिद्धिः कैवल्यमपुनर्भव' इति च । पुनर्येन गौतमेन शिष्यीकृताः स्वविनेया विहिताः सन्तो नरा भवमीश्वरं विहाय त्यक्त्वा शिवं शंभुं श्रयन्ते भजन्ते भवः स एव शिवश्च । तत्त्वतस्तु भवं संसारं त्यक्त्वा शिवं मोक्षं यान्ति गौतमदीक्षितानां सर्वेषामपि केवलज्ञानोत्पादात् ॥

सूर्यस्य रश्मीनवलम्ब्य वज्रावलम्बरश्मीनिवयः शयाभ्याम् ।
नन्तुं जिनानार्षभिकृत्समूर्तीनष्टापदोर्वीधरमारुरोह ॥ ९ ॥

यो गौतमस्वामी स्वलब्ध्या योऽष्टापदमारोहति सोऽवश्यं तद्भवे एव सिद्धिगामीति देववाचं निशम्य प्रश्नानन्तरं भगवतापि तथैव प्रतिपादिते भगवदाज्ञादानपूर्वकमष्टापदनामानमुर्वीधरं कैलाशशैलमारुरोहाधिरूढवान् चढितः । किं कृत्वा । अवलम्ब्य आश्रित्य । काभ्याम् । शयाभ्यां स्वहस्ताभ्याम् । कान् । सूर्यस्य रश्मीन् किरणान् । लूता उर्णनाभः कोलिकस्तस्यास्याद्वदनाद्विनिर्गता जालतन्तवः तान् वा । 'तपःकृशाङ्गास्त शैलमारोढुं न वयं क्षमाः । चढिष्यति कथं प्रौढदेहोऽयं गजराजवत् ॥ पश्यत्सु तेषु मार्तण्डकरानालम्ब्य गौतम । गणभृन्निजलब्ध्यैवाष्टापदोर्ध्वं ययौ ध्रुवम् ॥' इति ऋषिमण्डलवृत्तौ । 'सूर्यस्यांशून् समाश्रित्य तेषामुत्पश्यतामपि । स गरुत्मानिवारोहत् गिरेः शिरः ॥' इति वृन्दारवृत्तौ । रविकिरणावलम्बनम् । तथा 'भयवं [illegible] जङ्घाचारणलद्धीपलूतापुडगमिनिस्साए उड्डुप्पयइ जाव ते पलायन्ति' इत्यावश्यकवृत्तिसहस्र्याम् । मलयगिरिवृत्तावप्ययमेव पाठः । लूतातन्त्ववलम्बनमिति पाठस्तु [illegible] शास्त्रानुसारि । अथ प्रस्तुते । उत्प्रेक्ष्यते—वज्रस्य वज्ररत्नविनिर्मितानित्यर्थं । [illegible] म्बार्थमालम्बनकृते रश्मीन् गुणान् रज्जूरिव । किमर्थमारुरोह—नन्तु नमस्कर्तुम् । कान् । जिनाश्चतुर्विंशतितीर्थकृत. । किंभूतान् । ऋषभस्यापत्यमार्षभिर्भरतचक्रवर्ती तेन

पदे पदे चतुरकौतुकानि निरीक्षमाणः क्षणदाकरानन: ।
निजैर्गुणैरिव रूपैर्ग हीरो जगाम वासं हृदये मनस्विनाम् ॥१३३॥

[illegible] नाम [illegible] हीरो [illegible] सौन्दर्यादिभिर्गुणैरिव [illegible] मनस्विनां चतु- [illegible] हृदये [illegible] जगाम । क इव । [illegible] । यथा [illegible] [illegible] हृदये वसति । 'हृदयं मनो वक्षश्च' इत्य- [illegible] । [illegible] हृदये [illegible] इति [illegible] । कार्यं पर- [illegible] हृदये [illegible] हरिणो हृदये वसति [illegible] मर्मप्रविष्ट- [illegible] । [illegible] । [illegible] हीरः । क्षणदाकरश्चन्द्रस्तद्वदानन [illegible] सम्पूर्णचन्द्रवदन । किं कुर्वाण । पदे पदे स्थाने स्थाने चतुरलोकहित- [illegible] निरीक्षमाण विलोकमान ॥

हरिरिव गिरिकुञ्जे मानसे मानसौका
इव करकमले वा श्रीपतेः पाञ्चजन्यः ।
मुररिपुरिव वार्धौ स स्वसुर्धाम्नि तिष्ठ-
न्कमपि कलयति स्म श्रीभरं शावसिंहः ॥ १३४ ॥

स हीरनामा शावेषु कुमारेषु शौर्यकरत्वात् सिंह इव सिंहः पञ्चाननः श्रीभर शोभाति- शय कलयति स्म दधार । किं कुर्वन् । स्वसुर्ज्येष्ठभगिन्या विमलानाम्न्या धाम्नि मन्दिरे तिष्ठन् वसन् स्थितिं कुर्वन् । क इव । हरिरिव । यथा केसरी गिरेः पर्वतस्य कुञ्जे गह्वरे वने वा निवसति । पुनः क इव । मानसौका इव । यथा राजहंसो मानसनामनि सरसि स्थितिं विधत्ते । वा पुनः क इव । पाञ्चजन्य इव । यथा देवतादत्तो हरिणैव वादन- योग्य पाञ्चजन्यनामा शङ्खः श्रीपतेर्नारायणस्य करकमले पाणिपद्मे तिष्ठति । अत्र इव- शब्दो लालपण्डवदुभयत्र योज्यः । पुनः क इव । मुररिपुरिव । यथा नारायणो वार्धौ अर्थात् क्षीरसमुद्रे वसतिं विधत्ते ॥

यं प्रासूत शिवाह्वसाधुमघवा सौभाग्यदेवी पुनः
श्रीमत्कोविदसिंहसीहविमलान्तेवासिनामग्रिमम् ।
तद्ब्राह्मीक्रमसेविदेवविमलव्यावर्णिते हीरयु-
क्सौभाग्याभिधहीरसूरिचरिते सर्गस्तृतीयोऽभवत् ॥ १३५ ॥

य प्रासूतेति । देवविमलगणिविरचिते हीरसौभाग्यनाम्नि महाकाव्ये हीरविजयसू- रीश्वरचरित्रे तृतीयः सर्गः ॥

इति पण्डितदेवविमलगणिविरचितायां स्वोपज्ञहीरसौभाग्यनामकाव्यवृत्तौ गर्भधारण- दोहदगर्भसमयलक्षणाविर्भावनजन्मजन्मपत्रिकाजन्ममहोत्सवबालक्रीडापठनसर्वाङ्गलक्षण- मातृपितृपरलोकगमनपत्तनस्वभगिनीगृहागमनवर्णनो नाम तृतीयः सर्गः ॥

वधूरद्वैतप्रागल्भ्यभाजा येन जम्बूप्रभुणा नाङ्गीकृता स्वादरा निर्मिता । त्वया सह सङ्ग विधाय एतस्यामवसर्पिण्यां नान्य भारतभव जनमभिलषामीति वाग्बन्धनगानपर्वमाम-सात्कृता ॥ इति जम्बूस्वामी ॥

अलंचकार प्रभवप्रभुस्तत्पट्टश्रियं पुण्ड्र इवेन्दुवक्राम ।

स्तेनापि सार्थेश इवाङ्गिनो य श्रेय श्रियं प्रापयदत्र चित्रम् ॥ १९ ॥

प्रभवनामा प्रभु स्वामी तस्य जम्बूस्वामिन पट्टश्रिय पट्टलक्ष्मीमलचकार भूषयति स्म । क इव । पुण्ड्र इव । यथा चित्रक तिलकम इन्दुवक्रा चन्द्रमुखी वशामलकरोति । यः प्रभवप्रभु. स्तेनापि तस्करीभूयापि सार्थेश सार्थपतिरिवाङ्गिनो जनान् श्रेय श्रिय कुशलकलिता कमला मोक्षलक्ष्मीं च प्रापयन् लम्भयति स्म । तल्लक्ष्मीप्रदानमत्र(प्र)भवप्रभौ चित्रमाश्चर्यकारकमस्ति । 'श्रेय पुरीम्' इति पाठे मुक्तिनगरीं नयति स्म ॥

किं वर्ण्यते वर्ण्यगुणस्य चौर्यचातुर्यमस्य प्रभवस्य भर्तुः ।

अहार्यमप्येष मनोऽभिधानमपाहरद्यस्त्रिदिवेन्दिरायाः[1] ॥ २० ॥

अस्य जम्बूपट्टधरस्य प्रभवस्य प्रभवनाम्नो भर्तु स्वामिनो गणधरस्य चौर्यस्य वा चातुर्य कौशल्य तस्करताप्रागल्भ्य कि कया रीत्या विस्मयकृत्तया कथ वा वर्ण्यते प्रशस्यते स्तूयते वा । अस्य किंभूतस्य । वर्ण्या जगज्जनैर्लोकोत्तरतया श्लाघनीया गुणा शमदमसंयमरूपा यस्य । यत्कारणादेष प्रभवप्रभुः त्रिदिवेन्दिरायाः स्वर्गलक्ष्म्या अहार्य देवताश्रयत्वान्न केनापि हर्तु शक्यमपि मनोभिधानं निधिमपाहरज्जहार । मुक्तिगमनाभावात् स्वर्लोकमेवालंकृतवानित्यर्थ ॥ इति प्रभवस्वामी ॥

शय्यंभवोऽभूषयदस्य पट्टं सिंहासनं पित्र्यमिवावनीन्द्रः ।

कलिन्दिका मौक्तिकमालिकेव यत्कण्ठपीठे विलुठत्यकुण्ठा ॥ २१ ॥

शय्यंभवनामा भट्ट अस्य प्रभवस्वामिन. पट्टम् अभूषयत् पदमलकरोति स्म । क इव । अवनीन्द्र इव । यथा नवाभिषिक्तभूपति पितुरिद पित्र्य पितुः सबन्धि सिंहासन केसरिणोपलक्षितमासन सिंहासन भूषयति । यस्य शय्यभवगणधरस्य कण्ठपीठे मुख एव कलिन्दिकाः सर्वविद्याः चतुर्दशापि पूर्वाणि वा लुठति तिष्ठति । समायातीत्यर्थ । किंभूता कलिन्दिका । अकुण्ठा स्फुरद्रूपा । केव । मौक्तिकमालिकेव । यथा मुक्ताहारलता कस्यापि भाग्यवत. पुंसो गलकन्दले लुठति । किंभूता । अकुण्ठा दीप्यमाना । आमलकप्रमाणमुक्ता ॥

यूपादधस्त प्रतिमां जिनेन्दोर्वाचा स वाचंयमपुङ्गवस्य ।

दृक्संज्ञयेव स्वगुरोः किरीटी नाराचगङ्गां प्रकटीचकार ॥ २२ ॥

य शय्यभवभट्ट वाचयमपुङ्गवस्य प्रभवप्रभोर्वाचा गिरा यूपात्स्वप्रारब्धयज्ञस्तम्भात्

1. 'त्रिदिवाङ्गनाया' इति मूलपाठः.

सिद्धार्थभूकान्तसुतो जिनानामपश्चिमोऽजायत पश्चिमोऽपि ।
शशी व्यभात्पङ्किलपङ्कजास्यकादम्बवद्यस्य यशःसुधाब्धौ ॥ ४ ॥

सिद्धार्थनामा भूकान्तः पृथ्वीपतिः तस्य सुतो नन्दनः महावीरदेवः सः अजायत जज्ञे । किंभूतः । पश्चिमोऽपि सन् जिनानां सामान्यकेवलिनां मध्ये अपश्चिम आद्यः । तत्तीर्थे प्रथम वीरस्यैव केवलज्ञानोत्पन्नत्वेन । 'अपश्चिमो विपश्चिताम्' इति चम्पूकथायाम् । स कः । यस्य यशःसुधाब्धौ कीर्तिरेव सुधाब्धिः क्षीरसमुद्रस्तस्मिन् शशी चन्द्रः । पङ्किल कर्दमाकलित पङ्कज कमलमास्ये मुखे यस्यैवंविधकादम्बवत् राजहंस इव व्यभात भाति स्म ॥

बाल्येऽपि हेमाद्रिरकम्पि येन प्रभञ्जनेनेव निकेतकेतुः ।
श्रीद्वादशाङ्गी च यतः प्रवृत्ता गुरोर्गिरीणामिव जह्नुकन्या ॥ ५ ॥

येन महावीरेण बाल्ये शैशवेऽपि जातमात्रावस्थायामपि जन्माभिषेकसमये हेमाद्रिर्मेरुरकम्पि कम्पितः । णिजन्तोऽयं प्रयोगः । केनेव । प्रभञ्जनेनेव । यथा वायुना निकेतकेतुः । 'निकेत परितो भ्रमन्' इति पाण्डवचरित्रे । गृहोपरिध्वजः कम्प्यते । च पुनर्यतो महावीरात् द्वादशाङ्गी गणिपिटकं प्रवृत्ता प्रावर्तत । कस्मादिव । गुरोरिव यथा गिरीणां गुरोर्हिमाचलात् जह्नुकन्या गङ्गा प्रवर्तते स्म ॥ इति महावीरः ॥

एकादशासन्गणधारिधुर्याः श्रीइन्द्रभूतिप्रमुखा अमुष्य ।
आर्योपयामे पुनरात्तमूर्तिः रुद्राः स्मरं हन्तुमिवेहमानाः ॥ ६ ॥

अमुष्य महावीरदेवस्य श्रिया शोभया लब्धिलक्ष्म्या वा मुख्या इन्द्रभूतिर्गौतमनामा प्रमुख आद्यो येषां तादृशा एकादशसंख्याका इन्द्रभूति-अग्निभूति-वायुभूति-व्यक्त-सुधर्मस्वामि मण्डित-मौर्यपुत्र अकम्पित अचलभ्राता मेतार्य प्रभासाभिधाना गणधारिणो गच्छं बिभ्रतीति गणधारिणस्तेषां मध्ये धुर्या धुरंधराः आसन् जज्ञिरे । उत्प्रेक्ष्यते— पुनर्द्वितीयवारं स्मरं मदनं निहन्तुं जीविताद्व्यपरोपयितुमीहमाना वाञ्छन्तः । एकादशसंख्याका रुद्रा इव प्रकटीभूता इत्यर्थः । किंभूत स्मरम् । पूर्वशरीरापेक्षया दारान्तरमपरवारमार्याया पार्वत्या उपयामे पाणिग्रहणसमये आत्ता स्मरोपरि अङ्गीभवनविज्ञप्तिकारि सुरानुसृत प्रसन्नीभूतभूतपतिवरात् लब्धा मूर्तिः शरीरं येन तम् ॥

बभूव मुख्यो वसुभूतिसूनुस्तेषां गणीनामिह गौतमाह्वः ।
यो वक्रभावं न बभार पृथ्वीसुतोऽपि नो विष्णुपदावलम्बी ॥ ७ ॥

इह जगति महावीरशिष्येषु वा तेषामेकादशानां गणीनां गणधारिणां मध्ये वसुभूतिनाम्नो ब्राह्मणस्य सूनुः पुत्रो [illegible] इत्यर्थः । [illegible] गुरौ [illegible] मुख्यः प्रथमः [illegible] पूर्वं दीक्षितत्वात् [illegible] बभूव । किंभूतो वसुभूतिसूनुः । गौतम इत्याह्वा नाम यस्य सः । यो गौतम इन्द्रभूति ब्राह्मणः [illegible] गु-

पर्येनय. । स्वल्पप्रमाणोऽयम् । अभूत् बभूवेव । किं कुर्वाणः पश्यमानः । अतुल्यतो न जानन् । अत्यल्पमिलनं । क कर्मेतारम्भ । तन्तुलीनमतान् धीवरकुलम । किंभू- तम् । स्वसान्मन गत्वा पर्वत तत्र गायित्वान् अभिनवत्वेन त्रिगो । कला म- लाम । एतस्य यशोभद्रसूरे यश. प्रसारकीर्तिनिकर. स एव दर्शनं ददुग्धवार्धिवन्ध नीरपूराणि यत्र प्रवाहानं पतन्ति सर्वत्रापि संपूरितायां निरंकुशायां यत्रोद्धृतायां त्रिलोक्यां सलाम ॥ इति यशोभद्रसूरिः ॥

संभृतिपूर्वो विजयो गुरुस्तत्पट्टं श्रिया पल्लवयांचकार ।
कदम्बजम्बूकुटजावनीजकुञ्जं नभोम्भोद इवाम्बुवृष्ट्या ॥ २६ ॥

संभूतिरिति शब्दः पूर्वे यस्य तादृशो विजयः एतावता संभूतिविजयनामा गुरुः सूरिस्तस्य यशोभद्रसूरेः पट्टं श्रिया स्वशोभया पल्लवयांचकार अलंकारयति स्म । क इव । नभोम्भोद इव । यथा श्रावणमेघः अम्बुवृष्ट्या जलवर्षणेन कृत्वा कदम्बा धारा- कदम्बा नीपाः, जम्बूः श्यामफलाः, कुटजा गिरिमल्लिका 'कुडउ' इति प्रसिद्धाः, त एवावनीजा वृक्षाः तेषां कुञ्जं काननं पल्लवयति किसलयकलितं कुरुते । पूर्वोक्ताश्चयो- ऽपि तरवः प्रावृष्येव पुष्प्यन्ति ॥

संहर्षरोषात्स्वजिघांसुमेतत्प्रतापमार्तण्डमवेक्ष्य साक्षात् ।
युयुत्सया हैहयवत्सहस्रं सहस्रभासेव करा ध्रियन्ते ॥ २७ ॥

सहस्रभासा सूर्येण सहस्रं दशशती करा हस्ताः किरणाश्च ध्रियन्ते धार्यन्ते । उत्प्रे- क्ष्यते—युयुत्सया योद्धुमिच्छयेव । किंवत् हैहयवत् । यथा कार्तवीर्यनृपो युयुत्सया स- हस्रसंख्यान् करान् पाणीन् धत्ते । 'यत्रानतिर्विष्टसहस्रबाहुर्बभूव योगी किल कार्तवीर्यः' इति रघुवंशे । तथा 'बाहुसहस्रार्जुनः पिशुनः' इति सूक्ते च । हैहयस्तु कार्तवीर्यः दोःस- हस्रभृदर्जुन' इति हैम्याम् । किं कृत्वा । एतस्य संभूतिविजयस्य प्रताप एव चण्डत्वा- न्मार्तण्डो भानुस्तं साक्षात्प्रत्यक्षमवेक्ष्य विलोक्य । किंभूतम् । संहर्षेण स्पर्धया कृत्वा यो रोषः क्रोधस्तस्मात्स्वमात्मानं जिघांसुं हन्तुं वाञ्छन्तम् ॥ इति संभूतिविजयः ॥

स तत्सतीर्थ्योऽजनि भद्रबाहुः सूरिः समग्रागमपारदृश्वा ।
दशाश्रुतस्कन्धत उद्दधार वज्राकराद्रत्नमिवात्र कल्पम् ॥ २८ ॥

स प्रसिद्धो बाहुभद्रनामा सूरिस्तस्य संभूतिविजयस्य सतीर्थ्यः एकगुरुभ्राता । 'सती- र्थ्यास्त्वेकगुरवः' इति हैम्याम् । किंभूतः । समग्राणां सर्वेषामङ्गोपाङ्गपूर्वादीनामाग- मानां पारं दृष्टवान् इति पारदृश्वा पारगामी चतुर्दशपूर्वधरत्वात् । स कः । यो भगवान् अत्र पञ्चमारके कलियुगे वा दशाश्रुतस्कन्धतः प्रत्याख्यानाभिधनवमपूर्वदशाश्रुतस्क- न्धाध्ययनतः कल्पनाम सूत्रमुद्दधार उद्धृतवान् । कमिव । वज्रमिव । यथा क- श्चिद्भाग्यवान् वज्राणां हीरकाणामाकरात् खनेर्वज्रं रत्नमुख्यमुद्धरति ॥

कृता निर्मिता मूर्तेन प्रतिमा येषाम् । स्वस्ववर्णप्रमाणोपेतचतुर्विंशतिजिनबिम्बानामि-त्यर्थः ॥

कथं लभेतास्य तुलां सुरद्रुर्यथस्य नामापि पिपर्ति कामान् ।
तपस्विनोऽप्यभ्यवहारयन्यो द्विधामृतास्वादजुषः पुपोष ॥ १० ॥

अस्य गौतमस्वामिनः तुलां साम्यं सुरद्रुः कल्पवृक्षः कथं केन प्रकारेण लभेत । यस्मात्कारणात् यस्य गौतमस्य नामापि अभिधानमपि कामान् जनानां मनोरथान् पिपर्ति पूरयति । 'यन्नामाभिधानं मुनयोऽपि सर्वे गृह्णन्ति भिक्षाभ्रमणस्य काले । मिष्टान्नपानाम्बरपूर्णकामाः स गौतमो यच्छतु वाञ्छितं मे ॥' इति पूर्वाचार्यकृतस्तुतौ । तथा गृहमेधिनोऽपि व्यापारादिकार्ये कुर्वाणा गौतमस्वामिनो लब्धिरस्त्वित्युच्चरन्ति च । अथ कल्पवृक्षाभिधानग्रहणेन कोऽप्यर्थो न सरीसर्ति तस्मात्कल्पतरुपमानं न स्यादस्येति अपि पुनर्यस्तापसानभ्यवहारयन् पायसं भोजयन् सन् द्विधा द्वाभ्यां प्रकाराभ्यां कृत्वा अमृतस्य सुधाया मोक्षस्य वा स्वादं भोगं जुषन्ते सेवन्ते तादृशान् पुपोष । चकारेत्यर्थः । प्रथमममृतोपमं पायसमाकण्ठं भोजयित्वा ततः सिद्धिवधूविलासरसिकांश्च कृतवान्, एतदपि महदाश्चर्यमस्ति ॥ इति गौतमस्वामी ॥

आसीत्सुधर्मा गणभृत्सु तेषु श्रीवर्धमानप्रभुपट्टधुर्यः ।
विहाय विश्वे सुरभीतनूजं कः स्यात्परो धुर्यपदावलम्बी ॥ ११ ॥

तेषु गौतमादिषु गणभृत्सु गणधरेषु श्रीवर्धमानप्रभोः श्रीमहावीरस्वामिनः पट्टे पदे धुर्यः धुरंधरः सुधर्मानामा गणधर आसीत् । युक्तोऽयमर्थः । सुरभीतनूजं सुरभीशब्दो दीर्घईकारान्तोऽपि दृश्यते । यथा कल्पकिरणावल्याम्—'स्वप्ने मानवमृगपतितुरङ्गमातङ्गवृषभसुरभीभिः' इति । तथा पाण्डवचरित्रेऽपि—'दक्षिणस्या दिशः सर्वे नीयन्ते सुरभीगणाः' इत्युक्तेः । विहाय त्यक्त्वा परोऽन्यः को धुर्यपदावलम्बी धुर्यस्य धौरेयस्य पदं युगलक्षणं स्थानं तस्यावलम्ब आश्रयोऽस्त्यस्य ईदृशः कः स्यात् । अपि तु वृषभं विना न कोऽपि धुरीणः स्यात् ॥

यः पञ्चमोऽभूद्गणपुङ्गवानां किं पञ्चमीं स्वेन गतिं यियासुः ।
यत्रोक्तिभिस्तीर्थकृतां दिदीपे शुक्तिव्रजे वारिमुचामिवाद्भिः ॥ १२ ॥

यः सुधर्मनामा गणानां गच्छानां प्रधानानां मध्ये पञ्चानां संख्यापूरणः पञ्चमः अभूत् बभूव । उत्प्रेक्ष्यते—स्वेनात्मना पञ्चमीं मुक्तिलक्षणां गतिं यियासुः किमु गन्तुमिच्छुरिव । पञ्चमो जज्ञे । यत्र सुधर्मस्वामिनि तीर्थकृतां पूज्यत्वख्यापनार्थं बहुत्वम् । महावीरस्य । अथवा 'वीरविभो' इति पाठः । तत्र वीरो महावीरः । देशैकग्रहणेन देशिनो ग्रहणम् । भीमो भीमसेनः, भामा सत्यभामा, इत्यादिवत्तथा वीरपदोपादानेन महावीरग्रहणं स चासौ विभुः स्वामी जगदीश्वरस्तस्य उक्तिभिर्वाग्वैराग्यभरासोक्तित्वात्तेषां दिदीपे । कस्मिन्निव । शुक्तिव्रजे इव । यथा शुक्तिकानां निकरे वारिमुचां मेघानामद्भिः

यथा कृष्णो जलदसमये समुद्रं सेवते । किंभूत कोशागृहमम्बुराशिम् । प्रवाला विद्रुमा मुक्ता मौक्तिकानि मणयो रत्नानि तेषां मञ्जिमश्चारुतायाः शोभा यत्र । चित्रैश्चित्रितैरालेख्यीकृतैरप्सरोभिः सुराङ्गनाभिरथ वा रम्भातिलोत्तमाघृताचीमेनकाउर्वशीप्रमुखाभिः स्वर्वेश्याभिः तथा स्वः स्वर्गस्य द्विरदैरैरावणैरश्वैरुच्चैःश्रवोभिः ऐरावणस्य उच्चैःश्रवसश्च शतशो रूपनिर्माणादथ वा । द्विरदेन हस्तिमल्लेन अश्वेन उच्चैःश्रवसा सर्वेषामपि समुदाये बहुवचनं तैर्दृश्य दर्शनार्हम् । पक्षे—हेमकन्दलमुक्ताफलमाणिक्यानां मञ्जिमा चारुता यत्र तथा श्रीर्लक्ष्मीस्तथा चित्रा विविधा आश्चर्यकारका वा अप्सरसः श्वेतगजोच्चैःश्रवसौ तैर्विलोकयितुं योग्यं तेषां तत्रोत्पन्नत्वेन पश्चात्कर्मधारयः । पुनः किंभूतः । घना निबिडा छाया वड्री शोभा यत्र । तथा घना सान्द्रा घनानां मेघानां जलग्रहणागतानां छाया प्रतिच्छायिका सूर्यातपमुक्तप्रदेशः । 'छाहडी' इति लोके प्रसिद्धा यत्र । 'विभाषा सेनासुराछायाशालानिशानाम्' । एतदन्तस्तत्पुरुषो वा क्लीबं स्यात् । 'द्विजसेनं गरगुरं कुञ्जच्छायं गोवालश्वनिशं पक्षे द्विजसेना' इति प्रक्रियाकौमुद्याम् ॥

पण्याङ्गनायाः किलकिञ्चितानि न लेभिरे यस्य हृदि प्रवेशम् ।
धनुर्भृतः सानुमतः शिलायां पृषत्कपङ्क्तेः प्रहृतानि यद्वत् ॥ ३३ ॥

पण्याङ्गनायाः कोशावेश्यायाः किलकिञ्चितानि प्रमोदगदिततालीनादनगीतादिव्याभिभर्तृतर्जनकपोलात्मपाणिनिवेशनाश्रुपातघातहर्षभियादिमकराः । यस्य श्रीस्थूलभद्रस्य हृदि मानसे प्रवेशं स्थानं न लेभिरे न प्राप्नुवन्ति । यद्वद्यथा धनुर्भृतो धनुर्धरस्य पृषत्कानां बाणानां पङ्क्तेः श्रेण्याः प्रहृतानि प्रहाराः सानुमतः पर्वतस्य शिलायामुपलक्षणात् [illegible] प्रवेशं न लभन्ते ॥

प्राग्निर्जितश्रीरथनेमिमुख्यवीरावलीनामिव वैरशुद्धेः ।
[illegible]याध्यास्य तदाश्रयं यो ध्यानासिनानङ्गनृपं जघान ॥ ३४ ॥

[illegible] प्रणिधान [illegible] असिः [illegible] कृत्वा अनङ्गनामानं नृपं [illegible] हतवान् । [illegible] कृत्वा । अध्यास्य आश्रित्य । [illegible] । कथं । [illegible] स्थानं गृहं वा । '[illegible] आश्रय । [illegible]' इति हैम्याम । [illegible]

[illegible]

[illegible] ॥ ३५ ॥

[illegible]

[illegible] तैर्जिनानां सर्वोऽप्यशोभत्या [illegible] जिनेन्द्रो भगवा- [illegible] प्रतिबुद्धः [illegible] सर्वोऽपि [illegible] स्म । 'सिज्जंभव गणहरं जिणपडिमाद- [illegible]' [illegible] । [illegible] । [illegible] । किमीव । यथा [illegible] पितामहस्य [illegible] । 'मातापिता [illegible] एतेषां जातवन्धा । [illegible] ॥' [illegible] लोकोक्त्यापि [illegible] प्रतिबन्धात्कविर्मति पदोपादानम् । [illegible] प्रादुर्भूत [illegible] लक्षितदृष्टयः [illegible] प्रतिबुद्धांता । तां [illegible] प्रकटीकरोति स्म । अत्र व्यति- [illegible] ॥

दधार [illegible] मनकाह्वसूनोः कृते कृतश्रीदशकालिक यः ।
हरि [illegible] सुधामुद्धृतवान्तुपर्वसर्गस्य निर्मथ्य यथाम्बुनाथम् ॥ २३ ॥

[illegible] मनक इत्याख्या नाम यस्य तादृशस्य सूनोः स्वनन्दनस्य कृते [illegible] विचार्य [illegible] कृतमतो दशवै- कालिक नाम सूत्रमस्तु यथे । किं कृत्वा । दधार [अव]धारयित्वा । किम् । शास्त्र [illegible] चतुर्दशपूर्वलक्षणम् । क इव । हरिरिव । यथा नारायणः नुपर्वे- सर्गस्य देववृन्दस्य कृते सुधापीयूषमुद्धृतवान् । किं कृत्वा । अम्बुनाथं समुद्रं निर्मथ्य विलोड्य यथा दधार्थे । 'पूर्वापरौ तोयनिधी वगाह्य' इति कुमारसम्भवे । 'वष्टि भागुरिर- ल्लोपमवाप्योरुपसर्गयो.' इत्यकारलोप । 'यादःस्रोतोपार्नदीश' इति हैम्याम् । वार्धे- र्जलपतिरनुभयत्र पर्यायपरिवर्तन च ॥ इति शय्यम्भवसूरीणां ॥

सपूरयन्कीर्तिनभोनदीभिर्दिशो यशोभद्रगणाधिराजः ।
व्यभूषयत्पट्टममुष्य भूभृदधित्यकां दस्युरिव द्विपानाम् ॥ २४ ॥

यशोभद्रनामा गणाधिराजो गच्छपतिरमुष्य शय्यम्भवगणभृत पट्टं व्यभूषयत् । किं कुर्वन् । कीर्तय एव यशांसि ता एव नभोनद्यो गङ्गा । अर्थात् गङ्गाप्रवाहा । त्रैलोक्या त्रिस्रो(स्रो)तोभिः प्रवहमानत्वेन त्रिपथगा अतो बहुवचनम् । ताभिः कृत्वा दिशो द- शाप्याशा सपूरयन् । निर्भर भरन् व्याप्नुवन् व्यभूषयत । [illegible] स्युरिव । यथा द्विपानां हस्तिनां शत्रु केसरी भूभृतः शैलस्य अधित्यकामूर्ध्वभूभ [illegible] यति ॥

एतद्यशःक्षीरधिनीरपूरैः सपूरितायां परितस्त्रिलोक्याम् ।
अबुध्यमानोऽम्बुनिधिं स्वशय्यां पद्मेशयोऽभूदिव पद्मनाभः ॥ २५ ॥

पद्मं नाभौ यस्य स पद्मनाभः कृष्णः । उत्प्रेक्ष्यते—पद्मे कमले शेते [illegible]

१ 'शय्यंभव गणधरं जिनप्रतिमादर्शनेन प्रतिबुद्धम्' इति संस्कृतम्. २, '[illegible]' इति मूलपाठः. ३ प्रक्षिप्तम्, त्यवादेशापत्तेः

यो द्रमकजीवः संप्रतिनृपतीभूय उह स्वभुजवलगाधितत्रिगण्डभूमीमण्डले महावि- हारान् उत्तङ्गशृङ्गाग्रणोल्लिखितगगनतलान् प्रासादान्निर्मापयामास शिल्पिभिः कारयति स्म । किंभूतान् । सह पादेन एकेनांशेन पञ्चविंशतिसहस्रमितभागेन वर्तते यत्तादृग् लक्षं शतसहस्राणि येषु तान् । सपादलक्षप्रमितानित्यर्थः । उत्प्रेक्ष्यते । भर्तृतया स्वामि- त्वेन भूरेव सुभ्रूः भूमीभामिनी तस्याः शातकुम्भाना स्वर्णानामिमे शातकौम्भास्तान् । हिरण्मयानित्यर्थः । प्रगल्भान् मनोज्ञान् भूषार्थं शोभाकृते विशेषान् तिलकानिव । अथ वा अतिशयिनोऽलङ्कारानिव ॥

यः संप्रतिक्षोणिपतिः सपादकोटीर्नु पेटीः स्वयशोनिधीनाम् ।
स्याद्वादिनां सद्मसु शिल्पिसंघैरचीकरत्पारगतीयमूर्तीः ॥ ४० ॥

यः संप्रतिर्नाम क्षोणिपतिः राजा शिल्पिनां सूत्रधाराणां संघैः समूहैः । 'संघसार्थौ तु देहिनां वृन्दे' इति हैम्याम् । स्याद्वादिनामर्हतां सद्मसु गृहेषु स्वकारितप्रासादेषु अन्यत्रापि च पारगतानामिमाः पारगतीयाः मूर्तीः प्रतिमाः जिनेन्द्रबिम्बानि अचीक- रत् निर्मापयामासिवान् । किंभूताः । सह पादेनैकेन पञ्चविंशतिलक्षरूपेण अंशेन युक्ताः कोटीः शतलक्षी इति सङ्ख्या यासु ता इति व्युत्पत्त्या बहुत्वम् । अन्यथा तु एकत्वमेव स्यात् । नु इति वितर्के । स्वस्यात्मनो यशांस्येव निधयः निधनानि सार- द्रव्याणि तेषां पेटीर्मञ्जूषा इव ॥

नक्तं नलिन्यादिगुल्मनामविमानमार्गः प्रभुणा च येन ।
स्नेहप्रियेणेव महेभ्यसूनोरदर्श्यवन्तीसुकुमालनाम्नः ॥ ४१ ॥

च पुनर्येनार्यसुहस्तिनाम्ना प्रभुणा सूरिणा अवन्तीसुकुमाल इति नाम यस्य तादृशस्य महेभ्यसूनोर्व्यवहारिपुत्रस्य नक्तं निशायाः प्रथमे यामे नलिनीतिपदमादौ यस्य तादृशस्य गुल्मनाम्नः एतावता नलिनीगुल्माभिधानस्य विमानस्य मार्गः तपस्याग्रहणपूर्वकं कन्थेरिका- श्मशानकायोत्सर्गघोरपरीषहसहनलक्षणः पन्थाः दर्शितः प्रकाशितः । केनेव । स्नेहप्रि- येणेव । यथा प्रदीपेन नक्तं मार्गः प्रदर्श्यते प्रकाश्यते ॥

स्थाने स्ववप्तुस्त्रिदिवं गतस्य व्यधादवन्तीसुकुमालसूनुः ।
नाम्ना महाकाल इतीह पुण्यपानीयशालामिव सार्वशालाम् ॥ ४२ ॥

इहावन्तीपुरीपरिसरवर्तिकन्थेरिकावनश्मशाने अवन्तीसुकुमालस्य सूनुर्नन्दनः त्रिदिवं स्वर्गं गतस्य प्राप्तस्य स्ववप्तुः निजतातस्य स्थाने नवप्रसूतबुभुक्षितसर्वापत्य- युक्तविकरालशृगाली सर्वाङ्गभक्षणसमयानशनपूर्वकपरलोकगमनभूमिप्रदेशे महाकाल इति नाम सार्वशाला श्रीमदवन्तीपार्श्वनाथप्रसादं व्यधाच्चकार । अर्थात्सूत्रधारैरकारय- दित्यर्थः । उत्प्रेक्ष्यते। पुण्यमेव पानीयं तस्य शाला प्रपामिव । लोकेऽपि पुण्यार्थं पानी- यशाला प्रपा कार्यते ॥ इति आर्यमहागिरि-आर्यसुहस्तिगुरीन्द्रौ एकपट्टवर्णौ ॥

...स्य शय्यंभवभट्टस्य गणोपपन्नोऽसावकाले यज्ञस्तम्भादधो जिनेन्द्रो श्रीशा... प्रतिमा मूर्ति प्रकटीचकार दर्शयति स्म। 'सिज्जंभवं गणहरं जिणपडिमादं-सणेण पडिबुद्धम्' इति दशवैकालिके। अन्यस्तु प्रागादौ। क इव। किरीटीव। यथा ... गुरो पितामहस्य गुरुस्तथा। 'मातापिता कुलाचार्य एतेषां ज्ञातयस्तथा। ... धर्मोपदेशको गुरुस्तं सतां मतः॥' अथ वा गुरुणाऽस्य इति लोकोक्त्यापि ... परमासनेऽपि गुरुणा इति प्रसिद्धत्वाद्गुरुरिति पदोपादानम्। दक्संज्ञाया दृष्टिचे-... वा नारायणस्य वाणस्य मोचनसमय एव प्रादुर्भूतस्वच्छसुरभिस्वादुशीतलविशदपय.-प्रवाहस्य लोके वाणगङ्गेति प्रसिद्धिर्जाता। तां वाणगङ्गा प्रकटीकरोति स्म। अथ व्यति-परः पाण्डवचरित्रे॥

वगाह्य शास्त्रं मनकाह्वसूनोः कृते कृतश्रीदशकालिकं यः।
हरिः सुधामुद्धृतवान्सुपर्ववर्गस्य निर्मथ्य यथाम्बुनाथम्॥ २३॥ ✓

यः शय्यंभवगणधारी मनक इत्याह्वा नाम यस्य तादृशस्य सूनोः स्वनन्दनस्य कृते पार्थाय परलोकसाधनार्थं दशाध्ययनयुक्तं विकाले दिनावसानवेलाया कृतमतो दशवै-कालिकं नाम सूत्रमकृत चक्रे। किं कृत्वा। वगाह्य [अव]गाहयित्वा। किम्। शास्त्रं सर्वसिद्धान्तसाङ्गोपाङ्गचतुर्दशपूर्वलक्षणम्। क इव। हरिरिव। यथा नारायणः सुपर्व-वर्गस्य देववृन्दस्य कृते सुधापीयूषमुद्धृतवान्। किं कृत्वा। अम्बुनाथं समुद्रं निर्मथ्य विलोड्य यथा इत्यर्थः। 'पूर्वापरौ तोयनिधी वगाह्य' इति कुमारसंभवे। 'वष्टि भागुरिर-ल्लोपमवाप्योरुपसर्गयोः' इत्यकारलोपः। 'यादःस्रोतोवार्नदीशः' इति हैम्याम्। वार्धे-र्जलपतित्वमुभयत्र पर्यायपरिवर्तनं न॥ इति शय्यंभवस्वामी॥

संपूरयन्कीर्तिनभोनदीभिर्दिशो यशोभद्रगणाधिराजः।
व्यभूषयत्पट्टममुष्य भूभृदधित्यका दस्युरिव द्विपानाम्॥ २४॥ ✓

यशोभद्रनाम्ना गणाधिराजो गच्छपतिरमुष्य शय्यंभवगणभृतः पट्टं व्यभूषयत्। किं कुर्वन्। कीर्तयः स्वयशांसि ता एव नभोनद्यो गङ्गाः। अर्थात् गङ्गाप्रवाहाः। त्रैलोक्या त्रिस्रो(स्रो)तोभिः प्रवहमानत्वेन त्रिपथगा अतो बहुवचनम्। ताभिः कृत्वा दिशो द-शाप्याशाः संपूरयन्। निर्भरं भरन् व्याप्नुवन् व्यभूषयत्। क इव। दस्युरिव। यथा द्विपानां हस्तिनां शत्रुः केसरी भूभृतः शैलस्य अधित्यकामूर्ध्वभूमीं विभूषयति॥

एतद्यशःक्षीरधिनीरपूरैः सपूरिताया परितस्त्रिलोक्याम्।
अबुध्यमानोऽम्बुनिधिं स्वशय्यां पद्मेशयोऽभूदिव पद्मनाभः॥ २५॥

पद्मं नाभौ यस्य स पद्मनाभः कृष्णः। उत्प्रेक्ष्यते—पद्मे कमले शेते स्वपितीति

१. 'शय्यंभवं गणधरं जिनप्रतिमादर्शनेन प्रतिबुद्धम्' इति संस्कृतम्. २ 'समुद्रम्' इति मूलपाठः ३ प्रक्षिप्तम्, त्वयादेतापत्ते

पविन्यते । येन भानुना च किंभूतेन । भिन्नो निर्दलितस्तमसामज्ञानानां पाप्मनां वा ध्वान्तानां च भरः समूहो येन ॥ इति श्रीइन्द्रदिन्नसूरिः ॥

श्रीदिन्नसूरिर्गुणभूरिरस्मात्ससर्षिभूरङ्गिरसो यथासीत् ।
येनानुरागोऽवधि कालनेमिः कल्लोलिनीवल्लभशायिनेव ॥ ४७ ॥

अस्मात् श्रीइन्द्रदिन्नसूरेः श्रीदिन्नसूरिरासीत् । किंभूतः । गुणा भूरयो बहुला यस्मिन् । कस्मात्क इव । अङ्गिरसः सप्तर्षिभूरिव । यथा । अङ्गिरा नाम तापसविशेषस्तस्मात् बृहस्पतिर्जातः । 'बृहस्पतिः सुराचार्यो जीवश्चित्रशिखण्डिजः । सप्तर्षयश्चित्रशिखण्डिनः' इति हैम्याम् । तथा । 'गीर्बृहत्योः पतिरुतथ्यानुजाङ्गिरसौ गुरुः' इत्यपि हैम्याम् । येन दिन्नसूरिणा अनुरागो हतः । केनेव । कल्लोलिनीवल्लभशायिनेव । यथा नारायणेन कालनेमिर्नामा दैत्यो निहन्यते स्म ॥

पञ्चाशुगान्यः समितीर्विधाय बभञ्ज पञ्चाशुगपञ्चबाणीम् ।
शरेण केनापि न चेत्कदाचित्कस्मान्न तं स प्रभवेद्धनुष्मान् ॥ ४८ ॥

यो दिन्नसूरिः पञ्च ईर्या-भाषा-एषणा-आदाननिक्षेपणा-पारिष्ठापनिकाख्याः पञ्चसंख्याः समितीराचारविशेषान् पञ्च प्रमाणान् आशुगान् बाणान् विधाय पञ्चाशुगस्य कामस्य पञ्चानां बाणानां समाहारः पञ्चबाणी तां पञ्चापि सायकान् बभञ्ज भनक्ति स्म । 'चिच्छेद' इत्यपि पाठः । तत्र छिनत्ति स्मेत्यर्थः । एवं चेत्तर्हि स धनुष्मान् स्मरधनुर्धरः कदाचित् कस्मिन्नपि प्रस्तावे केनापि संमोहन-उन्माद-तापन-शोषण मारणाख्यानां पञ्चानां विशिखानां मध्ये केनचित् शरेण कृत्वा तं दिन्नसूरिं कस्मात्कारणात् न प्रभवेत् प्रहरेत् । 'आद्यौ समोहनोन्मादौ परौ तापनशोषणौ । तथा मारण इत्यु[illegible] [illegible] ॥' इति स्मरबाणनामानि सूक्तौ ॥ इति दिन्नसूरिः ॥

सूरीश्वरः सीहगिरिः क्रमेण व्यभासयत्तत्प्रभुपट्टलक्ष्मीम् ।
जिनस्य पादं शिरसा स्पृशन्तीं निकाय्यगर्जामिव केतुचारः ॥ ४९ ॥

क्रमेण [illegible] सीहगिरिर्नामा सूरीश्वरः स नामा प्रभुस्तत्प्रभुपट्ट[illegible] [illegible] [illegible] ॥

[illegible] ।
[illegible] ॥ ५० ॥

उपप्लवो मन्त्रमयोपसर्गहरस्तवेनावधि येन संधात् ।
जनुष्मतो जाङ्गुलिकेन जाग्रद्गरस्य वेगः किल जाङ्गुलीभिः ॥ २९ ॥

येन भगवता मन्त्रमयेन विषधरस्फुलिङ्गनाममन्त्रतद्विधमन्त्रयन्त्रप्रधानेन उपसर्गहर इति नाम्ना श्रीपार्श्वनाथस्य स्तवेन स्तोत्रेण कृत्वा संघात् साधुसाध्वीश्राद्धश्राद्धीलक्षणात् उपप्लवः मिथ्यात्विव्यन्तरीभूतभ्रातृवराहमिहिरनिर्मितमान्द्यमरकाभिधोपद्रवोऽवधितो निवारितः । अत्र किलेति इवार्थे । 'उत्प्रेक्षाद्योतका शद्बा मन्ये नूनमिव ध्रुवम् । जाने किलादयो ज्ञेया प्रायेणैव क्रियोद्भवा ॥' इति काव्यकल्पलतायाम् । केनेव । जाङ्गुलिकेन किल । यथा विषभिषजा जाङ्गुलीभिः समग्रभुजगविषापहारणीभिः विद्याभिः जनुष्मतो विषवेगघूर्णितजनात् जाग्रत्प्रत्यङ्गोपाङ्ग प्रसरतो गरस्य विषधरविषस्य वेग प्रसरो रुन्धते निराक्रियते । रुन्धेर्यथिराडेश. भूते निविषगे ॥

यत्कीर्तिगङ्गा प्रसृता त्रिलोक्यामालोक्य किं षण्मुखता दधानः ।
जगद्भ्रमीभिर्जननीं दिदृक्षुर्गङ्गासुतोऽध्यास्त मयूरपृष्ठम् ॥ ३० ॥ ✓

गङ्गासुत स्वामिकार्तिक । 'गङ्गोमाकृत्तिकासुत ' इति हैम्याम् । मयूरस्य केकिन पृष्ठतनोपरम भाग प्रदेशम् अध्यास्त आरुरोह । किं कुर्वाण । षट्सख्यानि मुखानि यस्य तस्य भावस्ता दधानो बिभ्राण. । उत्प्रेक्ष्यते—जगत्सु त्रिभुवनेषु भ्रमीभिर्भ्रमी. पर्यटनं कृत्वा जननीं मातरं मन्दाकिनीं दिदृक्षुर्द्रष्टुमिच्छु किमु । भ्रमीशब्दो दीर्घोऽप्यस्ति । 'अपि भ्रमीभङ्गिभिरावृताङ्गीम्' इति नैषधे । [illegible] कृत्वा । आलोक्य दृष्ट्वा । काम् । यत्कीर्तिगङ्गाम् । यस्य भद्रबाहुस्वामिन कीर्तिरेव मन्दाकिनीम् । किंभूताम् । त्रिलोक्या स्वर्लोकपाताललोकभूलोकत्रिके निरन्तरतया प्रसृता अतिप्रचरिता [illegible] नामित्यर्थः ॥ इति श्रीभद्रबाहुस्वामी ॥

श्रीस्थूलभद्रेण निजान्वयाय श्रो(सो)तस्विनीनायककौस्तुभेन ।
विश्वत्रयी तत्तदगेव शोभामलम्भि तत्पट्टपयोधिपुत्री ॥ ३१ ॥

[illegible] शोभया शुभेन स्थूलभद्रेण तयो सम्भूतिविजयभद्रबाहुस्वामिनो [illegible] पयोधिपुत्री लक्ष्मी शोभामलम्भि प्रापिता । येनेव । तदद्दगेव । यथा [illegible] भद्रस्य यशसा [illegible] विश्वत्रयी त्रिलोकी शोभा लम्भिता । [illegible] स्थूलभद्रो नागरनामा ब्राह्मणवरः स एव स्रोतस्विनीनायक [illegible] [illegible] नारायणवक्षस्थल[illegible] [illegible] ॥

प्रपात्ययुस्तामणिमणि [illegible] ।
[illegible] ॥ ३२ ॥

[illegible]
[illegible]

[illegible] निर्लेपलक्ष्यते । पुनर्यो बजन्ती [illegible] [illegible] [illegible] कुम्भकर्णोरेः [illegible] [illegible] पुनरन्या [illegible] [illegible]

[illegible] ॥

[illegible] संवे कृपानीरनिधेर्निनीषोः ।
[illegible] दीप्यते स्म ॥ १४ ॥

[illegible] व्योमनि आकाशे [illegible] [illegible] । अतिशयेन [illegible] [illegible] । [illegible] पार्श्व तु ममभो [illegible] [illegible] [illegible] [illegible]

[illegible] ॥ १५ ॥

[illegible]

[illegible] ॥ १६ ॥

[illegible] शास्त्र । [illegible] ।
[illegible] [illegible] कोशादेशकलावताम् [illegible] महा-
[illegible] [illegible] , [illegible] , भृतदिना , सेना.
[illegible] [illegible] । [illegible]
[illegible] [illegible] सेनाधिपतिर्भवति
[illegible] [illegible] [illegible] प्रमानन्दो
[illegible] ॥

[illegible] [illegible] [illegible] ।
[illegible] [illegible] मदनं समरेऽत्र ॥ २६ ॥

[illegible] [illegible] प्रतापेन, परैरसाध्यमानत्व ।
[illegible] [illegible] । [illegible] न दोष. । एतादृ-
[illegible] [illegible] । तस्मात् । स्थू-
[illegible] [illegible] स्वरूपानुभावस्व-
[illegible] [illegible] निपतः स्वस्यात्मनः
[illegible] [illegible] । [illegible] इव । यथा
[illegible] [illegible] ॥ इति स्थूलभद्रस्वामी ॥

[illegible] तत्वार्थमहागिरिश्चापर, [illegible]र्यसुहस्तिसूरिः ।
[illegible] दधानौ रथे यथा सारथिकल्य रथ्यौ ॥ २७ ॥

[illegible] [illegible] पदे पदात् द्वौ पट्टधरौ
[illegible] [illegible] महागिरि न पुनरपर आर्यसुहस्तिसूरि. । द्वावपि
[illegible] । [illegible] मोक्षमार्गस्य [illegible] धुर दधानौ
[illegible] । यथा [illegible] । [illegible] । रथे रथ्याविव । यथा सार-
थिकल्पे रथे [illegible] द्वौ वृषभौ भवत ॥

मरुद्रुहादार्यसुहस्तिमूर्तिर्भूमौ मरुद्वृक्ष इवोत्ततार ।
कृपार्णवेन द्रमकोऽपि येन त्रिखण्डभूमीप्रभुतामलम्भि ॥ २८ ॥

आर्यसुहस्तिनाम्ना सूरिस्तस्य मूर्ति शरीर यस्य तादृश । उत्प्रेक्ष्यते । मरुद्रुहात् स्वर्गलोकात् मरुद्वृक्ष कल्पद्रुम: भूमौ पृथिव्यामुत्ततार अवतीर्णवान् आगतवानिव । कृपार्णवेन दयासमुद्रेण येनार्यसुहस्तिसूरिणा द्रमको भिक्षुकोऽपि त्रिखण्डभूमे षो-डशसहस्रदेशक्षोणे प्रभुतानाधिपत्यमलम्भि प्रापित ॥

भूमुभुवो भर्तृतया प्रगल्भभूषाविशेषानिव शातकौम्भान् ।
सपादलक्षानिह संप्रतिर्यो निर्मापयामास महाविहारान् ॥ २९ ॥

दुर्भिक्षके पायसमेक्ष्य लक्षपक्वं महेभ्यस्य गृहे प्रभुर्यः ।
दिने द्वितीये कुलदेवतेव न्यवेदयद्भाविसुकालमस्य ॥ ६१ ॥

यः वज्रसेनः प्रभुर्गणस्वामी दुर्भिक्षके द्वितीयवारं द्वादशहायनजलवाहादृष्टेरुद्भूत-दुःकालसमये श्रीवज्रस्वामिना दक्षिणस्यां दिशि प्रेषितः सन् अस्य महेभ्यस्य द्वितीये आगामिनि दिने वासरे भावि भविष्यत्सुभिक्षं सुकालं न्यवेदयत् कथयामास । केव । कुलदेवतेव । यथा सम्यगाराधिता गोत्रदेवी सुभिक्षं निवेदयति । किं कृत्वा । एक्ष्य आलोक्य । किम् । पायसं परमान्नम् । किंभूतं पायसम् । लक्षेण सुवर्णटङ्कानां शत-सहस्र्या पक्वं शालिदुग्धादि मेलयित्वा राद्धं निष्पन्नम् । कस्मिन् । यस्य कस्यचिन्महे-भ्यस्य व्यवहारिणः गृहे मन्दिरे । तस्यैव चतुर्नन्दनस्येभ्यस्य दीक्षाग्रहणवाग्बन्धपूर्वकं स्वस्तनदिने याममध्ये पञ्चशतीयुगधरीधान्यभृतवहनागमनैर्भाविसुकालमावेदितवानि-त्यर्थः ॥

चत्वार एतत्तनया विनेयाः शाखाभृतस्तस्य विभोर्बभूवुः ।
इवामरद्वेपिचमूजयश्रीजुषः सुरेन्द्रद्विरदस्य दन्ताः ॥ ६२ ॥

चत्वारः चतुःसंख्याका एतस्य महेभ्यस्य तनया नन्दनास्तस्य वज्रसेनस्य विभोः स्वामिनः विनेयाः शिष्या बभूवुः । नागेन्द्र-चन्द्र-निर्वृति-विद्याधराख्याः । शाखा बिभ्रति धारयन्तीति तादृशाः । कस्य के इव । सुरेन्द्रद्विरदस्य दन्ता इव । यथा शक्र-गजस्य ऐरावणस्य दन्तकोशाश्चत्वारो भवन्ति । किंभूता दन्ताः । अमरद्वेषिणां दानवानां चमूनां सेनानां जयस्य विजयस्य श्रियं लक्ष्मीं जुषन्ते सेवन्ते ॥ इति वज्रसेनसूरिः ॥

भर्त्रा सुराणामिव लोकपालेष्वेतेषु सौदर्ययतीश्वरेषु ।
श्रीचन्द्रनाम्ना मुनिपुङ्गवेन तत्पट्टपूर्वा प्रमदेन भेजे ॥ ६३ ॥

एतेषु नागेन्द्र-चन्द्र-निर्वृति-विद्याधराभिधेषु चतुर्षु सोदर्येषु भ्रातृषु यतीश्वरेषु ग[illegible] [illegible] मध्ये चन्द्रनाम्ना मुनिपुङ्गवेन मुनीन्द्रेण तस्य वज्रसेनसूरेः पट्ट एव पूर्वा प्राचीदि[illegible] भेजे [illegible] । केन । प्रमोदेनानन्देन । केनेव । भर्त्रेव । यथा इन्द्र-यम-वरुण-कुबेराभिधेषु लोकपालेषु मध्ये सुराणां देवानां भर्त्राधिपतिना शक्रेण पूर्वाशा सेव्यते ॥

राजा स्वयं राजननं सदोषो निर्दोषमक्षोपगतो निरङ्कम् ।
[illegible] निरस्तं च निजाधिकं यं समीक्ष्य [illegible] शशी [illegible] ॥ ६४ ॥

[illegible]

श्रीमत्सुहस्तिव्रतिवासवस्य श्रीसुस्थित: सुप्रतिवद्धसूरिः ।
पदं विनेयौ नयतः स्वलक्ष्मीं क्रमं मुरारेरिव पुष्पदन्तौ ॥ ४३ ॥

श्रीमत्सुहस्तिनाम्नो व्रतिवासवस्य मुनीन्द्रस्य विनेयो उभौ शिष्यौ पदं पट्टं श्रियं शोभां नयतः स्म प्रापयतः स्म । द्वौ कौ । एकः श्रीयुक्तः शोभाकलितः सुस्थितनामा सूरिः, अपरः सुप्रतिवद्धनामा आचार्यः । काविव । पुष्पदन्तौ । 'पुष्पदन्तावेकोक्त्या शशिभास्करौ' इति हैम्याम् । यथा सूर्याचन्द्रमसौ मुरारेः क्रममाकाशं लक्ष्मीं लम्भयतः ॥

प्रीतिं सृजन्ती पुरुषोत्तमानां दुग्धाम्बुराशेरिव पद्मवासा ।
हृदा जिनं बिभ्रत आविरासीत्तत्सूरियुग्मादिह कौटिकाख्या ॥ ४४ ॥

इह दक्षिणभरतार्धभूमौ तत्सूरियुग्मात् सुस्थितसुप्रतिवद्धनामाचार्यद्वन्द्वात् गणस्य गच्छस्य कौटिका इति आख्या नामाविरासीत् प्रकटीबभूव । पूर्वं तु सुधर्मस्वामिनमारभ्य सुहस्तिसूरिं यावत्साधूनां निर्ग्रन्था इत्यभिधानमासीत् । सुस्थितसुप्रतिवद्धसूरियुगलात् द्वितीयं कौटिकगण इति नाम बभूव । कोटिशः सूरिमन्त्रजापात् कौट्यंशसूरिमन्त्रधारित्वाद्वा कौटिकः । केव । पद्मवासेव । यथा दुग्धाम्बुराशेः क्षीरसमुद्राल्लक्ष्मीराविर्बभूव । सूरियुग्मात् दुग्धाम्बुराशेश्च किं कुर्वतः । हृदा हृदयेन मनसो मध्येऽन्तरेण जिनमर्हन्तं विष्णुं च बिभ्रतो धारयतः । कौटिकाख्या पद्मवासा च किं कुर्वती । पुरुषेषूत्तमानां श्रेष्ठानां धार्मिकाणां विष्णोश्च प्रीतिमानन्दं तुष्टिं स्नेहं सृजन्ती कुर्वती ॥ इति सुस्थितसुप्रतिवद्धौ सूरी एकपट्टधरावेव ॥

श्रीइन्द्रदिन्नव्रतिसार्वभौमस्तत्पट्टलक्ष्मीतिलकं बभूव ।
निशुम्भ्यते दाम्भिकता स्म येन कलिन्दकन्येव हलायुधेन ॥ ४५ ॥

श्रिया त्रिंशत्सूरिगुणलक्ष्म्याकलितसुप्रसिद्धिमान् इन्द्रदिन्ननामा व्रतिनां वाचंयमानां मध्ये सार्वभौमश्चक्रवर्ती तयोः सुस्थितसुप्रतिवद्धाचार्ययोः पट्टलक्ष्म्यास्तिलकः विशेषको बभूव सञ्जातः । स कः । येन भगवता दाम्भिकता दम्भधारिता कापट्यं निशुम्भ्यते स्म निर्दलितम् । केनेव । हलायुधेनेव । यथा बलभद्रेण कलिन्दकन्या यमुना निशुम्भिता । पराभूतेत्यर्थः । 'हलिमुसलिप्रलम्बयमुनाभिदनन्तभाल-' इति हैम्यां रामनामसु ॥

पक्षद्वयं भिन्नतमोभरेण पित्रोः पवित्रीक्रियते स्म येन ।
कुबेरदिग्दक्षिणयोः पदव्योर्द्वन्द्वं प्रियेणेव पयोजिनीनाम् ॥ ४६ ॥

येन इन्द्रदिन्नसूरिणा पित्रोर्जननीजनकयोः पक्षद्वयं पक्षद्वन्द्वम् । मातृपक्षः पितृपक्षश्चेत्यर्थः । पवित्रीक्रियते स्म पावनीचक्रे । केनेव । प्रियेणेव । यथा पयोजिनीनां पद्मिनीनां भर्त्रा भानुना कुबेरदिग्दक्षिणयोः उत्तरायाम्योः पदव्योर्मार्गयोर्द्वन्द्वं युगलं

[illegible] हीरविजयो [illegible] मुनिपुरंदर [illegible] वर्धमान कोपं [illegible] । [illegible] । यथा [illegible] निषेधते स्म । च पुनर्यत्र सीहगिरि-[illegible] जिताविभूता [illegible] । उत्प्रे-[illegible] जाता ॥ [illegible] ॥

तमोभरोर्वीधरभेदपव्यिपक्षोऽथ वज्रप्रभुरेतदीयम् ।
पट्टं परां प्रापयति स्म भूषां माणिक्यकोटीर इवोत्तमाङ्गम् ॥ ९१ ॥

[illegible]नन्तरं वज्रप्रभुर्वज्रस्वामी एतदीयं सीहगिरिसत्कं निधिनं पट्टं परां प्रकृष्टां भूषां [illegible] प्रापयति स्म । किंभूतो वज्रप्रभुः । तमस्यामज्ञानानां पापानां च भरः समुदायः स एवोर्वीधरः पर्वतस्तस्य भेदे व्यापादने दम्भे पविर्वज्रः शक्रस्य वज्र इव कुलिशः । [illegible] पदोपादानम् । तथा च नैषधे—'स्फुलिङ्गः स्फुट भालो-[illegible]' इति । क इव अलंकृतवान् । कोटीर इव । यथा माणिक्यानां मणिविशेषाणां कोटीरो मुकुट उत्तमाङ्गं भूपालमौलिं नृपमस्तक श्रियं नयति ॥

आशैशवादेव जहौ निजाम्बां वेलामिव क्षीरनिधेः सुधांशुः ।
अध्यैष्ट यः पालनके शयानोऽप्येकादशाङ्गीं स्मृतपूर्वजन्मा ॥ ९२ ॥

यो वज्रस्वामी आशैशवादेव । किंचिन्न्यूनषण्मासवयस्थामारभ्य रोदनदम्भेनेत्यर्थान्तरं निजामात्मीयामम्बां सुनन्दानाम्नीं मातरं जहौ त्यजति स्म । क इव । सुधांशुरिव । यथा चन्द्रो बाल्यादेव सहरिसुरासुरकरैर्मन्दरेण मथ्यमानक्षीरनीरनायकान्तरोत्पत्तिसमये एव क्षीरनिधेर्दुग्धवारिधेर्वेलां जहाति स्म । च पुनर्यः पालनके बालकानामन्दोलनस्थानविशेषे शयानोऽपि स्वपन्नपि एकादशानामाचाराङ्ग-सूत्रकृदङ्ग-स्थानाङ्ग-समवायाङ्ग-भगवत्यङ्ग-ज्ञाताधर्मकथाङ्ग-उपासकदशाङ्ग-अन्तकृद्दशाङ्ग-अनुत्तरोपपातिकादशाङ्ग-प्रश्नव्याकरणाङ्ग विपाकश्रुताङ्गरूपाणामङ्गानां समाहार एकादशाङ्गी ताम-ध्यैष्ट अधीतवान् कण्ठपीठीकरोति स्म । स्वसंनिधिस्थितबहुश्रुतार्यिकागण्यमानैकादशाङ्गसूत्रश्रवणादेव पूर्वाधीतामेकादशाङ्गीं स्मृतवानित्यर्थः । अत एव किंभूतम् । स्मृत स्पष्टीकृतं पूर्वं प्राक्तनं जन्मावतारो येन । जातिस्मरणेनाविज्ञातप्राचीनजन्मा ॥

यः पुष्पदः पल्लवलीलयेव वैराग्यलक्ष्म्यालमकारि बाल्ये ।
प्राग्जन्ममित्रात्त्रिदशान्नभोगविद्या पुनर्वैक्रियलब्धिमापत् ॥ ९३ ॥

यो वज्रस्वामी बाल्ये शैशवे वैराग्यलक्ष्म्या संयमग्रहणबुद्ध्या संसारासारताभावनश्रिया वा अलमकारि अलंकृतः भूष्यते स्म । क इव । पुष्पद इव । यथा पादपः प-

[illegible] ॥

[illegible] ।

[illegible] ॥ ७५ ॥

[illegible] ॥

भक्तामरक्षस्तवनेन सूरिर्बभञ्ज योऽङ्गान्निगडानशेषान् ।
प्रवर्तितामन्दमदोदयेन गम्भीरवेदीव करी धरेन्द्रो ॥ ७६ ॥

यो मानतुङ्गसूरिः भक्तामर इत्यादि नाम यस्य तादृशेन स्तवेन स्तोत्रेण कृत्वा अङ्गात् स्वशरीरादशेषान् अष्टचत्वारिंशदपि निगडान् शृङ्खलान् बभञ्ज भनक्ति स्म । क इव । करीव । यथा धरेन्द्रो राज्ञः गम्भीरवेदी अवमताङ्कुश अवगणिततीक्ष्णाङ्कुशप्रहारो हस्ती प्रवर्तितोऽतिप्रवहमानो यो मदोदयो दानवारिप्रादुर्भावस्तेन कृत्वा पादादिनियमनशृङ्खलान् भनक्ति त्रोटयति । 'त्वग्भेदाद्रुधिरस्रावादामांसव्यथनादपि । संज्ञा न लभते यस्तमाहुर्गम्भीरवेदिनम्' ॥

श्रीमानतुङ्गः करणेन भक्तामरस्तुतेस्तं क्षितिशीतकान्तिम् ।
चकार नम्रं फलपुष्पपत्रभारेण यद्वत्फलदं वसन्त ॥ ७७ ॥

येन नृपतिना मार्तण्डचण्डीस्तुतिशतककरणापगतकुष्ठबाणकविकृतचतुरङ्गनवीनाङ्गी-भूतमयूरकविमहिमालोकनोद्भूतचमत्कारेण पुनर्जैनदर्शनमाहात्म्यदर्शनोत्कण्ठितचेतसा अष्टचत्वारिंशता शृङ्खलैरापादकण्ठमङ्गं निगडनिबद्धं कृत्वा प्रदत्तमहत्तालकापवरके निक्षिप्तः श्रीमानतुङ्गसूरिः 'भक्तामरप्रणतमौलिमणिप्रभाणाम्' इति नामादिदेवस्तुतेः स्तोत्रस्य करणेन निर्माणेन तं पूर्वोक्तं स्वपरीक्षाकारिणं क्षितिशीतकान्तिं राजानं नम्रं स्वचरण-

मूर्तैरिव स्वस्य गुणैः प्रफुल्लपुष्पोत्करैः पर्युषणाक्षणेषु ।
समुन्नतिं शाम्भवशासनस्य तस्यां सुनन्दातनयस्ततान ॥ ९७ ॥

सुनन्दा नाम्नी धनगिरिपत्नी तस्यास्तनयो नन्दनो वज्रस्वामी पर्युषणाक्षणेषु वार्षिकपर्वाष्टाह्निकादिवासरमहोत्सवेषु तस्यां बौद्धनगर्यां शाम्भवस्य जैनस्य शासनस्य उन्नतिं प्रभावनां ततान चकार । कैः । प्रफुल्लपुष्पोत्करैः विकसत्कुसुमसमूहैः । उत्प्रेक्ष्यते । मूर्तैराकृतैः स्वस्य वज्रस्वाम्यात्मनः प्रशमादिभिर्गुणैरिव ॥

प्राबोधयद्बौद्धपुरीप्रभुं यः समं समग्रैरपि पौरलोकैः ।
साकं शकुन्तैरिव पङ्कजानां कुञ्जं समुद्यद्गगनाध्वनीनः ९८ ॥

यो वज्रस्वामी बौद्धपुरीप्रभुं सुगतनगरीस्वामिनं प्राबोधयत् प्रतिबोधयति स्म । जैनं चकारेत्यर्थः । कथम् । सार्धम् । कैः । समग्रैः समस्तैरपि पौरलोकैर्नागरिकजनैः समम् । क इव । समुद्यद्गगनाध्वनीन इव यथा अभ्युदयं प्राप्नुवन् भास्करः शकुन्तैर्विहगमैः साकं सह पङ्कजानां पद्मानां कुञ्जं वनं कमलपटलं प्रबोधयति । जागरयति विकाशयति च ॥

अपास्यति स्माढ्यसुतां सरागां यो रुक्मिणीं काञ्चनकोटिभिश्च ।
क्रीडन्मृगेन्द्रां स्मितसल्लकीभिर्निकुञ्जराजीमिव कुञ्जरेन्द्रः ॥ ९९ ॥

यो वज्रस्वामी काञ्चनानां सुवर्णकानां कोटिभिः । 'कोडीसए धणसंचियस्स गुणस्स भरियारा कन्नाए' इत्युपदेशमालावचनात् । कोटीनां शतैः समम् आढ्यस्य महाव्यवहारिणः सुतां पुत्रीं रुक्मिणीति नाम्नीं कन्याम् अपास्यति स्म त्यक्तवान् । किंभूताम् । सरागां स्वसंसदि संनिधिस्थितसाध्वीगीयमानयद्गुणग्रामाणां कर्णनोद्भूतानुरागवशंवदतया 'अस्मिन् भवे मम प्राणनाथो वज्रस्वाम्येव नान्यः' इति कृतनिश्चयतया सस्नेहां जहौ । क इव । कुञ्जरेन्द्र इव । यथा गजराजः स्मितसल्लकीभिर्विकसितगजप्रियातरुपङ्क्तिभिः सार्धं 'सल्लकी तु गजप्रिया' इति हैम्याम् । निकुञ्जराजीं वनमालामपास्यति । किंभूतां निकुञ्जराजीम् । क्रीडन्मृगेन्द्रां स्वेच्छया रममाणपञ्चाननाम् ॥ इति वज्रस्वामी ॥

श्रीवज्रसेनोऽथ तदीयपट्टं व्यभासयत्प्रीणितजन्तुजातः ।
स्फुरन्मदोद्भेद इव द्विपेन्द्रकपोलमानन्दितचञ्चरीकः ॥ १०० ॥

अथानन्तरं वज्रसेननामा सूरिस्तदीयपट्टं वज्रस्वामिसत्कं निजपदं व्यभासयत् भूषयति स्म । किंभूतो वज्रसेनः । प्रीणितानि प्रतिबोधप्रदानेन तृप्तिमुपनीतानि कृतानि जन्तूनां प्राणिनां जातानि समूहा येन । क इव । स्फुरन्मदोद्भेद इव । यथा प्रकटीभवन् दानोदकोदयः दीप्यमानः शोभाकारी दानजलनिर्भरो वा द्विपेन्द्रस्य गजराजस्य कपोलं गण्डस्थलमलंकुरुते । किंभूतः । आनन्दिता लब्धावासं कटुकामोदाभिभवाद्घनसम्भारपातेन प्रमोदिताश्चञ्चरीका मधुकरनिकरा येन ॥

ख'कामिनीभिः सुराङ्गनाभिर्नृत्यादिकारित्वादप्सरोभिः स्ववेश्याभिर्वा कीर्तिता पदे पदे गीता अथवा गीतिभिर्विस्तारिता कीर्तिर्यस्य। 'कीर्तियशसि विस्तारे' इत्यनेकार्थः। तादृशो देवानन्दो नाम मुनीन्द्रस्तस्य जयदेवसूरेः पट्टश्रिय पट्टवैभव शोभामानिनाय प्रापयति स्म। किं कृत्वा। चिदानन्दे मोक्षे मनो यस्य। क कामिव। तारुण्यमेणाङ्कमुखीमिव। यथा यौवन चन्द्रवदनां श्रिय लम्भयति॥ इति देवानन्दसूरि.॥

श्रीविक्रमः सूरिपुरंदरोऽभूत्तत्पट्टदुग्धाब्धिसुधामरीचिः।
तमश्चमूं हन्तुमनाः समग्रां किं विक्रमोऽङ्गीकृतकाययष्टिः॥ ८२॥

ततो देवानन्दसूरेरनन्तर श्रीविक्रमनामा सूरिषु पुरदरः इन्द्रो बभूव। किंभूत'। तस्य देवानन्दसूरेः पट्ट एव दुग्धाब्धि क्षीरसमुद्रस्तत्र तस्य वा वृद्धिकारित्वात्सुधामरीचिश्चन्द्र'। उत्प्रेक्ष्यते—समग्रा समस्तामपि तमसामज्ञानानां पापाना चमू सेना समूह वा हन्तु व्यापादयितुमङ्गीकृता गृहीता काययष्टि' शरीर येन तादृशो विक्रमः किमु। मूर्तिमान् पराक्रम इवेत्यर्थः॥ इति विक्रमसूरि॥

आसीत्ततः श्रीनरसिंहसूरिः स वाङ्मयाम्भोनिधिपारदृश्वा।
अत्याजि यक्षः किल येन मांसं स्वापं जगद्वारिजबन्धुनेव॥ ८३॥

ततो विक्रमसूरे. पट्टे श्रीनरसिंहनामा सूरिरासीत्संजातः। किंभूतः। वाङ्मय सिद्धान्तः स एवाम्भोनिधि समुद्रस्तस्य पार दृष्टवानिति पारदृश्वा पारगामी। 'क्वनिप् वनिप् वा' इति सारस्वतसूत्रेण वनिप्प्रत्यय.। किलेति श्रूयते। येन नरसिंहसूरिणा कश्चिदनिर्दिष्टनामा यक्षो वटवासी मासमत्याजि त्याजितः। प्रतिबोध्य मासाशनितामभोचयदित्यर्थ। केनेव। वारिजबन्धुनेव। यथा सूर्येण जगद्विश्व स्वाप निद्रावस्था त्याज्यते॥ इति नरसिंहसूरि.॥

महर्घ्यमाणिक्यमिवाङ्गुलीयं पोमाणभूपालकुलप्रदीपः।
पट्टश्रियं श्रीनरसिंहसूरेरलंकरोति स्म समुद्रसूरिः॥ ८४॥

श्रीनरसिंहसूरेः पट्टश्रिय समुद्रनामा सूरिरलकरोति स्म। किंभूतः। खोमाणनामानो ये भूपाला राजानस्तेषा कुले वशे गृहे वा उद्योतकारित्वात्प्रदीप इव प्रदीप.। किमिव। महर्घ्यमाणिक्यमिव। यथा बहुमूल्य रत्नमङ्गुलीय मुद्रिकामलकुरुते॥

दिग्वाससो येन विजित्य वादे नागह्रदे नागनमस्यतीर्थम्।
स्ववश्यमानीयत भूमिभर्त्रा दुर्गः प्रतीपानिव संपराये॥ ८५॥

येन समुद्रसूरिणा नागह्रदाख्ये नगरे वादे शास्त्रचर्चासमये दिग्वाससोऽनेकान्दिगम्बरान्विजित्य निरुत्तरीकृत्य नागेन धरणोरगेन्द्रेण नमस्य नमस्करणीय तीर्थं पार्श्वनाथबिम्ब स्ववश्य जैनश्वेताम्बरसघायत्तमानीयत। केनेव। भूमिभर्त्रेव। यथा नृपगणे सग्रामे प्रतीपान्वैरिणो निर्जित्य दुर्ग कोट्ट' स्ववश्य. क्रियते॥ इति श्रीसमुद्रसूरि.॥

यस्मात्तं । पुनः किंभूतः शशी । अङ्केन मध्यवर्तिश्यामताक्षणेन लाञ्छनेन [illegible] धिगमनात्कलङ्केनापवादेनोपगतो युक्तः । य किंभूतम् । निर्गतोऽङ्कः मसमर्यादिन्यादि[illegible] यो मन्तुर्वा यस्मात् । 'अङ्को भूषाम्परूलक्ष्मसु । चित्राजौ नाटकाद्यंशे स्थाने क्रोडे[illegible] ऽन्तिकागसोः ॥' इत्यनेकार्थः । पुनः किंभूतः शशी । महाप्त्नेन [illegible] तम् । निर्गतोऽङ्गः क्षयो यस्मात्सदाभ्युदयत्वात् ॥

श्रीचन्द्रसूरेरथ चन्द्रगच्छ इति प्रथा प्रादुरभूद्गणस्य ।
भागीरथीनाम भगीरथाख्यमहीमहेन्द्रादिव देवनद्याः ॥ ९५ ॥

अथ चन्द्रसूरिपट्टभवनानन्तरं श्रीयुक्तचन्द्रनामसूरेर्गणस्य [illegible] गच्छ इति प्रथा ख्यातिः प्रादुरभूत् प्रकटीभूता । [illegible] हीमहेन्द्राद्देवनद्या इव । यथा सगरचक्रिजैनन्दनजा[illegible] यस्य नारदात्महीमहेन्द्रात्सकाशादागमवात् एतावता भगीरथनृपात् [illegible] थीति नाम प्रकटीभूतम् ॥ इति चन्द्रसूरिः ॥ इति [illegible]

काशोलिकारण्यवसन्नितस्य सामन्तभद्रप्रभुरस्य पट्टः ।
व्यराजयद्राशि[illegible]परस्य साध्यं यशोनिर्जितपुण्डरीकम् ॥ ९६ ॥

अथ चन्द्रसूरेः पट्टः सामन्तभद्रप्रभुर्व्यराजत [illegible]

[illegible]

[illegible]

वचनानां विलासो वैचित्र्यं वैदुषी वा सुधायते पीयूषवदाचरति ॥ इति रविप्रभसूरिः ॥

वर्धिष्णुयत्कीर्तिसुधार्णवेन व्यलुम्पि नामाप्यसितादिभावैः ।
अर्हन्महिम्नेव जगत्यजन्यैः सोऽभूद्यशोदेवविभुः पदेऽस्य ॥ ९० ॥

अस्य रविप्रभसूरेः पदे स यशोदेवनामा विभुर्गणाधिपोऽभूज्जज्ञे । स कः । वर्धिष्णुर्वर्धनशीलः । 'दूरवर्धिष्णुपापर्धि' इति पाण्डवचरित्रे । यशोदेवसूरेः कीर्तिरेव सुधार्णवः क्षीरसमुद्रस्तेन कृत्वा करणपदम् । असितादिभावैः कृष्णनीलपदार्थैः स्वनामापि व्यलुम्पि लुप्तम् । तद्यशोभिर्धवलीकृते सर्वविश्वे नीलादिपदार्थाः क्वापि नावसीयन्ते इति लोपः । केनेव । अर्हन्महिम्नेव यथा तीर्थकृन्माहात्म्येन करणपदेन कृत्वा जगति भूलोके अजन्यैः ईतिभिः स्वनामापि लुप्यते । 'अजन्यमीतिरुत्पातः' इति हैम्याम् ॥ इति यशोदेवसूरिः ॥

प्रद्युम्नदेवोऽथ पदे तदीये प्रद्युम्नदेवोऽभिनवो बभूव ।
भिन्दन्भवं मुक्तरतिर्दवीयो भवन्मधुर्विश्वविभाव्यमूर्तिः ॥ ९१ ॥

अथानन्तरं तदीये यशोदेवसंबन्धिनि पदे प्रद्युम्नदेवनामा सूरिर्बभूव । किंभूतः । अभिनवो नवीनः प्राचीनो द्विसप्तलक्षणः प्रद्युम्नदेवः कन्दर्पदेवः । अभिनवत्वमेव दर्शयति । किं कुर्वन् । भवं संसारं भिन्दन् उच्छेदयन् । स्मरस्तु भवेन शंभुना भिन्नः, अयं स्वयं भवं भिनत्ति । पुनः किंभूतः । मुक्ता त्यक्ता रतिः विश्वे स्त्र्यादिपदार्थेषु प्रीतिरासक्तिर्वा येन । स्मरस्तु रतिप्रियः । पुनः किंभूतः । दवीयः अतिशयेन दूरे भवत्संपद्यमानं मधु मद्यं वा यस्मात् । स्मरस्तु मधुर्वसन्तः सहायो यस्य । पुनः किंभूतः । विश्वेन जगज्जनेन विभाव्या लोचनकचोलकैर्निपीयमानलावण्यामृता सादरमवलोक्यमाना वा मूर्तिः शरीरं यस्य । स्मरस्त्वनङ्गः ॥ इति प्रद्युम्नदेवसूरिः ॥

श्रीमानदेवेन पुनः स्वकीर्तिज्योत्स्नावदातीकृतविष्टपेन ।
एतत्पदश्रीरगमि प्रतिष्ठां शक्तित्रयेणेव नरेन्द्रलक्ष्मीः ॥ ९२ ॥

पुनर्नाम्ना तृतीयवारं श्रीमानदेवेन सूरिणा एतस्य प्रद्युम्नदेवस्य पदश्रीः पट्टलक्ष्मीः प्रतिष्ठा सातिशायिशोभा विख्यातिर्वा अगमि प्रापिता । 'ण्यादयो ण्यन्तनिष्कर्मगत्यर्था मुख्यकर्मणि । प्रत्ययं यान्ति दुह्यादिर्गौणेऽन्ये तु यथारुचि ॥ अस्योदाहरणानि यथा—नित्ये विजनमजागरि रजनिमगमि मदमयाचि सभोगम । गोपी दावमकार्यत भावश्चैनामनन्देन ॥' इति प्रक्रियाकौमुद्याम् । अत्र ण्यन्तः गमधातुप्रयोगः । किंभूतेन मानदेवेन । स्वस्यात्मनः कीर्तिरेव ज्योत्स्ना कौमुदी तया अवदातीकृतं धवलितं विष्टपं त्रिभुवनं येन प्रतिष्ठा प्रापिता । केनेव । शक्तित्रयेणेव । यथा प्रभुत्वोत्साहमन्त्रलक्षणेन शक्तित्रितयेण नरेन्द्रस्य राज्ञः श्रीः राज्यलक्ष्मीः प्रतिष्ठां प्राप्यते ॥ इति तृतीयमानदेवसूरिः ॥

पुनः किंभूतः । गङ्गायाम्तरङ्गाः कल्लोलास्तद्वदाचरिता यासां वाणीनां विलासाः वैचित्र्यो यस्य । 'गङ्गातरङ्गस्रविच्छन्दिनो वाग्विलासाः' इति चम्पूकथायाम् । 'निरन्तरसुधारसाविष्करिण्या वचनवैचित्र्या' इति चम्पटिप्पनके । क इव । सभ्य इव । यथा पार्षद्यः सामुखो सभास्थ स्थानं गृहं पदं वा आश्रयति । सभ्योऽपि किंभूतः । प्रज्ञया सुराचार्यं जयन्, मन्दाकिनी वीचीयमानवचनचातुर्यैः, सभाया साधुः सभ्यः ॥

पदप्रदानावसरे समीक्ष्य साक्षात्तदंसोपरि वाणिपद्मे ।
राज्यादिव क्षोणिपुरंदरस्य भ्रंशोऽस्य भावी नियमस्थितेर्हा ॥ ७२ ॥
इत्थं गुरुं स्वं विमनायमानमालोक्य लोकेश्वरगीतकीर्तिः ।
तत्याज यः षड्विकृतीर्व्रतीन्द्रः षडान्तरारीनिव जेतुकामः ॥ ७३ ॥

ये लोकाना पातालभूमिस्वर्गलक्षणानार्गीश्वरैरिन्द्रैर्नागेन्द्रनरेन्द्रसुरेन्द्रैर्गीता गानविषयीकृता कीर्तिता या कीर्तिर्यस्य तादृशो व्रतिना साधूनामिन्द्रः स्वामी श्रीमानदेवसूरिः षट्संख्याका घृतपक्वान्नतैलगुडदधिदुग्धाभिधा विकृतीस्तत्याज जहाति स्म । उत्प्रेक्ष्यते—षट्संख्याकान् कामक्रोधमदमत्सरमायालोभादिकान् आन्तरान् अन्तरङ्गान् रिपून् निर्जेतुकाम पराभवितुमिच्छुरिव । किं कृत्वा । इत्थममुना प्रकारेण विमनायमान विरुद्ध मनो यस्य स विमना , न विमना विमनाः स्यादिति विमनायते, विमनायते इति विमनायमानस्तम । 'भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः। भृशादिभ्यश्च्व्यर्थे भवत्यर्थे क्यङ् स्यात् न तु च्व्यन्तस्य अन्तहल्लोपश्च । अभृशो भृशो भवतीति भृशायते उन्मनायते' इति प्रक्रियाकौमुद्याम । स्वमात्मीय गुरु प्रद्योतनसूरिमालोक्य दृष्ट्वा । इत्थं कथ पदस्य सूरिपदस्य प्रदानावसरे वितरणव्यतिकरे तदंसोपरि मानदेवसूरिस्कन्धोपरिष्टात् साक्षात्प्रत्यक्षलक्ष्ये वाणिपद्मे सरस्वतीलक्ष्म्यौ । वाणिशब्दो ह्स्वोऽप्यस्ति । 'अन्तर्वाणिस्तु शास्त्रवित्' इति हैम्याम । अन्यत्रापि—'व ' ' '। द्वा इति शेषे । सरस्वतीलक्ष्मीसाक्षात्त्वेन राजादिसत्कारजनितप्रमादाचरणवशादित्युत्प्रेक्षार्थम् । नियमस्थितेश्चारित्राचारस्य मम पट्टधरस्य भ्रंशो भावी भ्रताद्भ्रष्टो भविष्यतीति । कस्येव । क्षोणिपुरंदरस्येव । यथा कस्यचिद्राज्ञः अन्यायासेवनस्यप्रमादाद्राज्याद्भ्रंशो भवति । युग्मम् ॥

चमूभिरुर्वीन्द्रमिवामरीभिरुपास्यमानं यमवेक्ष्य कश्चित् ।
किं स्त्रीयुतोऽसाविति संशयानो नड्डूलकेऽशिक्ष्यत ताभिरेव ॥ ७४ ॥

चमूभिर्गजवाजिरथपत्तिलक्षणाभिश्चतुरङ्गिणीभिः सेनाभि उर्वीन्द्र क्षोणीशक्रमिव । पद्मा-जया विजया-अपराजिताभिधाभिश्चतसृभिर्देवीभिः प्रत्यक्षमुपास्यमान सेव्यमान नड्डूलनगरोपाश्रयापवरके य मानदेवसूरिमवेक्ष्य दृष्ट्वा अयं आचार्यः किं स्त्रीयुतो वनिताकलितोऽस्तीति संशयानः संदेहं कुर्वाणः । कश्चित् स्वय मलिनाशयतया दुष्टवचनप्रकारैः प्रणुन्नतभिकृष्टनिर्जरनिर्मितजनमायुपश्रयोपद्रवेन तिक्षशिलानगरोपद्रवेन गृहकार्योत्सर्गप्र-

१ 'तक्षशिला' इति पाठो भवेत

तदीये उद्द्योतनसूरिसंनिधिनि पदे सर्वदेवो नाम सूरिरजनि । किंभूतः । माहात्म्येन स्वप्रभावेन कृत्वा नम्रीकृता नमनशीला निर्मिता सर्वे समस्ता अपि देवा इन्द्रचन्द्रादयः सुरा येन । स कः । यः प्रभुः सर्वदेवसूरिर्गुणश्रिया शमदमसंयमधैर्यगाम्भीर्याद्यनेकगुणलक्ष्म्या अन्यत्रापि अनुगतः । आश्रित उत्कर्षे । क इव । तारापतिरिव । यथा चन्द्रस्तारकपर्षदा ताराश्रेण्या अनुगम्यते आश्रीयते । अत्र पर्षद्शब्दः श्रेणीवाची । 'उडुपरिषदः किं नार्हन्ती निशा किमनंशानिशी' इति नैषधे । अर्हतो भाव आर्हन्ती । 'अर्हतो नुम्च' इति विभाषया नुमविधानात् आर्हन्ती आर्हती रूपद्वयसिद्धिरिति प्रसङ्गाद्दर्शिता ॥

यो रामसेनाह्वपुरे व्रतीन्दुर्लब्धिश्रियं गौतमवद्दधानः ।
नाभेयचैत्ये महसेनसूनोर्जिनस्य मूर्तेर्विदधे प्रतिष्ठाम् ॥ ९८ ॥

यो व्रतीन्दुः सर्वदेवसूरिः रामसेना इत्याह्वा नाम यस्य तादृक् पुरे राममेनिनगरे नाभेयदेवस्य श्रीऋषभनाथस्य चैत्ये प्रासादे महसेननाम्नो नृपस्य सूनोर्नन्दनस्य श्रीचन्द्रप्रभस्वामिनः मूर्तेः प्रतिमायाः प्रतिष्ठां विदधे कृतवान् । सूरिः किं कुर्वाणः । गौतमवद्गौतमस्वामीव लब्धीनां तपःशक्तिविशेषाणां क्षीराश्रवादिकानां श्रियं शोभां दधानो धारयन् ॥

चन्द्रावतीशस्य नृपस्य नेत्र इवास योऽशेषविशेषदर्शी ।
तं क्लृप्तचैत्यं प्रतिबोध्य वाचा प्राव्राजयत्कुङ्कुणमन्त्रिणं यः ॥ ९९ ॥

यः सर्वदेवसूरिः कुङ्कुणनामानं मन्त्रिणं प्रधानं वाचा स्ववाणीविलासेन प्रतिबोध्य संसारविरक्तं कृत्वा प्राव्राजयद्दीक्षयामास । किंभूतं कुङ्कुणम् । क्लृप्तं निर्मापितं चैत्यं जिनप्रासादो येन । यः कुङ्कुणो मन्त्री चन्द्रावत्याः पुर्या ईशस्य स्वामिनः चण्डाउलिनगरनाथस्य नृपस्य राज्ञः नेत्र इवास नयनमिव बभूव । तद्द्वारैव सर्वकार्यार्थानां विलोकनत्वेन । किंभूतो यः । अशेषाः समस्ता ये विशेषाः षड्गुणशक्तित्रिकसामादिचतुष्कोपायादिकार्योपनिषदस्तान् पश्यति सम्यक्तया जानाति वक्तीत्येवंशीलः समग्रराजकार्यकुशल इत्यर्थः ॥ इति श्रीसर्वदेवसूरिः ॥

कुर्वन्निवासं गवि गौरवश्रीर्गिरामधीशो विबुधैरुपास्यः ।
श्रीदेवसूरिः किमु देवसूरिः पदे तदीयेऽप्यजनि क्रमेण ॥ १०० ॥

अपि पुनः तदीये सर्वदेवसंबन्धिनि पदे क्रमेण महावीरपट्टपरिपाट्या श्रीदेवसूरिरजनि जातः । उत्प्रेक्ष्यते—देवसूरिः देवसूरिर्बृहस्पतिः किमु देवानां सुराणामाचार्योऽध्यापकः । द्वयोरपि साधर्म्यं दर्शयति—किं कुर्वन् । गवि पृथिव्यां स्वर्गे च निवासं वसतिं कुर्वन् । पुनः किंभूतः । गौरवेण माहात्म्येन गुरुत्वेन शक्रादीनामध्यापकत्वेन । अथ वा गुरुर्बृहस्पतिर्जीवो देवाचार्यस्तत्त्वेन श्रीः शोभा यस्य । पुनः ... । गिरा

क इव । चक्रवर्तीव । यथा द्वात्रिंशत्सहस्रदेशाधिपतिश्चक्रवर्तीत्युच्यते । स सार्वभौमः वैताढ्यशैलद्विभागीकृतोत्तरार्धदक्षिणार्धभरतक्षेत्रस्य द्वयोरप्यर्धयोः गङ्गासिन्धुनदीभ्यां त्रिभिर्भागैर्विभक्तत्वात् । एको गङ्गातः प्राच्यां दिशि, द्वितीयो गङ्गासिन्धुमध्यवर्ती, तृतीयः सिन्धुनदीतः पश्चिमायाम् । एवं भूपीठस्य भारतक्षेत्रक्षोणीमण्डलस्य षट् खण्डान् जहाति । किं कुर्वन् । यतीभवन् । संसारोद्विग्नः साध्वाचारमङ्गीकुर्वन् । दीक्षा गृहन्नित्यर्थः । च पुनः सूरिः सकृदेकवारमेवारनालं काञ्जिकं पयः पिबति स्म । किं कुर्वन् । कदापि कस्मिन्नपि ऐश्वर्यमहत्त्वानुभवसमयेऽपि काये स्वशरीरे मम इत्यस्य भावो ममत्वं नैव दधन् ॥ इति श्रीमुनिचन्द्रसूरिः ।

निर्जीयते स्म क्वचनापि नायं कृतोपसर्गैरपि देववर्गैः ।

इतीव नाम्ना भुवि विश्रुतेन जज्ञेऽस्य पट्टेऽजितदेवसूरिः ॥ १०५ ॥

अस्य मुनिचन्द्रसूरेः पट्टे अजितदेव इति नाम्ना सूरिर्जज्ञे । उत्प्रेक्ष्यते—इतीव हेतोर्भुवि पृथिव्यां नाम्नाभिधानेन विख्यातेन । इति किम् । यदयं सूरिः कृता विहिता उपसर्गा विविधमनोवचनकायक्षोभनप्रकारा उपद्रवा यैस्तादृशैरपि देववर्गैः सुरसार्थैः क्वचनापि कुत्रापि काले देशे वा न निर्जीयते स्म नाभिभूत इति हेतोरजितदेव इति नाम्ना आसीत् ॥ इति श्रीअजितदेवसूरिः ॥

जगत्पुनानः सुमनःस्रवन्तीरयो जटाजूटमिवेन्दुमौलेः ।

अमुष्य पट्टं विजयादिसिंहोऽध्यासांबभूवाथ तपस्विसिंहः ॥ १०६ ॥

अथानन्तरममुष्याजितदेवसूरेः पट्टं विजय इति पदमादौ यत्र तादृशः सिंह एतावता विजयसिंहसूरिः अध्यासांबभूव आश्रयति स्म । किंभूतः । तपस्विषु तपःकारकेषु [illegible] सिंहः प्रधानः । क इव । सुमनःस्रवन्तीरय इव । यथा सुमनसां देवानां स्रवन्ती नदी गङ्गा तस्या रयः प्रवाहः इन्दुमौलेरीश्वरस्य जटाजूटं कपर्दम् । 'शंभोः कपर्दोऽस्य जटाजूटः' इति हैम्यात् । अयते । विजयसिंहो गङ्गाप्रवाहश्च किं कुर्वाणः । जगन्[illegible] पुनानः पवित्रीकुर्वाणः ॥

[illegible] श्रीसोमप्रभसूरी अमुष्य पट्टं नयतः स्म लक्ष्मीम् ।

[illegible] मानश्च बाहुबलिस्वनृनाविव नाभिसूनोः ॥ १०७ ॥

अमुष्य विजयसिंहसूरेः पट्टं [illegible] सोमप्रभनामा अपरो मणिरत्ननामा सूरी आस्ताम् [illegible] । [illegible] । यथा नाभिनाभ्रः [illegible] पुत्रौ । [illegible] न पुनर्द्वितीयो [illegible] पुत्रः [illegible] ॥ [illegible]

स मानदेवोऽजनि तस्य पट्टे वाग्देवता यन्मुखपद्मसद्म।
सुधाभृतं प्रास्य वचोविलासच्छलादिवोद्गारमिवातनोति ॥ ८६ ॥

तस्य समुद्रसूरेः पट्टे स भुवि विख्यातो यशोभिः प्रथितः श्रीमानदेवसूरिरजनि। स कः। यस्य मानदेवसूरेर्मुखपद्म वदनकमलमेव सद्म वसतिर्यस्यास्तादृशी वाग्देवता सरस्वती सुधामृतत्वादमृतं सुधारसं तृप्ता आकण्ठपानादतितृप्तिं प्राप्ता सती चारवो मनोज्ञा ये वाग्विलासा वचोविलासाः तेषां छलात्कपटात्तदुद्गारमनृतोद्गारमिवातनोति करोति ॥ इति द्वितीयश्रीमानदेवसूरिः ॥

पदे तदीये विबुधप्रभेण स भूयते सूरिपुरंदरेण।
येनाभिभूतः किल पुष्पधन्वा पुनर्युयुत्सुर्विषमायुधोऽभूत् ॥ ८७ ॥

तदीये मानदेवसूरिसंबन्धिनि पदे पदे विबुधप्रभेण सूरिपुरंदरेण आचार्यशक्रेण भूयते स संजातम्। येन श्रीविबुधप्रभसूरिणा अभिभूतः पराजितः पुष्पधन्वा कामः। किलेत्युत्प्रेक्षायाम्। काव्यवत्पललतायामुक्तत्वात्। पुनर्युयुत्सुर्द्वितीयवारं प्रभुणा समं योद्धुमिच्छुः सन् विषमानि तीक्ष्णानि दुर्जयान्यायुधानि शस्त्राणि यस्य तादृशोऽभूदिव। मृदुत्वात्तोऽभिभूयते न विषमास्त्रः ॥ इति विबुधप्रभसूरिः ॥

तत्पट्टपङ्केरुहमानसौकाः श्रीमाञ्जयानन्दविभुर्बभूव।
यस्याशयेऽमात्समयोऽप्यशेषः कुम्भोद्भवस्य प्रसृताविवाब्धिः ॥ ८८ ॥

श्रीर्लक्ष्मीः शोभा वा विद्यते यस्मिन् स श्रीमान् जयानन्दनामा विभुर्गच्छाधिपः तस्य विबुधप्रभसूरेः पट्ट स एव पङ्केरुहं कमलं तत्र मानसौका हंसो बभूव। स कः। यस्याशये हृदये अशेषः समग्रोऽपि समयः सिद्धान्तोऽमान्ममौ। आशयशब्देन हृदयमपि यथा। 'दयासमुद्रे स तदाशयेऽतिथी चकार कारुण्यरसापगा गिरः' इति नैषधे। आशयो मन इति तद्वृत्तिः। कस्मिन्निव। प्रसृताविव। यथा कुम्भोद्भवस्यागस्तिमुनेः प्रसृतौ प्रसारिताञ्जलौ पाणौ अब्धिः समुद्रो भाति स्म ॥ इति जयानन्दसूरिः ॥

यदाननं चन्द्रति दन्तकान्तिर्ज्योत्स्नायते भ्रूयुगमङ्कतीह।
वाचां विलासोऽपि सुधायते तत्पदे मुनीन्द्रः स रविप्रभोऽभूत् ॥८९॥

तस्य जयानन्दसूरेः पदे स रविप्रभनामा मुनीन्द्रोऽभूत्। स कः। यस्य रविप्रभसूरेराननं मुखं चन्द्रति चन्द्र इवाचरति। 'सर्वप्रातिपदिकेभ्यः क्विप् वा आचारे इत्येके' इति क्विप्प्रत्यये तदुदाहरणानि कृष्ण इवाचरतीति कृष्णति स्वति कृष्णामास सामासेति प्रक्रियाकौमुद्याम्, तथात्रापीति। यस्य दन्तानां कान्तिर्ज्योत्स्नायते चन्द्रिकेवाचरति। 'कर्तुः क्यङ् सलोपश्च'। उपमानात्कर्तुः सुबन्तादाचारेऽर्थे क्यङ् स्यात्सलोपश्च। 'अकृत्सार्वधातुके इति दीर्घः' इति प्रक्रियायाम्। इह मुखचन्द्रे भ्रूयुगमङ्कति लाञ्छनवदाचरति। अत्राप्याचरणार्थे क्विप्। अपि पुनरिह वक्तविधौ वाचां

ततस्तपा इति नामकथनानन्तरं तद्दिनमारभ्य च अस्मात्जगच्चन्द्रसूरेर्बृहद्गच्छस्य त-पागच्छ इत्याख्या नाम प्रादुरासीत्प्रकटीबभूव। कस्मादिव। नेत्रादिव। यथा अत्रेस्तापसविशेषस्य नयनाद्द्विजराजस्य चन्द्रस्य लेखा मण्डली प्रादुर्भूता। च पुनर्यस्मात्प्र-भोर्मुमुक्षुलक्ष्म्या यतिश्रिया अदीपि अधिकं दीप्यते स्म। कस्मादिव। वसन्तमासा-दिव। यथा मधुसमयाद्भानोर्भास्करस्य भासा प्रभया दीप्यते॥ इति श्रीजगच्चन्द्रसूरिः॥ इति बृहद्गच्छस्य तपागच्छ इति षष्ठं नाम संजातम्॥

देवेन्द्रकर्णाभरणीभवद्भिर्यशोभिरुद्भासितविष्टपेन।
देवेन्द्रदेवेन बभेऽस्य पट्टे विष्णोर्यथा वक्षसि कौस्तुभेन॥ ११२॥

अस्य श्रीजगच्चन्द्रसूरेः पट्टे देवेन्द्र इति नाम यस्य तादृशेन देवेन भट्टारकेण। 'पादा भट्टारको देवः प्रयोज्याः पूज्यनामतः' इति हैमीवचनात्। बभे शुशुभे। किंभूतेन। देवेन्द्राणां सुरसार्वभौमानां कर्णयोः श्रवणयोराभरणीभवद्भिर्भूषणं संपद्यमानैः क-र्णपूरायमाणैः गीतगोष्ठीषु तुम्बुरुप्रमुखसुरगन्धर्वगणजेगीयमानयद्गुणश्रवणैकतानाः सु-रेन्द्राः संजायन्ते इत्यर्थः। यशोभिः कृत्वा उद्भासितं शोभां नीतं विष्टपं विश्वं येन। केनेव। कौस्तुभेनेव। यथेत्युपमाने। इवार्थे वा। यथा विष्णोर्नारायणस्य वक्षसि हृदये कौस्तुभेन समुद्रोत्पन्नरत्नविशेषेण उद्भास्यते॥ इति श्रीदेवेन्द्रसूरिः॥

निजाङ्गनोद्गीतयदीयकीर्तिं शुश्रूषुरक्षिस्र(श्र)वसामृभुक्षाः।
चक्षुःसहस्रे रसिकः किमाधात्पट्टे स तस्याजनि धर्मघोषः॥ ११३॥

तस्य देवेन्द्रसूरेः पट्टे स मन्त्रादिशक्तिमान् मुनीनां विघ्नहर्ता प्रसिद्धः धर्मघोषसूरिः अजनि जातः। यस्य निजस्य शेषनागात्मनः अङ्गनाभिः कामिनीभिः धर्मगीतगोष्ठ्यामु-त्प्राबल्येन हर्षोत्कृष्टतया वा गीता गानविषयं नीता यदीया श्रीधर्मघोषसंबन्धिनी कीर्तिं शुश्रूषुः श्रोतुमिच्छुः रसिकः जगदद्भुतगुणगणप्रगुणयद्गीतगानाकर्णनोत्कः सन्। अक्षिणी नेत्रे एव स्र(श्र)वसी कर्णौ येषां तेषामक्षिश्रवसां नागानामृभुक्षा इन्द्रः। नागानां हि चक्षूंष्येव कर्णाः, न तु पृथक् श्रवणेन्द्रियभाजः। यतः 'अश्रोत्राः फणिनस्तदेव रु-चिरं नो चेदहिस्वामिना' इति खण्डप्रशस्तौ। उत्प्रेक्ष्यते—नागेन्द्रः चक्षुःसहस्रे नयन-विंशतिशती(?) आधाच्चकार दधार वा। 'शेषो नागाधिपोऽनन्तो द्विसहस्राक्ष आलुकः' इति हैम्याम्। भोगिनो हि नयनैः पश्यन्ति शृण्वन्ति च यतः। 'अदस्तदाकर्णि फ-लाढ्यजीवितं दृशोर्द्वयं नस्तदवीक्षि चाफलम्' इति नैषधे॥

मिथ्यामतोत्सर्पणबद्धकक्षं प्रेक्ष्य क्षितौ जीर्णकपर्दिनं यः।
प्रबोध्य वाचा जितराजबिम्बाधिष्ठायकं पूर्वमिव व्यधत्त॥ ११४॥

यः श्रीधर्मघोषसूरिः जावडिनिर्मितश्रीशत्रुंजयोद्धारसमये वज्रस्वामिमाहात्म्यान्नवी-नकपर्दियक्षेण त्याजितशत्रुंजयं जीर्णकपर्दिराजं गोमुखापरपर्यायं वाचा स्वमधुरया गिरा

श्रीमानदेवेन्द्राद्विमलादिचन्द्रात्पदाब्जभृङ्गीभवदिन्द्रचन्द्रात् ।
अमुष्य पट्टः श्रियमश्नुते स्म परंतपान्नृप इव प्रतापात् ॥ ९३ ॥

विमलमिति पदमादौ यस्य तादृशाच्चन्द्रात् एतावता विमलचन्द्रात् सूरीश्वरात् अमुष्य श्रीमानदेवसूरेः पट्टः श्रियं शोभामश्नुते स्म । किंभूतो विमलचन्द्रः । पदाब्जयोश्चरणकमलयोर्भृङ्गीभवन्तो भ्रमरा संपद्यमाना इन्द्राः शक्राश्चन्द्राः शशाङ्का यस्य । कस्मादिव । प्रतापादिव । यथा—नृपो राजा परं वैरिणं तापयतीति सत्यार्थात्परंतपात्प्रतापात् राजा श्रीं शोभामश्नुते ॥ इति विमलचन्द्रसूरिः ॥

रेजेऽस्य पट्टे स्मररूपधेयः सूरीन्दुरुद्द्योतननामधेयः ।
दिग्वारणेन्द्रा इव सूरिचन्द्राः संजज्ञिरे यत्पदधारिणोऽष्टौ ॥ ९४ ॥

अस्य विमलचन्द्रसूरेः पट्टे पट्टे उद्द्योतननामा सूरीन्दुः रेजे बभासे । किंभूतः । स्मरः काम तद्वद्रूपधेयं प्रशस्तं रूपं यस्य । 'य वभार दहन खलु ताप रूपधेयभरमस्य विसृज्य' इति नैषधे । यस्य उद्द्योतनसूरेः पदधारिणः पट्टधराः अष्टौ अष्टसंख्याकाः संजज्ञिरे संजाताः । के इव । दिग्वारणा इव । यथा—ऐरावत–पुण्डरीक–वामन–कुमुद–अञ्जन–पुष्पदन्त–सार्वभौम–सुप्रतीक–इति नामानः अष्टौ दिग्गजेन्द्राः भवन्ति ॥

मुहूर्तमद्वैतमवेत्य टेलीग्रामस्य यः सीम्नि बृहद्वटाधः ।
अस्थापयच्चैत्यतरोस्तलेऽष्टौ पार्श्वे गणेन्द्रानिव काशिकुञ्जे ॥ ९५ ॥

य उद्द्योतनसूरिः अद्वैतं समग्रग्रहगोचरोच्चग्रहनवांशादिविशुद्धमुहूर्तमसाधारणवेलामवेत्य ज्ञात्वा टेलीनाम्नो ग्रामस्य सीम्नि सीमायां बृहद्वटाधो महतो न्यग्रोधद्रुमस्य तले अधस्तादष्टौ अष्टौ गणेन्द्रानाचार्यानस्थापयत् स्थापयति स्म । क इव । पार्श्व इव । यथा श्रीपार्श्वनाथः काशिकुञ्जे वाराणसीपुरीपरिसरवने समवसरणमध्यस्थितसर्वजनच्छायाकारिकेवलज्ञानोत्पत्तिकपादपधवलतरुस्तस्य तले अष्टौ गणधरान् स्थापितवान् ॥

शाखाप्रशाखाभिरमुष्य वृद्धिर्बृहद्वटस्येव यतो भवित्री ।
ततो बृहद्गच्छ इतीह नामापरं गणस्य प्रकटीबभूव ॥ ९६ ॥

यतो यस्मात्कारणात् शाखा वयरीमुख्याः प्रशाखास्तदुद्भवा अपरापरनामगोत्राख्यास्ताभिः कृत्वा अमुष्य गणस्य वृद्धिर्भवित्री विस्तारो भावी । कस्येव । बृहद्वटस्येव । यथा बृहतो महतो वृक्षस्य या वटस्य न्यग्रोधस्य प्लक्षवृक्षस्य शाखाप्रशाखाभिर्वृद्धिर्महान् विस्तारो भवति । ततः कारणात् इह जगति भूमीमण्डले चान्द्रगच्छस्य बृहद्गच्छ इत्युक्त्या 'वडगच्छ' इत्यपरं पराम नाम प्रकटीबभूव । विख्यातं जातम् ॥ इति श्रीउद्द्योतनसूरिः । अत्र गच्छस्य बृहद्गच्छश्चवडगच्छ इति परमं नाम जातम् ॥

माहात्म्यनम्रीकृतसर्वदेवः पदे तदीयेऽजनि सर्वदेवः ।
तारापतिस्तारकपर्षदेव गुणश्रिया यः प्रभुरन्वयायि ॥ ९७ ॥

यः श्रीधर्मघोषसूरिः पुष्पकरण्डिन्यामुज्जयिन्याम् । 'उज्जयिनी स्याद्विशालावन्ती पुष्पकरण्डिनी' इति हैम्याम् । तिष्ठतीति पुष्पकरण्डिनीस्थम्‌ कमपि सिद्धचेटकपेटकमत एव दुष्टचेष्टितैर्भयकरप्रकारैः साधूनां भापने भयोत्पादने बद्धकक्ष मन्त्रीभून कोऽपि साधुस्त प्रतिकर्तु न शक्नोति अतएव तद्भयकरणप्रकारमाह—प्राक् साधुविहारनिषेधक गुर्वागमने च गोचरीगतसाधूना प्रश्ने स्थाम्यथ । गुरुशिक्षितैर्मैरुक्तम् । स्थिताः स्म । ततो महत्कुद्दालतुल्यदन्तानदर्शयद्योगी । साधवः कपोणिकां दर्शयित्वा गुरुपार्श्वं गता । तत उपाश्रयेऽपि अतिभयकरप्रचुरोन्दरबिडालकुक्कुरश्रृगालश्वापदवृश्चिकभुजगादिदर्शनादिना गुरुमपि भापनोद्यत प्रभुणा च जैनमन्त्रस्मरणानुभावेन पुरजननृपतच्छिष्यसमक्ष मन्त्राधिष्ठायकेन बद्ध्वा पुरप्रासादशिखरसंघटनास्फालनपूर्वक घनघृष्यमाणप्रवहच्छोणितशरीर शिष्या अह म्रिये म्रिये कोऽपि मामवत्विति पुनः पुनर्दीनभाषिण वेदनया पूत्कुर्वाण गगनेनोपाश्रये नीत योगिन पदावनम्र स्वचरणयोर्नमनशील विदधे कृतवान् । क इव । अर्हन्निव । यथा अन्तिमश्चरमश्चतुर्विंशतितमोऽर्हन् जिनः श्रीमन्महावीरदेवः अस्थिकग्रामस्थायुकशूलपाणिनामान यक्ष स्वचरणसेवापरायण चक्रे । सोऽपि किंभूतः । दुष्टैर्जीवप्रणाशनकरैश्चेष्टितैरुपसर्गैर्भगवतो भापनोद्यतम् (?) ॥

> यस्योपदेशान्नृपमन्त्रिपृथ्वीधरश्चतुर्भिः सहितामशीतिम् ।
> ज्ञातीरिवोद्धर्तुमिदंमिताः स्वा(स्वा) व्यधापयत्तीर्थकृतां विहारान् ॥ ११८ ॥

यस्य श्रीधर्मघोषसूरेरुपदेशाद्वाचा नृपस्य मालवमण्डलपतिमण्डल पाचलस्थपातिसाहेर्मन्त्री प्रधानः पृथ्वीधरः लोकोक्त्या च पेथडदे इति नाम्ना चतुर्भिः सहिता युतामशीतिमेतावता चतुरशीतिं तीर्थकृता श्रीजिनाना विहारान् प्रासादान् व्यधापयत्कारितवान् । उत्प्रेक्ष्यते—इदमिता प्रासादसंख्याश्चतुर्विंशतिप्रमाणाः स्वा स्वकीयाः वणिक्संबन्धिनीश्चतुरशीतिज्ञातीरुद्धर्तुं संसारान्निस्तारयितुमिव । तथा तस्योपदेशाच्च श्रीशत्रुंजयगिरिनारिसंघपतीभवन् रैवतगिरौ च इदमस्माक तीर्थमिदमस्माक तीर्थमिति मिथो दिगम्बरैः सह विवादे 'य इन्द्रमाला परिधत्ते तस्येद तीर्थम्' इति संघवृद्धैः प्रोक्ते सुवर्णसिद्धयाम्नायेन स्वकृतसुवर्णषट्पञ्चाशद्घटीभिः इन्द्रमाला परिहितवान् , तथा शत्रुंजयोज्जयन्तमूलप्रासादशिखरदण्डयोरेकसौवर्णध्वजाधिरोपणादिना चाष्टौ घटीर्व्ययितवांश्चेति शेषः ॥

> दंशादहेर्ग्राहितकाष्ठभारविषौषधीसज्जतनुर्निशान्ते ।
> महात्मवद्यो विकृतीर्विहाय वृत्तिं व्यधादेव युगंधरीभिः ॥ ११९ ॥

यो धर्मघोषसूरिः युगंधरीभिरेव वृत्तिमाहार व्यधात् । अन्यधान्यप्रत्याख्यान चकारेत्यर्थः । किं कृत्वा । घृतादिकाः षड्विकृतीर्विहाय त्यक्त्वा विमुच्य । किंवत् । महात्मवत् । यथा महात्मा सुजनोविकृतीः परद्रोहादिप्रकारान् पिशुनता वा विजहाति । किंभूतः । अहेर्भुजङ्गमस्य दंशाद्भक्षणात् निशान्ते राज्यवसाने प्रभाते ग्राहिता श्राद्धपार्श्वे समानायिता या काष्ठभाराद्विषस्यौषधी वल्ली विषापहारिणी लता तया सज्जा निर्विषा तनुः

वाचामधीशः । 'वागीशो वाक्पतौ वाग्ग्मी' इति हैम्याम् । 'गीर्बृहत्योः पति' इत्यपि च । वाचस्पतित्वात् । पुनः किंभूतः । विबुधैः पण्डितैः सुरैश्च उपास्यः सेव्यः । 'विबुधः पण्डिते सुरे' इत्यनेकार्थः ॥ इति श्रीदेवसूरिः ॥

दोषोदयोदीततमःप्रपञ्चव्यापादनव्यापृतिदीक्षितेन ।
श्रीसर्वदेवेन पदं तदीयमदीपि दीपेन यथा निकेतम् ॥ १०१ ॥

श्रीसर्वदेवेन तदीयं देवसूरिसबन्धिपदमदीपि उद्द्योतितम् । केनेव । दीपेनेव । अत्र यथा इवार्थे । यथा कज्जलध्वजेन निकेतं मन्दिरं दीप्यते । किंभूतेन सर्वदेवेन दिपेन च । दोषाणामपगुणानां निशाना च उदयेनाविर्भावेन उदीतानि समेत्य इयतानि अथवा दोषाणां सम्भवेन प्रकटीभूतानि यानि तमांसि पापानि अन्धकाराणि च तेषां प्रपञ्चो विस्तारः तस्य व्यापादनं तदेव व्यापृतिर्व्यापारस्तत्र दीक्षितेन गृहीतव्रतेन । सर्वज्ञेनेत्यर्थः । 'उदीतमातङ्कितवानशङ्कत' इति नैषधे । 'सकेतनिकेतमाप्ता' इत्यपि तत्रैव । ईङ् गत्यर्थधातुः ॥ इति द्वितीयश्रीसर्वदेवसूरिः ॥

श्रीमद्यशोभद्रगणावनीन्द्रः श्रीनेमिचन्द्रव्रतिपुङ्गवश्च ।
तत्पट्टमाकन्दमुभौ भजेते शुकोऽन्यपुष्टश्च यथा विहंगौ ॥ १०२ ॥

उभौ सूरीन्द्रौ तस्य सर्वदेवसूरेः पट्ट एव माकन्दः सहकारस्तं भजेते सश्रयेते । उभौ कौ । एको यशोभद्रनामा गणावनीन्द्रः गच्छाधिराजः । च पुनः परः श्रीनेमिचन्द्रनामा व्रतिनां साधूनां मध्ये पुङ्गवः प्रधानो धुरंधरत्वादृषभो वा । यथेत्युपमाने । काविव । विहगाविव । यथा उभौ विहगौ माकन्दं भजेते । उभौ कौ । एकः शुकः कीरः, अपरोऽन्यपुष्टः कोकिलः ॥ इति यशोभद्रनेमीचन्द्रसूरीन्द्रौ ॥

तयोः पदे श्रीमुनिचन्द्रसूरिरभूत्ततो निर्मितनैकशास्त्रः ।
शास्त्रे न कुत्रापि तदीयबुद्धिश्चस्खाल वीतिर्नेव समीरणस्य ॥ १०२ ॥

ततोऽनन्तरं तयोर्यशोभद्रनेमिचन्द्रमुनीन्द्रयोः पदे पट्टे श्रीमुनिचन्द्रसूरिरभूत् । किंभूतः । निर्मितानि नवीनानि कृतानि स्वयं नैकानि बहूनि शास्त्राणि ग्रन्था येन सः । नवीनग्रन्थनिष्पादनमसाधारणमेधां विना न स्यादत एवोच्यते । तदीया श्रीमुनिचन्द्रसूरिसंबन्धिनी बुद्धिर्मतिः कुत्रापि कस्मिन्नपि शास्त्रे न चस्खाल न स्खलिता न [illegible] भूता । अस्खलितानुस्यूतप्रसारा [illegible] । [illegible] । समीरणस्य पवनस्य वीतिर्गतिः कुत्रापि [illegible] न स्खलति ॥

नृपीर्जराण्टानिव चक्रवर्ती यतीश[illegible]क्षितीशो [illegible] स ।
यत्रापि [illegible] न [illegible] पर्यो पुनर्गे [illegible] ॥ १०४ ॥

स श्रीमुनीचन्द्रसूरि [illegible]
[illegible] । [illegible]

[illegible]स्य। येन श्रीदेवसुन्दरगुरुणा मदेन(दनेन) मुन्मोहसंभेदेन गर्वेण वा। अथ वा जाता-[illegible]कृत्वचनम्। अष्टभिर्मदैः सम माया शठता दम्भचारिता वा व्यपासत निरस्ता। केनेव। [illegible]सोमसुन्दरेणेव यथा प्रभातेन तिमिरेणान्धकारेण सार्धं तमस्विनी रात्रिर्व्यपास्यते। अहो-[illegible]गुणैस्तत्र तुल्यनाम, पृथक् पदद्वयी वा॥ इति श्रीदेवसुन्दरसूरिः॥

घूकैरर्कमिव द्विपद्भिरुदये हन्तुं परैः प्रेषितं
कंचिच्चन्द्ररुचा प्रमादविमुखं स्वापेऽपि दृष्ट्वा प्रभुम्।
क्षाम्यन्तं गदिताखिलव्यतिकरं संबोध्य योऽदीक्षय-
त्स श्रीमानथ सोमसुन्दरगुरुर्भेजे तदीयं पदम्॥ १२३॥

[illegible] स प्रसिद्धमहिमा श्रीमान् जगति संयमसंवेगादिगुणैः कृत्वा शोभावान् [illegible] देवसुन्दरसूरिसंनिधि पद भेजे [illegible]तवान्। [illegible] पुमांसं संबोध्य प्रतिबो- [illegible] प्राव्राजयत्। कंचित् किंभूतम्। उ- [illegible] उदये सूरिमाहात्म्यदर्शनचमत्कृतचेतो- [illegible] द्विपद्भिः वैरायमाणैः परैः [illegible] प्रेषितं प्रहितम्। पुनः किं कुर्वन्तम्। [illegible] जालान्तरागतचन्द्रिकया स्वापे निद्रा- [illegible] प्रमादरहितमित्यर्थः। रजोहरणेन [illegible] दृष्ट्वा दृग्गोचरीकृत्य [illegible] कृपापीयूषपारावारा॥ [illegible] प्रेषितेन मया [illegible] प्रत्युत रमणीया, [illegible] इति [illegible]॥

[illegible]

[illegible]॥ १२४॥

[illegible]

श्रीमज्जगच्चन्द्र इदंपदश्रीललामलीलायितमाततान ।
येनोज्झि शैथिल्यपथस्तटाको घनाविलो मानसवासिनेव ॥ १०८ ॥

श्रीमानतिशायिशोभाभाजन जगच्चन्द्र इति नाम्ना सूरिरिद पदस्य इदमदः एतदित्यादिशब्दा. समासान्ता अपि दृश्यन्ते । यथा नैषधे—'इद यशांसि द्विपत' सुधारुच' इति । अनयो. सोमप्रभमणिरत्नसूरीन्द्रयोः पट्टस्य श्रियो लक्ष्म्या ललाम्नस्तिलकस्य ललामस्य वा । ललामशब्दो नान्तोऽदन्तश्च । लीलायित लीलावदाचरित लीलयाचरित वा आततान कुरुते स्म । गुरुपट्टलक्ष्मीतिलकमासीदित्यर्थः । येन श्रीजगच्चन्द्रसूरिणा शैथिल्यपथः स्वगच्छवासिसाधुजनानां कलिकालानुभावात्संयमपालने हीनतमाध्यवसायभाजा शिथिलताकलितो मार्ग औज्झि त्यक्तः । प्राचीनमुनीनां मार्ग आदृत इत्यर्थ· । त्यक्तः केनेव । मानसवासिनेव । यथा हंसेन घनेन मेघघटया आविलः कलुषीभूतजलस्तटाक उज्झ्यते । वर्षाकाले हि हंसा जलदजलागमनजम्बालबहुलीभूतपयांसि सरांसि सत्यज्य मानसमेवाद्रियन्ते । 'क्रुद्धोल्कनखप्रपातविगलत्पक्षा अपि स्वाश्रय ये नोज्झन्ति पुरीषपुष्टवपुषस्ते केचिदन्ये द्विजाः। ये तु स्वर्गतरङ्गिणीबिसलतालेशेन सवर्धिता गङ्गानीरमपि त्यजन्ति कलुष ते राजहंसा वयम् ॥' इति सूक्ते ॥

द्वात्रिंशदाशावसनैरभेद्यो वादं सृजन्हीरकवद्यदासीत् ।
आघाटभूपेन स हीरलाद्यो नाम्ना जगच्चन्द्र इति न्यगादि ॥ १०९ ॥

यद्यस्मात्कारणाद्यः श्रीजगच्चन्द्रसूरिः द्वात्रिंशत्संख्याकैराशावसनैर्दिगम्बराचार्यैर्वादिभि सार्धं वाद सृजन् कुर्वन् हीरकवद्वज्रमणिरिव अभेद्यो भेत्तुमशक्यः. अजेय आसीत् तत्कारणादाघाटनामनगरस्य भूपेन राज्ञा सम्प्रति लोके आहडनगरमिति प्रसिद्धपुरस्य स्वामिना स सूरि. इदमेतन्न्यगादि प्रोक्त. । इद किम् । यदयं सूरीन्द्रो नाम्ना हीरला इति पदमाद्य यत्र तादृशो जगच्चन्द्र एतावता हीरलाजगच्चन्द्रसूरिरिति कथित· ॥

आचाम्लकैर्द्वादशहायनान्ते तपेत्यवापद्बिरुदं मुनीन्दुः ।
महाहवैर्वैरिविनिर्जयान्ते भर्तेव भूमेर्जितकाशिसंज्ञाम् ॥ ११० ॥

यो मुनीन्दुः श्रीजगच्चन्द्रसूरि निरन्तरनिर्मितैराचाम्लकैः केवलजलान्तर्भक्तभक्षणलक्षणतपोविशेषैः कृत्वा द्वादशसंख्याकानां हायनाना वर्षाणामन्तेऽवसाने तपा इति बिरुदमवापत् प्राप । द्वादशवत्सरीं यावन्निरन्तरमाचाम्लान् कुर्वाण य प्रेक्ष्य नृपेण प्रोक्त यदसौ महातपा दृश्यन्ते तदा तपा इति बिरुदवान् प्रभुरभूदित्यर्थ । क. १७ । भूमिभर्तेव । यथा पृथ्वीपतिर्महद्भिर्युद्धैराहवै संग्रामै कृत्वा वैरिणा शत्रूणा विनिर्जयस्य पराभवनस्य प्रान्ते पर्यन्ते जितकाशी जिताहव इति संज्ञ प्राप्नोति ॥

असावतः प्रादुरभूदपारव्या नेत्रादिवात्रेर्द्विजराजलेखा ।
अदीपि यस्माद्धि मुमुक्षुलक्ष्म्या वसन्तमासादिव भानुभासा ॥ १११ ॥

[illegible] । [illegible] जायते । सूर्यस्य दक्षिणाशां तु ते [illegible] [illegible] । [illegible] पताका । केनापि [illegible] [illegible] इति [illegible] ॥

[illegible] श्रीपुण्डरीको [illegible] ।
[illegible] नागादि [illegible] ॥ १२८ ॥

[illegible] इति नाम्ना सूरिराजस्य । [illegible] । [illegible] पुण्डरीकनाम्ना [illegible] पताका [illegible] । [illegible] [illegible] [illegible] ॥

[illegible]
[illegible] ।
[illegible]
[illegible] ॥ १२९ ॥

[illegible]

गणिनोऽस्य गन्धरत्नधारिणं विधाय जिनराजस्य तीर्थं कृतो बिम्बस्य प्रतिमाया अधिष्ठायक स्थापनं चकार । कमिव । पूर्वमिव । यथा पूर्वं विमलाचले न्यपभगूर्तेरधिष्ठायको ऽभूत्तथैव तत्रापि कृत । किं कृत्वा । प्रेक्ष्य दृष्ट्वा । अर्थात् कपर्दिनम् । किंभूतम् । मिथ्यामतस्य निराकरणेन मिथ्यागमनान्यस्पर्द्धिन्याः पनेर्ग्गारोपेण मिथ्यात्वस्रोतसर्पणे शुद्धिविधाने वज्राकक्षा- द्वीनारो येन । कलाम् । क्षितौ देवकपत्तनादिभूमौ ॥

शिष्यार्थनानिर्मितसंस्तवस्यानुभावतो देवकपत्तनेऽब्धिः ।
भूपस्य शुश्रूषुरिवास्य रत्नं तरङ्गहस्तैरुपदीचकार ॥ ११५ ॥

कौतुकान्मणिदर्शनोत्कण्ठया वा निजशिष्याणामर्थनया याच्ञया आग्रहेण वा निर्मितो रचितोऽर्थान्मन्त्रमय स्तव स्तोत्र तस्यानुभावत प्रभावात् देवकपत्तनसमीपसमुद्र अस्य श्रीधर्मघोषसूरेस्तरङ्गा कल्लोला एव हस्तास्तै रत्न मणिमुपदीचकार ढौकयामास । तेषा च स निर्ग्रन्थत्वेनाग्रहणाभावादम्बुधिः स्वतरङ्गहस्तोपरि रत्न दर्शयामासेत्यर्थः । कस्येव । भूपस्येव । यथा शुश्रूषु सेवा कर्तुमिच्छु पुमान् राज्ञो रत्नमुपदीकुरुते ॥

विद्यापुरे योऽखिलशाकिनीनामुपद्रवं द्रावयति स्म सूरिः ।
श्रीहेमचन्द्रो भृगुकच्छसंज्ञे पुरे यथा दुर्धरयोगिनीनाम् ॥ ११६ ॥

य श्रीधर्मघोषसूरिः प्राक् साधुजनसंतापकारिकाणा स्वागमने पट्टकादिमण्डन मांस- लोहकटकीभूतपायसचटकविदारण च गुरुशयनपट्टिकोत्पाटनचधरानयनमित्याद्युपद्रववि- धायिकाना श्रीविकानामधारिकाणामखिलाना सर्वासा शाकिनीना सिद्धसीकोत्तरिकाणा- मुपसर्गमुपद्रव द्रावयति स्म । चय(त्व)रे गमनानन्तर गुरुभिरुच्छायाभिमन्त्रितचतु सूचीनां पट्टिकाचतु पादोपरिक्षेपणेन स्तम्भिताना विभातप्रायविभावर्या विवसनाना तासां बहु- विलपनाननाङ्गुलीक्षेपणनृपतिमृतिभीतिनिवेदनप्रदादिसत्यवाग्बन्धप्रदाननगरजनविज्ञप्त्य- वधारणालयान्तःपट्टिकानयनपूर्वक निवारितान् साधुजनान् निरुपद्रवाश्चक्रे । क इव । श्रीहे- मचन्द्र इव । यथा श्रीहेमाचार्य भृगुकच्छ इति सज्ञा नाम यस्य तादृशे पुरे स्वनिर्मापित- श्रीमुनिसुव्रतस्वामिप्रासादे प्रह्लादाद्भगवत्पूजां प्रणीय राय चैत्याकाशभूमौ नृत्य कुर्वतस्त- दवसरे कुत्रचित् प्रयान्तीनां दुर्धराणामुत्कटाना दुष्टानां चतु षष्टिमिताना योगिनीना- मन्यन्तरीविशेषाणा दोषे सजाते रात्ति निश्चेष्टकाष्ठीभूताम्रमन्त्रिणो ज्ञानज्ञातान्त पवन- साधनया गगनमार्गेण क्षणेनागत श्रीहेमचन्द्रसूरि समेत्य सार्ध सगेतयशोभद्रगणिता सिन्धुदेवीप्रासादे गत्वा रूपादानात्सिन्धुदेवतया भापणकृते जिह्वाकर्षणादतिरोपजुषा ग- णिनो दृष(रा)लमध्ये कर्करोपरिमुशलप्रहारप्रदानाप्राहि ममाहीति सिन्धुदेवीशरणीभृताभि- स्ताभि सम सिन्धुदेवी सयशोभद्रश्रीहेमचन्द्रसूरिं सानुनय पदयोः प्रणनाम । तद्वाग्बन्ध- कपूर्वक सर्वदेवानामुपद्रव विद्रावितवान् आम्रभट च सज्जीकृतवान् ॥

यो योगिनं पुष्पकरण्डिनीस्थं दुश्चेष्टितैर्गोपनबद्धकक्षम् ।
पादावनम्रं विदधेऽन्तिगोऽर्हन्निवास्थिकग्रामिकशूलपाणिम् ॥ ११७ ॥

येनात्मा शिथिलीभवन्मुनिपथादप्युद्धृतः सूरिणा
संसाराम्बुनिधेरिवोद्धतकुदृग्यादोव्रजव्याकुलात् ॥ १३३ ॥

यः श्रीआनन्दविमलसूरिः जन्मिभिर्भविकैः शिश्रिये श्रितः । किं कृत्वा । कुदृशः सौगतादीन् च पुनरशेषान् समस्तान् कुपक्षिकान् लुम्पाकप्रमुखान् त्यक्त्वा विमुच्य श्रितः । कैरिव । रोलम्बैरिव । यथा भ्रमरैः किंपाकनामानो महीरुहा महाकालपादपा विषवृक्षास्तान्विहाय दूरेणापास्य पारिजातशिखरी मन्दारनामा द्रुमो वृक्षविशेषः कश्चित्सेव्यते । अथ वा कल्पवृक्षविशेषः । कल्प, पारिजातः, मन्दार, हरिचन्दन, संतान', एते पञ्चापि देवद्रुमाः । कल्पद्रुमेष्वपि विशेषः पारिजातः । यथा रघौ—'कल्पद्रुमाणामिव पारिजातः' इति । अपि पुनर्येन भगवता शिथिलीभवन् प्रमादपदवीं परिगच्छन् यो मुनीनां साधूनां पन्था मार्गस्तस्मादात्मा स्वजीव उद्धृतः । उत्प्रेक्ष्यते—उद्धता उत्कटा ये कुदृशो दुर्वादिनः नैयायिकादयः परपक्षिका कुमतमतोद्बोधका वा त एव यादोव्रजा दुष्टजलचरनिकरा' मकरादयस्तैर्व्याकुलात्संकीर्णपरिपूर्णीभूताद्भयंकराद्वा संसारोऽनन्तधाभवपरम्पराभ्रमणरूप स एवापारत्वादम्बुधिः समुद्रस्तस्मादिवोद्धृतः पारं प्रापित' ॥

शुद्धां क्रियामुद्धरतोऽस्य भाविनीमिद्धत्प्रवृद्धिस्तमितीव शंसितुम् ।
स्वप्नेऽनुयुक्तेरनु कस्यचिज्जिनध्यातुर्द्वितीयेन्दुरदर्शयन्निजम् ॥ १३४ ॥

जिनस्य श्रीपार्श्वनाथस्य ध्यातुर्ध्यानकर्तुः । पार्श्वनाथमन्त्राराधकस्येत्यर्थः । कुमरगिरिगम्भस्य कस्यचित् श्राद्धस्यानुयुक्तेः प्रश्नादनु पश्चात्स्वप्ने स्वापजागरावस्थायामुपविष्टस्यैव प्रभो पुरः किंचिन्निद्रानिमीलितनयनस्य द्वितीयेन्दुः उदयद्वितीयादिनचन्द्रः निजमात्मानमदर्शयत् दर्शयति स्म । उत्प्रेक्ष्यते—इत्यमुना प्रकारेण शंसितुं कथयितुमिव । इति किम् । मद्वचथाय विविधातोद्यवादनजननमस्करणमहोत्सवविधानपूर्वकमहन्नुदितो दिने दिने चन्द्रिकाकलादिभिर्मम वृद्धिर्भाविनी । तथा—शुद्धां निर्दोषां क्रियां यथावत्साधुमार्गानुष्ठानमुद्धरतोऽनुतिष्ठतः । विशुद्धक्रियोद्धारं विदधत इत्यर्थः । अस्य श्रीआनन्दविमलसूरेः प्रकर्षेण शिष्यप्रशिष्यमाहात्म्यादिभिर्वृद्धिर्भाविनी भविष्यतीति । तथा—क्रियोद्धारविधित्सुना सूरीन्द्रेण कश्चित्सिद्धश्रीपार्श्वनाथमन्त्रः श्राद्धः प्रश्न कृतस्तेन च ध्यानं विदधता किंचिन्निद्रामुद्रितनेत्रेणाभ्युदयमानं द्वितीयाचन्द्रं दृष्ट्वा स्वप्नेन प्रभुपुरः प्रोक्तं । यथायं द्वितीयाचन्द्र इव दिने दिने वर्धमानाभ्युदयस्त्वं भविष्यसि, तत्क्षणमेव क्रियोद्धारं कुरुत, विलम्बो नैव विधेय । तत श्रीआनन्दविमलसूरिणा श्रीहेमविमलसूरिसाम्मत्यपूर्वं शुद्धक्रिया उद्धृता इति भावः ॥

दृष्ट्वा श्रीजिनशासनस्य प्रभवं दानानि सत्पात्रेषु[illegible]
[illegible] इव धर्मोऽभ्युत्थितोद्धार क्रियाया गुणाम् ।

शरीरं यस्य । अत्रायं सम्प्रदाय:—कदाचिनक्तं दुष्टसर्पस्य दंशाद्विषवेगोद्भवन्मूर्छया घूर्णितं गुरुमालोक्य यमपि तदुपायमजानन्तं किंकर्तव्यतामूढं संघं विज्ञाय प्रभुः संघं प्रत्याचख्यौ—'प्रातर्यः प्रथमं शाकभारिका समेति तन्मध्यादमुकाभिधानेन विषापहारिणीमोषधीं गृहीत्वा घृष्ट्वा च मृदुवो(मद्दंशो) देया सज्जो भविष्यामि' इति गुरुगिरमाकर्ण्य तेन संघेन तथाकृते सज्जीभूतः प्रभुस्तदादिषड्विकृतीः प्रत्याख्याय युगधर्येव केवलमाहारमकरोदिति ॥ इति धर्मघोषसूरिः ॥

यस्माद्दिदीपे चरणस्य लक्ष्मीर्ज्योत्स्नेव चान्द्री शरदोऽनुपज्ञात् ।
सोमप्रभाख्यो जनदृक्चकोरीसोमप्रभः सूरिरभूत्पदेऽस्य ॥ १२० ॥

अस्य धर्मघोषसूरेः पट्टे सोमप्रभ इत्याख्या नाम यस्य तादृशः सूरिरभूत् । किंभूतः । जनानां लोकानां दृशो दृष्टयः ता एव चकोर्यो ज्योत्स्नाप्रियप्रियास्तासां प्रह्लादकत्वेन सोमस्य चन्द्रस्य प्रभेव चन्द्रिकेव यः । यस्मात्सूरेश्चरणस्य चारित्रस्य लक्ष्मीर्दिदीपे अतीव शोभितवती । केव । ज्योत्स्नेव । यथा शरदो मेघात्ययस्यानुपज्ञादाश्लेषात्संगमाच्चन्द्रस्येयं चान्द्री कौमुदी दीप्यते ॥ इति श्रीसोमप्रभसूरिः ॥

तेनापि सोमतिलकाभिधसूरिरात्म-
पट्टे न्यवेशि वशिलक्ष्मिलसल्ललामम् ।
वादेषु येन परवादिकदम्बकस्या-
नध्यायता प्रतिपदेव मुखे न्यवासि ॥ १२१ ॥

अपि पुनस्तेन श्रीसोमप्रभसूरिणा आत्मपट्टे स्वपदे सोमतिलक इत्यभिधा नाम यस्य तादृशः सूरिराचार्यो न्यवेशि स्थापितः । 'न्यवेशि रत्नत्रितये जिनेन यः' इति नैषधे । किंभूतः । वशिनां जितात्मनां श्रमणानां या लक्ष्मीस्तस्याः लसद्दीप्यमानं ललामं तिलकम् । ललामशब्दो नकारान्तोऽकारान्तोऽप्यस्ति । येन सोमतिलकसूरिणा वादेषु पारे नैयायिकादयः पारे जैनाभासाः परपक्षीयास्त एव वादिनो वादं कर्तुमुद्यतास्तार्किका वा तेषां कदम्बकस्य वृन्दस्य मुखेऽनध्यायता तूष्णीकता मौनमेव न्यवासि वासिता । कयेव । प्रतिपदेव । यथा प्रतिपत्तिथिना छात्राणां मुखेऽनध्यायता अध्ययनाभावो मुखे वास्यते । 'प्रतिपत्पठनाशिनी' इत्युक्तेः ॥ इति सोमतिलकसूरिः ॥

संस्थापितो निजपदे गुरुणाथ तेन
श्रीदेवसुन्दरगुरुः सुरसुन्दरश्रीः ।
अहोमुखेन तिमिरेण तमस्विनीव
येन व्यपास्यत समं मदनेन माया ॥ १२२ ॥

अथानन्तरं तेन प्रभुणा श्रीसोमतिलकसूरीन्द्रेण निजस्यात्मनः पदे पट्टे श्रीदेवसुन्दरगुरुः संस्थापितः । किंभूतः । देवपतगुरुरिव सुन्दरा जनमनोहरा श्रीः शरीरशोभा

मृगारातिव्यालद्विरदशवरव्यूहबहुले

गिरेर्दुःसंचारे गहन इव सार्थः पथिजुषाम् ॥ १३७ ॥

य श्रीसूरीन्दुरानन्दविमलसूरिसुधांशु कलौ पञ्चमारककाले जनिमतां प्राणिनामाश्रयोऽभवद्बभूव । कलौ किंभूते । तमसामज्ञानाना पापाना च स्तोमः समूहस्तेन प्रायो बहुलः । पुनः किंभूते । कुनयनाना दुर्वादिना कुपाक्षिकाणा च गणे परिवारे दारुणतमे अतिशयेन सुदृशा भयकारिणि । ते हि सगताः सन्तोऽनन्तभवपरम्परा वर्धयन्तीति भीतिहेतवः । क इव । सार्थ इव । यथा सार्थः जनसमुदाय गिरेः पर्वतस्य दुःखेन संचरण यत्र स दु खेनोल्लङ्घयितु शक्ये तादृशे गहने कान्तारे रविकिरणाप्रवेशे शाखाप्रशाखाभिरेकीभूतविविधवृक्षलक्षप्रदेशे पन्थान जुषन्ते सेवन्ते इति कृत्वा पथिजुषः पान्थास्तेषामाश्रयो विश्रामस्थान शरण भवति । किंभूते गहने । मृगारातय सिंहाः, व्याला भुजगा दुष्टा गजा वा, द्विरदा पारे हस्तिन , शबरा भिल्लाः, तेषा व्यूहः समूहैर्बहुले निर्भरभृते । पुन किंभूते । तम स्तोमप्राये अन्धकारभृते । पुनः किंभूते । कुनयनाना दृष्टिविषसर्पाणा गणैर्दारुणतमे अतिभीषणे ॥

गभीरिम्णा पाथोनिधिरिव महिम्नापरमरु-

द्गिरिश्चेतोजन्मप्रतिभटतया वा गगनजित् ।

प्रसारै रश्मीनां सरसिरुहिणीनामिव पतिः

पवित्रीचक्रे यो विहृतिभिरशेषा अपि दिशः ॥ १३८ ॥

यो भगवान् गभीरिम्णा गाम्भीर्येण कृत्वा। उत्प्रेक्ष्यते—पाथोनिधिः समुद्र इव वर्तते। पुनर्महिम्ना माहात्म्येन कृत्वा महतो भावो महिमा । 'लोहितादेर्डित् इमन्' इति सारस्वतसूत्रेण इमन्प्रत्ययः । उत्प्रेक्ष्यते—अपरोऽन्यो मरुता देवाना गिरि पर्वतः । अन्यो मेरुरिव । वा पुनरुत्प्रेक्ष्यते—चेतसि जन्मोत्पत्तिर्यस्य स स्मरस्तस्य प्रतिभटतया शत्रुत्वेन गगनजिद्बुद्ध इव । 'बुद्धस्तु सुगतो धर्ममारलोकखजिद्धर्मराजो विज्ञानमातृक ' इति हैम्याम् । समुद्र इव गम्भीरः मेरुरिव महिमावासः । बुद्ध इव कामजेत्यर्थ । तथा यो गुरुर्विहृतिभि' स्वविहारै कृत्वा अशेषाः समस्ता अपि चतस्र पूर्वपश्चिमादक्षिणोत्तरालक्षणा दिश पवित्रीचक्रे पावनीकृतवान् । क इव । पति व । यथा सरसिरुहिणीना पद्मिनीना पतिर्भर्ता सूर्यः रश्मीना स्वकिरणाना प्रसारैर्विस्तारैः कृत्वा सर्वाशा' पुनाति पवित्रयति ॥

यो दक्षिणावर्त इव [illegible] कम्बुकदम्बो [illegible] ।

वाचंयमानां [illegible]न पृथ्वीपीठे परीतो विजहार सूरी ॥ १३९ ॥

यः श्रीआनन्द[illegible]सूरि' वाचयमाना मुनीना निवहेन वृन्देन परीत प सन् पृथ्वीपीठे भूमण्डले विजहार विहार [illegible] । क इव । दक्षिणावर्त इव

कासिमिव । शरदिन्दुबिम्ब इव । यथा शरदः शरत्कालसंबन्धिनि चन्द्रमण्डले नवे-तया पद्मसुहृदः सूर्यस्य कान्त्या दीप्त्या जनदृशां परा प्रीतिर्विरच्यते । 'पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः' इति रघुवंशे । हरिदश्वो भास्वांस्तस्य दीधितेः कान्तेरनुप्रवेशात्सक्रमणात्पुनश्चन्द्रो द्वितीयां प्रारभ्य वर्धते–इति तद्ध्वनिः । किंभूते मुनिसुन्दरसूरीन्द्रे चन्द्रबिम्बे च । कुवलयं भूमण्डलमुत्पलं च तस्य प्रतिबोधे बोधिबीजदेशविरतिसर्वविरतिप्रमुखप्रदाने विकाशने च दक्षे चतुरे ॥

योगिनीजनितमार्युपप्लवं येन शान्तिकरसंस्तवाद्दिह ।
वर्षणादिव तपर्तुतापयो नीरवाहनिवहेन जघ्निरे ॥ १२९ ॥

येन श्रीमुनिसुन्दरसूरिणा इह शिवपुर्यां भूमीमण्डले दुष्टयोगिनीभिर्दुष्टाभिः [illegible] देवीविशेषाभिर्जनिता उत्पादिता मारेर्जनमरकस्योपप्लवा उपद्रवाः 'सन्तिकरं सन्ति-जिणं' इत्यादि शान्तिकरनाम्नः स्तवात्स्तोत्रात्स्तुतिप्रभावाद्वापि निहता निवारिताः । केनेव । नीरवाहेनेव । यथा मेघेन वर्षणाज्जलवृष्टिविधानात्तपर्तोर्ग्रीष्मर्तोः [illegible] तापाः निहन्यन्ते ॥

बाल्येऽपि रश्मीन्सरसीजबन्धुरिवावधानानि वहन्सहस्रम् ।
अष्टोत्तरं वर्तुलिकानिनादशतं स्म वेवेत्ति धिया निसर्गे ॥ १३० ॥

यो मुनिसुन्दरसूरिर्बाल्येऽपि [illegible] अष्टोत्तरशतं [illegible] वर्तु-लिकानां 'बाटका कचोली' इति प्रसिद्धानां निनादानां शब्दानां [illegible] अपि वेवेत्ति पृथक् पृथक् कृत्वा [illegible] स्म । [illegible] पद्मावलम्बनं [illegible] प्रतिपत्तिः [illegible] [illegible] मुनिसुन्दरसूरीणां [illegible] [illegible]

[illegible]

'लोको विष्टपं विश्वं भुवनं जगती जगत्' इति हैम्याम् । तेन त्रिजगत्त्रयोपलक्षिता जगतां भुवनत्रितयमिति यावत् । जना लोका अर्थात् सुरासुरोरगनरास्तेषां नेत्राणां सुधाञ्जन नयनानन्दकारिणामृतमयमञ्जन यन्मूर्तिर्यस्य वचनविलासानां मधुरिम्णा माधुर्यातिशयेनापहृता दीनीकृता तिरस्कृता सती गोस्तनी द्राक्षा इदि मनसि त्रपया खेदेन । उत्प्रेक्ष्यते—श्यामत्वं किमु खेदेन म्लानत्वमिव ॥ इति श्रीसुमतिसाधुसूरिः ॥

शीलेन जम्बुगणनाथ इवात्र वज्र-
स्वामी पर. किमथ वा महिमोदयेन ।
जज्ञे नवद्वयशतव्रतिसेव्यमानो
नाम्नाथ हेमविमलः प्रभुरस्य पट्टे ॥ १३१ ॥

अथानन्तरमस्य सुमतिसाधुसूरे पट्टे नाम्ना अभिधानेन हेमविमल गच्छाधिराजो जज्ञे जातः । किंभूतः । नवानां नवसंख्यानां द्वय नवद्वयमेतावताष्टादश तन्मितानि शतानि नवद्वयशतानि । तानीव ते व्रतिनश्च साधवस्तै सेव्यमानो नित्यमुपास्यमान. । 'नवद्वयद्वीपपृथग्जयश्रियाम्' इति नैषधे । अष्टादशशतश्रमणपरिवार इत्यर्थः । य. श्रीहेमविमलसूरिः शीलेन दृढब्रह्मचर्येण कृत्वा अत्र जगति । उत्प्रेक्ष्यते—अपरोऽन्य. किमु वज्रस्वामी जज्ञे ॥ इति हेमविमलसूरि ॥

विभूषामद्वैतामकलयदथानन्दविमले
व्रतीन्द्रे विद्राणाखिलकुदृशि तत्पट्टकमला ।
वसन्ते वासन्तीततिरिव पुनर्धर्मजयिनि
क्षितीन्द्रे राज्यश्रीरिव विजितविश्वप्रतिभटे ॥ १३२ ॥

अथानन्तरं तस्य श्रीहेमविमलसूरे पट्टकमला पदलक्ष्मी' आनन्दविमलनाम्नि व्रतिना साधूनामिन्द्रे पुरंदरे सूरिशक्रे न विद्यते द्वैत युगलमर्थादपर वस्तुतुल्य यस्या सा द्वैता ताम् । असाधारणीमित्यर्थ । विभूषा शोभामकलयत् दधार । किंभूता । विद्राणा. पलायिता. । 'विद्राणे रणचत्वरात्' इति नैषधे । अखिला समग्रा अपि कुदृश परपाक्षिका. कुमतभाजः परवादिनो वा यस्मात् । पुन केव । वासन्तीततिरिव । यथा मधुसमये माधवी अतिमुक्तकी नाम लतापङ्क्तिरनन्या श्रिय बिभर्ति । पुन केव । राज्यश्रीरिव । धर्मेणोपलक्षित । अथ वा । धर्मेण कृत्वा जयोऽस्यास्तीति धर्मजयी तादृशे क्षितीन्द्रे पृथ्वीपुरंदरे राज्यश्रीर्भूपत्वलक्ष्मी शोभा धत्ते । किंभूते नृपे । विजिता. पराभूता विश्वे सर्वे प्रतिभटा वैरिणो येन ॥

त्यक्त्वाशेषकुपक्षिकांश्च कुदृशः किंपाकभूमीरुहा-
न्रोलम्बैरिव पारिजातशिखरी यो जन्मिभि. शिश्रिये ।

[illegible]तु च हीरकुमारस्य सुखं वदनं वभाते राजते स्म । [illegible] । [illegible] । क । सूरिराजस्य विजयदानमुनीन्द्रस्य चरणौ पादावेवाम्बुजे [illegible] [illegible] इन्दु । उत्प्रेक्ष्यते—अत्र गुरुपादाम्बुजे वसन्ती निलसत्तायुक्तां [illegible] [illegible] लक्ष्मीं मिलितुमिन्दुश्चन्द्र इवागत्य समागतः । हीरकुमार[illegible] [illegible] रमणत्वारिस्मिता । चन्द्रलक्ष्म्योर्दैवोरपि [illegible] [illegible] । [illegible] पिता [illegible] निजाग्रो भ्राता [illegible] [illegible] कुटिलानि [illegible] ॥ [illegible] ॥

[illegible] ललाटे [illegible]मेन तिलकं [illegible] ।

[illegible] भाषितुं किमिति [illegible]मया ॥ १२ ॥

[illegible] हीरकुमारस्य भाले [illegible] । [illegible] । इति [illegible] ॥

[illegible] ।

[illegible] ॥ १३ ॥

[illegible]

[illegible] दुर्जनगणा

सेनानीरिव चक्रिणो रिपुनृपान्प्रापय्य वश्यान्व्यधात् ॥ १३५ ॥

[illegible] श्रीआनन्दविमलसूरेः शिष्याः शुद्धानु-[illegible] जाता नटमिव जातो जात । किंभूताना[illegible]णाम् । [illegible]नीनां प्रतिमानां, तथा श्रमणानां साधूनामभावमसत्ता[illegible] प्रतिमा प्रोक्ता नास्ति [illegible] साधवः सर्वथा न सन्तीति भणन[illegible] । [illegible]कुपक्षिपक्षस्वकपोलकल्पितकुमतवा-[illegible] विविधोद्धतकुमतिमतसत-[illegible] । अथ क्रियोद्धारानन्तरं कियति समये व्य-तिक्रान्ते सति [illegible] पुरस्य सूरेर्विद्यासागर इति नाम यस्य तादृशो वाचकवरः उपा-[illegible] दुर्जनगणान् कुमतिगृहान् [illegible] सूरिशासनविधायिनो व्य-धात् कृतवान् । क इव । सेनानीरिव । यथा चक्रिणश्चमूपतिः रिपुनृपान् प्राक् प्रत्यक् [illegible]म्लेच्छभूपालान् [illegible] चक्रवर्तिनिदेशकारिणः कुरुते ॥

प्रातः साधुवृतस्त्वदापणपुरो यो याति सूरीशिता

सम्यक्संयमवान्स पूर्वगणिवत्सेव्यस्त्वयाहर्निशम् ।

स्वप्नेऽस्वप्नगिरेति यं निजगृहे नीत्वातिभक्त्या प्रभुं

श्राद्धः कश्चन मण्डपाद्रिवसतिर्भेजे सगोत्रैः समम् ॥ १३६ ॥

कश्चन कोऽपि मण्डपाद्रौ मण्डपाचले वसतिर्गृहं यस्य तादृक् श्राद्धः कटुकमतिरा-निव स्वप्ने स्वापावस्थायामित्यमुना प्रकारेणास्वप्नगिरा पूर्वजसुरवचनेन अतिभक्त्या कृत्वा निजगृहे स्वसौधे नीत्वा समानीय च प्रभुं स्वगोत्रैः स्वस्वजनैः समं भेजे श्राद्धीभू-याराधयति स्म । इति किम् । हे वत्स, त्वं तु दुर्वादिव्रातविविधविरुद्धालपनाकर्णनाक-लितानेककल्पनाजनितसशीतिव्याकुलीकृतनैकलोककलियुगानुभावात्कटुमतिरसि । तथा-पि प्रातः प्रभाते यामानन्तरमष्टभिः साधुभिः श्रमणैः परिवृतः परिकलितः यः सूरीशिता सूरीन्द्रः त्वदापणस्य तव हट्टस्य पुरोऽग्रे याति गच्छति, स सूरिरस्मिन् कलियुगे सम्यक् संयमवान् । विशुद्धचारित्रकलितः त्वया भवताहर्निशं निरन्तरं पूर्वगणिवत् प्राचीनाचार्य इव सेव्य उपासनीयः । 'साङ्गे प्रवचनेऽधीती गणिरनूचा-नश्च' इति हैम्याम् । तस्याभिज्ञानं तव हस्ते कुसुमान्यर्पयानीति जागरणेऽपि पाणौ पुष्पाणि दृष्टवान् स्वजनानां च स्वप्ननिवेदनपूर्वं दर्शितवाश्चेति काव्येऽनुक्तमपि जात-त्वादुक्तं प्रोक्तम् ॥

तमःस्तोमप्राये कुनयनगणैर्दारुणतमे

कलौ श्रीसूरीन्द्र शरणमभवद्यो जनिमताम् ।

समस्तं द्रविणं धनं येभ्यो येषां वा तथाविधाः सन्तो नरकस्य दुर्गतवर्त्ममार्गं भजन्ते आश्रयन्ते। किंवत्। रङ्कवत्। यथा द्रमकानिष्ठापितसमस्तस्वधनाः सन्तो मार्गं नगरध्वानं भजन्तः केनचिदप्यकृतरक्षा दुष्टावस्थापतिता नित्यमनुभूय म्रियन्ते॥

धर्ममार्हतमतो जनिमन्तो यानपात्रमिव संग्रहयध्वम्।
तस्थुषीं भवपयोनिधिपारे मुक्तिनामनगरीं च जिहीध्वम्॥ १९॥

हे जनिमन्तो भव्याः, अतोऽस्मात्कारणाद्यानपात्रं वहनमिवार्हतं जिनप्रणीतं धर्मं संग्रहयध्वम्। धर्मसंग्रहं कुरुतेत्यर्थः। 'ग्रह्णाति ग्रहयते लाति' इति क्रियाकलापे ग्रहणार्थाः क्रियाः। पुनर्यूयं भवन्तः भवः संसारः स एव पयोनिधिरगाधत्वात्समुद्रः तस्य पारे परस्मिंस्तटे तस्थुषीं स्थितिमतीं मुक्तिः सिद्धिरेव नाम यस्यास्तादृशीं नगरीं जिहीध्वं गच्छत। यानपात्रसंग्राहिणो जना हि पायोधिपरपारपुरीमासादयन्तीति स्थितिः॥

द्वे महोदयपुरस्य पदव्यौ प्रध्वरा च विषमा च जिनोक्ते।
आदिमा ननु महाव्रतनामा पश्चिमा पुनरणुव्रतरूपा॥ २०॥

भो भव्याः, महोदयपुरस्य मुक्तिनामनगरस्य द्वे उभे पदव्यौ मार्गौ स्तः भगवता कथितौ वर्तेते। द्वे के। एका प्रध्वरा सरला च, पुनरपरा विषमा कुटिला। तत्र द्वयोर्मध्ये आदिमा पदवी प्रथमो मार्गः ननु निश्चितं महान्ति सर्वसावद्यव्यापारनिषेधरूपाणि। सर्वप्राणातिपातविरमण–सर्वमृषावादविरमण–सर्वादत्तादानविरमण–सर्वमैथुनविरमण–सर्वपरिग्रहविरमण–इति पञ्च महाव्रतानीति नाम यस्याः सा। 'साक्षादप्सरसो निमानकलितव्योमान एवाभवान्' इति नैषधे। तेन महाव्रतनामा इति प्रयोगः। पुनः पश्चिमा तयोरन्तिमा अणुव्रतानि देशविरतिभाजाम्। स्थूलप्राणातिपातविरमण–स्थूलमृषावादविरमण–स्थूलादत्तादानविरमण–स्वदारसंतोषपरस्त्रीविधवावेश्याकन्याविरमण–स्थूलपरिग्रहपरिमाण–दिग्विरमण–भोगोपभोगविरमण–अनर्थदण्डविरमण–सामायिकव्रत–देशावकाशिक–पौषधोपवासव्रत–अतिथिसंविभागव्रतरूपाणि द्वादशसंख्याकानि रूपं यस्याः सा॥

तूर्णमस्ति यदि तत्र यियासा प्रध्वरे पथि ततः प्रयतध्वम्।
सौगतोदितपदार्थ इवास्ते यद्भव स्फुरदशाश्वतभावः॥ २१॥

भो भव्याः, यदि भवतां तत्र महोदयपुरे तूर्णं शीघ्रं यियासा गन्तुमिच्छास्ति वर्तते, तदा तर्हि प्रध्वरे साधुमार्गरूपे सरले पथि पदव्यां प्रयतध्वं प्रयत्नं कुरुतम्। यस्मात्कारणात् भव संसारः स्फुरन् प्रकटीभवन् अशाश्वतभावः विनश्वरता [illegible] वर्तते। क इव। सौगतोदितपदार्थ इव। यथा [illegible] [illegible] [illegible] वर्तते।

गा सार्ग कण्ठकण्ठमणयो यस्य तादृश महः कन्तूनां नानापर्वतां शतानां सहस्रेण सर्वेण परिवृत स्यन्दन्तीनां नदीनां पत्युर्भर्तुः समुद्रस्य पयःप्रवे नीरपूरे विहृ-तिं विस्तरति ॥

भागीरथीव यद्वाणी पुनीते भुवनत्रयम् ।
परं विशेषः कोऽप्यस्या निम्नगा न कदाचन ॥ १४० ॥

यद्वाणी यस्य वाणी भुवनत्रय त्रैलोक्य पुनीते त्रिजगज्जनान् पवित्रीकुरुते । केव । भागीरथीव । यथा गङ्गा त्रिभिर्निज प्रवाहै त्रिस्रोतस्त्वेन त्रिभुवन स्वर्गपातालभूमीत्रय पुनाति । यथा—'त्रिभुवनानन्दमन्दिर वन्दे रसान्तरप्रोद्गतम्' इति चम्पूकथायाम् । वि-बुधानामानन्दमन्दिर प्रमोदनमित्यर्थात्स्वर्गमार्गप्रवृत्तम् । 'नदत्याकाशगङ्गाया स्रोतस्युद्दामदिग्गजे' इत्यपि रसा । तथा रसाया पृथिव्याम्, तथा अन्तरे खभ्रे अर्था-त्पाताले प्रवाहेण उद्गम-इति चम्पूवृत्ति । एतद्विशेषणेन त्रैलोक्येऽपि त्रिभि प्रवाहैर्गङ्गा प्रवर्तत इति कविसमय । परमस्या वाण्या कोऽप्यद्भुतवैभव अस्या विशेषोऽस्ति यत्कदा-चन कस्मिन्नपि काले निम्नगा निम्न नीचैरधो गच्छतीति तादृशी न, गङ्गा तु निम्नगा । यद्वा च यस्य वाणी सरस्वती सरित गङ्गेव त्रिभुवन पुनीते । पर केवलमस्याः को-ऽप्याश्चर्यकारी विशेष । यद्गङ्गा त्रिभिः स्रोतोभि त्रिभुवनम् । इय तु एकेन स्रोतसा वचोनैरन्तर्येऽपि स्रोत शब्द —इति टिप्पनके । पवित्रयति निम्नगापि नेत्यर्थध्वनि. ॥

ये कर्णाभरणीबभूवुरनिशं विश्वत्रयीजन्मिनां
सान्द्रोन्निद्रितचन्द्रिका इव शुचीचक्रुस्त्रिलोकीमपि ।
यान्संश्रोतुमिवाभवद्भुजगराट्जिह्वासहस्रद्वय-
स्तेषां सूरिपुरन्दर. स समभूदेको गुणानां निधिः ॥ १४१ ॥

स विशुद्धक्रियोद्धारकारकत्वेन जगद्विख्यात सूरिपुरंदर श्रीआनन्दविमलसूरीन्द्रः तेषां विश्वाह्लादविधायिनां पूर्वोक्तविशेषणविशिष्टानां तां गुणानामेकोऽद्वितीयत्वेन नि-धिर्निधान समभूत् सम्यग् जात । ते के । ये गुणा अनिश निरन्तर विश्वत्रयीज-न्मिनां त्रैलोक्योत्पत्तिभाजा सुरासुरनरगणा कर्णाभरणीबभूवु कर्णपूरता प्रापु । त्रै-लोक्यलोका सोत्कण्ठमहर्निशमाकर्णयन्ति स्मेत्यर्थ । पुनर्ये गुणास्त्रिलोकीं जगत्त्रयीमपि शुचीचक्रु धवलयन्ति स्म । का इव । सान्द्रा नीरन्ध्रा बहला उन्निद्रिता विकस्वरा वि-स्तीर्णा विस्तृता चन्द्रिकाश्चन्द्रज्योत्स्ना इव । यथा चन्द्रिका भुवन श्वेतयति । पुनर्यान् गु-णान्संश्रोतु श्रुतिगोचरीकर्तु भुजगराट् शेषनागेन्द्र जिह्वाना रसनाना सहस्रयोर्द्व-शतस्योर्द्वय युगल विंशतिशती यस्य तादृश आसीत् ॥

अश्रोत्रैः श्रोतुकामैर्भुजगपरिवृढैर्यज्जगद्गीतकीर्ति
श्रद्धाभिधानसृष्ट्यै शतदलनिलयो याचितस्तां चिकीर्षु. ।

समस्तं द्रविणं धनं येभ्यो येषां वा तथाविधाः सन्तो नरकस्य दुर्गनरकमार्गं भजन्ते आश्रयन्ते । किंवत् । रङ्कवत् । यथा द्रमकाभिधापितनामानः सन्तो मार्गं नगरध्वानं भजन्तः केनचिदप्यकृतरक्षा दुष्टावस्थापतिता निलमनुभूय म्रियन्ते ॥

धर्ममार्हतमतो जनिमन्तो यानपात्रमिव संग्रहयध्वम् ।

तस्थुर्षीं भवपयोनिधिपारे मुक्तिनामनगरीं च जिहीध्वम् ॥ १९ ॥

हे जनिमन्तो भव्याः, अतोऽस्मात्कारणाद्यानपात्रं वहनमिवार्हतं जिनप्रणीतं धर्मं संग्रहयध्वम् । धर्मसंग्रहं कुरुतेत्यर्थः । 'ग्रहानि ग्रह्यते लाति' इति क्रियाकलापे ग्रहणार्थाः क्रियाः । पुनर्यूयं भवन्तः भवः संसारः स एव पयोनिधिरगाधत्वात्समुद्रः तस्य पारे परस्मिंस्तटे तस्थुर्षीं स्थितिमतीं मुक्तिं सिद्धिरेव नाम यस्यास्तादृशीं नगरीं जिहीध्वं गच्छत । यानपात्रसंग्राहिणो जना हि पाथोनिधिपरपारपुरीमासादयन्तीति स्थितिः ॥

द्वे महोदयपुरस्य पदव्यौ प्रध्वरा च विषमा च जिनोक्ते ।

आदिमा ननु महाव्रतनामा पश्चिमा पुनरणुव्रतरूपा ॥ २० ॥

भो भव्याः, महोदयपुरस्य मुक्तिनामनगरस्य द्वे उभे पदव्यौ मार्गौ स्तः भगवता कथितौ वर्तेते । द्वे के । एका प्रध्वरा सरला च, पुनरपरा विषमा कुटिला । तत्र द्वयोर्मध्ये आदिमा पदवी प्रथमो मार्गः ननु निश्चितं महान्ति सर्वसावद्यव्यापारनिषेधरूपाणि । सर्वप्राणातिपातविरमण–सर्वमृषावादविरमण–सर्वादत्तादानविरमण–सर्वमैथुनविरमण–सर्वपरिग्रहविरमण–इति पञ्च महाव्रतानीति नाम यस्याः सा । 'साक्षादप्सरसो विमानकलितव्योमान एवाभवन्' इति नैषधे । तेन महाव्रतनामा इति प्रयोगः । पुनः पश्चिमा तयोरन्तिमा अणुव्रतानि देशविरतिभाजाम् । स्थूलप्राणातिपातविरमण–स्थूलमृषावादविरमण–स्थूलादत्तादानविरमण–स्वदारसंतोषपरस्त्रीविधवावेश्याकन्याविरमण–स्थूलपरिग्रहपरिमाण–दिग्विरमण–भोगोपभोगविरमण–अनर्थदण्डविरमण–सामायिकव्रत–देशावगासिक–पौषधोपवासव्रत–अतिथिसंविभागव्रतरूपाणि द्वादशसंख्यानि रूपं यस्याः सा ॥

तूर्णमस्ति यदि तत्र यियासा प्रध्वरे पथि ततः प्रयतध्वम् ।

सौगतोदितपदार्थ इवास्ते यद्भवः स्फुरदशाश्वतभावः ॥ २१ ॥

भो भव्याः, यदि भवतां तत्र महोदयपुरे तूर्णं शीघ्रं यियासा गन्तुमिच्छास्ति वर्तते, ततस्तर्हि प्रध्वरे साधुमार्गरूपे सरले पथि पदव्यां प्रयतध्वं प्रयत्नं कुरुध्वम् । यद्यस्मात्कारणात् भवः संसारः स्फुरन् प्रकटीभवन् अशाश्वतभावः विनश्वरता यत्र एतादृश आस्ते । क इव । सौगतादिपदार्थ इव । यथा बौद्धकथितवस्तुव्रजे 'सर्वं क्षणिकम्' इति वाक्यात् यावत्पदार्थसार्थे अनित्यता वर्तते ॥

बालकाल इव कोरकभूषामुद्वहन्वपुषि कण्टकलेखाम् ।
तं मुदा नमयितुं स्पृहयन्सोऽध्यास सारथिसनाथरथाङ्कम् ॥ ७ ॥

स हीरकुमारः सारथिना सूतेन सनाथः संयुक्तो यो रथ स्यन्दनस्तस्याङ्कमुत्सङ्गम् । मध्यभागमित्यर्थः । अध्यास समधिरोहति स्म । किं कुर्वन् । स्पृहयन् काङ्क्षन् । किं क-र्तुम् । तं गुरुं नमयितुं नमस्कर्तुम् । 'नमयितुमना यनाम स्वामिनाम न पूरणम्' इति [illegible] । कया । मुदा हर्षेण । किं कुर्वन् । वपुषि शरीरे कण्टकलेखा रोमाञ्चराजीम् । 'रोमाञ्च कण्टको रोमविकारो रोमहर्षणम्' इति हैम्याम् । उद्वहन् धारयन् । क इव । बालकाल इव । यथा नवतरः कोरकाणां कलिकानां मञ्जरीणां भूषा शोभामुद्वहते ॥

संसारस्य मनसो विभुवीक्षोत्कण्ठितस्य दधता किमु मूर्तिम् ।
संचरन्पथि रथेन स तेन प्राप्तवानुपमुनीन्द्रनिकेतम् ॥ ८ ॥

स हीरकुमारस्तेन पत्तनागमनसमये व्यावर्णितेन रथेन शताङ्गेन पथि पत्तनमध्य-मार्गे संचरन् प्रचलन्नुपमुनीन्द्रनिकेत गुरोरुपाश्रयसमीपं प्राप्तवान् समायात । उत्प्रे-क्ष्यते—मूर्तिं शरीरं दधता बिभ्रता विभो सूरेर्वीक्षा दर्शनं तत्रोत्कण्ठितस्यात्युत्सुकित-स्यास्य कुमारस्य मनसश्चित्तस्य रंहसा वेगेनेव रथेनेत्यसावुत्प्रेक्षा ॥

स्यन्दनान्मणिहिरण्यवरेण्यश्रीजुषः प्रमदमेदुरिताङ्ग ।
स्वर्गिवर्ग इव नाकिविमानादुत्ततार भुवि हीरकुमारः ॥ ९ ॥

हीरकुमार स्यन्दनाद्रथाद्भुवि पृथिव्यामुत्ततार उत्तरति स्म । गुरु वन्दितुमिति शेष. । किंभूत कुमार. । प्रमदेन हर्षेण मेदुरित पुष्टिप्राप्त पुष्ट जात वा अङ्ग शरीर यस्य । स्यन्दनात्कस्मात्क इव । नाकिविमानात् स्वर्गिवर्ग इव । यथा देवयानाद्देवव्रजो भूमौ उत्तरत्यासमवसरणस्थ जिन नन्तुमिति शेषं । किंभूताद्रथाद्विमानाच्च । मणिभी रत्नैर्हिरण्यैः सुवर्णैर्वरेण्या प्रकृष्टा श्रिय जुषन्ते सेवते इति ॥

सूरिचक्रविधुवीक्षणजन्मानन्ददुग्धनिधिफेन इवोद्यन् ।
चन्द्रिकाच्छुरितरुग्दशनानामानने स्मितमनेन वितेने ॥ १० ॥

अनेन हीरकुमारेण आनने स्वमुखे स्मितमीषद्धसितं वितेने विदधे चक्रे । किंभूत स्मितम् । दशनाना दन्ताना चन्द्रिकया दीप्त्या छुरिता व्याप्ता । 'दशनचन्द्रिकया व्यव-भासितम्' इति । तथा 'चन्द्रच्छुरित वपु' इति पाण्डवचरित्रे । रुक्कान्तिर्यस्य तत् । उत्प्रेक्ष्यते—उद्यन् प्रकटीभवन् सूरेर्विजयदानगुरोर्वेक्त्र मुखमेव विधुश्चन्द्रस्तस्य वीक्ष-णाद्दर्शनाज्जन्मोत्पत्तिर्यस्य तादृशो य आनन्दो हर्ष स एव दुग्धनिधिः क्षीरसमुद्रस्तस्य फेनो डिण्डीर इव ॥

सूरिराजचरणाम्बुजयुग्मे नेमुषो मुखममुष्य बभासे ।
आगतो मिलितुमत्र वसन्तीं जामिमात्मन इव श्रियमिन्दुः ॥ ११ ॥

सर्वतः सौधधनधान्यद्विपदचतुष्पदादिभिः परिपूर्यते सा लक्ष्मीसदृशा पद्माक्षी तथा
सार्वभौमः सर्वस्या भूमेरीश्वरश्चक्रवर्ती तस्य पदवी एताः प्रमुखाः आदिमाः प्रकृष्टा वा
येषु तादृशानि तस्य सुरद्रोर्दलानि पत्राणि सन्ति । तथा सुराणामुपलक्षणादिन्द्रादीनां
वैभवाना सपदा लम्भः प्राप्तिः सा तस्य सुमानि पुष्पाणि । 'प्रसूनं कुसुमं सुमम्' इति
हैम्याम् । तथा कीर्तयः सुरासुरनरखेचरकिंनरमिथुनगीयमानयशांसि अपि पुनरस्याय-
मदसीयः परिमलः आमोद सौरभम् । तथा सिद्धयो लघिमा, वशिता, ईशत्वम्, प्रा-
काम्यम्, अणिमा, महिमा, यत्र कामावसायित्वम्, प्राप्तिः, इत्यष्टौ अन्या अपि मन्त्रत-
न्त्रविद्यातपःशक्तिप्रमुखा सिद्धय एव मुग्धमृगदृशो रम्याङ्गना । अथ वा सिद्धिर्मु-
क्तिरेव प्रधानवधूस्ताभिस्तया वा सार्धमालिङ्गनानि परिरम्भणानि आसादनानि तेषा-
मारम्भाः प्रक्रमास्तानि पुनरस्य कल्पद्रो फलानि वर्तन्ते ॥

धर्म एव मनुजैरिह मन्त्रः सार्वकामिक इवैष निषेव्यः ।
येन वाङ्मनसपारगतं यत्तत्करोति करसात्तरसासौ ॥ ३५ ॥

इह जन्मनि मनुजैर्मानवैरेष पूर्वव्यावर्णितस्वरूप धर्म एव निषेव्यः सेवनीयः आ-
राध्यः । क इव । मन्त्र इव । यथा कैश्चित्पुम्भिर्विनयादिना प्रसन्नीभवद्गुरुप्रदत्तः स-
र्वान् समस्तान् कामान्मनोभिलषितान् करोति पूरयतीति सार्वकामिको मन्त्रो निषे-
व्यते सम्यगुपासनागोचरीक्रियते । येन कारणेनासौ धर्मो यद्वस्तु वाङ्मनसयोः पार-
गत वचनमनसोर्गोचरातीत यत्र पदार्थे वाचो मनसश्च गोचरो न भवति तदपि वस्तु
तरसा शीघ्र करसात्करप्राप्त करोति । 'का नाम तत्र चिन्ता प्रभवति पुरुषस्य पौरुषं
यत्र । वाङ्मनसयोरविषये विधौ च चिन्तान्तरं किमिह ॥' इति चम्पूकथायाम् ॥
इति कुमारमुद्दिश्य गुरुवाक्यम् ॥

तां निपीय मुनिवासववाचं स्मेरदृक्प्रबुबुधे स कुमारः ।
कैरवोत्कर इव स्मितकोशश्चन्द्रिकां कुमुदिनीरमणस्य ॥ ३६ ॥

स कुमारः प्रबुबुधे प्रतिबुद्धः । किंभूतः । स्मेरदृक् हर्षेण हसितनयनः । तां पू-
र्वोक्ता मुनिवासवस्य सूरीन्द्रस्य वाच वाणीं निपीय सादर श्रुत्वा पीत्वा । क इव ।
कैरवोत्कर इव । यथा कुमुदिनीरमणस्य विधोश्चन्द्रिका ज्योत्स्नां निपीय कुमुदप्रकरः
प्रबुध्यते विकास लभते । किंभूतः । स्मिता विकसिता कोशा कुड्मला यस्य ॥

निश्चिकाय विनयानतकायस्तत्पुरः शिशुशशी स्वतपस्याम् ।
शंभुभुव इवाम्बुजनाभः प्रत्यगाच्च भवनं निजजामेः ॥ ३७ ॥

शिशुशशी कुमारचन्द्रः तस्य सूरेः पुरोऽग्रे स्वस्यात्मनस्तपस्यां दीक्षाग्रहणं निश्चि-
काय श्रीमत्पार्श्वे परिव्रज्यां ग्रहीष्यामीति निश्चयं कृतवान् । किंभूतः । वि-
नयेन आ मस्तकस्येन नम्रो नम्रीभूत काय शरीरं यस्य । च पुनर्निजजामेर्भगिन्या
भवनं गृहं प्रत्यगमत् । क इव । अम्बुजनाभ इव । यथा कृष्णः शंभुभुवः पार्वत्या

इन्द्रवारणमिवेयमसारा संसृतिः कृतदुरन्तविकारा ।
पङ्किलावट इवात्र निमग्ना निर्गमेन भविनः प्रभवन्ति ॥ १५ ॥

भो भव्या, इयं संसृतिः संसार इन्द्रवारणनाम कटुकं फलं तद्वदसारा। इन्द्रवारणफलं हि बहिर्दृश्यमानं रम्यं परं मध्ये निःसारम् अतिकटुकतया केनापि खादितुमशक्यत्वाद्विपफलवत् तथा संसृतिरपि। किंभूता संसृतिः। कृतो निष्पादितो दुर्दुष्टोऽनन्तदुःखदायकत्वेन अन्तोऽवसानं यस्य तादृशो विकारो विकृतिर्यया। फलमपि दुष्टविकृतिकृत्। तथा अत्र संसारे निमग्ना ब्रूडिताः। पतिता इत्यर्थः। भविनो जीवा निर्गमे निःसरणे विषये न प्रभवन्ति नैव समर्थाभवन्ति। निगोदादिष्वनन्तपुद्गलपरावर्तकर्तृत्वेन। कस्मिन्निव। पङ्किलावट इव। यथा जम्बालजालाकलितकूपे निमग्ना निमज्य स्थिता जन्तवो निर्गन्तुं न प्रभवन्ति ॥

नारकादिगतयोऽत्र चतस्रः संस्फुरन्त्यसुमतामिव पुर्यः ।
सन्ति भूपतिपथा इव लक्षा योनयश्चतुरशीतिरमूषु ॥ १६ ॥

भो भव्याः, अत्र संसृतौ असुमतां जन्तूनां चतस्रश्चतुःसंख्याका नारकादिगतयः। 'नरकस्तु नारकः स्यान्निरयो दुर्गतिश्च सः' इति हैम्याम्। आदिशब्दात्तिर्यङ्नरसुरलक्षणा गतयो गमनस्थानानि संस्फुरन्ति प्रकाशीभावं भजन्ति। का इव। पुर्य इव। यथा जन्तूनां वासस्थाना नगर्यो दृश्यन्ते। पुनरमूषु चतुर्गतिषु चतुरशीतिलक्षा योनयो जीवानामुत्पादस्थानकानि सन्ति वर्तन्ते। के इव। भूपतिपथा इव। यथा नगरीषु चतुरशीतिप्रमाणा राजमार्गा भवन्ति। 'चतुराशी चहुटा' इति लोकप्रसिद्धिः ॥

मर्त्यजन्मनगरीमधिगत्य प्राणिनो भ्रमिवशेन कथंचित् ।
दर्शनादिवरवस्त्वनवाप्तेरायुरेव धनवत्क्षपयन्ति ॥ १७ ॥

प्राणिनो जीवा दर्शनं सम्यक्त्वमादौ येषां देशविरतिसर्वविरतिप्रमुखाणां वरवस्तूनां प्रधानपदार्थानामनवाप्तेरलाभात् धनवद्धर्मार्थीवीद्रव्यमिवायुर्जीवितकालमेव क्षपयन्ति निष्ठापयन्ति। किं कृत्वा। भ्रमिवशेन भवपरम्परारण्यपरिभ्रमणप्रकारेण कथंचिद्दशदृष्टान्तैर्महता कष्टेन कृत्वा मर्त्यजन्म मनुष्योत्पत्तिर्नाम नगरीमधिगत्य प्राप्य। 'अधिगत्य जगत्यधीश्वरात्' इति नैषधे। अधिगत्य। लब्ध्वा इत्यर्थः ॥

निर्गतायुरखिलद्रविणास्ते रङ्कपामरपदं भजन्त ।
हा दुरागतदशा अशरणया नित्यदुःखमनुभूय म्रियन्ते ॥ १८ ॥

हा इति खेदे। ते पूर्वोक्ताः प्राणिनः न विद्यते शरणं [illegible] येषां ते अशरणया। शरणरहिता इत्यर्थः। [illegible] [illegible] [illegible] म्रियन्ते। [illegible]

विलासः वैचित्र्याम् तु रमा जगति निर्मितं मनोरमं ... [illegible] स्थानं भवनाविव मन्यौ कुम्भौ तयोरिव कुचं पूर्णं सम्पूर्णमास्यम् । ... पुनः मते । 'अग्नीचनान्तात् प्रभा विनम्' इति ... । तथा 'स्तनौ ... तरंगाकुलीकलाकिं ... ' इति मते । ... । उपमालंकारः । यथा ... बुद्धिः ... कल्लोलिन्द्र परिपूर्णमिवाति । वाग्मिना हृष्टोऽस्यान्ति । यथा '... ' इति हैम्याम् । तथा भर्तृहरिशतके प्रोक्तं च—'केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः । वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥' इत्यत्रापि वाग्मिना दृष्टः ॥

सूरिभर्तुरमृतादपि वाचो दृश्यते जगति कोऽपि विशेषः ।

त्यक्तमन्यत इदं रसिका यन्नन्त्युपक्रमनमस्त्वमृताशाः ॥ ४२ ॥

हे जाने, जगति विश्वे अमृतात्पीयूषात्सूरिभर्तुर्वाचो वाण्याः कोऽप्यद्भुतवैभवो विशेषः अतिशायित्वलक्षणनिर्वचनीयमहिमा दृश्यते अवलोक्यते ज्ञायते वा । यत्कारणात् इदं रसिका गुरुवचनसुधापानरसवन्तो जनास्तत्त्यक्तमन्यत उज्झितमेव जायन्ते । तस्या वाण्या रसिका इदंरसिका । 'इद यत्नात्ति ... ' इति हैम्ये । तु पुनः । अमृताशाः सुधाशायिनो देवा न्युञ्छनकं ... । ... तत्तु यतोत्कण्ठहृदयाः तद्गतत्वात् । 'स्वाहा स्वधा क्रतुभुजस्तु आदितेयाः' इति हैम्यात् ॥

सांप्रतं भगिनि तेन मुनीन्दोः सन्निधौ ग्रहयितुं व्रतलक्ष्मीम् ।

उत्सुकोऽहमभवं भवभीतो धारिणेय इव वीरजिनेन्दोः ॥ ४३ ॥

हे भगिनि, तेन एतादृग्गुरुवचनामृतपानानन्तरत्वेन कारणेन सांप्रतमधुना मुनीन्दोः विजयदानसूरेः पार्श्वे व्रतलक्ष्मीं चारित्रश्रियं ग्रहयितुमात्मानं ग्राहयितुमुत्सुकोऽभवं संजातः । 'गृह्णाति गृह्यते लभते' इति क्रियाकलापे । ... इत्यस्य ... तुमुन्प्रत्ययप्रयोगः । अहं किंभूतः । भवात्संसारात्तुलः ... पर्यटने ... उद्विग्नः । क इव । धारिणेय इव । यथा श्रेणिकनृपपत्नी धारिणी तस्या नन्दनो मेघकुमारः श्रीमहावीरजिनवरस्य पार्श्वे व्रतं ग्रहीतुमुत्सुको जज्ञे ॥

सेतुबन्धमिव संसृतिसिन्धोस्तत्कृताय मम देहि निदेशम् ।

विघ्नयन्न हि महोदयलक्ष्मीसंमुखं निजजनं हितकाङ्क्षी ॥ ४४ ॥

हे जाने, तत्कारणात्त्वं मम व्रतस्य चारित्रग्रहणार्थं निदेशमाज्ञां देहि । कमिव । सेतुबन्धमिव पद्याविच्छेदमिव । लोके 'पाज' इति प्रसिद्धा । कस्य । संसृतिः संसार स एवागाधत्वात्सिन्धुः समुद्रस्तस्य । हि यस्मात्कारणात्सहृदयोऽर्हद्वर्मे मोक्षस्य तस्य

[illegible]

[illegible] यौवनं च [illegible] ।

[illegible] जिनधर्मं ॥ २२ ॥

[illegible] प्रीतकृष्णश्वेतरक्ता- [illegible] जीवितव्यम- [illegible] नदीनां पूरं [illegible] पदो तृण पिट [illegible] लक्ष्मीः क्षणेव [illegible] क्षणमात्रस्थायुका । 'करिकर्ण- [illegible] त्वरां कुरुध्वम् । शीघ्र [illegible] ॥ इति [illegible] ॥

भारतीमिति निशम्य शमीन्दोः कल्पितास्पद इवामृतकुण्डे ।

उल्लसत्पुलकपल्लवितात्मेत्यसीति वितर्क कुमारः ॥ २३ ॥

कुमारो [illegible] इति वक्ष्यमाण वितर्कं चिन्तयामास । किंभूत कुमार । उल्लसन् प्रकटीभवन् यः पुलको रोमाञ्चस्तेन पल्लवितमात्म वपुर्यस्य । उत्प्रेक्ष्यते— अमृतस्य सुधायाः कुण्डे कल्पित कृत आश्रयः स्थान येन तादृश इव । किं कृत्वा । श- मीन्दोर्मुनिचन्द्रेत्येतत्प्रकारेण भारतीं वाणीम् । देशनामित्यर्थः । निशम्य श्रुत्वा ॥

अस्ति कश्चन न कस्यचनापि भ्रातृपुत्रपितृमित्रजनादि ।

संसृतौ क्षणिकतां कलयन्त्यां नानुयाति परलोकजुषं यत् ॥ २४ ॥

कस्यचनापि पुंसो भ्राता बन्धुः, पुत्र सुतः, पिता जनकः, मित्र सुहृत्, जनः कुटुम्ब- वर्गः, स आदौ पूर्वं यस्य तादृक्कश्चिन्नास्ति यत्कारणात् क्षणिकता क्षणमात्रस्थायित्वं 'जे पुव्वं दिट्ठा ते अवरण्हे न दीसन्ति' इति वचनात् क्षणविध्वंसिभाव कलयन्त्यां दधत्या संसृतौ संसारे परलोकजुष भवान्तरभाज स्वजन कोऽपि नानुयाति न पश्चात्पृष्ठे या व्रजति । अन्यस्मिन् भवेन कोऽपि सार्धं याति । एक एव जीवो यातीत्यर्थः । यतः 'परलोकजुषा स्वकर्मभिर्गतयो भिन्नपथा हि देहिनाम्' इति रघौ ॥

वल्लभीभवति यद्भवभाजा स्वार्थ एव न तथात्र परार्थः ।

पर्वणीन्दुरपि पङ्कजपाणिं यात्यसौ वसुकृतेऽपरथा नो ॥ २५ ॥

यत्कारणादत्र जगति भवभाजां जन्तूनां यथा येन प्रकारेण स्वार्थ एव केवल निजकार्यमेव वल्लभीभवति इष्टो जायते, तथा तेन प्रकारेण प्राणिना परेषामर्थः अन्य- कृत्य न वल्लभ स्यात् । उक्तमर्थं दृष्टान्तेन द्रढयति—असौ प्रत्यक्षो महत्सु विख्यातिमान् इन्दुश्चन्द्रोऽपि पर्वणि अमावास्याया वसुकृते स्वकृते । वसु कान्तिधनयोः । तदर्थं

भाग्यभाजि जलजन्मगृहेवागन्तुका तरुणता त्वयि वत्स ।
कामकेलिवसतौ रतिसख्यां त्वं रमस्व युवतीभिरमुष्याम् ॥ ४८ ॥

हे वत्स, त्वयि विषये तरुणता यौवनावस्था आगन्तुका आगमनोत्सुकशीला वर्तते। केव । जलजन्मगृहेव । यथा भाग्यभाजि पुण्यवति पुरुषे जलजन्ममन्दिरा लक्ष्मीरागमनशीला भवेत् । पुनर्हे वन्धो, त्वममुष्यां तारुण्यावस्थायां युवतीभिर्यौवनवतीभिः स्त्रीभिः सार्धं रमस्व विलासं कुरु । 'युवतीकरनिर्मलनिर्मथितम्' इति दीर्घोऽपि युवतीशब्दः । किंभूतायाममुष्याम् । कामस्य कन्दर्पस्य केलिवसतौ क्रीडार्थगृहे । पुनः किंभूतायाम् । रते रागस्य सख्या वयस्याम् । 'रतिः स्मरस्त्रियां रागे रते' इत्यनेकार्थः ॥

यौवनेऽर्जय यशोगुणलक्ष्मीः क्षोणिमानिव महःक्षितिकोशान् ।
आर्हतं तदनु धर्ममयि त्वं स्थाविरे स्थिरतया विदधीथाः ॥ ४९ ॥

हे वत्स, यौवने तारुण्ये यशांसि कीर्तीर्गुणान् महत्त्वौदार्यादिलक्षणान् लक्ष्मीरमिताः श्रियश्च अर्जय स्वायत्तीकुरु । क इव । क्षोणिमानिव । तथा भूपतिस्तारुण्ये महः प्रताप क्षितिं परदेशमण्डल कोशान् वहून् भाण्डागारोत्करानुपार्जयति । 'स्वात्पालधनमुक्नेतृपतिमत्त्वर्थकादयः' इति हैम्यामुक्तत्वेन क्षोणिमानित्यत्र मत्वर्थीयप्रत्ययः । अयि पुनर्हे वत्स, अनु तारुण्यावस्थायाः पश्चात्स्थाविरे वार्धके वृद्धवयसि स्थिरतया स्थैर्येण अचपलचित्तत्वेन आर्हतमर्हदुक्तं तं चारित्रलक्षणं धर्मं विदधीथाः कुर्वीथाः ॥

मौक्तिकेन किल सोदर सर्वैः श्लाघ्यतेऽत्र भवता पितृवंशः ।
भ्रातृमत्यहमपि त्वयकास्मि श्रीरिवामृतकरेण वरेण ॥ ५० ॥

हे सोदर, अत्र लोके भवता त्वया कृत्वा । अथ वा अत्रभवता पूज्येन । भाविनि भूतोपचाराज्जनानां माननीयेन वा भवता । अत्रभवत्तत्रभवच्छब्दौ पूज्यार्थे निपात्येते इति वचनात् । पितृवंशस्तातान्वयः कुरासाहकुलम् । सर्वैर्जनैः श्लाघ्यते प्रशस्यते स्तूयते । केनेव । मौक्तिकेनेव । अत्र किलेति इवार्थे । यथा मौक्तिकेन मुक्ताफलेन कृत्वा मुक्ताफलानां पिता तस्मादुत्पन्नत्वात्तेषां तादृशो वंशो वेणुः शतपर्वा जनैः श्लाघ्यते । 'उत्प्रेक्षाद्योतकाः शङ्के मन्ये नूनमिव ध्रुवम् । जाने किलादयो ज्ञेयाः प्रायेणेव क्रियोद्भवाः ॥' इति कविशिक्षायाम् । अपि पुनर्हे वन्धो, अहं त्वयका कृत्वा भ्रातृमती सोदरवती अस्मि वर्ते । केव । श्रीरिव । यथा लक्ष्मीरमृतकरेण चन्द्रेण वन्धुमत्यस्ति । द्वयोरपि समुद्रोत्पन्नत्वेन । किंभूतेन त्वया चन्द्रेण च । वरेण जनेषु ज्ञातिषु श्रेष्ठेन ॥

त्वद्वधूमुखसुधांशुसुधायाः पानमुत्सुकतया प्रविधित्सू ।
मद्विलोचनचकोरशकुन्तौ चापलं रचयतश्चिरमेतौ ॥ ५१ ॥

हे वन्धो, एतौ दृश्यमानौ मद्विलोचने मम नेत्रे एव चकोरशकुन्तौ ज्योत्स्नाप्रियपक्षिणौ चिरं वहुकालं यावच्चापलं चञ्चलताम् । उत्कण्ठतामित्यर्थः । रचयतः कुर्वते । किं-

भवनं प्रति गच्छति । भवानी हि कृष्णवर्त्मिनीति [illegible] । [illegible] इति हैमः । अम्भोजनाभः अम्बुजनाभः [illegible] [illegible] ॥ इति विजयदानसूरिगुरो हीरस्य भागवत्या दीक्षा [illegible] ॥

इच्छता हृदि महोदयलक्ष्मीम् [illegible] ।

भाव्यते स्म भवनं प्रविशन्त्यानेन भावयतिना [illegible] ॥ ५४ ॥

अनेन निजजामि: स्वभगिनी भाव्यते स्म भाविता [illegible] । [illegible] केन परिणामेन यतिना साधुना । अथ [illegible] केन भावयतिना । किं कृत्वा भाविता । [illegible] नीत्वा गृहे आगत्येत्यर्थः । अनेन किं कुर्वता । [illegible] महोदयहेतुमिच्छता हृदये वाञ्छता । [illegible] दयपदो वा सो, सगमे मिलने [illegible] तिरेषा मुक्तावली हृदिपदं [illegible] स्त्रा' इति शब्दप्रभेदः ॥

धारिणीसुत इवाथ सुधर्मस्वामिनं [illegible] ।

वन्दितुं विजयसिंहगुरुं [illegible] ॥

विजयसिंहनामा यो गुरुः [illegible] लितो भवत्या गृहाद्विजयदाननामानं [illegible] स्व । धारिणीसुत इव [illegible] धर्मस्वामिनं श्रीमहावीर [illegible] ॥

कीलनैकल्मिलं [illegible] ।

देशनाश्रवणगोचरतां [illegible] ॥ ५६ ॥

हे जामे, श्रवणकीलनकेलिं [illegible] तदा श्रवणयोः कर्णयोः गोचरतां [illegible] मे श्रवणगोचरतां [illegible] चस्य संसारस्य [illegible] स्यात्कीलनाय' इति [illegible] वर्तते । [illegible] 'गोचरो' इति [illegible] [illegible] ॥

[illegible] ।

[illegible] ॥ ५१ ॥

[illegible] गाणीनो [illegible]

हे भगिनि, एष जन्तुः प्राणी इह जगति एक एव जामिर्भगिनी, कलत्रं पत्नी, भ्राता बन्धुः, माता जननी, पिता जनकः, पुत्रः सुतः, एतैर्विशेषैः प्रकारैः बम्भ्रमीति संसारचक्रे अतिशयेन पर्यटति। क इव। परमाणुरिव। यथा एक एव परमाणुर्नीलत्वपीतत्वरक्तत्वादिरागैरङ्गैर्भुवने भ्राम्यति॥

सौरभेण मलयद्रुरिवात्मा यस्य धर्मविधिना स विभाति।
तेन विष्टपमशेषमभूषि प्रोच्यते स किमुताभिजनादि॥ ९६॥

हे जामे, यस्यात्मा धर्मविधिना जैनधर्माचरणप्रकारेण विभाति स शोभितः। क इव। मलयद्रुरिव। यथा चन्दनतरुः सौरभेण परिमलेन विभाति तेन पुरा अशेषं समस्तमपि विश्वमभूषि भूषितम्। तर्हि अभिजनादि किमुत प्रोच्यते। निखिलेऽपि भुवने स्ववंशादि तु सुतरामेव भूषितमिति बोध्यम्॥

निम्नगेव परिसर्पति निम्नं या दधाति पितृसूरिव रागम्।
भोगिनीव कुटिला कमलाक्षी सा सतामनुचिताभ्युपगन्तुम्॥ ९७॥

हे जामे, या स्त्री निम्नगेव नदीव निम्नं नीचैः परिसर्पति गच्छति। नीचगामिनी। '[illegible] नीचगामिन्यः' इति वचनात्। तथा—या स्त्री पितृसूः सन्ध्येव क्षणं रागं दधाति। यथा सन्ध्या क्षणं पञ्चाप्यतिशायिवर्णविशेषान् दर्शयित्वा नीरागा स्वयमपि [illegible] तथैव स्त्री। तथा या कान्ता भोगिनीव भुजङ्गीव कुटिला। वक्रगामिनी [illegible] गा कमलाक्षी वनिता सतामुत्तमानामभ्युपगन्तुमङ्गीकर्तुमनु [illegible] नैव योग्या॥

या जहाति न कदाप्यनुषङ्गं या विरागवति चाधिकरागा।
ता जगज्जनमनःकमनीया लिप्सते शिवकनी मम चेतः॥ ९८॥

हे जामे, या वधूः कदापि कस्मिन्नपि समये भर्तुरनुषङ्गं सङ्गमं। पार्श्वमित्यर्थः। न [illegible]। न पुनर्या विरागवति वैराग्यभाजिनि नीरागेऽपि पुंसि [illegible] [illegible]। ता शिवकन्या जगद्भिव्यानां मुक्तिकन्या मम [illegible] [illegible]। [illegible] जगताम्। [illegible] [illegible] ॥ इति [illegible] [illegible]।

[illegible]
[illegible] पुनर्[illegible]॥ ९९॥

[illegible]

...संमुखीभूत निजजनं स्वीयवचनश्रुतौ हितकाङ्क्षी स्वजनहिताभिलाषो जनः को निषेधेत् न्यवारयेत्, अपि तु न कोऽपि नान्तरायी भवेत्॥ इति निमलजननी प्रति हीरकुमारस्य दीक्षादेशमार्गणवचनम्॥

तद्वचो विचरितं सहजेन प्रासमात्रमपि कर्णपुटान्तः।
क्षिप्ततप्तगुरुपत्रगिवास्या दुःखमप्रतिममातनुते स्म॥ ४५॥

सहजेन भ्रात्रा। ['भ्राता तु स्यात्सहोदरः। समानोदर्यः सोदर्यः सगर्भसहजा अपि॥' इति हैम्याम्।] विरचितं कथितं तद्वचो दीक्षादेशमार्गणरूपं तत्पूर्वोक्तं वाक्यं कर्णपुटान्तः श्रोत्रपात्रमध्ये प्रासमात्रमपि केवलमेकवारं गतमपि अस्या विमलाया हीरकुमारस्य वृद्धभगिन्या अप्रतिमनसाधारणं दुःखमातनुते स्म चक्रे। किमिव। क्षिप्ततप्तगुरुपत्रमिव। यथा—क्षिप्तं स्थापितं तप्तमुष्णीकृतं गुरुपत्रं कर्णयोरतिदुःखदं स्यात्॥

डिम्भलम्भितविडम्बनभाजा दुःखतः परभृतेव भगिन्या।
स न्यगादि मृदुगद्गदवाचा साधिमाधरितपुष्पधनुःश्रीः॥ ४६॥

स हीरकुमारो भगिन्या विमलाख्यया न्यगादि भाषितः। किंभूतया। मृद्वी कोमला तथा बाष्पैरस्पष्टा तादृशी वाग्वाणी यस्याः। अथवा साधनभूतया वाचा कृत्वा। कुतः। कृतस्वारम्भभ्रातृप्रव्रज्या परिणामोद्भूतदुःखात्। स किंभूतः। साधिम्ना शरीरसौन्दर्येण। 'साधुरम्यमनोज्ञानि' इति हैम्याम्। अधरिता हीनीकृता तिरस्कृता वा पुष्पधनुषः कामस्य श्रीर्वपुः शोभा येन। 'स्मरात्किं नरसाधिमस्मरः' इति नैषधे॥ उत्प्रेक्ष्यते—परभृतेव। यथा कोकिलया भाष्यते विस्वरमुच्यते। किंभूतया। डिम्भेन अपत्यबालकेन लम्भितं प्रापितं यद्विडम्बनं संतापनं तद्भजतीति परान् काकबालकान् पुष्णन्तीति परभृत। 'कोकिलैः पालिताः काकास्तथा चान्यैस्तु पोषिताः।' इति वचनात्। तथा परभृत् व्याख्यान्ति। 'परभृता मदनालसचेतसाम्—' इत्यादि रघुकुमारयोरपि॥

साम्प्रतं व्यतिकरस्तव कोऽयं वार्भकोचितविधेश्चरणस्य।
लीढि वत्स विषयस्य रसालस्येव पक्तिमफलस्य रसांस्त्वम्॥४७॥

हे वत्स, साम्प्रतमिदानीं बाल्यदशायां तव भवतश्चरणस्य चारित्रस्य कोऽयं व्यतिकरः क एष प्रस्तावसमयः। किंभूतस्य चरणस्य। वार्भके वृद्धावस्थायामुचितो योग्यो विधिराचरणं यस्य। किं च हे वत्स, अधुना त्वं विषयस्य शब्दादिगोचरस्य रसानास्वादान् ...। फलस्येव। पक्तिमफलस्येव। यथा कोऽपि रसालस्य रसानिष्यन्दानास्वादयति जनः॥

...तयेव। कोकिलडिम्भो रूपसादृश्यविडम्बनात्. काकाभ्या...

हे भगिनि, एष जन्तुः प्राणी इह जगति एक एव जामिर्भगिनी, कलत्रं पत्नी, भ्राता बन्धुः, माता जननी, पिता जनकः, पुत्रः सुतः, एतेषां विशेषैः प्रकारैः बम्भ्रमीति संसारचक्रे अतिशयेन पर्यटति । क इव । परमाणुरिव । यथा एक एव परमाणुर्नीलरक्तपीतत्वरक्तत्वादिरागैरर्थैर्भुवने भ्राम्यति ॥

सौरभेण मलयद्रुरिवात्मा यस्य धर्मविधिना स विभाति ।
तेन विष्टपमशेषमभूषि प्रोच्यते स किमुताभिजनादि ॥ ९६ ॥

हे जामे, यस्यात्मा धर्मविधिना जैनधर्माचरणप्रकारेण विभाति स्म शोभितः । क इव । मलयद्रुरिव । यथा चन्दनतरुः सौरभेण परिमलेन विभाति तेन पुंसा अशेषं समस्तमपि विश्वमभूषि भूषितम् । तर्हि अभिजनादि किमुत प्रोच्यते । निखिलेऽपि भुवने स्ववंशादि तु सुतरामेव भूषितमिति बोध्यम् ॥

निम्नगेव परिसर्पति निम्नं या दधाति पितृसूरिव रागम् ।
भोगिनीव कुटिला कमलाक्षी सा सतामनुचिताभ्युपगन्तुम् ॥ ९७ ॥

हे जामे, या स्त्री निम्नगेव नदीव निम्नं नीचैः परिसर्पति गच्छति । नीचगामिनी । 'कामिन्यो नीचगामिन्य' इति वचनात् । तथा—या स्त्री पितृसूः संध्येव क्षणं रागं दधाति । यथा संध्या क्षणं पतान्यतिशायिवर्णविशेषान् दर्शयित्वा नीरागा सायमपि याति तथैव स्त्री । तथा या कान्ता भोगिनीव भुजङ्गीव कुटिला । वक्रगामिनी [illegible] अन्यदन्यच्च कुरुते सा कमलाक्षी वनिता सतामुत्तमानामभ्युपगन्तुमङ्गीकर्तुमनुचिता सर्वथापि नैव योग्या ॥

या जहाति न कदाप्यनुषङ्गं या विरागवति चाधिकरागा ।
ता जगज्जनमनःकमनीया लिप्सते शिवकनी मम चेतः ॥ ९८ ॥

हे जामे, या वधूः कदापि कस्मिन्नपि समये भर्तुरनुषङ्गं सङ्गम् । पार्श्वमित्यर्थः । न जहाति न मुञ्चति । न पुनर्या विरागवति वैराग्यभाजिनि नीरागेऽपि पुंसि अधिकरागा [illegible] भवति । ता शिवकन्या जगद्विख्याता मुक्तिकन्या मम चेतः [illegible] लिप्सते [illegible] । [illegible] जगताम् । भूर्भुवःस्वस्त्रयीजन्मिनां सुरासुरनराणां [illegible] कमनीयामभिलषणीयाम् ॥ इति प्रसन्नादृष्टनाया भगिनी [illegible] [illegible] ॥

निश्चित्य वचनैरथ तैस्तैस्तस्य सा व्रतविधौ दृढिमानम् ।
[illegible] पुनरद्यौचित ॥ ९९ ॥

[illegible] सा [illegible] निश्चित्य निर्धारयामास । [illegible]
[illegible]

र्ध्वीगन्नाभिमुग सम्मुखीभृत निजजन स्वीयबन्धुवर्गे हितकाङ्क्षी स्वजनहिताभिला-
षुको जन को विघ्नेऽहम् कुर्यात्, अपि तु न कोऽपि नान्तरायी भवेत् ॥ इति विम-
लभगिनीं प्रति हीरकुमारस्य दीक्षादेशमार्गणवचनम् ॥

तद्वचो विचरितं सहजेन प्राप्तमात्रमपि कर्णपुटान्तः ।
क्षिप्ततप्तगुरुपत्रमिवास्या दुःखमप्रतिममातनुते स्म ॥ ४५ ॥

सहजेन भ्रात्रा । ['भ्राता तु स्यात्सहोदर. । समानोदर्यः सोदर्यः सगर्भसहजा अपि ॥' इति हैम्याम् ।] विरचित कथित तद्वचो दीक्षादेशमार्गणरूप तत्पूर्वोक्त वाक्य कर्णपुटान्त श्रोत्रपात्रमध्ये प्राप्तमात्रमपि केवलमेकवारं गतमपि अस्या विमलाया हीरकुमारस्य वृद्धभगिन्या अप्रतिममसाधारण दुःखमातनुते स्म चक्रे । किमिव । क्षिप्ततप्तगुरुपत्रमिव । यथा—क्षिप्त स्थापित तप्तमुष्णीकृत गुरुपत्र कर्णयोरतिदु खद स्यात् ॥

डिम्भलम्भितविडम्बनभाजा दुःखतः परभृतेव भगिन्या ।
स न्यगादि मृदुगद्गदवाचा साधिमाधरितपुष्पधनुःश्रीः ॥ ४६ ॥

स हीरकुमारो भगिन्या विमलाख्यया न्यगादि भाषितः । किंभूतया । मृद्वी कोमला तथा वार्ष्परस्पष्टा तादृशी वाग्वाणी यस्याः । अथवा साधनभूतया वाचा कृत्वा । कुत । कृतस्वादग्भ्रातृप्रव्रज्या परिणामोद्भूतदु खात । स किंभूतः । साधिमा शरीरसौन्दर्येण । 'साधुरम्यमनोज्ञानि' इति हैम्याम् । अधरिता हीनीकृता तिरस्कृता वा पुष्पधनुष कामस्य श्रीर्वपु शोभा येन । 'त्वयादृत' किं नरगाधिमभगः' इति नैषधे ॥ उत्प्रेक्ष्यते—परभृतेव । यथा कोकिलया भाष्यते विस्वरमुच्यते । किंभूतया । डिम्भेन अव्यक्तबालकेन लम्भित प्रापित यद्विडम्बन सतापन तद्भजतीतिपरान् काकबालकान् पुष्णन्तीति परभृत । 'कोकिले पालित काकस्तथा चामैस्तु पोषितः' इति वचनात् । तथा परभृत् व्यञ्जनान्त । 'परभृता मदनालसचेतसाम्—' इत्यादि रघुकुमारयोरपि ॥

साम्प्रतं व्यतिकरस्तव कोऽयं वार्धकोचितविधेश्चरणस्य ।
लीढि वत्स विषयस्य रसालस्येव पक्तिमफलस्य रसांस्त्वम् ॥४७॥

हे वत्स, साम्प्रतमिदानीं बाललीलाया तव भवतश्चरणस्य चारित्रस्य कोऽयं व्यतिकरः क एष प्रस्तावसमय । किंभूतस्य चरणस्य । वार्धके वृद्धावस्थायामुचितो योग्यो विधिराचरण यस्य । किं च हे बन्धो, अधुना त्वं विषयस्य शब्दादिगोचरस्य रसानास्वादान् । । कस्येव । पक्तिमफलस्येव । यथा कोऽपि रसालस्य रसान्निस्यन्दानास्वादयति जन ॥

तस्येव । कोकिलडिम्भो रूपसादृश्यविडम्बनात. काकाभ्या

क्रीडितुं रतिपतेरिव गेहाः प्रावृषेण्यदिवसाः कथमेते।
गीतनृत्ययुवतीजनलीलामुख्यसौख्यविमुखेन विषह्याः॥ ६३॥

हे भ्रातः, एते व्रजनप्रसिद्धा जगज्जीविका हेतवः प्रायेण हि विजयदशमीं यावज्जना घनं समीहन्ते तेन शरदपि वर्षान्तरे वोच्यते। प्रावृषेण्या वर्षासमयसंबन्धिनो दिवसा दिनानि कथं कया रीत्या त्वया विषह्याः सहनीयाः। किंभूतेन त्वया। गीतं गानम्, नृत्यं नाटकम्, युवतीजनैस्तरुणीभिः सार्धं लीला विलासं दोलान्दोलनप्रमुखा क्रीडा, ता मुख्याः प्रकृष्टा मुखे आदौ भवा मुख्या आद्या यत्र तादृक् यत्सौख्यं सांसारिकसुखं तस्माद्विमुखेन पराङ्मुखेन। तत्त्यक्तकामत्वात्। प्रावृषेण्यदिवसा उत्प्रेक्ष्यन्ते—रतिपतेः कामस्य क्रीडितुं विलसितुं गेहा मन्दिराणीव॥ इति वर्षाऋतुकाव्यम्॥

जृम्भमाणजलजद्वितयीवाङ्घ्रिद्वयी प्रदधती म्रदिमानम्।
क्षोणिचङ्क्रमणदुःखमियं ते मर्षयिष्यति कथं कथयैतत्॥ ६४॥

हे सहोदर, त्वमेतन्मया प्रोच्यमानं कथय निवेदय। इयं शङ्खचक्राङ्कुशातपवारणादिलक्षणैर्लक्षिता अङ्घ्रिद्वयी चरणयुगली क्षोणिचङ्क्रमणस्य कठिनभूमीपीठे पर्यटनस्य पर्यटनेन वा दुःखमसातं कथं मर्षयिष्यति सहिष्यते। किं कुर्वती। म्रदिमानं सौकुमार्यं प्रदधती प्रकर्षेणातिशयेन बिभ्राणा। केव। जृम्भमाणजलजद्वितयीव। यथा स्मेरत्कमलयामलं म्रदिमानं धत्ते॥

वक्त्रवारिजधिया समुपेतां षट्पदावलिमिवालकमालाम्।
लुञ्चयिष्यसि कथं मुखलक्ष्मीन्युञ्छितामृतमयूख सगर्भ॥ ६५॥

हे मुखलक्ष्म्या वदनशोभाया उपरि न्युञ्छितो न्युञ्छनीकृत्य क्षिप्तोऽमृतमयूखश्चन्द्रो यस्य [अर्थाद्विधिना] स तस्य संबोधनं हे मुखलक्ष्मीन्युञ्छितामृतमयूख, समानो गर्भो यस्य। 'सहादे' इति समानस्य स आदेशः। हे सगर्भ एकमातृगर्भोत्पन्नभ्रातः, त्वमलकमालां चिकुरच्छटां केशपाशं कथं लुञ्चयिष्यसि उत्पाटयिष्यसि। उत्प्रेक्ष्यते—वक्त्रे वदने वारिजस्य पद्मस्य धिया बुद्ध्या भ्रमेण समुपेतां समागतां षट्पदावलीं भृङ्गमालिकामिव॥

राशिना सुमनसामिव सर्पिस्तर्पितोद्धतधनंजयकीलाः।
तत्परीषहततिः किमसह्या विग्रहेण मृदुना तव सह्या॥ ६६॥

हे भ्रातः, तव भवतो मृदुना सुकुमारेण विग्रहेण शरीरेण अगम्या कातरनितरां सोढुमशक्या। तादृशी चार्यां कातरीकृतानेकजना द्वाविंशतिमाना प्रसिद्धा जिनशासने विख्याता परीषहाणाम् [क्षुधा-पिपासा-शीत-उष्ण-दंशमशक-अचेल-अरति-स्त्री-चर्या-निषद्या-शय्या-आक्रोश-वध-याचना-अलाभ-रोग-तृणस्पर्श-सत्कार-मल-प्रज्ञा-अज्ञान-सम्यक्त्वानि] ततिः श्रेणी कथं केन प्रकारेण सह्या मर्षणीया सोढव्या। केव। राशि-

कर्तुमिच्छुः । इत्यनुरक्ततया उत्कण्ठितत्वेन स्वकान्ताख्य जायाया' । 'दारा' क्षेत्र वधूर्भार्या जनी जाया परिग्रह ' इति हैम्याम् । पुन वदनमेव सुधांशुस्तस्य सुधा दर्शनामृत तस्या' पान पीतिं प्रविधित्सु कर्तुमिच्छुः । 'कर्णे द्वयचकोरीणा गण. पीला सुधासवम् । अजायत मदेनेव घूर्णापूर्णारुणेक्षणा ॥' इति वस्तुपालकीर्तिकौमुद्या चकोराणां ज्योत्स्नापाने प्रसिद्धेऽपि द्वयम्मृतपानमपि ॥ इति विमलाया प्रथमोक्ति ॥

वाङ्मयैर्विरचितैरिदमाद्यैः श्रोत्रपत्रपथिकैः स्वभगिन्या. ।
प्रेरितो निगदति स्म कुमारो गर्जितैरिव शिखी घनपङ्क्तेः ॥ ९२ ॥

कुमारो हीरनामा बालको निगदति स्म बभाषे । किंलक्षण' । प्रेरितः प्रणोदित' । कैः । इद पूर्वोक्तमाद्य प्रथम येषु तादृशैर्वाङ्मयैर्वाचा प्रपञ्चैः । 'इतीदृशैस्त्व विरचय्य वाङ्मये ' इति नैषधे । किंभूतैर्वाङ्मयै । विरचिते प्रणीतै । उक्तैरित्यर्थ । कया । भगिन्या स्वसृहत्स्वस्रा । पुन' किंभूतै । श्रोत्रयोरर्थात् कुमारस्य कर्णयो' पथिके प्राघुणीभूतै । श्रुतैरित्यर्थ' । बभाषे । क इव । शिखीव । यथा मयूरो घनपङ्क्तेः मेघमालाया गर्जितैर्गर्जारवैः प्रेरितो वक्ति केकारव कुरुते ॥

जीवितं कुशशिखास्थमिवाम्भः पांशुलेव तरला कमलापि ।
ऐक्षवाग्रमिव यौवतमेतत्प्रेक्षणक्षण इव स्वजनोऽपि ॥ ९३ ॥

हे जामे, जीवितमायुर्जीवितव्य कुशशिखास्थ दर्भाग्रस्थायुकमम्भो नीरमिव वर्तते । दर्भाग्रस्थमम्भ' कियत्कालमवतिष्ठते तथा जीवितमपि । अपि पुन.—कमला पांसुलेव व्यभिचारिणीव तरला चपला । अस्थिरा आस्ते । पुनरेतत्ससारिजनैराद्रियमाण यौवत युवतीना समूह' स्त्रीगुण. ऐक्षवाग्रमिव इक्षूणामिदमैक्षव तादृशमग्र प्रान्त तद्वत् । यथा इक्षूणामग्रे नीरसता तथा विचार्यमाणमनुभूयमान च स्त्रैण प्रान्ते नीरसमेव जायते । अपि पुनः स्वजनो ज्ञातिवर्ग' परिजनो वा प्रेक्षणक्षण इव रामलक्ष्मणादिरूपदर्शननाटकप्रस्ताव इव क्षणदृष्टनष्ट स्यात् ॥

यद्गमिष्यति ममार्भकभावोऽलंकरिष्यति तनुं च युवश्रीः ।
वार्धकं पुनरमात्यमिव स्वं भूषयिष्यति क इत्यवगच्छेत् ॥ ९४ ॥

हे जामे, यन्मम मदीयोऽर्भकभाव शैशव गमिष्यति यास्यति । च पुनर्युवश्री भावप्रधाननिर्देशात्तारुण्यलक्ष्मी । अथ वा युवत्वेन श्रीर्लक्ष्मी शोभा मम तनु शरीरमलकरिष्यति । पुनर्वार्धक वृद्धावस्था स्वमर्थादात्मीयात्मान भूषयिष्यति । कमिव । अमात्यमिव । यथा प्रधान वार्धक भूषयति । 'वार्धक भूषयत्यत्र राजामात्यभिषग्मुनीन्' इति वचनात् क पुमानित्यवस्थात्रय भावीदमवगच्छेत् अवबुध्येत । अपि तु न कोऽपीत्यर्थ ॥

जन्तुरेप इह जामिकलत्रभ्रातृमातृपितृपुत्रविशेषैः ।
बम्भ्रमीति परमाणुरिवैको नीलिमारुणिमपीतिमरागैः ॥ ९५ ॥

उत्प्रेक्ष्यते—एदि रदनो पक्षति मौक्तिकस्यज मुक्ताफलमालिकामिव तन्वती कुर्वती विस्तारयन्तीव ॥

वत्स वत्सलतया तव किंचिद्वच्मि कर्णपथिकीकुरु तत्त्वम् ।
यद्रसायनमिव स्वजनानामस्ति वाग्विरचना हितगर्भा ॥ ६० ॥

हे वत्स लघुभ्रात, तव भवत वत्सलतया हितकृत्त्वेन यत्किंचिद्भविनानाश्रतिहित-विधायक विचार्यादि वच्मि कथयामि, तत्त्व तथाप्यायतिसुखद मधुरम् कर्णपथिकीकुरु श्रवणप्राघुण प्रणय। ॥ इत्यर्थः । यद्यस्मात्कारणात्स्वजनाना बन्धुवर्गाणा हित पथ्य-मायत्यां सुखकारकोपायो गर्भ मध्ये यस्यास्तादृशी वाग्विरचना वचनरचना । हितगर्भेत्यर्थः । रसायन सिद्धौषधमिवास्ति । प्राणिना तुष्टिपुष्टिकृद्भवति ॥

अङ्गनाङ्गपरिरम्भहसन्तीगर्भगेहनिवहान्प्रविहाय ।
मर्षयिष्यसि कथं वद सैष्यं भूमिमानिव भटानरिसैन्यम् ॥ ६१ ॥

हे भ्रात., त्व वद कथय अङ्गनाना स्वपाणिगृहीतगृहिणीनामङ्गस्य कायस्य परिरम्भ आश्लेषः स्वकामिनीकायेन सममालिङ्गनम् । शीतकाले तस्योष्णस्पर्शत्वात् । तथा—हसन्त्य. कृशानुशकटिका', तथा—गर्भगेहा अपवारकाः । 'ओरडा' इति लोके प्रसिद्धा । एतेषा [illegible]-वहान् समूहान् प्रविहाय त्यक्त्वा त्व गम्य शिशिरर्तुम् । उपलक्षणाद्धेमन्तमपि । एता-वता शीतकाल कथ केन प्रकारेण मर्षयिष्यसि सहिष्यसे । 'सहते क्षमते मर्षति [illegible] ति मर्षयति मर्षते [illegible] । क्षमते तितिक्षते च क्षाम्यति [illegible] क्षमापयति ॥' इति क्रियाकलापे सहनार्था क्रियाः । क इव । भूमिमानिव । यथा राजा भटान्वीरान् [illegible] मुक्त्वा अरिसैन्य शत्रुसेना कथ सहते ॥ इति शीतकालवर्णनम् ॥

चन्द्रचन्दनशिरोगृहशय्यावारवामनयनावनपेतः ।
अन्तरेण तरणीरिव सिन्धुर्ग्रीष्म एष किमु निस्तरणीयः ॥ ६२ ॥

चन्द्र शीतरश्मि चन्दन श्रीखण्डविलेपन शिरोगृहम्, चन्द्रशाला । [illegible] पानो गृहोपरितनावासभूमौ शेरते शीतलत्वात् । [illegible] [illegible] । तथा—वारवामनयना पण्याङ्गना राजादिभिः [illegible] पुण्यवत पुरो [illegible] [illegible] [illegible] । सा [illegible] वारविलासिन्य पण्याङ्गना [illegible] [illegible] [illegible] मालपत्रोर्मिभिरेव भुज्य [illegible] [illegible] [illegible] उद्यानानि [illegible] [illegible] विना हे भ्रात त्वया भवता एष [illegible] [illegible] [illegible] [illegible] [illegible] ग्रीष्मर्तु [illegible] [illegible] इव । सिन्धुरिव [illegible] तरणी [illegible] [illegible] [illegible] ग्रीष्मवर्णनम् ॥

[illegible] । 'उज्ज्वलिक्रः [illegible] निशः [illegible]' इति नैषधे। [illegible]
[illegible] शरीरे [illegible] स्फुरति दीप्यते। [illegible]
[illegible] । [illegible] । यथा [illegible]
[illegible] अलोलिनी । '[illegible] भ्रश [illegible]' इति हैमः। [illegible]
[illegible] [illegible] शरदो [illegible] गृहे [illegible]
[illegible] ॥ इति [illegible] ॥

[illegible] इव हिंसितुमीशः ।
[illegible] निरेगं तामिदं तदनु सोऽपि जगार ॥ ७८ ॥

[illegible] सोऽपि [illegible] तां [illegible] प्रति [illegible]
[illegible] । हे [illegible] [illegible]
[illegible], तथा [illegible]
[illegible] । [illegible] ।
[illegible]

[illegible] ॥ ७९ ॥

[illegible]

[illegible] ॥ ८० ॥

[illegible]

त्प्रेक्षते—रदि रात्रौ पक्षाति मौक्तिकरत्न मुक्ताफलमालिकामिव तन्वती कुर्वती विस्तारयन्तीव ॥

वत्स वत्सलतया तव किंचिद्वच्मि कर्णपथिकीकुरु तत्त्वम् ।
यद्रसायनमिव स्वजनानामस्ति वाग्विरचना हितगर्भा ॥ ६० ॥

हे वत्स लघुभ्रातः, तव भवतः वत्सलतया हितकृत्त्वेन यत्किंचिद्विनाभायतिहित-निशायक विचार्यादि वच्मि कथयामि, तत्त्व तवाप्यायतिसुखद मदुक्त कर्णपथिकीकुरु श्रवणप्राघुण प्रणय। शृण्वित्यर्थ. । यद्यस्मात्कारणात्स्वजनाना बन्धुवर्गाणां हित पथ्य-मायत्यां सुखकारकोपायो गर्भे मध्ये यस्यास्तादृशी वाग्विरचना वचनक्रमः । हितशिक्षे-त्यर्थः । रसायन सिद्धौषधमिवास्ति । प्राणिना तुष्टिपुष्टिकृद्भवति ॥

अङ्गनाङ्गपरिरम्भहसन्तीगर्भगेहनिवहान्प्रविहाय ।
मर्पयिष्यसि कथ वद सैष्यं भूमिमानिव भटानरिसैन्यम् ॥ ६१ ॥

हे भ्रात', त्व वद कथय अङ्गनाना स्वपाणिगृहीतगृहिणीनामङ्गस्य कायस्य परिरम्भ आश्लेष स्वकामिनीकायेन सममालिङ्गनम्। शीतकाले तस्योष्णस्पर्शत्वात्। तथा—हसन्त्यः कृशानुशकटिकाः, तथा—गर्भगेहा अपवारका । 'ओरडा' इति लोके प्रसिद्धा। एतेषा नि-वहान् समूहान् प्रविहाय त्यक्त्वा त्व सैष्य शिशिरर्तुम् । उपलक्षणाद्धेमन्तमपि । एता-वता शीतकाल कथ केन प्रकारेण मर्पयिष्यसि सहिष्यते । 'सहते मृष्यति मर्पति मृप-यति मर्पयति मर्पते चैव । क्षमते तितिक्षते च क्षाम्यति चेति क्षमाविषया ॥' इति क्रियाकलापे सहनार्था क्रिया । क इव । भूमिमानिव । यथा राजा भटान्वीरान् विहा-य मुक्त्वा अरिसैन्य शत्रुसेना कथ सहते ॥ इति शीतकालकाव्यम् ॥

चन्द्रचन्दनशिरोगृहशय्यावारवामनयनावनकेलीः ।
अन्तरेण तरणीरिव सिन्धुर्ग्रीष्म एष किमु निस्तरणीयः ॥ ६२ ॥

चन्द्र शीतरुचि , चन्दन श्रीखण्डविलेपन शिरोगृहम्, चन्द्रशाला। उष्णकाले हि यु-वानो गृहोपरितनाकाशभूमौ शेरते शीतलत्वात् । तथा—शय्या हंसार्कतूल्य. पल्यङ्का वा। तथा—वारवामनयना' एकैकस्य राजादेरन्यस्यापि पुण्यवत पुंसो बह्वीषु गृहिणीषु या स्वकीयवारके स्वस्यावसरे समेत्य पत्या सम विलसति सा अथ वा चक्रवर्त्यादीनामिव वारविलासिन्य एकैकस्या स्त्रियोऽनु द्वे द्वे वाराङ्गने । 'सहेलिका' इति प्रसिद्धा । तासु चक्रवर्त्यादिभिरेव भुज्यन्ते । नान्यै पाणिगृहीतिवत् । इति ता वारवर्णिन्य । तथा—वनकेलय उद्याननिखेलनानि तमालधारा जलयन्त्रमन्दिरादिषु क्रीडा । एता अन्तरेण विना हे भ्रात',त्वया भवता एष लकाशलादिभि सकलजगत्संतापहारको ग्रीष्म उष्ण काल. । वसन्तग्रीष्मौ द्वावप्युष्णसमय । स किमु कथ निस्तरणीय अतिक्रमणीय' । क इव । सिन्धुरिव । यथा तरणीर्वेडा विना समुद्र कथ निस्तीर्यते उत्तीर्यते ॥ इति ग्रीष्मसमयकाव्यम् ॥

संसृतेर्मतिमतां वर तस्यास्त्वं पृथग्भवितुमिच्छसि वत्स।
पुण्डरीकमिव पल्वलपङ्कात्तत्सगर्भ भुवि धन्यतमस्त्वम् ॥ ८५ ॥

हे मतिमतां वर सुबुद्धिभाजां श्रेष्ठ हे वत्स, लघुभ्रातः। 'वत्सा उरस्युक्तर्षतर्णकाः' इत्यनेकार्थः। तुक् अपत्यमुपलक्षणाल्लघुभ्रात्रादावपि इत्यवचूर्णिः। तस्याः पूर्वव्यावर्णितस्वरूपायाः संसृतेः समारात्मकाशात्त्वं पृथग्भवितुम्। त्यक्तुमित्यर्थः। इच्छसि वाञ्छसि। किमिव। पुण्डरीकमिव। यथा पल्वलपङ्कात्तटाककर्दमात्कमलं भिन्नं भवति। भूमीपीठे जम्बालः, तदुपरि जलम्। द्वे अपि मुक्त्वा द्वयोरुपरि पद्मं तिष्ठेत्। पुण्डरीकशब्देन तस्य श्रेष्ठत्वख्यापनं तत्कारणात्। हे समान, एको गर्भो यस्य तस्य संबोधनं हे सगर्भ बान्धव, भुवि पृथिव्यां त्वमेव धन्यतमः अतिशयेन पुण्यवान्। 'सुकृती पुण्यवान् धन्यः' इति हैम्याम् ॥ इति दीक्षानुज्ञादानानन्तरं धर्मकारकत्वेन भगिनीस्तुतिः ॥

एतदालपितमात्मभगिन्याः श्रोत्रपत्रपुटकेन निपीय।
सातमाप मृदुतित्तिरपिच्छस्पर्शजातमिव हीरकुमारः ॥ ८६ ॥

आत्मभगिन्या निजजामेः एतत्पूर्वोक्तं भ्रातृप्रशमाकरणात्मकमालपितं भाषितं श्रोत्रं कर्णस्तदेव पत्रस्य पर्णस्य पुटको भाजनविशेषः। 'दुदडो' इति लोकप्रसिद्धः। तेन निपीय पीत्वा। सादरं श्रुत्वेत्यर्थः। हीरकुमारः सातं सुखमाप लेभे। उत्प्रेक्ष्यते—मृदु सुकुमारं यत्तित्तिरः खरकोणः पक्षिविशेषः। लोके 'गणेश' इति प्रसिद्धः। तस्य पिच्छं पतत्रं तनूरुहं तस्य स्पर्शः संघट्टस्तेन जातमुत्पन्नमिव सुखम्। अर्थात् कर्णयोः तित्तिरपक्षिणोऽतिमृदुलपिच्छस्य परावर्त्यमानस्य कर्णेऽतीव सातं जायते। यदुक्तं चम्पूकथायाम्—'कोष्णं किं नु निषिच्यते तव बलात्तैलं सखि श्रोत्रयोरन्तस्तित्तिरपक्षिपक्ष्ममथवा मन्दं मृदु भ्राम्यते। येनाङ्गेषु निखातमन्मथशरप्रस्फारपिच्छच्छविनालीमेचकितोच्चकञ्चुकरुचा रोम्णा वहत्युद्गमः ॥' इति ॥

रोमहर्षणमिषात्तदनुज्ञोद्वेलहर्षजलधौ शिशुकाये।
उत्त्रसन्ति किमु किंचन लोलद्बालशालिशफराः परितोऽमी ॥८७॥

शिशुकाये हीरकुमारशरीरे रोमहर्षणस्य रोमाञ्चस्य मिषाच्छलादमी प्रत्यक्षलक्षाः किंचन किमपि लोलन्तश्चञ्चलीभवन्तः। 'कावेरीतीरभूमीरुहभुजगवधूभुक्तमुक्तावशेषः कर्णाटीचीनपीनस्तनवसनदशान्दोलनस्पन्दमन्दः। लोलल्लाटीललाटालकतिलकलतालास्यलीलाविलोलः कष्टं भो दाक्षिणात्यः प्रसरति पवनः पान्थकान्ताकृतान्तः ॥' इति भोजप्रबन्धे। बाला लघवः शालिनः शोभाकलिताः शफरा मीनाः। परितः सर्वतः। उत्प्रेक्ष्यते—उत्त्रसन्ति उच्छलन्ति। किंभूते शिशुकाये। तस्या विमलानाम्न्या भगिन्या अनुज्ञा संमतिस्तया उद्वेलो वेलामतिक्रम्य प्रसरन् यो हर्षः प्रमोदः स एव जलधिः समुद्रः। यदि पतित्वान्मकराकरत्वाच्च मीनानां संभवो युक्त एव जलनिधौ ॥

[illegible] नीतो [illegible] ॥

[illegible] सम्बन्धिनानाम् ।

[illegible] जगिति नीतिमता मा ॥ ६७ ॥

[illegible] प्रशु- [illegible] विशेषेण [illegible] दमनाना [illegible] शुचकुन्दर- [illegible] ॥

[illegible] सानन्दनितम्बी स्वनीव ।

[illegible] शमवता मुनिनतौ ॥ ६८ ॥

[illegible] शमदमानुपशमिता सुर्गनामनी शर्मणे [illegible] यथा [illegible] तथा [illegible] ज्ञानकैरापदा सित- [illegible] न शीत न तापस्य लगति । [illegible] किंतु [illegible] । गर्भागारः [illegible] । [illegible] ॥ इति कुमारेण [illegible] काव्यम् ॥

अङ्गरागमिव सद्गुरुशिक्षा श्रीजिनस्य च विधोरिव सेवा ।

केलिकृत्सरसीव च योगे प्रीणयन्ति शमिनोऽपि निदाघे ॥ ६९ ॥

हे [illegible], [illegible] शमिनि शान्तमानसान् मुनीन् प्रीण- [illegible] । तानेव प्रदर्शयति—एव सत् शोभनो गुरुर्हिताहितोपदेशकः तस्य शिक्षा [illegible] अङ्गरागो विलेपनमिवास्ते । च पुनः [illegible] वर्णितो जिनो वीतरागस्तस्य [illegible] चन्द्रमस इव सेवा परिचर्या । च पुनर्योगे यम-नियम-करण-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समा- धिरूपाष्टाङ्गे [illegible] केलिजलाशिका प्रीणातीति शेषः ॥ इति कुमारेण मुनिमन [illegible] ग्रीष्मसमयकाव्यम् ॥

यत्र गीतय इवागमघोषास्ताण्डवा इव पुनर्भवभावा ।

वारिवाहदिवसा[1] शमभाजां नित्यमुत्सवमया इव सन्ति ॥ ७० ॥

हे भगिनि, वारिवाहदिवसा वर्षाकालवासरा. शमभाजा शान्तरससालिना श्रमणाना

---

१. आदर्शपुस्तके त्रुटितोऽयं सार्धश्लोकः स्वकल्पनयास्माभिः सभावितः.

कारयामास । किंभूतान् । सहोपवीतेन यज्ञसूत्रेण वर्तन्ते ये । पुनः किंभूतान् । कृतो निर्मितो वेदानां निनाद उच्चारो यैस्ते । पश्चात्कर्मधारय. । पुनः किंभूतान् । राजहंसवद्गच्छन्तीति । पुन' किंभूतान् । कमण्डलु कुण्डिका पाणौ हस्ते येषाम् । 'कुण्डिका तु कमण्डलु.' इति हैम्याम् । ततः कर्मधारय. । पुनः किंभूतान् । सुवाणीन् शोभना वाचो येषां ते । उत्प्रेक्ष्यते—भूचरान् क्षोणीचारिण. विधेर्ब्रह्मणोऽनुवादा अनुवदन्ति सदृशीभवन्तीति स्वरूपाणीव । ब्रह्मणो ब्राह्मणत्वेन सोपवीतता वेदैककर्तृत्वाद्वेदोच्चारित्व कमण्डलुकरत्व सुवाक्त्व च युक्तम् ॥

आत्मकामितमुखानिव मूर्तान्पुष्पपल्लवफलाक्षतपुञ्जान् ।
तत्पुरोऽयमुपहृत्य सगोत्रैः पृच्छति स्म चरणस्य मुहूर्तम् ॥ ९२ ॥

अथ हीरकुमार. सगोत्रैः स्वजनैः समं चरणस्य चारित्रस्य मुहूर्तं पृच्छति स्म । किं कृत्वा । उपहृत्य ढौकयित्वा । कान् । पुष्पाणि कुसुमानि, पल्लवा' किशलयानि, फलानि तरुसस्यानि, अक्षता लाजा अक्षततण्डुला वा, तेषां पुञ्जान् व्रजान् । कथम् । तत्पुरस्तेषां मौहूर्तिकानामग्रे । उत्प्रेक्ष्यते—आत्मन स्वस्य कामितानामभीप्सितपदार्थाना मुखान् प्रारम्भानिव ॥

पूर्वनिर्मितपरस्परतर्कैर्निश्चितोच्चपदसंपदुदर्कैः ।
तैरथौच्यत महोदयसद्मद्वारवद्व्रतदिनं पृथुकेन्दोः ॥ ९३ ॥

अथ प्रश्नानन्तर तैर्ज्यौतिषिकैर्व्रतदिन संयमग्रहणवासरः औच्यत कथितम् । किंवत् । पृथुकेन्दोः कुमारचन्द्रस्य महानुदयो मोक्षो वा महोदयः स एव सद्म गृहं तस्य द्वारवद्द्वारमिव । तै किंभूतै । पूर्वं प्रथम निर्मितः कृत. परस्परमन्योन्य तर्को दोपराहित्यग्रहगोचराशोचनीचादीना विचारो यै । पुनः किंभूतै । निश्चितो निश्चय नीतो निर्धारितोऽर्थात्कुमारस्यैव उच्चस्यातिशयिन' पदस्य गणधरत्वलक्षणस्य संपदो लक्ष्म्या. उदर्कः उत्तरकाले फल यै ॥

स्वर्णरूप्यमणिमौक्तिकदानैरीश्वरानिव विधाय विधिज्ञः ।
निश्चितव्रतमुहूर्तदिनस्तान्वर्णिनः स विससर्ज कुमारः ॥ ९४ ॥

स हीरकुमार. वर्णिनो ब्राह्मणानविकारान्मौहूर्तिकान् विससर्ज यथागतं प्रैषीत् । किं कृत्वा । विधाय निर्माय । अर्थात् ज्यौतिषिकानेव । कानिव । ईश्वरानिव महेभ्यानिव । कैः । स्वर्णानि काञ्चनानि । रूप्याणि रजतानि मणयो रत्नानि मौक्तिकानि मुक्ताफलानि तेषा दानैर्विश्राणनै' । किंभूतः कुमार' । विधिमुचितकरणादिक जानातीति विधिज्ञ सदाचारचतुर । पुन किंभूत । निश्चितो निर्धारीकृतः व्रतस्य दीक्षामुहूर्तस्य दिनो दिवसो येन सः ॥ इति दीक्षामुहूर्तदिवसावलोकनम् ॥

आगतेऽह्नि सुहृदीव तदुक्ते शुद्धगोचरनवांशकयुक्ते ।
संमदाद्विजयसिंहमुखेभ्याः प्रारभन्त चरणक्षणमस्य ॥ ९५ ॥

'क्षेत्र भरतादौ भगाङ्गयोः। केदारे सिद्धभूपत्न्योः' इत्यनेकार्थः। अत्र जगति निर्वृतिसस्यं मोक्षफलं सुखेन सुखकृद्वा धान्यं दिशति ददाति । सस्य धान्यफलयोरिति ॥

इन्द्रियाण्यनिशमुत्पथगानि शूकलानिव वहन्शमरश्मीन् ।
यो नियन्त्रयति जन्तुरविघ्नां प्राप्य निर्वृतिपुरीं स सुखी स्यात्॥७४॥

हे भगिनि, स जन्तुः प्राणी अविघ्ना निरन्तराया निर्वृतिपुरीं मुक्तिनगरीं प्राप्यासाद्य सुखी स्यात् । स कः । यः पुमान् अनिशं नित्यमुत्पथगानि उन्मार्गप्रवृत्तानि इन्द्रियाणि । श्रोत्रेक्षणनासारसनास्पर्शनरूपाणि पञ्चापि हृषीकानि नियन्त्रयति निरुध्य स्वायत्तानि कुरुते स्ववशीकरोति । किं कुर्वन् । शमरश्मीन् शमतापरिणामरूपकशा वहन् धारयन् । कानिव । शूकलानिव । उपमाने लिङ्गविपर्ययः । 'लिङ्गभेदं तु मेनिरे' इति वाग्भटालंकारे । यथा उत्पथगान् दुर्विनीतानश्वान् कशा दधत्कशा प्रहारैः सादी अश्ववारो नियन्त्रयति दमयति ॥

मानवान्स्वयमसौ छलदर्शी छाययास्त्यनुसरन्निव कालः ।
आयतौ हितमतः करणीयं तज्जिनक्रमयुगं शरणीयम् ॥ ७५ ॥

हे सोदरे, असौ प्रत्यक्षं चर्मचक्षुर्भिरपि लक्ष्यमाणः स्वयमात्मना छलदर्शी छिद्रावलोकक रन्ध्रान्वेषी कालो यमः छायया वपुःप्रतिच्छायिकया । छायाछलेनेत्यर्थः । मानवान्प्रति मनुष्यान् प्रति मनुष्याननुसरन्ननुगच्छन्निवास्ति । यदुक्तम्—'छायामिसेण कालो सव्वजियाण छलं गवेसन्तो। पासं कहवि न मुञ्चइ ता धम्मे उज्जमं कुणह॥' इति वचनात् । अतोऽस्मात्कारणान्मानवैरायतौ उत्तरकाले हितम् । येन कृत्वा जन्तुः इहलोकपरलोकयोः सुखी स्यात् तद्धितं पथ्यं करणीयं विधातव्यम् । तत्कारणात्तद्धितकर्तृजिनक्रमयुगं श्रीवीतरागचरणयुगलं शरणीयं शरणीकरणीयमाश्रयितव्यम् ॥ इति हीरकुमारस्य भगिनीं प्रति द्वितीयवारं प्रत्युत्तरवचांसि ॥

वाङ्मयैर्जितसुधामधुदुग्धैर्निर्जयं विदधतीव शुकीनाम् ।
इत्थमुक्तवति हीरकुमारे सा बिभेद वदनाम्बुजमुद्राम् ॥ ७६ ॥

हीरकुमारे इत्थममुना प्रकारेण उक्तवति भाषितवति सति सा विमला वदनाम्बुजमुद्रां मुखकमलमुद्रणं मौनलक्षणां बिभेद त्यक्तवती । बभाषे इत्यर्थः । उत्प्रेक्ष्यते—जितानि पराभूतानि सुधा पीयूषं मधु क्षौद्रं दुग्धं पयो यैस्तादृशैर्वाङ्मयैर्वचनविलासैः कृत्वा शुकीनां कीरकान्तानां निर्जयं विदधतीव कुर्वतीव ॥

नार्हती व्रतविधौ तव तेनाद्यापि यत्स्फुरति शैशवमङ्गे ।
योऽङ्कुराहत इवापटुतायां तेन तिष्ठ कियतीः शरदस्त्वम् ॥ ७७ ॥

हे सहोदर, तेन कारणेन तव भवतो व्रतविधौ संयमग्रहणप्रकारे नार्हती न योग्यता अर्हतो भावः आर्हती । 'अर्हतो नुम्' इति विभाषया नुम्विधानादार्हन्ती आर्हतीति

[illegible]

[illegible] ॥

[illegible] ॥

[illegible]

[illegible] ॥

[illegible]

यादसा भवधुनीधवमध्ये गाहशामतिदुराकलनीयः ।
संयमः सुकृतविप्रयुतानां भ्रातरल्पतरसामिव दुर्गः ॥ ८१ ॥

हे भ्रात , सुकृतविप्रयुताना पुण्यरहितानां मादृग्मानसलुब्धिधानां सयमश्चारित्रमतिदुरादरणीय. सातिशयेन दुरधिगम. दुःखेनादरणीयः । मादृशा किंभूतानाम् । भव. संसारः स एव धुनीधवो नदीपति' समुद्रस्तस्य मध्ये क्रोडे यादसा जलचराणां नक्राणाम् । क इव । दुर्ग इव । यथाल्पतरसा स्वल्पबलानाम् । 'प्राणस्थामतरः पराक्रमबलद्युम्नानि शौर्योजसी' इति हैम्याम् । स्तोकं सैन्यं भुजबल वा येषां तेषां नृपाणां दुर्गः कोट्टः दुष्प्राप' ग्रहीतुमशक्यः ॥

संततोपचितकर्मगणस्यानादिधाभवपरम्परयास्ते ।
क्रीतभृत्य इव भर्तृजनस्यायत्तधीरिह सुधीरपि बन्धो ॥ ८२ ॥

हे बन्धो, इह जगति अनादिधा न विद्यते आदिर्यस्याः सा अनादिः अनादिप्रकारा इत्यनादिधा तादृशी भवपरम्परा संसारे ससारता अवतारसंततिस्तया कृत्वा सतत निरन्तरमुपचित. प्रचुरीकृतो य. कर्मणां पुण्यपापरूपाणा गणस्य व्रजस्य सुधीरपि पण्डितोऽपि जानन्नप्यायत्तधीर्वशः आस्ते । क इव । क्रीतभृत्य इव । यथा मूल्यगृहीतः सेवको भर्तृजनस्य स्वामिनोऽधीन. स्यात् । 'अनादिधा विश्वपरम्परायाम्' इति नैषधे ॥

कर्मसंततितिरोहितभावश्चेष्टतेऽत्र निरवग्रहचेष्ट' ।
लोक एष निखिलोऽपि पिशाचावेशिताशय इव व्रतकाङ्क्षिन् ॥८३॥

हे व्रतकाङ्क्षिन् सयमाभिलाषुक हे भ्रात , एष जगति दृश्यमान' निखिल' समस्तोऽपि लोको जन' पिशाचेन व्यन्तरजातिविशेषेण देवेनावेशितोऽधिष्ठित आशयश्चित्त परिणामो वा यस्य तादृश इव निरवग्रहा स्वतन्त्रा चेष्टा हास्यविनोदक्रीडाकरणादिस्वभावो यस्य तथाविधः सन् चेष्टते विलसति । किंभूतो लोक । कर्मणा प्राचीनजन्माचीर्णाना शुभाशुभपुद्गलपरिणामरूपाणां सतत्या प्रकृतिपरम्परया तिरोहित आवृतो भाव सम्यग्ज्ञानरूपो जीवस्वभावो यस्य ॥

संसृतेः सुखमशेषममुष्या बान्धवामृतमिवानुभवन्ति ।
हीनसं[illegible] [illegible]गरमणीयं जानते न तु जनाः परिणामे ॥ ८४ ॥

हे बान्धव हीरकुमार, लोका' समस्ता अपि ससारिजना' अमुष्या' ससृते अस्य संसारस्याशेष समग्रमपि सुख शर्म अमृतमिव सुधारसस्वादमिवानुभवन्ति भुञ्जन्ते । तु पुन' हीनसगममिव नीचजात्या कर्मणा वा पिशुनत्वेन वा निकृष्टमेलन सौहार्दादिकरणमिव परिणामे प्रान्ते अवसाने विरस महादु खद जना न जानते नैव विदन्ति । यदुक्तं सूक्तम्—'नीचसरीसो कीजइ सग चडइ फलद्ध हुइ जरभङ्ग । हाथि अङ्गार करइ जइ कोइ कइ दाझइ यइ कालो होई ॥' इति ॥

[illegible] हेम [illegible] भ्रूलतिकेव कोऽपि ललाटस्य । [illegible] भागे पट्टिका । तथा [illegible] 'धूर्तकथा हाटकपत्रिकायां' । स्त्रीपुरुषयोरपि पट्टिकाख्य आभरणं [illegible] इति [illegible] । अधुना तु सम्भवतीं [illegible] लोकप्रसिद्धा 'अगाउ' इति [illegible] । [illegible] ललाटाभरणमर्भकनिभो कुमारेन्द्रस्य [illegible] [illegible] भूत्यानाम् । उत्प्रेक्ष्यते—चिकुराः केशाः [illegible] [illegible] तुल्या निकटे समीपे तिष्ठन्ती [illegible] मिलन्ती च [illegible] [illegible] । 'चिकुरः [illegible]' इति शब्दप्रभेदे ॥

चिकुरे [illegible]न्यस्तवासो शातकुम्भकृतपट्टिकयास्य ।
[illegible] इवाननलक्ष्म्या निर्मितेन वरणेन निरस्तुम् ॥ १०८ ॥

[illegible] करमिलनया [illegible] शातकुम्भेन [illegible] [illegible] चिकुरे । उत्प्रेक्ष्यते—आननस्य [illegible] [illegible] निर्मितेन [illegible] वरणेन प्राकारेण । [illegible] [illegible] (?) ॥ पाठान्तरे उत्प्रेक्ष्यते—[illegible] [illegible], [illegible] दर्पण [illegible] [illegible] [illegible] वा ॥

[illegible] पतितेन [illegible] ।
[illegible] ॥ १०९ ॥

[illegible]

[illegible] ॥ ११० ॥

[illegible]

[illegible] भूतलोपगतमेव घनाघा ।
[illegible] सर्गोत्र[illegible] गामनं न पुनरेतदवादि ॥ ८८ ॥

[illegible] आदिश । किंभूतया [illegible] । उत्प्रेक्ष्यते—भूतले [illegible] 'तपनोऽपि च [illegible]' इति रघुवंशे । [illegible] । 'आगमने च [illegible]' इति [illegible] । घनाघा घनानामा- [illegible] । '[illegible]' इति [illegible]विशेषणम् । [illegible] इति नैषधे । इदं किम् । [illegible] दीक्षादेश गृहाण [illegible] ॥

भारती श्रुतिपुटा[illegible] विनिपीय ।
[illegible] ॥ ८९ ॥

[illegible] हीरकुमार [illegible] भारतीं वाणीं [illegible] पीता प्रमोदेन हर्षेण मेदुरित [illegible] । [illegible] । यथा शिक्ष प्राथम- [illegible] शिक्षा सादरं श्रुत्वा हृष्टो भवति । [illegible] ॥

स्वानुजादिनिखिलस्वजनेभ्य शासनं व्रतविधेः पृथुकोऽपि ।
आददे पुनरसौ व्यवहारी लाभवद्विविधवस्तुगणेभ्य. ॥ ९० ॥

अपि पुन पृथुको हीरकुमार. स्वस्यात्मनोऽनुजो भ्राता श्रीपालनामा स आदौ येषा तान्स्या निखिला समग्रा स्वजना गोत्रिवर्गमनुष्यास्तेभ्य सकाशाद्व्रतविधे संयमा- [illegible]शासनमादेशमाददे गृहीतवान् । [illegible] । लाभवत् । यथा व्यवहारी व्यापारका- रको विविधाना नानाप्रकाराणा वस्तूना क्रियाणकाणा गणेभ्य समुदायेभ्यो लाभमधि- कफलं गृह्णाति । 'लाभोऽधिक. फलम्' इति हैम्याम् ॥ इति भगिनीवचनान्तर स्वजन- वर्गादेशग्रहणम् ॥

भूचरानिव विधेरनुवादान्सोपवीतकृतवेदनिनादान्[1] ।
राजहंसगकमण्डलुपाणीनाजुहाव गणकान्स सुवाणीन् ॥ ९१ ॥

स हीरकुमारो गणकान् ज्योति शास्त्रविद । 'सावत्सरो ज्यौतिषिको मौहूर्तिको निमित्तवित् । दैवज्ञगणकादेशिज्ञानिकार्तान्तिका अपि ॥' इति हैम्याम् । आजुहाव आ-

---

१ 'गोऽभवत्' इत्येवमेव पाठ मातु.

विजयसिंहनाम्ना हीरकुमारस्य भगिन्या विमलाया भर्ता स मुख्य आदिर्येषां तादृशाः इभ्या व्यवहारिणः अस्य कुमारस्य चरणक्षण चारित्रमहोत्सव प्रारभन्त उपक्रामन्ति स्म । कस्मात् । समदात्प्रमोदात् । कस्मिन्सति । तैर्गणकैरुक्ते कथिते अह्नि दिवसे आगते सम्प्राप्ते सति । कस्मिन्निव । सुहृदीव । यथा विवाहादावाकारिते मित्रे महोत्सवा प्रारभ्यन्ते । किंभूतेऽह्नि । शुद्धा निर्दोषा गोचरा रेखादानादय नवांशका लग्नमध्यगत-विशिष्टतमवेलास्तैर्युक्ते सहिते ॥

केचिदुच्चमणिपीठनिषण्णं गन्धबन्धुरपयोभृतकुम्भैः ।
निर्जरा इव जिनावनिजानिं दीक्षणस्य समयेऽस्नपयंस्तम् ॥ ९६ ॥

केचित्पुरुषा दीक्षणस्य संयमग्रहणस्य समये प्रस्तावे अर्थान्मुहूर्तवासरे त हीरकुमार-मस्नपयन् स्नानं कारयन्ति स्म । कैः । गन्धैर्वासनार्थमन्तर्मुक्तकुसुमादिपरिमलैर्बन्धुरै-र्मनोज्ञैः पयोभिः सलिलैर्भृताः पूरिता ये कुम्भाः कलशास्तै । किंभूत तम् । उच्चमुन्नत तथा मणिमय रत्नघटित यत्पीठमासनम् । स्नानचतुष्किका इत्यर्थ । तत्र निषण्णमुपविष्टम् । के कमिव । निर्जरा जिनावनिजानिमिव । यथा दीक्षाग्रहणावसरे देवा अर्थाचतुःष-ष्टिप्रमितेन्द्रादयोऽमरा जिनाना सामान्यकेवलिना मध्ये अवनिर्जाया भूमिरेव पत्नीर्यस्य । 'जायाया निङ्' । जायाशब्दान्निङ्प्रत्ययो भवति । 'लोपो व्योर्वलि' । वकारयकारयो-र्वलिप्रत्यये परे लोपो भवति । सस्वरयोरिति शेषः । यकारलोपे । अवनिजानी राजा एतावता जिनराज तीर्थोदकपूर्णकलशै ॥

सांप्रतं कथममुष्य जडेनाश्लेषणं विबुधकैरवबन्धोः ।
कोऽप्यरुक्षयदितीव तदीयं वाससातिमृदुलेन शरीरम् ॥ ९७ ॥

कोऽपि पुमान् अतिमृदुलेनाधिकसुकुमारेण वाससा वस्त्रेण तदीय हीरकुमारसबन्धि शरीरं कायम् । उत्प्रेक्ष्यते—इतीव हेतो अरुक्षयन्निर्नीरयामास । इति किम् । यद्विबुधेषु विचक्षणपुरुषेषु कैरवबन्धुश्चन्द्रस्तस्य पण्डितपुरंदरस्यामुष्य हीरकुमारस्य जडेन मूर्खेण डलयोरैक्याज्जलेन पानीयेन सगमाश्लेषण सगमन कथ केन प्रकारेण साप्रत युक्तम् । अपि तु न कथमपीति । पण्डितो हि मूर्खसङ्ग कदापि न कुर्यादिति ख्याति । 'मूरख-सरिसी गोठडी पगि पगि कर न बुधीज' इति सूक्तोक्तेः ॥

काञ्चनप्रतिमयेव नितान्तोत्तेजनादनुपमप्रभयास्य ।
मार्जनान्मृदुलगन्धदुकूलैर्निर्मलेन वपुषा पुपुषे श्रीः ॥ ९८ ॥

मृदुलानि कोमलानि गन्धेनोपलक्षितानि दुकूलानि क्षौमाणि गन्धकाषाय्य तैर्मार्जे-नान्निर्नीरीकरणाद्रूक्षणान्निर्मलेन शुचिना अस्य कुमारस्य वपुषा देहेन श्री शोभा पुपुषे पुष्टा कृता । उत्प्रेक्ष्यते—काञ्चनप्रतिमयेव यथा सुवर्णमूर्त्या नितान्तमतिशयेनोत्तेजना-दुद्दीपनान्निर्मलीकरणादनुपमा असाधारणा प्रभा कान्तिर्यस्यास्तादृशी श्री. पुष्यते ॥

श्रोत्रपत्त्रयुगमाश्रितवत्या दिद्युते मणिवतंसिकयाऽस्य।
अर्चिषेव वदनान्तरमान्त्या पिण्डभावमितया स्थितयास्मिन्॥११५॥

अस्य कुमारस्य श्रोत्रे कर्णावेव पत्त्रे तयोर्युगं द्वन्द्वमाश्रितवत्या भजन्त्या मणिवतंसिकया रत्नोत्तंसेन। 'विदर्भपुत्रीश्रवणावतंसिका' इति नैषधे। दिद्युते शोभितम्। उत्प्रेक्ष्यते—वदनान्तर्मुखमध्ये अमान्त्या बाहुल्यात्स्थातुमशक्नुवत्या अर्चिषा कान्त्येव। अर्चिः कान्तिवाची। स्त्रीक्लीबलिङ्गः। 'रोदोर्चिर्दीनामगुणलयष्ट अयद्' इति लिङ्गानुशासने। किंभूतया अर्चिषा। पिण्डभावं पिण्डतामितया प्राप्तया। पिण्डीभूय स्थितयेत्यर्थः। पुनः किंभूतया। अस्मिन् कुमारकर्णे स्थितया वसन्त्या॥

मन्महे सकलशीतलभासां सार्वभौममिदमाननचन्द्रम्।
कुण्डलच्छलतमीरमणाभ्यामन्यथा कथमुपास्यत एषः॥११६॥

इदमाननचन्द्रममुष्य मुखमेव चन्द्रं विधुं सकलाः समस्ता ये शीतलभासश्चन्द्रमसः तेषां सार्वभौमव्यतिकरेण कुण्डलयोः कर्णाभरणयोः छलात्कपटात्तमीरमणाभ्यां चन्द्राभ्यामेष इदमाननचन्द्रः कथं केन प्रकारेण उपास्यते सेव्यते॥

कुण्डले कलयती प्रतिबिम्बे गण्डयोर्वहति हीरकुमारः।
क्रोधमुख्यचतुरात्मविपक्षान्भेत्तुकाम इव चक्रचतुष्कं॥११७॥

हीरकुमारः कुण्डले कर्णवेष्टिके वहति धारयति। कुण्डले किं कुर्वती। गण्डयोः कुमारस्यादर्शोपमगल्लयोः कपोलयोः प्रतिबिम्बे प्रतिमे कलयती बिभ्रती। उत्प्रेक्ष्यते—क्रोधः कोपो मुख्यः प्रकृष्टः प्रथमो वा येषु तादृशाः। क्रोधमानमायालोभाभिधानाश्चत्वारः चतुःसंख्याकाः कषाया एवात्मनः स्वस्य विपक्षाः शत्रवस्तान्। चतुःकषायद्वेष्यानित्यर्थः। भेत्तुकामो वैरादेककालमेव हन्तुमनाः सन् चक्राणामायुधविशेषाणां चतुष्कं चतुष्टयमिव बिभर्ति॥

व्यालवल्लिदलखण्डनजन्मा शोणिमाधरदले विललास।
एतदीयहृदयादनुरागो निःसरन्बहिरिव स्थित एषः॥११८॥

अधरदले कुमारस्याधरोष्ठपत्त्रे शोणिमा रक्तता। 'वर्णदृढादिभ्यः ष्यञ्च'। वर्णविशेषार्थेभ्यो दृढादिभ्यश्च ष्यञ् स्यात्, इमनिज्वा भावार्थे। 'शौक्ल्यं शुक्लिमा, दार्ढ्यं द्रढिमा, लावण्यं लवणिमा।' इति प्रक्रियाकौमुद्याम्। विललास बभासे। किंभूतः शोणिमा। व्यालवल्ल्या नागरवल्ल्या। 'ताम्बूलवल्ली ताम्बूली नागपर्यायवल्ल्यपि' इति हैम्याम्। दलानां पत्त्राणां खण्डनाच्चर्वणाज्जन्मोत्पत्तिर्यस्य। उत्प्रेक्ष्यते—एतदीयात्कुमारसंबन्धिहृदयान्मनसः। 'हृदयं मनो वक्षश्च स्तनान्तरं हृत् हृदयम्'। तथा 'हृच्चेतो हृदयं चित्तम्' इति द्वयमपि हैम्याम्। निःसरन्निर्गच्छन्नेष प्रत्यक्षो बहिःप्रदेशे अधरोष्ठे स्थित इव॥

१-२ कलयती इति नुम्रहितः प्रयोगः 'शप्श्यनोर्नित्यम्' इति सूत्रविरुद्धः.

स्वं क्षणात्क्षयमवेक्ष्य सृजद्भिः पारलौकिकसुखाय तपांसि ।
धूमपानमिव धूपजधूमव्याजतस्तदलकैः क्रियते स्म ॥ १०३ ॥

तदलकैः कुमारस्य केशैः । उत्प्रेक्ष्यते—धूपात् केशधूपनाद्यो जातो धूमस्तस्य व्याजात्कपटेन धूमपानमिव क्रियते विधीयते । किं कुर्वद्भिः । परलोके भवत्पारलौकिकं तच्च तत्सुखं च तस्मै तदर्थं कष्टानि तपांसि सृजद्भिः कुर्वद्भिः । किं कृत्वा । क्षणात्स्वल्पकालात्स्वमात्मीयं क्षयं विनाशं लोचलक्षणमवेक्ष्य ज्ञात्वा ॥

मानिनीजनमनोनयनस्वं यैरनीयत हृतेर्विषयत्वम् ।
पारिपन्थिकभरैरिव लेभे वन्धनं किमिति तच्चिकुरैस्तैः ॥ १०४ ॥

तैस्तस्य कुमारस्य चिकुरैः केशैः । [उत्प्रेक्ष्यते—] इति पश्यतोहरत्वाद्धेतोर्बन्धनं नियन्त्रणं लेभे प्राप्तम् । कैरिव । पारिपन्थिकभरैरिव । यथा तस्करगणैश्चौरिकाकरणाद्बन्धनं प्राप्यते । तैः कैः । यैश्चिकुरैर्मानिनीजनानां नागरिककामिनीलोकानां मनांसि हृदयानि तथा नयनानि विलोचनानि तान्येव स्वं विभवो हृतेरपहरणस्य विषयत्वं गोचरताम् । 'मन्ये न मे श्रवणगोचरतां गतोऽसि' इति कल्याणमन्दिरस्तवने । अनीयत लम्भितं प्रापितम् । अपहृतमित्यर्थः ॥

सूनसंगतशिलीमुखलेखासूनसायकधनुःशरराशेः ।
संश्रयन्श्रियमिवार्भकमल्लीकुड्मलाकलितकुन्तलहस्तः ॥ १०५ ॥

अर्भकस्य हीरकुमारस्य मल्ल्या मल्लिकाया कुड्मलैः कोरकैः । 'मल्लीभिः प्रतिमल्लीभावं दधती विभाति भावत्की' इति राजवर्णने । तैराकलितो युक्तो यः कुन्तलहस्तः केशपाशः सूनेषु कुसुमेषु संगता मकरन्दपानार्थमागता ये शिलीमुखा भ्रमरास्तेषां लेखा श्रेणिः सैव सूनसायकस्य धनूंषि कार्मुकाणि शरा बाणास्तेषां राशेः समूहस्य श्रियं शोभां श्रयन्निवास्तीत्युत्प्रेक्षा ॥

मूर्ध्नि तस्य मुकुटेन दिदीपेऽनर्घ्यरत्नपटलीललितेन ।
बर्हचामरजयं चिकुराणां विभ्रमैरिव विधाय धृतेन ॥ १०६ ॥

तस्य कुमारस्य मूर्ध्नि मस्तके मुकुटेन किरीटेन दिदीपे रेजे । किं भूतेन । अनर्घ्याणां बहुमूल्यानां रत्नानां विविधमणीनां पटली श्रेणी तया ललितेन मनोज्ञेन । उत्प्रेक्ष्यते—चिकुराणामर्थात्कुमारकेशानां विभ्रमैः शोभाभिः । 'आभा राटा विभूषा श्रीरभिख्याकान्तिविभ्रमाः' इति हैम्याम् । किलार्थाः । बर्हाणि मयूरपिच्छानि । 'अस्त्री चन्द्रकः पिच्छबर्हे-शिखण्डकम्' इति हैम्याम् । तथा चामराणि वालव्यजनानि तेषां जयं पराभवं विधाय कृत्वा धृतेनेव कलितेनेव ॥

पट्टिकार्भकविभोः कनकस्यालीकमण्डलमलंकुरुते स्म ।
विभ्रमेण चिकुराम्बुधराणां तडिनीव निकटे विलुठन्ती ॥१०७॥

[illegible] श्रुती [illegible] समीपे नन्दनचन्दनद्रवमयी बिन्दुरेखातिलक ब-[illegible] शोभते स्म । उत्प्रेक्ष्यते—[illegible] स्मरः मदन । 'कलकेलिरनन्यजोऽङ्गज.' [illegible] । तथा '[illegible] मन्मदे मुते । मदे फेनो' इत्यनेकार्थ. । स एव भटो [illegible] वशीकृतु [illegible] नलिकागुलिकाक्षेपणोपकरण 'बन्दूक'[illegible]-[illegible] । [illegible] । तथा '[illegible] तदुपनालिके त्वयि नालीकविमुक्तिपा-[illegible]' इति [illegible] । [illegible] । [illegible] क्षेमकानेन इव प्रत्यक्ष-[illegible] । [illegible] । 'सीसगोली' इति प्रसिद्धा ॥

चापलस्य नियमोऽभ्युपगम्योऽत.परं युनिशामत्र युवाभ्याम् ।
एतदाश्रवपितुमञ्जनरेखा कल्पिता नयनयोरिव तस्य ॥ ११२ ॥

तस्य हीरकुमारस्य नयनयोर्नेत्रयोरञ्जनस्य कज्जलस्य रेखा कल्पिता । लोचने अञ्जिते इत्यर्थः । [illegible] वा महोत्सवागिर्मिता रेखा । किं च विवाहादौ तरुणानां वृद्धानां पुरुषाणामपि चक्षुषोरञ्जनरेखा क्रियते इति लोकरूढिरपि स्थितिश्च । उत्प्रेक्ष्यते—एत-[illegible] पितुः [illegible] । तदेवाह—हे नयने, अत.परम् अद्यतनदिवसादारभ्य [illegible] दिवारात्रौ चापलस्य चञ्चलताया नियमो निषेधः युवाभ्यामभ्युपगम्यः अङ्गी-करणीय । कदाचिदपि चापल्यं न विधेयमिति भाव ॥

उत्पलाब्जकुमुदादिमदस्यून्यद्विलोचननृपौ परिभूय ।
सालयोः सुखमिवाञ्जनरेखानीलरत्नकृतयोर्वसत स्म ॥ ११३ ॥

यस्य कुमारस्य विलोचने नयने एव नामी ययोस्तौ तादृशौ नृपौ राजानौ उत्पलं नीलकमल अब्जं पद्मं कुमुदं श्वेतकमलं तान्यादिमानि प्रथमभवानि येषां तादृक्षान् दस्यून् विपक्षान् परिभूय जित्वा अञ्जनरेखारूपैर्नीलरत्नैरिन्द्रनीलमणिभि कृतयो सालयो. सुखं यथा स्यात्तथा क्रियाविशेषणम् । उत्प्रेक्ष्यते—वसत स्म अतिष्ठतामिव ॥ अथ वा । यद्विलोच-ननृपौ कुमारनयननामराजौ सालयो प्राकारयोर्मध्ये सुखं शर्मणा यथा स्यात्तथा वसतः तिष्ठत स्म । किंभूतयो सालयो । अञ्जनरेखारूपाणि यानि नीलरत्नानि मरकतमणय ते कृतयोर्निष्पादितयो. । उत्प्रेक्ष्यते—उत्पलानि कुवलयानि अब्जानि कमलानि कुमुदानि कैरवाणि तान्यादिमानि प्रथमानि येषां तादृक्षान् दस्यून् शत्रून् परिभूय निर्जित्येव सुखं वसत. । येन सर्वेऽप्यरयोऽभिभूय वशीकृता. स सुखं वसतीति ॥

भृङ्गसंगतवतंससरोजे तस्य कर्णयुगले शुशुभाते ।
विग्रहीतुमनसी नयनाभ्यामागते किमितरेतरवैरात् ॥ ११४ ॥ ✓

तस्य कुमारस्य कर्णयुगले श्रवणद्वन्द्वे भृङ्गाभ्यां मधुपानागतभ्रमराभ्यां संगते संयुक्ते वतंससरोजे कर्णपूरकमले शुशुभाते रेजतु । उत्प्रेक्ष्यते—इतरेतरेण परस्परं वैराद्विरो-धात्पचनाभ्यां नेत्राभ्यां सार्धं विग्रहीतुमनसी योद्धुकामे किमागते पार्श्वे समासे ॥

भूषणानि आभरणानि । उत्प्रेक्ष्यते—स्फाराणि विकाशभाञ्जि रत्नान्येव नयनानि तैरिति हेतोरिदमङ्ग कुमारकाय मृगयन्ते पश्यन्तीव । इति किम् । नोऽस्माक भूषणाना सुषमा अतिशयिनी शोभा कि अधिका, अथवा मुषिता अपहृता आच्छिद्य गृहीता मन्मथस्य कामस्य कान्ति शोभा येन तादृशस्य कुमारस्य सुषमा शरीरातिशायि सौन्दर्य किं वा अधिका दीप्यते ॥

तद्विभूषणमणीनिकुरम्बैः स्पर्धिभिः प्रतिभटैरिव भूत्या ।
प्राप्य तन्मृधधरां दधिरे स्वज्योतिरङ्कुरसुरेन्द्रधनूंषि ॥ १३० ॥

भूत्या शोभया लक्ष्म्या वा स्पर्धिभि' स्पर्धनशीलैस्तस्य कुमारस्य विभूषणानामलकाराणा मणीनिकुरम्बै रत्नप्रकरै तन्मृधधरा स कुमार एव सग्रामकरणोचितभूमी तां प्राप्य आसाद्य । उत्प्रेक्ष्यते—ज्योतींषि दीधितय. तेषामङ्कुराः प्ररोहास्त एव सुरेन्द्रधनूंषि इन्द्रचापचक्राणि दधिरे धृतानीव । कैरिव । प्रतिभटैरिव । यथा सपदा स्पर्धमानैः प्रतिपक्षै शत्रुभी रणभूमीर्लब्ध्वा परस्पर सग्रामकरणे कृते सुरेन्द्रचापोपमानि कार्मुकानि ध्रियन्ते ॥

भूरुहैर्विहसितैरिव कुञ्जः सौरभैरिव सरोरुहपुञ्जः ।
सान्द्रचन्द्रकिरणैरिव दोषा भूषणैरपुपदेष विभूषाम् ॥ १३१ ॥

एष कुमारो भूषणैरलकारैराभरणैः कृत्वा विभूषा शोभामपुपत्पुष्णाति स्म । क इव । कुञ्ज इव । यथा कानन वसन्तर्तुना विहसितै कुसुमितै. भूरुहैर्वृक्षै. कृत्वा शोभते । पुनः क इव । सरोरुहपुञ्ज इव । यथा पद्मप्रकर. सौरभै. परिमलै कृत्वा शोभा लभते । पुनः केव । दोषेव । यथा रजनी सान्द्रैर्नयनानन्ददायिभिर्निरन्ध्रैश्चन्द्रस्य विधोः किरणैः रश्मिभिः कृत्वा श्रिय पुष्णाति ॥ इति दीक्षासमये कुमारश्रृङ्गारवर्णनम् ॥

निर्जितेन यशसा सितभासा प्राभृतीकृतमिवैत्य नभस्तः ।
आनयन्नथ तुरङ्गममुष्यारोहणार्थमनघस्य मनुष्याः ॥ १३२ ॥

अथ श्रृङ्गारविधानान्तर मनुष्या मानवा. अमुष्य कुमारस्यारोहणार्थमध्यारोढु तुरङ्ग जात्यवाजिनमानयन्नानयन्ते स्म । किंभूतस्यामुष्य । अनघस्य प्रशस्यस्य निष्पापस्य वा । उत्प्रेक्ष्यते—यशसा अर्थाद्यश श्वेतश्रिया निर्जितेन पराभूतेन सितभासा चन्द्रमसा नभस्त आकाशमण्डलादेत्यागत्य प्राभृतीकृतमर्थात्कुमारस्य ढौकितमिव ॥

यन्नभस्वदतिपातिरयेन न्यकृतेन विनतातनयेन ।
तत्तुला कलयितुं वलिदम्युः सेवनामगमि याननयेव ॥ १३३ ॥

यस्य तुरगस्य नभस्वन्त समीरणमतिपतत्यतिक्रामतीत्येवशीलेन रयेण वेगेन । 'रयो वेगप्रवाहयो.' इत्यनेकार्थे. । न्यकृतेन विजितेन विनतानाम्नी अरुणगरुडयोर्जननी तस्यास्तनयेनात्मजार्थाद्गरुडेन तत्तुला कुमारारोहणार्थमानीततुरङ्गमवेगसादृश्य कलयितु

यस्य कुमारस्य उपभ्रु भ्रुवोर्मध्ये समीपे चान्दनश्चन्दनसंबन्धी बिन्दुर्वृत्ततिलकं बभासे शोभते स्म । उत्प्रेक्ष्यते—अङ्गजः स्मरः कमनः । 'कलाकेलिरनन्यजोऽङ्गजः' इति हैम्याम् । तथा 'अङ्गजो मन्मथे सुते । मदे केशे' इत्यनेकार्थः । स एव भटो वीरस्तं प्रणिहन्तुं यतातिपि कर्तुं नालिकेव नलिकागुलिकाक्षेपणोपकरणं 'बन्दूकनाम-नाली' इति लोकप्रसिद्धा । तथा 'नलिके न तदुच्चनासिके त्वयि नालीकविमुक्तिकामगो.' इति नैषधे । नासा नलिकेव । तया कृत्वा मोक्तुमनसा क्षेप्तुकामेन इव प्रत्यक्ष-लक्ष्या गुलिकेव । धृता । 'सीसागोली' इति प्रसिद्धा ॥

चापलस्य नियमोऽभ्युपगम्योऽतःपरं द्युनिशमत्र युवाभ्याम् ।
एतदालपितुमञ्जनरेखा कल्पिता नयनयोरिव तस्य ॥ ११२ ॥

तस्य हीरकुमारस्य नयनयोर्नेत्रयोरञ्जनस्य कज्जलस्य रेखा कल्पिता । लोचने अञ्जिते इत्यर्थः । बाल्यवादय वा महोत्सवादिनिर्मिता रेखा । किं च विवाहादौ तरुणानां वृद्धानां पुरुषाणामपि चक्षुषोरञ्जनरेखा क्रियते इति लोकरूढिरपि स्थितिश्च । उत्प्रेक्ष्यते—एत-दन्वेव कथ्यमानमालपितुं वक्तुमिव । तदेवाह—हे नयने, अतःपरम् अद्यतनदिवसादारभ्य द्युनिशं दिवारात्रौ चापलस्य चटुलताया नियमो निषेधः युवाभ्यामभ्युपगम्यः अङ्गी-करणीयः । कदाचिदपि चापल्यं न विधेयमिति भावः ॥

उत्पलाब्जकुमुदादिमदस्यून्यद्विलोचननृपौ परिभूय ।
सालयोः सुखमिवाञ्जनरेखानीलरत्नकृतयोर्वसतः स्म ॥ ११३ ॥

यस्य कुमारस्य विलोचने नयने एव नाथौ ययोस्तौ तादृशौ नृपौ राजानौ उत्पलं नीलकमलं अब्जं पद्मं कुमुदं श्वेतकमलं तान्यादिमानि प्रथमभवानि येषां तादृक्षान् दस्यून् विपक्षान् परिभूय जित्वा अञ्जनरेखारूपनीलरत्नैरिन्द्रनीलैः कृतयोः सालयोः सुखं यथा स्यात्तथा क्रियाविशेषणम् । उत्प्रेक्ष्यते—वसतः स्म अतिष्ठतामिव ॥ अथ वा । यद्विलोच-ननृपौ कुमारनयननामराजानौ सालयोः प्राकारयोर्मध्ये सुखं यथा स्यात्तथा वसतः तिष्ठतः स्म । किंभूतयोः सालयोः । अञ्जनरेखारूपाणि यानि नीलरत्नानि मरकतमणयस्तैः कृतयोर्निष्पादितयोः । उत्प्रेक्ष्यते—उत्पलानि कुवलयानि अब्जानि कमलानि कुमुदानि कैरवाणि तान्यादिमानि प्रथमानि येषां तादृक्षान् दस्यून् शत्रून् परिभूय जित्वेव सुखं वसतः । येन सर्वेऽप्यरयोऽभिभूय वशीकृता स सुखं वसतीति ॥

भृङ्गसंगतवतंससरोजे तस्य कर्णयुगले शुशुभाते ।
विभ्रतीत्युमनसी नयनाभ्यामागते विजितरेतरपक्षात् ॥ ११४ ॥

तस्य कुमारस्य कर्णयुगले श्रवणद्वये भ्रमरसंगते मधुकरसहिते ... [illegible] ... कृतसरोजे कर्णपूरकमले शुशुभाते रेजतुः । उत्प्रेक्ष्यते—[illegible] ... ध्यानयनाभ्यां नेत्राभ्यां सार्धं विग्रहाय ... [illegible] ॥

[illegible] ।
[illegible] ॥ १३७ ॥

[illegible]

रोहिणीकमलिनीरमणाश्वान्वोपरिस्थिति जुष नुपमासि ।
निर्जिगीपुरिव निर्जरमार्गे फाल्केलिमयनाननुते स्म ॥ १३८ ॥

अयमश्वः निर्जरमार्गे आकाशे [illegible] विलासानतुवे स्म । उत्प्रेक्ष्यते—स्वस्यात्मन उपरि ऊर्ध्वं स्थिति स्थान जुषन्ते भजन्ते । [illegible] आकाशगमनशीलत्वेन निजोपरिस्थितानित्यर्थः । [illegible] रोहिण्याः कमलिन्याश्च रमणयोर्भर्त्रोः चन्द्रसूर्ययोः अश्वानुरङ्गमास्तान् नुपमासि [illegible] निर्जिगीपुर्निर्जेतुमिच्छुरिव ॥

अर्जितानि गरुडस्य च गत्या निर्जयैर्हरिहैरश्च विभूत्या ।
उद्गिरन्निव यशांसि हरिर्यः फेनपिण्डपटलीकपटेन ॥ १३९ ॥

यो हरिस्तुरङ्गः फेनानां मुखनिर्गतकफलालाना पिण्डा बुद्बुदाकारा गोलकास्तेषां पटली वृन्दं तस्य कपटेन व्याजेन यशांसि स्वकीर्तीरुद्गिरन्निव प्रकटीकुर्वन्निवास्ते । किंभूतानि यशासि । गत्या पवनवेगगमनेन गरुडस्य, तथा विभूत्या स्वलक्ष्म्या हरिहरेरिन्द्रस्य उच्चैःश्रवसो, निर्जयैः पराभवैरर्जितानि सञ्चितानि ॥

आरुरोह जितजिष्णुहयं तं श्वैत्यतः फ[illegible] न जयन्तम् ।
वा[illegible] [illegible]र (भा)जं कैटभा[illegible] नराजम् ॥ १४० ॥

स कुमार[illegible] [illegible] अध्यासामास [illegible] जिनम् । जितोऽर्या[illegible] लक्ष्म्या परा[illegible] उच्चैःश्रवा ना[illegible] । पुन किं कुर्वन्तम् । श्वैत्य[illegible] ति शेषनाग[illegible] न्तम् । पुन किंभूतम् । कनका[illegible] [illegible] तीति । क इव । कैटभारिरिव [illegible] 'मालो' [illegible] नीडजाः पक्षिणस्तेषां राजा [illegible] नीड[illegible] जिष्णुर्वासवो येन व[illegible] त्रिजित्वात् [illegible] । च पुन किंभूतम् । फणिपति न[illegible] जयन्त पराभवन्तम् ।

नागवल्लिदलचर्वणराजत्सत्स्मितं दशनदीधितिमिश्रम् ।
पाथोदरविहारिविद्रुमाम्भोविभ्रमं किमु जिघृक्षति लक्ष्म्या ॥११९॥

नागवल्लीदलचर्वणजनितरक्ततया सहजोऽरुणस्तादृग् यो रदनच्छद ओ-
ष्ठस्तेन राजद्दीप्यमानं सत्स्मितं प्रमोदमेदुरतया ईषन्मात्रं कुमारस्य हसितं तत्कर्तृपदं
लक्ष्म्या स्वशोभया लक्ष्म्या वा । उत्प्रेक्ष्यते—पाथोदरे प्रवालमध्ये विहरति एवंशील
हिमाम्भस्तुहिनजलं तस्य विभ्रमं शिय विलासं वा किमु जिघृक्षति ग्रहीतुमिच्छतीव ।
किंभूतम् । तन्मितं दशनानां दन्तानां दीधित्या कान्त्या मिश्रं करम्बितम् ॥

रज्यते स्म दशनप्रकरेणामुष्य कुण्डलिपुरंदरबाहोः ।
रागिणी सविधगा च रसज्ञा प्रेक्ष्य कैर्न ध्रियते ह्यनुराग. ॥१२०॥

अमुष्य कुमारस्य दशनप्रकरेण दन्तवृन्देन रज्यते स्म रक्तीभूतम् । सरागीभूयते ।
बालानां दन्ता हि यावकपुत्रिकया रज्यते स्म स्त्रीणा चेति लोकस्य व्यवस्था । किंभू-
तस्य अमुष्य । कुण्डलिनां भोगिनां पुरंदरो वासवः शेषनागेन्द्रस्तद्वद्दीर्घौ बाहू भुजौ
यस्य । यद्रक्तीभूतं तद्युक्तमेव । तदेव दर्शयति—हि यस्मात्कारणात्सविधगा पार्श्ववर्तिनी
समीपस्थायुका रागिणी रागो रक्तिमा अनुरागोऽन्तरङ्गस्नेहश्च तेन कलिता रागवती
तथा रसानास्वादान् । तिक्तकटुकषायाम्ललवणमधुराख्यान्, अथ वा शृङ्गारहास्य-
करुणारौद्रवीरभयानकबीभत्साद्भुतशान्तनामकान्नवप्रमाणान् रसान् जानातीति रसज्ञा
तां प्रेक्ष्य दृष्ट्वा । कैः । पुंभिः अनुरागो न ध्रियते, अपि तु विविधरसेषु निपुणां रागवतीं
पार्श्वस्थायिनीं कामिनीं विलोक्य सर्वः कामुको रागो ध्रियत एव । तत्त्वतस्तु रसज्ञा जिह्वा ॥

संयमाध्यवसितिप्रथमानप्रावृषेण्यजलवाहघटाया ।
बिन्दुवृन्दमुदियाय किमेतत्कण्ठपीठकृतमौक्तिकहारः ॥ १२१ ॥

एतस्य कुमारस्य कण्ठपीठे गलकन्दले कृतः स्थापितः । परिहित इत्यर्थः । मौक्तिक-
हारो मुक्तालता । स उत्प्रेक्ष्यते—बिन्दुवृन्दं कणनिकर इवोदियाय प्रकटीभूतम् । कस्याः ।
संयमस्य चारित्रस्य या अध्यवसितिरध्यवसायः परिणामः सैव प्रथमाना विस्तरन्ती
प्रावृषेण्या वर्षाकालसंबन्धिनी जलवाहानां वर्षणोन्मुखमेघानां घटा माला तस्याः ॥

एतदीयवदनामृतभासा स्पर्धयेव सह शीतलभासा ।
नूततारकततिर्ध्रियते सामुक्तमौक्तिकलताकपटेन ॥ १२२ ॥

एतदीयेन हीरकुमारसंबन्धिना वदनामृतभासा वक्त्रविधुना नूता नवीना तारक-
ततिर्ज्योतिर्मण्डलं ध्रियते स्म बिभरांबभूवे । केन । आमुक्ता कण्ठपीठे स्थापिता
परिहिता या मौक्तिकलता मुक्ताकलापः स्थूलमुक्ताफलहारः तस्य कपटेन छलेन ।
उत्प्रेक्ष्यते—शीतलभासा गगनाङ्गणस्थायुकस्वाभाविकचन्द्रेण सह सार्धं स्पर्धया सप-
त्नेन ईर्ष्ययेव धृता इत्यर्थः ॥

तत्र व्यतिकरे तस्य कुमारस्य व्रतस्य संयमस्य महोत्सवे उपगतानां समागतानां पञ्चजनानां लोकानाम् । 'मर्त्यः पञ्चजनो भूस्पृक्' इति हैम्याम् । मेलकः संगमः स्फुरति । 'मेलके सङ्गसंगमौ' इति हैम्याम् । तथा 'जगत्त्रयीनायकमेलकेऽस्मिन्' इति नैषधे । उत्प्रेक्ष्यते—कौतुकेन कुतूहलेन कृत्वा निजस्यात्मनः । 'श्रुत्वा निज भीमजया निरस्तम्' इति नैषधे । निजशब्देनात्मा । शक्तिं सामर्थ्यं दिदृक्षोर्द्रष्टुमिच्छोर्नाकिनः कस्यचिद्देवस्य इहास्मिन् प्रस्तावे स्थाने वा कायनिकायो देहव्रजः किमु । निकायस्तु सधर्मिणां समुदायः । 'तथास्याहेर्भूयः फगसमुचितः काययष्टीनिकायः' इति नैषधे ॥

निष्पतन्मदविलोलकपोलास्तत्पुरः समचलन्द्विरदेन्द्राः ।
विन्ध्यभूध्र इव निर्झरशाली जङ्गमः करणबंहिममाली ॥ १४५ ॥

तत्पुरः हीरकुमारस्याग्रे द्विरदेन्द्रा गजराजाः समचलन् संचरन्ति स्म । किंभूताः । निष्पतन्निरन्तरं निःसरन् यो मदो दानाम्भस्तेन विलोलाश्चञ्चलाः कपोला गण्डस्थलानि येषाम् । उत्प्रेक्ष्यते—विन्ध्यभूध्र इव विन्ध्याचल इव । किंभूतः । जङ्गमः संचरन् । पुनः किंभूतः । निर्झरैर्निःसरत्सलिलैः शालते शोभत इत्येवंशीलः । पुनः किंभूतः । करणानां शरीराणां बंहिमा बाहुल्यं मलते धारयतीत्येवंशीलः । 'मलि मल्ल धारणे' धातुः । बहुरूपवानित्यर्थः ॥

स्यन्दनैः स्यदविगानितवातैस्तत्पुरोऽङ्कविलसज्जनजातैः ।
पुस्फुरे सुरसमूहसनाथैः क्ष्मागतैरिव मरुद्रथसार्थैः ॥ १४६ ॥

तस्य कुमारस्य पुरोऽग्रे स्यन्दनै रथैः पुस्फुरे दिदीपे । किंभूतैः स्यन्दनैः । स्यदेन वेगेन विगानितोऽवगणितो वातः पवनो यैः । 'स्यदक्षणाङ्कारितपत्रपद्धति' इति नैषधे । पुनः किंभूतैः । अङ्के क्रोडे रथोत्सङ्गे विलसन्तः शोभमाना जना मनुष्यास्तेषां जातं समूहो येषु । उत्प्रेक्ष्यते—क्ष्मागतैर्भूमण्डले समेतैः सुराणां देवानां समूहेन गणेन सनाथैः सहितैर्मरुद्रथसार्थैः निर्जररथवृन्दैरिव ॥

स्वर्णपल्ययनपल्लविताङ्गास्तत्पुरः प्रविचलन्ति तुरङ्गाः ।
तत्तुरङ्गविजिताः शशिभास्वद्वाजिनः किमु निषेवितुमेताः ॥ १४७ ॥

तस्य कुमारस्याग्रे तुरङ्गाः प्रविचरन्ति । किंभूताः । स्वर्णस्य हेम्नः पल्ययनं पर्याणं तेन पल्लवितं मण्डितमङ्गं कायो येषाम् । उत्प्रेक्ष्यते—तेन हीरकुमारारोहणार्थमानीतेन तुरङ्गेणाश्वेन विजिताः स्वश्रिया पराभूताः सन्तो निषेवितुमर्थात्तमेवाश्वमुपासितुमेता आगताः । शशिनः चन्द्रस्य भास्वतः सूर्यस्य वाजिनोऽश्वा इव ॥

मागधा मधुरमङ्गलवाचः प्रोच्चकैरुदचरन्पुरतोऽस्य ।
आह्वयन्त इव दर्शयितुं किं दिग्गजेन्द्रनिवहं महमेनम् ॥ १४८ ॥

[illegible] ।

[illegible] किमरुणैर्नखैरनवम् ॥१२६॥

[illegible]

[illegible] ॥

[illegible] ।

[illegible] ॥ १२७ ॥

[illegible] स्थानि [illegible] । [illegible] इति [illegible] शालते [illegible] ॥

दर्पणेष्विव [illegible] भूषणेषु [illegible] ।

दर्पणार्पणविधाभि[illegible] स्वजनानाम् ॥ १२८ ॥

[illegible] जनानामात्मीय-[illegible] । दर्पणानाम् [illegible] प्रदानानि । आत्मदर्शदर्शनानी-[illegible] । [illegible] जाता । अमुष्मिन् किं कु-[illegible] । [illegible] कान्तिभि कृत्वा [illegible] जातेषु भूषणेष्वाभरणेषु [illegible] । [illegible] । दर्पणेष्विव । यथा [illegible] ॥

दीप्यते किमधिक सुपमा नोऽमुष्य वा मुपितमन्मथकान्तेः ।

भूषणानि मृगयन्त इतीव स्फाररतनयनैरिदमङ्गम् ॥ १२९ ॥

चित हृतम् । उत्प्रेक्ष्यते—सुरवधूभिः अप्सरोभिरिव । 'स्त्रियः स्वर्गिवध्वोऽप्सरसः' इति हैम्याम् । पुनरुद्धतनरैरुत्कटपुरुषैः पथि मार्गे मिथः परस्परं पृथु बहु यथा स्यात्तथा मिथ्यायुद्धं मृषासंग्रामो निरमायि निर्मितम् । विवाहादिमहोत्सवेषु दाक्षिणात्या नर पुरन्ध्रात्प्रतिचतुष्पथं सहृपागयः परस्परं मिथ्यायुद्धं कुर्वन्तीति सौराष्ट्रमण्डलादौ दृश्यते । 'ततः प्रतीच्छ प्रहरेति भाषिणी परस्परोल्लासितशल्यपल्लवे । मृषामृधं सादिबले कुतूहलान्नलस्य नासीरगते वितेनतुः ॥' इति नैषधे । किंवत् । तथ्यवत् । यथा उद्धताः सहृपागयः पुरुषाः सत्यं युद्धं विदधते ॥

दुन्दुभिध्वनितिभिर्जयशब्दं तस्य बन्दिवदुदीरयतीव ।
तद्गुणानिव मुदा निगदन्ती दध्वनीति मधुरापि न(नु)भेरी ॥१९३॥

दुन्दुभिर्मद्दलभेरी निसातो वा ध्वनितिभिर्भाङ्कारशब्दैस्तस्य कुमारस्य जयशब्दः जयजयेत्युदीरयति प्रकटीकरोति इव वदतीव । किंवत् । बन्दिवत् । यथा मङ्गलपाठकः [illegible] शब्दमुदीरयति । अपि पुनर्भेरी वाद्यविशेषो दध्वनीति अतिशयेन [illegible] । किंभूता । मधुरा श्रवणसुखकारिरावा । उत्प्रेक्ष्यते—मुदा हर्षेण तस्य [illegible] गुणान् [illegible]दार्यगाम्भीर्यवैराग्यशमदमादिकान्निगदन्ती कथयन्तीव दध्व[illegible] । इति दीक्षाग्रहणप्रयाणसमये कुमारपुरो गीतनृत्यवादित्रादिकथनम् ॥

[illegible] गुणैर्गुणराजोऽलंकृतैः परिवृतोऽन्यकुमारैः ।
[illegible] पथि चकार कुमारोऽनल्पकल्पितमहेषु सगोत्रे ॥ १९४ ॥

[illegible] सगोत्रे [illegible] अतिशायिनो बहवो वा कल्पिता विरचिता ये [illegible] पथि मार्गे प्रस्थानं चकार । प्रचलितवान् । किंभूत । [illegible] । अथ दीक्षाग्रहणोत्सुकैरपरैः कुमारैः । किंभूतैः । अलंकृतैः [illegible] । [illegible] । गुणराज इव । यथा [illegible] पथि [illegible] । किंभूतो गुणराजः । [illegible] । किंभूतैः । [illegible] । [illegible] ॥

[illegible] ।
[illegible] ॥ १९५ ॥

[illegible]

[illegible] तारकेति [illegible] सेना पतिरत्नाकराणि [illegible] इति सा [illegible] अन्यत्रापि । अन्यत्र नाति [illegible] गोपी चन्द्रमसि शीता । [illegible] [illegible] ॥

[illegible] भुवि पन्नगेषु पातालगेहेष्वपि दृग्भिरनन्यः ।
[illegible] स्वादनकामिव पश्यति जेतुम् ॥ १२४ ॥

[illegible] द्विजराज्ञो द्वितीया- [illegible] इति [illegible] प्रकृतिरनन्यस्येव । इत्यन्यैक- [illegible] उपन्यासा जगती भुवन [illegible] इत्यर्थः । [illegible] निजरेखां- [illegible] पश्यति । 'दृष्टं गोरक्षुणदद [illegible]' इति [illegible] । [illegible] दर्शयति—श्रुति [illegible] । पुनर्दिश भगवान् पातालगोलक्षणः । 'गा- [illegible] इति [illegible] । न पुनर्नागवेश्मनि [illegible] ॥

स्पर्धया [illegible] जिगीषुरभूतलेन शिरसः स्वकराय ।
[illegible] कारदिगमाविमदाद्युर्विपिकाभिरयमायतीव ॥ १२५ ॥

[illegible] 'स्वशाङ्कस्तदङ्कयोः' इति नै- [illegible] कृत्वा शिरसो मस्तकस्य [illegible] । उत्प्रेक्ष्यते—अर्कतुरगान् सू- [illegible] सुप्रामविधानाय [illegible] । किंभूतानर्कतुरङ्- [illegible] स्पर्धया [illegible] जिगीषून् जेतुमिच्छून् ॥

आत्मफेनरुचिचन्दनसान्द्रस्यन्दचर्चनविधाभिरिवार्चा ।
पत्प्रहारभवमम्बुधिरेभिः स्वापराधमधरीकुरुते यः ॥ १२६ ॥

य [illegible] तुरगः अम्बुधिरेभिः [illegible] । उत्प्रेक्ष्यते—पदां चरणानां प्रहारैः [illegible] ताड- [illegible] 'पत्त्रजानिति' दर्शनात्पत्प्रहारैरिति । अथ च । '[illegible] तच्छायच्छायलवोऽपि पाङवे' इति नैषधे । पदो [illegible] इति व्युत्पत्त्या तस्य नलस्य छायाया लवोऽप्ययश. [illegible]' इति तद्भूपा । स्वापराधं निजमन्तुमधरीकुरुते शामयतीव । काभिः । आत्मनः फेना मुख- [illegible] हरिचन्दनस्य श्रीखण्डस्य सान्द्राः स्निग्धा ये स्यन्दा रसा द्रवा वा तैश्च- र्चनाविधाभिः पूजनप्रकारैः ॥

२९

काचिद्विलासवती ईक्षणस्यार्थात्तद्विलोकनस्य रसेन उद्वेष्टितं छोटितमपि निजस्यात्मनः कुन्तलहस्तं केशपाशं न बबन्ध । उत्प्रेक्ष्यते—कौतुकात्कौतूहलादनेन निजकुन्तलहस्तेन कलापिना मयूराणां कलापस्य बर्हस्य शिखण्डकस्य श्रीकलापं शोभासमुदयमनुमातुं सदृशीकर्तुमिव ॥

कापि वीक्षणरसत्वरमाणा स्रस्तमप्यधृत मूर्ध्नि न माल्यम् ।
यज्जितेन मदनेन निजौकः स्थायिनोज्झितमिवास्त्रमवेत्य ॥१६०॥

कापि कामिनी स्रस्तमर्थान्मस्तकात्पतितमपि माल्यं पुष्पदाम मूर्ध्नि स्वशिरसि नाधृत न धृतवती नारोपयति स्म । किंभूता । वीक्षणस्यार्थात्कुमारालोकनस्य रसेन रागेण त्वरमाणा शीघ्रं व्रजन्ती भवन्ती वा । उत्प्रेक्ष्यते—निजस्यात्मीयस्यात्मनो वा यदोको वशारूपं मन्दिरं तत्र स्थायिना वसनशीलेन । तथा येन कुमारेण जितेन मदनेन कामेन उज्झितं त्यक्तमस्त्रं प्रहरणमिव अवेत्य ज्ञात्वा ॥

हंसपादभरितार्धमहासीत्केशवर्त्म तमवेक्षितुमन्या ।
पूर्णरागिणमिह प्रविधातुं श्यामलाशयमलंभवतात्कः ॥ १६१ ॥

अन्या कापि राजननयना तं कुमारमवेक्षितुमर्थादुत्सुका सती हंसपादेन सिन्दूरेण भरितं पूरितमर्धं सामिभागो यस्य तादृशं केशवर्त्म सीमन्तमहासीत्तत्याज मुक्तवती । युक्तोऽयमर्थः । इह जगति श्यामलाशयं मलिनमानसं पिशुनम् । 'दयासमुद्रे स तदाशयेऽतिथीचकार कारुण्यरसापगा गिरः' इति नैषधे । आशये मनसीति तद्वृत्तिः । पूर्णो रागोऽस्त्यस्मिन्वा तादृशमतिशायि रागरक्तत्तरङ्गितं कर्तुम् । कः पुमानलंभवतात् समर्थो भवतु । अपि तु न कोऽपीत्यर्थः ॥

भाति मुक्तमलिके रभसेनाप्यन्यतयार्धकृतचन्दनचित्रम् ।
स्पर्धिजित्वरकलां शिशुसोमोऽध्येतुमागत इवैष मुखाब्जात् ॥१६२॥

अपि पुनरन्यया अपरया कयापि कामिन्या अलिके स्वललाटपदे अर्धकृतं सामिरचितं चन्दनस्य श्रीखण्डस्य तिलकं रभसेनौत्सुक्येन मुक्तं त्यक्तं ललाटे अर्धकृतमेव तिलकमशोभि इत्यर्थः । उत्प्रेक्ष्यते—एषोऽर्धतिलकरूपः शिशुसोमो बालचन्द्रः मुखाब्जाद्युवतीवदनकमलात्स्पर्धिना स्वशोभाविद्वेषिणा जित्वरीं जयनशीलां कलां चातुरीमध्येतुं पठितुमभ्यसितुमागतः समेत इव ॥

पातुमप्रभु कुमारविभूषां स्वं दृशोर्द्वयमवेत्य कयाचित् ।
लोचने इव धृते इतरे स्वश्रोत्रयोः सितचतंससरोजे ॥ १६३ ॥

कयाचित्कान्तया स्वश्रोत्रयोरात्मकर्णयोः सिते विकसिते वतंससरोजे उत्तंसाम्भोजे धृते । [illegible] इत्यर्थः । उत्प्रेक्ष्यते—इतरे अन्ये लोचने नयने इव कल्पिते । किं कृत्वा । [illegible] । किं कर्मतापन्नम् । दृशोर्द्वयं च क्षुषोर्द्वितयम् । किंभूतम् । [illegible]

तदरातित्वात् । स्वर्णशोभावन्त स्वर्णकान्तत्वात् । गरुडविशेषणान्यपि ॥ इति दीक्षारागमे कुमारारोहणार्थमानीततुरगवर्णनम् ॥

तत्र भावयतिनः पुलकोधत्कञ्चुकानणुमहः कटकौघाः ।
मुक्तिपत्तनजिघृक्षुमनस्कौत्सुक्यभाज इव राजकुमाराः ॥ १४१ ॥
भूविहारिहयवाहनशस्यानेकमूर्तय इवोत्सवपश्याः ।
वाहपृष्ठमधिरुह्य कुमारा आगमन्नपि परे जितमाराः ॥ १४२ ॥
(युग्मम्)

तत्र तस्मिन्नवसरे तस्मिन् स्थाने वा जितमाराः स्वरूपसौन्दर्याभिभूतमदनाः अपरे अन्येऽपि भावयतिनः अभिप्रायेण चारित्रवन्त. अमी पालादिमा॰ कुमाराः आगमन् समागताः । किं कृत्वा । वाहानां जात्यतुरङ्गाणां पृष्ठमधिरुह्य अध्यास्य । उत्प्रेक्ष्यते— उत्सव संयममहामह पश्यन्त्यवलोकयन्तीति तादृश्यो भूविहारिण्य॰ क्षोणीचारिण्य॰ हयवाहनस्य एव तस्य शस्या श्लाघ्या रम्यास्तथा अनेका बह्व्यो मूर्तय शरीराणि इव । किंभूताः कुमाराः । (इव यथा पृथ्वीपति) पुलको रोमाञ्च स एवोद्यन् प्रकटीभवन् कञ्चुक संनाहो येषाम्, तथा अनणु महन्मह॰ कान्ति. प्रतापश्च येषाम् । अथ वा अनणुभिर्बहुलैर्महोभिः किरणैः प्रतापैश्च युक्ताना कटकानां वलयानां सैन्यानामोघाः समूहा येषाम् । पुन॰ किंभूता॰ मुक्तिः सिद्धिः सैव पत्तन महानगरं तज्जिघृक्षु ग्रहीतुमिच्छु मनो येषाम् । समासान्त. कप् । पुनः किंभूता । यत एव मुक्तिनगरजिघृक्षवस्तत एवोत्कण्ठा भजन्त इति । अथ वा औत्सुक्य संयमोत्कण्ठा भजन्ते । पश्चात्कर्मधारय. । उत्प्रेक्ष्यते— राजकुमारा इव । यथा पृथ्वीपतिपुत्राः एवंविधा भवन्ति ॥

पद्मिनीप्रियतमो दिवसादौ पावकादिव सहस्रमयूखैः ।
पूरुषैर्निखिलमण्डलमध्यात्तत्क्षणादुपगतैः परिवव्रे ॥ १४३ ॥

हीरकुमारो निखिलः समस्तो यो मण्डलो गुर्जरदेशस्तस्य मध्यादन्तरालात्तत्क्षणात्त एव कुमारस्य संयमग्रहणलक्षण क्षणः प्रस्ताव॰ उत्सवो वा तस्माद्धेतोरुपगतैरायातै. पूरुषैर्मनुष्यैरुपलक्षणात्माऽऽचर्याद्वा स्त्रीभिश्च । 'पुरुष॰ पूरुषो नर' इति हैम्याम् । परिवव्रे परिवृत. । क इव । पद्मिनीपतिरिव यथा भास्वान् दिवसादौ प्रभाते पावकाद्वह्नेरुपगतै समेतै॰ सहस्रमयूखैर्वा किरणै॰ परिव्रियते । सूर्यो हि सायमस्त गच्छन् स्वकिरणान् वह्नौ निक्षिपति । प्रभाते च गृह्णाति इति च कविसमयः । तथा च रघुवंशे— 'दिनान्ते निहित तेज सवित्रेव हुताशने' इति ॥

तत्र तद्व्रतमहोपगताना मेलकः स्फुरति पञ्चजनानाम् ।
कौतुकेन निजशक्तिदिदृक्षोर्नाकिन किमिह कायनिकाय ॥१४४॥

तद्विभावनरसव्यवसाया नागवल्लिदलविभ्रमतोऽन्या ।
कापि केलिकमलं निजवक्त्रस्पर्धयेव कवलीकुरुते स्म ॥ १६७ ॥

अन्या कापि कान्ता नागवल्ल्यास्ताम्बूलीलताया दलानां पत्राणां विभ्रमतो भ्रान्तेः । बुद्धेरित्यर्थः । 'कर्णान्तविभ्रमभ्रान्तकृष्णार्जुनविलोचना' इति चम्पूकथायाम् । विभ्रमेण भ्रान्तेति तट्टिपनके । केलिकमलं क्रीडापद्मं कवलीकुरुते स्म । खादति स्मेत्यर्थः । किंभूता कापि । तस्य कुमारस्य यद्विभावनं विलोकनं तस्य रसो रागः स एव व्यवसायो व्यापारोऽस्याः । उत्प्रेक्ष्यते—निजेनात्मीयेन वक्त्रेण वदनेन सार्धं स्पर्धया संहर्षेणेव । विभूषाभिरीर्ष्ययेत्यर्थः ॥

काचन व्यधित काञ्चनकाञ्चीं कण्ठपीठलुठितां रभसेन ।
इन्दुजां मिलितुमब्जपिशङ्गीं यन्मुखाङ्गपितृसोममिवैताम् ॥ १६८ ॥

काचन नितम्बिनी रभसेन कुमारदर्शनौत्सुक्येन काञ्चनकाञ्चीं कलधौतमेखलां कण्ठपीठे गलकन्दले लुठिता विलम्बिताम् । क्षिप्तामित्यर्थः । व्यधित चकार । राभस्यान्मुक्ताहारभ्रान्त्या मेखला कण्ठे चिक्षेपेत्यर्थः । उत्प्रेक्ष्यते—यस्याः सीमन्तिन्याः मुखं वदनमेवाङ्ग कायो यस्य यत्स्त्री(मुख)वपुषं पितरं तातं सोमं चन्द्रं मिलितुं तातस्नेहादेतामागतामब्जैरर्थात्सुवर्णकमलपरागैः पिशङ्गां पीतां भूतामिन्दुजां रेवानदीमिव ॥

कापि मौक्तिकलतां स्वकटीरे विभ्रमादधृत सारसनस्य ।
वेश्मनीव रचितां रतिभर्तुः कुन्दकुड्मलितवन्दनमालाम् ॥ १६९ ॥

कापि वरवर्णिनी सारसनस्य मणिमेखलाया विभ्रमाद्भ्रान्तेः कुमारदर्शनौत्सुक्यात्स्वकटीरे निजकटीतटे । 'कलापो रसना सारसनं काञ्ची च सप्तकी,' तथा—'श्रोणिः कलत्रं कटीरं काञ्चीपदं ककुद्मतान्ति' द्वयमपि हैम्याम् । मौक्तिकलतां मुक्ताहारम् । अधृत परिदधौ । उत्प्रेक्ष्यते—रतिभर्तुः स्मरस्य वेश्मनि । गृहद्वारे इत्यर्थः ॥

हारचारिमकुचौ परया नो वाससातिरभसात्पिदधाते ।
माल्यशालिकलशद्वितयीव श्रेयसे पथि धृता व्रजतोऽस्य ॥ १७० ॥

परया अन्यया कयाचिन्महिलया हारस्य मुक्तालतायाश्चारिमा रमणीयता ययोर्हारेण रम्यत्वं वा ययोस्तादृशौ कुचौ स्तनौ अतिरभसात्कुमारप्रेक्षणौत्सुक्यात् नो इति निषेधे । 'अमानो नाः प्रतिषेधे' इति व्याकरणवचनात् वाससा वस्त्रेण कृत्वा पिदधाते तिरोहितौ परोक्षाद्द्विवचनम् । उत्प्रेक्ष्यते—व्रजतो दीक्षाग्रहणार्थं गच्छतोऽस्य वीरकुमारस्य पथि मार्गे माल्येन पुष्पमालया शालते शोभते इत्येवंशीला कलशयोः कुम्भयोः द्वितयी द्वयीव श्रेयसे कल्याणकृते धृता पुरस्कृता ॥

द्रष्टुं निजभुजं रभसेनाजीघटत्कटकविभ्रमतोऽन्या ।
दर्भदर्भजभवैरभिभूतं शालितुं किमु मृणालगुपनम् ॥ १७१ ॥

मागधा म[illegible]पाठका [illegible] कुमारस्यागत पौषधिकरतिदानेनोपचारेण मधुरा गिरः [illegible]णकारिण्यो म[illegible]ना[illegible] कल्याणशालिनीर्वाणी. उदचरन् उच्चरन्ति स्म । उत्प्रेक्ष्यते—एन सह कुमारदीक्षोत्सव द्रष्टुमिव दिग्गजेन्द्रनिवह लोकपालमण्डलम् । 'आखण्डलो दण्डधर. शिवावान् पति प्रतीच्या इति दिग्गजेन्द्राः' इति नैषधे । इह पत्तनभूमौ आहृता आकारयन्त इव । किम् इवार्थे ॥

गायनैरयमगायि समेतैः स्वर्गृहात्किमिह तुम्बुरुवर्गैः ।
अभ्यपिच्यत सुधाप्यदसीये वेणुभिः श्रवसि वैणविकौघैः ॥१४९॥

अथ हीरकुमारो गायनैर्गानकर्तृभिर्जनै. अगायि गानगोचरीकृत । उत्प्रेक्ष्यते—स्वर्गृहाद्देवलोकस्वगृहान्. सकाशादिह भूलोके पत्तने समेतैस्तुम्बुरुवर्गै देवगायनानां समुदायैरिव अपि पुनर्वैणविकैर्वेणुवादकर्वेणुभिर्वंशै. कृत्वा अदसीये कुमारसबन्धिनि श्रवसि कर्णे सुधा पीयूषमभ्यपिच्यत सिक्ता ॥

घोषणास्य यशसामिव भेरीभाङ्कृतिर्व्यरचि कैश्चन मार्गे ।
किन्नरालिरिव वैणिकपङ्क्तिः संमदात्तमुपवीणयति स्म ॥ १५० ॥

कैश्चन भेरीवादकैर्मार्गे पथि भेरीणां वादित्रविशेषाणां दुन्दुभीनां वा भाङ्कृतिर्भाङ्कारध्वनिर्व्यरचि चक्रे । उत्प्रेक्ष्यते—अस्य कुमारस्य यशसा कीर्तीनां घोषणा पटहवादनमिव । पुनर्वैणिकानां वीणावादकानां पङ्क्ति श्रेणिः समदात् हर्षात् त हीरकुमारमुपवीणयति स्म वीणया गायति स्म । 'उपवीणयितु ययौ रवेरुदयावृत्तिपथेन नारद.' इति रघौ । किमिव । किंनरालिरिव यथा किंपुरुषमालिका वीणया कृत्वा गायति गान कुरुते ॥

साङ्गजे प्रबलमोहमहीन्द्रे प्रापिते पितृपतेरतिथित्वम् ।
यस्य चञ्चुपुटचञ्चुररावा मङ्गलध्वनितमः किमुदीर्णाः ॥ १५१ ॥

चञ्चुपुटाख्याः कांस्यतालाः वाद्यविशेषास्तेषां चञ्चुराः मनोज्ञा रावाः शब्दा उदीर्णा प्रकटीकृता । ताला वादिता इत्यर्थ । अर्थान्मार्गे तालवादकैः । उत्प्रेक्ष्यते—यस्य कुमारस्य मङ्गलध्वनितम मङ्गलशब्दा इवोदीर्णाः । कस्मिन्सति । सहाङ्गजेन स्मरेण पुत्रेण च वर्तते यस्तादृशे मोहनामनि महीन्द्रे राजनि पितृपतेर्यमस्य अतिथित्व प्राघुणत्व प्रापिते नीते सति । हते इत्यर्थ । 'यम कृतान्त पितृदक्षिणाशाप्रेतपति.' इति हैम्याम् ॥

ताण्डवं व्यरचि वारवधूभिस्तत्पुरः किमु सुपर्ववधूभिः ।
तथ्यवत्पथिमिथः पृथु मिथ्यायुद्धमुद्धतनरैर्निरमायि ॥ १५२ ॥

तस्य कुमारस्य पुरः पुरस्ताद्वारवधूभि. पणाङ्गनारूपपात्रैस्ताण्डवं नृत्य व्यरचि विर-

क्ष्यते—इति हेतोः स्वमात्मीयं क्रमं चरणमर्धवीतं सामिप्रक्षालितमोज्झज्जहाति स त्यक्तवती। इति किम्। हेतुमाह—यः पुमान् प्राप्तरूपविभवमधिगतसम्यग्रूपत्वेन शोभा पण्डितत्वेन वा संपदम्। 'विद्वान्सुधीकविविचक्षणलब्धवर्णा ज्ञप्राप्तरूपकृतिकृष्टयभिरूपधीराः' इति हैम्याम्। वहते धारयति। अत्र जगति स जनः जडैः। डलयोरैक्यात्। जलैः पानीयैः मूर्खैश्च सार्धमनुपदी सगमवान् कृतसङ्गः कथं भवति। अपि तु कदाचिदपि स्यादेवेति विचारः॥

स्फाटिकावनिषु वेश्मनि यान्त्या वीक्ष्य यावकपदानि परस्याः।
मुग्धभृङ्गविहगैर्जलरोहद्रक्तपङ्कजधियेव दधावे॥ १७६॥

वेश्मनि स्वगृहे स्फाटिकावनिषु स्फाटिकरत्ननिबद्धभूमीषु यान्त्या अर्थात्कुमारं द्रष्टुमुत्सुकतया व्रजन्त्या अपरस्या अन्यस्यास्तरुण्याः यावकपदानि नवीनालक्तकरसार्द्राणि पदानि क्रमस्थापनानि वीक्ष्य विलोक्य मुग्धैरचतुरैर्भृङ्गा भ्रमरा एव विहगाः पक्षिणस्तैर्दधावे धावितम्। उड्डीय गत्वा तदुपरिष्टादुपविष्टमित्यर्थः। उत्प्रेक्ष्यते—जलेषु सरःप्रभृतिपानीयेषु रोहन्त्युद्गच्छन्ति प्रादुर्भवन्ति इति जलरोहन्ति तादृशानि यानि रक्तपङ्कजानि शोणकमलानि कोकनदानि तेषां धिया बुद्ध्या भ्रमेणेव॥

काप्यलक्तकधियोत्सुकिता पत्पद्मयोरकृत चन्दनचर्चाम्।
रक्तयोर्न सविधे प्रहितां स्वां चन्द्रिकां शशभृता सखितायै॥१७७॥

उत्सुकिता कुमारावलोकनरसेनोत्कण्ठिता कापि काचिदपरा लीलावती अलक्तधिया यावकरसभ्रान्त्या पत्पद्मयोः स्वचरणतामरसयोः चन्दनस्य श्रीखण्डद्रवस्य चर्चां विलेपनम्। 'अङ्गरागो विलेपनं चार्चिक्यं समालम्भनं चर्चा स्यात्' इति हैम्याम्। अकृत कृतवती। उत्प्रेक्ष्यते—रक्तयोः स्वानुरागिणोः। 'रक्तं नील्यादिरञ्जिते। कुङ्कुमेऽसृज्यनुरक्ते प्राचीनामलकेऽरुणे' इत्यनेकार्थः। स्वाभाविकारुणयोरिति तत्त्वम्। अर्थान्निजोपरि रागं दधानयोः अनयोः पदपद्मयोः सविधे पार्श्वे सखितायै मैत्रीकरणार्थं शशभृता चन्द्रेण प्रहितां प्रेषितां स्वामात्मीयां चन्द्रिकां कौमुदीं न अपि तु ज्योत्स्नेव नकारो मौलार्थमेव वक्तीति। यथा नैषधे—'अनुभवति शचीत्थं सा घृताचीमुखाभिर्न सहसहचरीभिर्नन्दनानन्दमुच्चैः।' इति। चन्द्रिका तु दन्तकान्तिरप्युच्यते। 'दशनचन्द्रिकया व्यवभासितं हसितमासवगन्धि मधोरिव' इति रघुवचनात्। ततः स्वचन्द्रिकामित्युक्तम्॥

दर्शयन्त्यपरपद्ममुखी तं कापि पाणिमकरोन्निजमुच्चैः।
व्योमपल्वलमिव स्मयमानोन्नालताम्रनलिनं प्रणयन्ती॥ १७८॥

काचिदपरा अन्या पद्ममुखी अरविन्दवदना तं कुमारं दर्शयन्ती लोचनगोचरं कारयन्ती सती निजमात्मीयं पाणिं हस्तमुच्चैः ऊर्ध्वमकरोच्चकार। उत्प्रेक्ष्यते—स्मयमानं

[illegible] ।

[illegible] ॥ १९६ ॥

[illegible] इति [illegible] ॥

[illegible] वीक्ष्य [illegible] ।

[illegible] ॥ १९७ ॥

[illegible] ॥' इति [illegible] । उत्प्रेक्ष्यते—[illegible] । तस्मिन् कुमारक्षे- [illegible] विविध [illegible] ॥ इति [illegible] ॥

तद्विलोकनरसस्तिमिताना चित्रविभ्रममिवोपगतानाम् ।

तत्पुरालयविलासवतीना चेष्टितैरिति तदाविरभावि ॥ १९८ ॥

तदा तस्मिन् समये तत्पुरमणहिल्पत्तन नगरे तत्रालयो यासा तासा पत्तननिवा- सिनीना विलासवतीना युवतीनामित्यमुना प्रकारेण चेष्टितैर्विलसितैराविरभावि प्रक- टीभूतम । किंभूताना विलासवतीनाम् । तस्य महानदपुर गर सयम ग्रहीतु प्रस्थितस्य एमारस्य यद्विलोकन निरीक्षण तस्य रसेन रागेण स्तिमिताना निश्चलीभूतानाम् । उत्प्रे- क्ष्यते—चित्रविभ्रमनालेख्यविलासमुपगताना प्राप्तानामिव । चित्रलिखितानामिव जा- तानाम ॥

काचिदीक्षणरसेन वबन्धोद्वेष्टितं न निजकुन्तलहस्तम् ।

कौतुकादिव कलापिकलापश्रीकलापमनुगातुमनेन ॥ १९९ ॥

कमनः कन्दर्पः। उत्प्रेक्ष्यते—एतत्प्रत्यक्षं दृश्यमानं हीरकुमाररूपं परमन्यज्जन्मावतारमादत्त गृहीतवान्। किं कृत्वा। रुद्रस्य शंभोर्नेत्रं तृतीयं भाले लोचनं तस्य शिखिनि तस्य वह्निमयत्वेन अग्नेर्विद्यमानत्वात् वह्नौ निपत्य झम्पां दत्त्वा भस्मीभूय वा। कस्मात्। अङ्गजायास्तिलोत्तमानाम्न्याः स्वनन्दनाया यदभिलषणं वाञ्छनं कामक्रीडाचिकीर्षा तस्मादुद्भव उत्पत्तिर्यस्य तादृशो यः कोपः क्रोधः तेन वान्तं पूरितं चित्तं मनो यस्य तादृग्विधो यश्चतुराननो ब्रह्मा तस्य शापात्। यदुक्तं कुमारसंभवे—'अभिलाषमुदीरितेन्द्रियः स्वसुतायामकरोत्प्रजापतिः। अथ तेन निगृह्य विक्रियामभिशप्तः फलमेतदन्वभूत्॥' इति। तथा नैषधेऽपि—'पद्मनन्दनसुतारिरंसुता'॥

अद्रिजार्धघटनाङ्कितमूर्त्या व्रीडमाकलयता गिरिशेन।
प्रैयरूपकवती तनुरेतत्कैतवात्किमुररीक्रियते स्म॥ १८३॥

गिरिशेन ईश्वरेण एतस्य हीरकुमारस्य कैतवात्कपटात्। उत्प्रेक्ष्यते—प्रैयरूपकवती रमणीयत्वकलिता तनुः शरीरयष्टिः उररीक्रियते स्म अङ्गीकृता गृहीता प्रियरूपस्य भावः प्रैयरूपकम्। मनोज्ञादित्वाद्वुण्। 'प्रैयरूपकविशेषनिवेशैः' इति नैषधे। गिरिशेन किं कुर्वता। व्रीडं लज्जाम्। व्रीडशब्दः शब्दप्रभेदे अकारान्तोऽप्यस्ति। यथा—'व्रीडाया भवे व्रीडः' इति। 'त्वयि स्मरव्रीडसमस्यया नया' इति नैषधेऽपि। आकलयता दधता। कया। अद्रिजाया हिमाचलपुत्र्याः पार्वत्याः अर्धस्य शरीरार्धभागस्य या घटना योजना तयाङ्किता कलिता या मूर्तिः स्वशरीरं तया कृत्वा। 'सापीश्वरे शृण्वति तद्गुणौघान् प्रसह्य चेतो हरतोऽर्धशंभुः। अभूदपर्णाङ्गुलिरुद्धकर्णा' इति नैषधे। अर्धं शंभोरित्यर्धशंभुरिति तद्वृत्तिः। तेन कारणेन तां स्वतनुं संत्यज्य ईश्वरेण जननयननिरीक्षणीया अपरा मूर्तिरङ्गीकृतेत्यर्थः॥

त्यक्तपूर्ववपुषा निजयोषाविप्रयोगजनितान्तरदुःखात्।
उर्वशीप्रियतमेन किमेतत्कैतवेन जगृहे तनुरन्या॥ १८४॥

उर्वशीनामाप्सरास्तस्याः प्रियतमेन भर्त्रा पुरूरवसा। 'पुरूरवा बोध ऐल उर्वशीरमणश्च सः' इति हैमीवचनात्। एतत्कैतवेन हीरकुमारमिषेण। उत्प्रेक्ष्यते—अपरा कुमारलक्षणा तनुर्मूर्तिर्जगृहे गृहीतेव। किंभूतेन उर्वशीप्रियतमेन। त्यक्तमुज्झितं पूर्वं प्राचीनं पुरूरवोलक्षणं वपुः शरीरं येन। कस्मात्। निजस्यात्मनो निजा आत्मीया वा या योषा प्रियतमा उर्वशी अप्सराः। 'अप्सरः स्यप्सराः प्रोक्ताः' इति शब्दप्रभेदे। 'वा तु जलौकोऽप्सरसः सिकतासुमनः समाः' एते शब्दा बहुत्वे वा। 'इमा जलौकसः'। 'इयं जलौकाः'। 'इमा अप्सरसः'। 'इयमप्सराः' इत्यादि लिङ्गानुशासने च। तस्य। विप्रयोगेण विरहेण जनितमुत्पादितं यदन्तरमन्तर्मनसि भवमन्तरङ्गमतिशायि इत्यर्थः। दुःखं तस्मात्। 'प्रियावियोगज्वलनादिवालम्' इति नैषधे। पुरूरवस उर्वशीवियोगः। तथा नलवर्णने—'वपोपि रत्ना गुरमौर्विमलदर्शा हरश्रीहरणादुदर्मो' इत्यपि नैषधे॥

त्नीयम्। पुनः किंभूतम्। अप्रभु असमर्थम्। किं कर्तुम्। पातुम्। सादरावलोकनं पानमुच्यते। सस्पृहतया निरीक्षितुम्। काम्। कुमारविभूषा हीरशिशोः शरीरशोभाम्॥

राजतः श्रुतिपुटे धृतमेकं कुण्डलं च मुखमुत्सुकितायाः।
भास्करामृतकराविव पर्वाप्यन्तरेण मिलितौ स्फुटमेतौ॥ १६४॥

उत्सुकितायाः कुमारं प्रेक्षितुमुत्कण्ठितायाः कस्याश्चित् श्रुतिपुटे कर्णपालौ धृतं स्थापितमेकमत्यौत्सुक्यादेकस्मिन्नेव कर्णे एकं कुण्डलं क्षिप्तं राभस्यान्नान्यदित्यर्थः। तच्च पुनर्वदनं तस्या एव मुखं द्वे राजतः शुशुभाते। उत्प्रेक्ष्यते—पर्वामावास्यामन्तरेणापि। 'पञ्चदश्यां यज्ञकालौ पक्षान्तौ पर्वणी अपि' इति हैमीवचनात्। पूर्णिमामावस्यो पर्वेति संज्ञा। अमावास्यां विनापि स्फुटं प्रकटं यथा स्यात्तथा मिलितौ संगतौ एकत्र भूतौ एतौ कुण्डलमुखौ भास्करामृतकरौ सूर्याचन्द्रमसाविव। अमावास्यायां हि सूर्यचन्द्रौ एकत्र मिलतः। 'दर्शः सूर्येन्दुसंगमः' इति हैम्याम्॥

तद्दिदृक्षुरपराञ्जनयष्ट्यानञ्ज सव्यनयनं न तदन्यत्।
वामतां भजति यः शितिमैव स्यात्तदाननमितीव विचिन्त्य॥१६५॥

तं कुमारं दिदृक्षुर्द्रष्टुमिच्छुस्तद्दिदृक्षुः। 'तावन्नैव नृपतिरिन्द्रदिदृक्षुर्नारदस्त्रिदशधाम जगाम' इति नैषधे। अपरा पूर्वोक्ताभ्यः अन्या काचित्कामिनी अञ्जनयष्ट्या कज्जलशलाकया कृत्वा सव्यं वामं नयनम्। 'वामं शरीरेऽङ्गं सव्यमपसव्यं तु दक्षिणम्' इति हैम्याम्। चक्षुः आनञ्ज। तदन्यत्तस्मात्सव्यादन्यदपरमपसव्यं नयनं दक्षिणं नेति निषेधे। राभस्यान्नानक्ति स्म। 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' रुधादिर्धातुः। तेनानक्तीति रूपम्। परोक्षायामानञ्जेति। उत्प्रेक्ष्यते—इति विचिन्त्य वितर्क्य। इति किम्। 'यः वामतां सव्यत्वमथ च प्रतिकूलभावं भजति आश्रयति तदानने तस्य वदने एव निश्चितं शितिमा श्यामतैव स्यात्' इति॥

काचनातिरभसान्मृगनाभीवारिणाव्यालिखदेककपोलम्।
मन्मुखं जितशशी श्रयतेऽसौ गण्डमूर्तिरिति किं व विवक्षुः॥१६६॥

काचन मृगाक्षी मृगस्याक्षिणी इवाक्षिणी यस्याः सा मृगाक्षी। 'वैयधिकरण्ये बहुव्रीहौ मध्यमपदलोपश्च' इति सूत्रेण एकाक्षिशब्दलोपः। सूत्रोदाहरणं यथा—कुमुदस्य गन्ध इव गन्धो यस्याः सा कुमुदगन्धिः। अत्रैकगन्धशब्दलोपः इति सारस्वते। हरिणनयना अतिरभसात्कुमारविलोकनस्यौत्सुक्यान्मृगनाभीवारिणा कस्तूरिकाद्रवेण कृत्वा एकं कपोलं निजगण्डस्थलं व्यलिखत्। पत्ररचितं कृतवती। चित्रयति स्मेत्यर्थः। गौरे हि कपोलमण्डले मृगनाभिमण्डनमतीव शोभते। उत्प्रेक्ष्यते—इति किं विवक्षुः वक्तुकामा पुरस्तादमुना प्रकारेण वक्तुमिच्छुरिव। इति किम्। वदनं गण्डमूर्तिः कपोलस्थानः जितं स्वशोभातिशयेनाभिभूतः शशी चन्द्रः मन्मुखं मम [illegible] इति॥

संसृतिर्निष्फला अभूज्जाता । स्वरूपेण तरुणीगणाभिलषणीयेन विविधविषयसुखासक्तेन भाग्यवता पुंसा संसारः सफलो भवेत्तत्तु अनेन नादृतं तस्मात्त्वं निष्फलेव । केव । अवलेव । यथा युवती परस्यामन्यवनितायामासक्तीभूतमादरवज्जातं सानुरागीभूतं मानसं मनो यस्य तादृशस्य पत्युः प्रियस्यापमानादनगणनान्निष्फला भवति । संसारसुखानुभवनरूपफलानवाप्तेर्निष्फलत्वमिति ॥

राग सागर इवासि निपीतोऽनेन पीततटिनीपतिनेव ।
दर्प खर्परकरीभव सर्पन्रङ्कवद्युधि जितो यदनेन ॥ १८९ ॥

हे राग हे अनुराग, सागरः समुद्र इव त्वमनेन कुमारेण निपीत आचान्तो निष्ठापितोऽसि । केनेव । पीततटिनीपतिनेव । यथा अगस्तिना तापसेन समुद्रो निपीतश्चुलुकीकृतः । 'अगस्त्योऽगस्ति' पीताब्धि.' इति हैम्याम् । पीताब्धिरित्यत्राब्धिपर्यायपरिवर्तन कृतम् । पुनर्हे दर्प अभिमान, यत्कारणात्त्वमनेन हीरकुमारेण युधि परस्परं संग्रामे जितः पराभूत. निःसारीकृतः तत्कारणात्सर्पन्नितस्तत. पर्यटन् भ्रमणां कुर्वंस्त्वं रङ्कवत् द्रमक इव भिक्षुकवत् खर्परकरीभव खर्परं घटादिकपालठिक्करं तदेव करे पाणौ यस्य तादृशो भव सपद्यस्व । ठिक्करं करे कृत्वा भिक्षां मार्गयेत्यर्थः ॥

मानमाननसरोरुहनत्या मानिनीजन जहीहि जहीहि ।
मोहनाह्वमणिनेव मनस्वी न व्यमोह्यत यतो भवतायम् ॥ १९० ॥

हे मानिनीजन हे रूपचातुर्यादिभि साभिमानकामिनीलोक, त्वं लज्जावशेनाननसरोरुहाणां वदनकमलानां नत्या नम्रीकरणेन मुखं नीचैः कृत्वा मानं दर्पं गर्वं जहीहि जहीहि । कोपनात्युक्तौ वीप्सा पुन पुनर्भाषणं वीप्सा । त्यज त्यज । सम्भ्रमवशाद्वा द्विरुक्तिः । 'त्यज त्यजाकारणरोपणे रुपम्' इति नैषधे । यतः कारणात् मनस्वी विशिष्टमनोवा(नस्वा)न् देवतादिभिरप्यक्षोभ्यमना वा अयं कुमारो भवता त्वया न व्यमोह्यत न मोहितः नात्मवशीकृत' । केनेव । मोहनाह्वमणिनेव यथा मोहनकृन्नामरत्नेन जनो मोह्यते मोहं प्राप्यते ॥

स्वर्णजालकविमानगतानां सुभ्रुवां भ्रुव इवाप्सरसां सः ।
आननामृतरुचीभ्य उदीतास्ताः सुधा इव कथाः पिबति स्म १९१

स कुमार सुभ्रुवां पत्तनपुरध्रीणामाननानि वदनानि तान्येवामृतरुच्य. चन्द्रा' । रुचीशब्दो दीर्घोऽप्यस्ति । 'रुच्यो रुचीभिर्जितकाञ्चनाभि ' इति नैषधे । तेभ्य उदीता उद्गता । 'उदीतमातङ्कितवानशङ्कित.' इत्यपि नैषधे । ईङ् गतौ दीर्घईकारो धातु' । ताः पूर्वोक्ताः कथा वार्ताः । 'त्वत्संकथापि जगतां दुरितानि हन्ति' इति भक्तामरस्तवे । 'संकथा वार्ता' इति तद्वृत्ति' । पिबति स्म सादरं शृणोति स्म । उत्प्रेक्ष्यते—सुधा इव । यथा कश्चिद्देवश्चन्द्रादुदितां सुधां पिबति । 'विरहिवर्गवधव्यसनाकुलं कलय पापमशेषफलं विधुम् । सुरनिपीतसुधाकमपापकम्' इति नैषधे । किंभूतानां सुभ्रुवाम् । स्वर्ण-

अन्या परा कापि चकोरलोचना रभसेन कुमारनिभालनरसेनोत्सुकत्वेन कटकस्य व-लयस्य विभ्रमतो भ्रान्तेर्नूपुरं मञ्जीरं निजस्यात्मनो निजे आत्मीये वा भुजे बाहौ अ-बीभवत् बाहावारोपितवती । उत्प्रेक्ष्यते—भुजभवैर्विभवैः स्वबाहुसमुत्पन्नशो-भाभिरङ्ग अभिभूतं पराजितं तन्मृणालं कमलनालं 'शीलितुमर्थाभिजजितवरभुजमेव सेवितुमुपेतमागतमिव ॥

तद्वेषणरसोत्सुकचेताः काचनाध्वनि धृतश्लथबन्धम् ।
अम्बरं हरिणदृक्स्वकरेणालम्ब्य संचरति चन्द्रकलेव ॥ १७२ ॥

काचन हरिणेक्षणा तस्य हीरकुमारस्य यद्वेषणं निर्वर्णनं तस्य रसो रागस्तेनोत्सुक-मुत्कण्ठितं चेतश्चित्तं यस्यास्तादृशी सती अध्वनि पत्तनमार्गे धृतः कलितः श्लथः शिथिलः बन्धो बन्धनग्रन्थिर्येन तादृग्विधमम्बरं परिधानवस्त्रं स्वकरेण निजहस्तेन आलम्ब्य आश्रित्य । गृहीत्वेत्यर्थः । संचरति व्रजति । केव । चन्द्रकलेव । यथा शशिलेखा अम्बरमाकाशं स्वकरेण आत्मकिरणेन । जातिवाचित्वादेकवचनम् । आश्रित्य संचरति ॥

अन्ययार्धरचितात्मकलापापातिमौक्तिकभरै रभसेन ।
सृज्यते स्म विषये किमु लाजोत्क्षेपणा वरयितुर्व्रतलक्ष्म्याः ॥ १७३ ॥

अन्यया अपरया कयाचित्तरललोचनया रभसेन कुमारेक्षणोत्सुकभावेन अर्धरचितः साभिप्रोतो य आत्मकलापः स्वस्य मणिमौक्तिककाञ्चनमयमेखला तस्सकाशादासामस्त्येन पतन्तीत्येवंशीलानि निपातुकानि यानि मौक्तिकानि मुक्ताफलानि तेषां भरैः समूहैः कृत्वा व्रतलक्ष्म्याश्चारित्रश्रियाः वरयितुः परिणेतुः कुमारस्य विषये आचारार्थं लाजो-त्क्षेपणा अक्षतैः सवर्धनं मौक्तिकैर्वर्धापनमित्यर्थः । किमु सृज्यते । क्रियते परिणेता हि मङ्गलार्थं सधववधूभिर्लाजैरक्षतैर्मौक्तिकैर्वा वर्धाप्यते इति विधिः ॥

काचिदर्भकमपास्य धयन्तं यात्यवेक्षितुममुं स्वगवाक्षम् ।
वेश्मनि स्तननिपातिपयोभिर्जाह्नवीं जनयतीव नवीनाम् ॥ १७४ ॥

काचिदन्या युवती वेश्मनि निजमन्दिरे पयोधरकुम्भयोर्निष्पतनशीलैरविरलनिर्ग-लद्भिः पयोभिर्दुग्धधाराभिः । उत्प्रेक्ष्यते—नवीना नूतना जाह्नवीं गङ्गां जनयति उत्पा-दयतीव । करोतीवेति यावत् । किं कुर्वन्ती । अमुं हीरकुमारमवेक्षितुं विलोकयितुं स्व-गवाक्षं निजनिकेतनसंबन्धिजालकं प्रति यान्ती गच्छन्ती । किं कृत्वा । धयन्तं स्व-पयोधरपयः पिबन्तमर्भकं निजनन्दनमपास्य त्यक्त्वा रुदन्तमेव विहायेत्यर्थः ॥

प्राक्स्वरूपविभवं वहते यः स्यात्किमत्र स जडैरनुपश्यः ।
अर्धधौतमितरा स्वमितीवोत्कण्ठिता तरलदृक्मममौज्झत् ॥ १७५ ॥

उत्कण्ठिता कुमारदर्शनोत्सुकितचेता इतरा अपरा तरलदृक् चपललोचना । उत्प्रे-

चित्रशाला यत्र। 'चित्रा त्वाखुपर्णीसुभद्रयोः। गोडुम्बाप्सरसोर्दन्त्या नक्षत्रौषधिभेदयो' इत्यनेकार्थः। राजगृहे तु सुतरां स भवेदेव। यथा पाण्डवचरित्रे दमयन्तीप्रवासे—'लीलाकुरङ्गकक्रीडासारिके केलिबर्हिणः। गृहपारावता' सद्म कीरवापीसितच्छदा'। प्रेयासमनुगच्छन्तीमनुजानीत मा मनाक् ॥' तथा द्रौपदीप्रवासे—'हहो बर्हिन्नहो हस हले हरिणि हे शुक। कुशल वस्त्वसौ देवायाति व. परिचालिका। इत्यापृच्छय पतद्बाष्पा केलिपात्राणि सर्वत ॥' इति ॥

पुष्पपल्लवफलानि दधाना. शाखिनः स्मितशिखाग्रशयेषु।
स्वागतं द्विजरवै' किमुदीर्यास्यातिथेयमतिथेरिह चक्रुः ॥ १९७ ॥ ✓

इह वने शाखिनो वृक्षा' अतिथेर्निजप्राघुणकस्य अस्य कुमारस्य आतिथेयमतिथिसत्क्रिया किमु चक्रुः कुर्वन्ति स्म। किं कृत्वा। द्विजाना स्वाङ्कस्थायुकाना पक्षिणा रवैः शब्दैः स्वागत सुखेनागत कुशलप्रश्नादिक वा उदीर्य कथयित्वा। पृष्ट्वा वा इत्यर्थ'। किं कुर्वाणा' शाखिनः। स्मिता विकसिता या शिखा' स्वशाखास्ता एवाग्रहस्ता हस्ताग्राणि अथ वा तासा शिखानामग्राणि तान्येव शयाः पाणयस्तेषु पुष्पाणि कुसुमानि पल्लवा प्रवालाः फलानि सस्यानि दधाना. धारयन्त' ॥

तत्र सस्यभरगौरवभाग्भि. कोकिलाक्कणितसंस्तववाग्भिः।
पादपैरयमनम्यत वन्यैर्भाविसूरिपुरहूतधियेव ॥ १९८ ॥ ✓

तत्रोद्याने अथ कुमार. वन्यैः काननभवै' पादपैर्वृक्षैः अनम्यत नमस्कृत'। किम्भूतैः पादपैः। सस्याना फलानाम्। 'फल तु सस्यम्' इति हैम्याम्। भराः समूहास्तेषा गौरव भार भजन्तीति। पुन. किम्भूतै.। कोकिलाना कलकण्ठाना क्वणितानि कूजितानि पञ्चमालापास्तान्येव संस्तव' स्तुतिस्तद्युक्ता तद्रूपा वा वाग्येषाम्। उत्प्रेक्ष्यते—भाविनो भविष्यतः आचार्यपुरदरस्य धिया बुद्ध्येव ॥ इत्युपवनम् ॥

कामनीयकमशेषमनुष्यान्वेषयन्वटतरुं स ददर्श।
श्रीतिरस्कृतसमग्रवनस्य छत्रमेतदिव मूर्ध्नि वनस्य ॥ १९९ ॥

स कुमारो वटतरु प्लक्षवृक्ष ददर्श पश्यति स्म। किं कुर्वन्कुमार'। अन्वेषयन् विलोकयन्। किम्। अमुष्योद्यानस्याशेष समस्तमपि कामनीयक मनोज्ञताम्। कमनीयस्य भावः कामनीयकम्। मनोज्ञादित्वाद्वुञ्। 'कामनीयकमध'कृतकाननम्' इति नैषधे। उत्प्रेक्ष्यते—श्रीभि स्वशोभाभि' तिरस्कृतानि पराजितानि समग्राणि सर्वाण्यपि वनानि नन्दनचैत्ररथादीनि काननानि येन तादृशस्यास्य वनस्य पत्तनोपविपिनस्य मूर्ध्नि मस्तके एतन्महावटरूपेण दृश्यमान छत्रमातपवारणमिव ॥

न्यक्षरुक्षनिकरेषु गुरुत्वं यद्बिभर्ति मनुजेष्विव भूमान्।
गौरवात्किमिति लोलविहङ्गैर्वीज्यते स्म चमरैरिव पक्षैः ॥ २०० ॥

विजृम्भमाणं विकसत्तथा उन्नालमुच्चैर्नालं यस्य तादृक् ताम्रं रक्तं कमलं यत्र तादृशं व्योमपल्वलं गगनतटाकं प्रणयन्ती कुर्वन्तीव ॥

सुभ्रुवामिह महे जगृहे किं चक्षुषेव सकलेन्द्रियवृत्तिः ।
ज्योतिरर्चिरिव भानुमता यत्क्वापि सा प्रभवति स्म न किंचित् ॥ १७९ ॥

इहास्मिन् महे कुमारदीक्षाया उत्सवे सुभ्रुवाम् अणहिल्लपाटकपत्तनवनितानां निखिलानां चतुर्णां श्रवणनासिकारसनास्पर्शननाम्नामिन्द्रियाणां वृत्तिर्व्यापारः । उत्प्रेक्ष्यते—चक्षुषा लोचनेनैव जगृहे गृहीता किम् । केनेव । भानुमतेव । यथा भास्करेण ज्योतिषां ग्रहनक्षत्रतारकाणामर्चिः कान्तिर्गृह्यते । यद्यस्मात्कारणात् सा चतुरिन्द्रियवृत्तिः क्वापि क्वचिदपि स्वस्वव्यापारे किंचित्किमपि श्रोतुमाघ्रातुमास्वादयितुं स्प्रष्टुमपि न प्रभवति स्म न समर्थीबभूव । ज्योतींष्यपि क्वापि ज्योतिरर्चिरपि क्वापि किंचिन्मात्रं भवति ॥ इति पौराङ्गनाविविधचेष्टितवर्णनम् ॥

रामणीयकतिरस्कृतकामं तं निपीय नयनैः पथि कामम् ।
वल्लकीकुलसखीमिव वाणीमित्यथो युवतिराजिरभाणीत् ॥ १८० ॥

अथो विविधचेष्टितानन्तरं स्वगृहगवाक्षस्थितानां युवतीनां पत्तननागरीणां राजिः श्रेणिः इत्यग्रे वक्ष्यमाणां वाणीं वाचं मिथः परस्परमभाणीत् बभाषे । किं कृत्वा । तं कुमारं काममत्यर्थं नयनैः स्वलोचनैः पथि मार्गे अर्थाद्दीक्षाग्रहणार्थं गच्छन्तं निपीय सादरमवलोक्य । किंभूतं कुमारम् । रामणीयकेन शरीरसौन्दर्येण तिरस्कृतो निर्भर्त्सितः कामः कन्दर्पो येन तम् । वाणीमुत्प्रेक्ष्यते—वल्लकीकुलस्य वीणाव्रजस्य वीणावृन्दस्य वा । 'गोत्रं तु संतानोऽन्ववायोऽभिजनः कुलम्' इति हैम्याम् । 'कुलं तेषां सजातीनाम्' इत्यपि हैम्याम् । वीणावृन्दस्य सखीमिव वयस्यामिव विपञ्चीवत्मधुरां वाचमित्यर्थः ॥

सांप्रतं तदिह शैशवशेषः सांप्रतं व्रतजिघृक्षुरयं यत् ।
अन्यथा कथमसावनुकुर्यादात्मना जगति जम्बुकुमारम् ॥ १८१ ॥

शैशवं बाल्यावस्था शेषमवशिष्टं यस्य किंचिद्विद्यमानशिशुत्वदशः । शब्दोदराकुन्दनपर्यायत्वात् । 'प्रणीतवाग्ऽशैशवदोषवानयम्' इति नैषधे । तात्स्योऽयं हीरकुमारः सांप्रतमधुना व्रतजिघृक्षुः संयममादातुमिच्छुरस्ति इहास्मिन् ... तत्संयमग्रहणं सांप्रतं युक्तम् । अन्यथा व्रतग्रहणमन्तरेण जगतां विश्वे ... हीरकुमारः ... आत्मना स्वेन कृत्वा जम्बुकुमारं चरमकेवलिनं जम्बूस्वामिनं ... प्रकारेण ... कुर्वीत । जम्बुशब्दो दीर्घो ह्रस्वोऽप्यस्ति । सारस्वतव्याकरणे ... नदीवदिति । तथा 'मन्यते जम्बुना ... ' इति ...॥

अङ्गजाभिलषणोद्भवकोपवान्ताभरतचतुराननशापात् ।
रुद्रनेत्रशिखिनीव निपत्यादस्य जन्म ... पनेतत् ॥ १८२ ॥

विजयदाननामा यतीन्द्रः सूरिः तदुपागमनात् कुमारस्यागमनात् [illegible] प्रागेव [illegible] वटतरुशिखिये स्थितवान् । प्रागेव तत्रागत्य निषण्ण इत्यर्थः । [illegible] जगति छायया आश्रयेण । 'वय श्रीमच्छायया जीवाम' इति [illegible] । [illegible] चाखिलजन समवालोक [illegible] गुरौ [illegible] तथा [illegible] आश्रय स्थानम् । 'वटो वैश्रवणाश्रय' इति हैम्याम् । [illegible] अपि तु सर्वोऽपि जनस्त [illegible] इत्यर्थः ॥

तीर्थनाथमिव चैत्यतरोस्तत्पादपस्य सविधे स्थितिमन्तम् ।
संमदेन स कुमारमहेन्द्रस्त्रिः प्रदक्षिणयति स्म मुनीन्द्रम् ॥ २०९ ॥

स कुमारमहेन्द्रः हीरनामा । [illegible] (श) [illegible] संमदेन हर्षेण [illegible] मुनीन्द्रं [illegible] दानसूरिं त्रिः वारत्रयं प्रदक्षिणयति स्म प्रदक्षिणीकृतवान् । [illegible] पूर्वव्यावर्णितस्य पादपस्य वटशाखिनः सविधे समीपे स्थितिमन्तं [illegible] कमिव । तीर्थनाथमिव । यथा महेन्द्रः पुरन्दरश्चैत्यतरोः [illegible] तिरधानकवृक्षस्य पार्श्वे तिष्ठन्तं जिनेन्द्रं [illegible] प्रदक्षिणात्रयं ददाति इत्यर्थः ॥

उत्ततार तुरगात्स कुमारो नंदिनादिव गुहः [illegible] ।
श्रीगुरुं प्रमुदितश्च ललाटन्यस्तहस्ततल [illegible] ॥ २१० ॥

स हीरनामा कुमारस्तुरगात् [illegible] उत्ततार [illegible] तथा गुरु [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

दस्रयोः किमयमन्यतमोऽस्मिन्नागतस्त्रिदिवतः क्षितिपीठे ।
निष्कलङ्क इव विष्णुपदस्योपास्तिभिः कुमुदिनीदयितो वा ॥१८५॥

दस्रयोरश्विनीपुत्रयोर्मध्ये । उत्प्रेक्ष्यते—अयं हीरकुमाररूपः अन्यतमः एकः कश्चि- त्रिदिवतो देवलोकादस्मिन् क्षितिपीठे पत्तनलक्षणे भूमण्डले आगतः किं समायात इव । अथ वा विष्णुपदस्य पुरुषोत्तमपादस्य उपास्तिभिः सेवाभिः कृत्वा निर्गतः कलङ्को लाञ्छनमपवादो वा यस्मात्तादृशः । उत्प्रेक्ष्यते—कुमुदिनीदयितः कैरविणीप्राणप्रियश्चन्द्रो वा क्षितौ पत्तनपृथिव्यां समागतः ॥ इति कुमाररूपदर्शनादिविचारः ॥

मायसि स्मर जगज्जयिनीभिर्हेतिभिः किमु हताश वशाभिः ।
संश्रिते हि चरितश्रियमस्मिंस्त्वन्मदोऽयमवकेशिवदासीत् ॥१८६॥

हे हताश, मूलादेव निर्गता उच्छिन्ना आशा वाञ्छा यस्य ईदृश हे स्मर कन्दर्प जगतां त्रयाणां भुवनानाम् । 'तात्स्थ्यात्तद्व्यपदेशः' इति न्यायान्नाकिनागनागराणां त्रिज- गज्जनानां जयिनीभिर्जयनशीलाभिर्वशीकारिकाभिः वशाभिस्तरुणीभिरेव हेतिभिः स्वा- मोघप्रहरणभूताभिः कृत्वा किं कथं मायसि मदमाकलयसि मत्तो भवसि । हि य- स्मात्कारणात् अस्मिन् सांसारिकविषयविमुखे हीरकुमारे चरितश्रियं चारित्रलक्ष्मीं सं- श्रिते सति अयं सर्वजगज्जनविदितः प्रत्यक्षलक्ष्यस्त्वन्मदः यदहं युवतीरूपामोघशक्तिभिः कृत्वा हरिहरेन्द्रचतुराननादिकान् सर्वान् स्ववशीकरोमि इति तवाभिमानः अवकेशि- वन्निष्फलतरुरिव आसीत् फलवन्ध्यो बभूव ॥

दैत्यमर्त्यमरुतां विजये त्वं साहसिक्यमथ मोह जहीहि ।
भूधरं हरिरिवाशनिनासौ संयमेन निहनिष्यति यत्त्वाम् ॥ १८७॥

हे मोह, अथाद्यतनदिनात्प्रारभ्य त्वं दैत्या दानवा मर्त्या मानवा मरुतो देवास्तेषां विजये पराभवने साहसिक्यं साहसकर्मसत्त्वं बलवत्ता वा जहीहि त्यज मुञ्च । सहसा वर्तते इति साहसिकः । 'ओजः सहोम्भसा वर्तते' इती ठण् । साहसिकस्य भावः साह- सिक्यम् । 'अहो मदीयस्तव साहसिक्यम्' इति नैषधे । यत्कारणादसौ हीरकुमारः संय- मेन शुद्धचारित्रेण कृत्वा त्वां भवन्तं निहनिष्यति व्यापादयिष्यति मूलादुन्मूलयिष्यति । क इव । हरिरिव । यथा पुरंदरः अशनिना वज्रेण कृत्वा भूधरं पर्वतं हन्ति चूर्णी- करोति ॥

संसृते व्रतरमानिरतोऽसौ दुष्प्रवृत्तिमिव यत्त्यजति त्वाम् ।
निष्फला तदवलेव परस्यां सक्तमानसपतेरपमानात् ॥ १८८ ॥

हे संसृते संसार, यद्यस्मात्कारणात् व्रतरमाया संयमलक्ष्म्यां निरत आसक्तमना रक्तीभूतचेता असौ हीरकुमाररूपा भवतीं जहाति । कामिव । दुष्प्रवृत्तिमिव । यथा ग- हातमा दुष्टां प्रवृत्तिं वार्तां दुष्टं निन्द्यमाचरणं वा मुञ्चति तत्तस्मात्कारणात् त्वं भवती

चिम्रा त्वाग्री प्राप्याधिक दीप्यते । तापि पुन सा सत्यमश्रीरपि हीरकुमारेण कृत्वा सुषमातिशायिशोभा श्रयते स्म । केव । वागिव । यथा काव्यादिरूपा सत्कविवाणी चतुरचेतश्चमत्कारकारकेणार्थेन सुषमा श्रयते । पुनः केव । पुरीव । यथा नगरी नीतिमता नृपेण सुषमा भजते ॥

हीरहर्ष इति नाम तदीयं निर्ममे विजयदानयतीन्द्रः ।
स्पर्धयेव यशसास्य जनानां कर्णपूरपदवी तदवापत् ॥ २११ ॥

श्रीविजयदाननामा यतीन्द्र सूरि. तदीय हीरकुमारस्य नन्दिनामाभिधान हीरहर्ष इति निर्ममे कृतवान् । तन्नाम अस्य हीरहर्षमुने श्लोकेन साकं स्पर्धया सहर्षेणेव ईर्ष्यया वा कृत्वा जनाना सकलभूलोकलोकाना कर्णौ श्रवणौ पूर्येते अनेनेति कर्णपूरौ कर्णाभरणौ कुण्डलौ तयोः पदवीं मार्गमश्वर्यादिनय स्थान श्रूयमाणतापद वा अवापत् प्राप॥

नभोङ्गणान्निर्जरहस्तमुक्तामरन्दलुभ्यन्मधुपानुषङ्गा ।
पपात तस्योपरि पुष्पवृष्टिः कटाक्षलक्षा इव मोक्षलक्ष्म्याः ॥२१२॥

नभोङ्गणादाकाशात्तस्योपरि पुष्पवृष्टि कुसुमवर्ष पपात जाता । किंभूता । निर्जराणां देवानां हस्तैः करैः मुक्ता । पुन किंभूता । मरन्देषु अविरलानर्गलगलन्मधुषु लुभ्यतां लुब्धीभवतां लोलुपीभावभाजां मधुपानां भ्रमराणामनुषङ्गो यस्याम् । उत्प्रेक्ष्यते—मोक्षलक्ष्म्या मुक्तिश्रिया कटाक्षाणामक्षिविकूणितानां लक्षाः शतसहस्राणि इव । लक्षशब्दः स्त्रीक्लीबयोः । 'माने लक्षम्' इति लिङ्गानुशासने ॥

महाव्रती कालमनोभवारिमहोक्षलीलागतिगौरकान्तिः ।
शिवाश्रितः शंभुरिव क्रमेणैशानीं दिशं पूर्वमसौ बभाज ॥२१३॥

अथ हीरहर्षमुनि क्रमेण दीक्षाग्रहणानन्तर पूर्वं प्रथममैशानीं दिशमीशानविदिशं बभाज श्रितवान् । तस्यां विहारं कृतवानित्यर्थ । दीक्षितो हि तपस्याग्रहणानन्तरं प्रथममैशानीं दिशं प्रति विहरतीति विधि । क इव । शंभुरिव । यथा ईश्वर ऐशानीं दिश तदधिपत्वात् । कथंभूतोऽयं शंभुश्च । महाव्रती पञ्चमहाव्रतवान् शंभुनामा च । 'महाव्रती वह्निहिरण्यरेता' इति हैम्याम् । महाव्रत कापालिलिङ्गमस्यास्तीति व्युत्पत्ति. । काल कलिकाल मनोभव स्मरस्तयो रिपु । 'कालो यमे दैत्ये च' । मृत्युंजय कालारि स्मरदाही च शिव । पुन किंभूत । महानुक्षो मत्तवृषभस्तद्वद्गतिर्गमन यस्य । 'मत्तोक्षगमन. पुमान्' इति काव्यकल्पलतायाम् । मत्तो(हो)क्षेण गमन यस्य वृषभवाहनत्वात् । पुन किंभूत । गौरा स्वर्णवर्णा कान्तिर्यस्य । पक्षे—श्वेता वर्णेन भस्मना वा रुचिर्यस्य । 'गौर श्वेतेऽरुणे पीते विशुद्धे चन्द्रमस्यपि' इत्यनेकार्थः । पश्चात्कर्मधारय । पुन किंभूत । शिवैर्मङ्गलै शिवया पार्वत्या च आश्रित अर्धशंभुत्वात् ॥

सत्प्रतिर्निष्फला अभूर्जाता । स्वरूपेण तरुणीगणाभिलषणीयेन विविधविषयसुखासक्तेन भाग्यवता पुंसा ससारः सफलो भवेत्तत्तु अनेन नाद्दत तस्मात्त्व निष्फलैव । केव । अ- वलेव । यथा युवती परस्यामन्यवनितायामासक्तीभूतमादरवजात सानुरागीभूत मानस मनो यस्य तादृशस्य पत्युः प्रियस्यापमानादवगणनान्निष्फला भवति । ससारसुखानुभ- वनरूपफलानवाप्तेर्निष्फलत्वमिति ॥

राग सागर इवासि निपीतोऽनेन पीततटिनीपतिनेव ।
दर्प खर्परकरीभव सर्पन्रङ्कवद्युधि जितो यदनेन ॥ १८९ ॥

हे राग हे अनुराग, सागरः समुद्र इव त्वमनेन कुमारेण निपीत आचान्तो निष्ठा- पितोऽसि । केनेव । पीततटिनीपतिनेव । यथा अगस्तिना तापसेन समुद्रो निपीतश्चुलु कीकृतः । 'अगस्त्योऽगस्तिः पीताब्धि.' इति हैम्याम् । पीताब्धिरित्यत्राब्धिपर्यायपरिव- र्तन कृतम् । पुनर्हे दर्प अभिमान, यत्कारणात्त्वमनेन हीरकुमारेण युधि परस्परं स- ग्रामे जित' पराभूत' नि.सारीकृतः तत्कारणात्सर्पन्नितस्ततः पर्यटन् भ्रमणं कुर्वस्त्व रङ्कवत् द्रमक इव भिक्षुकवत् खर्परकरीभव खर्परं घटादिकपालठिक्कर तदेव करे पाणौ यस्य तादृशो भव सपद्यस्व । ठिक्करं करे कृत्वा भिक्षां मार्गयेत्यर्थः ॥

मानमाननसरोरुहनत्या मानिनीजन जहीहि जहीहि ।
मोहनाह्वमणिनेव मनस्वी न व्यमोह्यत यतो भवतायम् ॥ १९० ॥

हे मानिनीजन हे रूपचातुर्यादिभि साभिमानकामिनीलोक, त्व लज्जावशेनाननस- रोरुहाणा वदनकमलाना नत्या नम्रीकरणेन मुखा नीचै कृत्वा मान दर्प गर्व जहीहि जहीहि । कोपनात्युक्तौ वीप्सा पुन' पुनर्भाषण वीप्सा । त्यज त्यज । सभ्रमवशाद्वा द्वि- रुक्तिः । 'त्यज त्यजाकारणरोषणे रुषम्' इति नैषधे । यत' कारणात् मनस्वी विशिष्ट- मनोवा(नस्वा)न् देवतादिभिरप्यक्षोभ्यमना वा अय कुमारो भवता त्वया न व्यमोह्यत न मोहित नात्मवशीकृतः । केनेव । मोहनाह्वमणिनेव यथा मोहनकनामरत्नेन जनो मोह्यते मोह प्राप्यते ॥

स्वर्णजालकविमानगताना सुभ्रुवा ध्रुव इवाप्सरसां सः ।
आननामृतरुचीभ्य उदीतास्ताः सुधा इव कथाः पिबति स्म १९१

स कुमार' सुभ्रुवा पत्तनपुरस्त्रीणामाननानि वदनानि तान्येवामृतरुच्यः चन्द्राः । रुचीशब्दो दीर्घाऽप्यस्ति । 'रुच्यो रुचीभिर्जितकाञ्चनाभि' इति नैषधे । तेभ्य उदीता उद्गता । 'उदीतमानह्निनयानशाह्नत.' इत्यपि नैषधे । ईङ् गतौ दीर्घईकारो धातु । ताः सुधा इव कथा वार्ता । 'त्वन्मकथापि जगता दुरितानि हन्ति' इति [illegible] । 'वा- कथा वार्ता' इति तद्वृत्तिः । पिबति स्म सादर शृणोति स्म । [illegible] [illegible] [illegible] पिबति । [illegible] [illegible] । [illegible]' इति नैषधे । [illegible] । [illegible]

अनुपमशमक्षीराम्भोधौ विलासरसं सृज-
न्सितगरुदिवामन्दानन्दं दिनानि निनाय सः ॥ २१७ ॥

स नाथीदेव्यास्तनूजो नन्दनः स एव यतिना मध्ये । 'यतिश्च यतिनि प्रोक्तः' इति शब्दप्रभेदे । ईश्वरो मुख्यः हीरहर्षमुनीन्द्रो दिनानि शुद्धसंयमविधिना वासरान्निनाय अतिवाहयामास । अतिक्रामति स्मेत्यर्थः । किंभूतः । श्रमणानां साधूनां भर्तुः स्वामिनो विजयदानसूरेः पादारविन्दनिषेवणया चरणकमलपरिचर्यया कृत्वा प्रमुदितमाह्लादयुक्तं जातं मनो यस्य । किं कुर्वन् । अनुपमो न विद्यते उपमा साम्यं यस्य । साधारण इत्यर्थः । तादृशो यः शमः शान्तरसाकलितपरिणामः स एव क्षीराम्भोधिर्दुग्धजलनिधिस्तत्रामन्दो बहुल आनन्दो यत्रैव यथा स्यात्तथा विलासरसं क्रीडास्वादम् । आस्वादोऽनुभवने । अथवा विलासे क्रीडाया रसमनुरागं सृजन् कुर्वन् । 'रसः स्वादे जले वीर्ये शृङ्गारादौ द्रवे विषे । बोले रागे देहधातौ तिक्तादौ पारदेऽपि च ॥' इत्यनेकार्थः । क इव । सितगरुदिव । यथा सितच्छदो हंसः परमानन्दः सन् क्षीरसमुद्रे विलासरसं जलक्रीडारसं सृजति हंसानां सद्भावः क्षीरसमुद्रेऽपि दृश्यते । यथा प्रातस्तास्तुतौ—'हंसागाहृतपद्मरेणुकपिशक्षीरार्णवाम्भोभृते ' इति ॥

पद्मिनी । यस्याः शरीरसौरभभरमाघ्राय मधुरा मालतीप्रमुखकुसुमजातीर्विहाय यद्वसनोपरि परिभ्राम्यन्ति सा पद्मिनीत्युच्यते । तस्याः प्राणपतिः प्राणेभ्योऽतिवल्लभः पतिव्रतात्वेन भास्वान् दिनावसाने सन्ध्यासमये प्रयाति गच्छति। उत्प्रेक्ष्यते—अञ्जननामा पश्चिमदिग्गजः। यतः—'ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः। पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥' एते पूर्वादिस्थाना दिशामष्टौ दिग्दन्तिनः सन्ति। तेषु प्रतीच्या दिग्दन्ती अञ्जननामा कुम्भी गजस्तस्य कुम्भौ शिरसः पिण्डौ तावेव प्रगल्भौ कामिजनमनोहारिणौ तथा पीनावतिपुष्टौ स्तनौ पयोधरौ यस्यास्तादृशी दिक् प्रतीची सैव मृगाक्षी हरिणनयना तां स्वस्मिन्विषये रागिणीमनुरागिणीं प्रेमातिरेकभाजिनीमरुणां च निर्वर्ण्य दृष्ट्वेव याति। क इव। रागीव। यथा कश्चिद्रागी पुमान् पद्मिनीपतिरपि स्वाङ्गनामवगणयन्। 'स्वाधीनेऽपि कलत्रे नीचः परदारलम्पटो भवति। संपूर्णेऽपि तटाके काकः कुम्भोदकं पिबति ॥', तथा 'चातुर्येणातिवाचं सुगुणमणिखनीं भाग्यसौभाग्यलक्ष्मीं स्वाधीनां भक्तिभाजं विमलकुलभवां शीलमाशीलयन्तीम्। प्रेमाढ्यां पद्मिनीं स्वां परयुवतिरतो हा विहायेन्दुवक्त्रामन्यां वामां कुरूपामनुसरति जनो मन्मथ तद्धिगस्तु ॥', 'सहदेशे विन्नाण अणरसनब्भ सिंगाइय गीयम्। नियमहिलाणपहुत्त तन्निविलोए न अग्घन्ति ॥' इति वचनात्। रागातिरेकवान् सन् स्वस्मिन्ननुरक्तां कामिनीं प्रेक्ष्य साऽयं तत्सविधौ याति ॥

उत्तुङ्गतारङ्गशिखावलम्बि किञ्जल्कलीलायितरश्मिराशि ।
पयोधिपूरेऽम्बुजबन्धुबिम्बं सेरारुणाम्भोरुहवद्विभाति ॥ १८ ॥

[illegible] । [illegible] [illegible] ॥

[illegible] । पुनः किंभूता । [illegible], न तु [illegible], आगतेन अनादिजगन्निर्माणेन [illegible] [illegible] [illegible] राजहंसा निजनिराजानो यथा । [illegible] [illegible] । निजनिजो हि राजानः प्रादुर्भवनये [illegible] [illegible], [illegible] प्रतिपुतो । अथ वा लीलया [illegible] [illegible] [illegible] [illegible] [illegible] अत एव मानन [illegible] [illegible] राजहंसा यथा । 'प्रोषितकलहंसमयस्थि' इति [illegible] । [illegible] [illegible] कलहंसा [illegible] येन' इति तदुक्तौ । [illegible] [illegible] यथा [illegible] । पुन किंभूता । श्यामा [illegible] [illegible] । पुन किंभूता । अनिन्द्या [illegible] [illegible] [illegible] — '[illegible] [illegible] [illegible] [illegible]' [illegible] । पुनः किंभूता । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । पुन [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

तद्बःसातिरेकादब्धौ मज्जन्त्या ब्रुडन्त्याः पतन्त्या वा दिनलक्ष्म्या वासरश्रिया भालं ललाटमिव ॥

भानोर्बभौ मण्डलखण्डमब्धौ गन्तुः पुरारेर्मिलितुं मुरारिम् ।
मृगाङ्कलेखेव सरोपचण्डीसालक्तपादाहतिशोणितश्रीः ॥ २२ ॥ ✓

अब्धौ समुद्रे भानोः सूर्यस्य मण्डलस्य विम्बस्य खण्ड शकलम्। विम्बचतुर्थांशमात्रमित्यर्थः । बभौ शोभते स्म । उत्प्रेक्ष्यते—मुरारिं नारायणं मिलितुं गन्तुर्गच्छतीति गन्ता तस्य पुरारेः शंभोर्मृगाङ्कलेखेव शिरःशेखरपीयूषमयूखकलेव शिरःशशिकलेव । किंभूता। सरोपा कुतश्चित्कारणात्कोपकलिता या चण्डी अत्यन्तकोपना कामिनी पार्वती च । 'चण्डस्त्वत्यन्तकोपनः' इति हैमीवचनात् । स्त्री चेच्चण्डी । 'दुर्गा चण्डी सिंहयाना मृडानी' इत्यपि हैम्यां पार्वतीनामानि । तस्याः सालक्तकेन सह यावकरसेन वर्तते यस्तादृशः पादश्चरणस्तस्याहत्या शिरसि प्रहारेण शोणत्वं सजातमस्यामिति शोणिता रक्तीभूता श्रीर्वपुर्लक्ष्मीर्यस्याः । कथंचित्सुरतकलहे कुपितां पार्वतीमनुनेतुं पादपतितस्य शंभोः शिरसि कोपात्पादप्रहारः प्रदत्तः, तदवसरे चरणार्द्रालक्तकरसेन सा रक्ता जातेत्यर्थः ॥

द्वीपे परस्मिन्नितरोऽस्ति कश्चिदस्य व्रतीन्द्रस्य वशी सदृक्षः ।
दिदृक्षयान्तः कुतुकादितीव पतिस्त्विषां याति परत्र खण्डे ॥ २३ ॥

त्विषां पतिर्भानुमान्परत्र अन्यस्मिन् खण्डे द्वीपे प्रदेशे वा याति । उत्प्रेक्ष्यते—अन्तश्चेतोमध्ये कुतुकात्कौतूहलादित्यमुना प्रकारेण दिदृक्षया द्रष्टुमिच्छयेव । इति किम्। यदन्यस्मिन्परस्मिन्द्वीपेऽस्य हीरविजयनाम्नो व्रतीन्द्रस्य सूरेः सदृक्षस्तुल्य इतोऽन्यः कश्चिद्वशी जितेन्द्रिय आस्ते न वेति ॥

अनक्षिलक्ष्यीभवति स्म भास्वान्निजाङ्गनायामनुरागिभावात् ।
क्वचिन्निगूढं वरुणेन रोपादिवैष पाशेन नियम्य मुक्तः ॥ २४ ॥ ✓

भास्वान्मार्तण्डः अक्ष्णोर्नयनयोर्लक्ष्यो दृश्यः अक्षिलक्ष्यः दृग्गोचरो नाक्षिलक्ष्योऽनक्षिलक्ष्यः स भवति स्मेति अनक्षिलक्ष्यीभवति स्म । अदृश्यो जातः । अस्तं गत इत्यर्थः । उत्प्रेक्ष्यते—निजाङ्गनायां पश्चिमदिङ्मृगलोचनायाम् । 'वरुणगृहिणीमाशामासादयन्तमनुरुची' इति नैषधे । अनुरागः प्रेमातिरेकोऽस्त्यस्मिन्ना इत्यभावश्चित्ताभिप्रायो यस्य अनुरक्तत्वेन वा रोपात्कोपोदयात्कस्मिंश्चिदपि प्रदेशे वरुणेन प्रतीचीपतिना पाशेन बन्धनग्रन्थिना नियम्य बद्धा निगूढं गुप्तस्थाने मुक्तः स्थापितो रक्षित इव ॥ इति सूर्यास्तवर्णनम् ॥

आवासविस्मेरमहीरुहाणां सायं शिखाः शिश्रियिरे शकुन्ताः ।
विश्लेपकर्ता क्व गतः सगोत्रः खगस्तदीक्षार्थमिवास्थुरुच्चैः ॥२५॥

[illegible]

[illegible]

तदुत्थातिरेकादब्धौ मज्जन्त्या ब्रुडन्त्याः पतन्त्या वा दिनलक्ष्म्या वासरश्रिया भाले ललाटमिव ॥

भानोर्बभौ मण्डलखण्डमब्धौ गन्तुः पुरारेर्मिलितुं मुरारिम् ।
मृगाङ्कलेखेव सरोषचण्डीसालक्तपादाहतिशोणितश्रीः ॥ २२ ॥

अब्धौ समुद्रे भानोः सूर्यस्य मण्डलस्य बिम्बस्य खण्डं शकलम् । बिम्बचतुर्थांशमात्रमित्यर्थः । बभौ शोभते स्म । उत्प्रेक्ष्यते—मुरारिं नारायणं मिलितुं गन्तुर्गच्छतीति गन्ता तस्य पुरारेः शम्भोर्मृगाङ्कलेखेव शिरःशेखरपीयूषमयूखकलेव शिरःशशिकलेव । किंभूता । सरोषा कुतश्चित्कारणात्कोपकलिता या चण्डी अत्यन्तकोपना कामिनी पार्वती च । 'चण्डस्त्वत्यन्तकोपनः' इति हैमीवचनात् । स्त्री चेच्चण्डी । 'दुर्गा चण्डी सिंहयाना मृडानी' इत्यपि हैम्यां पार्वतीनामानि । तस्याः सालक्तकेन सह यावकरसेन वर्तते यस्तादृशः पादश्चरणस्तस्याहत्या शिरसि प्रहारेण शोणस्य सजातमस्यामिति शोणिता रक्तीभूता श्रीर्विपुललक्ष्मीर्यस्याः । कथंचित्सुरतकलहे कुपिता पार्वतीमनुनेतुं पादपतितस्य शम्भोः शिरसि कोपात्पादप्रहारः प्रदत्तः, तदवसरे चरणार्द्रालक्तकरसे लग्ने रक्ता जातेत्यर्थः ॥

द्वीपे परस्मिन्नितरोऽस्ति कश्चिदस्य व्रतीन्द्रस्य वशी सदृक्षः ।
दिदृक्षयान्तःकुतुकादितीव पतिस्त्विषां याति परत्र खण्डे ॥ २३ ॥

त्विषां पतिर्भानुमान्परत्र अन्यस्मिन् खण्डे द्वीपे प्रदेशे वा याति । उत्प्रेक्ष्यते—अन्तश्चेतोमध्ये कुतुकात्कौतूहलादिसमुना प्रकारेण दिदृक्षया द्रष्टुमिच्छयेव । इति किम् । यदन्यस्मिन्परस्मिन्द्वीपेऽस्य हीरविजयनाम्नो व्रतीन्द्रस्य सूरेः सदृक्षस्तुल्य इतोऽन्यः कश्चिद्वशी जितेन्द्रिय आस्ते न वेति ॥

अनक्षिलक्ष्यीभवति स्म भास्वान्निजाङ्गनायामनुरागिभावात् ।
क्वचिन्निगूढं वरुणेन रोषादिवैष पाशेन नियम्य मुक्तः ॥ २४ ॥

भास्वान्मार्तण्डः अक्ष्णोर्नयनयोर्लक्ष्यो दृश्यः अक्षिलक्ष्यः दृग्गोचरो नाक्षिलक्ष्योऽनक्षिलक्ष्यः न भवति स्मेति अनक्षिलक्ष्यीभवति स्म । अदृश्यो जातः । अस्तं गत इत्यर्थः । उत्प्रेक्ष्यते—निजाङ्गनायां पश्चिमदिक्कुलाङ्गनायाम् । 'यदन्यदृहिणीनाममनामादधन्मनु रवौ' इति नैषधे । अनुरागः प्रेमातिरेकोऽस्त्यस्मिन्निति अनुरागी तस्य भावस्तस्मात् अनुरक्तत्वेन वा रोषात्कोपोदयात्कयाचिन्निगूढमपि प्रच्छन्नं वरुणेन प्रचेतसा पाशेन बन्धनग्रन्थिना नियम्य बद्ध्वा निगूढस्थाने मुक्तः स्थापितो रक्षित इव । इति सूर्यास्तवर्णनम् ॥

आवासविस्तीर्णमहीरुहाणां सायं शिखा शिश्रियिरे शकुन्ताः ।
विश्वोपकर्ता क्व गतः खगोत्रैः प्रष्टुं दिनार्धमिव बन्धुरुच्चैः ॥ २५ ॥

[illegible] पुनः केषु सत्सु । [illegible] मनोविनोदसरित्सु [illegible] सत्सु । वर्षाकाले हि [illegible] भजन्ते । ततः शरदि पुनः [illegible] तेनेतरतो भ्रमणं करोति । तदुक्तं [illegible]— [illegible] 'भाद्रपदे [illegible]' इति [illegible] । पुनः केषु सत्सु । [illegible] आगत्य मकरन्दपानं करोति [illegible] सत्सु । [illegible]— [illegible] । पुनः कानु [illegible] । [illegible] 'कमलानि' इति [illegible] । [illegible] 'पद्माः पुष्पाणि' इति [illegible]

[illegible]

॥ १ ॥

[illegible]

ऽस्तो गगनरत्नं सूर्यः । 'भानुर्नभोद्युमणी' इति हैम्याम् । स एव वल्लभः प्राणप्रियो भर्ता पद्मिनीपतित्वेन तस्य । तेन विप्रयुक्ता प्राप्तवियोगाम् । विरहिणीमित्यर्थः । पुनः किंभूताम् । अत एव मुद्रितो मुकुलीकृतः सकोचितः पिहितो वा पद्मसदृशः कोशः कुड्मलो यस्यास्ताम् । पूर्वंप्रीणितस्वजनादि. कामपि प्रियवियोगिनीं कामिनीमागत्य सुखदुःखादिवार्ता प्रश्नेनापृच्छतीति रीतिः ॥

सरोजिनी कोशकुचौ निपीड्याधरच्छदे पीतरसैः स्ववातात् ।
मीलन्मुखी कम्पमिषान्निषेद्ध्री जहे महेलेव युवद्विरेफैः ॥ २९ ॥

युवद्विरेफैस्तरुणभृङ्गैः सरोजिनी पद्मिनी जह्रे । केव । महेलेव । यथा युवभिर्युवती लज्यते । किं कृत्वा । कोशौ मुकुलावेव कुचौ निपीड्य मर्दयित्वा । किंभूतैर्द्विरेफैः युवभिश्च । अधरच्छदे अधस्तनपत्रे ओष्ठदले च । निपीतो नितरामास्वादितो रसो मकरन्दोऽमृतरसो यैः । 'सनाद सध्यानपरोष्ठलेख्याम्' इति नैषधे । 'अधस्तनोऽधरः' इति तद्वृत्तिः । किंभूता । स्ववातान्निजपक्षपवनात्ः कम्पस्तन्मिषान्निषेद्ध्री निषेधनशीला स्व निवारयन्ती । अत एव किंभूता । मीलन्मुखी सकुचद्वदना ॥

विश्वं विशन्तीं द्विषतीमुपां स्वामन्विष्य तस्याः किममङ्गलाय ।
रथाङ्गनाम्नां निवहैर्वियुक्तैर्विमुक्तकण्ठं रुरुदे दिनान्ते ॥ ३० ॥

वियुक्तैः वियोगिभि. निजाङ्गनारथाङ्गविहगनीभ्यः पृथग्भूतैर्दैववशात्स्वा प्रियां मीलितुमशक्नुवद्भि. इत एव पृथक्स्थानस्थितैः । 'रविरहैर्विरहध्रुवभेदयोः' इति रघुवंशवचनात् । रथाङ्गनाम्नां चक्रवाकानां निवहैर्निकरैर्दिनान्ते दिवसावसाने प्रदोषसमये विमुक्तकण्ठ गाढस्वरेण रुरुदे रोदनमकारि । किं कृत्वा । विश्वं जगन्मध्य विशन्तीं प्रवेश व्रजन्तीम् । तथा स्वामात्मीयां द्विषतीं वैरिणीमुषां निशामन्विष्य विलोक्य । उत्प्रेक्ष्यते—तस्या रात्रेः किममङ्गलायापशकुनार्थम् । गमनागमने हि प्रायः प्राणिनां स्वयं रोदनं पररोदनश्रवणं च महाकष्टाय जायते ॥

मृगीदृशामञ्जनमञ्जुलाभिर्विलोचनश्रीभिरिवाभिभूताः ।
व्रीडेन नीडद्रुमकोटरान्तः प्रयान्ति संध्यामनु खञ्जरीटाः ॥ ३१ ॥

सध्या पितृप्रसूसमयमनुलक्ष्यीकृत्य खञ्जरीटा. खञ्जननामानः शकुनविशेषाः नीडाना स्वस्वकुलायानां ये द्रुमा महीरुहास्तेषां कोटरान्तः निष्कुहमध्यभागे । 'निष्कुहः कोटरो मञ्जा' इति हैम्याम् । प्रयान्ति गच्छन्ति । प्रविशन्तीत्यर्थं । उत्प्रेक्ष्यते—मृगीदृशां सारङ्गनयनानां सुलोचनानां स्त्रीणामञ्जनमञ्जुलाभि कज्जलशलाकाञ्जनावन्मनोज्ञाभिः विलोचनश्रीभिर्विशिष्टनयनलक्ष्मीभिरभिभूताः सन्तो व्रीडेन लज्जयेव । व्रीडशब्दोऽकारान्तोऽप्यस्ति । 'व्रीडमावहति मामकं मनः' इति नैषधे ॥

---

१. मञ्जेति तु प्रकृतानुपयुक्तं भवेत्.

पयोधिपूरे पश्चिमसमुद्रसलिलप्रवाहे अम्बुजबन्धोः पद्मसुहृदो दिवाकरस्य बिम्बं मण्डलं स्मेरारुणाम्भोरुहवद्विकसितरक्तकमलमिव विभाति । नीरधिनीरोपरि विकच-कोकनदसदृशं दृश्यते इत्यर्थः । किंभूतम् । उत्तुङ्गो गगनाङ्गणावधिर्यो यन्तरत्नरहितो समुद्रस्तारङ्ग- । अत्र समुद्रार्थेऽण् । करोलकलापः । 'बार बार नागरत्नरनिर्जि-तगङ्गानारङ्गाम्' इति पद्मसुन्दरनिर्मितभारतीस्तवने । तस्य शिखाग्रप्रभागमवलम्बते आश्रयतीति एवं शीलम् । पुनः किंभूतम् । किञ्जल्कानां कमलकेसराणां लीला विला-सस्तद्वदाचरितो रश्मिराशिः करनिकरो यस्य ॥

पूरे समुद्रस्य बभस्ति बिम्बं राजीविनीजीवितनायकस्य ।
पयोधिपल्यङ्कतले शयालोरुल्लासि चक्रं किमु चक्रपाणेः ॥ १९ ॥

समुद्रस्य पश्चिमवीचिमालिनः पूरे पयःप्रवाहे राजीविनीनां पद्मिनीनां जीवितनाय-कस्य प्राणवल्लभस्य बिम्बं मण्डलं बभस्ति भासते । 'वररजनीकर कान्ते चित्राभरणे निधानमध्ये । तव नृप मन्नभवने सविता नामानि परमश्री. ॥' इति चम्पूकथा-याम् । 'तत्र द्वितीयराजार्थे निशानिन्तेजस्विभिर्बभस्ति' इति तट्टिप्पनके । उत्प्रेक्ष्यते— पयोधिः समुद्र एव पल्यङ्कः शय्या तस्य तले शयालोः शयनशीलस्य । 'दाशार्हः पु-रुषोत्तमोऽब्धिशयनोपेन्द्रावजेन्द्रानुजौ' इति हैम्याम् । चक्रपाणेर्विष्णोरुल्लासि प्रोल्ल-सनशीलं चक्रं किमु । विस्फुरत्सुदर्शनं नाम रथाङ्गमिव ॥

खण्डेन चण्डद्युतिमण्डलेन न्यमज्जि पूरे मकराकरस्य ।
सूरेर्महःसाम्यकृतेऽब्धिझम्पासृजा शनैर्निष्पततेव भीतेः ॥ २० ॥

चण्डद्युतेर्भास्करस्य मण्डलेन खण्डेन शकलेन चतुर्थभागेन कृत्वा मकराकरस्य समुद्रस्य पूरे न्यमज्जि त्रुडितम् । मण्डलचतुर्थांशो जलधिमध्ये निमग्न इत्यर्थः । उत्प्रे-क्ष्यते—सूरेर्हीरविजयसूरीन्द्रस्य महसा भूयसा प्रतापाना साम्यकृते तुल्यत्वप्राप्त्यर्थ-मब्धौ समुद्रे झम्पा पयःसंपातपाटवं सृजति करोति इत्यब्धिझम्पासृट् तेनार्केण भीतेः स्तान्ते भयवशात् शनैर्लघु निष्पततेव ॥

अम्भोधिमध्येऽर्धितबिम्बमम्भोजिनीवरस्य स्फुरति स्म सायम् ।
अतादृशीं प्रेक्ष्य दशां प्रियस्य किमब्धिमज्जद्दिनलक्ष्मिभालम् ॥२१॥

सायं संध्यासमये अम्भोधेः समुद्रस्य मध्ये अम्भोजिनीवरस्य पद्मिनीपतेर्भानोर-र्धितं भावप्रधाननिर्देशादर्धत्वं जातमस्मिन्नित्यर्धितं बिम्बं मण्डलम् । अर्धमब्धिमध्ये मग्नम्, अर्ध बहिर्दृश्यमानं चेत्यर्थः । स्फुरति दीप्यते स्म । उत्प्रेक्ष्यते—प्रियस्य स्व-[illegible]तिभासा भ. शोच्याम[illegible]लक्षणां दशामवस्थां प्रेक्ष्य दृग्गोचरीकृत्य । अर्था-[illegible] —प्रदीप इति ।
[illegible] । अन्यथात्रीयब्धादर्शं आयजिति भावः.

संध्यारागः । रवेरस्तगमनानन्तरं प्रायो व्योमाङ्गणे दिशि दिशि रक्तिमा प्रादुर्भवति । सन्ध्यासमये जातत्वात्संध्यारागः समुल्ललास सम्यग्दृश्यमानः स्फुरति स्म । किंभूतः । विरागीकृतानि वियोगव्याकुलीभवनत्वेन सदुःखानि कृतानि चक्राणां चक्रवाकानां चक्राणि वृन्दानि येन । उत्प्रेक्ष्यते—विश्वानि त्रीणि सप्त चतुर्दश वा एकविंशतिर्वा जगन्ति भुवनानि जिगीषुणा पराभवितुमिच्छुना प्रयियासुना मदननृपतिना इयमेषा सन्ध्यारागलक्षणाप्रत्यक्षा शोणी रक्ता नवोपकार्या नवीनपटकुटी प्रादायि दत्ता । 'रचयति रुचिः शोणीमेतां कुमारितरारवेः' इति नैषधे ॥

नभोङ्गणे सान्द्रितसांध्यरागैर्बभेऽम्बुधिं शीलति हेलिबिम्बे ।
भर्तुर्विधोरागमने प्रणीते रात्रिस्त्रिया कुङ्कुमहस्तकैः किम् ॥ ३६ ॥

नभोङ्गणे गगनमण्डले सान्द्रत्वं निबिडीभावं संजातोऽस्त्येषु तादृशैः सन्ध्यायाः सूर्यास्तसमये भवैः साध्यरागैः पदे पदे पाटलाभ्रपटलैः बभे शुशुभे । कस्मिन्सति । हेलिबिम्बे मार्तण्डमण्डले अम्बुधिं समुद्रमध्यं शीलति श्रयति सति । उत्प्रेक्ष्यते—विधोश्चन्द्रमसः भर्तुः स्वप्राणवल्लभस्यागमने पादावधारणसमये रात्रिस्त्रिया यामिनीकामिन्या प्रणीतैः प्रदत्तैर्दिग्भित्तिगगनाङ्गणेषु वितीर्णैः कुङ्कुमहस्तकैः घुसृणद्रव्यलिप्तहस्तबिम्बकैः किम् ॥

मज्जत्ककुप्कुञ्जरबिन्दुवृन्दारुणीभवद्व्योमसरित्तरङ्गैः ।
अभ्रेऽरुणाम्भोजरजोविमिश्रैरदभ्रसंध्याभ्रनिभात्प्रसस्रे ॥ ३७ ॥

मज्जता सकलवासरतपत्तपनतापसंतापिततनुतया सायं शिशिरतानिर्मितये जलकेलिकरणसमये लीलया सलिलान्तरे ब्रुडता ककुभामष्टदिशामैरावताद्यष्टदिग्गजानां बिन्दुवृन्दैः शोणनदोदककणगणैः । पद्मभ्या हि दशायां करीन्द्राणां कपोलपालीभ्यः पाटला बिन्दवो निर्गच्छन्तीति शास्त्रे कविसमयः । तथाहि—'भूर्जत्वचः कुञ्जरबिन्दुशोणाः' इति कुमारसम्भवे । अरुणीभवद्भिः शोणिमानं प्राप्नुवद्भिः व्योमसरितो गगनगङ्गायास्तरङ्गैः कल्लोलैः अदभ्राणि अनेकानि अभ्राणि सन्ध्यासमयाविर्भवद्दुर्दर्शा(ला)नि तेषां निभात्कपटादभ्रे व्योमभागे प्रसस्रे प्रसृतम् । इति गम्योत्प्रेक्षा । किंभूतैस्तरङ्गैः । अरुणाम्भोजानि कोकनदानि तेषां रजोभिः पाटलपरागैः विमिश्रैः करम्बितैः ॥

आगामुकं कामुकमक्षिलक्ष्यं प्रणीय राजानमनन्तलक्ष्म्या ।
अभ्रेऽङ्गरागो घुसृणैः प्रणीतः साध्योल्लसल्लोहितिमा किमेषः ॥ ३८ ॥

सन्ध्यासंबन्धी समुल्लसन् स्फुरन् लोहितिमा रक्तिमा । राग इत्यर्थः । नाक्षोल्लि-ऽेशः । उत्प्रेक्ष्यते—एष दृश्यमानः प्रत्यक्षः साध्यराग एव अनन्तलक्ष्म्या गगनश्रिया अङ्गे स्वतनूलतायां घुसृणैः कुङ्कुमैः रागो विलेपनं किं प्रणीतो निर्मित इव । किं कृत्वा । कामुकं स्वकामयितारं स्वस्य विषये भोगाभिलाषिणं तथा एव आगामुकमागमनशीलं समागमनशीलं राजानं चन्द्रनृपं च अक्षिलक्ष्यं दृग्गोचरं प्रणीय कृत्वा । स्पष्टार्थं ॥

पयोधिपूरे पश्चिमसमुद्रसलिलप्लवे अम्बुजबन्धोः पद्मसुहृदो दिवाकरस्य बिम्ब मण्डलं स्मेरारुणाम्भोरुहवद्विकसितरक्तकमलमिव विभाति । नीरधिनीरोपरि विकच-कोकनदसदृशं दृश्यते इत्यर्थः । किंभूतम् । उत्तुङ्गो गगनाङ्गणालिङ्गी यस्तारदस्तरङ्गाणां समूहस्तारङ्गः । अत्र समूहार्थेऽण् । कल्लोलकलापः । 'वारं वारं तारतरस्वरनिर्जि-तगङ्गातारङ्गाम्' इति पद्मसुन्दरनिर्मितभारतीस्तवने । तस्य शिखामग्रभागमवलम्बते आश्रयतीति एवं शीलम् । पुनः किंभूतम् । किंजल्कानां कमलकेसराणां लीलां विला-सस्तद्वदाचरितो रश्मिराशिः करनिकरो यस्य ॥

पूरे समुद्रस्य बभस्ति बिम्बं राजीविनीजीवितनायकस्य ।
पयोधिपल्यङ्कतले शयालोरुल्लासि चक्रं किमु चक्रपाणेः ॥ १९ ॥

समुद्रस्य पश्चिमवीचिमालिनः पूरे पयःप्लवे राजीविनीनां पद्मिनीनां जीवितनाय-कस्य प्राणवल्लभस्य बिम्बं मण्डलं बभस्ति भासते । 'वररजनीकर कान्ते चित्राभरणे निशानभःसदृशे । तव नृप मज्जनभवने सविता नाभाति परमश्री ॥' इति चम्पूकथा-याम् । 'तत्र द्वितीयराजार्थे निशानैस्तेजस्विभिर्बभस्ति' इति तट्टिप्पनके । उत्प्रेक्ष्यते— पयोधिः समुद्र एव पल्यङ्कः शय्या तस्य तले शयालोः शयनशीलस्य । 'दाशार्हः पु-रुषोत्तमोऽब्धिशयनोपेन्द्रावजेन्द्रानुजौ' इति हैम्याम् । चक्रपाणेर्विष्णोरुल्लासि प्रोल्ल-सनशीलं चक्रं किमु । विस्फुरत्सुदर्शनं नाम रथाङ्गमिव ॥

खण्डेन चण्डद्युतिमण्डलेन न्यमज्जि पूरे मकराकरस्य ।
सूरेर्महःसाम्यकृतेऽब्धिझम्पासृजा शनैर्निष्पततेव भीतेः ॥ २० ॥

चण्डद्युतेर्भास्करस्य मण्डलेन खण्डेन शकलेन चतुर्थभागेन कृत्वा मकराकरस्य समुद्रस्य पूरे न्यमज्जि त्रुडितम् । मण्डलचतुर्थांशो जलधिमध्ये निमग्न इत्यर्थः । उत्प्रे-क्ष्यते—सूरेर्हीरविजयसूरीन्द्रस्य महसा भूयसा प्रतापानां साम्यकृते तुल्यत्वप्राप्त्यर्थ-मब्धौ समुद्रे झम्पा पयःसंपातपातं सृजति करोति इत्यब्धिझम्पासृट् तेनार्केण भीतेः स्वान्ते भयवशात् शनैर्लघु निष्पततेव ॥

अम्भोधिमध्येऽर्धितबिम्बमम्भोजिनीवरस्य स्फुरति स्म सायम् ।
अतादृशीं प्रेक्ष्य दशां प्रियस्य किमब्धिमज्जद्दिनलक्ष्मिभालम् ॥२१॥

सायं संध्यासमये अम्भोधेः समुद्रस्य मध्ये अम्भोजिनीवरस्य पद्मिनीपतेर्भानोर-र्धितं भावप्रधाननिर्देशादर्धत्वं जातमस्मिन्नित्यर्धितं बिम्बं मण्डलम् । अर्धमब्धिम-ग्नम्, [illegible] बहिर्दृश्यमानं चेत्यर्थः । स्फुरति दीप्यते स्म । उत्प्रेक्ष्यते—प्रियस्य स्व-[illegible]र्भानो [illegible]तिभासा भ[illegible]शोच्यामस्तलक्षणां दशामवस्थां प्रेक्ष्य दृग्गोचरीकृत्य । अर्धा-

उत्प्रे[illegible]—प्रदोष इति [illegible]

चौरेण[illegible] । अस्वधात्रीधम्मादर्श आवर्जिति भावः.

अग्रे मनाक्संतमसैः प्रदोपरागान्तरेऽथ प्रकटीबभूवे।
प्रवालपुञ्जे स्मयमानकृष्णवल्लीप्ररोहैरिव वार्धिमध्ये ॥ ४३ ॥

अथ सन्ध्यारागभवनानन्तरमग्रे आकाशे प्रदोषो यामिनीमुखं सन्ध्या तस्य यो रागो रक्तिमा तस्यान्तरे मध्ये मनाक् किंचन संतमसैरन्धकारैः प्रकटीबभूवे प्रादुर्भूतम्। कैरिव। स्मयमानकृष्णवल्लीप्ररोहैरिव। यथा वार्धिमध्ये परीवारान्तरालभूमौ प्रवालपुञ्जे विद्रुमकन्दलवृन्दे विकसैरकृष्णलतानां 'कालीवेल' इति लोकमध्ये प्रसिद्धानामङ्कुरैः प्रकटीभूयते ॥

विभ्राजिसंध्याभ्रपरम्पराभिरलम्भि भूच्छायभरैर्विभूतिः।
स्मेरारुणाम्भोरुहमण्डलीभिर्भृङ्गैरिवान्तर्मधुपानलीनैः ॥ ४४ ॥ ✓

विभ्राजन्त इत्येवंशीलाभिर्विभ्राजिनीभिः शोभनशीलाभिः सन्ध्यारागरक्तीभूतानामभ्राणां वर्दलिकानां परम्पराभिः श्रेणीभिः कर्त्रीभिर्भूच्छायभरैरन्धकारनिकरैः करणैर्विभूतिः शोभा अलम्भि संप्राप्ता। कामिरिव। स्मेरारुणाम्भोरुहमण्डलीभिरिव यथा विकचानां कोकनदानां मालिकाभिः अन्तर्विकसितकोशमध्ये मधूनां मकरन्दानां पानार्थमास्वादनकृते लीनैरातृप्तिपानरसाभिश्लथीभूतैर्भृङ्गैर्भ्रमरैः कृत्वा लक्ष्मीः शोभा प्राप्यते ॥

तमोगणालिङ्गितभोङ्गणश्रीः संध्याभ्ररागच्छुरिता चकासे।
वृन्दारकैः कुङ्कुमगन्धधूलीद्रवैरिवासिच्यत शक्रमार्गः ॥ ४५ ॥ ✓

संध्यासमयोद्गतानामभ्राणां रागं रक्तिमभिश्छुरिता व्याप्ता। 'चन्दनच्छुरितं वपुः' इति पाण्डवचरित्रे। तमसां तिमिराणां गणेन समुदायेन आलिङ्गिता चुम्बिता कलिता नभोङ्गणश्रीर्गगनतललक्ष्मीश्चकासे शोभते स्म। उत्प्रेक्ष्यते—वृन्दारकैर्देवैः कुङ्कुमैर्घुसृणरसकलितैर्गन्धधूलीनां जालमृगनाभीनां द्रवं पङ्कं कृत्वा शक्रमार्गः पुरंदरपदवी गगनमसिच्यत सिक्त इव। 'येनामुना बहुविगाढसुरेश्वराध्व–' इति नैषधे। 'सुरेश्वराध्वा गगनम्' इति तद्वृत्तिः ॥

सुधान्धसामध्वनि सांध्यरागोल्लासं विलुप्य प्रसृतं तमोभिः।
मलीमसाः स्वावसरं प्रपद्य परोदयं हन्त कुतः सहन्ते ॥ ४६ ॥

सान्ध्यरागस्य जगत्स्वभावात्प्रादुर्भवतः सन्ध्यायां दिनादौ दिनान्ते च द्वे सांध्ये भवतः। अत्र चापि प्रकाराद्दिनान्तसन्ध्याया एवेति वाच्यम्। यतोऽभेतननिशाया शासनदेवता समेष्यती विवक्षते रागो रक्तिमा तस्योल्लासमाविर्भावं प्रसारं वा विलुप्य निराकृत्य निषिध्य सुधामृतमेवान्धो भोजनं येषां ते सुधान्धसो देवाः। 'स्वाहास्वधाक्रतुसुधाभुज आदितेयाः' इति हैमीवचनात्। सुधाशना देवास्तेषामध्वनि मार्गे पथि गगने तमोभिर्भूच्छायभरैः प्रसृतं विसृतम्। अत्रार्थान्तरन्यासः। युक्तोऽयमर्थः। मलीमसा मलिनाः

शकुन्ताः पक्षिणः सायं सन्ध्यासमयमनुलक्ष्यीकृत्य आवासमनावासत्वदर्थम्। [illegible] निवासस्थानमित्यर्थः। आवासवृक्षा वा विकल्पिता ये महीरुहा पादपास्तेषाम्। 'आवासवृक्षोन्मुखबर्हिणानि' इति रघुवंशे। तथा 'कलबर्हान्यालिनश्च'। 'पत्रिणः, बर्हिणः' इति प्रक्रियाकौमुद्याम्। शिखाः शाखाः शिश्रियिरे भजन्ते स्म। उत्प्रेक्ष्यते—विरोचनो जगज्जनानां प्रबोधालोककारकत्वेनोपकारकारकः तथा सगोत्रो गोऽस्माकमाकाशचरत्वेन सदृशं गोत्रं नाम यस्य स सगोत्रः। 'गोत्रनामाभिधानयोरपि' इति हैम्याम्। खगो भानुनाम्नि। 'सूर्योऽर्कः किरणो भगो ग्रहपुषः पूषा पतङ्गः खगः' इति सूर्यनामानि हैम्याम्। क्व कुत्रस्थाने गतः यातवान्। तत्र खगस्य ईक्षणेच्छयार्थनिवेशैः उपरितनशाखासु अस्थुः स्थिताः॥

मरन्दनिस्पन्दितमालतालीः सायं स्म शीलन्ति कलापिमालाः।
प्रावृट्पयोदस्य धियेव मैत्र्यादुपेयुषोऽग्रान्मिलितुं क्षमायाम्॥२६॥

कलापिमालाः मयूरसमूहाः सायं सन्ध्यासमये मरन्दानां विकसितकुसुम[illegible] निस्यन्दितमालतालीः [illegible] आरामस्थासु [illegible] शीलन्ति भजन्ते। उत्प्रेक्ष्यते—अग्रादाकाशान्मैत्र्यात् [illegible] समागतस्य प्रावृट्पयोदस्य [illegible] धिया बुद्ध्या। इत्यर्थः॥

निकामकेकमनु सूत्रकण्ठा अनीनदन्नीडसनीडभाजः।
दृष्ट्वा जगच्चक्षुरनिष्टमेते पठन्ति किं शान्तिकमन्त्रपाठान्॥ २७॥

[illegible] दिनावसानसमयमनुलक्ष्यीकृत्य। [illegible] 'दिनावसानमनु [illegible]' इति हैम्याम्। सूत्रकण्ठाः [illegible] अनीनदन् [illegible] भजन्तीति। उत्प्रेक्ष्यते—[illegible]

[illegible]

[illegible] ॥ २८ ॥

[illegible]

अङ्काच्च्युताया रभसेन बाल्याल्लीलां सृजन्त्याः स्वपितुर्गभस्तेः ।
जामेर्यमस्येव पयःप्रवाहैर्भृते नभोभूमितले तमोभिः ॥ ९० ॥

तमोभिस्तिमिरैर्नभोभूमितले नभस्तल भूमीतल च भृते व्याप्ते बाल्याद्बालस्वभावाल्लीला क्रीडाम् । 'क्रीडा लीला च नर्म च' इति हैम्याम् । सृजन्त्या' कुर्वन्त्या. स्वस्य जनकस्य पितुर्गभस्तेर्भास्करस्य अङ्कादुत्सङ्गात् रभसेनौत्सुक्येन च्युतायाः पतितायाः यमस्य शमनस्य जामेर्भगिन्या अलभत । शमनस्वसुः शिशुत्वम् 'दिवसकराङ्कतले चला लुण्ठन्ती' इति नैषधे । यमुनाया. पय'प्रवाहैः सलिलौघैरिव व्योममहीमण्डले निर्भर भृते । कालिन्द्याः कृष्णजलत्वेनेयमुत्प्रेक्षा ॥

रथाङ्गनाम्नां दिवसावसाने वियोगभाजां सममङ्गनाभिः ।
स्फुरद्विषादानलधूमलेखा मन्ये तमिस्रा बहुलीबभूवुः ॥ ९१ ॥

तमिस्रा अन्धकाराणि । तमिस्रशब्दः स्त्रीक्लीबलिङ्गयो । बहुलीबभूवु. निविडा नीरन्ध्राः सजायन्ते स्म । तत्राहमेव मन्ये विचारयामि । दिवसावसाने दिनपर्यन्ते सध्याया एवारभ्य अङ्गनाभिः स्वीयवल्लभाभिः रथाङ्गविहगमीभि सम सार्धं वियोगभाजा परस्परविश्लेषकुलिताना रथाङ्गनाम्ना चक्रवाकाना स्फुरन्त्य. प्रकटीभवन्त्यः विषादः खेदः स एवानलो हुताशनः तस्य धूमाना लेखाः श्रेणय इव ॥

गते गवा स्वामिनि नाभ्युदीते राजन्यथाराजकवद्विभाव्य ।
स्वैरप्रचारेण जगत्समग्रमुपाद्रवद्दस्युरिवान्धकारः ॥ ९२ ॥

अन्धकारः स्वैर स्वेच्छया प्रचारेण द्यावाभूम्योः सचरणेन दस्युरिव प्रत्यर्थीव चौर इव वा समग्र जगत्सर्वमपि भुवनमुपाद्रवदुपद्रवति स्म । कि कृत्वा । गवा किरणाना पृथिवीना च स्वामिनि नायके भानौ भूधने च । 'गोस्वामिनि स्फुरिततेजसि दृष्टमात्रे' इति कल्याणमन्दिरस्तवने । क्वापि कुत्रापि गते अस्तमिते परजनपदे प्रयाते मृते वा सति अथ पश्चात् राजनि चन्द्रे पट्टधरनृपे च नाभ्युदीते नोदय प्राप्ते पट्टे स्थापिते च । अत एवाराजकवति स्वामिकमिव जगद्विभाव्य निरीक्ष्य । 'हा हा महाकष्टमराजक जगत्' इति मृगयावर्णने धनपालोक्ति ॥

कियद्विहायः कियती क्षितिर्वा प्रमातुकामस्तमसा समूहः ।
कुतूहलाक्रान्तमना इतीव द्यावापृथिव्योः प्रसरीसरीति ॥ ९३ ॥

तमसामन्धकाराणा समूहो द्यावापृथिव्योर्नभोभूमण्डलयो प्रसरीसरीति अतिशयेन प्रसरति । उत्प्रेक्ष्यते—विहायो गगन किंप्रमाणमस्येति कियत् । तथा वा पुनः क्षिति. पृथिवी कियती कियत्प्रमाणा । 'कियती पञ्चसहस्री कियती लक्षा च कोटिरपि कियती । औदार्योन्नतमनसा रत्नवती वसुमती कियती ॥' इति सूक्तोक्ति । इत्यमुना प्रकारेण

सान्द्रद्रुमोल्लासिनि पूर्वशैलशृङ्गाङ्गणे चञ्चति चन्द्रलेखा ।
किंचिन्निरीक्ष्या हरिदिङ्मृगाक्ष्याश्चूडामणिः किं चिकुरान्तरस्था ॥ ६९ ॥

सान्द्रविनिद्रदल(निविडदल)मण्डलकलितान्तरालसच्छायपादपपटलोल्लसनशीले पूर्वशैलस्य उदयाचलस्य शृङ्गाङ्गणे शिखराजिरे उपरितनभूविभागे किंचिन्निरीक्ष्या स्वल्पतरचक्षुर्लक्ष्या चन्द्रलेखा शशिकला चञ्चति सशोभते । 'चञ्चति चकास्ति लसत्यपि शोभते' इति क्रियाकलापे । उत्प्रेक्ष्यते—हरेः पुरंदरस्य दिक् पूर्वाशा सैव मृगाक्षी हरिणेक्षणा वधूस्तस्याः चिकुराः केशपाशास्तेषामन्तरे मध्ये तिष्ठतीति चिकुरान्तरस्था निविडघनकेशकलापत्वेन किंचिन्मनाक् निरीक्ष्या दृग्गोचरा चूडामणिः किमु शिरोरत्नमिव । मणिशब्दः पुंस्त्रीलिङ्गयोरपि । यथा 'प्रश्निरश्मिध्यशनीमणिः स्रणिः' इति लिङ्गानुशासने । तथा ह्रस्वो दीर्घोऽपि । अथ वा चूडामणिर्मस्तकाभरणविशेषः । सौराष्ट्रगुर्जरेषु तु 'वाक' इति लोकोक्त्या तत्र पुलिङ्ग एवावधार्यते ॥

दत्त्वाधिपत्यं निखिलाचलानां स्वदिग्गिरेः स्वर्गिरिचक्रिणेव ।
मौलिस्थले राजतपट्टबन्धो विनिर्मितः स्फूर्जति सामिसोमः ॥ ७० ॥

सामिसोमः अर्धविधुः स्फूर्जति स्फूर्तिमियर्ति । दीप्यते इत्यर्थः । 'पूर्वं गाधिसुतेन सामिघटिता मुक्ता नु मन्दाकिनी यत्प्रासाददुकूलवल्लिरनिलान्दोलैरखेलद्दिवि' इति नैषधे । 'सामिघटिता अर्धनिष्पादिता' इति तद्वृत्तिः । उत्प्रेक्ष्यते—स्वर्गिरिचक्रिणा काञ्चनाचलचक्रवर्तिना शक्रेण । 'जाम्बूनदोर्वीधरसार्वभौम' इति नैषधे इन्द्राभिधानम् । स्वदिग्गिरेरात्मीयाशाशैलस्य उदयाभिधानस्य भूधरस्य निखिलाचलानां सकलभूमण्डलवर्तिपर्वतानामाधिपत्यमैश्वर्यं राज्यं दत्त्वा मौलिस्थले शिरोमण्डले राजतो राजतस्याय रूप्यसबन्धी पट्टबन्धो विनिर्मितः कृत इव बद्ध इव ॥

सुरेन्द्रदिग्भूधरमूर्ध्नि बिम्बमपूर्णमाभासत शीतभासः ।
खण्डं शिखायामिव सैंहिकेयदंष्ट्रान्तरायन्त्रणतोऽजनिष्ट ॥ ७१ ॥

सुरेन्द्रस्य निर्जरनायकस्य दिक् पूर्वाशा तस्या भूधर उदयपर्वतः तस्य मूर्ध्नि मस्तके शिखरे शीतभासश्चन्द्रस्य अपूर्णं किंचिन्न्यूनं किमपूर्णनिर्गमनात्खण्डं बिम्बमण्डलमाभासत राजते स्म । उत्प्रेक्ष्यते—सैंहिकेयस्य सिंहिकासुतस्य स्वर्भानोर्दंष्ट्राणां दाढानामन्तरा मध्ये यन्त्रणतः पीडनतः निर्गमनत शिखायामग्रभागे खण्डं शकलमिवाजनिष्ट सजातमिव ॥

संपूर्णपीयूषमयूखबिम्बं बभौ ततः स्वीयदिगङ्गनायै ।
मरन्दलीनालिपुरंदरेण समर्प्यते स्म स्मितपुण्डरीकम् ॥ ७२ ॥

ततोऽनन्तरं सपूर्णमखण्डं पीयूषमयूखस्य चन्द्रस्य बिम्बं मण्डलं बभौ भासते स्म । उत्प्रेक्ष्यते—पुरंदरेण इन्द्रेण स्वीयायै आत्मीयायै दिगङ्गनायै हरित्कान्तायै निजपूर्व-

दोषामुखेन द्विषतेव वार्धौ क्षिप्तं समीक्ष्य स्वविपक्षमर्कम् ।
शत्रोरगोत्रीभवनादिवाभ्रभुवोर्मुदाभ्राम्यत घूकलोकैः ॥ ३२ ॥

घूकलोकैः कौशिकशकुन्तसकरैरभ्रभुवोर्द्यावापृथिव्योर्मुदा स्वशात्रववारिजबान्धवास्तविभावनाभ्युदितप्रमोदेन अभ्राम्यत इतस्ततो बभ्रम्यते स्म । 'आलोकतालोकमुलूकलोक.' इति नैषधे । तथा 'आकाशे तमसि सममिते कोकलोके सशोके' इति नाटकशास्त्रेऽपि पक्षिशब्दानां पुरः समूहवाची लोकशब्दो दृश्यते, तेन घूकलोकः इति प्रयोग । उत्प्रेक्ष्यते—शत्रोरगोत्रीभवनात् स्वीयविपक्षजगच्चक्षुषो वंशस्य नाशोऽपि वा अभावो जात इतीव मुदा भ्रान्तम् । किं कृत्वा । द्विषतेव शात्रवेनेव दोषामुखेन प्रदोषेण स्वविपक्षं निजप्रत्यर्थिनं भास्करं वार्धौ अगाधपयोधिपयोमध्ये क्षिप्तं पातितं समीक्ष्य दृष्ट्वा ॥

कपोतपालीतटसंनिविष्टा हुंकुर्वते क्वापि कपोतपोताः ।
शोच्यां दशां प्राप्तमुदीक्ष्य मित्रमुदीयमानान्मनसीव दुःखात् ॥३३॥

क्वापि कुत्रापि स्थाने कपोतपाल्या विटङ्कस्य । 'कपोतपाली विटङ्कः' इति हैम्याम् । तटे [illegible] प्रान्तप्रदेशे संनिविष्टाः सस्थितिं कुर्वाणाः सन्तः कपोतपोताः पारावतबालकाः [illegible] हुंकारं कुर्वन्ति । कपोतानां कूजितं प्राय एवंविधमेव श्रूयते । [illegible] प्रभातवर्णनाधिकारे—'परिणतरविगर्भव्याकुला पारावती [illegible] कपोतो दुःखितः कुन्यतीव' इति । उत्प्रेक्ष्यते—शोच्यां शोचनार्हां दशाम[illegible] प्राप्तमस्तगामिनं मित्रं सूर्यं सुहृदं च उदीक्ष्य दृष्ट्वा मनसि स्वचेतसि उदीयमानात् [illegible] दुःखादिव ॥

पिकाश्चुकूजुः सहकारकुञ्जे रत्या रतश्रान्ततया शयालोः ।
जगज्जयम्यात्रमरं जिगीषोः संसूचयन्तीव रतीशभर्तुः ॥ ३४ ॥

[illegible] पिकाः कोकिलाश्चुकूजुः [illegible]

[illegible]

[illegible] ॥ ३५ ॥

[illegible]

सान्द्रद्रुमोल्लासिनि पूर्वशैलशृङ्गाङ्गणे चञ्चति चन्द्रलेखा ।
किंचिन्निरीक्ष्या हरिदिङ्मृगाक्ष्याश्चूडामणिः किं चिकुरान्तरस्था ॥ ६९ ॥

सान्द्रविनिद्रदल(निविडदल)मण्डलकलितान्तरालसच्छायपादपपटलोल्लसनशीले पूर्वशैलस्य उदयाचलस्य शृङ्गाङ्गणे शिखराजिरे उपरितनभूविभागे किंचिन्निरीक्ष्या स्वल्पतरचक्षुर्लक्ष्या चन्द्रलेखा शशिकला चञ्चति सशोभते । 'चञ्चति चकास्ति लसत्यपि शोभते' इति क्रियाकलापे । उत्प्रेक्ष्यते—हरेः पुरंदरस्य दिक् पूर्वाशा सैव मृगाक्षी हरिणेक्षणा वधूस्तस्याः चिकुराः केशपाशास्तेषामन्तरे मध्ये तिष्ठतीति चिकुरान्तरस्था निविडघनकेशकलापत्वेन किंचिन्मनाक् निरीक्ष्या दृग्गोचरा चूडामणिः किंतु शिरोरत्नमिव । मणिशब्दः पुंस्त्रीलिङ्गयोरपि । यथा 'अश्निस्तिथ्यशनीमणि छणिः' इति लिङ्गानुशासने । तथा ह्रस्वो दीर्घोऽपि । अथ वा चूडामणिर्मस्तकाभरणविशेषः । सौराष्ट्रगुर्जरेषु तु 'वाक' इति लोकोक्त्या तत्र पुलिङ्ग एवावधार्यते ॥

दत्त्वाधिपत्यं निखिलाचलानां स्वदिग्गिरेः स्वर्गिरिचक्रिणेव ।
मौलिस्थले राजतपट्टबन्धो विनिर्मितः स्फूर्जति सामिसोमः ॥ ७० ॥

सामिसोमः अर्धविधुः स्फूर्जति स्फूर्तिमियर्ति । दीप्यते इत्यर्थः । 'पूर्वं गाधिसुतेन सामिघटिता मुक्ता नु मन्दाकिनी यत्प्रासाददुकूलवल्लिरनिलान्दोलैरखेलद्दिवि' इति नैषधे । 'सामिघटिता अर्धनिष्पादिता' इति तद्वृत्तिः । उत्प्रेक्ष्यते—स्वर्गिरिचक्रिणा काञ्चनाचलचक्रवर्तिना शक्रेण । 'जाम्बूनदोर्वीधरसार्वभौम' इति नैषधे इन्द्राभिधानम् । स्वदिग्गिरेरात्मीयाशाशैलस्य उदयाभिधानस्य भूधरस्य निखिलाचलानां सकलभूमण्डलवर्तिपर्वतानामाधिपत्यमैश्वर्यं राज्यं दत्त्वा मौलिस्थले शिरोमण्डले राजतो राजतस्याय रूप्यस्य बन्धो पट्टबन्धो विनिर्मितः कृत इव बद्ध इव ॥

सुरेन्द्रदिग्भूधरमूर्ध्नि बिम्बमपूर्णमाभासत शीतभासः ।
खण्डं शिखायामिव सैंहिकेयदंष्ट्रान्तरायन्त्रणतोऽजनिष्ट ॥ ७१ ॥

सुरेन्द्रस्य निर्जरनायकस्य दिक् पूर्वाशा तस्या भूधर उदयपर्वतः तस्य मूर्ध्नि मस्तके शिखरे शीतभासश्चन्द्रस्य अपूर्णं किंचिन्यूनं किमपूर्णनिर्गमनात्खण्डं बिम्बमण्डलमाभासत राजते स्म । उत्प्रेक्ष्यते—सैंहिकेयस्य सिंहिकासुतस्य स्वर्भानोर्दंष्ट्राणां दाढानामन्तरा मध्ये यन्त्रणतः पीडनतः निर्गमनतः शिखायामग्रभागे खण्डं शकलमिवाजनिष्ट सजातमिव ॥

संपूर्णपीयूषमयूखबिम्बं बभौ ततः स्वीयदिगङ्गनायै ।
मरन्दलीनालिपुरंदरेण समर्प्यते स्म स्मितपुण्डरीकम् ॥ ७२ ॥

ततोऽनन्तरं संपूर्णमखण्डं पीयूषमयूखस्य चन्द्रस्य बिम्बं मण्डलं बभौ भाति स्म । उत्प्रेक्ष्यते—पुरंदरेण इन्द्रेण स्वीयाय आत्मीयायै दिगङ्गनायै हरित्कान्ताय निजपूर्व-

पापा वा स्वस्यात्मनोऽवसरं प्रस्ताव वेलामभ्युदयसमय वा प्रपद्य प्राप्य । हन्त इति खेदे । परेषामन्येषामात्मव्यतिरिक्तानामुदयमुन्नतिं कुतः सहन्ते । अपि तु नीचस्वभावान्न सहन्ते एव ॥ इति सध्यारागतमिस्रवर्णनम् ॥

पुरारिकंसारिपदप्रसत्तेरजय्यवीर्यं शशिनं निशम्य ।
ध्वान्तोपधेस्तानि निघृक्षयेव तमोभिरभ्रे बहुभिर्बभूवे ॥ ४७ ॥

ध्वान्तानामन्धकाराणामुपधेर्व्याजात् । उत्प्रेक्ष्यते—तमोभिः स्वर्भानुभिरभ्रे आकाशे बहुभिर्घनैर्बभूवे सजातमिव । अनेके विधुतुदा बभूवुरित्यर्थः । कया । तस्य स्वकवलयमानस्य शशिनो निजिघृक्षया निग्रहीतुमिच्छया निग्रह कर्तुं काङ्क्षया । किं कृत्वा । पुरनाम्नो दैत्यस्य अरि शत्रुरीश्वरस्तस्य तथा कसनामासुरस्य अरिर्द्वेषी तस्य च पदस्य क्रमस्य विष्णुपदस्य प्रसत्ते. प्रसादात्सेवानुभवान्नितुमशक्यमजय्यं वीर्यं पराक्रमो यस्य तादृशं शशिन चन्द्र निशम्य आकर्ण्य ॥

कचिज्जगत्साक्षिणमेक्ष्य यातं जगज्जगज्जीवपिबो जिघत्सुः ।
स्वीयं विभाव्यावसरं स्मरारिर्भूच्छायकायां सृजतीव मायाम् ॥४८॥

जगज्जीवपिब' विश्वप्राणहर' । ईश्वररूपेण सहारकारकत्वात् । 'जीवेऽसुजीवितप्राणा' इति हैम्याम् । तथा 'क्षये जगज्जीवपिब शिव वदन्' इति नैषधे । स्मरारिरीश्वरः स्वीयमात्मीय तमसोऽभ्युदयत्वात् शिवस्तु तमः प्रगुणः अत एव अवसर प्रस्ताव समं विभाव्य विलोक्य ज्ञात्वा वा । उत्प्रेक्ष्यते—जगद्विश्व जिघत्सु खादितुमिच्छु. भूच्छाय निबिडतमतमिस्रमेव काय' शरीर यस्यास्तादृशीं मायाम् । शाम्बरीकपटविद्यामित्यर्थ' । सृजतीव करोतीव । किं कृत्वा । जगत्साक्षिण शुभाशुभकर्मैकतॄणा जगज्जनाना प्रतिभुवं भास्कर क्वचित्कुत्रापि दृग्गोचरप्रदेशे यातम् एक्ष्य विभाव्य ॥

पशोरिवोर्वादिवगोचरस्य ध्वान्तस्य भोः पश्यत मन्दिमानम् ।
निहन्यमानोऽपि मुहुः करेण चण्डद्युता धावति रोदसोर्यत् ॥४९॥

भो लोकाः पण्डिता , यूय पशोरिरश्च इव छागस्येव वा ध्वान्तस्य निशान्धकारस्य मन्दिमान मूढता मूर्खतामज्ञानता पश्यत विलोकयत । 'अथोदगाति निदाघे ग[illegible] नवे रवेः । कोककोकनदानन्दिमन्दिमानमगान्महः ॥' इति वस्तुपाल[illegible] सूर्यास्तमनवर्णने । किंभूतस्य । उर्व्यादिवगोचरस्य [illegible] पशोरपि भूमौ वर्तमानत्वेनाधःस्थाने चरणगोचरो यस्य । यद्यस्मात्कारणात् चण्डद्युता [illegible] निर्घृणस्य । दोषादर्शीभूतेनेत्यर्थः । तादृशेन पुनः करेण किरणेन [illegible] [illegible] करेणादिक्रदाविनाशिना मुहुर्वारंवार निहन्यमान [illegible] [illegible] [illegible] रोदसोर्द्यावापृथिव्योर्मध्ये पुन पुनः धावति । [illegible] [illegible] ॥

प्रेम्णा याचनया वा । 'प्रणयः प्रेमयाच्ञयोः । विस्रम्भे प्रसरे चापि' इत्यनेकार्थः । स्वावसथ निजनिकेतन समीपेऽपि सम्यग्भोगागकलिते सम्प्राप्ते पत्यौ भर्तरि सुरेन्द्रे निर्जरनायके सति । अथ वा शक्रे स्नेहेन स्वगृहे समागते सति ॥ इति चन्द्रोदयः ॥

पूर्वाद्रिमौलेरथ मन्दमन्दं प्रचक्रमे गन्तुमचण्डरोचिः ।
निजोदयश्रीनवनृत्तसूत्रधारापराद्रिं मिलितुं किमुत्कः ॥ ७७ ॥

अथाभ्युदयानन्तरं न विद्यन्ते चण्डानि तीक्ष्णानि रोचींषि यस्य स अचण्डरोचिः शीतकान्तिश्चन्द्र पूर्वाद्रिमौलेरुदयाचलचूलातः मन्दमन्द शनै शनै । 'गगनमवजगाहे मन्दमन्द मृगाङ्कः' इति चम्पूकथायाम् । तथा—'मन्द मन्द नुदति पवनश्चातकस्तोयगृध्नुः' इति मेघदूतेऽपि दृश्यते । गन्तु प्रचलितु प्रचक्रमे प्रारब्धवान् । 'प्रचक्रमे वक्तुमनुक्रमज्ञा सविस्तर वाक्यमिद सुनन्दा' इति रघुवंशे । उत्प्रेक्ष्यते—निजस्यात्मनः उदयश्रिया अभ्युद्गमनलक्ष्म्या नव नवीन यन्नृत्त ताण्डव नाटक तत्र तस्य वा सूत्रधार नृत्यकलाचार्यम् । नाटकप्रारम्भकमित्यर्थः । तादृशमपराद्रि पश्चिमाचलम् । अस्ताद्रिमित्यर्थः । मिलितुमुत्क किमु उत्कण्ठित इव । चन्द्रस्य हि प्रतिपद्द्वितीययोः पश्चिमाचलादेवाभ्युदय. । तस्मादस्ताचल एव चन्द्रस्योदयाचल । 'उदयगिरिकुरङ्गीशृङ्गकण्डूयनेन स्वपिति सुखमिदानीमन्तरोदो·कुरङ्गः' । पुन· 'परिणतरविगर्भव्याकुला पौरहूती दिगपि घनकपोतीहुङ्कृते क्रन्दतीव' इत्युदयनाचार्यकालिदासकवीन्द्रयोः प्रातर्वर्णने पृथक्पृथक् पदद्वये ॥

स्वर्भाणुभीतेः शरणीकृतेन प्राचीधवेनाप्युपेक्षितः सन् ।
त्रस्यञ्छशाङ्कः किमु पश्चिमाशापतेः शरण्यस्य समेत्युपान्ते ॥ ७८ ॥

त्रस्यन् रिपोः सकाशात्त्रासमाकस्मिक भय सम्प्राप्नुवन् अय गगनावगाही शशाङ्कश्चन्द्रः । उत्प्रेक्ष्यते—शरण्यस्य शरणागतवत्सलस्य पश्चिमाशापतेः पश्चिमदिक्पालकस्य वरुणस्योपान्ते समीपे किमु समेति समागच्छतीव । किंभूतः सन् । स्वर्भाणुभीतेः निजस्यात्यन्तप्रत्यर्थितया गिलनशीलस्य विधुतुदस्य भीतेर्भयात् शरणीकृतेन आगत्याश्रितेन प्राचीधवेन पूर्वदिक्पतिना वज्रपाणिनाप्युपेक्षित· अकृतममत्व सन् न स्वशरणे रक्षित इत्यर्थः ॥

प्राचीपयोराशिपय·प्लवान्तर्विलासमाधाय मरालबालः ।
क्रीडां चिकीर्षु· किमु पश्चिमाब्धौ नभोध्वनासौ प्रचचाल चन्द्र ७९

असौ प्रत्यक्षलक्ष्य वर्णनगोचरीभूतमारभ्यो या चन्द्र [illegible] नभोध्वना गगनमार्गेण प्रचचाल चलति स्म । उत्प्रेक्ष्यते—पश्चिमाब्धौ प्रतीचीसमुद्रनीरपूरे क्रीडा जलकेलिविलास चिकीर्षु कर्तुमिच्छुर्मरालबाल· [illegible] किमु प्रचलति । किं कृत्वा । प्राचीपयोराशेः पूर्वसमुद्रस्य पय·प्लवान्तः पानीयपूरमध्ये विलास मज्जनोन्मज्जन-

उत्तूडलेन कौतुकेनाकान्तनाकुलित [illegible] वर्तुलना इव ॥

तेपे तपो भूरगहुरान्तरलक्ष्यासनाम्भः [illegible]

[illegible]

[illegible]

ज्योत्स्नातनूश्चन्द्रिकाकाया पीयूषसततिरमृतराजी । उत्प्रेक्ष्यते—इति विचिन्तयन्ती सती अचलायास्तटे मण्डले अवततार उत्तीर्णेव । इति किम् । यथेत्यध्याहारः । यथाहं स्वर्गे देवलोके गता सप्राप्ता सती क्रतुभुजां यज्ञाशभोजिनां देवानां तृप्त्यै सौहित्याय बुभुक्षोपशमाय प्रभवामि समर्था स्यां तद्वत्तथा धरामधिगत्य पृथिवीं सप्राप्य मनुष्याणामप्यत्राशनानां नित्यं सदा तृप्तिकृते समर्था भवामि ॥

प्रससार महीविहायसोर्मिहिकादीधितिदीधितिव्रजः ।
युवतेरिव शीतदीधितेरुपसंव्यानममेचकद्युति ॥ ८४ ॥

मिहिकादीधितेर्हिमकिरणस्य विधोः । 'प्रालेयं मिहिका हिमम् । स्यान्नीहारस्तुषारश्च' इति हैम्याम् । दीधितीनां कान्तीनां व्रजो निकरः महीविहायसोर्भूमीनभसोः प्रससार विस्तरति स्म । द्यावापृथिव्योः समकालं विस्तारं प्राप्त इत्यर्थः । उत्प्रेक्ष्यते—शीतदीधितेश्चन्द्रस्य युवतेस्तरुण्या यामिन्या अमेचकाः श्वेता न मेचका अमेचका उज्ज्वला द्युतिः कान्तिर्यस्य । 'या कुन्देन्दुतुषारहारधवला या श्वेतपद्मासना या वीणावरदण्डमण्डितकरा या शुभ्रवस्त्रावृता' इति विशेषणाद्वाग्देवतावसनवद्विशदमुपसंव्यानं परिधानवस्त्रमिव । 'गुणशब्दो विरोध्यर्थं नञादिरितरोत्तरः । अभिधत्ते यथा कृष्णं स्यादसितः सितेतरः ॥' इति हैम्याम् ॥

वारिराशिरशनाविहायसोः कौमुदीभिरुदरं स्म पूर्यते ।
अन्धकाररिपुनिर्जयोद्भवत्कीर्तिभिः किमु कुमुद्वतीपतेः ॥ ८५ ॥

कौमुदीभिश्चन्द्रिकाभिर्वारिराशिः समुद्रः स एव रशना मेखला यस्याः एतावता स[मु]द्रा मेदिनी । मेखला तु शरीरान्तरेऽवस्थायिनी न पृथग्भवतीति । अतः समुद्रसहिता महीति सकेतम्(?) । तथा विहायः आकाशं तयोरुदरं मध्यं पूर्यते स्म पूर्णीक्रियते स्म । व्याप्तमित्यर्थः । उत्प्रेक्ष्यते—कुमुद्वतीपतेः कैरविणीकान्तस्य विधोः अन्धकार एव रिपुर्ध्वान्तशत्रुः । अथ वा रिपुः सूर्यः । 'मित्रो ध्वान्तारातिरब्जाशुः' इति हैमीवचनात् । चन्द्रोदये भानुरस्तमीयते । सूर्यः स्वोदये च चान्द्रमसीं सर्वामपि विभूतिमादत्ते इति परस्परशत्रुतापि । तस्य ध्वान्तस्य सूर्यस्य वा निर्जयात्पराभवादुद्भवन्तीभिः प्रकटाभिर्जायमानाभिः कीर्तिभिः किमु समाशाभिरिव दिवस्पृथिव्यौ व्याप्ते ॥

भूमीनभोमण्डलमेदुरश्रीर्ज्योत्स्नावपुर्विष्णुपदीप्रवाहे ।
नक्तंदिनं जह्नुपदप्रसत्ते प्राकाम्यरूपा किमवापि सिद्धिः ॥ ८६ ॥

भूमी पृथिवीपीठं नभोमण्डलं गगनस्थलं तयोर्विषये मेदुरा उपचयप्राचुर्यं प्राप्ता श्रीर्लक्ष्मीः शोभा वा यस्यास्तादृशी ज्योत्स्ना कौमुदी सैव वपुर्गात्रयष्टिर्यस्यास्तादृश्या विष्णुपद्या गङ्गायाः प्रवाहे प्रसरत्पयःपूरे नक्तंदिनं रात्रौ दिवा च जह्नोर्नारायणस्य पदमाकाशं चरणश्च तस्य प्रसत्ते प्रसादनतः । 'प्रसादनं प्रसत्तिः' इति व्युत्पत्त्या सेव-

अथो दधे चण्डकरे प्रयाते प्राच्या मुखे किंचन पाण्डिमश्रीः ।
सितं प्रमोदादिव सौम्यराजोदयं प्रकृत्येव दिशां समीक्ष्य ॥ ९६ ॥

अथो संध्यारागान्धकारतारकाभ्युदयानन्तरं चण्डकरे उग्रदण्डे नृपे सूर्ये प्रयाते अस्तमिते सति प्राच्या पूर्वदिशा किंचन किमपि मुखे स्ववदने पाण्डिमश्रीरुज्ज्वलतायाः शोभा दधे धृता । प्राच्यां दिशि धवलिमा प्रादुर्भवति स्म । उत्प्रेक्ष्यते—सौम्यराजो- दयं सोमतासंयुक्तस्य राज्ञश्चन्द्रस्य भूवल्लभस्य च उदयमुद्गमनं पैतृकपदप्राप्तिलक्षणाभ्यु- दयं समीक्ष्य विलोक्य प्रकृत्येव प्रजयेव नगरलोकेनेव । 'राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च' इति हैम्याम् । दिशा पूर्वहरिता प्रमोदात्स्वाभिमतराजप्राप्तिजनितहर्षा- विर्भावात्स्मितं हसितमिव ॥

संसृज्य रज्यद्दयितेन पत्नी हरेर्हरित्तारविभूषणश्रीः ।
गर्भं वहन्ती मिहिकामयूखं मुखेऽपुषत्पाण्डुरिमाणमूहे ॥ ९७ ॥

हरेरिन्द्रस्य पत्नी कान्ता हरित् दिक् एतावता पूर्वदिक् मुखे निजास्ये पाण्डुरिमाणं धवलतामपुषत् पुपोष अतीव पाण्डुरवदना संजातवती । 'निजमुखमितः स्मेरं धत्ते हरेर्महिषी हरित्' इति नैषधे । तत्राहमेवमूहे तर्कयामि । 'ऊह वितर्के' इत्यय धातुः । मिहिकामयूखं हिमकरं चन्द्रं तमेव गर्भं भ्रूणं दोहदलक्षणं वहन्ती सती दधानेव । किं कृत्वा । रज्यता अनुरक्तीभवता । 'रज्यन्नखस्याङ्गुलिपञ्चकस्य' इति नैषधे । दयितेन प्राणप्रि- येण पुरंदरेण साकं समं संसृज्य सङ्गं कृत्वा । 'निर्वापयिष्यन्निव संसिसृक्षोः' इति नैषधे । 'सङ्गं कर्तुमिच्छोः' इति तद्वृत्तिः । किंभूता हरित् । ताराणां निर्मलमौक्तिकानाम् । 'तारो निर्मलमौक्तिके' इत्यनेकार्थः । ताराणां राजतीयानां वा ताराणां शुभ्राणां वा तारकरूपाणां वा विभूषणानामाभरणानां श्रीः शोभा यस्याः । 'प्रथममुपहृत्यार्घं तारैरखण्डिततन्दुलैः' इति नैषधे । तारकवाची तारशब्दः । अपरस्तद्वत् । अपरापि युवती राज्ञ्यं निजवल्लभेन समं सगमनाद्गुर्विणी सती स्ववदने विशदिमानं दधातीति रीतिः स्थितिश्च ॥

आकण्ठमम्भःसु निमज्य काममन्त्रोऽलिशब्दैः कुमुदैरसाधि ।
विकाशलक्ष्मीं ददती किमेषा तत्सिद्धिरिन्दुद्युतिराविरासीत् ॥ ९८ ॥

कुमुदैः कैरवैश्चन्द्रविकाशिकमलैः आकण्ठं गलकन्दलं मर्यादीकृत्य अम्भःसु पानीयेषु निमज्य ब्रुडित्वा अलिशब्दैर्मधुकरमधुरगुञ्जारवैः कृत्वा काममन्त्रो मानसमनोभिलषितप्रदा- यिनी विद्या असाधि साधितं पाराद्धः । उत्प्रेक्ष्यते—एषा प्रत्यक्षलक्ष्या इन्दुद्युतिश्चन्द्र- चन्द्रिकारूपा तत्साधकस्याभीष्टविधायकमन्त्रस्य सिद्धिः फलनिष्पत्तिराविरासीत् प्र- कटीभूतेव । तत्सिद्धिः किं कुर्वती । एषा कुमुदानां विकाशलक्ष्मीं शोभां वि- भ्राणयन्ती ॥

गङ्गावज्जलजन्मबन्धुतनया स्वःकुम्भिवत्कुञ्जरो
नीरं क्षीरवदुत्पलं कुमुदवत्कादम्बवद्वायसः ।
वल्ली मौक्तिकहारवन्मरकतश्रेणीशशाङ्काश्मव-
ल्लक्ष्मीं काचिदमी दधुः सितरुचौ चन्द्रातपं चिन्वति ॥९०॥

सितरुचौ शारदीने चन्द्रे चन्द्रातप चन्द्रगोलिका चिन्वति पुष्णति उपचय प्रापयति सति । विस्तारयतीत्यर्थः । अमी अत्रैव वृत्ते प्रकाश्यमाना यमुनादय पदार्थाः काचिदन्न्या लक्ष्मीं शोभा दधुर्बिभ्रति स्म । तानेव दर्शयति कविः—जलजन्मनां कमलाना बन्धुः सूर्य तस्य तनया पुत्री यमुना । 'यमुना यमभगिनी कालिन्दी सूर्यजा यमी' इति हैम्याम् । गङ्गावल्लक्ष्मीं धत्ते । चन्द्रिकया शुचीभवत्पय प्रवाहत्वेन गङ्गासाम्यमापेत्यर्थः । तथा कुञ्जरो गज. । जातावेकवचन सर्वत्रापि योज्यम् । समस्ता अपि हस्तिनः स्व.कुम्भिवत् ऐरावणगजवद्विभव बिभ्रति स्म । नीर समग्रमपि जल क्षीरवद्दुग्धमिव । तथा उत्पल कुवलयनीलकमलमण्डल कुमुदवत्कैरवमिव श्वेतारविन्दमिव । तथा वायसः काल. सर्वेऽपि बलिभुज. कादम्बवत्कलहसा इव । तथा मरकताना गारुत्मताना नीलमणीना श्रेणी माला शशाङ्काश्मवच्चन्द्रकान्तरत्नपङ्क्तिरिव । तथा वल्ली समग्रलतावितान मौक्तिकहारवन्मुक्ताफलकलाप इव शोभा बभार ॥

स्मेरत्कैरवशङ्कया कुवलयान्युत्तंसयत्यङ्गना
भृङ्गान्मालिकबालिकाः सुमधिया गृह्णन्ति केलीवने ।
मुक्ताभ्रान्तिभृत. किरातवनिताश्चिन्वन्ति गुञ्जाव्रजां-
श्चञ्चच्चन्द्रमसो भ्रमं वितनुते नो कस्य चन्द्रातपः ॥ ९१ ॥

चञ्चतो गगनमण्डले निखिलकलाकलापकलनदीप्यमानस्य चन्द्रमस. सुधादीधितेः चन्द्रातप प्रतिहरित्प्रसृत्वरसान्द्रचन्द्रिका कस्य पुस स्त्रीगणस्य वा भ्रम भ्रान्ति नो वितनुते चिनुते । अपि तु सर्वस्यापि करोतीत्यर्थः । तमेव प्रदर्शयति—अङ्गना मुग्धकामिन्यः स्मेरता विकसताम् । 'स्मेरदम्भोरुहारामपवमाननिवानिलः' इति पाण्डवचरित्रे स्मेरद्विकाशनार्थे दृश्यते । कैरवाणा श्वेतकमलाना शङ्कया भ्रमेण कुवलयानि नीलोत्पलानि उत्तसयन्ति अवतसानि कुर्वन्ति । शिरसि श्रवणयोर्वा अवतसनिर्माणस्थानद्वन्द्वमिद दृश्यते शास्त्रादौ यथा । 'आपीडशेखरोत्तसावतसा शिरस स्रजि' इति हैम्याम् । तथा 'विलोचनाभ्यामतिमात्रपीडितेऽवतसनीलाम्बुरुहद्वयी खलु । तयो प्रतिद्वन्द्वितयाधिः रोपयावभूवतुर्भीमसुताश्रुती ततः ॥' इति नैषधे । पुनर्मालिकाना मालाकारकाणा बालिका- कुमार्य । अथ वा बाला एव बालिका स्त्रिय । केलीवने क्रीडाकानने खेषा परेषा राजादीनां वा । 'नित्योद्द्योतपद समस्तकमला केलीगृहे राजते' इति श्रीचिन्तामणिपार्श्वनाथस्तोत्रे केलीशब्दो दीर्घोऽप्यस्ति । सुमधिया पुष्पबुद्ध्या भृङ्गान् भ्रमरान् गृह्णन्ति । पुनर्मुक्ताना

दिक्पद्मनयनायै मरन्दार्थं मकरन्दपानकृते लीना अन्तर्निश्चलीभूता अलयो भ्रमरा यत्र तादृक् स्मितपुण्डरीकं विस्मेरश्वेतकमलं किं समर्प्यते स्म विश्राणितं दत्तमिव॥

पितामहस्य व्रतिराट्चरित्रैश्चित्रीयमाणस्य विधूतमौलेः।
कमण्डलुश्चान्द्र इवोत्पलाङ्कः स्रस्तः शयादुल्लसति स्म सोमः॥ ७३॥

सोमश्चन्द्र उल्लसति स्म उल्लासं दशदिक्षु ज्योतिःप्रसारमातनुते स्म शोभते स्म वा। कवेरपरवर्णनराभस्येन मा ग्रन्थनायको विस्मृतोऽभूदिति। तमेव स्मारयति इति सर्वत्रापि योजनीयम्। उत्प्रेक्ष्यते—व्रतिराजः श्रीहीरविजयसूरिपुरंदरस्य चरित्रैः सर्वातिशायिभिरवदातैश्चित्रीयमाणस्य अनन्यसामान्यविस्मयरसं दधानस्य अत एव विस्मयातिरेकाद्विधूतः कम्पितो मौलिर्मस्तकं येन तादृगस्य पितामहस्य वृद्धस्य विधातुः शयात्पाणिपद्मात्स्रस्तः कथंचित्पतितः अत्याश्चर्यरमवशाच्चित्तवैयग्र्येण पाणिपङ्कजाद्गलितः। तथा उत्पलाङ्कः कुवलयकलितः तथा चान्द्रश्चन्द्रकान्तमणिमयः कमण्डलुरिव कुण्डिकाख्यं जलपानपात्रमिव। 'कुण्डिका तु कमण्डलुः' इति हैम्याम्॥

पीयूषपूर्णः कलधौतक्लृप्तोऽभिषेककुम्भः किमु कौमुदीशः।
शृङ्गारयोनिं जगदाधिपत्येऽभिषिञ्चता विश्वकृता व्यधायि॥ ७४॥

शृङ्गारयोनिं श्रीनन्दनम्। 'मनःशृङ्गारसंकल्पात्मनो योनिः' इति हैम्यां स्मरनामसु। जगदाधिपत्ये सर्वेषां भुवनानां राज्ये नक्तं स्मरस्यैश्वर्यादभिषिञ्चता अभिषेकं कुर्वाणेन विश्वकृता जगत्सृष्टिकारकेण विधिना। उत्प्रेक्ष्यते—कौमुदीशः चन्द्रिकापतिः शीतकान्तिरूपः पीयूषेणामृतरसेन पूर्णो भरितः। तथा कलधौतैः रजतैः क्लृप्तो विनिर्मितो घटितः अभिषेककुम्भः अभिषेककरणकृते कलशः किमु व्यधायि विनिर्मित इव॥

क्षयात्सुधायाश्चिरकालपानात्तां याचमानाननुगृह्य देवान्।
सुधारुचिर्विश्वसृजा सुधाया अक्षीणकुम्भः किमु कल्प्यते स्म॥ ७५॥

विश्वसृजा त्रिभुवनसर्वसृष्टिविधायिना वेधसा सुधारुचिश्चन्द्रः। उत्प्रेक्ष्यते—सुधाया अमृतरसस्य न कदाचिदपि क्षीयत इत्यक्षीणः अक्षयकुम्भश्चन्द्रकान्तमणिमयः कलशः किमु कल्प्यते स्म विनिर्मितो घटित इव। किं कृत्वा। चिरकालं बहुसमयं यावत्पानात्पीतेः सुधायाः पूर्वपीयूषस्य क्षयान्नाशात् तां पुनः सुधां याचमानानभ्यर्थयमानान्मार्गयतो देवाननुगृह्य सर्वेषां सुराणामुपरि पीयूषपायित्वेन अनुग्रहं कृत्वा॥

प्राग्दिङ्मृगाक्ष्या प्रणयेन पत्यौ समीयुषि स्वावसथं सुरेन्द्रे।
उद्बोधितो भेत्तुमिवान्धकारं निशीथिनीनायकदीप्रदीपः॥ ७६॥

प्राग्दिङ्मृगाक्ष्या पूर्वहरिन्नामहरिणनयनया रात्रित्वादन्धकारं भेत्तुं निराकर्तुम्। उत्प्रेक्ष्यते—निशीथिनीनायकः शर्वरीवरयिता चन्द्र एव दीप्रो दीपनशीलः प्रसरज्ज्योतिर्जटिलो दीपो मन्दिरमणिरुद्बोधितः प्रकटीकृत इव। कस्मिन्सति। प्रणयेन

गङ्गावज्जलजन्मबन्धुतनया स्व·कुम्भिवत्कुञ्जरो
नीरं क्षीरवदुत्पलं कुमुदवत्कादम्बवद्वायसः ।
वल्ली मौक्तिकहारवन्मरकतश्रेणीशशाङ्काश्मव-
ल्लक्ष्मीं काचिदमी दधुः सितरुचौ चन्द्रातपं चिन्वति ॥९०॥

सितरुचौ शारदीने चन्द्रे चन्द्रातप चन्द्रगोलिका चिन्वति पुष्णाति उपचय प्रापयति सति । विस्तारयतीत्यर्थ. । अमी अत्रैव वृत्ते प्रकाश्यमाना यमुनादय· पदार्थाः काचिदनन्या लक्ष्मी शोभा दधुर्बिभ्रति स्म । तानेव दर्शयति कविः—जलजन्मना कमलाना बन्धु· सूर्यः तस्य तनया पुत्री यमुना । 'यमुना यमभगिनी कालिन्दी सूर्यजा यमी' इति हैम्याम् । गङ्गावल्लक्ष्मीं धत्ते । चन्द्रिकया शुचीभवत्पयःप्रवाहत्वेन गङ्गासाम्यमापेत्यर्थः । तथा कुञ्जरो गज. । जातावेकवचन सर्वत्रापि योज्यम् । समस्ता अपि हस्तिनः स्व कुम्भिवत् ऐरावणगजवच्छुभ्रत्व बिभ्रति स्म । नीर समग्रमपि जल क्षीरवद्दुग्धमिव । तथा उत्पल कुवलयनीलकमलमण्डल कुमुदवत्कैरवमिव श्वेतारविन्दमिव । तथा वायसः काकः सर्वेऽपि बलिभुज. कादम्बवत्कलहसा इव । तथा मरकताना गारुत्मतानां नीलमणीनां श्रेणी माला शशाङ्काश्मवच्चन्द्रकान्तरत्नपङ्क्तिरिव । तथा वल्ली समग्रलतावितान मौक्तिकहारवन्मुक्ताफलकलाप इव शोभा बभार ॥

स्मेरत्कैरवशङ्कया कुवलयान्युत्तंसयन्त्यङ्गना
भृङ्गान्मालिकबालिकाः सुमधिया गृह्णन्ति केलीवने ।
मुक्ताभ्रान्तिभृतः किरातवनिताश्चिन्वन्ति गुञ्जाव्रजां-
श्चञ्चच्चन्द्रमसो भ्रमं वितनुते नो कस्य चन्द्रातपः ॥ ९१ ॥

चञ्चतो गगनमण्डले निखिलकलाकलापकलनदीप्यमानस्य चन्द्रमसः सुधादीधितेः चन्द्रातप प्रतिहरित्प्रसृत्वरसान्द्रचन्द्रिका कस्य पुस स्त्रीगणस्य वा भ्रम भ्रान्तिं नो वितनुते चिनुते । अपि तु सर्वस्यापि करोतीत्यर्थः । तमेव प्रदर्शयति—अङ्गना मुग्धकामिन्यः स्मेरता विकसताम् । 'स्मेरदम्भोरुहारामपवमानमिवानिलः' इति पाण्डवचरित्रे स्मेरद्विकाशनार्थे दृश्यते । कैरवाणा श्वेतकमलाना शङ्कया भ्रमेण कुवलयानि नीलोत्पलानि उत्तसयन्ति अवतसानि कुर्वन्ति । शिरसि श्रवणयोर्वा अवतसनिर्माणस्थानद्वन्द्वमिद दृश्यते शास्त्रादौ यथा । 'आपीडशेखरोत्तसावतसा· शिरस· स्रजि' इति हैम्याम् । तथा 'विलोचनाभ्यामतिमात्रपीडितेऽवतसनीलाम्बुरुहद्वयीं खलु । तयोः प्रतिद्वन्द्वितयाधिः रोपयावभूवतुर्भीमसुताश्रुती ततः ॥' इति नैषधे । पुनर्मालिकाना मालाकारकाणा बालिकाकुमार्य· । अथ वा बाला एव बालिका स्त्रिय· । केलीवने क्रीडाकानने स्वेषा परेषा राजादीनां वा । 'नित्योद्द्योतपद समस्तकमला केलीगृहे राजते' इति श्रीचिन्तामणिपार्श्वनाथस्तोत्रे केलीशब्दो दीर्घोऽप्यस्ति । सुमधिया पुष्पबुद्ध्या भृङ्गान् भ्रमरान् गृह्णन्ति । पुनर्मुक्ताना

नरगतामरतो ... ओजाना ... कृता। समुद्रे हसाना सद्भावो दृश्यते। तदुक्तम्—'हसान्महेन(?) पद्मरेणुकपिशक्षीरार्णवाम्भोभृते' इति ख्यातस्य सुतो॥

संचारि निर्दण्डमिवातपत्रं विहस्तको वा चलदात्मदर्शः।

क्रीडातडागं किमु तद्गमो वा स्मरावनीन्द्रो शशभृद्बभासे॥ ८०॥

शशभृच्चन्द्रो बभासे गगने स्म। उत्प्रेक्ष्यते—स्मरावनीन्दो' मेदिनीकुमुदसुहृदः कामराजस्य संचारि दिव्यानुभावेन स्वयं संचरणशील तथा निर्गतो दण्डो यस्मात्तन्निर्दण्डमवष्टम्भयष्ट्या रहितमातपत्रं सितातपवारणमिव वाथ वा। पुनरुत्प्रेक्ष्यते—स्मरनरपतेर्विहस्तको हस्तग्रहणोचितस्थाणुनिर्मुक्त चलन स्वयमेव प्रतिष्ठमान आत्मदर्श' दर्पण इव वा। पुनरुत्प्रेक्ष्यते—कन्दर्पपार्थिवस्य जङ्गम कथचन देवतानुभावाद्भ्रमणरसिकक्रीडातडाको लीलासरोवरमिव॥ इति चन्द्रमण्डलसचार॥

भीतेः स्विकाया दिवसस्य लक्ष्मीं विज्ञाय नष्टामिह जीवनाशम्।

विद्मो वसत्या हसितं हसन्त्या ज्योत्स्ना जजृम्भे गगने सुधांशोः॥८१॥

सुधांशोश्चन्द्रस्य मनागित्यध्याहार्यं ततः किंचित् ज्योत्स्ना चन्द्रिका जजृम्भे प्रकटीभूता विस्तृता वा। इहात्र ज्योत्स्नाविजृम्भणे वयमेव विद्मो जानीमः। विचारयाम इत्यर्थः। इह जीवलोके स्विकाया स्वस्या राञ्या' सकाशात्। 'हस तनौ संनिहित वरन्त मुनेर्मनोवृत्तिरिव स्विकायाम्' इति नैषधे। भीतेर्भयाज्जीवनाशं नष्टा जीवं गृहीत्वा प्रपलाय्य गता दिवसस्य वासरस्य लक्ष्मीं श्रियं विज्ञाय ज्ञात्वा अवधार्य हसन्त्या स्वोत्कर्षेण हास्यं सृजन्त्या वसत्या निशाया हसितं स्मितं हास्यमिव॥

अम्बरे विरुरुचे सुधारुचेश्चन्द्रचञ्चुरमरीचिसचयः।

दुग्धवारिनिधिरात्मजं विधुं किं चिराय मिलितुं समीयिवान्॥८२॥

अम्बरे आकाशमण्डले सुधारुचेरमृतकिरणस्य चन्द्रस्य चन्द्रवत्कर्पूर इव चञ्चुरो मनोज्ञः। धवल इत्यर्थः। 'चन्द्रोऽम्बुकाम्ययोः। स्वर्णे सुधांशौ कर्पूरे कम्पिल्ले मेचकेऽपि च॥' इत्यनेकार्थः। मरीचीनां कान्तीनां संचयो निकरो विरुरुचे विरोचते स्म शुशुभे। 'विरुरुचे-···च्छितभूमिषु' इति रघुवंशे। उत्प्रेक्ष्यते—दुग्धवारिनिधिः क्षीरसमुद्र आत्मजं नन्दनं दुग्धाम्भोनिधावुत्पन्नत्वेन विधुं सुधादीधितिं चिराय बहोः कालात्। 'चिराय चिररात्राय चिरस्य च चिराच्चिरम्' इति हैम्यामव्ययाधिकारे। मिलितुं पुत्रस्नेहेन मिलनाय समीयिवान्किं समागत इव॥ गगने चन्द्रगोलिकाद्यः॥

स्वर्गं गता क्रतुभुजां प्रभवामि तृप्त्यै

तद्वन्नृणामपि धरामधिगत्य नित्यं।

पीयूषसंततिरितीव विचिन्त्य

ज्योत्स्नातनूरवततार

गङ्गावज्जलजन्मबन्धुतनया स्वःकुम्भिवत्कुञ्जरो
नीरं क्षीरवदुत्पलं कुमुदवत्कादम्बवद्वायसः ।
वल्ली मौक्तिकहारवन्मरकतश्रेणीशशाङ्काश्मव-
ल्लक्ष्मीं काचिदमी दधुः सितरुचौ चन्द्रातपं चिन्वति ॥९०॥

सितरुचौ शारदीने चन्द्रे चन्द्रातपं चन्द्रगोलिका चिन्वति पुष्णति उपचयं प्रापयति सति । विस्तारयतीत्यर्थः । अमी अत्रैव वृत्ते प्रकाश्यमाना यमुनादयः पदार्थाः काचिदनन्या लक्ष्मीं शोभां दधुर्बिभ्रति स्म । तानेव दर्शयति कविः—जलजन्मनां कमलानां बन्धुः सूर्यः तस्य तनया पुत्री यमुना । 'यमुना यमभगिनी कालिन्दी सूर्यजा यमी' इति हैम्याम् । गङ्गावल्लक्ष्मीं धत्ते । चन्द्रिकया शुचीभवत्पयःप्रवाहत्वेन गङ्गासाम्यमापेत्यर्थः । तथा कुञ्जरो गजः । जातावेकवचनं सर्वत्रापि योज्यम् । समस्ता अपि हस्तिनः स्वःकुम्भिवत् ऐरावणगजवद्विभवं बिभ्रति स्म । नीरं समग्रमपि जलं क्षीरवद्दुग्धमिव । तथा उत्पलं कुवलयनीलकमलमण्डलं कुमुदवत्कैरवमिव श्वेतारविन्दमिव । तथा वायसः काकोलः सर्वेऽपि बलिभुजः कादम्बवत्कलहंसा इव । तथा मरकतानां गारुत्मतानां नीलमणीनां श्रेणी माला शशाङ्काश्मवच्चन्द्रकान्तरत्नपङ्क्तिरिव । तथा वल्ली समग्रलतावितानं मौक्तिकहारवन्मुक्ताफलकलाप इव शोभां बभार ॥

स्मेरत्कैरवशङ्कया कुवलयान्युत्तंसयत्यङ्गना
भृङ्गान्मालिकबालिकाः सुमधिया गृह्णन्ति केलीवने ।
मुक्ताभ्रान्तिभृतः किरातवनिताश्चिन्वन्ति गुञ्जाव्रजा-
ञ्श्चञ्चच्चन्द्रमसो भ्रमं वितनुते नो कस्य चन्द्रातपः ॥ ९१ ॥

चञ्चतो गगनमण्डले निखिलकलाकलापकलनदीप्यमानस्य चन्द्रमसः सुधादीधितेः चन्द्रातपः प्रतिहरित्प्रसृत्वरसान्द्रचन्द्रिका कस्य पुंसः स्त्रीगणस्य वा भ्रमं भ्रान्तिं नो वितनुते चिनुते । अपि तु सर्वस्यापि करोतीत्यर्थः । तमेव प्रदर्शयति—अङ्गना मुग्धकामिन्यः स्मेरतां विकसताम् । 'स्मेरदम्भोरुहारामपवमानमिवानिलः' इति पाण्डवचरित्रे स्मेरद्विकाशनार्थे दृश्यते । कैरवाणां श्वेतकमलानां शङ्कया भ्रमेण कुवलयानि नीलोत्पलानि उत्तंसयन्ति अवतंसानि कुर्वन्ति । शिरसि श्रवणयोर्वा अवतंसनिर्माणस्थानद्वन्द्वमिदं दृश्यते शास्त्रादौ यथा । 'आपीडशेखरोत्तंसावतंसाः शिरसः स्रजि' इति हैम्याम् । तथा 'विलोचनाभ्यामतिमात्रपीडितेऽवतंसनीलाम्बुरुहद्वयीं खलु । तयोः प्रतिद्वन्द्वितयाधिरोपयाबभूवतुर्भीमसुताश्रुती ततः ॥' इति नैषधे । पुनर्मालिकानां मालाकाराणां बालिकाः कुमार्यः । अथ वा बाला एव बालिका स्त्रियः । केलीवने क्रीडाकानने स्वेषां परेषां राजादीनां वा । 'निसोद्द्योतपदं समस्तकमला केलीगृहे राजते' इति श्रीचिन्तामणिपार्श्वनाथस्तोत्रे केलीशब्दो दीर्घोऽप्यस्ति । सुमधिया पुष्पबुद्ध्या भृङ्गान् भ्रमरान् गृह्णन्ति । पुनर्मुक्तानां

नमित्यर्थः । भक्तेः सकाशात्। उत्प्रेक्ष्यते—प्राकाम्यरूपा रोदःकन्दरविस्तरणशीला वहुरूपकारिणी सिद्धिः फलनिष्पत्तिरथापि किं लब्धा सप्राप्तेव ॥

चूर्णैः प्रपूर्णा किमु मौक्तिकानां पीयूषपङ्कैः किमु वा [विलिप्ता।
श्रीखण्डनीरैरथवा]भिषिक्ता ज्योत्स्नाभिरुर्वी धवलीकृताभात्॥ ८७ ॥

ज्योत्स्नाभिः [धवलीकृता] प्रतिदिशं प्रसरचन्द्रसान्द्रचन्द्रिकाभिर्निरन्तरमतिश्वेततां प्रापिता उर्वी समस्तापि वसुमती आ[भात् आ]बभासे । उत्प्रेक्ष्यते—मौक्तिकानां स्थूलमुक्ताफलानां चूर्णैः क्षोदैर्निष्पिष्य सूक्ष्मीकृतरजोभिः प्रपूर्णा प्रकर्षेण (धवलीकृता) पूरिता किमु भरितेव। वा अथवा पीयूषपङ्कैरमृतकर्दमैः स्त्यानीभूतसुधारसैर्विलिप्ता किमु विशेषेण कृतविलेपने च अङ्गरागकलिता कृता । अथ वा श्रीखण्डनीरैः स्थूलघृष्टचन्दनवारिद्रवैरभिषिक्ता किं कृताभिषेकेव ॥

आप्लाविते किं सुरसिन्धुसुभ्रुवः स्रोतःसहस्रैः परितः प्रसृत्वरैः।
कर्पूरपारीविलसद्यशोभरैः सूरीशितुर्वा विशदीकृते इव ॥ ८८ ॥

विलीयमानैस्तुहिनावनीभृन्नीहारचारैर्निभृतं भृते वा।
प्रपूरिते सान्द्रितचन्द्रचन्द्रातपैर्विभातः स्म दिवस्पृथिव्यौ ॥ ८९ ॥

सान्द्रं नीरन्ध्रत्वं सजातमेषामेषु वा इति सान्द्रिता वहलिताश्चन्द्रस्य निशानायकस्य चन्द्रातपाश्चन्द्रगोलिकास्तैः प्रपूरिते प्रकर्षेण पूर्णीकृते। सर्वतोऽपि निर्भरं भरिते व्याप्ते इत्यर्थः । दिवस्पृथिव्यौ द्यावाभूम्यौ विभातः स्म । तत्रोत्प्रेक्ष्यते—परितः सर्वतोऽपि दशदिक्प्रदेशेष्वपि प्रसृत्वरैः प्रसरणशीलैः सुराणां देवानां सिन्धोः समुद्रस्य सुभ्रुवः पत्न्या । 'कर्षुद्वीपवतीसमुद्रदयिताधुन्यौ स्रवन्तीसरस्वत्यौ' इति हैम्याम्। देवनद्या गङ्गायाः स्रोतसां पयःप्रवाहाणां सहस्रैर्दशशतीभिः आप्लाविते किम्। स्वकुक्षिगतीकृते इव निर्भरं भृते इत्यर्थः । वा पुनरुत्प्रेक्ष्यते—सूरीशितुर्हीरविजयसूरीन्द्रस्य। पुनः सूरिनामग्रहणं वहुवहुमानसूचकम् । कर्पूराणां घनसाराणां पार्यः। 'फडसि' इति लोके प्रसिद्धाः। 'पारी पूरपरागयोः। पात्र्यां कर्करिकायां च पादवन्धे च हस्तिनः ॥' इत्यनेकार्थः। 'कर्पूरपारीपरिधूसराङ्गम्' इति तद्वृत्तिः। तथा 'कर्पूरपूरकमनीयशोभिरामम्' इति स्तुत्यादौ । तत्र पूरशब्देन समूह एव । तद्वद्विलसद्भिः शुभ्रिमविभ्रमैः शोभमानैः यशसां भरैः श्लोकानां प्रकरैः। 'श्लोकः कीर्तिर्यशोऽभिख्या समाज्ञा' इति हैम्यां यशोनामानि। विशदीकृते इव। पुनरुत्प्रेक्ष्यते—विलीयमानैर्गलद्भिर्द्रवीभवद्भिः तुहिनावनीभृतो हिमाचलस्य नीहारचारैर्हिमनिवहैर्निभृतं निचितं भृते वा भरिते वा। युग्मम् ॥ इति चन्द्रचन्द्रिकायाः प्रचारः ॥

---

१. 'ज्योत्स्नाभिः' इत्युत्तरमुचितोऽपि 'धवलीकृता' इति पाठः केश्चिदत्र प्रक्षिप्तः.

समस्ता अपि नरा भूचराः पुरुषाः दुग्धाम्भोनिधेः क्षीरनीरधेर्निर्जरा अधिष्ठातृसुरा इव रजन्दिरे । ते हि अतीव शुभ्रवपुर्वसनविभवाः स्युः । अत एव तदुपमानम् । पुनश्च- सन्त्यस्रास प्राभुवस्तो याः कुरङ्ग्यो मृगाङ्गनास्तद्वत्तरलाश्चञ्चला दृशो यासाम् । एतावता वनिताः सर्वा अपि स्व सिन्धोर्गङ्गाया अधिदेवता इव अधिष्ठायिका देवता गङ्गादेव्य इव बभुः शोभन्ते स्म । पुनर्मेदिनी पृथ्वी । उत्प्रेक्ष्यते—स्फारा अनर्घ्या ये स्फाटिकाः स्फटिकमणिसमूहास्तेषु रत्नान्यतीव सारमणयः मुख्यानि वा । यदुक्तम्—'येषां मन्दररत्नशैलशिखरे जन्माभिषेकः कृतः' इति स्नातस्य स्तुतौ । मन्दराणां धातुकीखण्डपुष्करार्धद्वीपसत्कानां चतुर्णां मेरूणां मध्ये रत्न सर्वेभ्य उच्चैस्तरत्वेन लक्षयोजनप्रमाणत्वेन मुख्य इत्येकव्याख्या । तेषां स्फाटिकमणीनां कोट्यस्ताभिः कृत्वा घटितेव निष्पादितेवासीद्बभूव भूमी ॥ इति चन्द्रिकाभ्युदये विविधा भावाः ॥

विजयिन इव राज्ञः श्वेतभासो विभाव्या-
भ्युदयमखिलकाष्ठामध्यराजत्करस्य ।
विहितसकलसंध्यावश्यको ध्यानलीला-
कमलकलमरालः स स्म भूत्सूरिराजः ॥ ९४ ॥

स श्रीहीरविजयनामा सूरीणामाचार्याणां मध्ये दीप्यमानत्वात्प्रतापवत्त्वाद्वा राजा । अथ वा राजा मुख्यः । स ध्यानं सूरिमन्त्रजापरूपप्रणिधानं तदेव लीलाकमलं क्रीडाकरणोचितमरविन्दं तत्र कलमरालः कलहंसः । 'कलमरालविहङ्गमवाहना' इति वाग्देवतास्तोत्रे । प्रकृष्टो राजहंसो वा । स्म भूदजायत । 'स्मयोगेऽप्यटो लोपमिच्छन्ति । स्म भूत्' इति सारस्वतव्याकरणे । स किंलक्षणः । विहितं कृतं सकलं समस्तं सध्यायां दिनावसाने आवश्यकं प्रतिक्रमणादिविधिर्येन । अथ वा निर्मितसंध्यासंबन्धिकमावश्यकमवश्यकर्तव्यं येन । किं कृत्वा । श्वेतभासः सितकान्तेश्चन्द्रस्याभ्युदयं विभाव्य । 'पश्यति विभावयत्यपि विलोकते वीक्षते गवेषयति' इत्यादि क्रियाकलापे विलोकनार्थाः क्रियाः । कस्येव । विजयिनः सर्वत्राप्यप्रतिहतपराक्रमत्वेनानेकराजचक्रजयनशीलस्य राज्ञ इव नृपस्य । किंभूतस्य चन्द्रस्य राज्ञश्च । अखिलानां समग्राणां काष्ठानां दिशां मध्ये राजन्तो दीप्यमानाः कराः किरणा राजदेयाशा यस्य ॥

यं प्रासूत शिवाह्वसाधुमघवा सौभाग्यदेवी पुनः
पुत्रं कोविदसिंहसीहविमलान्तेवासिनामग्रिमम् ।
तद्वाणीक्रमसेविदेवविमलव्यावर्णिते हीरयु-
क्सौभाग्याभिधहीरसूरिरचिते सर्गोऽभवत्सप्तमः ॥ ९५ ॥

---

१. चिन्त्यमिदमिति प्रामाणिकाः.

नमित्यर्थः । भक्तेः सकाशात् । उत्प्रेक्ष्यते—प्राकाम्यरूपा रोदःकन्दरविस्तरणशीला वहुरूपकारिणी सिद्धिं फलनिष्पत्तिरवापि किं लब्धा सम्प्राप्तेव ॥

चूर्णैः प्रपूर्णा किमु मौक्तिकानां पीयूषपङ्कैः किमु वा [विलिप्ता ।
श्रीखण्डनीरैरथवा]भिषिक्ता ज्योत्स्नाभिरुर्वी धवलीकृताभात् ॥ ८७ ॥

ज्योत्स्नाभिः [धवलीकृता] प्रतिदिशं प्रसरच्चन्द्रसान्द्रचन्द्रिकाभिर्निरन्तरमतिश्वेततां प्रापिता उर्वी समस्तापि वसुमती आ[भात् आ]वभासे । उत्प्रेक्ष्यते—मौक्तिकानां स्थूलमुक्ताफलानां चूर्णैः क्षोदैर्निष्पिष्य सूक्ष्मीकृतरजोभिः प्रपूर्णा प्रकर्षेण (धवलीकृता) पूरिता किमु भरितेव । वा अथवा पीयूषपङ्कैरमृतकर्दमैः स्त्यानीभूतसुधारसैर्विलिप्ता किमु विशेषेण कृतविलेपने च अङ्गरागकलिता कृता । अथ वा श्रीखण्डनीरैः स्थूलघृष्टचन्दनवारिद्रवैरभिषिक्ता किं कृताभिषेकेव ॥

आप्लाविते किं सुरसिन्धुसुभ्रुवः स्रोतःसहस्रैः परितः प्रसृत्वरैः ।
कर्पूरपारीविलसद्यशोभरैः सूरीशितुर्वा विशदीकृते इव ॥ ८८ ॥

विलीयमानैस्तुहिनावनीभृन्नीहारचारैर्निभृतं भृते वा ।
प्रपूरिते सान्द्रितचन्द्रचन्द्रातपैर्विभातः स्म दिवस्पृथिव्यौ ॥ ८९ ॥

सान्द्रं नीरन्ध्रत्वं संजातमेषामेषु वा इति सान्द्रिता वहलिताश्चन्द्रस्य निशानायकस्य चन्द्रातपाश्चन्द्रगोलिकास्तैः प्रपूरिते प्रकर्षेण पूर्णीकृते । सर्वतोऽपि निर्भरं भरिते व्याप्ते इत्यर्थः । दिवस्पृथिव्यौ द्यावाभूम्यौ विभातः स्म । तत्रोत्प्रेक्ष्यते—परितः सर्वतोऽपि दशदिक्प्रदेशेष्वपि प्रसृत्वरैः प्रसरणशीलैः सुराणां देवानां सिन्धोः समुद्रस्य सुभ्रुवः पत्न्या । 'कर्षुद्वीपवतीसमुद्रदयिताधुन्यौ स्रवन्तीसरस्वत्यौ' इति हैम्याम् । देवनद्या गङ्गायाः स्रोतसां पयःप्रवाहाणां सहस्रैर्दशशतीभिः आप्लाविते किम् । स्वकुक्षिगतीकृते इव निर्भरं भृते इत्यर्थः । वा पुनरुत्प्रेक्ष्यते—सूरीशितुर्हीरविजयसूरीन्द्रस्य । पुनः सूरिनामग्रहणं वहुवहुमानसूचकम् । कर्पूराणां घनसाराणां पार्यः । 'फडसि' इति लोके प्रसिद्धाः । 'पारी पूरपरागयोः । पात्र्यां कर्करिकायां च पादवन्धे च हस्तिनः ॥' इत्यनेकार्थः । 'कर्पूरपारीपरिधूसराङ्गम्' इति तद्वृत्तिः । तथा 'कर्पूरपूरकमनीयशोभिरामम्' इति स्तुत्यादौ । तत्र पूरशब्देन समूह एव । तद्वद्विलसद्भिः शुभ्रिमविभ्रमैः शोभमानैः यशसां भरैः श्लोकानां प्रकरैः । 'श्लोकः कीर्तिर्यशोऽभिख्या समाज्ञा' इति हैम्यां यशोनामानि । विशदीकृते इव । पुनरुत्प्रेक्ष्यते—विलीयमानैर्गलद्भिर्द्रवीभवद्भिः तुहिनावनीभृतो हिमाचलस्य नीहारचारैर्हिमनिवहैर्निभृतं निचितं भृते वा भरिते वा । युग्मम् ॥ इति चन्द्रचन्द्रिकायाः प्रचारः ॥

---

१. 'ज्योत्स्नाभिः' इत्युत्तरमुचितोऽपि 'धवलीकृता' इति पाठः कैश्चिदत्र प्रक्षिप्तः.

प्रासवती मानसादिजलाशयेभ्यः खैरं विलासरसिकाचितमानसा समागतवती कलहं-साना राजनरालानां मालाधोरणी पङ्क्तिरिव ॥

श्रीसूरिमन्त्रं विजने व्रतीन्द्रो जपन्स गोत्रत्रिदशीमिव स्वाम् ।
दध्यौ हृदा श्रीजिनशासनस्याधिष्ठायिकां निर्जरनीरजाक्षीम् ॥ ४ ॥

विजने एकान्ते अपरजनरहितस्थाने श्रिया सर्वशक्तिलक्ष्म्या युक्तः सूरीणामाचा र्याणां मन्त्रं जपन् ध्यायन् सन् व्रतीन्द्रो हीरविजयसूरिः हृदा मनसा कृत्वा षड्दर्श नेष्वपि सर्वातिशायिन्या श्रिया लक्ष्म्या शोभया वा कलितस्य जिनशासनस्य अधिष्ठ यिकां प्रत्यक्षसांनिध्यविधायिनीं निर्जरनीरजाक्षीं नाकिकमललोचनां देवतां दध्य ध्यायति स्म । कामिव । स्वां स्वकीयां गोत्रत्रिदशीमिव । यथा कश्चित्पुमान्निजां कुल देवतां ध्यानगोचरां कुरुते । 'निपीय त यत्त्रिदशीभिरर्जित.' इति नैषधे । 'गोत्र संतानोऽन्ववायोऽभिजनः कुलम्' इति हैम्याम् ॥ इति सूरेर्ध्यानविधानम् ॥

ध्यानानुभावेन ततो निशीथे सूरीशितुः शासनदेवतायाः ।
केतुर्निकेतस्य रयेण वायोरिव क्षणादासनमाचकम्पे ॥ ५ ॥ ✓

ततो ध्याने जिनशासनाधिष्ठायिकास्मृतिगोचरीकरणानन्तरं सूरीशितुर्हीरविजय रीश्वरस्य ध्यानानुभावेन प्रणिधानमाहात्म्येन शासनदेवताया निशीथेऽर्धरात्रे आस मुपवेशनस्य विष्टरम् । 'विष्टरः पीठमासनम्' इति हैम्याम् । आचकम्पे आ स स्त्येन दोलायमानमासीत्प्रचलति स्म । क इव । केतुरिव । यथा निकेतस्य गृहस्य वैजयन्ती वायोः पवमानस्य रयेण वेगेन कृत्वा कम्पते चञ्चलीभवति ॥

स्वविष्टरं कम्प्रमवेक्ष्य विम्बमिवोत्तरङ्गाम्बुधिविम्बितेन्दोः ।
शोणारविन्दायितमीक्षणेन रोषारुणेन त्रिदशाङ्गनायाः ॥ ६ ॥

त्रिदशाङ्गनाया जिनशासनदेवताया रोषेण कोपेन कृत्वा अरुणेन रक्तीभूतेन णेन लोचनेन । नयनद्वन्द्वेनेत्यर्थः । शोणारविन्दायितं कोकनदमिवाचरितम् । अः मितोमपास्ते । किं कृत्वा । स्वस्यात्मनः स्वमात्मीयं विष्टरं सिंहासनमवेक्ष्य विलो किंभूतं विष्टरम् । कम्प्रं कम्पनशीलं चञ्चलीभूतम् । किमिव । विम्बमिव । यथा गगनचुम्बिनस्तरङ्गाः कल्लोला यस्य एतावता समयस्वभावेन प्रबलपवनवेगप्रवृद्धो ऽम्बुधिः समुद्रस्तत्र विम्बितः रात्रौ जलस्यातिस्वच्छभावेन सङ्क्रान्तः । 'यद्यपि च्छभावेन दर्शयत्यम्बुधिर्मणीन् । तथापि जानुदघ्नोऽयमिति चेतसि मा कृथा' ॥ वचनात् । प्रतिविम्बितो य इन्दुश्चन्द्रस्तस्य विम्बं प्रतिमाभावं प्राप्तं मण्डलं अतिशयेन कम्पनशीलं स्यात् ॥

ध्यानस्थितं शासनदेवता सा निपीय तं ज्ञानदृशा वशीन्द्रम् ।
मुदं दधारामृतकुण्डमध्यप्रणीतलीलाप्लवनेव चित्ते ॥ ७ ॥ ✓

नमित्यर्थः । भक्तेः सकाशात् । उत्प्रेक्ष्यते—प्राकाम्यरूपा रोदःकन्दरविस्तरणशीला बहुरूपकारिणी सिद्धिः फलनिष्पत्तिरवापि किं लब्धा सम्प्राप्तेव ॥

चूर्णैः प्रपूर्णा किमु मौक्तिकानां पीयूषपङ्कैः किमु वा [विलिप्ता ।
श्रीखण्डनीरैरथवा]भिषिक्ता ज्योत्स्नाभिरुर्वी धवलीकृताभात्॥ ८७ ॥

ज्योत्स्नाभिः [धवलीकृता] प्रतिदिशं प्रसरच्चन्द्रसान्द्रचन्द्रिकाभिर्निरन्तरमतिश्वेततां प्रापिता उर्वी समस्तापि वसुमती आ[भात् आ]बभासे । उत्प्रेक्ष्यते—मौक्तिकानां स्थूलमुक्ताफलानां चूर्णैः क्षोदैर्निष्पिष्य सूक्ष्मीकृतरजोभिः प्रपूर्णा प्रकर्षेण (धवलीकृता) पूरिता किमु भरितेव । वा अथवा पीयूषपङ्कैरमृतकर्दमैः स्त्यानीभूतसुधारसैर्विलिप्ता किमु विशेषेण कृतविलेपने च अङ्गरागकलिता कृता । अथ वा श्रीखण्डनीरैः स्थूलघृष्टचन्दनवारिद्रवैरभिषिक्ता किं कृताभिषेकेव ॥

आप्लाविते किं सुरसिन्धुसुभ्रुवः स्रोतःसहस्रैः परितः प्रसृत्वरैः ।
कर्पूरपारीविलसद्यशोभरैः सूरीशितुर्वा विशदीकृते इव ॥ ८८ ॥

विलीयमानैस्तुहिनावनीभृन्नीहारचारैर्निभृतं भृते वा ।
प्रपूरिते सान्द्रितचन्द्रचन्द्रातपैर्विभातः स्म दिवस्पृथिव्यौ ॥ ८९ ॥

सान्द्रं नीरन्ध्रत्वं सजातमेषामेषु वा इति सान्द्रिता बहलिताश्चन्द्रस्य निशानायकस्य चन्द्रातपाश्चन्द्रगोलिकास्तैः प्रपूरिते प्रकर्षेण पूर्णीकृते । सर्वतोऽपि निर्भरं भरिते व्याप्ते इत्यर्थः । दिवस्पृथिव्यौ द्यावाभूम्यौ विभातः स्म । तत्रोत्प्रेक्ष्यते—परितः सर्वतोऽपि दशदिक्प्रदेशेष्वपि प्रसृत्वरैः प्रसरणशीलैः सुराणां देवानां सिन्धोः समुद्रस्य सुभ्रुवः पत्न्या । 'कर्षुद्वीपवतीसमुद्रदयिताधुन्यौ स्रवन्तीसरस्वत्यौ' इति हैम्याम् । देवनद्या गङ्गाया स्रोतसां पयःप्रवाहाणां सहस्रैर्दशशतीभिः आप्लाविते किम् । स्वकुक्षिगतीकृते इव निर्भरं भृते इत्यर्थः । वा पुनरुत्प्रेक्ष्यते—सूरीशितुर्हीरविजयसूरीन्द्रस्य । पुनः सूरिनामग्रहणं बहुबहुमानसूचकम् । कर्पूराणां घनसाराणां पार्यः । 'फडति' इति लोके प्रसिद्धाः । 'पारी पूरपरागयोः । पात्र्यां कर्करिकायां च पादबन्धे च हस्तिनः ॥' इत्यनेकार्थः । 'कर्पूरपारीपरिधूसराङ्गम्' इति तद्वृत्तिः । तथा 'कर्पूरपूरकमनीयशोभिरामम्' इति स्तुत्यादौ । तत्र पूरशब्देन समूह एव । तद्वद्विलसद्भिः शुभ्रिमविभ्रमैः शोभमानैः यशसां भरैः श्लोकानां प्रकरैः । 'श्लोकः कीर्तिर्यशोऽभिख्या समाज्ञा' इति हैम्यां यशोनामानि । विशदीकृते इव । पुनरुत्प्रेक्ष्यते—विलीयमानैर्गलद्भिर्द्रवीभवद्भिः तुहिनावनीभृतो हिमाचलस्य नीहारचारैर्हिमनिवहैर्निभृतं निचितं भृते वा भरिते वा । युग्मम् ॥ इति चन्द्रचन्द्रिकायाः प्रचारः ॥

---

१. 'ज्योत्स्नाभिः' इत्युत्तरमुचितोऽपि 'धवलीकृता' इति पाठः केश्चिदत्र प्रक्षिप्तः.

[illegible] प्रत्यासन्नत्वं [illegible] ॥ [illegible] वृत्तिपुरः [illegible]

[illegible] ॥

[illegible]—

[illegible] ।
[illegible] ॥ ११ ॥

[illegible] 'आयाद्[illegible]' [illegible] ॥ [illegible] पुनः [illegible] ॥

[illegible] स्वैरविहारिणीयम् ।
[illegible] समीक्षुषी काञ्चनचारिमश्रीः ॥ १२ ॥

[illegible] जाम्बूनदेन [illegible] । जम्बूद्वीप[illegible] । तत्तुल्या च जाम्बूनद [illegible] इति कविसमयः । तदेव दर्शयति— 'जाम्बूनदं जयति [illegible] सा तव रुचा विजितापि यस्याः । [illegible] सीमनि पम्बुकण्ठि ॥' इति नैषधे । [illegible] । किंभूता । [illegible] 'लीला सत्र लोलीभवचनाल [illegible] । अत एव पुनः किंभूता । स्वैरं स्वेच्छया विहरति सच[illegible] हि स्वैरविहारा [illegible] । अतोऽपि स्वेच्छया सञ्चारिणी । पुनः किंभूता । काञ्चनत्वेन [illegible] चारिम्णो वपुर्मनोहरत्वस्य श्रीः शोभा यस्याः सा ॥

मुक्ताफलानां भ्रान्तिं भ्रमं बिभ्रतीति मुक्ताभ्रान्तिभृतः मौक्तिकभ्रमधारिण्यः किरातवनिताः पुलिन्दपुरंध्र्यः गुञ्जाव्रजाश्चिन्वन्ति आददते ॥

ज्ञायन्ते वसुधासुधाकरगृहा गर्जारवैः कुम्भिनां
दुग्धाब्धिः प्रतिनादमेदुरमिलत्कल्लोलकोलाहलैः ।
शैलाः कन्दरमन्दिराङ्कविलुठत्कण्ठीरवक्ष्वेडितै-
र्जाते श्वेतकरोदयेऽम्बरसरिड्डिण्डीरपिण्डोपमे ॥ ९२ ॥

अम्बरसरितो गगनापगायाः सिद्धसिन्धोः । भूपीठस्थगङ्गायास्तु प्रावृट्प्रसरन्नीरवाहवर्षणप्रकर्षप्रवहत्प्रबलजम्बालजालाविलीभवज्जलजम्बालिनीप्लवमिलनात्कदाचित्कालुष्यमपि भवत्येव । यदुक्तम्—'गङ्गानीरमपि त्यजन्ति कलुषं ते राजहंसा वयम्' इति । परं नभोनद्या तु कदाचिदप्याविलीभावो न स्यादेव । तस्मादाकाशगङ्गायाः डिण्डीराणां फेनानां पिण्डाः समूहाः । 'पिण्डो वृन्दे जपापुष्पे गोले चोलेऽङ्गसिल्हयोः । कवले च' इत्यनेकार्थः । तेषामुपमा सादृश्यं यस्य तादृशे श्वेतकरस्य चन्द्रस्य उदये जाते सति । वसुधा पृथिवी तस्या आह्लादकारकत्वात्सुधाकराश्चन्द्रा अतिन्यायित्वतया सुधासदृशा अपिताभिलोभकत्वेन अमृतोपमानाः करा राजदेयांशा येषाम् । 'इदं तमुद्गतलशीतलद्युतिम्' इति नैषधे । तेषां राज्ञां गृहा आवासाः ते कुम्भिनां मदोद्धुरसिन्धुराणां गर्जारवैः कृत्वा ज्ञायन्ते नक्तं राजकार्यागतराजसेवकैरवसीयन्ते उपलक्ष्यन्ते वा । तथा प्रतिनादैः प्रतिशब्दैः कृत्वा मेदुरैः पुष्टैर्वृद्धिं प्राप्तैर्घनीभूतैर्वा मिलतामन्योन्यं [illegible] [illegible]नाम् । वा अथ वा स्वयमेव प्रादुर्भवतां कल्लोलानां तरङ्गाणां कोलाहलैरुत्[illegible]नादैः कृत्वा दुग्धाब्धिः क्षीरसमुद्रो ज्ञायते । तथा कन्दरा गुहा एव मन्दिराणि [illegible]नि तेषामङ्क उत्सङ्गे । कन्दरशब्दस्त्रिषु लिङ्गानुशासने । यथा 'गिरिप्रतिभ[illegible]च कन्दरा' इति । [illegible]तलानि पार्श्वे परिवर्तयतां कण्ठीरवाणां मृगेन्द्राणां क्ष्वेडितैः [illegible] सिंहनादैः । 'क्ष्वेडा तु सिंहनादोऽस्य' इति हैम्याम् । कृत्वा शैला पर्वता ज्ञायन्ते [illegible] । [illegible] अध्याहारः । [illegible] ॥

दुग्धाम्भोनिधिनिर्गता इव नराः सर्वेऽपि संजज्ञिरे
[illegible] निर्व्याजविदेहजा इव [illegible] ।
[illegible]
[illegible] ॥ ९३ ॥

[illegible]
[illegible]
[illegible]

दृश्या शासनदेव्या रक्षितान् स्वप्रेऽप्यन्यस्थानगमनाप्रदानतया गोपितान् प्रेक्ष्य दृग्गोचरीकृत्य ॥ इति शासनदेवतासाधारणसर्वाङ्गवर्णनम् ॥

अथ पृथगङ्गवर्णनारम्भणम् । तत्र 'मानवा मौलितो वर्ण्या देवाश्चरणतः पुन.' इति वचनात्कविसमयानुसारेण देवतापादादारभ्य वर्णयितु प्रारभ्यते—

जिनेशितुः शासनदेवतायाः पादारविन्देऽरुणिमा दिदीपे ।
प्रणेमुषीणां दिविषद्वधूना सीमन्तसिन्दूरमिवात्र लग्नम् ॥ १६ ॥

जिनाना सामान्यकेवलिनामीशातुरधिराजस्य श्रीतीर्थकृतः शासनदेवताया जिनभक्तचातुर्वर्ण्यसघस्य सम्यक्सानिध्यविधायिन्या देव्या. पादारविन्दे चरणतामरसे अरुणिमा पादतले स्वाभाविकी रक्तता दिदीपे दीप्यते स्म शुशुभे । उत्प्रेक्ष्यते—प्रणेमुषीणा सेव्यत्वेन प्रणीतप्रणामाना दिविषद्वधूना देवाङ्गनाना सीमन्तस्य केशेषु वर्त्मनः सिन्दूरं शृङ्गारभूषणम् अत्र पादारविन्दतले लग्नमिव ॥

यत्पादपद्मेन पराजितेन विजृम्भमाणारुणवारिजेन ।
शुश्रूषणायारुणिमा तदङ्के शङ्के डुढौक्केऽरुणलक्ष्मिलक्षात् ॥ १७ ॥

विजृम्भमाणेन विकाश प्राप्नुवता अरुणवारिजेन रक्तकमलेन । कोकनदेनेत्यर्थ । कर्त्रा । शुश्रूषणाय सेवाकारणाय अरुणिमा आत्मीयरक्तिमा तदङ्के पादपद्मोत्सङ्गे अहमेव शङ्के सशय कुर्वे मन्ये । विचारयामीत्यर्थ. । अरुणा या लक्ष्मीः शोभा विभूतिर्वा तस्या लक्षात्कपटात् । 'व्यपदेशो मिष लक्ष निभव्याज' इति हैम्याम् । लक्ष्मिशब्दो ह्रस्व शब्दप्रभेदे । अरुणिमा रक्तता स्वरागो डुढौके किमु प्राभृतीक इव । किभूतेन कोकनदेन । यत्पादपद्मेन यस्याः शासनदेवताया' पादपद्मेनेव चरणारविन्दद्वन्द्वेन पराजितेन पराभवपदवी प्रापितेन अर्थादात्मीयविभवेन ॥ इति पादतलरक्तिमा ॥

यस्याः स्फुरत्कान्तिविकाशिताशाः कामाङ्कुशा दिद्युतिरे पदाब्जे ।
इदं मुखाम्भोजविनिर्जितेन राज्ञेव रत्नान्युपदीकृतानि ॥ १८ ॥

यस्याः शासनदेव्याः पदाब्जे चरणारविन्दद्वन्द्वे कामाङ्कुशा नखा दिद्युतिरे द्योतन्ते स्म शुशुभिरे । किभूताः । स्फुरन्तीभिरितस्ततः प्रसरन्तीभिः सूर्यज्योतिःस्पर्धया वा स्फूर्जन्तीभि' कान्तिभिर्दीप्तिभिः विकाशिता प्रकटीभाव प्रापिता उद्योतिता आशा दशदिशो यैस्ते । उत्प्रेक्ष्यते—इद मुखाम्भोजेन अस्या वदनवारिजन्मना । 'इद नृपप्रार्थिभिरुज्झितोऽर्थिभिः,' तथा 'इद यशासि द्विपतः सुधारुच' इति पदद्वयमपि नैषधे । विनिर्जितेन पराजयगोचरीकृतेन राज्ञा चन्द्रेण नृपेण च रत्नाकरोद्भवत्वेन कोशसौधाधिपतित्वेन च द्वयोरपि मणीना सद्भावात् रत्नानि जात्यपद्मरागमणयः उपदीकृतानि ढौकितानीव ॥

अत्र 'श्रीहीरसौभाग्य'नाम्नि महाकाव्ये सप्तानां सङ्ख्यापूरणः सप्तमः सर्गः [illegible]नामविवेकोऽभवत्तज्जातः ॥

इति पण्डितश्रीकनकविजयगणिशिष्यपण्डितसिंहविमलगणिविरचितायां श्रीहीरसौभाग्यमहाकाव्यवृत्तौ [illegible] चन्द्रिकाप्रचारादिवर्णनो नाम सप्तमः सर्गः ॥

अष्टमः सर्गः।

अथो निशीथे द्विजराजराजज्ज्योतिःप्रथाभिर्मथितान्धकारे।
निकेतनान्तिक इव नदीन्दुर्ध्यानं दधान [illegible] ॥ १ ॥

[illegible]

[illegible] ॥ २ ॥

[illegible]

सौन्दर्यपात्र प्रपदप्रकारेऽङ्गुलीनालजुषोऽनिमिष्याः ।
रागाङ्कुराः शोणसरोजराज्यो ज्योतिर्मरन्दोपचिता इवाभुः ॥२२॥

अनिमिष्या देवताया नखा अङ्कुरा भान्ति स्म । अत्र प्रयोगः क्रियाऽऽस्वनुभवोऽवर्तत । उत्प्रेक्ष्यते—शोणसरोजराज्यः कोकनदपङ्क्तय इव । कस्मिन् । सौन्दर्यस्य मनोहरत्वस्य तदेव पात्रं पानीयाना पूर पूरो यस्मिंस्तादृशे पादे चरणरूपे प्रकारे सरसि । चरणे स्वाकृतिकमलाना नन्द्यावर्तकमलाकरत्वम् । किं शोणसरोजराज्या. । अङ्गुल्य पादशाखा एव नाला मृणालं जुषन्ते भजन्ते । पुनः किंभूता. । ज्योतींषि कान्तय एव मरन्दा मधूनि तैरुपचिता पुष्टाः । भूता इत्यर्थ ॥ इति पदनखाः ॥

नखोल्लसत्पल्लवशालमानैर्नभ्रामरीनेत्रमिलद्द्विरेफैः ।
शाखाविशेषैः पदशाखिन किं तदङ्गुलीभिर्भ्रियते स्म शोभा ॥ २३ ॥

तदङ्गुलीभिर्देवीपदशाखाभि शोभा भ्रियते भ्रियते स्म । 'डुभृञ् धारणपोषणयो.' इत्यस्य रूपम् । उत्प्रेक्ष्यते—पदशाखिन. पादपादपस्य किं शाखाविशेषैर्विशिष्टशाखाभिरिव । किंभूतैः । नखा एवोल्लसन्त स्फुरन्तः विकसन्तो वा पल्लवाः प्रवालास्तैः शोभमानैः शालमानैः शोभानाङ्कुरे । पुनः किंभूतै । नभ्राणां गगनशीलानाममरीणां त्रिदशीनां नेत्राणां नयनानां प्रतिबिम्बितान्येव । मध्यमपदलोपी समास । मिलन्त समीपे समागच्छन्तो द्विरेफा भ्रमरा येषु ॥

पदं मयेदं प्रददे शिरःसु दिशां दशानामपि सुन्दरीणाम् ।
इतीव रेखां क्रमयोरमर्त्याङ्गुलीमिषात्तत्प्रमितां बिभर्ति ॥ २४ ॥

अमर्त्या देवसुन्दरी । 'अलम्भि मर्त्याभिरमुष्य दर्शने' इति नैषधे । यथा मर्त्या तथा अमर्त्या । तथा अमर्त्यापि अङ्गुलीनाम् । अत्राङ्गुष्ठोऽप्यङ्गुलीमध्य एव गण्यते न पृथक् क्रियते । यदुक्तं नैषधेऽपि—'रज्यन्नखस्याङ्गुलिपञ्चकस्य मिषाद्दशौ हिङ्गुलपञ्चनूणे । ऐमैकपुङ्खाञ्चि विशुद्धपर्वा प्रियाकरे पञ्चशरी स्मरस्य ॥' इति । दशानां मिषाच्छलात्क्रमयोर्द्वयोश्चरणयोस्तत्प्रमितां दशदिक्प्रमाणां रेखां बिभर्ति धत्ते । उत्प्रेक्ष्यते—इति हेतोरिव । इति किम् । यन्मया स्वीयाद्भुतरूपश्रिया कृत्वा दशानां पूर्वा, अग्नि', दक्षिणा, नैर्ऋती, प्रतीची, वायवी, उत्तरा, ऐशानी, ऊर्ध्वदिक्, अधोदिक् । एकस्मिन् पक्षे । अष्टदिक्षु मानुष्यः ऊर्ध्वलोके देवाङ्गना. अधोलोके च नागाङ्गना असुराङ्गनाश्च । अपरस्मिन् पक्षे । तिर्यग्लोके दशदिक्षु सर्वत्रापि देव्यो वर्तन्ते इति । दशदिग्वर्तिनीनां सुन्दरीणां स्त्रीणां शिरःसु मस्तकेषु रूपसौन्दर्यातिरेकात् इदं पदम् । अथ चरणः प्रददे प्रदत्तम् । पदशब्द पुलिङ्गनपुंसकलिङ्गयो. । 'चरणः क्रमण पाद. पदोऽङ्घ्रिश्चलनः क्रम.' इति हैम्याम् । तथा—'पदं किमस्याङ्कितमूर्ध्वरेखया' इति नैषधे ॥ इति पादाङ्गुल्यः ॥

सा ध्यानगोचरीकृता शासनदेवता श्रीजिनमताधिष्ठायिका निर्जरी ज्ञानदशा निजा-वधिज्ञानलोचनेन ध्यानस्थितं प्रणिधानोपविष्टं हीरविजयनामानं वशीन्द्रं जितेन्द्रियाणामधिराजं सूरिं निपीय सादरमवलोक्य चित्ते स्वमानसे मुदमानन्दं दधार धत्ते स्म। प्रमोदं प्रापेत्यर्थः। उत्प्रेक्ष्यते—अमृतस्य सुधायाः कुण्डे परितो निबद्धानेकसोपानपटलप्रवणे जलाशये अर्थादमृतकुण्डमध्ये प्रणीतं कृतं लीलया स्वैरक्रीडया। ननु तापमलापनोदाय देवानां तापाद्यभावात्। आप्लवनं स्नानं यया तादृशीव। 'स्नानं सवनमाप्लवः' इति हैम्याम्। आप्लवनमाप्लव' इति वाक्यमेवानीतमस्तीति॥

अथाविरासीद्वशिशीतकान्तेः पुरः स्फुरज्जैनमताधिदेवी।
प्रसादितोपासनया शमश्रीरिवेयमङ्गीकृतकाययष्टिः॥ ८॥

अथ ध्यानस्थिरस्थायुकसूरीन्द्रदर्शनानन्तरं स्फुरन्ती वपुराभरणमणिदीप्तिभिर्दीप्यमाना जिनानां तीर्थकृताम्। अथ वा जिनस्य महावीरस्येदं जैनम्। तादृशं मतं शासनं तस्याधिदेवी अधिष्ठात्री देवता वशी जितेन्द्रियग्रामो मुनिजनस्तन्मध्ये शीतकान्तेश्चन्द्रस्यैतावता सूरीन्द्रस्य पुरोऽग्रे आविरासीत्प्रकटीभूता। उत्प्रेक्ष्यते—उपासनया निरन्तरसेवनया कृत्वा प्रसादिता प्रसादयुक्ता विहिता। प्रसन्नीकृतेत्यर्थः। अतएवाङ्गीकृता उपात्ता गृहीता काययष्टिस्तनूलता यया तादृशी शमश्रीर्मूर्तिमती उपलक्ष्मीरिव प्रभोः पुरः प्रादुर्भूता॥

कलामिवेन्दोर्जगते द्वितीयां प्राप्तां सुरीं दर्शयितुं स्वमस्मै।
निद्रां दृशा किंचन चुम्बतापि प्रेक्ष्यामुनाजायत जाग्रतेव॥ ९॥

अमुना सूरीन्द्रेण जाग्रतेव जागरणावस्थितेनेव निद्रारहितेनेव अजायत संजातम्। अमुना किं कुर्वता। किंचन किमपि उदरिकामन्त्र दृशा नेत्रेण निद्रा प्रमीला चुम्बता आश्रयतापि। किं कृत्वा। प्रेक्ष्य व्यालोक्य। काम्। सुरीं शासनदेवताम्। किंलक्षणाम्। अस्मै सूरीन्द्राय स्वमात्मानं दर्शयितुं दृग्गोचरीकारयितुं प्राप्तां पुरःसमागताम्। कामिव। द्वितीयां तिथिमिव। यथा इन्दोः सुधादीधितेः कलां षोडशांशाम्। अत्रार्थान्नगरिस्थतिवशाच्च कलात्रयमर्था सेला जगते सकललोकाय दर्शयितुं प्राप्ता जनो जानाति॥

प्रवाललक्ष्मीमिव कामितद्रोस्तद्ध्यानसिद्धेः किमुताग्रदूती।
प्रत्यक्षवत्प्रादुरभूत्पुरोऽस्य स्वप्नेऽपि सा सार्वमताधिदेवी॥ १०॥

सा हीरविजयसूरिसूरिमन्त्रध्यानानुभावाभ्यागता सार्वस्य श्रीमच्चरमजिनमहावीरभगवतो मतं शासनं तस्याधिदेवी अधिष्ठायिका निर्जरी। श्रीवीरशासनदेवता इत्यर्थः। स्वप्ने किंचिन्निद्रावस्थायामपि प्रत्यक्षवज्जाग्रदवस्थायामिव चक्षुर्लक्ष्यवत्। अस्य सूरेः पुरोऽग्रतः प्रादुरभूत्प्रकटीभवति स्म। उत्प्रेक्ष्यते—कामितद्रोरर्थात् हीरसूरेर्मनोभिलषितध्यानसिद्धेः प्रवाललक्ष्मीः पल्लवश्रीरिव। द्रुमाणां हि प्रथमं पल्लवाः प्रादुर्भवन्ति। तदु-

सरापदे' इति संदधे । तादृशी उपमानश्रीः शोभा लक्ष्मीर्वा यस्याः । तथा अप्रतिमा असाधारणा उपमानरूपलक्षणाद्युत्प्रेक्षाद्यैः श्रीर्लक्ष्मीः शोभा यस्याः ॥ इति पादाः ॥

यत्पादराजौ परिशुद्धपार्ष्णी निर्जित्य गत्याखिलराजहंसान् ।
उच्चैः रुचिस्फूर्तिमिषाज्जिगीषू प्रस्थातुकामाविव नाकिनागम् ॥ २८ ॥

यस्या देवतायाः पादौ चरणावेव राजानौ राजानौ पार्थिवौ अपरावपि यलचन्द्रपती नाकिनां नाग गीर्वाणानां वारणमैरावणं निर्जरश्रेष्ठं शक्रं वा । यदुक्तं हैमयाम्—'स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुञ्जराः । सिंहशार्दूलनागाद्यास्तल्लजश्च मतल्लिकाः । मचर्चिकाप्रकाण्डोद्धप्रशस्तार्थप्रकाशकाः ॥' इति । जिगीषू जेतुमिच्छन्तौ सन्तौ । रुचीनां निःसरद्वलप्रबलकान्तीनां स्फूर्तेः स्फुरणस्य मिषात्कपटात् । उत्प्रेक्ष्यते—उच्चैर्ध्वं स्वर्गलोकं प्रति प्रस्थातुकामौ गन्तुमीहमानाविव प्रचलितुमनसाविव । ऐरावणवासवयोः स्वर्गस्थायुक्तत्वेन उर्ध्वगमनम् । राज्ञामपि इन्द्रनिर्जयनं दृश्यते । यथा रघुवंशे इन्दुमतीस्वयंवरे कार्तवीर्यवर्णनाधिकारे—'कारागृहे निर्जितवासवेन लङ्केश्वरेणोषितमा प्रसादात्' । तथा सूक्ते—'दृष्टाः सागरो बद्ध इन्द्रजिन्मानवर्जितः । वानरैर्वेष्टिता लङ्का जीवद्भिः किं न दृश्यते ॥' इति । किं कृत्वा । गत्या गमने विलासेन प्रयाणेनाभिलाषेण तेन चाखिलान् समस्तान् राजहंसान् सितच्छदान् पार्थिवपुङ्गवांश्च । प्रबलपृथिवीपुरंदरानित्यर्थः । निर्जित्य पराभूय स्ववशीकृत्य च । किंभूतौ पादराजौ । परि सामस्त्येन सर्वप्रकारेण समन्तात्समग्रतया वा शुद्धौ लाञ्छनाभावेन निर्मलौ पार्ष्णि गुल्फयोरधः प्रदेशौ ययोः । तथा परि समन्तात् समग्रस्वपदेशापेक्षया निर्दोषो विरोधादिरहितः पार्ष्णिः पाश्चात्यो विजयिनो राज्ञः स्वदेशपृष्ठवर्ती राजा ययोस्तौ ।'शुद्धपार्ष्णिरयान्वितः' इति रघुवंशे । यो विजयी नृपोऽपरदेशसाधनार्थं प्रतिष्ठते सोऽवश्यं स्वदेशपाश्चात्यं पार्थिवं पुरग्रामाश्वहस्त्यादिप्रदानेन मैत्रीविधानेन च शुद्धं स्वानुकूलीकरोतीति स्थितिः । नो चेदशुद्धः स तद्देशे विद्वरं कुरुते तस्मान्निर्दोषीकरणं तदभिधानं च पार्ष्णिरित्युच्यते ॥ इति पार्ष्णिः ॥

जम्भद्विपत्कुम्भिपराभविन्या ययातिभूतिं गमितः स्वगत्या ।
किं हंसकस्ता चरणारविन्दे तस्थौ प्रसक्तेर्विपर्यीचिकीर्षुः ॥ २९ ॥

हंस एव हंसकः । स्वार्थे कः । राजहंसः नूपुरम् । 'पिण्याकशर्करहंसकशकृत्पुत्राः' इति लिङ्गानुशासने पुंनपुंसकलिङ्गः । चरणारविन्दे अर्थाद्देवीपादपद्मे तस्थौ स्थितवान् । उत्प्रेक्ष्यते—तां शासनदेवतां प्रसक्तेः प्रसादस्य विपर्यीचिकीर्षुः किं गोचरीकर्तुमिच्छुरिव । हंसकः कथंभूतः सन् । यया त्रिदश्या स्वगत्या निजगमनातिविलासेन अतिभूतिं पराभवं गमितः प्रापितः सन् । किंभूतया गत्या । जम्भनामा दैत्यस्तस्य द्विपन् वैरी हन्ता वासवस्तस्य कुम्भी हस्ती ऐरावणस्तं पराभवति निर्जयति इत्येवंशीला तया ॥

निर्यत्सुरास्त्राशनिभूषणानि निरेजुरङ्गानि गुणाङ्गनायाः ।
स्वस्पर्धिनः श्रीभिरिवेन्द्रचापवज्राण्यमीभिर्विभृतानि जेतुम् ॥ १३ ॥

गुणाङ्गनाया जिनशासनदेवताया अङ्गान्यवयवा । 'एकदेशे प्रतीकोऽङ्गावयवापघना अपि' इति हैम्याम् । तथा 'अङ्गमन्तिकमात्मनो । उपसर्जनभूते स्यादभ्युपायप्रतीकयो' ॥' इत्यनेकार्थे । निरेजुर्भान्ति स्म । किंभूतान्यङ्गानि । निर्यन्ति निर्गच्छन्ति प्रादुर्भवन्ति सुरास्त्राणि इन्द्रधनूंषि । 'इन्द्रायुधम्' इति हैम्याम् । इन्द्रधनुरुच्यते । तथा 'तत्र सभूषा इव वशु शिला वल्लीव कार्मुकमाययन्ती' इति नैषधे । मणिज्योतिरिन्द्रधनुराकृत्या निर्याति । यथा नैषधे—'ता विभूषा मणिरश्मिकार्मुक' इति । येभ्यस्तादृशान्यशनिभूषणानि वज्ररत्नखचिताभरणानि येषु तानि । अशनिशब्देनात्र वज्ररत्नमुच्यते । 'शचीगुरु तु हीरक । दराटक रत्नमुख्य पर्यायनाम च ॥' इति हैम्याम् । उत्प्रेक्ष्यते—अमीभिरङ्गैः श्रीभि शोभाभि कृत्वा स्वस्पर्धिन निजप्रतिमल्लीभूतशत्रून् जेतु पराभवितुमिन्द्रचापवज्राणि शस्त्राणीव विभृतानि ॥

राजीवराजी विजिता यदङ्गैर्मृदुश्रिया रङ्गदनङ्गरङ्गै ।
तत्तुल्यभावाय तप सृजन्ती वने वसन्तीव कुशेशयासीन ॥ १४ ॥

यदङ्गैर्यस्या देव्या अङ्गैरवयवर्मृदुश्रिया भावप्रधाननिर्देशान्माकुमार्यलक्ष्म्या विजिता पराभूता सती राजीवराजी कमलमालिका । उत्प्रेक्ष्यन्ते—वने निकुञ्जे वसन्ती सती वास विदधती । तिष्ठन्तीत्यर्थ । कुशेशयासीना दर्भशायिना वभूवेव । वन काननतीरयो ' इत्यनेकार्थे । तथा कुशेशय पद्मनामापि । यथा 'कमल नलिन पद्ममरविन्द कुशेशयम्' इति हैम्याम् । तत्रोत्प्रेक्षापि । 'कुशो दर्भ जले द्वीपे' इत्यनेकार्थे । किं कुर्वन्ती । तेषामङ्गाना तुल्यभावाय सादृश्याय तप सृजन्ती अनुतिष्ठन्ती । अन्यापि किंचित्फल मनसि स्पृहयन्ती सती वनमध्यस्थायिनी तप कुर्वाणा कुशप्रस्तरे शेते । किंभूतः । यदङ्गैः रङ्गनृत्य कुर्वन् । 'नृत्यविधाने नृत्यति नटति च रङ्गति च विलसति च' इति क्रियाकलापे । योऽनङ्ग स्मरस्तस्य रङ्गैर्नर्तनस्थानै रङ्गन्ती जङ्गमा अनङ्गनर्तकस्य रङ्गा नर्तनशाला वा ॥

अगण्यनैपुण्यमुखान्नियन्त्र्य संरक्षितान्प्रेक्ष्य गुणास्त्रिदश्या ।
स्वयन्त्रणोद्भूतभयातिरेकात्तस्याः प्रणेशे किमशेषदोषै ॥ १५ ॥

तस्या शासनदेव्याः सकाशात् अशेषदोषैः समग्रापगुणै प्रणेशे प्रणष्ट प्रपलाय्य गतम् । ...—स्वेषा ... यन्त्रण बन्धन तस्मादुद्भूताज्जाताद्भयातिरेकात्सा... य दिव । ... न् गणयित ... गणनातिगानतिशायिनो वा दाक्षिण्यम् ... तदेव मुखम ... धुरि येषा तान् । 'मुखमुपाये श्रेष्ठे नि.स ... र्थः । गु ... तरा यन्त्रयित्वा बद्धा त्रि

र्णीभवन्नाकण्ठ व्याप्तः सपद्यमानः अजिर्देवीपाद' स एव शोणो हृदस्तस्मिन्यमजन्किमु ब्रूडति स्मेव ॥

श्रीमज्जिनाधीशमताधिदेव्या जङ्घे विभूषामनघे दधाते ।
किमु प्रगल्भक्रमनामधेयवृन्दारकोर्वीरुहयोः प्रकाण्डे ॥ ३३ ॥

श्रीमाश्चतुस्त्रिंशदतिशयादिका लक्ष्मी त्रैलोक्याधिपत्यलक्ष्मीर्वा विद्यते यस्य स श्रीमान् यो जिनाना जयन्ति सर्वथापि रागद्वेषादिकानन्तरङ्गान् शात्रवानिति जिनास्तेषां सामान्यकेवलीनामधीश. स्वामी तीर्थंकरोऽर्थान्महावीरभगवान् तस्य मत शासन तस्याधिदेव्या अधिष्ठायिकाया देवतायाः अनघे निष्पापे प्रशस्ये जङ्घे नलकिन्यौ विभूषा शोभा दधाते कज्यत । उत्प्रेक्ष्यते—प्रगल्भौ प्रकृष्टौ यौ क्रमौ देवीपादौ तावेव नामधेयमभिधान ययोस्तादृशयोर्वृन्दारकोर्वीरुहयोः कल्पवृक्षयो । प्रकाण्डे किमु वृक्षस्कन्धाविव । 'मूलाच्छाखावधिर्गण्डिः प्रकाण्डोऽथ' इति हैम्या प्रकाण्ड पुल्लीवलिङ्गयो ॥

यस्याः प्रकाण्डस्फुरदूरुजङ्घा सदृक्षलक्ष्मीस्पृहयालवः किम् ।
विषह्य भारं भवनव्रजाना स्तम्भा मनुष्यानुपकुर्वते स्म ॥ ३४ ॥

स्तम्भा' स्थूणा' भवनव्रजाना गृहगणाना भार वीवध विषह्य क्षान्त्वा मनुष्यानुपलक्षणात्सुरान् त्रिभुवनेऽपि गृहभाराधारभूतस्तम्भाना विद्यमानत्वेन एतावता [illegible]जनानुपकुर्वते स्म उपकार कुर्वन्ति स्म । उत्प्रेक्ष्यते—यस्याश्चिदेव्या प्रकाण्डे वृक्षस्कन्धाविव स्फुरन्त्यो शोभमानयो जङ्घयो सदृक्षलक्ष्म्या' समानविभूषायाः स्पृहयालवः किम् अभिलाषुका इव [illegible] इव ॥

सारङ्गनाभीसुरभेरमुष्या जङ्घाविभूषाभिरधःकृताभि ।
मृगाङ्गनाभिर्गिरिगह्वरोर्वी मन्दाक्षलक्ष्याभिरिव प्रपेदे ॥ ३५ ॥

मन्दाक्षस्य लज्जाया लक्ष्याभिर्वेध्याभि[illegible] [illegible]भिः । उत्प्रेक्ष्यते—गिरिगह्वरोर्वी गिरीणा शैलाना गह्वराणा गुहानाम्, [illegible] मुर्वी भूमि । 'गह्वरो बिलभेदयो । कुञ्जे' इत्यनेकार्थ । तथा 'गौरीगुरोर्गह्वरमा[illegible]' इति रघुवंशे । 'परस्परविलच्छायापटलपादपङ्क्तिनिबिडवनविवरं' इति [illegible] । [illegible] प्रपेदे । किंभूता । मृगनाभि सारङ्गनाभि कस्तूरिका । 'गोरोचनाचन्दन[illegible] विलेपा पुनरुक्तावन्तो' इति नैषधे । तथा कस्तूरिकानामापि । '[illegible] कस्तूरीगन्धधूल्यपि' इति हैम्याम् । [illegible] [illegible] इत्यर्थः । [illegible] [illegible]विभूषाभि शोभाभिरध कृताभिरि[illegible]ताभिः । [illegible] ॥

जङ्घे यदीये प्रणयन्प्रयत्नात्प्रकाण्डसार पृथिवीरुहाणाम् ।
जग्राह धाता किमभावि तेषु ततः स्फुरत्कोटर हृदरन्ध्रे ॥ ३६ ॥

चासौ सुपर्वसारङ्गदृक् च सुरहरिणीनयना शासनदेवी सैव केलये क्रीडाकृते अर्थान्मनोभवस्यैव यन्निकेतनं मन्दिरं तस्य स्तम्भौ स्थूणे इव । अन्यदपि रम्भागृहं कदलीगृहं 'केलिहरु' इति वा प्रसिद्धम् । तत्राप्याधारस्तम्भौ भवतः । किंलक्षणस्य गृहस्य । अन्तः सौधमध्ये वसन् वासं विदधानं तिष्ठन् । सह अलसदृशा, मन्थरनयनया, स्वगुणेनोपमानेन मनोज्ञादिपदेन च विशेषिताङ्गकर्मा स्त्री यथा तरललोचना । 'अलसेक्षणा मृगाक्षी' इति हैम्याम् । स्त्रिया रत्या वर्तते य. स सरः कामो यत्र तस्य ॥

यदूरुसृष्ट्यै करिणा करेभ्यो मन्ये मृदुत्वं गृहयांबभूव ।
स्वयं स्वयंभूरिति तेषु नो चेदेकान्तकार्कश्यमिदं कुतस्त्यम् ॥ ४० ॥

यदूरुसृष्टये यस्या देवताया उर्वोः सक्थ्नोः सृष्टये निर्माणाय स्वयंभूर्विधाता स्वयमात्मना नान्यैरत्राहमेवं मन्ये जानामि वितर्कयामि करिणा गजेन्द्राणां करेभ्यो हस्तेभ्यः । शुण्डादण्डेभ्य इत्यर्थ । मृदुत्वं सुकुमारभावम् । सौकुमार्यकलितदलिकसारमित्यर्थः । गृहयांबभूव गृहीतवान् । 'गृह्णाति गृहयते लाति' इति ग्रहणार्था क्रिया' क्रियाकलापे । 'जन्तादाम्' इति गृहयांबभूवेति । एवं चेन्न तर्हि तेषु हस्तिहस्तेषु इदं प्रत्यक्षलक्ष्यं सर्वजनप्रतीतं वा एकान्तेन अतिमात्रं केवलं वा कार्कश्यं त्वचि काठिन्यं कुतस्त्यं कुतोभवम् । ततो ज्ञायते सौकुमार्ये गृहीते केवलं कर्कशतैव स्थितवती । 'नागेन्द्रहस्तास्त्वचि कर्कशत्वात्' इति कुमारसंभवेऽपि ॥

हसा यदूरुद्वितयीं प्रतीपामन्विष्य संहर्षकरीं करेण ।
प्रणश्य भीत्याभ्रमुकामुकः किं दम्भोलिपाणिं शरणीचकार ॥ ४१ ॥

अभ्रमुकामुक ऐरावणगज । 'पयोनिलीनाभ्रमुकामुकावलीरदान्' इति नैषधे । 'ऐरावतो हस्तिमल्ल श्वेतगजोऽभ्रमुप्रिय ' इति हैम्यामपि । भीत्या भयेन कृत्वा प्रणश्य प्रपलाय्य दम्भोलिपाणिं वज्रिणं पुरंदरं शरणीचकार आश्रितवान्, वज्रपाणित्वेन देवदानवमानवैरजेय इति तं बभाज । भीतेः कारणमाह—किं कृत्वा । करेण स्वकीयशुण्डादण्डेन समं संहर्षकरीं स्पर्धाकारकाम् अत एव प्रतीपां प्रतिपक्षां तथा पुनर्हसा बलिष्ठां यदूरुद्वितयीं देवीसक्थियुगलीमन्विष्य व्यालोक्य ॥

तत्कैव वार्ता मम राजहंसान्सर्वानसौ यज्जयति स्वगत्या ।
इत्यूरुकायं किमु तावदस्याः करं करीन्द्रो व्यतरत्रिदश्याः ॥ ४२ ॥

असौ देवी स्वगत्या निजगमनेन आत्मीयाभिपेणयेन कृत्वा सर्वान् समस्तानपि राजहंसान् प्रकृष्टबलिष्ठभूपालान् तत्वतस्तु स्वगन्धरगमनविलासेन कृत्वा राजमरालान् यत्कारणाज्जयति स्ववशीकरोति पराभवति च, तत्तस्मात्कारणात् मम पशुमात्रस्य परवशीभूतस्य न केव वार्ता मन्ये यऽस्या न कश्चिदपि प्रयास । यतोऽहं करो राजदेयाशोऽस्यास्तीति करदाता चतुष्पदमात्र तस्मान्मम जघनवस्यमेषा कल्पयेति । उत्प्रेक्ष्यते—इति हेतोः करीन्द्रो गजराज तावत्प्रथमनेवास्याखिदश्या जघनेन करभा अग्रगामेन

विलासिवालव्यजनाधृतोद्यच्छत्रा स्फुरद्वारिजराजमाना।
अधीश्वरीवाखिलवारिजानां यदीयपादद्वितयी दिदीपे ॥ २५ ॥

यस्या देव्या इव यदीया शासनदेवतासंबन्धिनी पादद्वितयी चरणयुगलं दिदीपे शुशुभे। उत्प्रेक्ष्यते—अखिलानां समग्राणां वारिजानां जलजन्मनामर्थात्कमलानामेव पदयोः पद्मानामुपमानत्वात्। वारिजशब्देन शङ्खोऽप्युच्यते। 'कम्बुस्तु वारिजस्त्रिरेखः षोडशावर्तः शङ्खः' इति हैमीवचनात् परं तन्निरासः। अथ वारिजशब्देन मुख्यतया पद्ममेवोच्यते तस्मात्कमलानामेवाधीश्वरी स्वामिनीव राजीव। किं राजचिह्नं दृश्यते विलसत इत्येव शोभमाने वालव्यजने आकृतिरूपे। 'छत्तचामरपडागजूअलचमडिया' इत्यजितशान्तिस्तवनात्। चामरे यस्या यस्या वा। पुनः किंभूता। धृतमाकलितमाकारकायमातपत्रं छत्रं यया। स्फुरद्भिः प्रकटीभवद्भिः रेखाकारधारिभिर्वारिजैः पद्मैर्विराजमाना शालिनी ॥

कथंचनाभ्यर्थनया मृदुत्वं रागश्रियं चाप्य पदारविन्दात्।
प्रवालमाला धरणीरुहाणामिवाधमर्णीभवति स्म तस्याः ॥ २६ ॥

धरणीरुहाणां पादपानां प्रवालमाला पल्लवपङ्क्तिः। तरूणां प्रवालकथनेन विद्रुमाणां निरासः कृतः। उत्प्रेक्ष्यते—तस्या देव्या अधमर्णीभवति स्म ग्राहका जाताः। किं कृत्वा। कथंचन महता कष्टेन केनापि प्रकारेण वा अभ्यर्थनया देवीपुरस्ताद्याचनया कृत्वा पदारविन्दादर्थात् शासनदेवीचरणकमलान्मृदुत्वं सौकुमार्यं च पुनः रागश्रियं लौहित्यलक्ष्मीं चाप्य लब्ध्वा ॥

प्रसादकान्ती दधती सुवर्णालंकारिणी रम्यतमक्रमा च।
संश्लेषदक्षाप्रतिमोपमानश्रीः श्लोकमालेव सुरी चकासे ॥ २७ ॥

सुरी(शासन)त्रिदशी श्लोकमालेव अनुष्टुभां पङ्क्तिरिव चकासे दीप्यते स्म। किंभूता सुरी श्लोकमाला च। प्रसादं प्रसन्नभावं कान्तिं शोभां वपुर्गीतिं वा तथा झगित्यर्थावबोधगोचरत्वं प्रसादगुणं। तथा दीप्तरसत्वं कान्तिस्ते दधती दधाना। पुनः किंभूता। सुवर्णैः काञ्चनैर्विरचिता अलंकारा अङ्गप्रत्यङ्गाभरणानि विद्यन्ते सन्ति वास्याः। तथा शोभना वर्णा अक्षराणि। तथा उपमोत्प्रेक्षारूपकाद्या अलंकारास्ते सन्ति अस्यामिति। अस्त्यर्थीय इन्। पुनः किंभूता। रम्यतमौ अतिशयेन मनोज्ञौ सामुद्रोक्तलक्षणलक्षितावत एवातिरुचिरौ क्रमौ चरणौ यस्याः अतिरमणीयचतुश्चरणा अनुक्रमो वा यस्याः। पुनः किंभूता संश्लेषे सकामुकेन वल्लभेन समं सस्नेहसरोमाञ्चित लतावेष्टितकायालिङ्गनविशेषे निपुणा चातुर्यवती। तथा। शब्दगुणार्थगुणशब्दालंकारार्थालंकारादिरूपः सम्यक् समीचीनश्चेतश्चमत्कारकारी श्लेषस्तत्र दक्षा पट्वी। पुनः किंभूता। अप्रतिमोपमानश्रीः न विद्यते प्रतिमा सादृश्यं यस्याः। 'न तस्तुल्ये प्रतिमा

स्फुटीभवत्प्रकट जायमानमेतत्प्रत्यक्ष स्याद्विदेवीनितम्बतनुचक्रमिव शङ्के इत्यर्थे। अथ वा अदृगेव शङ्के वितर्कं कुर्वे। रा क। एतत्त्रिदशीनितम्बः एतस्या देव्या आरोहः॥ इति नितम्बः॥

एतत्कलत्रस्य हरेः कलत्रजैत्रस्य सौभाग्यमुदीर्यते किम्।
गाङ्गेयमप्यातनुते स काञ्चीनिभान्निजालिङ्गनलालसं यत्॥ ४६॥

हरेः केसरिणः कलत्रं कटीकटः। 'कटिः श्रोणिः कलत्रं कुटीरं काञ्चीपदं ककुद्मती' इति हैम्याम्। तस्य जैत्रस्य जयनशीलस्य तथा हरेः विष्णोः कलत्रस्य पत्न्या लक्ष्म्याः। जैत्रस्येत्यप्यर्थध्वनिः। एतस्या देव्याः कलत्रस्य कट्याः। एतस्य कस्यापि कलत्रस्य पत्न्या इत्यप्यर्थध्वनिः। 'कलत्रं श्रोणौ भार्यायां दुर्गस्थाने च भूभुजाम्' इत्यनेकार्थः। 'द्वितीयोढा कलत्रं च' इति हैम्याम्। सौभाग्यं सुभगता सौन्दर्यं चातुर्यं वा किमुदीर्यते। किमित्यनिर्वचनीयमाहात्म्यं वर्ण्यते इत्यर्थः। यत्स्मात्कारणाद्गाङ्गेयं गङ्गातनयं भीष्मम्। अपिशब्देन ब्रह्मव्रतधारित्वेन सर्वथापि स्त्रीविषयविमुखमपीति लक्ष्यते। अथ च तत्त्वतो गाङ्गेयं सुवर्णं काञ्चीनिभान्मेखलाच्छलान्निजस्यात्मन आलिङ्गने परीरम्भणे लालसं लोलमौत्सुक्यं वा यस्य जातदोहदं वा तृष्णातिरेको वा यस्य तादृशमातनुते स चकार। 'लालसो लोलयाच्ञयोः। तृष्णातिरेक औत्सुक्ये' इत्यनेकार्थः। अमरस्तु—'इच्छातिरेकस्तु लालसा'॥

अस्याः कलत्रं हरिजित्वरं यन्मा मा हरिं तज्जयताद्भियेति।
अढौकि काञ्ची कनकस्य तेन शय्याब्धिमुक्तामणिमण्डितेव॥ ४७॥

यद्यस्मात्कारणात् अस्या देव्या हरेः पञ्चाननस्य जित्वरं जयनशीलम्। अथ च कलत्रं पत्नीत्यर्थः। भियते तत्तस्मात्कारणात् मा नाम्ना एकाभिधानेन हरिं कृष्णमपि मा जयतान्मा पराभवतात्। इति हेतोर्भिया भयेन हरिणा अर्थात्प्रसत्तये शय्याभूतः पर्यङ्कभावप्राप्तस्याब्धेः समुद्रस्य मुक्तामणिभिर्मुक्ताफलरत्नैश्च मण्डिता भूषिता कनकस्य स्वर्णस्य काञ्ची मेखलेवाढौकि प्राभृतीकृतेव॥ इति कटिः॥

उमोपयामे पुनराप्तजन्म शिशुस्मरस्येन्द्रगुरोरुपान्ते।
अध्येतुकामस्य कलास्त्रिदश्याः पृष्ठस्थलीहाटकपट्टिकेव॥ ४८॥

त्रिदश्याः शासनदेवतायाः पृष्ठस्थली तनोश्चरमप्रदेशः। 'पृष्ठं तु चरमं तनोः' इति हैमीवचनात्। उमायाः पार्वत्याः उपयामे पाणिग्रहणकरणानन्तरं समये हरिविरिञ्चिशक्रायशेषवृन्दारकवृन्दातियाच्नया प्रसन्नीभूतभूतपतिनिर्मितानुग्रहात् पुनर्द्वितीयवारमाप्तलब्धं जन्मोत्पत्तिर्येन अत एवाभिनवोत्पादहेतोः शिशोर्बालकस्य स्मरस्य मन्मथस्य हाटकस्य जातजाम्बूनदस्य पट्टिकेव हस्तलेखविधानपट्टिकेव। स्मरस्य किं कर्तुकामस्य। इन्द्रस्य पुरंदरस्य गुरोराचार्यस्य बृहस्पतेः। 'इंदृशीं गिरमुदीर्य बिडौजा जोषमास न विशिष्य बभाषे। नात्र चित्रमभिधाकुशलत्वे शैशवावधिगुरुर्गुरुरस्य॥' इति नैषधे। 'अभिधाकु-

स्वजिह्मयानेन विगानितः सन्नाखण्डलः कुण्डलिनामिवैताम् ।
सिञ्जानमञ्जीरविनिर्मिताङ्गः प्रसाद्दयत्यङ्घ्रिपयोजलग्नः ॥ ३० ॥

कुण्डलिनां भुजगमानामाखण्डलः पुरंदरः स्वामी शेषनामनागाधिराजः पादपयोजे क्रमकमले लग्न आश्रित्य स्थितः सन् । उत्प्रेक्ष्यते—एतां शासनदेवतां प्रसन्नां करोतीव । प्रसादकलितां निर्मिमीत इव । यो हि बलवन्तं निजजेतारं प्रसादयितुमिच्छति स तत्पदयोर्लगति । चाटुवाक्यानि ब्रूते । इति रीतिः । किंभूतः । सिञ्जानं शब्दायमानं रणझणितिरावं कुर्वाणं यन्मञ्जीरं नूपुरं तदेव विहितं निर्मितमङ्गं वपुर्येन । पुनः किंलक्षणः सन् । स्वस्यात्मनो जिह्मेन वक्रेण यानेन गमनेन । यौवनोन्मादेन प्रायः स्त्रीणां गतिर्वक्री भवति । अपरोऽपि पाठः । यथा—'स्वश्लोकशौक्ल्येन' स्वस्यात्मनः श्लोकस्य यशसः शौक्ल्येन शुक्लतया वा विगानितोऽधरीकृतः ॥ इति चरणनूपुरम् ॥

यया जगज्जैत्रतमश्रियाङ्घ्रिगुल्फः परां कोटिमवापितः सन् ।
पराक्षिलक्ष्यत्वमयांबभूव न चक्रवर्ती तु कदाचनापि ॥ ३१ ॥

यया शासनदेवतया जगतां भुवनानां तात्स्थ्यात्तद्यपदेशात्त्रैलोक्यकामिनीनां जैत्रतमया अतिशयेन जैत्रया जयनशीलया श्रिया आत्मलक्ष्म्या परां प्रकृष्टां कोटिमुत्कर्षं काष्ठामवापितो नीतः सन् । पराक्षिलक्ष्यत्वम् अङ्घ्रिगुल्फश्चरणग्रन्थिघुण्टकः कदाचनापि कस्मिन्नपि समये पराक्षिलक्ष्यत्वं परेषामन्येषां चक्षुष्मतामक्ष्णोर्लोचनयोर्लक्ष्यत्वं दृश्यतां गोचरत्वं न अयांबभूव गच्छति स्म । 'अय गतौ' इत्यस्य धातोराम्प्रत्यये प्रयोगा यथा—अयाचक्रे, अयाबभूव, अयामासेति । क इव । चक्रेण नरखेचरेन्द्राद्यप्रतिहतेनामोघरथाङ्गायुधेन वर्तते । षट्खण्डक्षोणीमण्डलान्तरे प्रवर्तते दिग्विजयं विदधातीत्येवंशीलश्चक्रवर्ती सार्वभौम इति । यथा चक्री परेषां प्रत्यर्थिनां कदाचिदपि कस्मिन्नपि प्रस्तावे आजीवितान्तमक्षिलक्ष्यत्वं लोचनगोचरत्वं तां नायते न प्राप्नोति । प्रतिभटैर्भूपैर्दृष्ट्यापि द्रष्टुं न शक्यते इत्यर्थः । एतावता देवीगुल्फौ न दृश्येते । स्त्रीणां गुल्फजानू अदृश्यावेव श्लाघ्येते इति सामुद्रशास्त्रे । तथा 'गुल्फद्वयासायदृश्यसिद्धिः' इति नैषधे ॥

यज्जङ्घयाधःकरणादुदीतव्रीडातिरेकादिदमीयगुल्फः ।
मन्ये न्यमज्जन्नवनिर्यदर्चिरर्णःप्रपूर्णीभवदङ्घ्रिशोणे ॥ ३२ ॥

यस्याः शासनसुराङ्गनायाः जङ्घया अधःकरणान्नीचैर्विधानात्तिरस्करणाद्वा उदीता प्रकटीभूता । 'उदीतमातङ्कितवानशङ्कत' इति नैषधे । या व्रीडा लज्जा तस्या अतिरेकादतिशयात् अस्या अयमिदमीयः । 'मध्य तनूकृत्य यदीदमीयम्' इति नैषधे । चरणसंबन्धी गुल्फो घुण्टकः । अहमेवं मन्ये वितर्कयामि । नवानि नवीनानि निर्यन्ति प्रादुर्भवन्ति यान्यर्चींषि अर्थात्तत्क्रमकान्तयः तान्येवार्णांसि पानीयानि तैः प्रपू-

त्राणि । यदुक्तम्—'सा पिच्छइ पिअवयण जोईं पुणनाहि मण्डल तीसे । पुव्वभवन्तरनेहो फागाइ चुणन्ति तप्पूरम् ॥' इति । ता एव द्विरेफा भ्रमरा यत्र ॥

यदङ्गगेहे निवसन्प्रसूनायुधः सुधाभुक्स्पृहयन्स्ववल्भाम् ।
अचीकरत्कूपमिवामृतस्य विरञ्चिना पूर्तकृतेव नाभिम् ॥ ९२ ॥

प्रसून कुसुममेवायुध प्रहरण यस्य । 'पुष्पाण्यस्येषुचापास्त्राणि' इति हैम्याम् । स स्मरः सुधाभुक् सुधा पीयूष भुनक्ति आहारयति इति सुधाशनो देव' स्वस्यात्मनो वल्भामशनमाहार स्पृहयन् काङ्क्षन् सन् । उत्प्रेक्ष्यते—नाभिमर्थाद्देवतातुन्दकूपिका पूर्तकृतेव खनकेनेव विरञ्चिना ब्रह्मणा अमृतस्य पीयूषस्य कूपमचीकरत्कारयति स्म । किं कुर्वन् । स्मर. यदङ्ग यस्याः शरीर तदेव गेह सुवर्णसौध तत्र निवसन्निवास कुर्वन् ॥ इति नाभि' ॥

यस्यावलग्नेन विगानितेन पञ्चाननेनानुचिकीर्षयास्य ।
वैमुख्यभाजा विषयाद्विशेषात्किं तप्यते भूधरगह्वरान्तः ॥ ९३ ॥

पञ्चाननेन मृगेन्द्रेण भूधरस्य पर्वतस्य गह्वरान्तर्गुहामध्ये । उत्प्रेक्ष्यते—अस्यावलग्नस्य मध्यस्य अनुचिकीर्षया अनुकर्तुमिच्छया तप्यते तप इव क्रियते । किंभूतेन पञ्चाननेन । यस्या देवताया वलग्नेन मध्यप्रदेशेन विजितेन । पुन किंभूतेन । विशेषाद्विशेषप्रकारेण विषयात् शब्दादिगोचरात् । 'सयतसरेण रतमेति किलैकवार सिंहावली द्विरदशूकरमाससभोजी' इति हेमचन्द्रवचनात् । अथ च विषयाज्जनपदाच्च विमुख' विरक्तेन पराङ्मुखेन च । प्रायः सिंहादयो हि श्वापदा विजनघनगहनसानुमत्कन्दरनिवासिन एव भवन्ति ॥

तपस्यत' शंभुदिधक्षयाङ्घ्रिकनिष्ठया स्पृष्टभुव स्मरस्य ।
मध्य पुरो निर्मितनाभिहोमकुण्डा तपोवेदिरिव कृशिष्ठा ॥ ९४ ॥

अर्थेसगल्या शासनदेव्या मध्य विभातीति सबन्ध । उत्प्रेक्ष्यते—शंभुदिधक्षया स्ववत् शंभोरीश्वरस्यापि दिधक्षया दग्धुमिच्छया भस्मसात्कर्तु काङ्क्षया तपस्यतः तीव्र तप कुर्वत. । यतो घोरतप साधनमन्तरेण निजाभिलषितसिद्धिर्न स्यात् । तपसि स्थितस्य कृशिष्ठा अतिशयेन कृशा वेदिरिव तप'करणव्यतिकरोपवेशनवेदिकेव । किंभूता वेदि । पुरोऽग्रभागे निर्मित निष्पादित नाभिरर्थाद्देवतायास्तुन्दकूपिकैव होमार्थं कुण्ड यस्या. । तापसा हि तप साधयन्त सन्त मध्वज्यादि जुहृति । किंभूतस्य स्मरस्य । अङ्घ्रेर्वामचरणस्य कनिष्ठया प्रान्ताङ्गुल्या कृत्वा स्पृष्टा आश्लिष्टा भूर्भूमिर्येन । 'भुव यदेकाङ्घ्रिकनिष्ठया स्पृशन्दधावधर्मोऽपि कृशस्तपस्विताम्' इति नैषधे । 'एतदेव तपस्विना महत्तप । यद्वामचरणकनिष्ठाङ्गुल्यग्रमात्रेण भुव स्पृशस्तपस्यति' इति तद्वृत्ति । यादृक् शरीरावस्थितिक्षेत्र तादृगेव स्थान विलोक्यते तत एव कृशिष्ठेति ॥

निवृत्य दिवसकरात्मजतटे चला लुठन्ती' इति नैषधे। एतावता गङ्गासरस्वतीयमुनानामनदीभिः मध्ये उदरे तिसृणां वलीनां त्वक्संकोचलक्षणानां छद्मेन कपटेन समेत्य देवीपार्श्वे आगत्य । उत्प्रेक्ष्यते—इति वक्तुं कथयितुम् । किम् । एषा देवीप्रसत्तेः प्रसादस्य पात्रं स्थानं क्रियते । याचना सफला तु प्रसादपात्रीकृतादेव प्रभोः स्यादतो देवी प्रसाद्यत इत्यर्थः । इति किम् । मम गङ्गायाः प्रबला सिद्द्यानत्वेन बलवती चण्डी अत्यन्तकोपना पार्वती सपत्नी वर्तते । द्वयोरपीश्वरपत्नीत्वेन सापत्न्यम् । तथा मम सरस्वत्याः पतिर्ज्यायानतिवृद्धः, तथाज पशुर्ब्रह्मा, तथा वेदजडोऽज्ञानः । 'स्थविरशतानन्दपितामहो कस्तथा परमेष्ठ्यजोऽष्टश्रवण स्वयंभू' इति हैम्याम् । किमपि न वेत्ति वैदिकः । यतः 'न वेदता वेदजडः सवत्काम्' इति नैषधे सरस्वत्या ब्राह्मणत्वीत्वम् । तथा एकादश नाम ब्रह्माणी । इति हेतोर्मम पतिर्भर्तास्ति । तथा भर्त्रा प्रियेण हरिणा कृष्णेन सार्धं मम यमुनाया वियोगो विरहः । 'जम्मन्तरेण विहडइ उत्तममहिलाणजं किय पिम्मम् । कालिन्दा कन्हविरहे अजवि काल जल वहइ ॥' इति वृत्तरत्नाकरवृत्तिबोधकवचनात् । विद्यते इदमेतत्पूर्वोक्तलक्षणम् । तिसृणामप्यस्माकमुपिताना पूरणे प्रदाने कल्पवल्लि सुरलते जहि निवारय मूलाच्छिन्धि । इति विज्ञपयितुमिव । दुःसमसातम् ॥

अध्यारुरुक्षोर्हृदधित्यकाया वपुर्गृहस्य स्मरमेदिनीन्दोः ।
सौवर्णसोपानपरम्परेव मध्ये विरेजे त्रिवली त्रिदश्याः ॥ ८९ ॥

त्रिदश्याः शासनदेवताया मध्ये उदरे त्रिवली विरेजे। हृत् हृदयमेव अधित्यकायामुपरितनभूमिका चन्द्रशालिकामध्यारुरुक्षोरध्यारोढुमिच्छोः । यद्वपु यस्या देव्या वपुरेव गृहं मन्दिरं यस्य तादृशः स्मरः कामः स एव मेदिन्या भूमेरिन्दुराह्लादकत्वाचन्द्रः । 'कामयेम हि महीमिहिकांशो' इति नैषधे । सौवर्णा सुवर्णसंबन्धिनी काञ्चनरचिता सोपानानामारोहणानां परम्परा श्रेणीव ॥

जगत्रयीस्त्रैणजयार्जितायाः श्वैत्येन कीर्तेरनया विजित्य ।
वन्दीकृता निर्झरिणी सुराणामिव त्रिवेणी त्रिवली चकास्ति ॥ ९० ॥

देव्या इति संबन्धात् । त्रिवली मांससंकोचलक्षणा त्रित्वसंख्याकलिता वली चकास्ति दीप्यते । उत्प्रेक्ष्यते—अनया शासनदेवतया कीर्तेः स्वकीययशसः श्वैत्येन शुभ्रिमश्रिया विजित्य पराभूय वन्दीकृता निगृह्य रक्षिता सुराणां निर्झरिणी नदीव गङ्गेव किं निर्झरिणी त्रिवेणी तिस्रो वेण्यः प्रवाहा यस्याः । 'प्रवाह पुनरोघः स्याद्वेणीधारा रयश्च स' इति हैम्याम् । तथा गङ्गायास्त्रिस्रोतस्त्वात् । 'त्रिस्रोता जाह्नवी मन्दाकिनी' इति हैम्याम् । कीर्तेः किंभूतायाः । जगतां स्वर्गपातालभूमण्डलानां त्रयी त्रिकं तस्याः स्त्रैणस्य स्त्रीसमूहस्य सुरासुरनरनागाङ्गनागणस्य जयेन निजवैभवभरेण पराभवेनार्जितायाः स्वीकृतायाः ॥ इति त्रिवली ॥

[illegible] [illegible], [illegible] [illegible]। [illegible]—[illegible] ॥

[illegible] [illegible] [illegible] [illegible]।
[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ॥ ३२ ॥

[illegible] 'पेडू' इति [illegible] [illegible]

[illegible] ॥ [illegible]
[illegible] ॥ ३३ ॥

[illegible]

यथा नैषधे—'उरोभुवा कुम्भयुगेन जृम्भितं नवोपहारेण वयःकृतेन किम्'। 'यौवनेन कृतेन नवीनोपचारेण स्तनकलशद्वन्द्वेन' इति तद्वृत्तिः। नीलं नीलवर्णं सूत्रमदाति। दवरिकेव दत्ता 'दोरी' इति प्रसिद्धा। यः पदार्थो वर्णयितुं प्रारभ्यते तत्र प्रथमं दवरिकासूत्रं दीयते इति सूत्रकृच्छिल्पे प्रसिद्धम् ॥ इति रोमराजी ॥

यस्याः स्तनौ संस्फुरतः सचित्तनिवासिमीनाङ्कमहीधनस्य ।

विलासवत्योरिव शातकुम्भासंदृब्धलीलालयतुङ्गशृङ्गौ ॥ ९५ ॥

यस्या अमलायाः स्तनौ पयोधरौ संस्फुरतः विलसतः। [illegible]—चित्ते [illegible] देवीहृदये निवसनशीलस्य मीनो मत्स्योऽङ्कश्चिह्नं यस्य [illegible]। 'निवसन्-सुधामाजाङ्कस्य प्रियाङ्गुणेषु' इति नैषधे। [illegible] मही भूमिरेव धनं [illegible] राजा तस्य मदनभूपस्य विलासवत्यौ रतिप्रीतिनाम्न्योर्नितम्बिन्योः शातकुम्भेन [illegible] संदृब्धा निर्मिता घटिता वा। हिरण्मयाविर्त्यर्थः। लीलालययोः क्रीडा[illegible] [illegible]त्युन्नता शृङ्गौ शिखरे इव। 'नराद्युगमाभिकारे(?) युग [illegible] पद्मरागो [illegible] शृङ्गा निदाघः' इति लिङ्गानुशासने पुनपुंसकलिङ्गे ॥

तन्निर्वृतेः स्थानमुरोजयुग्मं जागर्ति गीर्वाणमृगीदृशोऽस्याः ।

प्रोद्यन्महानन्दरसा यदस्मिन्मुक्ता दृशो नोपनमन्ति भूयः ॥ ९६ ॥

तत्तस्मात्कारणादस्या गीर्वाणमृगीदृशः [illegible] उरोजयुग्मं [illegible] स्तनद्वय [illegible] स्थानं पदं जागर्ति विद्यते। '[illegible] [illegible] न विद्यते' इति क्रियाकल्पे [illegible]। [illegible] णात् अस्मिन् [illegible] उरोजयुग्मे पयोधरद्वन्द्वे मुक्ता मोक्ष[illegible] [illegible] [illegible] [illegible]। दृशो दृष्टयः प्रोद्य [illegible] [illegible] मानोत्कृष्टानन्दर[illegible] [illegible] [illegible] [illegible] उपनमन्ति [illegible] सर्वथापि [illegible] ॥

[illegible] गतेऽस्त पिशुनस्थि राजराजि [illegible]।

इतीव [illegible] ॥ ९७ ॥

[illegible]

शल्त्वेन वचनचातुर्यं' इति तद्वृत्तिः । उपान्ते समीपे कलामातृकायारम्भतो लिखितगणितादिमाः शकुनरुतपर्यन्ताद्वा सप्तति कला मानवप्रसिद्धाः । देवानां कलास्तु त[illegible] विदन्ति नालीक वाङ्मनोगोचरा अध्येतुकामस्य पठितुमनसः ॥

संक्रान्तवेणीग्रथितप्रसूनपङ्क्तिर्बभौ पृष्ठतटे तदीये ।
संवेशनश्रान्तशयालुकामकृतेऽर्कतूली किमु निम्नमध्या ॥ ४९ ॥

तस्या देव्या इद तदीय तस्मिन्देवीसम्बन्धिनि पृष्ठतटे 'वासउ' इति लोकभाषा[illegible] नाम वपु प्रान्तप्रदेशे सक्रान्ता प्रतिबिम्बिता वेण्या कबर्या या ग्रथिता गुम्फिता वेणी ग्रथनावसरे मध्ये सङ्ख्या प्रसूनाना कुसुमाना पङ्क्ति श्रेणी बभौ विराजते स्म । उत्प्रेक्ष्यते—संवेशनेन रतिप्रीतिपत्नीभ्या सम चिरसभोगेन श्रान्तस्य श्रम प्राप्तस्यात एव [illegible]भोगिना शय्या कुसुमान्यास्तीर्यन्ते इति रीतिस्थिती । अर्कतूली शयालो[illegible] [illegible] कामस्य मदनस्य कृते कार्याय निम्न गम्भीर मध्यमन्तराल [illegible] [illegible] [illegible] अर्कतूली अर्कतूलपटलोपचिता प्रसूनशय्या वा प्रायो [illegible] [illegible] कुसुमान्यास्तीर्यन्ते इति रीतिस्थिती । अर्कतूलीनामा [illegible] [illegible] [illegible] पृष्ठदेश ॥

[illegible]निकान्त्यौति[illegible]पूरितनाभिरम्याः ।
[illegible] स्फुरतीव शोण. ॥ ५० ॥

[illegible]

[illegible] ।
[illegible] ॥ ५१ ॥

[illegible]

यथा नैषधे—'उरोभुवा कुम्भयुगेन जृम्भितं नवोपहारेण वयःकृतेन किम्'। 'यौवनेन कृतेन नवीनोपयानेन स्तनकलशद्वन्द्वेन' इति तद्वृत्तिः। नीलं नीलवर्णं सूत्रमदायि। दवरिकेव दत्ता 'दोरी' इति प्रसिद्धा। यः पदार्थो वर्धयितुं काङ्क्ष्यते तत्र प्रथमं दवरिकासूत्रं दीयते इति सूत्रकृच्छिल्पे प्रसिद्धम्॥ इति रोमराजी॥

यस्याः स्तनौ संस्फुरतः सचित्तनिवासिमीनाङ्कमहीधनस्य।

विलासवत्योरिव शातकुम्भासंदृब्धलीलालयतुङ्गशृङ्गौ॥ ६५॥

यस्या अमर्त्याया स्तनौ पयोधरौ संस्फुरतः विलसतः। उत्प्रेक्ष्यते—चित्ते अर्थाद्देवीहृदये निवसनशीलस्य मीनो मत्स्योऽङ्कश्चिह्नं यस्य स मकरध्वजः स्मरः। 'निपयव सुधामाजाङ्कस्य प्रियाङ्कमुपेयुषः' इति नैषधे। स एव मही भूमिरेव धनं यस्य एतावता राजा तस्य मदननृपस्य विलासवत्यो रतिप्रीतिनाम्न्योर्नितम्बिन्योः शातकुम्भेन सुवर्णेन संदृब्धौ निर्मितौ घटितौ वा। हिरण्मयावित्यर्थः। लीलालययोः क्रीडामन्दिरयोस्तुङ्गावत्युन्नतौ शृङ्गे शिखरे इव। 'नखयुगमधिकाङ्गं सयुगः पद्मरागो भगयुगमघटगोधोगशृङ्गा निदाघः' इति लिङ्गानुशासने पुनपुंसकलिङ्गे॥

तन्निर्वृतेः स्थानमुरोजयुग्मं जागर्ति गीर्वाणमृगीदृशोऽस्याः।

प्रोद्यन्महानन्दरसा यदस्मिन्मुक्ता दृशो नोपनमन्ति भूयः॥ ६६॥

तत्तस्मात्कारणादस्या गीर्वाणमृगीदृशः शासनदेवताया उरोजयुग्मं वक्षोजन्मद्वन्द्वं स्तनद्वयं निर्वृतेर्मोक्षस्य सुखस्य च स्थानं पदं जागर्ति विद्यते। 'सत्तायामस्त्यास्ते जागर्ति च विद्यते' इति क्रियाकलापे सत्तार्थो क्रिया। प्रकटीभवति वा। यद्यस्मात्कारणात् अस्मिन् देव्याः उरोजयुग्मे पयोधरद्वन्द्वे मुक्ता मोक्षं प्राप्ता संसारकारागारादिति। सकलकर्मक्षयान्मुक्तात्मतां गताः। कामुकं रागातिशयान्मुक्ताः प्रेषिता निःक्षिप्ता वा। दृशो दृष्टयः प्रोद्यन्प्रकटीभवन्महानतिशायि आनन्त्याश्रयत्वादानन्दः प्रमोदः संजायमानोत्कृष्टानन्दस्तस्य तत्र वा यो रस आस्वादो रागो वा यासां तादृश्यः सत्यः भूयः पश्चात् उपनमन्त्यागच्छन्ति। तत्रैव स्थिताः तिष्ठन्ति। मुक्तात्मानः कामुकदृष्टयश्च सर्वेऽपि पश्चान्नायान्त्येवेत्यर्थः॥

मित्रे गतेऽस्तं वियुनक्ति राजन्रात्रिः कलत्रं तव नः कुलानि।

इतीव दुःखं गदितुं प्रपन्नौ यद्वक्त्रचन्द्रं किमु चक्रवाकौ॥ ६७॥

कुचावेव चक्रवाकौ स्तनरूपौ वा रथाङ्गपक्षिणौ यद्वक्त्रचन्द्रं यस्या वदनमेव आननरूपं वा चन्द्रं द्विजपतिं प्रपन्नौ समाश्रितौ। 'त्वामेव वीतजनस्य परवारणोऽपि नूनं विभो दरिद्रादिमिव प्रप॥' इति कल्याणमन्दिरस्तवने। उत्प्रेक्ष्यते—दुःखेन प्रकारेण दुःखं स्वकीयात्मीयासात गदितुं कथयितुमेव। इति किम्। ... हे राजन् हे कुलपवान्यव हे न... मित्रे सूर्ये अस्तं ... द्वीपान्तरं वा तेजोपसारं। '... ' इति ... कु-

सर्वाङ्गसृष्टिं सृजतस्तदीयां धातुर्विलग्नस्य विधानकाले ।
प्राप्तः क्षयं सारदलस्य कोशोऽल्पीयस्ततोऽभूदिव मध्यमस्याः ॥ १५ ॥

तस्या इय तदीया सर्वेषा समग्राणामङ्गानामवयवाना सृष्टिं रचना निर्माण सृजत कुर्वतो धातुर्जगत्कर्तुर्विलग्नस्यार्थाद्देवीमध्यस्य विधानकाले प्रणयनसमये सारदलस्य प्रकृष्टनिर्माणयोग्यपरमाणुपिण्डस्य कोशो भाण्डागार क्षय क्षीणता स्तोकभाव प्राप्तः। उत्प्रेक्ष्यते—ततस्तस्मात्कारणादस्यास्त्रिदश्या मध्यमल्पीयः अतिशयेनाल्प कृशतमम भूदिव जातम् ॥ इति मध्यम् ॥

यदङ्गयष्टीवहलीभविष्णुरोचिष्णुरोचिश्चयनिर्झरिण्याः ।
प्रादुर्भवन्ती त्रिवलीविलासिकल्लोलमालेव विभाति मध्ये ॥ १६ ॥

मध्ये अर्थाद्देव्या उदरे विलग्ने त्रिवली त्वक्सकोचलक्षणा त्रित्वसख्यायुक्ता वली [illegible]ली । यथा जिनप्रभसूरिकृतऋषभनम्रस्तवे—'त्रिजगतीं पुनती कविसेविता' इति । विभाति शोभते । 'मध्येन सा वेदिविलग्नमध्या वलित्रय चारु वभार वाला' इति कुमारसभवे । 'मध्येनोदरेण' इति तद्वृत्ति । तथा 'त्रयीमयीभूतवलीविभक्ता,' पुनः 'उदर परिमाति मुष्टिना कुतुकी कोऽपि दमस्वसु किमु । धृततच्चतुरङ्गुलीव यद्वलिभिर्भाति सहेम [illegible]भिः ॥' इति नैषधे । उदरे वलित्रिक भवेद्भाग्यवद्योगिताम् । उत्प्रेक्ष्यते—[illegible] यस्या देव्या अङ्गयष्ट्यासानूलताया । 'अध्याहार स्मरहरशिर[illegible] [illegible] शेषस्याद्भूय. फणसमुचित कायपष्टीनि[illegible]' इति नाघे । तत्र [illegible] [illegible]भजनशील. तथा रोचिष्णु शोभनशीलो यो रोचिश्चय कान्तिनिकरः स एव निर्झरिणी नदी तस्या प्रादुर्भवन्ती प्रकटीभवन्ती प्रकटीसजायमाना विलसति [illegible] [illegible] कल्लोलमाला तरङ्गमण्डलीव । अथवा प्रकटीभवन्ती [illegible] [illegible] [illegible] एव विलसनशीला [illegible] [illegible] ॥

चण्डी सपत्नी प्रबला ममाग्ने ज्यायानसौ वेदजड पतिर्मे ।
[illegible] वियोगो हरिणा ममापि दु[illegible] [illegible] त्रिगुणाम[illegible] ॥ १७ ॥

[illegible] [illegible] मनोविनोदार्थमुपागतानि गुणानि ।
मध्ये [illegible] त्रिवलीच्छलेन [illegible] ॥ १८ ॥

[illegible]

जगन्नयननिमेषाना मुक्ताफलानामामलकमाननमौक्तिकाना श्रेणीना स्रजा हाराणा च आभ्या कुम्भिकुम्भाभ्या सौभाग्य सुषमा सौन्दर्य लभ्यते प्राप्यते। स्वभावेन तु तयोर्मध्ये मुक्ता गुप्ता, न लोचनगोचराः सन्ति। यतो भद्रजातित्वेन तयोस्तेषा-मुत्पादात्॥

प्रसूनताराविलिशालिताया वेणीतमायामुदिते मुखेन्दौ।
यन्माद्यतस्तत्कुचचक्रवाकौ श्रीसूनुसौराज्यविजृम्भितं तत्॥ ७१॥

प्रसूनानि मालतीकुन्दादिकुसुमानि एव श्वेतत्वात्तारास्तारकास्तेषामावलि परम्परा तया शालिताया शोभिताया देव्या शासनदेवताया वेणी कवरी सैव तमा रात्रि। 'त्रियामा यामिनी भौती तमी तमा विभावरी' इति हैम्याम्। तस्या निशाया मुखेन्दौ देवीव-दनचन्द्रे उदिते उदय प्राप्ते सति यत्तस्या कुचौ स्तनावेव चक्रवाकौ रथाङ्गविहगमौ माद्यत मद लभेते। यतस्तयोस्तमाया वियोग एव स्यान्न सयोग। त विरहमपास्य नक्तदिन सयुक्तौ सन्तौ परस्परेण प्रमुदितमनसौ यन्माद्यतस्तत्राहमेवममुना प्रकारेण मन्ये जाने विचारयामि। तत् श्रीसूनोर्लक्ष्मीनन्दनस्य मदनराजस्य सुशोभनराजतायाः सौरा-ज्यस्य विजृम्भित विलसितम्। यदा सुराज्य स्यात्तदा केषामपि दु खातङ्को न स्यादेवेति॥

पत्रावलीव्याजवती यदीयवक्षोजदम्भर्षभनामकूपे।
विजित्य विश्वं विजयप्रशस्तिर्लिपीकृता श्रीसुतचक्रिणेव॥ ७२॥

विश्व सचराचरं जगद्विजित्य निजाज्ञापालनपर प्रणीय श्रीसुतः कामनामा चक्री-सार्वभौम तेन। उत्प्रेक्ष्यते—यदीयो यस्या देव्या अय देवीसबन्धी यो वक्षोजः स्तनः स एव दम्भ. कपट यस्य तादृशे ऋषभनामकूटे क्षुल्लहिमवद्गिरिनिकटवर्तिनि षट्खण्डवि-जयविधायिनश्चक्रवर्तिन स्वनामलिखनस्थाने जिनशासनप्रसिद्धे। ऋषभकूटनामशैल-शिलायामित्यर्थः। पत्रावली पत्रवल्ली स्तनतटे चान्दनद्रवो विविधरचनाविशेष। यथा हेमाचार्यकृतकर्णराजवर्णने—'मुखे हारावाप्तिर्नयनयुगले कङ्कणभरो नितम्बे पत्राली सतिलकमभूत्पाणियुगलम्' इति। यथा पत्राली अपि सैव व्याज. कपट विद्यते यस्यास्ता-दृशी विजयप्रशस्तिरिव लिपीकृता लिखिता। यन्मया सचराचरमपि त्रैलोक्य स्वभु-जवीर्यवैभवेन विजित्य मच्छासनवशवद व्यधायि। इत्यहङ्कारसूचकाक्षरमालिका लिखि-तेव स्वयम्। 'अविरलमिदमम्भ. स्वेच्छयोच्छालयन्त्या विकचकमलकान्तोत्तानहस्त-द्वयेन। परिकलित इवार्थ कामबाणातिथिभ्य सलिलमिव वितीर्ण बाल्यलीलासुखाय॥' इति चम्पूकथायाम्। एवमेका केवलैवोत्प्रेक्षा दृश्यते तस्मात्केवलोत्प्रेक्षा युक्तिमती च-म्पूकेरानयनेनेति न कश्चिद्दोष॥ इति स्तनौ॥

यया स्ववक्षोरुहयोर्जितेन तुङ्गश्रिया रोहणभूधरेण।
दत्तानि दण्डे किमुदात्तलक्ष्मीपुष्पाणि पाण्योर्नखरच्छलेन॥ ७३॥

स्तनान्तरीपाङ्कवपुःप्रसर्पज्ज्योतिःस्रवन्तीसलिलप्ररूढा ।
लोमावली शैवलवल्लरीव रराज राजीवविलोचनायाः ॥ ६१ ॥

राजीवे कमले तत्तुल्ये विलोचने यस्याः कमलचक्षुषो देव्याः लोमावली रोमराजी रराज राजते स्म । उत्प्रेक्ष्यते—शैवलवल्लरीव शैवालमञ्जरीव । 'मुखेन्दुभातस्तनचक्रवाकचञ्चुच्युता शैवलवल्लरीव' इति कुमारसम्भवे । किंभूता । स्तनौ कुचावेवान्तरीपे अन्तर्जले तटे द्वीपौ अङ्के उत्सङ्गे मध्ये यस्यास्तादृशे वपुषि काये वपुषो देहस्य वा प्रसर्पति कल्लोलविलासैरितस्ततः प्रसरति ज्योतिः कान्तिरेव स्रवन्ती नदी तस्याः सलिले पानीये जलमध्ये प्ररूढा समुद्गता । प्रादुर्भूतेत्यर्थः ॥

विनिद्रनीलोत्पलकेसरश्रीः स्वःसुभ्रुवो राजति रोमराजी ।
किं तुङ्गवक्षोजकलिन्दशृङ्गिशृङ्गान्तरोदीतकलिन्दकन्या ॥ ६२ ॥

स्वःसुभ्रुवः सुराङ्गनायाः । 'स्वः स्वर्गिवध्वोऽप्सरसः' इति हैम्याम् । रोमराजी रोमलेखा राजति । किंभूता । विनिद्राणि विकसितानि यानि नीलोत्पलानि इन्दीवराणि तेषामिव श्रीः शोभा सौन्दर्यं यस्याः । उत्प्रेक्ष्यते—तुङ्गावत्युच्चौ यौ वक्षोजौ कुचौ तावेव कलिन्दनाम्नः शृङ्गाणि शिखराणि सन्ति यस्यासौ स शृङ्गी शैलस्तस्य शृङ्गान्तरे शिखरमध्ये उदीता प्रादुर्भूता कलिन्दकन्या कालिन्दी किं यमुनेव ॥

स्मरद्विपस्यैणमदाभिरामवक्षोजविन्ध्याचलसंनिधाने ।
नाभीह्रदाभ्यर्णविभासिनी यल्लोमावली केलिकृते वनीव ॥ ६३ ॥

यल्लोमावली यस्या रोमराजी स्मरद्विपस्य काम एवातिमदोन्मत्तत्वाद्गजः [illegible] केलिकृते क्रीडाकरणार्थं वनी उद्यानमिव । '[illegible]' इति [illegible] । [illegible] स्थाने । एणमदं एणानां मृगाणां मदः [illegible] रसैरभिरामः । 'मदो रेतो [illegible] दानयोर्गर्वे । वीर्य कस्तूरिकामुदोः' इति [illegible] । [illegible] कस्तूरिका [illegible] पनाभिरामो यो वक्षोजः स्तनः । एव [illegible] संनिधाने समीपे । [illegible] प्रदेशे इत्यर्थः । किंभूता वनी । नाभिरूपो ह्रदो [illegible] पानीय [illegible] इत्येवंशीला ॥

निजाद्रिलब्धौ [illegible] श्रेण्या [illegible] त्रिदश्याः ।
मध्यं कृशं वर्धयितुं [illegible] नीकमदादि [illegible] ॥ ६४ ॥

[illegible]

दङ्गुलीभूय देवीकरशाखाभाव इवापे प्राप्तः । द्रुमप्रवालैरतीव तपन्महत्ता यदङ्गुलीवभूव इत्यर्थः ॥

सुपर्वपारिप्लवलोचनायाः श्रियं दधौ धोरणिरङ्गुलीनाम् ।
विजृम्भमाणारुणपाणिपङ्केरुहे प्ररूढा दलमालिकेव ॥ ७७ ॥

यद्भालदम्भाज्जलजासनेन मन्ये प्रणिन्ये कलधौतपट्टः॥ १५१॥

रतिप्रीतिनाम्नीभ्यां द्वाभ्यां नितम्बिनीभ्यां गृहिणीभ्याम्। 'रतिप्रीती इव स्मरः' इति प्रतिक्रमणसूत्रवृत्तौ। ततो मदनस्य एका रतिः अपरा च प्रीतिः एते द्वे पत्न्यौ ताभ्यां सार्धं राज्ञामभिषेकसमये राज्ञीनामप्यभिषेको दृश्यते। यथा 'कृताभिषेका महिषी' इति हैम्याम्। स्मरं कामं भुवनाधिपत्ये त्रैलोक्यराज्ये अभिषेक्तुमभिषेकं विधातुम् अहमेवं मन्ये जानामि। उत्प्रेक्षे वा। जलजासनेन कमलविष्टरेण ब्रह्मणा यस्या देव्या भालस्य ललाटस्य दम्भात्कपटात्कलधौतस्य काञ्चनस्य पट्टः पट्टकः प्रणिन्ये विनिर्मित इव॥

त्रैलोक्यमाक्रम्य पराक्रमेण सुखं निषण्णस्य झषध्वजस्य।
व्यधत्त हेम्नः फलकं विधातावष्टम्भनायेव तदीयभालम्॥ १५२॥

विधाता ब्रह्मा। झषो मीनो ध्वजः केतनं चिह्नं वा यस्य स मत्स्यलाञ्छनो मदनः अर्थान्मन्मथपृथ्वीपतिस्तस्यावष्टम्भनाय पृष्ठप्रदानार्थम्। उत्प्रेक्ष्यते—तदीयं शासनसुरीसंबन्धि भालं ललाटं हेम्नः काञ्चनस्य फलकं 'पाटिउ' इति प्रसिद्धं व्यधत्त विदधाति स्म चकार। किंभूतस्य झषध्वजस्य। पराक्रमेण स्वपुरुषाकारेण निजभुजवीर्यं कृत्वा त्रैलोक्यं तात्स्थ्यात्तद्व्यपदेशात्सुरलोकपातालभूर्लोकवासिनः सुरासुरनागनागरनिकरानाक्रम्य पराभूय स्वाज्ञैकवशंवदीकृत्य सुखं भावेन निषण्णस्योपविष्टस्य आसीनस्य॥

तद्भ्राशीक्रमसेविदेवविमलव्यावर्णिते हीरयु-
क्सौभाग्याभिधहीरसूरिचरिते सर्गोऽजनिष्टाष्टमः ॥ १७१ ॥

पण्डितदेवविमलगणिविरचितायां स्वोपज्ञहीरसौभाग्यनाममहाकाव्यवृत्तौ अष्टानां सङ्ख्यापूरणोऽष्टमः सर्गो बभूव जातः ॥

इति पण्डितसीहविमलगणिशिष्यपण्डितदेवविमलगणिविरचितायां स्वोपज्ञहीरसौभाग्यनाममहाकाव्ये ध्यानविधानशासनदेवीसमागमतत्सर्वाङ्गवर्णनो नामाष्टमः सर्गः ॥

नवमः सर्गः ।

अथ सा त्रिदशी सूरिपुरहूतपुरो व्यभात् ।
मुक्तिसीमन्तिनीमुक्तदूतीव विवरीषया ॥ १ ॥

अथ ध्यानविधानसमये पुरः प्रत्यक्षागमनानन्तरं सा पूर्वव्यावर्णितस्वरूपा त्रिदशी शासनदेवता सूरिषु पुरहूतः पुरंदरो हीरविजयसूरीन्द्रस्तस्य पुरोऽग्रतो व्यभाद्विभाति स्म । उत्प्रेक्ष्यते—मुक्तिः सिद्धिरेव सीमन्तिनी अत्रार्थात्स्वयंवरवनिता अथ वा वामुकी अन्या सामान्या वशा तया मुक्ता प्रेषिता दूती शासनहारिकेव । 'शासनहारिणी [illegible]' इति [illegible] । किं चिकीर्षया । विशेषेण महामहपुरःसरं वरीतुं पाणिं गृहीतुमिच्छया परिणयनाभिलाषेण ॥

वाग्विलासैः सृजन्तीव हारहूरावहेलनाम् ।
तृणतां च नयन्तीव निक्वणं वेणुवीणयोः ॥ २ ॥

पिकीव पञ्चमोद्गारभृतोः सख्युर्मनोभुवः ।
गीर्वाणगृहिणी वाणीं श्रमणेन्दोः पुरोऽवदीत् ॥ ३ ॥

सा गीर्वाणगृहिणी शासनसुरी श्रमणेन्दोर्मुनिपुङ्गवस्य पुरः पुरस्तात् [illegible] वाचमवदीज्जगाद । वचनमुवाचेत्यर्थः । केव । पिकीव । यथा कोकिला मनोभुवः स्मरस्य सख्युर्मित्रस्य ऋतोर्वसन्तस्य । 'सखा रतीशस्य [illegible]' इति [illegible] । [illegible] '[illegible] मधुसमये सर्वससारवती' इति [illegible] । पुरः अग्रे पञ्चमोद्गारं [illegible] श्रीराग-वसन्तराग-पञ्चमराग-भैरवराग-मेघराग-[illegible]-इत्येषु षट्स्वपि रागेषु प्रायो विलासिनां पुनः पञ्चमरागो [illegible] स्यात् । [illegible] पञ्चमो [illegible] स्वरोद्गारं ध्वनितं गृह्णाति । पञ्चमालापं कुरुते इत्यर्थः । [illegible]—[illegible] स्ववचनरचनाविच्छित्तिभिः कृत्वा हारहूराणां [illegible] [illegible] सृजन्तीव विदधतीव । च पुनर्वेणुवीणयोः [illegible] [illegible] निक्वणं [illegible] तृणतां नयन्ती प्रापयन्तीव ॥ युग्मम् ॥

पद्मं कमलं भ्रमन्तो मधुपानकृते समेत्य लोलुभतयेतस्ततो भ्राम्यन्तो ये भृङ्गा भ्रमरास्तेषां गणस्य समुदायस्य क्वणेन गुञ्जारवेण कृत्वा। उत्प्रेक्ष्यते—एतस्य स्वबन्धोः सूर्यस्य पुरोऽग्रे स्वमात्मीयं निर्वेदं पराभवोद्भूतभूयस्तरखेदं निजावमाननादुःखं वा आवेदयते कथयतीव। किं कृत्वा। बन्धोः स्वमित्रस्य। अब्जबन्धोररविन्दसुहृदो भानोः करक्रोडे हस्तोत्सङ्गे एत्यागत्य। 'चक्राब्जाह्वबान्धवः सप्तसप्तिः', तथा 'मित्रो ध्वान्ताऽरातिरब्जाशुहस्तः' इतीदं द्वयमपि हैम्याम्। तथा 'स्फुटारविन्दाङ्कितपाणिपङ्कजम्' इति नैषधे। किंभूतं पद्मम्। यस्या देव्या आननस्य स्वपरिस्पर्धिपराभावुकवैभववदनस्य श्रिया शोभया जितं पराभूतम्॥

वक्त्रं त्रिदश्या विजितात्मदर्शनिशामणिं प्रेक्ष्य हिरण्यगर्भः।
सृष्टिं सिसृक्षुः किमदोनुरूपां विनिर्मिमीतेऽम्बुजहस्तलेखम्॥ १५७॥

हिरण्यगर्भो ब्रह्मा अम्बुजैः सकलकमलकलापैः कृत्वा हस्तलेखम् 'हस्तोटक' इति प्रसिद्धम्। विनिर्मिमीते कुरुते। उत्प्रेक्ष्यते—अदोनुरूपाम् अस्या गीर्वाणगृहिणीन्द्राराविन्दसदृशीम्। 'अदःसमित्समुरावैरियौवतत्रुटद्भुजा कम्बुमृणालहारिणी' इति नैषधे। अदसोऽन्तोऽदसुशब्दः। सृष्टिं रचनां सिसृक्षुः स्रष्टुमिच्छुः कर्तुं काङ्क्षितः। किं कृत्वा। विजिताः सर्वभावाभिभूता आत्मदर्शा दर्पणा निशामणयश्चन्द्रमसो येन तादृशं त्रिदश्या वामनयुररमण्या वक्त्रं वदनं प्रेक्ष्य दृष्ट्वा। वक्त्रशब्दः पुनपुंसकलिङ्गयोः। 'नेत्र [illegible] [illegible]गमरोशीरान्धकारावर.' इति लिङ्गानुशासने॥

मन्ये कुमुद्बन्धुरिदंमृगाङ्कमुखीमुखीभूय सुखी बभूव।
नियन्त्र्य यत्नेन तमः स्वदस्युः प्राक्षेपि पृष्ठे स्फुटकेशकायः॥ १५८॥

अहं मन्य ऊहेयमनुना प्रकारेण मन्ये विचारयामि। यत्कुमुद्बन्धुः [illegible] इदम्मृगाङ्कमुखीमुखीभूय इयं चासौ मृगाङ्कमुखी च कौमुदीदयितवदना च तस्या मुखी भूय वदनभावं [illegible]। '[illegible] नृपप्रार्थि[illegible]ऽर्थिभि.' इति नैषधे। [illegible] [illegible]न्तः। सुखी बभूव [illegible] निश्चिन्तो वा [illegible]। [illegible] [illegible] [illegible] एव [illegible] [illegible] [illegible] [illegible]। [illegible] नियन्त्र्य बद्ध्वा पृष्ठे [illegible] [illegible]। [illegible] [illegible]। '[illegible]' इति [illegible] [illegible]। [illegible] [illegible] इति [illegible]॥

[illegible] [illegible] [illegible] [illegible] [illegible]।
निर्मिन्ध [illegible] पश्चाद्[illegible] [illegible]॥ १५९॥

[illegible]

[illegible]

वाचं वाचंयमश्रेणीरोहिणीरमणस्ततः ।
तत्पुरो आह्वयामास सुधाया औरसीमिव ॥ ८ ॥

ततो देवीवचनानन्तरं वाचंयमानां श्रमणानां श्रेणीषु धोरणीषु रोहिणीरमणः विभावरीवल्लभः सूरीन्द्रः तत्पुरो जिनशासनदेवतापुरस्तादग्रे वाचं वाणीं आह्वयामास जगाद । उवाचेत्यर्थः । उत्प्रेक्ष्यते—सुधाया अमृतस्य औरसी सुजाता केवलपितृभार्योत्पन्नामिव नन्दिनीमिव । 'सुजातस्त्वौरसोरस्यौ' । पुत्री त्वौरसी । 'उदश्रुरेव व्यसृजन्निजौरसीम्' इति नैषधे ॥

अदृग्गोचरपारस्य वाङ्मयस्याम्बुधेरिव ।
यन्मनीषा सुखं देवि तरीव पारदृश्वरी ॥ ९ ॥

विनेया विनयावासाः कतिचित्ते ममासते ।
शौण्डीरिमधरा गन्धसिन्धुरा इव बन्धुराः ॥ १० ॥

हे देवि, मम ते स्वगुणैर्विख्यातिभाजः कतिचित्कियत्सङ्ख्याका विनेयाः शिष्या आसते सन्ति । 'आसते शतमधिक्षिति भूपास्तोयराशिरसि ते खलु कूपः' इति नैषधे । तथा 'सत्तायामस्त्यास्ते' इति क्रियाकलापे । किंभूताः । विनयावासाः विनयकुलमन्दिराणि । पुनः किंभूताः । बन्धुराः कौलीन्यादिगुणोपेताः । पुनः किंभूताः । शौण्डीरिमाणं कर्मसपत्नसेना प्रतिशौर्यं धरन्तीति । के इव । गन्धसिन्धुरा इव । यथा गन्धहस्तिनः प्रत्यर्थिपृतनापराभवनपटवो भवन्ति । ते के । येषां विनेयानां मनीषा प्रतिभा सुखं यथा स्यात्तथा अदृग्गोचरो नयनविषयो न चक्षुर्ग्राह्यः पारं परतीरं यस्य । पारशब्दः पुनपुंसकलिङ्गयोः । तादृशस्याम्बुधेरिव समुद्रस्येव वाङ्मयस्य सिद्धान्तस्य सर्वशास्त्रस्य वा तरीव नौरिव पारदृश्वरी पारं दृष्टवतीति पारगामिनी । 'वनोरच्' । 'वनन्तात्स्त्रियामीप्प्रत्ययो भवति रश्चान्तादेशः' इति प्रक्रियासूत्रेण ईप्प्रत्ययः, नकारस्य रकारः । पारदृश्वरी ॥ युग्मम् ॥

मध्येऽमीषां विनेयानां कतमः कमलानने ।
भास्वान्विष्णोरिव पदे ममास्त्यभ्युदयगमी ॥ ११ ॥

हे कमलानने पद्मवदने शासनदेवि, अमीषां विनेयानां शिष्याणां मध्ये कतमः शिष्यः मम पदे पट्टे अभ्युदयं पट्टधारितां गमिष्यत्यभ्युदयगमी अस्ति । अभ्युदयं जगद्विख्यातत्वं गमिष्यतीत्येवंशीलो गमी । 'भविष्यति गम्यादयः' । 'गम्यादीनामुपसङ्ख्यानणिनि वा वृद्धिर्यति' । यदुक्तं नैषधे—'साधोरपि स खलु गामिनापोगमी स तु स्वर्गमितः प्रयाणे' इति । साधनिका तु प्रागुक्ता विकल्पेन वृद्धिर्गामी गमी । क इव । भास्वानिव । यथा भास्करो विष्णोः पदे गगने अभ्युदयं गच्छति ॥ इति गुरोर्देवीप्रश्नः ॥

सीमन्तः स्यादेवेति । स देवीसीमन्तो यूनां वयःस्थानां तरुणानां मनांसि सस्मरविकारचेतांसि उन्मादयामास । 'उन्मादश्चित्तविप्लवः' । तद्युक्तानि कृतवानित्यर्थः । उत्प्रेक्ष्यते—अवरोधैरन्तःपुरपुरंध्रीभिः रतिप्रीतिनाम्न्यौ द्वे पत्न्यौ प्रसिद्धे स्तः, परमन्या अपि भाविन्यः एवमवसीयते कविसमयानुसारेण । यदुक्तं नैषधे—'सखीशतानां सरसैर्विलासैः स्मरावरोधभ्रममावहन्ती । विलोकयामास सभां स भैम्याः' इति । चरतः अत्र देवीशिरसि सचरतः सतः अनङ्गरङ्गाभिधाने शास्त्रे प्रोक्तमस्ति यत्पञ्चदशसु तिथिषु स्त्रीणां पञ्चदशसु शिरःप्रभृतिषु स्थानकेषु स्मरः सचरति इति । स्मरस्य कामस्य व्यक्तीभवन्ती प्रकटा जायमाना एषा केशवर्त्मलक्षणा पदवी मार्ग इव । यतो घनजलसंचारेण अमार्गो मार्गः स्यादिति प्रत्यक्षं लक्ष्यते ॥

प्रेक्ष्य स्वदाहे ज्वलितास्त्रमालां जेयं कथं विश्वमिदं मयेति ।
पितामहोऽदान्मदनस्य तस्याः सीमन्तदण्डं विमनायितस्य ॥ १६३ ॥

पितामहो ब्रह्मा पितुः पिता च इत्यमुना प्रकारेण विमनायितस्य विरुद्धमना इवाचरितस्य विमनस्कीभूतस्य मदनस्य । उत्प्रेक्ष्यते—तस्या मन्युभुञ्जानिन्याः सीमन्तरूपो दण्डः प्रतिभटकोटिकटकाप्रतिहतिप्रचण्डदण्डरत्नमदादिव पौत्रप्रेम्णा प्रदत्तवानिव । इति किम् । स्वदेहदाहे शंभुना कोपानलेनात्मशरीरभस्मीकरणसमये ज्वलितां दग्धां भस्मीभूतामस्त्रमालां प्रहरणपटलीं प्रेक्ष्य निर्णाय । अथो भस्मीभूताशेषास्त्रसंघातेन मया विजयिना मदनेन विश्वं त्रिभुवनं कथं केन प्रकारेण जेयं जेतव्यं पराभवनीयं वशीकर्तव्यं वा इति ॥

सिन्दूरपूरप्रचितेन तस्याः सीमन्तदण्डेन शिरोरुहाली ।
विद्युद्विलासेन पयःप्रपूर्णा पयोमुचां पङ्क्तिरिव व्यराजत् ॥ १६४ ॥

पूरशब्दोऽत्र लक्षणया समूहवाची । सिन्दूरपूरेण शृङ्गारभूषणगणेन प्रचितेन व्याप्तेन । सिन्दूरपूरितेनेत्यर्थः । सीमन्तदण्डेन कृत्वा तस्या देवताया शिरोरुहाली कचपङ्क्तिः व्यराजद्भाति स्म । का केनेव । पङ्क्तिर्विद्युद्विलासेन । यद्वा पयोभिः पानीयैः प्रपूर्णानां निर्भरभृतानां पयोमुचां वर्षन्मेघानां मालिका तडिद्विलसितेन कृत्वा विद्युद्विलसितेन कृत्वा विराजते ॥ इति सीमन्तः ॥

प्रफुल्लमल्लीकुसुमावनद्धयत्केशपाशः स्फुरयाम्बभूव ।
अपूजि पुष्पैरिव चामरादिद्विपज्जयस्यावसरे दिगीशैः ॥ १६५ ॥

प्रफुल्लैर्विकसितैर्मल्ल्या मल्लिकाया विचकिलस्य । 'मल्लीभिः पतिमल्लीभिः [illegible] भाति भावत्की' इति राजवर्णने । कुसुमैः पुष्पैरवनद्धो ग्रथितो यस्या मल्लीमालिकाभिः केशपाशः स्फुरयाम्बभूव विभ्राजते स्म । अत्र [illegible] । [illegible] चामरादीनाम् । आदिशब्दात् [illegible] । [illegible]

हे हीरविजयसूरे, त्वयास्मिन् जयविमलप्रधाने पट्टधुर्ये गणभारधुरीणे निर्मिते कृते काप्यद्भुतवैभवा जगदाश्चर्यकारिणी शासनस्य श्रीजिनमतस्योन्नतिर्भाविनी भविन्नी । केनेव । राज्ञेव । यथा भूमीपतिना ऊर्जिते प्रबलबले युवराजे पट्टधुर्ये निजराज्यधुराधुरंधरे विहिते सति शासनानामुपलक्षणात् पुरनगरग्रामजनपदानां न्यायविधिं विदधति सति समुन्नतिर्भवति । 'दीयता दशलक्षाणि शासनानि चतुर्दश' इति विक्रमार्कदानपत्रे श्लोकः । अथवा शासनस्याज्ञायाः काप्यद्भुता उन्नतिर्जायते । कोऽप्याज्ञां नोल्लङ्घयतीत्यर्थः ॥

विक्रमार्क इव श्रीमत्सिद्धसेनदिवाकरात् ।
त्वत्तस्तदनु कोऽप्युर्वीनभ्रो बोधिमवाप्स्यति ॥ १७ ॥

हे देव, तस्य जयविमलस्य पट्टस्थापनानन्तरं त्वत्तः श्रीमत्सकाशात् कोऽप्यद्भुतवैभवः । उर्वी पृथिवी तस्या प्रबलप्रतापैः नभ्र इव नभ्रः सहस्रकिरणसदृशो महामण्डलीकमहीपतिर्बोधिं सम्यक्त्वमवाप्स्यति लप्स्यते । क इव । विक्रमार्क इव । यथा श्रीमतः पूर्वादिज्ञानातिशायिगुणैः कलिकालसर्वज्ञ इति बिरुदधारणासाधारणलक्ष्मीवतः सिद्धसेनदिवाकराद्विक्रमादित्यनृपो बोधिबीजमवाप्तवान् ॥ इति देवतया पट्टधुरधरकथनम् ॥

समाकर्ण्य सुरीवर्ण्यमानं तं पिप्रिये प्रभुः ।
रथाङ्गवन्निशावेदिगदिताभ्युदयं रविम् ॥ १८ ॥

प्रभुः सूरीन्द्रः सुर्या शासनदेवतया वर्ण्यमानं श्लाघ्यमानं तं जयविमलनामानं प्रशंसां समाकर्ण्य श्रवणगोचरीकृत्य पिप्रिये निजपट्टाभ्युदयविभावनाभिप्रायेण हृदये परमां प्रीतिं प्राप्तवान् । 'प्रीङ् प्रीतौ' । जहर्षेत्यर्थः । किंवत् । रथाङ्गवत् । यथा चक्रवाकः निशावेदिभिस्ताम्रचूडैर्गदितो निवेदितोऽभ्युदय उद्गमनसमयो यस्य तादृशं रविं दिवाकरं प्रीयते प्रियाभिः परस्परवियोगापगमाशया हृष्यति ॥

इत्यतर्क्यत तेनान्तर्भाग्यसौभाग्यभूरसौ ।
प्रणुन्नयेव पुण्यैर्यत्रिदश्यापि प्रशस्यते ॥ १९ ॥

तेन सूरिणा अन्तर्मनोमध्ये इत्यमुना वक्ष्यमाणप्रकारेण अतर्क्यत विचार्यते स्म । इति किम् । यदसौ मद्विनेयो जयविमलाभिधानविबुधः भाग्यं भागधेयं पुण्यं तथा सौभाग्यं सुभगता लोके विख्यातिर्वा तयोर्भूः स्थानं वर्तते यद्यस्मात्कारणात् त्रिदश्या जिनशासनवृन्दारिकयापि प्रशस्यते । उत्प्रेक्ष्यते—पुण्यैरर्थात्तत्सुकृतैः प्रणुन्नया प्रेरितयेव ॥

मेरुभूरिव भात्येषा जिनपट्टपरम्परा ।
समुद्भवन्ति येनास्यां सूरीन्द्राः स्वर्द्रुमा इव ॥ २० ॥

एषा निःशेषगणधरधोरणी तरुणीचूडामणीभूता अभ्युदिता अभ्युदीयमाना अभ्यु-

र्वन्ती । आमोदैः स्वाभाविकशरीरसुरभिताभिर्वदनारविन्दामोदैर्वा दिशः सर्वा अपि कुर्व-
अहर्निशं नित्यं सौरभयन्ती सौरभकलिताः कुर्वन्ती । सुरभेर्भावः सौरभम्, सौरभगुणं करोतीति सौरभयति । सुगन्धयन्ती । कैरिव । मलयानिलैरिव । यथा मधुमासे मलय-समारुतैः कृत्वा दिशः सुगन्धीकरोति ॥

दिव्यैर्दुकूलाभरणैर्विभूषिता संपूरयन्ती जगतामपीहितम् ।
आकृष्य भाग्येन विभोर्मरुल्लता नीता पुरस्तादिव देवता बभौ ॥९९॥

देवता शासनदेवी बभौ शुशुभे । किंभूता । दिव्यैर्देवतासंनिधिभिर्दुकूलैः क्षौमैः तथा आभरणैः कनकमणिविभूषणैः कृत्वा विभूषिता अलंकृता । किं कुर्वन्ती । जगताम् जगज्जनानां विशेषतो जिनशासनैकतानलीनमनसां भव्यलोकानामीहितमीहितं मनःकामितं संपूरयन्ती पूर्णीकुर्वन्ती । इच्छापूरणपर्यन्तं प्रयच्छन्तीत्यर्थः । उत्प्रेक्षते— विभोर्गुरोर्भाग्येन सुकृतेन आकृष्य पुरस्तान्नीता मरुल्लता सुरवीरुत्कल्पवल्लीव ॥

निखिलदिग्विषयोपलेखाकुमुद्वनकौमुदी
श्रिततनुलता तद्भाग्यश्रीरिवामरसुन्दरी ।
नखरशिखरादारभ्येति क्रमाच्चिकुरावधि
प्रथितगुणममाश्लिष्यन्ती पुरः शुशुभे प्रभोः ॥ १०० ॥

अमरसुन्दरी श्रीजिनशासनाधिष्ठिता प्रभोः [illegible] पुरोऽग्रे शुशुभे [illegible] । किंभूता । निखिला समस्ता ये [illegible] कौमुदी चन्द्रचन्द्रिका । [illegible]

[illegible]

जगान् भाविनि भूतोपचारात् अमारिजीजियकादिकरवन्दिमोचनप्रकारेणाह्लाद प्रमोद धर्मोपदेशप्रदानादिना भाविकलोकान् आनन्द लम्भयन् प्रापयन् । क इव । भानुमानिव । यथा सहस्ररश्मि' कोकाधिकवाकानाह्लाद लम्भयति । पुन किंभूत. । दानलीलायितैः स्वविश्राणनविलसितै. कृत्वा कल्पभूरुहा सुरतरूणा हेलामवगणना कल्पयन् कुर्वन् । अत्र गर्भितोपमा । पुनः किंभूत । अशेषजन्तुष्मतां समस्तजन्तुजातानां प्रबोध विदधत् । किमिव । प्रातरिव । यथा प्रभात दिवसमुख सर्वजनानां जागरण विनिद्रता विधत्ते । जागरयतीत्यर्थः । पुन किंभूत. । सुमन श्रिया सुशोभन निष्पापाद्रोहनिर्दम्भसर्वसत्त्वहितावह मनो येषा तेषामुत्तमाना श्रिया लक्ष्मीणा उल्लास स्फारीभाव प्रणयन् सृजन् । क इव । पुष्पकाल इव । यथा वसन्तसमयः कुसुमश्रीणा विकास प्रणयति कुरुते । अथ वा पूर्वश्लोकद्वयप्रतिपादितानि शत्रन्तानि संबोधनान्येव ज्ञेयानि । 'गतिस्तयोरेष जनस्तमर्दयन्न हा विधे त्वां करुणा रुणद्धि नः' इति नैषधे । 'हे अर्दयन् हे विधे' इति तद्वृत्ति' । तथा संबोधने च । 'संबोधनेऽपि शत्रानशौ भवतः । हे पचन् हे पचमान जयमान' इति प्रक्रियायाम् । एव संबोधनैर्वाभिमुख देवता प्रणमति स्म ॥ त्रिभिर्विशेषकम् ॥

ततोऽस्या धर्मलाभाशीर्व्यश्राणि श्रमणेन्दुना ।
श्रेय सिद्धेरुपादानं तस्याः संप्रस्थिताविव ॥ २६ ॥

ततो देवीप्रणमनानन्तर श्रमणेन्दुना सूरिचन्द्रेण अस्या देव्या धर्मलाभाभिधा आशीर्मङ्गलशासनवाक् व्यश्राणि विश्राणिता प्रदत्ता । उत्प्रेक्ष्यते—तस्याः संप्रस्थितौ सम्यक्शुभावहप्रयाणे स्वगृहगमनावसरे श्रेयस कल्याणस्य सिद्धेर्निष्पत्तेरथ वा सर्वमङ्गलकुलगृहसिद्धेर्मुक्तेरुपादान परम कारणमिव ॥

पुन. स्वल्पेऽपि कार्येऽह धुर्येण गणधारिणाम् ।
प्रसादपात्रीकर्तव्या किंकरीवामरी त्वया ॥ २७ ॥

हे देव, गणधारिणा गच्छभारसासहीना सूरीणा मध्ये धुर्येण धौरेयेण । गणधरधुरंधरेणेत्यर्थ । त्वया भगवता पुनर्द्वितीयवार स्वल्पे स्तोकेऽपि कार्ये कर्तव्ये किंकरी चेटी दासीव अह श्रीमच्चरणसेविका अमरी शासनदेवता प्रसादस्य प्रसत्ते. पात्रीकर्तव्या स्थानक कार्या । स्मर्तव्येत्यर्थ ॥

इत्युदित्वा प्रभुं नत्वा मोदमेदस्विनी तत ।
क्षणिकेव क्षणादासीददृश्या द्योतिताम्बरा ॥ २८ ॥

देवी शासनसुरी क्षणात्क्षणमात्रान्निमेषमात्रात् क्षणिकेव विद्युदिवादृश्या दृशोरगोचरा आसीत् । गतेत्यर्थ. । किंभूता । द्योतित स्वकान्त्या प्रकाशितमुद्द्योतयुक्त कृतमम्बरमाकाश यया । पुन' किंभूता । मोदेन सूरिदर्शनोद्भूताद्वैतानन्देन कृत्वा मेदस्विनी रोमाञ्चकञ्चुकितकाययष्टित्वात्पुष्टा । हर्षप्रकर्षवतीत्यर्थः । किं कृत्वा । इति पूर्वोक्तप्रकारेण

स्वयं श्रमणशक्रेण ध्यानेनेवानुगामिना ।
यदाहूतानुगृह्याहं कारणं तत्प्रसाद्यताम् ॥ ४ ॥

अनुगामिना सेवकेनेव ध्यानेन सूरिमन्त्रस्य प्रणिधानेन स्मरणेन जापेन वा [illegible] श्रमणशक्रेण वाचयमत्रास्तोष्पतिना स्वयमात्मना यत्कारणमुद्दिश्य अनुगृह्य ममोपरि [illegible] प्रसीद प्रसाद प्रविधाय अहमाहूता आकारिता तदाकारण यत्कारण गहेतु प्रसाद्य [illegible] निगद्यताम् । ममेति शेषः ॥

व्यापार्य कार्ये क्वचन किंकरीं मां कृतार्थय ।
वज्रस्वामीव पद्मस्यार्थने पाथोधिनन्दनाम् ॥ ५ ॥

हे प्रभो सूरे, क्वचन कस्मिन्कार्ये कर्तव्ये व्यापार्य आज्ञामनुज्ञा वा प्रदाय [illegible] किंकरीं श्रीमच्चरणसरोरुहसेविका मां त्वं कृतार्थय सफलीकुरु । क इव । वज्रस्वामीव । [illegible] द्वादशाब्दिके दुर्भिक्षे सकलप्रावरणपट्टाभ्यासनपूर्वक नीत्वा देशममानीते तद्देश [illegible] कुसुममानाभिमानायितेन संघेन पर्युषणापर्वणि जिनपूजाकृते कुसुमान [illegible] श्रीवज्रस्वामी [illegible] आगमनकारणप्रश्नानन्तरं [illegible] पाथोधिनन्द [illegible] कृतार्थयामास ॥

निगद्यते जिनाधीशशासनामरसुन्दरी ।
[illegible] मुखे शारदीनेव शिखिमण्डली ॥ ६ ॥

[illegible]

[illegible]

[illegible]

चन्द्रश्चङ्क्रमणक्लान्तं स्वाशनायितरोहितम् ।
वनाय मोक्तुमस्ताद्रेरध्यास्त किमधित्यकाम् ॥ ३२ ॥ ✓

चन्द्रो मृगाङ्कः अस्ताद्रेश्चरमाचलस्याधित्यकामूर्ध्वभूमीं नर्तेगिर [illegible] शिखररानदपीनध्यास्त आश्रयति स्म । उत्प्रेक्ष्यते—चङ्क्रमणे चतुर्यामीं यावदविश्रमेण निखिलनभोभ्रमणेन क्लान्तं परिश्रान्तं विभातप्रायाया विभावर्या रसात्मनः क्रोडनिलीयमानपाल्यमानम् । अथ वाशना या बुभुक्षा सजाता अस्येत्यशनायितं बुभुक्षाक्रान्तमुदि रोहितमङ्कमृगभेदगतकुरङ्गम् । यतो 'मृगभेदाश्चरन्यकुरङ्गुगोकर्णशवरा । चमूरुचीनचमरा गमगणरा रोहिषा । कदली कन्दली कृष्णसार' पृषतरोहिताः ॥' इति [illegible], तथा '[illegible] गृहचलच्चक्षुपमाचचक्षे,' तथा 'नश्यत्पृषतीविलोचने,' तथा 'पृषति[illegible]ओरी [illegible] कथ मनोवृत्तिमपि द्विपाधिपे,' तथा 'गुप[illegible] नगत्येव [illegible]' इत्यादि [illegible] । [illegible]गभेदा मृगा एवोक्ताः सन्तीति । तथैवात्र रोहितनामा मृगभेदविशेषः । वनाय चरणार्थं मोक्तुमिव । 'वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच' इति रघौ । मोचनार्थमिव ॥

विधुना वाक्सुधास्यन्दिवदनेन विधुर्जितः ।
तत्तुलाप्त्यै तप.काङ्क्षीवागाद्रस्ताद्रिगह्वरं ॥ ३३ ॥

विधुः मृगाङ्कः अस्ताद्रे प्रतीचीपर्वतस्य गह्वरे निबिडविटपिकोटरान्[illegible] या वा [illegible]गादाजगाम । उत्प्रेक्ष्यते—तस्य [illegible] तुला [illegible]पमा [illegible] प्राप्तये आसादनार्थं तपःकाङ्क्षी [illegible] [illegible] । [illegible] वाच वाणीमेव [illegible]तरस्य स्यन्दते [illegible] वदनेन [illegible] कृत्वा विधुना सूरिणा जित पराभूत ॥

दृष्ट्वा यान्त जघन्यायामन्तर्भृतान्यमृगया ।
चन्द्रश्चन्द्रिकया [illegible] इव [illegible] ॥ ३४ ॥

चन्द्र. [illegible]रविणीरमण चन्द्रिकया [illegible] [illegible] । उत्प्रेक्ष्यते [illegible] [illegible] मतो मृता प्रकटा जाता [illegible] [illegible] । [illegible] आतेवो [illegible] [illegible] । [illegible] स्वासपत्नीमपि द्रष्टुं न शक्नोति ततोऽन्तरस्याः [illegible] आह्लाददा [illegible] [illegible] नानेपोऽभिसर[illegible] [illegible] 'जजघन्य [illegible] [illegible] । [illegible] [illegible] तथा [illegible] [illegible] वर्तते [illegible] तदपि [illegible] [illegible]

आगामिनो गवां पत्युः प्रातः सेनापतेः पुरः ।
कांदिशीका इवानश्यन्नन्धकारविरोधिनः ॥ ४५ ॥

आगमिष्यतीत्येवंशीलस्य आगामिनो गगनमण्डले समागन्तुकस्य गवां किरणानां भूमीनां च पत्युः स्वामिनः सूर्यस्य पार्थिवस्य प्रातः प्रभाताभिधानस्य दिनाननरूपस्य वा सेनापतेरर्गोकिनीनायकस्य पुरः पुरस्तादग्रे । उत्प्रेक्ष्यते—कांदिशीका भयद्रुता इव । अन्धकारविरोधिनः स्वतमस्तपत्रसंदोहा अनश्यन्पलायांचक्रिरे । 'मित्रो ध्वान्ताराति-रब्जाग्रुहृत्स्व.' इति हैम्याम् । एकस्य शत्रुत्वे द्वावपि परस्परं शात्रवौ भवत इति ॥

गह्वरे भूभृतां गुप्तं तामसास्तापसा इव ।
कृशाः किमु तपस्यन्ति पुनरभ्युदयाशया ॥ ४६ ॥

तमसां समूहास्तामसा । अत्र समूहार्थेऽण् । तिमिरप्रकरा कौशिका वा । 'ताम-सास्तिग्मरोचिषः' इति वीतरागस्तवे । कृशाः परिपन्थिपाथोजिनीपतिनिपतद्दृढतरकर-निकरप्रसभप्रहारजर्जरीभवद्वपुर्घनोद्भवद्भूरिचिन्तातिशयवशतो दुर्बलीभूताः सन्तः । उ-त्प्रेक्ष्यते—भूभृतां धरणीधराणां गह्वरे महत्कन्दरे कोटरे किमु तपस्यन्ति तीव्रतम मुक्तानपानं तपः कष्टं कुर्वन्तीव । कथम् । गुप्तं छन्नं यथा स्यात्तथा केनाप्यज्ञातम् । कया । पुनर्द्वितीयवारमभ्युदयस्य चन्द्रचण्डरुचिप्रदीपप्रमुखद्विपत्पराभावुकविपद्याद्वैतस्फूर्तिम-स्तया आशया स्पृहया वाञ्छया । के इव । तापसा इव । यथा परिव्राजकाः समग्रशात्र-वक्षयगोत्रचित्रासनैकालम्भविष्णुनृपादिपदवीकामनया तपस्तन्वते ॥ इत्यन्धकारगमनम् ॥

अथ विभातप्राया शर्वरी उच्यते—

विद्राणोत्पलदृक्क्षीणशुक्रा भ्रश्यत्पयोधरा ।
म्लानास्येन्दुस्त्यक्ततारमुक्ता वृद्धेव शर्वरी ॥ ४७ ॥

शर्वरी रात्रिर्वृद्धेव जरती स्त्रीवासीत् । किंभूता निशा वृद्धा च । विद्राणे संकुचिते निमीलिते गते वा उत्पलानि कुवलयानि एव तत्तुल्ये च दृशौ नयने यस्याः । पुनः किं-भूता । क्षीणोऽस्तमितप्रायः । विभातेऽपि कदाचिद् शुक्रो निरीक्ष्यते । ततोऽस्तमितप्राय. अस्तमितो वाग्गोचरीभूतः शुक्रः ग्रहविशेषो यस्याः । पक्षे । गर्भाधानाभावात्क्षीणं विनष्टं शुक्रं पुंवीर्यं यस्याम् । पुनः किंभूता । भ्रश्यन्तोऽविरलीभवन्तः । पाश्चात्यरात्रौ प्रायो वर्दलानि भवन्ति सूर्योदये च यान्ति । अत एव चम्पूकथायां प्रातर्वर्णने प्रोक्तं सूर्यविशेषणम्—'करपरामृष्टपयोधरे' इति । पयोधरा मेघा अभ्ररूपा यस्याम् । पक्षे । भ्रश्यन्तावधःपतन्तौ पयोधरौ स्तनौ यस्याः । पुनः किंभूता । म्लानो विच्छायीभूतो गतचन्द्रिकत्वाद्वृद्धत्वाच्च आस्येन्दुर्वदनसदृशः वक्त्रमेव चन्द्रो यस्याः । पुनः किंभूता । त्यक्ता उज्झितास्तारा एव उज्ज्वला वा मुक्ता मुक्ताफलानि यया । प्रायो वृद्धानां भूष-णपरिधानं शोभावन्न दृश्यते । यदुक्तम्—'मा झातुरिय पल्हाणिइ परकप्पडइपडप्प । एतन्ने असुहामणा वुटीकानिधडुक ॥' इति प्राकृतवाक्यात् ॥

प्रत्यूषे प्रभातसमये प्रोषित द्वीपान्तरं प्रति प्रस्थितं मृगाङ्कं हरिणलाञ्छनं निजहृद्यनायकं कान्तम्। उत्प्रेक्ष्यते—क्षपा निशा किमनुगच्छति पृष्ठे प्रयातीव। किं कृत्वा। नक्षत्राणि उडवः उपलक्षणत्वात्तारका एव तद्रूपा वा शुक्तिका मुक्ताफलानि अल्पभारबहुमूल्यानि मौक्तिकानि आदाय गृहीत्वा। किमिव। पाथेयमिव। यथा काचित्त्रिपुटिका 'त्रेवडीनीकरणहार' इति जने प्रसिद्धा दीर्घदर्शिनी नैपुण्यवती स्त्री कथमप्यकस्मात्कारणाद्विशवलं स्ववल्लभं कुत्रचिज्जनपदे प्रस्थितं विज्ञाय स्वयं सम्यग्मणिमुक्तादिपाथेयमादाय तमनुयाति॥

वितत्य मायिकीवाग्रे मायां तारामयीं तमी।
क्षणाददृश्यतां निन्ये मन्ये तां दिवसानने॥ ९२॥

तमी यामिनी दिवसानने प्रभातसमये मन्ये उत्प्रेक्षे अहमेव मन्ये मानयामि विमर्शं विदधामि वा। क्षणात्क्षणमात्रतः स्वयं प्रपञ्चितां मायां प्रेक्षणरूपकादिरचनाकपटपाटवमदृश्यतां दृशोरगोचरतां निन्ये लम्भयामास। किं कृत्वा। अग्रे दशदिक्सीमव्योममण्डले मायिकीव इन्द्रजालिकविद्याविधुरा वनितेव। तारामयीमुपलक्षणाद्ग्रहनक्षत्रप्रचुरां मायां शाम्बरीम्। इन्द्रजालमित्यर्थः। वितत्य विस्तार्य॥

तमस्विन्या विधोः पत्युर्विरहासहमानया।
प्रातःसंध्याबृहद्भानौ स्वतनूः किमहूयत॥ ९३॥

तमस्विन्या पीयूषमयूखप्राणवल्लभया विधोश्चन्द्रमसः पत्युः स्वभर्तुर्विरहं वियोगं न सहते इत्यसहमाना तादृश्या सत्या प्रोद्दामविरहाकुलया विधुवल्लभवियोगं सोढुमसमर्थया भवन्त्या। उत्प्रेक्ष्यते—प्रातःसंध्या दिवसाननरक्तिमा सैव बृहद्भानुः कृशानुस्तस्मिन् स्वतनूर्निजगात्रलता किमहूयत हुतेव भस्मीकृतेव॥

तूर्याणां यामिनीयामविरामे ध्वनिरुद्ययौ।
प्रयाणं सूचयन्प्रातरिव राज्ञो मृगीदृशः॥ ९४॥

यामिन्या निशाया यामानां चतुर्णां प्रहराणां विरामे अपगमे तूर्याणां वादित्राणां 'नगारा' इति लोकप्रसिद्धानां ध्वनिः शब्दः उदयौ प्रादुर्भूतः। उत्प्रेक्ष्यते—राज्ञश्चन्द्रमसो महीपतेर्वा मृगीदृशो निशाया महिष्या वा प्रयाणं प्रस्थानं सूचयन्कथयन्निव॥ इति रात्रिगमनम्॥

चक्रे श्रमणशक्रेण विधिर्वैभातिकस्ततः।
जैत्रं तन्त्रमिवाधृष्यभावद्वेष्यजिगीषया॥ ९५॥

ततो रात्रिगमनानन्तरं श्रमणशक्रेण वाचयमपुरंदरेण हीरविजयसूरिणा। विभाते विधीयते, विभातस्यायं वा वैभातिकः प्रातःकालसंबन्धी विधिराचारः प्रातरावश्यकादिकः चक्रे कृतः। उत्प्रेक्ष्यते—अधृष्याणामनाकलनीयानां दुर्धराणां भावानामन्तरङ्ग-

उदित्वा कथयित्वा। प्रभोः पुर इत्यध्याहारः। पुनरित्यस्याप्यध्याहारः। प्रभु सूरीन्द्र नत्वा प्रणम्य॥ इति शासनदेवतागमनम्॥

कलधौतावदातश्रीर्द्विजज्योत्स्नाविराजितः।
कुर्वन्कुवलयोल्लासं विभुर्विधुरिवाभवत्॥ २९॥

विभुः श्रीहीरविजयसूरिः विधु सुधादीधितिरिवाभवत् जातः। किंभूतः। कलधौत काञ्चन तद्वदवदाता निर्मला पीता श्रीर्वपु शोभा यस्य। 'विभ्राजते तव वपु कनकाव-दातम्' इति भक्तामरस्तोत्रे। चन्द्र किंभूतः। कलधौत रजत तद्वदुज्ज्वला मण्डललक्ष्मी-र्यस्य। 'कलधौत रूप्यहेम्नो.' इत्यनेकार्थः। पुनः किंभूत। द्विजाना दशनाना ज्यो-त्स्नया कान्त्या विराजितः। पक्षे द्विजैश्चन्द्रपारिपार्श्वकैः सेवकविशेषैः। द्विजपतित्वा च-न्द्रस्य। तथा ज्योत्स्नया चन्द्रिकया विराजितः शोभितः। पुन. कि कुर्वन्। कुवलयस्य भूमण्डलस्य प्रतिबोधदानादिना यशसा वा उल्लासमानन्दातिशयम्। पक्षे। कुवलयाना चन्द्रविकाशिकमलानामुत्पलाना विकाश कुर्वन् सृजन्॥

अश्रान्तानन्तपदवीलङ्घनैः श्रान्तवानिव।
शशी शनैः शनैरस्ताचलचूलामथाश्रयत्॥ ३०॥

अथ देवतागमनानन्तर शशी शीतकान्ति. शनै. शनैर्मन्द मन्दमस्ताचलस्य [illegible]-माद्रे प्रतीचीपर्वतस्य चूला शिखामाश्रयद्व्रजते स्म। उत्प्रेक्ष्यते—अश्रान्त [illegible]-श्राम यथा स्यात्तथा निरन्तर विद्यते अन्तोऽवसान यस्याः सा अनन्ता अपरिमिता [illegible] नागानीना या पदवी मार्गः गगनाङ्गण तस्या लङ्घनैरतिक्रमणै. श्रान्तवान् [illegible]-वानिव। य परिश्रम प्राप्तः स कुत्रचन विश्रामार्थमवतिष्ठते॥

गर्भाश्मगर्भचन्द्राश्मकल्पितोत्तंसिकेव सा।
अस्ताचलश्रीर्भाति स्म मौलिलीलायितेन्दुना॥ ३१॥

सा [illegible] अर्थात् पश्चिमाचलस्य शिर शिखरं लीलया [illegible] [illegible]
[illegible] यस्य स [illegible]
न्दुना चन्द्रेण कृत्वा सा प्रसिद्धा चन्द्र[illegible] [illegible]॥ [illegible]
[illegible]। [illegible] सा [illegible]
[illegible] भाति स्म। [illegible]—[illegible]
[illegible]
[illegible]
[illegible]
[illegible]॥

विन्दुवृन्दैः पद्मनामभिः शोणच्छविमदवारिकणगणैः। 'विन्दुजाल पुनः पद्मम्' इति हैम्याम्। पद्मन्यादिदशायां करिणा कपोलेभ्यो रक्तविन्दवो निःसरन्तीति कविसमयः। 'भूर्जत्वचः कुञ्जरविन्दुशोणाः' इति कुमारसंभवे॥

प्रत्यूषे मखभुग्लेखातल्पेभ्यः पतयालुभिः।
किमास्तीर्णारुणाम्भोजपर्णैः शोणीकृतं नभः॥ ६०॥

नभो गगनं शोणीकृतम् अधिकारार्थात्प्रभातसंध्यारागेण पाटलं प्रणीतम्। उत्प्रेक्ष्यते—प्रत्यूषे दिनवदने मखभुजा यज्ञांशभोजिना लेखा श्रेणी तस्यास्तल्पेभ्यः पल्यङ्केभ्यः पतयालुभिः पतनशीलैरास्तीर्णैः प्रस्तृतै अरुणाम्भोजानां कोकनदानां पर्णैर्दलैर्मण्डलैरिव॥ इति प्रातःसंध्या॥

अथो पाथोजिनीनाथोऽभ्युदियाय नभोङ्गणे।
कपोलकुङ्कुमक्लिन्नं प्राच्याः किं कर्णकुण्डलम्॥ ६१॥ ✓

अथो संध्यारागानन्तरं नभोङ्गणे आकाशाजिरे पाथोजिनीनां जलजन्मिनीनां नाथः प्राणपतिः सूर्यः अभ्युदियाय उदयाचलचूलायामुद्गमं लभते स्म। उत्प्रेक्ष्यते—कपोलस्य गण्डस्थलस्य पत्रवल्लीं प्रापितेन कुङ्कुमेन घुसृणेन क्लिन्नं व्याप्तम्। 'अयमुदयति घुसृणारुणतरुणीवदनोपमश्चन्द्रः' इति विदग्धमुखमण्डनवचनात् प्राच्या आखण्डलमहिष्याः पूर्वदिशः कर्णस्यैकं कुण्डलं स्फुटं प्रकटं ताटङ्कं इव॥

पूषद्विपं प्रसाद्याम्भोमूर्तिं नित्यानुशीलनैः।
पद्मिनीभिरभीभर्ता पूषाहूतः किमुद्ययौ॥ ६२॥

पूषा भानुमान् उदयौ उदयमालिङ्गति स्म। उत्प्रेक्ष्यते—पद्मिनीभिः कमलिनीभिः प्रेयसीभिर्भर्ता स्वप्राणनाथः। अथ वा पद्मिनीभिररविन्दैर्वान्धवैः सुहृद्भिर्वा निजसुहृद्बन्धुराहूतः। सप्रणयं तादृशस्य पूषद्विपं शंकरस्य नित्यमहर्निशमनुशीलनैः सर्वावसरसावधानताविधानाद्विहितसेवाभिः। जलमूर्तिरीश्वरस्य। यदुक्तम्—'क्षितिजलपवनहुताशनयजमानाकाशसोमसूर्याख्याः। यस्य खलु मूर्तयोऽष्टौ स भवतु भवतां शिवं सिद्ध्यै॥' इति कविसमयोक्तिः। प्रसाद्य पूर्वं प्रसन्नीकृत्याभयदानमार्गणसन्मानप्रदानादि सम्यग्वरोपादानपूर्वं संतोष्य॥

अभ्रमूवल्लभेनेवोत्खातः प्रातर्निखेलता।
प्राग्गिरेर्गैरिको गण्डोपलो वालारुणो व्यभात्॥ ६३॥

वालारुणोऽर्भकभानुमाली व्यभाद्विभासते स्म। 'जरीजृम्भद्भिम्भद्युमणिविलस—' इति खण्डप्रशस्तौ। तथा 'विश्वव्यापि तमो छिनत्ति तरणिर्वालोऽपि कल्पाङ्कुरो दारिद्राणि गजावली हरिशिशुः' इति श्रीचिन्तामणिपार्श्वनाथस्तुतौ। उत्प्रेक्ष्यते—प्रातः प्रभातसमये निखेलता स्वतन्त्रं तटाघातादिक्रीडां कुर्वता अभ्रमूवल्लभेन अभ्रमूनाम्नी हस्तिनी तस्या

राभ्रोडुमरुत्पथोऽम्बरम्' इति हम्याम् । भ्रश्यन्तो भ्रश्यन्तः । 'भ्रशुभ्रंशु अध-पतने' दिवादिकौ हैमधातुपाठे । कस्मादिव । अम्बुधरादिव । यथा जलधरान्मेघात्करका भ्रश्यन्त्यधः पतन्ति ॥

अर्त्याब्धिमग्नं प्रत्यूषद्विषता मुषितश्रियम् ।
तारास्तारापतिं प्रेक्ष्यान्वमज्जस्तमिवार्णवे ॥ ४२ ॥

ताराः प्रातर्दृश्यमानाः गुरुशुक्रादिमहत्तारका अर्णवे समुद्रे । उत्प्रेक्ष्यते—तं चन्द्र-मन्वमज्जन् विधुपृष्ठे बुब्रुडुरिव कृत्वा । तारापतिं स्वस्वामिनं शशिनं प्रेक्ष्य समीक्ष्य । अथ गुरोस्तारकः, अथ शुक्रतारकः, इति लोकोक्त्यापि तारकास्तेषां तारकाणां स्वामित्वं तु चन्द्रमस एव । यतः—'तारकराट् किरीटः' इति नैषधे । 'अथ वा गह अट्ठासीति-ठवी संतारकोडिकोडीणं । छासठिसहस्सनवसयपणहत्तरीपगससिभिन्न' ॥ इति वच-नात् ग्रहपतित्वमपि । किं च । यावान्परिवारः सूर्यस्य तावान्परिवारश्चन्द्रस्येति जीवा-भिगमे । किंभूतं । प्रत्यूषे प्रभात एव द्विषन् द्वेषी शत्रुस्तेन मुषिता गृहीता छलदर्शिना स्वावसरं छलं च प्राप्य हठात्सर्वाप्यादत्ता श्रीर्यस्य अत एवार्त्या चिन्तया पीडया वा दुःखातिरेकत्रपया अब्धौ समुद्रे मग्नं ब्रुडितम् ॥

निशाशनायितेनाभ्रपथे तारकतन्दुलाः ।
दिनाननशकुन्तेन शङ्के कुक्षिगतीकृताः ॥ ४३ ॥

निशया रात्र्या कृत्वा निशाया वा चरणाभावाददर्शना जातास्त्यस्येत्यशनायितो बुभुक्षितः तेन दिनाननं प्रभातं तदेव शकुन्तः पक्षी तेन शकुन्तेन अहमेवं शङ्के वित-र्कयामि उत्प्रेक्षे वा । अभ्रपथे मेघमार्गे गगनवर्त्मनि वा तारकतन्दुलास्तारका एवाला-ज्ज्वल्यात्तन्दुलास्तुषनिर्मुक्तकलमाः । 'प्रथममुपहृत्यार्थं तारैरखण्डिततन्दुलैः' इति नैषधे तारकास्तन्दुलीकृताः । कुक्षौ उदरे गताः । 'कृतौ' इति च्विप्रत्यये कुक्षिगतीकृताः । 'इव बहुरूपकशालभञ्जिका मुखचन्द्रेषु कलङ्करङ्कवः । यदनेकपसौधकन्धरा हरिभिः कु-क्षिगतीकृता इव ॥' इति नैषधे ॥

दिग्गजेन्द्रावगाहेनोत्पन्नाः स्वःसिन्धुबुद्बुदाः ।
क्षणादिव व्यलीयन्त तारकास्तारकापथे ॥ ४४ ॥

तारकास्तारास्तारकापथे नक्षत्रवर्त्मनि आकाशे क्षणाद्दृश्यमाना एव स्वल्पकालादेव व्यलीयन्त विलयं क्षयं लभन्ते स्म । उत्प्रेक्ष्यते—दिग्गजानामाशामातङ्गानामैरावतादि-हरिकुञ्जराणां जलावगाहेन सलिलक्रीडाकरणमज्जनादिविधिना उत्पन्ना उद्भूताः स्वःसि-न्धोराकाशतरङ्गिण्याः । गगनगङ्गाया इत्यर्थः । बुद्बुदाः पानीयस्थासका इव । 'जलप-पाटो' इति प्रसिद्धाः । बुद्बुदा हि स्वल्पकालावस्थायिनः स्युः । यदुक्तम्—'सम्भरा-गजलबुद्बुदउवमे जीविएभ जलबिन्दुचञ्चले । जुव्वणेयनइवेगसन्निहे यावजीव किमयं न बुज्झसि ॥' इति वैराग्यशतके ॥ इति शुक्रादिमहत्तारास्तः ॥

कोकेश्चक्रवाकैर्विहगमे' सुहृद' स्वमित्रस्य भास्करस्य पुरोऽग्रे दु सरूपानलस्य सकलशर्वरीपरस्परवियोगसजातासाततीव्रज्वलनज्वाला इवोद्गीर्णाः हृदयवदनाद्बहिरुद्वान्ता इव ॥

निजानुरागिणीर्वीक्ष्य दारान्स्मेरसरोजिनीः ।
किमुद्गीर्णोऽरुणज्योतीरागो राजीवबन्धुना ॥ ६७ ॥

राजीवबन्धुना अरविन्दसुहृदा सूर्येण अरुणमतिरक्त यज्ज्योति. कान्तिः एव रागो हृदयोदयदनुरागोऽनुरतिरुद्गीर्णः प्रकटीभूतः । किं कृत्वा । स्मेरा विकसिताननसरोजा. सरोजिनीः पद्मिनीर्दारान् निजप्रेयसी' । निजे आत्मनि विषयेऽनुरागोऽस्त्यासामित्यनुरागिण्यस्ताः सानुरागा वीक्ष्य व्यालोक्य ॥

हरिव्यापादितध्वान्तकुम्भिकुम्भसमुद्भवैः ।
रक्तै रक्तीकृता शङ्के प्रभा भाति स्म भानवी ॥ ६८ ॥

भानोरिय भानवी सूर्यसबन्धिनी प्रभा अर्थात्कुमारीकान्तिर्भाति स्म शुशुभे । तत्राहमेव शङ्के वितर्कयामि । हरिणा भानुना केसरिणा च व्यापादिता करामनिशितनिस्त्रिंशोद्धुरधाराविदारिता ध्वान्ता अन्धकारा एव कुम्भिनः श्यामवर्णत्वादन्धकारसाधारणा वारणा'। यत उक्तम्—'दूरतया स्थूलतया श्यामतया गन्धलोलुपमधुपैः । धावितमिभराजधिया तत्त्वधिया चाग्रतो महिष' ॥' इति । प्रायोऽधुना कृष्णवर्ण एव दन्तिनो दृश्यन्ते । तेषा कुम्भेभ्यः शिर'पिण्डेभ्य उद्भव उत्पत्तिर्येषां तादृशै रक्तै रुधिरै रक्तीकृता शोणा निर्मितेव ॥

कान्तागमे धृताताम्राम्बरा इव दिगङ्गनाः ।
बन्धूकबन्धुरैर्ब्रध्नभवैर्भान्ति प्रभाभरैः ॥ ६९ ॥

बन्धूकवद्बन्धूककुसुमानीव 'पिपोहरिया' इति लोकप्रसिद्धानि । बन्धुरैः शोभिना सुन्दरैः ब्रध्नाद्भानोर्भवैरुत्पन्नै प्रभाभरै' कान्तिकलापैर्दिगङ्गना आशावशा भान्ति विराजन्ते। उत्प्रेक्ष्यन्ते—कान्तस्य स्वभर्तुः सूर्यस्यागमे समागमनसमये । 'दिशो हरिदिदृक्षितामिवेश्वर.' इति रघुवंशे । धृतानि परिहितान्याताम्राणि सामस्त्येन शोणान्यम्बराणि वासांसि याभिः एतादृश्य इव ॥ इत्यरुणतरुणप्रभा ॥

द्रुमद्रोणिषु संचिन्वन्नुल्लसन्पल्लवानिव ।
तन्वन्निव तटाकेषु निन्दन्कोकनदश्रियम् ॥ ७० ॥
कुर्वन्निव गिरेः शृङ्गे गैरिकावनिविभ्रमम् ।
ताम्बूलश्रियमास्येषु दिग्वधूना दिशन्निव ॥ ७१ ॥
सीमन्तेषु मृगाक्षीणां सिन्दूरं पूरयन्निव ।
प्रातः प्रसारयन्भाति भानुमान्भानुविभ्रमम् ॥ ७२ ॥

रजनीवियुजां जाने द्विजानामपशापतः।
कैरवाक्षी क्षणाद्राज्ञः क्षीणतां प्रतिपेदुषी॥ ४८॥

राज्ञः सुधाधाम्नः नृपतेश्च कैरवाक्षी कुमुदनयना निशीथिनी जाया राज्ञी क्षणात्स्वल्पसमयादेव क्षीणता क्षयभावमतिकृशीभावम्। अस्थिचर्मावशेषतामित्यर्थः। 'छिन्नोऽपि रोहति तरुः क्षीणोऽप्युपचीयते पुनश्चन्द्र । इति विमृशन्तः सन्तः सतप्यन्ते न ते विपदा॥' अत्र क्षीणता तु कलावशेषमात्रेणैव। 'मूलादुच्छिन्नस्योपचय एव नास्ति क्षीणस्य स्वल्पावशेषस्यैवोपचयः' इति सूक्तोक्तिः। प्रतिपेदुषी प्रपन्ना सप्राप्तवती। उत्प्रेक्ष्यते—रजन्या निशासमये वियुञ्जन्ति परस्पर वियोग प्राप्नुवन्तीति तादृशा द्विजाः पक्षिणो रथाङ्गनामानो ब्राह्मणाश्च। 'विहगयो· कृपयेव शनैर्ययौ रविरहर्विरहध्रुवभेदयोः॥' इति रघुवशे। तथा वस्तुपालकीर्तिकौमुदीसहोदरे सुरथोत्सवकाव्येऽपि—'रजनीवियुजा पतत्रिणाम्' इति। चक्रवाकानामिति। अपशापतः विरुद्धशपनादिव स्वाचाररेताना ब्राह्मणाना शापो लगति न तु ब्राह्मणब्रुवाणाम्। यत.—'वृत्तस्था ब्राह्मणा ज्ञेया: क्षत्रियाः शस्त्रपाणय·। कृषिकर्मकरा वैश्या· शूद्राः प्रेक्षणकास्तथा॥' इति क्रियया ब्राह्मणत्व न तु जात्या उत्तराध्ययने 'बम्भचेरेण बभणे' इति॥

त्यक्ततारपरीवारा छिन्नध्वान्तकचच्छटा।
तमी तपस्विनीवासीद्दयितेऽस्तमिते विधौ॥ ४९॥

विधौ चन्द्रमसि दयिते भर्तरि अस्तमिते परलोक प्राप्ते सति तमी त्रियामा। उत्प्रेक्ष्यते—तपस्विनी तापसी आसीदिव परिव्राजकेव बभूव। किंभूता। त्यक्तो मुक्तस्तारास्तारका उपलक्षणाद्ग्रहनक्षत्राणि एव परीवारः परिच्छदो यया। पुनः किंभूता। छिन्ना लूना भद्रकारिता ध्वान्तान्यन्धकाराण्येव कचच्छटा केशपाशो यया। योषितो हि भर्तरि मृते शिरःकेशान्मुण्डयन्ति॥

संसिसृक्षुः शशी कान्तां कामगादनुरागवान्।
इत्यालोकयितुं शङ्के तमी तमनुजग्मुषी॥ ५०॥

तमी इन्दुकान्ता शशिन स्ववल्लभ विधुमनुजग्मुषी पृष्ठे प्रस्थिता पश्चाद्गच्छति स्म। उत्प्रेक्ष्यते—इत्यालोकयितुमित्यमुना प्रकारेण प्रेक्षितुमिव। इति किम्। अनुरागवाननुरतिकलितः। 'रागोऽनुरागोऽनुरतिः' इति हैम्याम्। अनुगतो रागो रक्तिमा तेन सयुक्त। अस्ताद्रिसगमान्मनागरुणीभूतत्वादिद विशेषणम्। शशी का चतुर्पु वर्णेपु अन्यतरा खेचरीमप्सरस वा नागाङ्गना वा। किनाम्नी कान्ता स्त्रिय ससिसृक्षु· कस्याः सं कर्तुमिच्छु·। अगात्कुत्रापि मा विमुच्य गतः। 'निर्वापयिष्यन्निव ससिसृक्षोः' इति नैषधे॥

किं पाथेयमिवादाय क्षपा नक्षत्रमुक्तिकाः।
प्रत्यूपे प्रोपितं कान्तं मृगाङ्कमनुगच्छति॥ ५१॥

कोकेश्चक्रवाकैर्विहगमैः सुहृदः स्वमित्रस्य भास्करस्य पुरोऽग्रे दुःसहपानलस्य सकलशर्वरीपरस्परवियोगसंजातासाततीव्रज्वलनज्वाला इवोद्गीर्णाः हृदयवदनाद्बहिरुद्वान्ता इव ॥

निजानुरागिणीर्वीक्ष्य दारान्स्मेरसरोजिनीः ।
किमुद्गीर्णोऽरुणज्योतीरागो राजीवबन्धुना ॥ ६७ ॥

राजीवबन्धुना अरविन्दसुहृदा सूर्येण अरुणमतिरक्तं यज्ज्योतिः कान्तिः एव रागो हृदयोदयदनुरागोऽनुरतिरुद्गीर्णः प्रकटीभूतः । किं कृत्वा । स्मेरा विकसिताननसरोजाः सरोजिनीः पद्मिनीर्दारान् निजप्रेयसीः । निजे आत्मनि विषयेऽनुरागोऽस्त्यासामिति अनुरागिण्यस्ताः सानुरागा वीक्ष्य व्यालोक्य ॥

हरिव्यापादितध्वान्तकुम्भिकुम्भसमुद्भवैः ।
रक्तै रक्तीकृता शङ्के प्रभा भाति स्म भानवी ॥ ६८ ॥

भानोरियं भानवी सूर्यसंबन्धिनी प्रभा अर्थात्कुमारीकान्तिर्भाति स्म शुशुभे । तत्राहमेवं शङ्के वितर्कयामि । हरिणा भानुना केसरिणा च व्यापादिता करात्रनिशितनिस्त्रिंशोदुरधाराविदारिता ध्वान्ता अन्धकारा एव कुम्भिनः श्यामवर्णत्वादन्धकारसाधारणा वारणा । यत उक्तम्—'दूरतया स्थूलतया श्यामतया गन्धलोलुपभ्रमरैः । भावितगिरिराजधिया तत्त्वधिया चाग्रतो मद्विपः ॥' इति । प्रायोऽधुना कृष्णवर्ण एव दन्तिनो दृश्यन्ते । तेषां कुम्भेभ्यः शिरःपिण्डेभ्य उद्भव उत्पत्तिर्येषां तादृशै रक्तैः रुधिरैः रक्तीकृता शोणा निर्मितेव ॥

कान्तागमे धृताताम्राम्बरा इव दिगङ्गनाः ।
बन्धूकबन्धुरैर्ब्रध्नभवैर्भान्ति प्रभाभरैः ॥ ६९ ॥

बन्धूकवद्बन्धूककुसुमानीव 'विपोहरिया' इति लोकप्रसिद्धानि । बन्धुरैः शोभितासुन्दरैः ब्रध्नाद्भानोर्भवैरुत्पन्नैः प्रभाभरैः कान्तिकलापैर्दिगङ्गना आशावशा भान्ति विराजन्ते । उत्प्रेक्ष्यन्ते—कान्तस्य स्वभर्तुः सूर्यस्यागमे समागमनसमये । 'दिशो दशदिगन्तेरिताभिर्वैश्वरः' इति रघुवंशे । धृतानि परिहितान्याताम्राणि सामस्त्येन शोणान्यम्बराणि वासांसि याभिः एतादृश्य इव ॥ इत्यरुणतरुणप्रभा ॥

द्रुमद्रोणिषु संचिन्वन्नुल्लसत्पल्लवानिव ।
तन्वन्निव तटाकेषु निन्दन्कोकनदश्रियम् ॥ ७० ॥
कुर्वन्निव गिरेः शृङ्गे गैरिकावनिविभ्रमम् ।
ताम्बूलश्रियमास्येषु दिग्वधूनां दिशन्निव ॥ ७१ ॥
सीमन्तेषु मृगाक्षीणां सिन्दूरं पूरयन्निव ।
प्रातः प्रसारयन्भाति भानुमान्भानुविभ्रमम् ॥ ७२ ॥

[illegible] ॥ वा [illegible] [illegible] ॥ [illegible] क्रिया [illegible] ॥

उपभुज्य पिता प्राची [illegible] ।
[illegible] ताम्बूलं शोणिमा [illegible] ॥ १६ ॥

[illegible]

नाजानेव । भानुनाला यथा प्राग्गिरेः प्राचीनपर्वतस्य कन्दरस्य । कन्दरशब्दस्त्रिलिङ्गे । 'पिठरप्रतिसरपात्रकन्दराः' इति लिङ्गानुशासने । क्रोडात् हृदयात् । मध्यादित्यर्थः । अथ वा क्रोडात्कुत्सङ्गात्मोक्षण गगनाजिरे समागच्छति ॥

प्रीतिप्रह्वैः प्रभुस्तत्र परिवव्रे व्रतिव्रजैः ।
सुनासीर इवास्थानीमासीनः स्वर्गिणां गणैः ॥ ७६ ॥

तत्र मौलोपाश्रये प्रभुः सूरीश्वरः प्रीत्या प्रमोदेन गुरुशिष्यस्नेहेन धर्मस्य हार्देन प्रह्वैर्नम्रीभूतः पदाम्भोजे भ्रमरीभावं प्राप्तैर्व्रतिव्रजैः श्रमणपुङ्गवगणैः परिवव्रे परिवृतः । क इव । सुनासीर इव । यथा आस्थानीं सुधर्माभिधानां सभामासीन आश्रित्य तिष्ठन् । उपविष्ट इत्यर्थः । महेन्द्रलोचनः स्वर्गिणां गीर्वाणानां गणैर्वृन्दैः परिव्रियते ॥

तत्रागमन्पत्तनादिसंघास्तं वन्दितुं तदा ।
स्वर्गादिदेवाः समवसरणस्थं यथा जिनम् ॥ ७७ ॥

तत्र ऊीसाभिधे नगरे पत्तनमणहिल्लपुरस्तम्भनादिर्येषां तेषां नगराणां संघाः श्राद्धगणास्तं ध्यानोत्थितं सूरिं वन्दितुं नमस्कर्तुमागमन्नागच्छन्ति स्म । यथा इवार्थे । के इव । देवा इव । यथा स्वर्गो देवलोक आदिः प्रथमं येषां तेषां भवननगरज्योतिर्विमानानां देवा भवनपतिव्यानमन्तरज्योतिष्कद्वादशकल्पवासिनः सुराः समवसरणे तिष्ठतीति समवसरणस्थस्तं जिनं तीर्थंकरं नमस्कितुमायान्ति ॥

प्रबोधयन्सुदृक्पद्मान्कुदृक्पङ्कांश्च शोषयन् ।
स्पर्धयेव रवेः सूरेः प्रतापो व्यानशे दिशः ॥ ७८ ॥

सूरेर्हीरविजयवाचयमेन्दोः प्रतापो दिशो दशापि हरितः प्रति व्यानशे व्याप्नोति स्म । उत्प्रेक्ष्यते—रवेः सूर्यस्यार्यान्मार्तण्डचण्डप्रतापस्य स्पर्धया संघर्षेण मनस्यसूयया वा । किं कुर्वन् । सुदृशः सम्यक् दृष्टय एव पद्माः कमलानि प्रबोधयन् प्रतिबोधबन्धुरान् विदधत् । सुदर्शनिनः कुर्वन् । सूर्योऽपि पद्मानि प्रबोधयति विकाशयति । च पुनः किं कुर्वन् । कुत्सिताः शाक्यादिमतोपादानपटलसवलिता दृशः दृष्टयो येषां सिद्धान्तविरुद्धवादित्वाद्दुष्टा दृष्टयो येषां ते कुदृशः कुवादिनः कुमतान्येव पङ्काः कर्दमास्तान् शोषयन् निष्ठापयन् । सूर्योऽपि पङ्कं शोषयति ॥

प्रतिक्रम्य चतुर्मासीं स क्रमाद्व्यहरत्ततः ।
हर्षाद्धर्षा इवोल्लङ्घ्य मानसादिष्टमानसः ॥ ७९ ॥ ✓

स सूरिः क्रमादनुक्रमेण विजयदशमीदीपालिकादिनगमनपरिपाट्या चतुर्णां मासानां समाहारश्चतुर्मासी वार्षिकचतुर्मासिकम् । अथ वा वर्षा शरल्लक्षणयोर्द्वाभ्यां मासाभ्यां कृत्वा चतुर्मासी, तां प्रतिक्रम्य । एतावता कार्तिकचतुर्मासिकप्रतिक्रमणं प्रणीय चतुर्मासीं पूर्णीकृत्य वा ततस्तस्मादूीसानगराद्व्यहरत् विहारं कृतवान् । इत्यर्थः । क इव ।

भर्त्रा । अभ्रमूशब्दो दीर्घोऽपि दृश्यते—यथा 'गजानामभ्रमूपतिः' इति काव्यकल्पलतायाम् । तथा 'अभ्रमूवल्लभारूढ निशाशेषे कदाचन । स्वप्ने महेन्द्रमद्राक्षीत्पृथा पृथुमनोरथा ॥' इति पाण्डवचरित्रेऽपि । ऐरावणवारणेन प्राग्गिरेः पूर्वपर्वतस्य गैरिको धातुमनो गण्डोपलः स्थूलपाषाण इवोत्खातः उत्पाट्य क्षिप्तः इव । ऐरावतदन्तावलस्य पूर्वस्या दिशो दिग्गजत्वात्प्राग्गिरेरिति कथनं युक्तिमत् ॥

द्यावाभूमी पराभूष्णुं भूच्छायामरवैरिणम् ।
✓ भेत्तुं व्यमोचि चण्डांशु चक्रं किं चक्रपाणिना ॥ ६४ ॥

चक्रपाणिना नारायणेन । उत्प्रेक्ष्यते—चण्डास्तीक्ष्णा रुद्रा वा अंशवः किरणा यस्य सूर्यरूपं वा । अथ वा चण्डं भयकारि अंशु शीघ्रगामि । 'अंशुः सूत्रादिसूक्ष्मांशे किरणे चण्डदीधितौ' इत्यनेकार्थः । शीघ्रगामिनि वाच्यलिङ्गः । शैघ्र्येऽपि तत्र क्लीबम् । चक्रं सुदर्शनं नाम स्वरथाङ्गं व्यमोचि मुक्तमिव । किं कर्तुम् । द्यावाभूम्योर्दिवस्पृथिव्योर्नभोभुवोः पराभूष्णुमभिभवनशील भूच्छायमन्धकारमेवामरवैरिण दानवं भेत्तुं विदारयितुं हन्तुम् ॥

कण्ठपीठीलुठत्प्राणरथाङ्गाह्वविहायसाम् ।
जीवातुर्यमुनाबीजी व्यरचीव विरञ्चिना ॥ ६५ ॥

विरञ्चिना ब्रह्मणा यमुनायाः कालिन्द्या बीजी जनकः । 'वप्ता तु जनकस्तातो बीजी जनयिता पिता' इति हैम्याम् । 'सहस्ररश्मिर्यमुनाकृतान्तजनकः प्रद्योतनस्तापनः' तथा 'यमुना यमभगिनी कालिन्दी सूर्यजा यमी' इति द्वितयमपि हैम्याम् । उत्प्रेक्ष्यते—जीवातुर्जीवनौषधमिव व्यरचि विहितम् । केषां कण्ठपीठ्या गलकन्दले । 'जगत्पुरहरो सरद्भुरसराजपीठीपठच्चतुर्मुखमुखावलीरचितमामनामस्तुतिः' इति चम्पूकथायाम् । 'वंशिकवर्कोष्ठिककान्यकुब्जपीठानि' इति लिङ्गानुशासने स्त्रीक्लीबलिङ्गयोः । पीठे पाठश्च । लुठन्तः वियोगातिव्यथाव्याकुलतया निर्गमनायागच्छन्तः प्राणा जसवो येषाम् । कण्ठगतजीवितानामित्यर्थः । तादृशाना रथाङ्ग इति आह्वा नाम येषाम् । 'चक्राह्वो रथाङ्गाह्वः कोको द्वन्द्वचरोऽपि च' इति हैम्या रथाङ्गशब्देन चक्रमुच्यते तेन आह्वा [illegible] पक्षिणा चक्रवाकविहङ्गमाना जीवनस्य भेषजमिव । 'विहायो व्योमपक्षिणोः' [illegible] इति सूर्योदयः ॥

शोणा दीप्तिर्दिनेशस्याधात्कुमारितरां श्रियम् ।
✓ कोकैर्दुःस्वानलज्वाला किमुद्गीर्णा मुहुःपुरः ॥ ६६ ॥

दिनेशस्य दिननाथस्य भानोः दीप्तिः कान्तिः [illegible] शोणा [illegible] कुमारितरां [illegible] प्रभा [illegible] [illegible]

[illegible]

ततः उपाध्यायपदानन्तरं प्रभुर्विजयदानसूरिः स्वस्मात्मन आचार्यपदमभिप्राय संवदनुक-रो नैवर्षीत यादृश गुरुर्गिरो यादृश ... सभामध्ये इत्यर्थः । ततः संघवचनं प्रपेदे प्रतिपन्नवान् । किंवत् । आसन्नः ... जिनेन्द्रः व्यतिकरे दीक्षाग्रहणावसरे लोकस्य पञ्चमस्य अन्ते ... तत्र कृष्णराजिरान्तरालस्थितविमानेषु । अर्चि-अर्चिमालि-वैरोचन-प्रभङ्कर-चन्द्राभ-सूर्याभ-शुक्राभ-सुप्रतिष्ठाभ-अरिष्टाभिधानेषु नवसु विमानेषु वसन्ति ये । ते च नवविधाः । यथा—सारस्वत-आदित्य-वह्नि-वरुण-गर्दतोय-तुषित-अव्याबाध-आग्नेय-अरिष्टनामानो देवा लोकान्तिकसुरा वचनमिवाङ्गीकृतवान् ॥

सूरीन्द्रेणाथ दैवज्ञैर्मुहूर्तं निरधार्यत ।
एतन्महोदयस्येव प्रारम्भप्रथमक्षणः ॥ ८५ ॥

अथ उपाध्यायपदानन्तरं सूरीन्द्रेण दैवज्ञैर्मौहूर्तिकैः सार्धं मुहूर्तं दोषादिविनिर्मुक्तशु-भवासरवेलालग्नं निरधार्यत निश्चीयते स्म । उत्प्रेक्ष्यते—एतस्य जयविमलपण्डितस्य यो महोदयो महानभ्युदयः तस्य प्रारम्भस्य प्रथम आद्यः क्षणः अवसरः कालविशेषः पदवीलक्षणः ॥

शिल्पिभिः कारितः संघैर्मण्डपो यन्मुनीशितुः ।
पट्टश्रियं वरीतुं किं स्वयंवरणमण्डपः ॥ ८६ ॥

संघैः कर्णपुरश्राद्धसमुदायैः रत्नानि शिल्पिभिर्निर्मापितानि स्वदनकचातुर्यैः कृत्वा सा-नभूतैर्मण्डपो यद् जनाश्रयः कारितो निर्मापितः । उत्प्रेक्ष्यते—जयविमलनाम्नो मुनीशि-तुर्निर्ग्रन्थनाथस्य पट्टश्रियं वरीतुं सूरिपदलक्ष्मीमुद्वोढुं वरीतुं किं स्वयंवरणमण्डपः ॥

एतद्व्यतिकरेऽनेककौतुकालोकलालसा ।
त्रिलोकी चित्रदम्भेन मण्डपे किमुपेयुषी ॥ ८७ ॥

एष चासौ व्यतिकरश्च एतद्व्यतिकरः आचार्यपदप्रदानावसरस्तस्मिन्ननेकानि कौतुकानि आश्चर्याणि तेषामालोकने लालसा उत्सुका त्रिलोकी भुवनत्रयी चित्राणामालेख्यानाम् लम्भितानामर्थात्सुरासुरनागराणां दम्भेन कपटेन कृत्वा । उत्प्रेक्ष्यते—तत्र मण्डपे किमुपेयुषी आगतेव ॥

विस्तीर्णोऽपि स संकीर्णो बभूवानेकनागरैः ।
भाविभट्टारकागण्यपुण्याकृष्टैरिवागतैः ॥ ८८ ॥

स संघजननिर्मापितो विस्तीर्णोऽत्यतिविपुलोऽपि सन् मण्डपो जनाश्रयः अनेकैर्गण-नातीतैर्नागरैर्जनपदग्रामसंनिवेशपुरनगरजननिवहैः संकीर्णः सतिलपीड स्थानमिव बभूव सञ्जातः । किंभूतैर्नागरैः । आगतैः समेतैः दशदिगन्तादपि तत्रोपगतैः । उत्प्रे-क्ष्यते—भाविनो भविष्यतो भट्टारकस्य जयविमलसूरेरगण्यैः सुरनरादिभिरपि जेतुमशक्यैः पुण्यैर्भागधेयैराकृष्टैर्वारिकावद्धानीतैरिव उपागतैः ॥

भर्त्रा। अभ्रमुशब्दो दीर्घोऽपि दृश्यते—यथा 'गजानामभ्रमूपति' इति काव्यकल्पलता- याम्। तथा 'अभ्रमूवत्रमारूढ निशाशेषे कदाचन। स्वप्ने महेन्द्रमद्राक्षीत्पृथा पृथुमनो- रथा॥' इति पाण्डवचरित्रेऽपि। ऐरावणवारणेन प्राग्गिरेः पूर्वपर्वतस्य गैरिको धातुरसो गण्डोपलः स्थूलपाषाण इवोत्खातः उत्पाट्य क्षिप्त इव। ऐरावतदन्तावलस्य पूर्वस्या दिशो दिग्गजत्वात्प्राग्गिरेरिति कथनं युक्तिमत्॥

द्यावाभूमी पराभूष्णु भच्छायामर्त्यवैरिणम्।
भेत्तुं व्यमोचि चण्डांशुचक्रं किं चक्रपाणिना॥ ६४॥

चक्रपाणिना नारायणेन। [illegible]—[illegible] वा अशव: किरणा यस्य सूर्यरूपं वा। अथ वा चण्ड [illegible] सूर्यादिमूलमादी किरणे चण्डदीधिता' इत्यनेकार्थ [illegible] क्रीतम्। तत् सुदर्शनं नाम स्वशस्त्रं व्यमोचि मुक्तम् [illegible] द्यावाभूमी [illegible] भोभुवौ पराभूष्णुमभिभवनशील [illegible] भेत्तुं विदारयितुं हन्तुम्॥

कण्ठपीठीलुठत्प्राण [illegible]।
जीवातुर्यमुना [illegible]॥

विरञ्चिना [illegible]
जनातना पिता' [illegible]
तथा यमुना यमभगिनी कालिन्दी [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]॥

[illegible] कुमारिका [illegible]।
[illegible]॥

[illegible]

[illegible] जयविमलमुनीन्द्रः [illegible] सूरिप्रहितैर्मुनिपचारैः पार्श्वे प्रभुहीरविज-यसूरीश्वरं [illegible] आगत्य प्रणमति स्म । क इव । युवराज इव । यथा सकलज-नपदस्वामिनः [illegible] अनर्गलं [illegible] सानन्दं सौभाग्यभाले-[illegible] इतर जनक [illegible] ॥

नाभिसूरेरभूत्तस्योपाध्यायपदमादितः ।

परमावधिवत्साधोरुदेष्यत्केवलश्रियः ॥ ९४ ॥

[illegible] आदितः प्रथमं तस्य जयविमलविबुधस्य उपाध्यायनामकं पदमभूत् । एतावता आचार्यपदात् उपाध्यायपदं प्रदत्तमित्यर्थः । किंभूतम् । परमावधिवत् । यथा उदेष्यन्ती प्रकटीभवि-ष्यन्ती केवलश्रीः केवलज्ञानलक्ष्मीर्यस्य तादृशस्य साधोः श्रमणस्य परममुत्कृष्टं पृथक्प-रमाणुज्ञानं [illegible] लोकप्रमितासंख्येयखण्डावबोधविषयकमवधिज्ञानं भ-वति । [illegible] प्रादुर्भविष्यत्केवलज्ञानं साकारं निखिललोकालोकाकाशप्रकाशकं ज्ञानं यस्य [illegible] जिनेशितुः तीर्थंकरस्य आदितः चयनमहणप्रथमसमय एव तूर्यं चतुर्थं मनःपर्यायरूपं ज्ञानं भवति इति द्वितीयपाठः ॥

महामहैस्ततस्तस्य सूरिः सूरिपदं ददौ ।

जातवेदाः स्फुरज्ज्योतिर्निकेतनमणेरिव ॥ ९५ ॥

ततः उपाध्यायपदप्रदानानन्तरं सूरिर्हीरविजयप्रभुः महामहैरधिकजायमानोत्सवै-स्तस्य जयविमलोपाध्यायस्य सूरिपदमाचार्यपदं ददौ । क इव । जातवेदा इव । यथा जातवेदाः कृशानुर्निकेतनमणेर्दीपस्य स्फुरद्दीप्यमानं ज्योतिस्तेजो दत्ते । अथ वा । क इव । यथा स्नेहप्रियो दीपस्य दशेन्धनस्य तमोपहं भूच्छायभिदुरं निजमात्मीयं ज्योतिर्मदो विश्राणयति ॥

उज्झित्वा शमिनोऽशेषान्सुरानिव रमा हरिम् ।

तं सूरिमुपगच्छन्ती रेजे सूरिपदेन्दिरा ॥ ९६ ॥

तं नवं प्रत्यग्रं जयविमलनामानं सूरिमुपगच्छन्ती समायान्ती सूरिपदेन्दिरा आ-चार्यपदलक्ष्मी रेजे विराजते स्म । किं कृत्वा । उपगच्छन्ती अशेषान् समस्तान् तदभिलाषुकान् परान् शमिनो वाचकप्रज्ञांशप्रमुखान् मुनीनुज्झित्वा सन्त्यज्य । केव । रमेव । यथा समस्तान् सुरासुरानुज्झित्य हरिं नारायणमुपयान्ती मन्दरमन्थानकमथनस-मये क्षीरपाथोधिपाथोवेलासमुत्थितसर्वाङ्गीणलक्ष्मीसमुल्लसल्लक्ष्मी राजते । किंच देवेन ध्रुतममृतमथनावसरे सुरासुरकरपरिवर्तमानमन्दरमन्थानकनिर्घोषप्रधिरितसमस्तरोदः-कन्दरादिवापि दूरोच्छलितदुग्धतुषारासारतारकितनभसः समुत्पन्नानेककौस्तुभादिवस्तु-

१. 'उदेष्यत्केवलस्यैव तुर्यं ज्ञानं जिनेशितुः' इति पाठान्तरम्. २. 'प्रदीप इव दीपस्य निजज्योतिस्तमोपहम्' इति पाठान्तरम्.

भानुमान् किरणमाली सूर्यः प्रातः वासरवदने भानूना निजार्भकप्रभाणा विभ्रम शोभां विलास वा प्रस्तारयन् विस्तारयन् भाति विभ्राजते । द्रुमाणा तरूणा द्रोणिषु। 'द्रोणी द्रोणिरिदन्तः श्रेण्यामपि' इत्यनेकार्थावचूर्णिः । भानुविभ्रम विस्तारयन्निति सर्वत्र योज्यते । उत्प्रेक्ष्यते—उल्लसतः स्फुरतः विकसतो वा पल्लवान्प्रवालान्सचिन्वन्नुपचयं वाहुल्य प्रापयन्निव । तथा तटाकेपु पद्माकरेपु । उत्प्रेक्ष्यते—कोकनदाना रक्तोत्पलाना श्रिय लक्ष्मीं तन्वन्विस्तारयन्निव वहूनि कोकनदानि कुर्वन्निव । तथा । गिरेः पर्वतस्य श्रृङ्गे शिखरे। उत्प्रेक्ष्यते—गैरिकावने रक्तधातुभूमेर्विभ्रम भ्रान्ति कुर्वन्निव विरचयन्निव। पुनर्दिग्वधूनां दशदिगङ्गनाना आस्येपु वदनेपु । उत्प्रेक्ष्यते—ताम्बूलश्रिय दिशन्ददान इव । ताम्वूले चर्विते वाधरादौ रक्तिमा भवेत् । पुनर्मृगाक्षीणा त्रस्तसारङ्गीदृशा सीमन्तेपु केशपाशवर्त्मसु । उत्प्रेक्ष्यते—सिन्दूर श्रृङ्गारभूषण पूरयन् सिन्दूरेण भरन्निव इति लोहितलक्ष्मीविलसित सिद्धान्ते । 'कुङ्कुमखवियच्च जीवलोपे' इति सूर्यस्याभ्युदयसमये कान्तिरप्यतीव रक्ता स्यादिति । त्रिभिर्विशेषकम् ॥ इति सूर्यप्रभाप्रस्तारः ॥

प्रारेभे भानुना व्योम्नि क्रमाच्चङ्क्रमणक्रमः ।
विश्वविश्वंभराभोगं प्रेक्षितुं किमु काङ्क्षता ॥ ७३ ॥

भानुना मार्तण्डेन व्योम्नि गगनाङ्गणे क्रमादनुक्रमेण चङ्क्रमणक्रमः गमनस्यानुक्रमः परिपाटी चङ्क्रमणकलितः क्रमः प्रारेभे पादाः प्रारेभिरे । अथ वा चङ्क्रमस्य क्रम आनन्तर्यनिरन्तरत्वं विश्रामरहितत्वेन गन्तु प्रारभतेत्यर्थः । 'क्रमः कल्पाङ्घ्रिशक्तिपु परिपाट्याम्' इत्यनेकार्थः । 'परम्परायां पादक्षेपे आनन्तर्ये पदसंधावपि क्रमः' इत्यनेकार्थावचूरिः । उत्प्रेक्ष्यते—विश्वस्य जगतः अथ वा विश्वस्याः समग्राया विश्वंभरायाः वसुधराया. आभोग विस्तार प्रेक्षितु द्रष्टु काङ्क्षता किमु वाञ्छतेव ॥ इति दिनोदयः ॥

आसाद्य दर्शनं तस्याः शासनस्वर्गिसुभ्रुवः ।
व्यरंसीद्ध्यानतः सूरिर्योगीव परमात्मनः ॥ ७४ ॥

सूरिर्हीरविजयसूरीन्द्रो ध्यानतः सूरिमन्त्रजापतः प्रणिधानाद्व्यरंसीद्विरमते स्म । किं कृत्वा । तस्याः पूर्वोक्तसर्वाङ्गवर्णनागमनादिव्यतिकरायाः शासनदेवतायाः दर्शन प्रत्यक्षावलोकनमासाद्य अधिगत्य । साक्षात्समीक्ष्येत्यर्थं । क इव । योगीव । यथा योगसाधको जितेन्द्रियो ध्यानविधानैकतानः परमात्मनः परमात्मस्वरूपस्य दर्शन प्राप्य विरमति । ध्यान कुर्वाणा योगीन्द्रा हृदि परमात्मानमालोक्य ध्यानाद्विरमन्ते । यथा 'योगं स चान्तः परमात्मसंज्ञ दृष्ट्वा पर ज्योतिरुपारराम' इति कुमारसभवे ॥

सूरीन्दुर्वसतेर्मध्ये ध्यानस्थानादथागमत् ।
प्राग्गिरेः कन्दरक्रोडाद्भास्वानिव नभोङ्गणम् ॥ ७५ ॥

अथ शासनदेवतागमनप्रश्नकथनध्यानविरमणानन्तरं सूरीन्दुर्हीरविजयसूरिचन्द्रो ध्यानस्थानात्प्रणिधानविधानास्पदाद्वसतेरुपाश्रयस्य मध्ये उत्सङ्गे आगमदागतः । ...

इष्टमानस इव । यथा इष्टमानसो राजहंसः वर्षा वर्षासमयमुल्लङ्घ्य मानसात् स्वाश्रय- कासारत हर्षादानन्दाद्विहरति पृथिवीपीठपानीयप्रपूर्णानेकपङ्कजनिकुञ्जमञ्जुलजलाशयेषु स्वैरं विहरति । 'नृपमानसमिष्टमानस' इति नैषधे ॥

क्रमेणाहम्मदावादपुरे सूरिः समीयिवान् ।
नभोनीरधिवर्णिन्याः प्रतीरे सुप्रतीकवत् ॥ ८० ॥

सूरिर्हीरगुरुः क्रमेण ग्रामानुग्रामादिविहारपरिपाट्या अहम्मदावाद इति नाम यस्य तादृशे पुरे नगरे समीयिवान् समाजगाम । किंवत् । सुप्रतीकवत् । यथा ईशानविदि- क्सबन्धी अष्टमः सुप्रतीकनामा ककुप्कुञ्जर' नभस आकाशस्य नीरधेर्जलराशेर्वरवर्णिनी पत्नी । 'वशा सीमन्तिनी वामा वर्णिनी महिलाबला' तथा 'कर्पुद्वीपवती समुद्रदयिता धुन्यौ स्रवन्ती सर' इति द्वितयमपि हैम्याम् । एतावता आकाशगङ्गा । 'नदत्याकाशग- ङ्गायाः स्रोतस्युद्दामदिग्गजे' इति रघुवंशे । तस्या प्रतीरे तटे । 'तट तीर प्रतीर च' इति हैम्याम् ॥

देवीनिगदितागण्यभाग्यसौभाग्यशालिन ।
स्वस्यान्तेवासिनस्तस्य कम्माङ्गजयतीशितु' ॥ ८१ ॥

सूरीन्दुः कामयांचक्रे दातुं सूरिपदं ततः ।
तनूजस्येव राज्यस्य धुरं धात्रीपुरंदरः ॥ ८२ ॥ (युग्मम्)

ततोऽहम्मदावादगमनान्तरं सूरिर्हीरविजयरजनिजानि स्वस्यात्मनः आत्मीयस्य- वान्तेवासिनः समीपे वसनशीलस्य शिष्यस्य कम्मानाम्नो व्यवहारिण' गृहीतव्रतत्वात्सा- धोर्वा अङ्गज' पुत्रः तथा यतीनां मध्ये ईशिता मुख्यो गीतार्थत्वात् । अथ वा भा- विनि भूतोपचारात् निर्ग्रन्थाना नायकः तस्य विमलप्रज्ञाशस्य सूरिपदमाचार्यपदं प्रदातु कामयाचक्रे अभिलषति स्म । किंभूतस्य । देव्या शासनतरुण्या निगदिते सूचिते कथिते अनण्ये अप्रमेये वाङ्मानसगोचरीकर्तुमशक्ये भाग्य पुण्य तथा सौभाग्य सुभ- गता विश्ववाल्लभ्य ताभ्या शालते शोभते इत्येवशीलस्य । क इव । धात्रीपुरंदर इव । यथा पृथिवीपुरहूतो राजा तनूजस्य निजनन्दनस्य राज्यस्य स्वसकलमण्डलाधिपत्यधुरं प्रदातु कामयते ॥

प्रक्रमे तत्र तत्रत्यसंघेनागृह्यत प्रभुः ।
तमिवाभिनवं सूरिशक्रमन्यं दिदृक्षता ॥ ८३ ॥

तत्र प्रक्रमे तस्मिन्प्रस्तावे तत्रत्येन कर्मीपुरीयेण सघेन श्राद्धवर्गेण भगवानगृह्यत । अर्थात्सूरिपदप्रदानार्थं प्रभोराग्रह. कृतः । सघेन किं कर्तुमिच्छता । तमिव हीरविजय- गणधरमिव अन्यमपर अभिनव नवीन सूरिशक्र गणभारधुरंधर दिदृक्षता द्रष्टुमिच्छता ॥

ततः स्वाशयसंवादि प्रपेदे तद्वचः प्रभुः ।
व्रतव्यतिकरे लौकान्तिकदेवोक्तमार्हवत् ॥ ८४ ॥

[illegible] इति नैषधीयकवेः [illegible] ॥

तन्वनाभिकृतान्वेषधरान्वागुरिकानिव ।

पाशे पातयतो मुग्धान्मृगानिव विवेद सः ॥ १०९ ॥

स नैषधीमुनिः [illegible] कृतोऽङ्गीकृतो यो वेषो विहद्- [illegible] तन्मतग्राहिकारिणो [illegible] केवललिङ्गधारकात्तान् लुम्पाकान् [illegible] वागुरा मृगजातिबन्धनादिजन्तुग्रहणपाशोऽस्त्येषामिति वागुरिकाः । [illegible] 'जालिको वागुरिकः' इति [illegible] । तान् जालिकानिव विवेद हृदि [illegible] । किं कुर्वतः । मृगान् हरिणानिव मुग्धान् [illegible] तत्त्वातत्त्वविचारणाचतु- रेतरान् [illegible] पाशे पाशगर्ते [illegible] पातयतः क्षेपयतः । तथात्रापि कोऽपि मुग्धः [illegible] न [illegible] कपटचर्यादिकं वेत्तीति तादृशः केनापि [illegible] विनोद्य [illegible] पाशे पातितेऽसौ विमुच्यते ॥

अमी वीक्ष्य प्रकुर्वन्ति बका इव शनैः शनैः ।

सतां सम्यग्दृशो हन्तु काङ्क्षन्तः शफरीरिव ॥ ११० ॥

अमी लुम्पाकवेषधारका बका बकोटा इव शनैः शनैर्मन्दं मन्दमालोक्यालोक्य मुग्ध- [illegible] वीक्षां गमनं प्रकुर्वन्ति पादौ [illegible] । उत्प्रेक्ष्यते—सताम् अस्मासु [illegible] तेषां श्राद्धानां सतां परं मुग्धानां सम्यग्दृशः सत्यज्ञानदृष्टीः । सम्यक्त्वानीत्यर्थः । हन्तुं व्यापादयितुं नाशयितुमिव काङ्क्षन्तः इच्छन्तः । क इव । शफरीरिव । यथा बकाः शफरीर्मत्स्यीर्हन्तुं स्पृहयन्तः शनैर्हिण्डन्ते ॥

विगोपनमिवैतेषां वेषं वेषभृतामवैत् ।

तन्मतस्थं पुनर्मेने सौधं कूपगतं निजम् ॥ १११ ॥

स नैषधीमुनिरेतेषामनीषां कलिकालविलसितेन महावीरदेवशासनेऽपि कण्टकप्रादु- र्भावोद्भूतानां लुम्पाकानां वेषभृतां जैनाभासलिङ्गधारिणां वेषं लिङ्गं विगोपनमिव विडम्बनं नाशनमवैत् मनसि बुबुधे । पुनः स नैषधीमुनिः तेषां लुम्पाकानां मते पक्षे तिष्ठतीति तन्मतस्थं निजमात्मीयं सौधं कूपगतमिवेत्यध्याहारः । यदन्धकारकलितपातालावटमध्य- निष्पतितमिव मेनेऽज्ञासीत् । इति गर्भितोपमा ॥

आप्तोक्तिरत्नगर्भायाममीषां प्रतिमार्हताम् ।

निधिकुम्भीव दुःस्थानां पथिकी नाभवद्दृशोः ॥ ११२ ॥

आप्तोक्तिरागमः सैव रत्नगर्भा वसुधरा तस्यां दुःस्थानां दरिद्राणां निधिकुम्भीव रत्ननिधानकलशीव । अमीषां लुम्पाकमतपक्षीभूतभूयोवेषधारिणामर्हतां तीर्थकृतां

जनारब्धमहामहैः सार्धं जैनीं जिनसबन्धिनीं प्रतिमां मूर्तिं प्राणमत् प्रणमति स्म। क इव। जयीव। यथा निखिलदिग्मण्डलनिर्जयनशीलः पृथिवीपालो निजमातरं स्वजननीं प्रणमति॥

कलौ स्वकामिताप्राप्तेर्लोकानालोक्य सीदतः।
पूर्णकामाश्चिकीर्षुं तान्स्वः सुरद्रुमिवागतम्॥ ११७॥
स्वोदयाय कलिं लुप्त्वा किमु कर्तुं कृतं युगम्।
नक्तंदिनमिवादित्यं धर्मं मूर्तमिवोद्गतम्॥ ११८॥
चतुर्थारकवल्लोकान्पञ्चमेऽप्यरकेऽथ वा।
अवतीर्णमिवोद्धर्तुं कृपया गौतमं पुनः॥ ११९॥
तपागच्छश्रिया लीलाललाममिव जङ्गमम्।
श्रीहीरविजयं प्रीतेरैषीदेष निषेवितुम्॥१२०॥ (कलापकम्)

एष मेघजीऋषिः श्रिया सूरिलक्ष्म्या कलितं हीरविजयम्। श्रीहीरविजयसूरिमित्यर्थः। प्रीतेरानन्दात्। विशुद्धधर्मप्ररूपकत्वेन गुरुस्नेहाद्वा निषेवितुमुपासितुमैषीद्वाञ्छति स्म। उत्प्रेक्ष्यते—तपागच्छश्रिया तपोगणलक्ष्म्या जङ्गमं सञ्चरणशीलं लीलाललामं शृङ्गारकृते विधृतं कनकतिलकमिव। ललामशब्दो नकारान्तोऽकारान्तोऽप्यस्ति। 'ललामवल्ललामश्चादन्तः पुंक्लीबलिङ्गो नकारान्तः क्लीब एव' इत्यनेकार्थः। अथ हीरविजयसूरिं विशिनष्टि। उत्प्रेक्ष्यते—स्वः स्वर्गलोकादागतं भूमीमण्डलेऽवतीर्णं सुरद्रुं कल्पवृक्षमिव। किं कर्तुमिच्छुम्। तान् लोकान् पूर्णकामान् इच्छापूरणपर्यन्ताधिगतसमस्तस्वमनोभिलाषांश्चिकीर्षुं कर्तुमिच्छुम्। किं कृत्वा। कलौ कलिनाम्नि युगे पञ्चमारके स्वैरात्मना कामितानामभीष्टानामप्राप्तेरनासादनात्सीदतः दुःखीभवतः सकलान् यावद्भुवनवलयवर्तिनो लोकानालोक्य विज्ञायेत्यर्थः। पुनरुत्प्रेक्ष्यते—मूर्तं शरीरवन्तमङ्गीकृतकायं वा उद्गतं प्रकटीभूतं धर्मं जैनधर्ममिव। किं कर्तुम्। नक्तंदिनमहोरात्रम्। निरन्तरमित्यर्थः। स्वस्यात्मन उदयाय चतुर्भिरंशैस्तिरोभवनाय चतुरङ्गतया प्रादुर्भवाय वा कालिं प्रबलतापसन्तापास्पदं कलियुगं लुप्त्वा विलुप्य निखिलभुवनमण्डलान्निष्कास्य कृतं युगं प्रथमसत्ययुगं कर्तुं विधातुम्। कृतयुगे हि धर्मश्चतुरङ्गः स्यात्। यदुक्तम् नैषधे—'पदैश्चतुर्भिः सुकृते स्थिरीकृते कृतेऽमुना के न तपः प्रपेदिरे' इति। कमिव। आदित्यमिव। यथा गाहस्करो नक्तं निशां विलुप्य दिनं वासरं कर्तुमुरीकरोति। पुनरुत्प्रेक्ष्यते—पञ्चमे दुःषमानाम्न्यप्यरके कृपया कारुण्यरसानुद्रुततया लोकान् भव्यजनानुद्धर्तुं भवविकटकटाद्उद्धृत्य मोक्षे महानन्दपदे नेतुं प्रापयितुं पुनर्द्वितीयवारमवतीर्णं गृहीतावतारं गौतममिव श्रीमन्महावीरप्रथमशिष्यं गणधराग्रगण्यमिव॥ चतुर्भिः कलापकम्॥

विस्तारादुद्गच्छदप्सरसा मुखमण्डलैः क्षणमिव विहितविकचनलिनशोभादने [illegible] क्षीरसागरात् अजनि जनितजगद्विस्मया स्मरजननी हस्तस्थिततरुणारविन्द [illegible] देदीप्यमाना पुण्यलक्ष्मीर्यस्याः सर्वाङ्गलावण्यमनु विकचलोचनकैरापीय [illegible] मदनमदपरवशाः परस्परमवेर्ष्यन्तश्चकुश्चक्रपाणिना समं सगरम् । अथ सर्व[illegible]न्तरापततस्तानुल्लङ्घ्य मन्दरगिरिशिखरशातकुम्भनिकषोपलायमानवाहोर्भाग[illegible] क्षेपीयः कण्ठे वैकुण्ठस्य स्वयवरकुसुममालिकाम्' इति चम्पूकथायाम् ॥

तस्य पूरयतो विश्वकामांश्चिन्तामणेरिव ।
श्रीमद्विजयसेनेति सूरिराजोऽभिधां व्यधात् ॥ ९७ ॥

सूरिराजो हीरविजयसूरीन्द्रस्तस्य जयविमलसूरेः श्रीमान् विजयसेन इत्यभि[illegible] नाम व्यधाच्चकार । तस्य किं कुर्वतः । विश्वेषां जगज्जनानां कामान्मनोभिलाषान् पूरयतः पूर्णान् सृजतः । कस्येव । चिन्तामणेरिव । यथा देवमणिः सर्वान्कामान् संपूरयति ॥

किंनर्य इव नागर्यो जगुर्गीतिं पिकीक्वणाः ।
संगीतं तेनिरे नाकिकुमारा इव नर्तकाः ॥ ९८ ॥

नागर्यो नागराङ्गनाः किंनर्यः किंपुरुषयोषित इव गीतिं गानं जगुर्गायन्ति स्म । किंभूताः । पिकीनां कोकिलानामिव क्वणः पञ्चमसूचकालापनमधुरध्वनि[illegible] नर्तका नटा नाकिनां देवानां कुमारा इव संगीतं प्रेक्षणकविनिमित्तप्रयुक्तगीत[illegible]नम् । अथ वा प्रेक्षणकं नाटकमेव तत्तेनिरे चक्रिरे ॥

त्रिलोकीमपि कुर्वाणं तत्र चित्रीकृतामिव ।
नेत्रश्रोत्रसुधास्यन्दि तौर्यत्रिकमजायत ॥ ९९ ॥

तत्र [illegible] नेत्राणां लोचनानां श्रोत्राणां श्रवणानां च [illegible] [illegible] तौर्यत्रिकं गीतनृत्यवाद्य[illegible] [illegible] त्रिलोकीमपि चित्रीकृतामिव [illegible]

[illegible] ॥ १०० ॥

[illegible]

स्तनादददानः । पुनः किं कुर्वन् । शौर्यात् शूरत्वात्सिंहिकाया अपत्यानि सैंहिकेयाः केसरिणः जयन्पराभवन् पराक्रमन् सिंहव्याघ्रादिश्वापदानिघ्नन् । सूर्यस्तु प्रतीच्यां मन्दायमानमहाः सप्ताश्व एव रात्रिं श्रिय दिशन् । 'पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः' इति रघौ । तथा सैंहिकेयात्स्वर्भानो सकाशादभिभव लभमान. । अत एवाकब्बरसाहेः सूर्यजयो युक्त एव ॥ युग्मम् ॥ इत्यकब्बरः ॥

साहिना सार्धमभ्येयुः प्राच्याः केऽपीह नैगमा. ।
शर्वरीसार्वभौमेन नभोमार्गे ग्रहा इव ॥ १२५ ॥

साहिना अकब्बरपातिसाहिना सार्धं केऽपि केचन प्राच्याः पूर्वदिक्संबन्धिनः नैगमा वणिजो व्यवहारिण. इह गुर्जरमण्डले अभ्येयुरागताः । के इव । ग्रहा इव । यथा शर्वरीसार्वभौमेन विधुना सार्धं नभोमार्गे गगनाङ्गणे ग्रहाः समायान्ति ॥

तेऽप्यासञ्शासने जैने लीना मीना इवाम्बुनि ।
स्थानसिंहादिमा मान्या अमात्या इव भूपतेः ॥ १२६ ॥

ते नैगमा अपि जैने शासने भगवत्संबन्धिनि तपागच्छाभिधाने शासने लीना निलीयमानमानसाः एकतानीकृतचित्ताः सन्ति । क इव । मीना इव । यथा अम्बुनि पानीयविषये लीनास्तिष्ठन्ति । किंभूता. । स्थानसिंहः रामासाहसूनुः आदिमः प्रथमो मुख्यो वा येषु ते तादृशा । पुनः किंभूताः । महीपतेरकब्बरपातिसाहेर्मान्या माननीया । क इव । अमात्याः सचिवा भूपतेर्माननार्हा भवन्ति ॥ इति प्राचीनश्राद्धाः ॥

अरंतुदं कुपक्षाणामिवासेचनकं सताम् ।
परिव्रज्योत्सवं कर्तुं काङ्क्षन्तो मेघजीमुनेः ॥ १२७ ॥
निशितायसशल्यानि हृदि मिथ्यादृशामिव ।
आनयन्ति स्म ते तुर्याण्यकब्बरमहीहरे ॥ १२८ ॥ (युग्मम्)

ते प्राचीनाः श्राद्धा अकब्बरनाम्नो महीहरे पृथ्वीपुरंदरस्य तुर्याणि वादित्राण्यानयन्ति स्म । उत्प्रेक्ष्यते—मिथ्यादृशां कुवादिनां हृदि हृदये वक्षसि निशितानि तीक्ष्णानि आयसानि लोहमयानि शल्यानि त्रिशूलानीव । 'हृदि शल्यमिवार्पितम्' इति रघौ । 'शलिः पीडाकारित्वाच्छिशूलम्' इति तद्वृत्तिः । तथा 'परस्परोत्कालितशल्यपाट्ये' इति नैषधे । 'शिथ उत्कालितकुन्ता येऽग्रे' इति तद्वृत्ति. । ततः शल्यानि कुन्ता इव । तथा 'शल्यं शंकुशलाकयाः' इत्यनेकार्थे । शस्त्राणीव वा । प्राच्या. किं कुर्वन्त । मेघजीमुनेः प्रव्रज्यायाः दीक्षाया उत्सवं महोत्सवं कर्तुं निर्मातुं काङ्क्षन्त इच्छमाना । किंभूतं परिव्रज्योत्सवम् । उत्प्रेक्ष्यते— कुपक्षाणां कुम्पाकादीनां कुमतानामरंतुदं मर्मव्यथकमिव । पुनरुत्प्रेक्ष्यते— सतां साधूनां जैनानां सुदृशामासेचनकमाह्लादकमिव । 'तदासेचनकं यस्य दर्शनाद् दृष्ट्यात्' इति हैम्याम् । अत्र शालापण्डान्यायेनोभयत्रापि इव संबध्यते ॥ युग्मम् ॥ इति वाद्यानयनम् ॥

त्रिदिवशिखराणा सत्याकृतिमिव । कि कृत्वा । इत्यमुना प्रकारेण तदा तस्मिन्दीक्षाग्रहमहोत्सवसमये परपक्षान् परगच्छीयान् खरतरस्तनिकादीनवमत्यागणयित्वा । विमुच्येत्यर्थ । किंभूतान् परपक्षान् । स्वस्यात्मन गणैर्गच्छैस्तस्य मेघजीमुनेराहूतिकृतः आकारणविधायिन । आकारण सूरिपदादिप्रदानादिना लोभयित्वा हठ कुर्वन्तीति तान् । इति किम् । यदह वैधेयवन्मातृशासितो मूर्ख इव ज्ञानवानप्यज्ञानवानिव अन्धकूपात् ध्वान्तोपचितान्तरावटान्निरीय निर्गत्य पुनर्द्वितीयवार कूपे अपरस्मिन्कूपे कि कथ पतामि झम्पामि । अपि तु नैव पतिष्यामीत्येव विचार्येत्यर्थ ॥ युग्मम् ॥

उद्द्योतं शासने तेने विजयं दुर्दृशा च यत् ।
इतीवास्य व्यधात्सूरिरुद्द्योतविजयाभिधाम् ॥ १३५ ॥

सूरिर्हीरविजयप्रभु । उत्प्रेक्ष्यते—इति हेतोरस्य मेघजीऋषे उद्द्योतविजय इत्यभिधा नाम व्यधाच्चकार । इति किम् । यत्कारणादसौ त्यक्तलुम्पाकमताधिपत्यः शासने उद्द्योत प्रकाश तेने विस्तारयामास । च पुनर्दुर्दृशा कुपक्षाणा कुमताना विजयमवगणनारूप विदधे निर्मितवान् । पराभव विहितवानित्यर्थ ॥

पादपीठलुठन्मूर्धा बद्धाञ्जलिरसौ विभुम् ।
श्रीनाभ इव नाभेय स्वयंभुवमवीभजत् ॥ १३६ ॥

असौ उद्द्योतविजयमुनि विभु हीरविजयसूरीन्द्रमवीभजत्सिद्धान्तोक्तविधिवद्विनयविधानादिप्रकारेणातिशयेन भजते स्म निषेवते स्म । तदेव दर्श्यते—किंभूतः । पादपीठे पदासने लुठन्मिलन्मूर्धा मौलिर्यस्य । पुन किंभूत । बद्धाञ्जलि ललाटपट्टघटितकरकमलकुड्मल. । क इव । श्रीनाभ इव । यथा श्रीनाभनामा गणधर नाभेर्नाभिनामनृपस्यापत्य सतानम् । नन्दन इति यावत् । नाभेयः श्रीऋषभदेवस्त वृषभ स्वयभुव तीर्थकर भजते स्म । विशेषणे पूर्ववत् । पादपीठे लुठन् सघट्ट प्राप्नुवन् मूर्धा मस्तक यस्य । तथा बद्धो रचितोऽञ्जलि पाणिद्वययोजन येन ॥ इति मेघजीऋषिमह ॥

पारीन्द्र इव सूरीन्द्रः प्रणिहत्य तमोद्विपम् ।
नृणा व्यश्राणयद्बोधि मुक्तापङ्क्तिमिवार्थिनाम् ॥ १३७ ॥

सूरीन्द्रो हीरविजयगुरु नृणा भव्यप्राणिना बोधि सम्यक्त्व व्यश्राणयद्ददाति स्म । कामिव । मुक्तापङ्क्तिमिव । क इव । पारीन्द्र इव । यथा केसरी अर्थिना याचकाना मुक्ताना स्वहारितकुम्भिकुम्भमध्यनिष्पतन्मौक्तिकाना श्रेणी विश्राणयति प्रयच्छति । कि कृत्वा । प्रणिहत्य व्यापाद्य । किम् । तम अज्ञान पाप वा तद्रूप श्यामत्वात्तत्सदृश द्विप हस्तिनम् ॥

मघा विहरति स्वैर श्रीमत्सूरिपुरंदरे ।
दानवर्षितया भव्यव्रजेनानेकपायितम् ॥ १३८ ॥

प्रतिमा बिम्बमर्चा दृशोर्लोचनयोः पथिकी वियमानापि पान्थो गोचरा [illegible] निलित्त तु महाह एन ॥

ऐहिकामुष्मिके सौख्ये दूरेऽन स्पागिनो मम ।
नीरनीरे सर पङ्के निमग्नस्येव दन्तिन ॥ ११२ ॥

[illegible]

पान्थानिव महानन्दपुटभेदनपद्धतौ ।
दीक्षयामास सूरीन्द्रोऽनेकानिभ्यतनूभवान् ॥ १४३ ॥

सूरीन्द्रोऽनेकानपरानपि इभ्यतनूभवान्व्यवहारिपुत्रादीन्दीक्षयामास प्रव्राजयति स्म । उत्प्रेक्ष्यते—महानन्दो मोक्षः स एव पुटभेदनं रत्नयोनिपत्तनम् । रत्नयोनिरिति लोकरूढिः । यथा च रत्नाकराणां पुरुषाणामुत्पत्तिस्थानम् । महानन्दे तीर्थंकरचक्रवर्तिबलदेवमहामण्डलिकमहीपतिसूरिवाचकमहामुनिप्रमुखाः रत्नेभ्योऽप्यधिकानां महापुरुषाणामुत्पत्तिस्थानत्वात् पत्तनोपमानम् । तस्य पद्धतौ मार्गे पान्थान् पथिकानिव ॥

शाखाप्रशाखाश्रेणीभिराकीर्णः श्रमणाग्रणीः ।
व्यभाद्वट इव च्छायाच्छन्नः सेव्यश्च राजभिः ॥ १४४ ॥

श्रमणानां साधूनामग्रणीः पुरोगो हीरविजयसूरिः वट इव न्यग्रोधपादप इव व्यभात् । किंभूतः । शाखा विमलविजयसागरसुन्दरादिकाः प्रशाखा आनन्दहर्षसौभाग्यविशालकुशलादिकास्तासां श्रेणीभिराकीर्णः परिवृतः । पुनः किंभूतः । छायया शोभया छन्नो निचितः सहितः । पुनः किंभूतः । राजभिर्भावितभूतोपचाराद्भूपालैः सेव्यः उपासनीयः । वटस्तु स्कन्धनिर्गताः शाखास्ताभ्यः पुनर्निर्गताः प्रशाखास्तासां राजिभिर्व्याप्तो भरितः । तथा छायया प्रतिच्छायिकयाश्रितः छिन्नितः । तथा राजभिर्यक्षैः सेवनीयः । यक्षाणां वटवासित्वात् । 'यक्षः पुण्यजनो राजा गुह्यको वटवास्यपि' इति हैम्याम् ॥

समस्थापयत्तीर्थसार्थाननेकाननेकान्तवादाम्बुजाम्भोजबन्धुः ।
महीमण्डले रन्तुमुत्कण्ठितायाः स्फुरत्केलिगेहा इव ब्रह्मलक्ष्म्याः ॥ १४५ ॥

एकान्तेन निश्चयेन वदनमनेकान्तवादो न एकान्तवादो यत्र तदनेकान्तवादं जिनशासनम् । यतः—'स्याद्वादवाद्यार्हतः स्यात्' इति हेमाचार्योक्तिः । स एव तदेव वाम्बुजं सरसीरुहं तत्र तद्विकाशने अम्भोजबन्धुः पद्मबान्धवः सहस्ररश्मिः सूरीन्द्रः अनेकान् शतशः तीर्थानां पापसंतापापनोदस्थानानां सार्थान् समूहान् । यद्यपि हैम्याम् 'सधर्माणां तु देहिनाम्' इत्युक्तम्, तथापि हेमचन्द्रेणैवानेकार्थे प्रोक्तम्—'सार्थो वृन्दे वणिग्गणे' इत्युत्पन्नभेदात्, तथा 'पदार्थसार्थ—' इत्यपि दर्शनात्, अनुप्रासत्वाद्वा लक्षणयापि समूहार्थ एव तस्यादानीतः । समस्थापयत्संस्थापयति स्म । उत्प्रेक्ष्यते—महीमण्डले पृथ्वीपीठे रन्तुं क्रीडितुमुत्कण्ठिताया उत्सुकिताया ब्रह्मलक्ष्म्या मुक्तिश्रियाः । 'शिवं निःश्रेयसं श्रेयो निर्वाणं ब्रह्मनिर्वृतिः' इति हैम्याम् । स्फुरन्तः निखिलसुदृग्दृग्गोचरीभावं भजन्तः केलिगेहा विलाससौधानीव । सूरिस्थापितानां तीर्थानां पृथिवीपीठस्थायुकत्वात् अयं च ब्रह्मलक्ष्म्यास्त्रैलोक्योपरितभूमौ स्थायित्वाच्च महीमण्डले क्रीडार्थमिति ॥ इति हीरविजयसूरिधर्मकृत्यानि महिमसंपदः ॥

व्रतं जिघृक्षुः सोऽकाङ्क्षीद्धीरसूरेः समागमम् ।
श्रीसुव्रतजिनस्येव कार्तिकः श्रेष्ठिपुङ्गवः ॥ १२१ ॥

स मेघजीऋषिः व्रतं प्रव्रज्यां जिघृक्षुः गृहीतुमिच्छुः सन् हीरसूरेर्हीरविजयसूरीश्वरस्य समागमम् अकमिपुरे पादावधारणं समागमनम् अकाङ्क्षीत् वाञ्छति स्म । क इव । कार्तिक इव । यथा श्रेष्ठिनां श्रीदेवताप्रतिमाङ्कितबद्धशिरःसुवर्णपट्टानां नगराधिकारिमुख्यानां मध्ये पुङ्गवः प्रधानः कार्तिकनामा श्रेष्ठी सुव्रतजिनस्य श्रीमुनिसुव्रतस्वामिनः आगमनं काङ्क्षति स्म ॥

विज्ञाय हीरसूरीन्दुराशयं मेघजीमुनेः ।
आगादहम्मदावादे माकन्दे कीरवत्क्रमात् ॥ १२२ ॥

हीरसूरीन्दुः हीरविजयसूरिशर्वरीसार्वभौमः क्रमाद्ग्रामानुग्रामादिविहारस्य परिपाट्या अहम्मदावादे गुर्जरमण्डलविपुलाखण्डलनिवासस्थानत्वेन राजनगरे आगात् आगच्छति स्म । स्वयमागत्य अकमिपुरे समवसृत इत्यर्थः । किंवत् । कीरवत् । यथा माकन्दे सहकारमहीरुहे शुकः समेति । किं कृत्वा आगतः । मेघजीमुनेराशयं स्वपार्श्वे संयमग्रहणाभिप्रायं विज्ञाय ज्ञात्वा स्वतः परतो वा अवसाय ॥ इति हीरविजयसूरेरकमिपुरीगमनम् ॥

प्राच्यामिव प्रतीच्यां च महोऽभ्यधिकमावहन् ।
परोलक्षान्दधत्ताक्ष्यान्गृह्णन्राज्ञां श्रियं पुनः ॥ १२३ ॥
सैंहिकेयाञ्जयञ्शौर्याद्योऽजैषीत्पूषणं श्रिया ।
स गुर्जरेष्वथागच्छत्साहिः श्रीमदकब्बरः ॥१२४॥ (युग्मम्)

अथास्मिन्व्यतिकरे सकलवसुधावलयप्रसिद्धः श्रीमाननेकजनपदनायकाधिपत्याद्भुतलक्ष्म्या लक्षितः साहिः पातिसाहिः गुर्जरेषु आगच्छत्समागतः । स कः । योऽकब्बरसाहिः श्रिया वैभवेन कृत्वा पूषणं सहस्रकिरणमजैषीज्जयति स्म पराबभूव । 'नमस्तितु मना यन्नाम स्यान्न सम्प्रति पूषणम्' इति नैषधे । किं कुर्वन् । प्राच्यां पूर्वस्यां दिशि इव प्रतीच्यां पश्चिमायामप्याशायामभ्यधिकमतिशायितमं प्रतिपक्षपक्षलक्षदुःसहं सहो महो निजप्रतापमावहन् आकलयन् । पुनः किंभूतः । लक्षात्परे परोलक्षा लक्षशतास्ताक्ष्यान् जात्यतुरङ्गमान् अर्थादश्ववारान् दधद्धारयन् । कटके कति वाजिनः सन्ति लक्षं द्विलक्षी त्रिलक्षी वा इति लोकभाषैव वर्तते । परं तावन्तोऽश्ववारा एव ज्ञेया इत्युक्तेः । पुनः किं कुर्वन् । राज्ञामपरापरपृथ्वीपालानां श्रियं संपदं देशनगरग्रामादिविभूतिं गृ-

---

१. पाणिनीयमते तु 'नाज्झलौ' इति सूत्रस्य 'पारस्करादित्वात्सुट्' इति, कयटानुसारेण सुट एव संभवे तस्य परादित्वेन पदान्तत्वाभावादुत्वोत्वयोरप्राप्तौ 'परस्लक्षान्' इति भवेत्.

उपास्यते स्म । अम्बुधावपि मण्यादयः सर्वेऽपि पदार्थाः सन्ति । ऐरावणोच्चैःश्रवसोस्तत्रोत्पन्नत्वात् जले गजाश्वानां संभवाद्वा ॥

इन्द्रनीलमणिशालिजालकाश्चन्द्रकान्तकृतचन्द्रशालिकाः ।
भूतलाभ्युदयिनो बभासिरे शारदीनशशिमण्डला इव ॥ १४९ ॥

यत्र गन्धारनगरे इन्द्रनीलमणिभिः मरकतादिनीलरत्नैः शालन्ते शोभन्ते इत्येवंशीला जालका गवाक्षा यासु तादृश्यः चन्द्रकान्तैश्चन्द्रमणिभिः कृता निर्मिता चन्द्रशालिका अर्थात्सौधानां शिरोगृहाणि उपरितनभूमिका बभासिरे भासन्ते स्म दीप्यन्ते स्म । उत्प्रेक्ष्यते—भूतले महीमण्डले अभ्यागत्योदयन्त्युद्गच्छतीत्येवंशीलास्तथा शारदीना प्रसरत्पयोधररोधापगमप्रोल्लसत्प्रचुरचन्द्रिकाकलिता शरत्कालसम्बन्धिनी. शशिनामिति सार्थकं नाम कलङ्ककालिमाकलितचन्द्राणां मण्डला बिम्बा इव । मण्डलशब्दस्त्रिपु लिङ्गेषु । चन्द्रशालिकासु लक्ष्मगदशेन्द्रनीलगवाक्षाः ॥ इति गन्धारवर्णनम् ॥

महैर्महीयोभिरनेकनागरैः प्रवेशितः सूरिपुरंदरः पुरम् ।
दिग्जैत्रयात्रासु निजानुगीकृतप्रतीपभूमीपतिसार्वभौमवत् ॥ १५० ॥

अतिशयेन महान्तो महीयांसस्तैर्महीयोभिरत्यभ्यधिकैर्महोत्सवैः कृत्वानेकैः गणनातीता नागरा पुरजनास्तैः सूरिपुरंदरो हीरविजयसूरिवासव पुरं गन्धारनगरं प्रवेशितः पुरे प्रवेशः कारितः । किंवत् । दिशां पूर्वपश्चिमदक्षिणोत्तराणां चतसृणां जैत्रासु जयनशीलासु यात्रासु सेनाभिः सह शत्रूणामभिगमोऽभिषेणनं तेषु निजस्यात्मनोऽनुगीकृता. सेवकभावं लम्भिता. प्रतीपा पूर्वं प्रतिकूला विजये कृते च पश्चिदानुकूल्यभाजः भूमीपतयो राजानो येन तादृक् सार्वभौमवत् । यथा चक्रवर्ती महामहैः कृत्वा नागरैर्नगरं प्रवेश्यते ॥

गणकैरविणीरमणः श्रमणैर्बहुभिः सह तत्पुरमध्यवसत् ।
कलभप्रकरैरिव गन्धगजो जलबालकभूधरभूवलयम् ॥ १५१ ॥

श्रमणैः साधुभिः सार्धं गणे तपागच्छे आह्लादकत्वेन कैरविणीनां कुमुदिनीनां रमणः प्राणनाथश्चन्द्रो गच्छनायकः तद्गन्धाराभिधानं नगरमध्यवसत् आश्रयति स्म । गन्धारबन्दिरे तस्थिवानित्यर्थः । क इव । गन्धगज इव यथा [illegible] जगज्जैत्रपलक्षणाद्विशतिवर्षपर्यायैर्विंशतिवर्षैर्वा दशवार्षिकैः पोतैः [illegible] सार्धम् । 'पञ्चवर्षो गजो बालः स्यात्पोतो दशवार्षिकः । विक्को विंशतिवर्षः [illegible] त्रिंशदब्दकः ॥' इति हैम्याम् । गन्धहस्ती जलबालको विन्ध्यः स एव भूधरः पर्वतः तस्य भूवलयं वनगहनगुहाविपिनपीठमधिवसति विन्ध्याद्रिवनखण्डे [illegible] । 'विन्ध्यस्तु जलवालक' इति हैम्याम् ॥

अमरपुरीकृतलज्जे तत्र विजेतुं बलिपुरे सज्जे ।
प्रावृषि दुग्धपयोधौ मधुपरिपन्थीव तस्थौ सः ॥ १५२ ॥

स्पृहयद्भिरिवोद्वोढुं सिद्धिमुग्धमृगीदृशम् ।
श्राद्धैरस्य तपस्याया: प्रारभ्यत महामहः ॥ १२९ ॥

प्राच्यैर्गौर्जरैश्च श्राद्धैः श्रावकैरस्य मेघजीमुनेस्तपस्याया दीक्षाया महामहः महोत्सवः प्रारभ्यत प्रारब्धः । उत्प्रेक्ष्यते—सिद्धिर्मुक्तिरेव मुग्धमृगीदृक् कमनीयकामिनी ताम् । 'मुग्धो मूढे च रम्ये च' इत्यनेकार्थ. । उद्वोढु परिणेतु स्पृहयद्भि. कामयमानैरिव ॥

पूरिताशेषदिग्ध्वानढक्का तद्यशसामिव ।
तन्महो भूपदिग्जेत्रयात्राढक्काक्कणा इव ॥ १३० ॥
कुलशैलपयोराशिप्रतिध्वनिविधायिनः ।
वाद्यमानघनातोद्यनादाः प्रादुरवीभवन् ॥ १३१ ॥ (युग्मम्)

वाद्यमानानि ताड्यमानानि वादित्रवादिकैर्जनैः करैर्दण्डेन वा निहन्यमानानि घनानि प्रभूतानि आतोद्यानि तूर्याणि तेषा नादाः शब्दाः प्रादुरवीभवन् प्रकटीभवन्ति स्म । किंभूता' । कुलशैलाः मेरुमन्दरकैलाशादिकाः कुलाचला. तथा पयोराशि समुद्रस्तेषु ये प्रतिध्वनयः प्रतिशब्दास्तान्विदधते प्रणयन्तीत्येवशीला. । उत्प्रेक्ष्यते—तद्यशसा तस्य मेघजीऋषेः यशसा कीर्तीना पूरिता निर्भर भृता अशेषा. समस्ता दिशो दशा प्याशा यैस्तादृशा ध्वानाः शब्दा यासां ता ढक्का यश पटहानि स्वाना इव । अथवा । तस्य मेघजीमुनेर्यश एव भूपो राजा तस्य दिशा समस्तहरिता जयनशीला यात्रा वैरिव्रजोपरि विजयकृते प्रस्थान तस्य तदर्थं वा ढक्काक्कणा नि स्वानानि स्वना इव । राज्ञा हि प्रयाणेषु नि.स्वाना वाद्यन्ते, तद्ध्वनिभिश्च सर्वेऽपि सज्जीभवन्ति ॥ युग्मम् ॥

वदान्यैः श्रीदवद्दानं ददेऽगीयत गायनैः ।
अनर्ति नर्तकैरुच्चैर्वन्दिभिर्विरुदावली ॥ १३२ ॥

तत्र मेघजीऋषिदीक्षासमये श्रीदवद्धनदैरिव वदान्यैर्दानशौण्डैर्विश्राणनशीलैर्दानं ददे दत्तम् पुनर्गायनैर्गन्धर्ववर्गैर्मधुरध्वनि अगीयत । पुनर्नर्तकैर्नटैस्ताण्डवाडम्बरविधायिभि रनर्ति नृत्य निर्मितम् । पुन. वन्दिभिर्मङ्गलपाठकैर्विरुदानामावलि. श्रेणिः उच्चै कथिता ।

वैधेयवन्निरीयान्धकूपात्कूपे पतामि किम् ।
परपक्षान्गणैः स्वस्य स्वस्याहूतिकृतस्तदा ॥ १३३ ॥
अवमत्येति दीक्षां स श्रीहीरविजयान्तिके ।
सत्याकृतिमिवादत्त संगमे सुगतिश्रियाम् ॥ १३४ ॥ (युग्मम्)

स मेघजीमुनि· श्रीहीरविजयसूरेरन्तिके समीपे पार्श्वे दीक्षा जैनतपस्या [illegible] गृह्णाति स्म समादत्तवान् । कामिव । सत्याकृति सत्यकारमिव । लोके 'सचकार' इ[illegible] प्रसिद्धः । कासाम् । सुगतीना स्वर्गापवर्गफलदाना श्रिया लक्ष्मीणाम् । उत्प्रेक्ष्यते —

तदा तस्मिन् प्रावृट्समये मुनीश्वरो हीरविजयसूरिः क्रमेण पर्युषणादिपरिपाट्या घनसमयदिनान्प्रावृषेण्यवासरान् गमयामासातिक्रामति स्म । किंभूतः । दिनेशश्री. सूर्यवत्तेजोलक्ष्मीर्यस्य । किं कृत्वा । आगमे सिद्धान्ते उक्तनिर्युक्तियदिनचर्यादिशास्त्रे वा प्रणीत प्रोक्त विधिं चातुर्मासिकसाधुसंबन्धिविविधक्रियानुष्ठानादिकमवलम्ब्याश्रित्य । उत्प्रेक्ष्यते—भवः संसार एवानन्तत्वादहग्गोचरपारत्वात्सलिलनिधिः समुद्रस्तस्य तत्र वा एकमद्वितीयं सेतुमिव । पद्याया ज इति जनप्रसिद्धाभिधानम् ॥

य प्रासूत शिवाह्वसाधुमघवा सौभाग्यदेवी पुनः

पुत्रं कोविदसीहसीहविमलान्तेवासिनामग्रिमम् ।

सर्गोऽसौ नवमोऽत्र देवविमलव्यावर्णिते हीरयु-

क्सौभाग्याभिधहीरसूरिरचिते संपूर्णतां प्राप्तवान् ॥ १९६ ॥

अत्र हीरसौभाग्यकाव्ये असौ अयमेव यो लिपिगोचरीकृतः । नवानां संख्यापूरणो नवम. सर्ग· अधिकारविशेष· संपूर्णतां प्राप्तवान् संपूर्णो बभूव ॥

इति पण्डितसीहविमलगणिशिष्यपण्डितदेवविमलविरचितायां स्वोपज्ञहीरसौभाग्यमहाकाव्यवृत्तौ शासनदेवीप्रकटीभवन–गुरुप्रश्न–तदुत्तर–स्वस्थानगमन–चन्द्रतारातमगमीविरामदिनकरोदयविजयसेनसूरिसूरिपद–मेघजीऋषिसमागमन–गन्धारनगरादिवर्णनो नाम नवम. सर्गः ।

दशम सर्ग. ।

नि.शेषदेशककुदं भुवि भाति दिल्ली-

देशोऽथ केलिनिलयो नलिनालयायाः ।

नाभीभुवा भुजगनिर्जरसद्मसार-

मादाय निर्मित इवैष खनिः सुखानाम् ॥ १ ॥

अथ अकब्बरपातिसाहिमिलनादिप्रारम्भणे भुवि पृथिव्यां गुर्जरजनपदापेक्षया पूर्वस्यां दिशि दिल्लीदेशो मेवातनाममण्डलो दिल्लीमण्डल इत्यपराभिधा भाति शोभते । किंलक्षणः । नि शेषाणां समस्तानां देशानां जनपदानां ककुदं प्रधानं. । 'ककुदं तु प्रधानेऽस्त्रे नृपाङ्क राजलक्ष्मणि' इत्यनेकार्थतिलके । पुनः किंभूतः । नलिने कमले आलय सदनं यस्यास्तस्याः श्रियः केलये क्रीडार्थं निलयः सौधम् । उत्प्रेक्ष्यते—नाभीभुवा नारायणनाभ्यम्भोजजन्मना ब्रह्मणा भुजगनिर्जरसद्मनोर्नागलोकस्वर्गयोः सारं सम्पद्दलिकपटलीमादाय गृहीत्वा सुखानां सर्वेशर्मणां खनिराकरः । एष देशो निर्मितः कृत इव ॥

यस्मिन्विभाति भगिनी तपनाङ्गजस्य

रङ्गत्तरङ्गशिखरोन्मसितारविन्दा ।

[illegible] ॥

[illegible] ॥ १३९ ॥

[illegible] पत्तनमगहि- [illegible] । केन कस्मात् । [illegible] यथा जनकः सुनुना साधं [illegible] ॥

कृत्वा क्रमादनूचानपदनन्दिं मुनीश्वरः ।
देशं स्वसूनो राजेव गणं तस्य वशे व्यधात् ॥ १४० ॥

मुनीश्वरो हीरविजयव्रतिवासवः गणं तपागच्छं तस्य विजयसेनसूरेर्वशमायत्तं व्यधाच्चकार । किं कृत्वा । क्रमादनुक्रमेण । हेतौ तृतीया पञ्चमी च वाच्येति तृतीयार्थः । पूर्वसूरिपरिपाटीतः अनूचानपदस्याचार्यपदस्य नन्दिं द्वादशावर्तवन्दनानुज्ञानादिविधिं कृत्वा विधाय । क इव । राजेव । यथा सकलमेदिनीमण्डलाखण्डलो निजनन्दनस्य देशं स्वजनपदं वशमधीनं विधत्ते ॥

प्रभोर्नन्दिमहे हेमराजो मन्त्रीश्वरो मुदा ।
अमानि मानवैः श्रीद इवामितधनं ददत् ॥ १४१ ॥

प्रभोर्विजयसेनसूरेर्नन्दिमहे आचार्यपदानुज्ञावन्दनकदानादिमहोत्सवे हेमराजो नाम मन्त्रीश्वरः सचिवो मानवैर्जानपदैः पौरैर्नागरिकैश्च मनुजैः श्रीदो वैश्रवण एव अमानि विज्ञातोऽवबुद्धः ॥ किं कुर्वन् । मुदा प्रमोदेन अमितं प्रमाणातीतमगणितं धनं द्रविणं ददद्यच्छन् ॥ इति विजयसेनसूरिनन्दिः ॥

प्रत्यतिष्ठत्परोलक्षा आर्हतीः प्रतिमाः प्रभुः ।
कल्पितानल्पसंकल्पाः कल्पसाललता इव ॥ १४२ ॥

प्रभुर्हीरविजयसूरिः परोलक्षा लक्षशः आर्हतीर्जैनीः प्रतिमा मूर्तीर्बिम्बानि प्रत्यतिष्ठत् प्रतितिष्ठति स्म । उत्प्रेक्ष्यते—कल्पिताः प्रदत्ताः पूर्णाकृता अनल्पा अनेके भूयस्तराः संकल्पा मनोभिलषितानि याभिस्तादृशीः कल्पसाललताः कल्पद्रुमवल्लीरिव । 'कल्पद्रुमलताः' इति सोमसौभाग्यकाव्ये ॥

---

१ अत्र च १२३ संख्याकश्लोकटिप्पणिवत् 'परस्लक्षाः' इति भवेत्.

महीमन्तरालभूमीं विभूषयति शोभां लम्भयति। मेवातमण्डलमध्ये श्रीनेमिनाथजन्मस्थानं कुशावर्तदेशोऽस्तीत्यर्थः॥ युग्मम्॥

संसेवितो द्विरसनैरसुराश्रयश्च
ख्यातो रसातलतया नरकानुषङ्गी।
एतद्विगानमपनेतुमिदंमिषेण
वासो व्यधायि किमु भोगिगृहेण भूमौ॥ ५॥

भोगिगृहेण नागलोकेन इदंमिषेण अस्य दिल्लीदेशस्य दम्भेन कपटेन भूमौ महीमण्डले वासः स्थितिर्व्यधायि विहिता। उत्प्रेक्ष्यते—एतदिहैव जनैरभिधीयमानमीदृशं वा विगानमपवादमपनेतुं निवारयितुमिव। एतत्किम्। यदसौ भोगिगृहो द्विरसनैर्भुजगैः खलैश्च संसेवित आश्रितः। च पुनरसुराणां दैत्यानामाश्रयः स्थानम्। 'असुरा दितिदनुजाः पातालौकःसुरारयः' इति हैम्याम्। पुनः रसातलमित्यनिष्टवाक्यम्। धनपालोऽप्याह—'रसातलं यातु यदत्र पौरुषम्' इति। तत्त्वेन ख्यातः प्रथितः पुनर्नरकस्य नाम्नोऽसुरविशेषस्य। सप्तनरकानां दुर्गतीनामनुषङ्गो मिलनं यस्य॥

तन्निर्जयोद्यतनिजस्य भयादवेत्य
यातं प्रणश्य वलिसद्म तलेऽचलायाः।
पृष्ठे विलग्न इव तं विजिगीषुरेष
स्वर्गः क्षितावुपजगाम मिषादमुष्य॥ ६॥

तद्विजिगीषुस्तद्वले सद्म नागलोकं विचेतुमिच्छुः पराभवनशीलः। अत एव पृष्ठे पश्चाद्विलग्नः अमुष्य दिल्लीदेशस्य मिषाद्व्याजात्। उत्प्रेक्ष्यते—एष प्रत्यक्षः स्वर्गो देवलोकः क्षितौ क्षोणीमण्डले उपजगाम समागतः। किं कृत्वा। तस्य वलिसद्मनो निर्जये परिभवनविधाने उद्यतस्य उद्यमं विनिर्मिमाणस्य उत्सुकस्य वा। निजस्यात्मनो भयाद्भीतेः स्वर्गस्य भीतेरचलायाः पृथिव्यास्तले अधस्ताद्भागे प्रणश्य यातं प्रतिभ्रष्टं वलिसद्म नागलोकमवेत्य विज्ञाय। पूर्वं हि वलिसद्म भूलोकस्वर्लोकयोरुपरिष्टादासीत्—इति कविसमयः। यदुक्तं नैषधे—'वलिसद्म दिवं स तथ्यवागुपरि स्माह दिवोऽपि नारदः' इति। पश्चाद्द्वैतविभूतिजातावलपत्तया क्रतुभुजा भुवनेनाभिभूतं भूतले गतमित्यर्थः॥

यः पद्मनन्दन इवास्ति हिरण्यगर्भो
रम्याप्सरा हरिरिवाच्युतवत्सलक्ष्मीः।
रत्नाकरोऽम्बुधिरिवाद्रिरिवात्मयोने-
र्दुर्गान्वितः पविरिवासहजैरजेयः॥ ७॥

यो देशः पद्मनन्दनो विरञ्चिरिव। 'पद्मनन्दनसुतारिरंसुता' इति नैषधे। हिरण्य

अथो विन्ध्यगिरिवर्णनानन्तरं [illegible] गन्धारनगरे नवभिर्मालिनीवृत्तैः [illegible] किंचित्—

अथो लाटलक्ष्मीललामायमानं पुरं वारिधेस्तीरेऽस्ति गन्धारनाम ।
विमुह्यमाना जलैरम्बुराशेः प्रतीरे पुरी याश्रिता शार्ङ्गपाणेः ॥ १४६ ॥

लाटेति लाटनामा यो मण्डलस्तस्य लक्ष्म्या ललामायमानं तिलकमिवाचरत् वार्धेः समुद्रस्य तीरे तटे तत्र गन्धार इति नाम यस्य तादृशं पुरं नगरमस्ति विद्यते । उत्प्रेक्ष्यते— अम्बुराशेः कल्लोलमालाभिः प्रसरदुन्नततरतरङ्गैर्निरन्तरजलैरुद्वेज्यमाना अत्युद्रेकं प्राप्नुवाना शार्ङ्गपाणेर्नारायणस्य पुरी द्वारका नगरी विष्णोः कुत्रापि गते सति समुद्रेणाप्लाव्य स्वसलिलमध्ये गृहीता, अत एव पानीयोद्वेगात्प्रतीरे तटे समाश्रिता पानीयाद्बहिरागत्यात्र स्थिता ॥

निधानेशरम्भाकुमारीगणेशान्दधानेन गाङ्गेयराजेश्वरांश्च ।
जिता येन वस्वोकसारा स्वलक्ष्म्या ह्रियेवाश्रिता शंभुशैलस्य मौलिम् ॥ १४७ ॥

गन्धारनगरेण स्वलक्ष्म्या निजवैभवेन जिता परिभूता सती वस्वोकसारा धनदपुरी ह्रियेव त्रपातिरेकादिव शंभुशैलस्य मौलिं मस्तकमुपरितनशिखरमाश्रिता भेजुषी । येन किं कुर्वाणेन । दधानेन । कान् । निधानानां निधीनामीशाः स्वामिनो निधिपतयः तांस्तथा रम्भाः कदलीः कुमारीः कन्यकाः तथा गणानां जनसमुदायानामीशा गणनायकास्तान् तथा गाङ्गेयं स्वर्णं तथा राजेश्वरान् देशाधिपतीन् राज्यलक्ष्मीवन्तमीश्वरान् गजप्रमाणद्रविणधारिणः तान् बिभ्राणेन । अलकापक्षे तु सर्वेऽप्येकैकाः । निधानेशो धनदः, तथा रम्भानाम्नी धनदाङ्गजनलकूबरपत्नी । 'अस्मान्किमश्रोत्रसुधां विधाय रम्भा चिरं भामतुलां नलस्य । तत्रानुरक्ता तमनाप्य भेजे तन्नामगन्धान्नलकूबरं सा ॥' इति नैषधे । कुमारी पार्वती गणेशो विघ्ननायकः गङ्गाया अपत्यं गाङ्गेयः स्वामिकार्तिकः । 'गङ्गोमाकृत्तिकासुतः' इति हैम्याम् । तथा 'गाङ्गेयो गुहभीष्मयोः' इत्यनेकार्थः । राजानो यक्षाः ईश्वरः शंभुस्तान्बिभ्रती ॥

स्फूर्त्या मणीकम्बुवराटमुक्तिकाप्रवालमातङ्गतुरङ्गमश्रियाम् ।
विहेलितेनाम्बुधिना द्विवेलं वेलाच्छलाद्यन्नगरं न्यषेवि ॥ १४८ ॥

मणयश्चन्द्रकान्ताद्याः सामान्येन सर्वजातिजानि रत्नानि कम्बवः शङ्खाः वराटा रत्नमुख्यानि हीरका कपर्दा वा मुक्तिका मुक्ताफलानि । 'बहुकम्बुमणीवराटकागणनाटत्करकर्कटोत्करः' इति नैषधे । हट्टेषु कम्बवोऽपि दृश्यन्ते । प्रवाला विद्रुमा मातङ्गा हस्तिनः तुरङ्गमा अश्वाः श्रीर्धनधान्यादिविविधलक्ष्मीस्तासां स्फूर्त्या अत्युद्धरवैभवभरेण कृत्वा विहेलितेनावगणितेनाभिभूतेनाम्बुधिना समुद्रेण द्वे वेले वाराववसरौ यत्र । 'वेला वारावसरः प्रस्तावः' इति हैम्याम् । तथा 'वेला स्याद्वृद्धिरम्भसः' । द्विवेलमिति क्रियाविशेषणम् । वेलाच्छलाज्जलवृद्धिकपटात् । वेलागममिषेणेत्यर्थः । यन्नगरं गन्धारपुरं न्यषेवि

चरण स्थान ससर्ज सृजति स्म। किंभूतेन वैभवेन। दम्भोलिर्वज्रं पाणौ हस्ते यस्य स तस्य सहस्रनेत्रस्य नगर्या अमरावत्या विभवस्य अभिभवनमभिभावस्तत्र प्रागल्भ्य प्रतिभावत्ता चातुर्यमुद्यममुत्साहं वा आकलयता बिभ्रता पद चक्रे। केव। कालीव। यथा पार्वती कासरनामानं सुराणां देवानामसह्यं विरोधिनं स्वस्यात्मनो विभोर्भावो वैभवम्। अत्र भावेऽण्। तेन वैभवेन सामर्थ्येन महत्त्वेन वा। 'स्तोत्र सुविस्तृतमतिर्न विभुर्विधातुम्' इति कल्याणमन्दिरस्तवे। 'विभु. समर्थ.' इति तद्वृत्ति। बालवृद्ध पाताल निर्जित्य जित्वा अस्य महिपासुरस्य मौलौ मस्तके पद सचरण चकार। तन्मूर्तेस्तत्प्रकारदर्शनात्॥ इति दिल्ली॥

तस्यां महीहिमकरेण हमॉउनाम्ना
जज्ञे पुरंदरविजित्वरविक्रमेण।
यस्यौजसेव विजितेन पद मुरारे-
स्तत्तुल्यता स्पृहयताशुमता न्यपेवि॥ १०॥

तस्यां दिल्लीनगर्यां हमाउ इति नाम यस्येति तेन हमाउनाम्ना महीहिमकरेण क्षोणी-रोहिणीरमणेन जज्ञे सजातम्। किंभूतेन। पुरंदरस्य वासवस्य विजित्वरो विशेषेण जय-नशीलो विक्रमो बल यस्य तेन। यस्य हमाउपातिसाहेरोजसा प्रतापेन विजितेनाभिभूतेन सता। पुनस्तस्य हमॉउप्रतापस्य तुल्यता सादृश्य स्पृहयता इच्छता अंशुमता सूर्येण। उत्प्रेक्ष्यते—मुरारेर्नारायणस्य पद चरण विष्णुपद न्यपेवि सेव्यते स्म इव॥

श्रीकाविलाधिपतिवब्बरपातिसाहि-
पुत्रः पुलोमदमनोऽखिलमुद्गलानाम्।
सूरस्य सूनुमपि निर्मितवान्सदण्ड
कालं करालमपि यः प्रसरत्प्रतापैः॥ ११॥

यो हमाउपातिसाहिः अभिषेणनेन विजय प्रसरद्भिर्जगद्व्याप[illegible] [illegible] प्रतापैः स्वतेजोभिरेव सूरस्य [illegible]योः सकारशकारयोरभेदात् [illegible] [illegible] नन्दनम्। 'प्रेतात्पतिर्दण्डधरोऽर्कसूनु' इति हैम्याम्। [illegible] [illegible] मृत्युत्वेन [illegible] भीषण परेषां भयोत्पादक [illegible] [illegible] सदण्ड [illegible]णम्। 'ऊजीदार' इति प्रसिद्धम्। राज[illegible] [illegible]। [illegible] [illegible] न। केवल [illegible], न पुनरभिषेणनादिना सदण्ड [illegible]। किंभूतः। श्रिया सेनाधिपेन[illegible] [illegible] इति नाम्ना [illegible] [illegible] विशेषस्तस्याधिपतिः स्वामी यो बब्बरपातिसाहि[illegible] पुत्रो नन्दन। पुनः [illegible]। अखिलानां मुद्गलानां यवनजातिविशेषाणां [illegible] पुलोमानो [illegible] दमनो व्यापादक. [illegible]। मुद्गलेन्द्र इत्यर्थ.॥ इति हमाउपातिसाहि॥

स प्रसिद्धः सूरिः तत्र गन्धारनगरे प्रावृषि वर्षाकाले [illegible] इति स । क इव । मनुपरिपन्थीव । यथा प्रावृट्समये [illegible] नाम्नो देवस्य परिपन्थी शत्रुर्नारायणः तिष्ठति । किंभूते गन्धारपुरे । [illegible] देवानां पुर्या नगर्या अमरावत्याः सातिशायिताभ्यधिका [illegible] मन्दरा येन । पुनः किंभूते । [illegible] पराभवितु लज्जे लज्जीभूते ॥ इति गन्धारनगरे हीरसूरेः स्थितिः ॥

जीविकामिव नभोम्बुपायिनः प्रावृषं पुनरितः पत्तने ।

हीरसूरिपुरुहूतशासनात् [illegible] ॥ १११ ॥

[illegible]

सेनायाः प्रचारेण प्रकंपेण चलनेन प्रोद्भूताना प्रबलतयोत्थितानां धूलीनां भूमिरजसा पटलै राशिभिः परित. सर्वदिक्षु प्रसरे प्रसृत्वम् । तन्नाहमेव जाने वेद्मि । उत्प्रेक्ष्यते वा—दशाना दशसंख्याकानाम् पूर्वाग्नेदक्षिणानैर्ऋतपश्चिमावायूत्तरेशानाधोभुवनोर्ध्वलोकानां दिशा ककुभां विजयाय स्वायत्तीकरणार्थमस्य पातिसाहेः प्रस्थान दिग्जैत्रयात्रां हरितां दशानामाशाना महेन्द्रान्पुरंदरान् । 'पतिः प्रतीच्या इति दिग्महेन्द्राः' इति नैषधे । इन्द्राग्नियमराक्षसवरुणपवनकुबेरेशाननागेन्द्रब्रह्माभिधान्दिक्पालान् प्रति कथयितु निवेदयितुमितो भूमण्डलायातैरुह्यीय यातैः गतैरेव ॥

यत्प्रस्थितौ रथहयद्विपपत्तिवीङ्खा-
प्रोत्खातपांसुपिहिताखिलदिङ्मुखेषु ।
आक्रन्दि चक्रमिथुनैरथ पांसुलाभिः
प्राह्लादि पल्लवितमन्तरुलूकलोकैः ॥ १९ ॥

यस्याकब्बरपातिसाहेः प्रस्थितौ दिग्जैत्रयात्राया प्रयाणावसरे रथाः स्यन्दना हया वाजिन' द्विपा हस्तिन पत्तय' पदातयः पादचारिणस्तेषा वीङ्खाभिश्चङ्क्रमणैः वाहल्या-त्सर्वदिक्सचरणे कृत्वा प्रोत्खातैरुत्थापितै पांसुभिर्धूलीपटलीभिः पिहितान्यावृतानि आच्छादितानि । जनदृशामगोचरीकृतानीत्यर्थं । अखिलानि समग्राणि दिशा हरिता मुखानि विभागास्तेषु सत्सु सजलजलदपटलसचलितरजनीजनितान्धकारप्रचारभ्रान्ते-श्चक्राणा चक्रवाकाना मिथुनैर्द्वन्द्वैराक्रन्दि परस्परवियोगाशङ्कया दु खादाक्रन्दोऽक्रियत । मुक्तकण्ठ रुरुदे इत्यर्थ. । अथ पुन पांसुलाभिर्व्यभिचारिणीभिस्तरुणीभिः प्राह्लादि प्रमुमुदे । घनान्धकारसमये हि तासा स्वेच्छाविहरणोत्साहस्पृहा पूर्णा स्यात् । पुनरु-लूकलोकैर्घूकप्रकरैरन्तश्चित्तमध्ये पल्लवितमुच्छ्वसितम् । निशि तेषा स्वैरसंचारत्वात् । 'आ-लोकतालीकमुलूकलोकः' इति नैषधे ॥

बलवति भूमण्डलाखण्डले दिग्विजयाय प्रतिष्ठमाने सति भाविपराभवा' प्रतीपपृथ्वी-पालाः भूकम्परजोवृष्टिदिग्दाहरविमण्डलच्छिद्रादिकानुत्पातान्पश्यन्तीति अत एवादौ त एव प्रोच्यन्ते—

धत्ते स्म कम्पमभिषेणयति क्षितीन्द्रे
यस्मिन्प्रतीपपृथिवीपुरुहूतपृथ्वी ।
यस्मादत परमसौ भविता पतिर्मे
प्रीतेर्हृदन्तरिति निर्मिततांडवेव ॥ १६ ॥

यस्मिन्नकब्बरनाम्नि क्षितीन्द्रे वसुधावलयवासवे अभिषेणयति रिपुपार्थिवान्प्रति पताकिनीभिरभिगच्छति सति प्रतीपा प्रतिभटा ये पृथिवीपुरुहूता वसुमतीबिडौ-जस. तेषा पृथ्वी वसुधरा कम्प वेपथु चलत्वता धत्ते स्म दधौ । भू कम्पते स्मेत्यर्थः । उत्प्रेक्ष्यते—इति हेतोर्हृदन्त. स्वमानसमध्ये प्रीतेः प्रमोदादिव । सम्यङ्नि-

देशश्रियः किमपि निर्गलितोत्तरीया

वेणी विभूषणवतीव परिस्फुरन्ती ॥ २ ॥

यस्मिन्दिल्लीमण्डले तपनस्य भानोरङ्गजो नन्दनो धर्मराजस्तस्य भगिनी जामिर्य- मुना यमभगिनी । 'कालिन्दी सूर्यजा यमी' इति हैम्याम् । किंभूता । रङ्गन्तश्चलन्तो ये तरङ्गाः कल्लोलास्तेषां शिखराण्यग्राणि तैरून्मथितानि विकसितानि अरविन्दानि पद्मानि यस्याम् । उत्प्रेक्ष्यते—देशश्रिय. दिल्लीमण्डललक्ष्म्या' किमपि कथमपि केनापि प्रकारेण निर्गलित क्वापि निपतित उत्तरीयमुपरितनच्छादननिवसन यस्याः तादृशी परिस्फुरन्ती दृग्गोचरीभवन्ती प्रत्यक्षलक्ष्या वेणी कबरीव । किंभूता । विभूषणवती चूडामण्यादिरत्नकाभरणभरविभ्राजिनी ॥

उत्ताननक्र इव वक्त्रकजं कुशाद्या-

वर्ते विभूषयति मध्यमहीममुष्य ।

उत्पत्तिमाकलयतो ददतोऽङ्गिकामा-

न्क्षीरार्णवे क्रतुभुजामिव पादपस्य ॥ ३ ॥

आसेदुषीभिरवने विदुषीभिरिक्षु-

च्छायासु यन्नवकुटुम्बिघनस्तनीभिः ।

कीर्तिर्जगज्जयिरतीशजयोर्जितेव

राजीमतीशितुरगीयत गीतिरुच्चैः ॥ ४ ॥ (युग्मम्)

यस्य दिल्लीमण्डलस्य नवाभिस्तरुणीभिः कुटुम्बिना कर्षुकाणा घनस्तनीभिः पीनपयोधराभिः अथ वा घटस्तनीभिः जम्भवत्कुचौ यासामित्युन्नतस्तनीभिः वनिताभिर्गीतिर्गानमुच्चैः सातिशायिमधुरध्वनिनागीयत जगे गीता । किंभूताभि. । इक्षुणां रसालाना छायासु निरातपस्थानेषु आसेदुषीभिरुपविष्टाभिः । इत्थं किम् । अवने इक्षुक्षेत्ररक्षणे विदुषीभिर्निपुणाभिः । उत्प्रेक्ष्यते—जगन्ति त्रीणि भुवनानि । सुरासुरनरानित्यर्थ । जयतीत्येवशीलस्य रतीशस्य मन्मथस्य जयेन पराभवेन क्षोदेनामूर्जिता स्वीकृता राजीमतीशितु श्रीनेमिनाथस्य कीर्तिरेवागीयत । राजीमतीशितुः किं कुर्वत । कुश इति पदमाद्य यत्र तादृशे आवर्ते । कुशावर्ते देशे इत्यर्थ. । उत्पत्तिं जन्म आकलयतः दधत प्राप्नुवत । कस्येव । पादपस्येव । यथा क्रतुभुजा देवाना पादप पारिजातनामा कल्पद्रुमः क्षीरार्णवे दुग्धपयोधौ उत्पत्तिमाकलयति । पुनः किंभूतस्य । स्वर्द्रुमवदङ्गिना प्राणिना भविकाना कामानभिलाषान्ददतः यच्छतः । अथ वा । क्षीरार्णवे कल्पवृक्षस्येव कुशावर्तजनपदे जन्माकलयत. । कुशावर्तं किं कुर्वति । वक्त्रकज वदनारविन्द उत्तानमुन्नत नक्र नासिका तस्मिन्निव । अमुष्य दिल्लीमण्डलस्य मध्य-

सैन्यानां प्रचारेण प्रकर्षेण चलनेन प्रोद्भूतानां पदव्रजोत्थितानां धूलीनां भूमिरजसां पटलै राजिभिः परितः सर्वदिक्षु प्रसृते प्रवृत्ते । तत्र तदानीमेव जाने वेद्मि । उत्प्रेक्ष्यते या— दशानां दशसंख्याकानाम् पूर्वाग्निदक्षिणानैर्ऋतपश्चिमावायूत्तरेशानाधोभुवनोर्ध्वलोकानां दिशां ककुभां विजयाय स्वायत्तीकरणार्थमस्य पातिसाहेः प्रस्थानं दिग्जैत्रयात्रां हरितां दशानामाशानां महेन्द्रान्पुरन्दरान् । 'पतिः प्रतीच्या इति दिङ्महेन्द्राः' इति नैषधे । इन्द्राग्नियमराक्षसवरुणपवनकुबेरेशानब्रह्मनागेन्द्राभिधान्दिक्पालान् प्रति कथयितुं निवेदयितुमितो भूमण्डलगतैरजोभिः यातैः गतैरिव ॥

यत्प्रस्थितौ रथहयद्विपपत्तिवल्गा-
प्रोत्खातपांसुपिहिताखिलदिङ्मुखेषु ।
आक्रन्दि चक्रमिथुनैरथ पांसुलाभिः
प्राह्लादि पल्लवितमन्तरुलूकलोकैः ॥ १५ ॥

यस्याकब्बरपातिसाहेः प्रस्थितौ दिग्जैत्रयात्रायाः प्रयाणावसरे रथाः स्यन्दना हया वाजिनः द्विपा हस्तिनः पत्तयः पदातयः पादचारिणस्तेषां वल्गाभिश्चङ्क्रमणैर्बाहुल्यात्सर्वदिक्सञ्चरणैः कृत्वा प्रोत्खातैरुत्थापितैः पांसुभिर्धूलीपटलीभिः पिहितान्यावृतानि आच्छादितानि । जनदृशामगोचरीकृतानीत्यर्थः । अखिलानि समग्राणि दिशां हरितां मुखानि विभागास्तेषु सत्सु सजलजलदपटलवच्चलितरजोजनितान्धकारप्रचारभ्रान्तेश्चक्राणां चक्रवाकानां मिथुनैर्द्वन्द्वैराक्रन्दि परस्परवियोगाशङ्कया दुःखादाक्रन्दोऽक्रियत । मुक्तकण्ठं रुरुदे इत्यर्थः । अथ पुनः पांसुलाभिर्व्यभिचारिणीभिस्तरुणीभिः प्राह्लादि प्रमुमुदे । घनान्धकारसमये हि तासां स्वेच्छाविहरणोत्साहस्पृहा पूर्णा स्यात् । पुनरुलूकलोकैर्घूकप्रकरैरन्तश्चित्तमध्ये पल्लवितमुच्छ्वसितम् । निशि तेषां स्वैरसञ्चारत्वात् । 'आलोकतालीकमुलूकलोकः' इति नैषधे ॥

बलवति भूमण्डलाखण्डले दिग्विजयाय प्रतिष्ठमाने सति भाविपराभवाः प्रतीपपृथ्वीपालाः भूकम्परजोवृष्टिदिग्दाहरविमण्डलच्छिद्रमारिकाद्युत्पातान्पश्यन्तीति अत एवादौ त एव प्रोच्यन्ते—

धत्ते स्म कम्पमभिषेणयति क्षितीन्द्रे
यस्मिन्प्रतीपपृथिवीपुरुहूतपृथ्वी ।
यस्मादतः परमसौ भविता पतिर्मे
प्रीतेर्हृदन्तरिति निर्मिततांडवेव ॥ १६ ॥

यस्मिन्नकब्बरनाम्नि क्षितीन्द्रे वसुधावलयवासवे अभिषेणयति रिपुपार्थिवान्प्रति पताकिनीभिरभिगच्छति सति प्रतीपाः प्रतिभटा ये पृथिवीपुरुहूताः वसुमतीबिडौजसः तेषां पृथ्वी वसुधरा कम्पं वेपथुं चञ्चलतां धत्ते स्म दधौ । भूः कम्पते स्मेत्यर्थः । उत्प्रेक्ष्यते—इति हेतोर्हृदन्तः स्वमानसमध्ये प्रीतेः प्रमोदादिव । कम्पङ्कि-

सुवर्णं गर्भे मध्ये यस्य । आकरादौ स्वर्णानां सद्भावात्, कनकभृङ्गारादीनां [illegible] स्थापितत्वाद्वा, सुवर्णादीनि गर्भे मध्ये यस्य व्यवहारिणां सौधेषु [illegible] हिरण्यदर्शनाद्वा । ब्रह्मणस्तु केवलं नाम्नैव । 'हिरण्यगर्भो लोकेशो [illegible]' इति हैम्याम् । अस्ति विद्यते । पुनर्यो हरिरिव इन्द्र इव । रम्याणि [illegible] न्मनोज्ञानि अत एवात्प्रधानानि सरांसि तटाका यत्र । हरिस्तु रम्भा [illegible] केलिकलाभिर्विलसितुमुचिताः । रमणार्हा इत्यर्थः । अप्सरसो रम्भा-[illegible] मेनकाप्रभृतयः सर्वनिताः यस्य । पुनर्योऽच्युतवन्नारायण इव [illegible] दिविभवेन शोभया वा वर्तते स । 'समासान्त[illegible]' [illegible] ष्णस्तु [illegible] पद्मया सहितः । पुनर्योऽम्बुधिः पारावार इव [illegible] रत्नपुरुषाणां नेमिनाथकृष्णबलभद्रादीनां महापुरुषाणामाकर उत्पत्तिस्थानम् । [illegible] रत्नाकरः । पुनर्यो देशः आत्मयोनेः स्मरस्य अरिः शम्भुरिव । [illegible] [illegible] दुर्गया पार्वत्या पत्न्या युक्तः । अभीतृभाजित्वात् । [illegible] [illegible] शत्रुभिरजेयो जेतुमशक्यो [illegible] । [illegible] दुर्गम [illegible] सुरासुराणां दुर्गमत्वाद्वा ॥ इति दिशो देशः ॥

दिल्लीति तत्र नगरी न गरीयसीभिः
श्रीभिः कथंचिदपि [illegible] रहिता न नीत्या ।
[illegible] गिरीश[illegible]
[illegible] पुरी [illegible] ॥ ८ ॥

[illegible]

[illegible] [illegible]-

[illegible] इति [illegible] ॥ १९ ॥

[illegible] । [illegible] परस्या [illegible] [illegible] । '[illegible]' इति [illegible] । तस्य [illegible] [illegible] [illegible] । '[illegible]' इत्यादि [illegible] । [illegible] [illegible] । [illegible]— [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] उत्पत्स्यति [illegible] [illegible] [illegible] प्रकर्ष- [illegible] [illegible] । 'पन्था [illegible] [illegible]' [illegible] । [illegible] रणे सूर्ये छिद्र [illegible] [illegible] । परिनाप्योग- [illegible] ॥' [illegible] । 'न सूर्ये छिद्र निरीक्षते' इति तु [illegible] । [illegible] ॥ इति [illegible] ॥

यस्य प्रकृष्टयशसः शरजन्मपित्री

स्वर्धुनीव करवाललता बभूव ।

यस्यां निमज्ज्य रिपुराजपरम्पराभि-

र्येनान्वभावि दितिजद्विषतां विभूतिः ॥ २० ॥

यस्य [illegible] करवाललता [illegible] स्वर्धुनी मन्दाकिनीव बभूव जाता । [illegible] । प्रकृष्टं [illegible] विस्तारणशील यशः कीर्तिः तदेव शरभूः स्वामिकार्तिकेयस्तस्य पित्री जननी येन कारणेन । यस्यां करवाललतारूपस्वर्धुन्यां निमज्ज्य बुडित्वा स्नात्वा तदभिमुखमागत्य [illegible] च पञ्चत्वमापाद्य रिपवः शत्रवो जना एव राजानस्तेषां पर- म्पराभिः [illegible] दितिजाता दितेरसुरा जायन्ते येभ्य इति दितिजास्तेषां द्विषतां वै- रिणां देवानां विभूतिः सुरश्रीरन्वभावि अनुभूयते स्म । गङ्गायां रणे च त्यक्तप्राणा देवभूयं गच्छन्तीति परमतम् । 'मृते चापि सुराङ्गना' इत्युक्तेः ॥

यस्मिन्रणाङ्गणगते प्रहताहिताश्वा

शौर्योदयाद्दिवि मुहुर्मुहुरुत्पतन्ति ।

भूमौ निजाभिभवतः सवितुः सगोत्रा-

स्ताक्ष्यानिवाश्रयितुमुत्सुकतां वहन्तः ॥ २१ ॥

यस्मिन्नकब्बरभूपतौ रणाङ्गणं सङ्ग्राममध्यं गते प्राप्ते सति प्रहताः शस्त्रप्रहारादिना व्या-

तस्याङ्गजोऽभवदकब्बरभूमिभास्वा-
न्भूपालमौलिमणिचुम्बितपादपद्मः।
शौरेरिवाम्बुधिशयो भुजपञ्जरान्त-
र्विश्रान्तवार्धिवसनाजयराजहंसः॥ १२॥

तस्य हमाँउसाहेरकब्बर इति नाम्ना भूमिभास्वान् परतेजस्तिरस्कारिप्रतापवत्त्वादुदितत्वाच्च क्षोणीसहस्ररश्मिरभवत्। 'मध्यंदिनावधिविधेर्वसुधाविवस्वान्' इति नैषधे। क इव। अम्बुधिशय इव। यथा शौरेर्वसुदेवस्य कृष्णः पुत्रो बभूव। किंलक्षणः। भूपालानां महानृपाणां मौलीनां मुकुटानां मणीभिर्माणिक्यैश्चुम्बितमाश्लिष्य समालीढं पादपद्मं चरणकमलं यस्य। पुनः किंलक्षणः। भुजौ स्वबाहू एव पञ्जरं पक्षिरक्षास्थानं तस्यान्तर्मध्ये विश्रान्तो विश्रामाय स्थितो वार्धिः समुद्रो वसनं वस्त्रं यस्याः एतावता आचतुःसमुद्रान्तपृथिव्या जयः स्वायत्तीकरणं स एव राजहंसो यस्य सः॥

साम्राज्यमप्यधिगतो निखिलस्य नाक-
लोकस्य लोलुपतया पुनरीहमानः।
भोक्तुं समग्रमपि मध्यमलोकमेत-
द्व्याजादुवास मघवेव वसुंधरायाम्॥ १३॥

एतद्व्याजादकब्बरसाहिकपटात्। उत्प्रेक्ष्यते—वसुंधरायां विश्वंभरावलये मघवा शक्र इवोवास वसति स्म। किंभूतः। निखिलस्य समस्तस्यापि नाकलोकस्य स्वर्गस्य साम्राज्यमाधिपत्यम्। 'सम्राट् तु शास्ति यो नृपान्' इति हैम्याम्। अतः सर्वेषामपि विमानाधिपतिनाकिनायकानामैश्वर्यमधिगतः प्राप्तोऽपि। 'अधिगतं विधिवद्यदपालयत्' इति रघुवंशे। 'अधिगतं प्राप्तम्' इति तद्वृत्तिः। पुनर्लोलुपतया अधिकाधिकसंपदैश्वर्यस्पृहयालुतया समग्रं समस्तमपि मध्यमलोकं पातालदेवलोकयोरध उपरि च वर्तमानयोर्मध्येऽन्तराले वर्तिनं लोकं भुवनं मध्यमलोकं सकलसमुद्रमेखलामण्डलं भोक्तुं स्वभोगाभिवातुमीहमानो वाञ्छन्निवेति गर्भितोत्प्रेक्षा॥

अथास्य दिग्विजयविजिगीषया प्रस्थाने वैरिणामुत्पातानिर्भीतः—

यात्रासु यस्य चतुरङ्गचमूप्रचार-
प्रोद्धूतधूलिपटलैः परितः प्रसस्रे।
प्रस्थानमस्य दशदिग्विजयाय जाने
यातैरितः कथयितुं हरिता महेन्द्रान्॥ १४॥

यस्याकब्बरपातिसाहेर्यात्रासु परजनपदाभिभूतया प्रस्थानेषु चत्वारि चतुरङ्गाणि [illegible] ...नि [illegible] ...नि गजवाजिरथपदातिलक्षणा. [illegible] [illegible]

एतद्दिनेशशशिभूदिनयामिनीभ्यां
सृष्टिं विधातुमखिलां विभुना न वैश्वीम् ।
तादृग्दिनेन्दुदयिताकृतये किमेत-
त्तेजोयशोरविविधू विधिना प्रणीतौ ॥ २४ ॥

विधिना विश्वसृजा विधात्रा तादृश्योरतिमहत्योर्विगलितावधिसमयाभ्युदयभाजो-र्दिनेन्दुदयितयोर्दिवसनिशयोः कृतये निर्माणाय । उत्प्रेक्ष्यते—एतस्याकब्बरसाहेस्तेजः प्रतापः । 'निजस्य तेजः शिखिनः परःशताः' इति नैषधे । तथा 'एतस्योत्तरमद्य नः समजनि त्वत्तेजसा लङ्घने' इत्यपि नैषधे । 'त्वत्तेजसा भवत्प्रतापानाम्' इति तद्वृत्तिः । तथा यशः श्लोकस्तावेव रविविधू सूर्याचन्द्रमसौ प्रणीताविव निर्मापिताविव । किंभूतेन विधिना । एताभ्यां प्रत्यक्षलक्ष्य विद्यमानाभ्यां दिनरजन्योर्गमागमं कुर्वाणाभ्यां दिनस्य वासरस्य ईशः पतिः । यतः—'परविषयाक्रमणकलाकलाधरस्यैव विषयमायाति । रजनिपतिर्भजति दिनं दिवसपतिर्भजति नो रजनीम् ॥' इति सुभाषितोक्तेः । दिननायको भास्करः शशी मृगाङ्कस्ताभ्यां सकाशाद्भूरुत्पत्तिर्ययोस्तादृश्यौ दिनयामिन्यौ वासरविभावर्यौ ताभ्यां कृत्वा अखिलां समस्तामपि समग्रामपि वैश्वीं जगत्सबन्धिनीं सृष्टिं सर्गं निर्माणं कर्तुं रचयितुं न विभुना तयोर्द्वयोः प्रत्येकं चतुर्यामत्वेनाल्पत्वान्न समर्थेन ॥

यद्वैरिराजकयशोगुणराशिरात्री-
प्राणेशतारकगणेन कदाचनापि ।
द्वीपान्तरं परिचरत्यपि यत्प्रताप-
प्रद्योतने न समवाप्युदयावकाशः ॥ २५ ॥

यस्याकब्बरपातिसाहेः प्रताप एव प्रद्योतनः सहस्रकिरणः तस्मिन् द्वीपान्तरमपरं द्वीपं द्वीपानामष्टादशत्वात् । 'नवद्वयद्वीपपृथग्जयश्रियाम्' इति नैषधे । तेष्वन्यतमं कंचिद्द्वीपं परिचरति भजति सति परद्वीपे गतवति अपि सति यद्वैरिराजकस्याकब्बररिपुभूपतिप्रकरस्य । राज्ञां समूहो राजकम् । 'स्याद्राजपुत्रकं राजन्यकं राजकमाजकम्' इति हैम्याम् । यशः श्लोकस्तद्युक्ता गुणानां राशयः समूहास्त एव रात्रीप्राणेशश्चन्द्रमास्तथा तारकाज्योतींषि तेषां गणेन मण्डलेन कदाचनापि कस्मिन्नपि प्रस्तावे उदयस्योद्गमनस्य प्रकटीभावस्यावकाशः समयो वेला नेति नैषधे समवापि संप्राप्तः । जगत्स्वाभाव्यात्सूर्ये द्वीपान्तरं गते अस्तमिते चन्द्रे ग्रहनक्षत्रतारका उदयावकाशं लभन्ते, परमकब्बरप्रतापसहस्ररश्मेर्नायं प्रकारः । यतः अष्टादशस्वपि द्वीपेषु सर्वत्रैव सद्भावः, परमत्र नास्तीत्येव न तस्मिन् सहस्रांशौ सति चन्द्रादिज्योतिषामुदयावकाशः कुतः स्यादिति ॥

अश्रान्तदण्डनिहताहववादनीय-
वाद्यस्वरैः प्रसृमरैः समरे धरेन्दोः ।

तस्याङ्गजोऽभवदकब्बरभूमिभास्वा-
न्भूपालमौलिमणिचुम्बितपादपद्मः ।
शौरेरिवाम्बुधिशयो भुजपञ्जरान्त-
र्विश्रान्तवार्धिवसनाजयराजहंसः ॥ १२ ॥

तस्य हमॉउसाहेरकब्बर इति नामा भूमिभास्वान् परतेजस्तिरस्कारिप्रतापवत्त्वाद्दुं तत्वाच्च क्षोणीसहस्ररश्मिरभवत् । 'मध्यदिनावधिविधेर्वसुधाविवस्वान्' इति नैषधे । क इव । अम्बुधिशय इव । यथा शौरेर्वसुदेवस्य कृष्णः पुत्रो बभूव । किंलक्षणः । भूपालानां महानृपाणां मौलीनां मुकुटानां मणीभिर्माणिक्यैश्चुम्बितमाश्लिष्य समालीढं पादपद्मं चरणकमलं यस्य । पुनः किंलक्षणः । भुजौ स्वबाहू एव पञ्जरं पक्षिरक्षणस्थानं तस्यान्तर्मध्ये विश्रान्तो विश्रामाय स्थितो वार्धिः समुद्रो वसनं वस्त्रं यस्याः एतावता आचतुःसमुद्रान्तपृथिव्या जयः स्वायत्तीकरणं स एव राजहंसो यस्य सः ॥

साम्राज्यमप्यधिगतो निखिलस्य नाक-
लोकस्य लोलुपतया पुनरीहमानः ।
भोक्तुं समग्रमपि मध्यमलोकमेत-
द्व्याजादुवास मघवेव वसुंधरायाम् ॥ १३ ॥

एतद्व्याजादकब्बरसाहिकपटात् । उत्प्रेक्ष्यते—वसुंधराया विश्वंभरावलये मघवा शक्र इवोवास वसति स्म । किंभूतः । निखिलस्य समस्तस्यापि नाकलोकस्य स्वर्गस्य साम्राज्यमाधिपत्यम् । 'सम्राट् तु शास्ति यो नृपान्' इति हैम्याम् । अतः सर्वेषामपि विमानाधिपतिनाकिनायकानामैश्वर्यमधिगतः प्राप्तोऽपि । 'अधिगतं विधिवद्यदपालयत्' इति रघुवंशे । 'अधिगतं प्राप्तम्' इति तद्वृत्तिः । पुनर्लोलुपतया अधिकाधिकसंपदेश्वर्यसंग्रहयालुतया समग्रं समस्तमपि मध्यमलोकं पातालदेवलोकयोरधः उपरि च वर्तमानयोर्मध्येऽन्तराले वर्तिनं लोकं भुवनं मध्यमलोकं सकलसमुद्रमेखलामण्डलं भोक्तुं स्वभोगविषयतामीहमानो वाञ्छन्निवेति गर्भितोत्प्रेक्षा ॥

अथास्य दिग्विजयविधित्सया प्रस्थाने वैरिणामुत्पाताविर्भाव'—

यात्रासु यस्य चतुरङ्गचमूप्रचार-
प्रोद्धूतधूलिपटलैः परितः प्रसस्रे ।
प्रस्थानमस्य दशदिग्विजयाय जाने
यातैरितः कथयितुं हरिता महेन्द्रान् ॥ १४ ॥

यस्याकब्बरपातिसाहेर्यात्रासु परजनपदाभिभूतया प्रस्थानेषु चत्वारि चतुरङ्गाणि चतुरङ्गानि सावकाशानि गजवाजिरथपदातिलक्षणानि प्रधानाः सैन्या ध्वजाहीनाः

येन साहिना सप्रहारे समरे सम्यक्परविलवकारि प्रहारेण वा हतानि निर्दलितानि हास्तिकानि मतङ्गजव्रजाः। हस्तिनां समूहो हास्तिकम्। 'हास्तिकं तु हस्तिनां स्यात्' इति हैम्याम्। समूहार्थेऽण्। तेषां मस्तकानि कुम्भस्थलानि तेषामन्तर्मध्याद्भद्रजातिजनितत्वेन शिरःपिण्डान्तरालान्निष्पातिना निःशेषेण निरन्तरं वा पतनशीलानां शुक्तिजानामामलकप्रमाणमुक्ताफलानां ततिर्धोरणी समरे सङ्ग्रामे विरेजे विशेषेण भाति स्म। उत्प्रेक्ष्यते—जन्यापाने रणाङ्गणरूपवारुणीपानगोष्ठीस्थाने। 'आपानं पानगोष्ठी स्यात्' इति हैम्याम्। विरोधिनामकब्बरप्रतिभटभटानां रुधिराणि प्रहरणमहाप्रहारप्रवहदप्रमाणशोणितान्येवासवो मदिराः पिबतीत्येवंशीलेन शमनेन यमेन प्रकटिता जनदृग्गोचरीकृता दन्तावली दशनश्रेणिरिव ॥

एतद्भुजारणिसमुत्थमहो हुताश-
ज्वालाज्वलद्बहलबाहुजवंशराशेः ।
उद्गत्वरैः प्रसृमरैरिव धूमवारै-
राविर्बभूव शितिमा दिविषत्पदव्याम् ॥ २९ ॥

एतस्याकब्बरसाहेर्भुजो दोर्दण्डः स एवारणिरग्निकाष्ठं तस्मात् सम्यक् मिश्राणां शारदीनसुधाकरतया अमित्राणां परिवर्तप्रचण्डकिरणतया उत्था उत्थानं यस्य तादृशं यन्महः प्रबलप्रतापः स एव हुताशो ज्वलज्ज्वालस्तस्य ज्वालाभिरप्रकर्षशिखाभिर्ज्वलन्तो दह्यमाना भस्मीभवन्तो वा ये बहला भूयिष्ठा अतिशयेन बहवः। 'बहोरिष्ठेयि' बहोश्च भूवादेशः'। बाहुजा राजन्याः। 'राजन्यो बाहुसंभवः' इति हैम्याम्। साहिविपक्षपक्षलक्षास्तेषां वंशा अन्वयास्त एव वंशा वेणवो वा तेषां राशिः समूहः तस्मादुद्गत्वरैरुत् ऊर्ध्वं गमनशीलैः उच्चैर्निर्यायिभिरुत्थितैर्वा तथा प्रसृमरैर्जगद्व्यापनशीलैः धूमवारैर्वायुवाहव्रजैः। 'स्याद्वायुवाहोऽग्निवाहो दहनकेतनः' इति हैम्याम्। उत्प्रेक्ष्यते—दिविषत्पदव्यां देवमार्गे गगनाङ्गणे शितिमा श्यामता आविर्बभूव प्रकटीभूता। प्रायो वंशेषु दह्यमानेषु प्रबला धूमाः प्रादुर्भवन्ति बहुभिश्च दहनकेतनैर्गृहाद्युपरितनभागे च नैचकिमा भवेदिति प्रत्यक्षमेव दृश्यते ॥

यस्याशुगः प्रसरदाशुगवन्निषङ्गा-
त्कर्षागमेषु लघुहस्ततया कदाचित् ।
नालक्ष्यताक्षिभिरपि प्रतिपक्षलक्षै-
रङ्गे लगन्पुनरबुध्यत युद्धमूर्ध्नि ॥ ३० ॥

यस्य साहेराशुगो बाणः। जातावेकवचनम्। युद्धमूर्ध्नि समानमस्तके प्रतिपक्षलक्षैः परिपन्थिकपृथिवीवासवशतसहस्रैः लघुहस्ततया शीघ्रवेधित्वेन निषङ्गात्तूणीरात् आकर्षा आकर्षणानि तथा आगमा आगमनानि तेषु कदाचिदपि कस्मिन्नपि समये प्रस्तावे

[illegible]

[illegible]

भूपेऽभिषेणयति यत्र रजोभिरुच्चै-

र्दृष्टा दिशः परनृपैर्मलिनाः समग्राः ।

स्वामिप्रकटसमीक्षणमूर्छनोर्वी-

निष्पातधूसरितगात्रलता इवैताः ॥ १८ ॥

यत्र यस्मिन्भूपे अकब्बरनृपे अभिषेणयति सति सेनाभिः सह प्रतिनृपानभिगच्छति सति परनृपैः प्रतिभटभूपालकलापैः रजोभिरुच्चैः अतिबहुलाभिः धूलीभिर्नितरां समन्तादुत्सर्पणेन कृत्वा मलिनाः कश्मलाः मलीमसाः समग्राः समस्ता अपि दिशः आशाः दृष्टाः । उत्प्रेक्ष्यते—एता दिशः स्वासामात्मीयानां स्वामिनां भर्तॄणां प्रकटानां व्यक्तानां समीक्षणेन सम्यग्विचितत्वेनावलोकनेन कृत्वा मूर्छनं दुःखोद्भूतातुच्छमूर्छा तदुर्व्यां भूमौ निष्पातो निष्पतनं लुण्ठनं वा तेन धूसरिता ईषत्पाण्डुरिता धूलीलुलिता वा रजोमया वा जाता गात्रलताः शरीरयष्टयो यासां तादृश्य इव ॥

यन्मेदिनीकुमुदिनीरमणप्रयाणे

छिद्रं न्यभालि परिपन्थिभिरत्रपान्थे ।

यत्र शिलाः स्म विलिखन्ति नखाग्रटङ्कैः
कीर्तिप्रशस्तिमिव भूभृदकन्धरस्य ॥ ३३ ॥

प्रतिपक्षिणां गात्रमात्रशेषीभूताः कान्ताः प्रेयस्यः यत्रादि हृदयान्येव शिलाः पृथुलपाषाणास्तासां नखानां करजानामग्राणि शिखा एव टङ्काः पाषाणोत्कीर्णनकराण्यायसोपकरणानि टङ्कणकानीति प्रसिद्धानि तैर्विलिखन्ति विदारयन्ति स्म । उत्प्रेक्ष्यते—भूभृतो राज्ञोऽकन्धरस्य नृपस्य कीर्तिर्यशस्तस्याः प्रशस्तिर्जगद्विजयकरणवर्णनवर्णावली तामिव । किं कृत्वा । येन पातितमाहिनादये महाविमर्दे प्रणिहता यमराजगृहाङ्गणावगाहिनो विहिता ये कान्तानां स्वाराः पतयः प्राणनाथास्तेषां प्रवृत्तिं वार्तां स्वेषामात्मीयानां श्रवणानां पार्श्वे पार्श्वप्राघुणकीं कृत्वा । श्रुत्वेत्यर्थः ॥

एतद्भवन्निजनिशुम्भभविष्णुशङ्का-
तङ्काकुलीकृतवनेचरवैरिवध्वः ।
रङ्गत्प्रपा इव पयोधरशातकौम्भ-
कुम्भाश्च्युताश्रुजलपूरितनेत्रपात्राः ॥ ३४ ॥ ✓

एतस्मादकन्धरधरणीधरात् भवन्नुत्पद्यमानो यो निजस्य स्वात्मनः निशुम्भो वधस्तस्माद्भविष्णुर्भवनशीला या शङ्का अनिष्टसंभावनं तया आतङ्को भयं तेनाकुलीकृता विह्वला जाता अत एव वने गिरिगहने निकुञ्जे वा चरन्ति संचारिणो वनेचरा ये वैरिणो विपक्षक्षितिपालास्तेषां वध्वः स्त्रियः रङ्गन्त्यः संचरन्त्यः । जङ्गमा इत्यर्थः । प्रपाः पानीयशाला इवाभवन्नभूवन् । किंभूताः । पयोधरा उच्चकुचाः सलिलधारिणः । जलभृता इत्यर्थः । शातकौम्भाः सुवर्णसंबन्धिनः कुम्भाः कलशा यासु यासां वा । पुनः किंभूताः । च्युतानि तु तत्प्रकर्षाद्विलोचनेभ्यो निःसरन्ति यान्यश्रूणि बाष्पाणि तेषां जलै रुदननीरैर्भरे पूरितानि निर्भरभृतानि नेत्राणि नयनानि एव पात्राणि पर्णानि भाजनानि यासां यासु वा । 'पात्रं तु कूलयोर्मध्ये पर्णे नृपतिमन्त्रिणि । योग्यभाजनयोर्यज्ञभाण्डे नाट्यानुकर्तरि ॥' इत्यनेकार्थः ॥

यस्याहवोऽजनि घनाघनवत्कृपाण-
विद्युत्पतत्समददन्तिमदाम्बुधारः ।
भल्लीनिकृत्तरिपुशोणितसिन्धुवेणी-
रुड्डीनपांसुपिहिताखिलदिग्विभागः ॥ ३५ ॥
शून्यं सृजन्भुवनमप्यरिकीर्तिहंसैः
श्रेण्या कुले द्विपति दुर्दिनमादधानः ।

कल्पिता ये [illegible] ॥ [illegible] प्रजाभावेषु उदुडु [illegible] । उत्प्रेक्ष्यते— [illegible] मनोज्ञानन्दा [illegible] मुनीनां [illegible] मुकुलतामुत्कण्ठा [illegible] इति । [illegible] ॥

एतत्कृपाणनिहताहितकुम्भिकुम्भ-

निष्पातिमौक्तिकततिः समरे विरेजे ।

दृष्ट्वा हतान्स्वपतिभूमिपतींस्तदीय-

लक्ष्मीक्षणप्रपतदश्रुकणावलीव ॥ २२ ॥

एतेन अकब्बरसाहिना कृपाणेन निशा[illegible]न्द्रहासयष्टिना कृत्वा निहता व्यापादिता विदारिता ये अहितानां शत्रुपक्षाणां कुम्भिनां भद्रजातिजातानां कुम्भाः शिरःपिण्डास्तेभ्यो निष्पतति निर्गलति निःसरतीत्येवंशीला निष्पातिनी मौक्तिकानां मुक्ताफलानां ततिर्मालिका समरे संग्रामाङ्गणे विरेजे राजते स्म निर्बभौ । उत्प्रेक्ष्यते—स्वस्वात्मनः पतीन्नायकान् भूमिपतीन्धरणीरमणान् हतानथैदकब्बरेण स्वविरोधितया यमातिथीकृतान्दृष्ट्वा व्यालोक्य तदीयलक्ष्मीणां प्रत्यर्थिपार्थिवसंबन्धिनीनां श्रीणाम् । राज्यलक्ष्मीणामित्यर्थः । ईक्षणेभ्यो विलोचनेभ्यः प्रपतन्ती प्रकर्षेणाविरलधाराधराम्बुधारायमाणतया निःसरन्ती अश्रुकणानां बाष्पबिन्दूनामावलीव धोरणिरिव ॥

रोमाङ्कुराः समिति यस्य समुच्छ्वसन्ति

संवाससंगतगुणप्रगुणीभवन्तः ।

एतद्वदुद्धतविरोधिधराधवानां

हृल्लेखतामिव निशुम्भकृते वहन्तः ॥ २३ ॥

यस्य हुमाँउनन्दननृपस्य समिति संग्रामाङ्गणे रोम्णां तनूरुहाम् । लोम्नामित्यर्थः । 'रोमलोमतनूरुह' इति हैम्याम् । अङ्कुराः प्ररोहाः समुच्छ्वसन्ति उच्चैः संजायन्ते उल्लसन्ति । उत्प्रेक्ष्यते—एतद्वदकब्बरसाहिरिव उद्धता उत्कटा मदोन्मत्ता ये विरोधिधराधवाः प्रत्यर्थिपार्थिवास्तेषां निशुम्भकृते दक्षिणारमणमन्दिराङ्गणप्राघुणीकरणार्थं हृल्लेखतामुत्कण्ठोद्रेकभावं वहन्तो बिभ्राणा इव । अत एव किंलक्षणाः । संवासेनाकब्बरसाहिदेहे सम्यग्वसनेन सहस्थानेन वा कृत्वा संगता मिलिताः समागता वा ये गुणाः शौर्योत्साहसत्त्वादयस्ते प्रगुणीभवन्तः प्रगल्भा जायमानाः । 'यादृशैः सहवासः संगतिस्तादृशा एवायान्ति गुणाः' इति लोकप्रसिद्धिः । यदुक्तं च—'जो जारिसेण संगं सो वि हु तारिसो होइ । कुसुमेहिं सह वसंता तिलावि तग्गंधिया हुंति ॥' इति सूक्तोक्तिः ॥

रम्भरमणीयरसिकरासक्रीडानिर्भरा.' इति चम्पूकथायां गितीवर्णने । फालाना-मुच्चैर्गतिविशेषाणां ललितं विलासं कलयांबभूवु. । 'सान्द्रोत्कालमिषाद्धि गायति पदास्प्रगुतुरङ्गोऽपि गाम्' इति नैषधे । उत्प्रेक्ष्यते—धरामासमुद्रपर्यन्तपृथिवीं जित्वा आत्मसाद्विधाय पुनरधिकलिप्सोरत एव विबुधधाम स्वर्गं जिघृक्षोर्गृहीतुमिच्छोरात्मभर्तुः स्वस्वामिनोऽकब्बरधरित्रीश्वरस्थितुः तत्क्षणं तत्कालं त्वरिततरमेवाशयमभिप्राय सल्दत्र विराय वोधे. स्वर्गदिग्विभागे यातु प्रगल्भन्ते ॥

एतद्भवद्भयगृहीतदिशो दिगीशान्
नि स्वाननि.स्वनभरः प्रतिभूरिवान्तः ।
भूत्वात्मनाह्वयनिवावनिपद्मिनीश-
मेनं पुनः प्रणतिगोचरतां प्रणेतुम् ॥ ३८ ॥

नि स्वानानां राजवाद्यानां 'नीसाण, दमांमा वा' इति लोके प्रसिद्धानां नि.स्वनभरः प्रबलनिर्घोष. पुनर्द्वितीयवारमेनमकब्बरम् अवनिपद्मिनीशं मेदिनीमण्डलमार्तण्डं प्रणतिगोचरतां नमस्कृतेर्विषयतां प्रणेतु निर्मातुम् । उत्प्रेक्ष्यते—दिगीशान् हरित्पतीन् आह्वयन्नाकारयन् इव । किं कृत्वा । अन्त' अकब्बरसाहिहरिन्महेन्द्राणां मध्ये प्रतिभूरिव साक्षीवात्मना स्वेन भूत्वा । यदा चान्तराले कश्चित्तथाविध प्रतिभूर्भवेत् तदा एकस्य कस्याविरुद्धवत्त स्यादिति हेतो स्वयमेव साक्षीभूयादिग्गजेन्द्रास्ताना-नाकारयति । किंभूतान् दिगीशान् । एतस्मादकब्बरपातिसाहेरुद्भवत उत्पद्यमानाद्भयात्तद्भिया गृहीता उपात्ता दिश आशा यैस्ते गृहीतदिशस्तान् । पलायितानित्यर्थः । 'पलायितस्तु नष्टः स्यात् गृहीतदिग्तिरोहितः' इति हैम्याम् ॥

स्वीयान्ववायभवभूधरराजिराजो
येनाहतामहितपक्षतया समीक्ष्य ।
मान्येतु जेतुमथ मामपि राजभावा-
द्भेजेऽद्रिजापतिमितीव पती रजन्याः ॥ ३९ ॥

रजन्या रात्रे पतिर्भर्ता चन्द्रः । उत्प्रेक्ष्यते—इति हेतोरद्रिजापतिर्गौरीश्वरस्तं पर्वते जाता इत्यद्रिजा विषमदुर्गभूमिरुत्पद्यते । पर्वते गौरीस्वामिनं भेजे श्रितवान् । तदाश्रयणाच्च दुर्जयत्वं परस्य वैरिणः अन्यस्य राजभावाद्राजत्वादयं राजा अहम-पि राजा तस्मात्परराजत्वान्मपि राजभावादद्रिजापरपुपतिपरिभवानन्तरं मामपि जेतुं परिभवितुं मान्येतु मा गच्छतात् इति भीते. कृत्वा स्वीये आत्मीयेऽन्ववाये सन्ताने । चन्द्रवंशे इत्यर्थ । यथा उत्पन्ना ये भूधरा भूपाश्चन्द्रवंशीयाः पक्षे पर्वतास्तेषां राजी श्रेणीमहितपक्षतया सर्वैरपि वैरित्वेन येनाकब्बरेण आजौ संग्रामविषये आहता निपातिता सनाश्च नयनयोनानरीभावमानीय ॥

अस्तम्भि वैरिनृपदोर्युगदण्डदर्पः
सर्पेन्द्रदर्प इव गारुडिकस्य मन्त्रैः ॥ २६ ॥

धरेन्द्रोर्वसुमतीवासतेयीपतेः प्रसमरैः सकलदिक्चक्रविस्तरणशीलैरश्रान्तमनवरतं वाद्यवादकमानवैर्दण्डैर्वाद्यवादनयष्टिभिर्निहतानि ताडितानि तथा आहवे संग्रामाङ्गणेषु वादनीयानि वादयितुमुचितानि यानि वाद्यानि रणतूराणि अन्यवादित्राणि वा तेषां स्वरैर्निर्घोषैः कर्तृभिर्वैरिणोऽकब्बरसाहेरसहजा एव नृपाः पार्थिवास्तेषां दोर्युगदण्डानां भुजयामलकुटानां जान्वायतत्वेन दण्डाकारत्वाद्दण्डास्तेषाम् अथ वा बाहुद्वन्द्वानां सैन्यानां च चक्रगरुडादिव्यूहानां वा अश्वानां प्रतिनृपतियानरत्नतुरङ्गमाणां वा उपलक्षणादश्ववाराणां गजरथारोहिणां च। 'दण्डः सैन्ये दमे यमे ॥ मानव्यूहे ग्रहे भेदेष्वश्वेऽर्कानुचरे मथि। प्रकाण्डे लकुटे कोणे चतुर्थोपायवर्गयोः ॥' इत्यनेकार्थः । दर्पोऽभिमानोऽस्तम्भि स्तम्भ्यते स्म निराकृतः । जडीकृताः सर्वेऽपीत्यर्थः । कैरिव । मन्त्रैरिव गारुडं स्थावरजङ्गमविषनिवारणप्रवणमन्त्रतन्त्रादिशास्त्रमर्थ्यते वेत्ति वेति गारुडिकः तस्य मन्त्रैर्जाङ्गुलीप्रमुखैः सर्पेन्द्रस्य नागराजस्य दर्पो गर्वो विषवेगाहंकारः स्तम्भ्यते ॥

यत्कीर्तिविद्विषदकीर्तिहतप्रतीपा-
सृक्पङ्क्तिजह्नुतरणिद्रुहिणाङ्गजाभिः ।
जन्यावनीयदवनीशशिनस्त्रिवेणी-
सङ्गः किमाविरभवत्त्रिदिवाभिकानाम् ॥ २७ ॥

यस्यासावकब्बराभिधानस्यावनीशशिनो वसुधासुधांशोर्जन्यावनी संग्राममेदिनी । उत्प्रेक्ष्यते—त्रिदिवाभिकानां सुरलोकाभिलाषुकाणाम् । 'कामुकः कमिता कम्रोऽनुकामयिताभिकः' इति हैम्याम् । वीराणां तिसृणां वेणीनां तरङ्गिणीप्रवाहाणां सङ्गो मिलनं गङ्गायमुनासरस्वतीसङ्ग इव आविरभवत् प्रकटीबभूव। वनिकाभिः कृत्वा यस्य साहेः कीर्तिः प्रसरद्यशस्तथा विद्विषामकब्बरपातिसाहिपुरो रणे भग्नानां प्रत्यर्थिपार्थिवानामकीर्तिरयशः । तथा च हता अकब्बरनरेन्द्रेणैव रणाङ्गणे व्यापादिता ये प्रतीपाः परिपन्थिपृथिवीनाथास्तेषामसृजां रुधिराणां पङ्क्तयः श्रेणयस्ता एव जह्नोर्विष्णोस्तथा तरणेर्मार्तण्डस्य । तथा च द्रुहिणस्य ब्रह्मणः अङ्गजा नन्दिन्यः । जह्नुनन्दना गङ्गा तरणितनया यमुना द्रुहिणोद्वहा सरस्वती । सरस्वती सरित्परसमये शोणसलिला प्रोच्यते । तासामग्रगानयनम् । ताभिः एता एकत्रमिलितास्त्रिवेणीसङ्गोऽजनि ॥

यत्संप्रहारहतहास्तिकमस्तकान्त-
र्निष्पातिशुक्तिजततिर्युधि पौस्फुरीति ।
दन्तावली प्रकटिता शमनेन जन्या-
पाने विरोधिरुधिरासवपायिनेव ॥ २८ ॥

ओजः प्रताप· यशः कीर्तिस्त एवावनिरुहौ पादपौ तयोर्बीज योनिनिबन्धन तरुप्ररोहप्रा· दुर्भावकर पर्वतेवपतीव निःक्षिपतीव । काभि । खङ्गैर्निशिततरवारिभिराहता गाढद- त्तप्रहाराः सर्वाङ्गेषु आसामस्त्येन निस्त्रिंशतया निस्त्रिंशैर्निहता वा तथा उद्धता समरशूरा अनवरतविनि सरत्सप्तस्थानदानपय·प्रवाहोत्कटा वा ये मतङ्गजाः कुञ्जरास्तेषा दन्तेभ्यो दन्तकोशेभ्य· 'दतूसल' इति प्रसिद्धेभ्यः। तथा कुम्भेभ्य· शिर पिण्डस्थलेभ्य प्रोद्भूता. प्रकटा जाता ये पावककणोत्करा वह्निस्फुलिङ्गगणास्तथा मुक्तिका मुक्ताफलानि खड्ग- प्रहतेभ्यो दन्तकोशेभ्यः कृशानुस्फुलिङ्गा । दन्तेभ्य· खड्गाहते पावकोद्भवः । तथा कृपाणविदीर्णप्रहारकुम्भस्थलेभ्यो मौक्तिकानि विनिर्जग्मु । कुम्भान्तरे मुक्तानामुत्प· त्तित्वात्तन्निर्गमः इति । ताभिरवापेव ॥

युद्धोद्धुरे भुवनभीतिकरे नरेशे
त्रासात्स्वकीयवसतेरिव सूरराजौ ।
भ्रष्टौ पुनस्तदनवेक्षणतोऽन्तरिक्षे
प्रेक्षाकृते तत इतो भ्रमिमादधाते ॥ ४३ ॥

युद्धे समराङ्गणे उद्धुरे उद्धते उत्कटैर्वैरिभिर्द्रष्टुमशक्यैः । तथा भुवनाना प्रबलबलवत्तया जगतामपि सुरदानवमानवेन्द्राणामपि आकस्मिकात्यन्तिकान्तकशङ्कावर्तरि नरेशे अकब्ब· राभिधाननरनायके त्रासादाकस्मिकात्मपराभवनभयभरात् सूरराजौ सुभटभूपती सूर्य· चन्द्रौ । उत्प्रेक्ष्यते—स्वकीयवसतेरात्मीयनिवसनस्थानकाद्भ्रष्टौ भ्रश प्राप्तौ । अतिभीते. स्वस्थान परित्यज्य अन्यत्र कुत्रापि प्रपलाप्य प्रयातावित्यर्थः । पुनर्व्याघुट्य तदनवेक्ष- णत. तस्य स्वस्थानकस्य अनवेक्षणतोऽनवलोकनाददर्शनात् । निजनिवासस्थाने न पश्यत इत्यर्थ. । अन्तरिक्षे आकाशे न तद्भयाद्भूमौ प्रेक्षाकृते अर्थात्स्वस्थानदर्शनार्थ तत इतः पूर्वपश्चिमदक्षिणोत्तरासु भ्रमिं भ्रान्तिमादधाते कुर्वाते । स्ववासस्थानमलभमानौ नित्य भ्राम्यत इत्यर्थ ॥

आकस्मिकं तुमुलमेतदनन्यजन्य-
व्याहन्यमानभटकोटिभवं निशम्य ।
आतङ्कितैः किमिदमित्यमरैर्वदद्भि-
र्लेभे किमीक्षणयुगेषु निमेषनैस्व्यम् ॥ ४४ ॥

एतेनाकब्बरेणानन्ये असाधारणे अदृष्टाजातपूर्वे जन्ये संग्रामे व्याहन्यमानाना व्यापाद्यमानाना भटानां राजन्यवीराणा कोटीभ्य· । पवीना कुत्रचित्केचित् कोटीप्र- मुखा शब्दा प्रायो बाहुल्ये दृश्यन्ते । यथा पाण्डवचरित्रे घटोत्कचस्य 'पद्दो' इति प्रसिद्धस्य भीमहिडम्बाङ्गजातस्यकरात्रिरणे—'रथान् पिपेष पादाग्रैर्जघान तरुनिर्ग- जान् । सवेगापातवातेन भटकोटीरपातयत ॥' तथा तत्रैव गा·न्दन्न दशनदिवसच-

...भिगन्मानतिनो ...नेरति ...न ...मा । ... । ...कांग ...
गच्छानुसारं ...ति । ... आगच्छत ... पुनः ...
...मध्ये ... गोड ...न ...मा ॥

यः स्वर्णकायमरिनागनिपातनिष्ण
दृष्ट्वा निपीय हरिवाहन...लीलम् ।
चित्रं किमत्र यदरातिमहीन्द्रबाहु-
कुम्भीनसैः समरमूर्ध्नि जडीबभूवे ॥ ३१ ॥

स्वर्णं ...न तत्सदृशो गौरवर्णः ...कायस्तनुर्यस्य तम्, तथा अरिषु परिपन्थिषु नागाः प्रधानाः । '...नागाद्या. । स्युरुत्तरपदे श्रेष्ठ्याः प्रशस्तार्थप्रकाशकाः ॥' इति हैम्याम् । महीपालास्तेषां निपाते ...निराकरणे निष्ण निपुणम्, तथा हरिरश्व एव उपलक्षणाद्गजोऽपि वाहनं यानं तत्र बद्धा रचिता लीला क्रीडा वाह्यालि-कादौ परस्परसंप्रहारादिका येन तादृशं यं पातिसाहिमकब्बरं दृष्ट्वा विलोचनेन निपीय । भयविह्वलतरलकातरदृशा दृष्ट्वेत्यर्थः । यदरातयः यस्य विपक्षकक्षामङ्गीकुर्वाणा एव महीन्द्रा महामेदिनीमघवानस्तेषां बाहवो दोर्दण्डा एव कुम्भीनसा भुजगमास्तैर्जडी-बभूवे प्रहरणग्रहणबाणक्षेपणादिप्रकारे निश्चेष्टैः संजातम् । किंकर्तव्यतामूढास्त आलेख्यलिखितैरिव वा निर्व्यापारैर्जज्ञे । अत्र प्रकारे किं चित्रं को विस्मयः । यदस्य दर्शनादेव तत्कालं व्याला अपि जडीभवन्ति एव । गरुडः किंलक्षणः । सुवर्णस्य कायः पक्षप्रभृति शरीरं यस्य । तथा अरिभूताः शत्रुभावं प्राप्ता ये नागा भुजगास्तेषां निपाते नितरां पाते निष्णो निपुणः । तथा हरेर्गोविन्दस्य वाहनत्वे यानभावे बद्धा निर्मिता लीला विलासो येन ॥

यस्याशुगान्प्रणयतः प्रतिभूपतीनां
प्राणान्सुराध्वनि विधाय रविं शरव्यम् ।
आजिः सकार्मुककरस्य खलूरिकेव
रन्ध्रं रवौ रिपुभिरैक्षि न चेत्कुतस्त्यम् ॥ ३२ ॥

यस्याकब्बरस्य राज्ञः आजिः संग्रामभूमिः खलूरिका शस्त्राभ्यासभूरिवाभूद्बभूव । यस्य किं कुर्वतः । सुराध्वनि गगनाङ्गणे रविं मार्तण्डमण्डलं शरव्यं वेध्यं विधाय कृत्वा प्रतिभूपतीनां प्रतिपक्षक्षोणीपालानां प्राणाञ्जीवितानि आशु त्वरिततरं गच्छन्ति परलोकं यान्तीत्याशुगाः शीघ्रगामिनः शराश्च तान्प्रणयतः सृजतः । यस्य किंभूतस्य । सह कार्मुकेन कोदण्डेन वर्तते यः स तादृशः करः पाणिर्यस्य । एवं चेन्न तर्हि रिपुभिः परि-पन्थिपृथ्वीपतिभिः रवौ सूर्यबिम्बे रन्ध्रं छिद्रं कुतस्त्यं कुतोभवमैक्षि विलोकितं दृष्टम् ॥

येनाहवे प्रणिहतात्मपतिप्रवृत्ति
कृत्वा स्वकर्णपथिकीं परिपन्थिकान्ताः ।

दर्शे' इति मेघदूतेऽपि। यथा उद्धुराणामुत्कटाना सिन्धुराणां वारणानां निभात्कपटात्। उत्प्रेक्ष्यते—एन मुद्गलमेदिनीमण्डलाखण्डलम् किं संसेवितु सम्यग्विधिनोपासितुमिव सगीयुः समागता.॥

कल्पावनीरुहवनानि महीमघोना
प्रोद्दामदानललितैरवहेलितानि।
गुच्छप्रसूनफलभारनमच्छिखानि
व्रीडोदयादिव बभूवुरधोमुखानि॥ ४७॥ ✓

महीमघोना अकब्बरक्षोणीसहस्रचक्षुषा प्रोद्दामाना जनमनःसमीहिताधिकतया प्रबलाना दानाना स्वर्णमणीगणादिविश्राणनाना ललितैः विलासैर्विजृम्भितैरवहेलितानि अवगणना गमितानि कल्पावनीरुहाणा सुरतरूणा वनानि काननानि। समूहा इत्यर्थः। उत्प्रेक्ष्यते—व्रीडोदयाल्लज्जायाः प्रादुर्भावादिव। स्वावज्ञासजातातिमन्दाक्षोद्गमनेत्यर्थः। अधोमुखानि नीचैर्भूतानि वदनानि येषा तादृशानि बभूवुर्जातानीव। किंभूतानि। गुच्छाः स्तबकाः, प्रसूनानि कुसुमानि, फलानि सस्यानि, तेषा भारेण वीवधेन नमन्त्यो भूमावेत्य लगन्त्यः शिखा' शाखा येषाम्॥

एतन्महस्त्रिभुवनभ्रमणीविलासं
जैत्राङ्ककारनिकरैरपि दुःप्रधृष्यम्।
उल्लङ्घितुं स्पृहयतेव सहस्रपादी
निर्मीयते स्म सरसीरुहिणीवरेण॥ ४८॥

सरसीरुहिणीना कमलिनीनां वरेण भर्त्रा भानुना। सहस्रसख्याकानां पादानां समाहारः सहस्रपादी दशशतचरणाः। 'पादो मूलसतुर्याशाङ्घ्रिषु प्रत्यन्तपर्वते' इत्यनेकार्थ.। निर्मीयते स्म। कृत्वा। उत्प्रेक्ष्यते—एतस्याकब्बरसाहेर्महः प्रतापमुल्लङ्घितुमतिक्रमितुमिव। 'लघूङ् गतौ' अय धातुर्भ्वादिरात्मनेपदी। अतिदुःसहतया निजजैत्रतया च एतत्पुरस्त्वरितु पलायितु वा स्पृहयता काङ्क्षता। किंभूत महः। त्रिभुवने त्रैलोक्येऽपि भ्रमणी पर्यटनम्। 'विधे कदाचिद्भ्रमणीविलासे' इति नैषधे। तत्र विलास क्रीडा यस्य। पुनः किंभूतम्। जैत्राणा जयनशीलाना प्रतिपक्षलक्षतिरस्कृतिदीक्षितानामङ्ककाराणा प्रतिमल्लाना जिष्णूनामपि जित्वराणा निकरैः समुदायैरपि दुःप्रधृष्य दुराकलनीयम्। सर्वथापि जेतुमशक्यमित्यर्थः। 'दूर गौरगणैरहकृतिभृता जैत्राङ्ककारे चर—'इत्यपि नैषधे॥

आकालिकीकुलिशशैवलिनीशवह्नि-
वैश्वानराम्बुरुहिणीरमणप्रदीपाः।

[illegible]

... ॥ ३६ ॥ [illegible]

[illegible] अरीणां शत्रूणां [illegible] ... 'भुवन वन पनरसो यादोनिवासोऽमृतम्' इति हैम्यात् । शून्यं रिक्तं च [illegible] प्रायः प्रावृषि राजहंसा मानससरसि यान्ति । प्रावृट्काले बहुलजलाविलत्वेन [illegible] लुप्यमानान्यजलाशयेषु तिष्ठन्तीति । पुनः किं कुर्वाणः । द्विषति वैरिणि [illegible] क्षान्ववाये दौःस्थ्यादौर्भाग्यवनवासपुत्रकलत्रमित्रप्रमुखस्वजनजनवियोगादि [illegible] कुदिवस दुष्ट दिन मेघान्धकार वादधानः निर्मिमाणः । 'वधूवक्त्राम्भोजं भवतु न [illegible] कुदिवस' इति नैषधे । पुनः किंभूतः । परेषां पथिकपृथ्वीनायकानां वधूनां [illegible] वदनान्येवाम्बुजानि तामरसानि विद्रावयन् म्लानिं प्रापयन् गतप्रायाणि [illegible] 'विद्राणपङ्कजरसे' इति चम्पूकथायां वर्षावर्णने । पुनः किंभूतः । शूराः सुभटाः [illegible] द्रुमा वृक्षास्तान्पुलकेन रोमाञ्चेन रोमहर्षणेन घनिभाश्च कोरकाः कुड्मलाः [illegible] ष्विति कोरकितास्तथाविधान्प्रकर्षेण कुर्वन् । 'कदाचिदच्युत इव [illegible] रगाहोत्पन्नपुलककोरकिततनु' इति चम्पूकथायाम् । शूरा हि साहित्यांर्य श्रुत्वा रोम [illegible] ञ्चकञ्चुकिता जायन्ते इत्यर्थः ॥ युग्मम् ॥

> एतत्तुरङ्गमगणा दिवि संपराये
>
> प्रोत्तालफालललितं कलयांबभूवुः ।
>
> जित्वा धरां विबुधधाम पुनर्जिघृक्षो-
>
> संलक्ष्य तत्क्षणमिवाशयमात्मभर्तुः ॥ ३७ ॥

संपराये संग्रामे एतस्याकव्वरनृपतेस्तुरङ्गमगणा वाजिव्रजा दिवि नभस्यारी प्रो- त्ताल शीघ्रम् । 'उतावल' इति प्रसिद्धिः । तथा 'चलद्वलयसुन्दरकरतलोत्तालतालिका-

राजा चन्द्रो नृपश्चेति द्विराज तस्य भावो द्वैराज्य तद्वद्वैराज्यमिवाभूत् जातम् । किलक्षणेन नृपसूरिराजश्लोकावनीधनयुगेन । महानतिशायी अभ्युदयोऽनवरतवैरोलक्षप्रतिपक्षपयोधरविधुतुदादिभिरप्रतिहताद्वैतवैभवो यस्य । पुनः किं कुर्वता । कुवलय पृथ्वीमण्डलमुत्पल च सप्रीणता । प्रीतिमुत्पादयतेत्यर्थः । विकाशयता च । पर केवलमत्र द्वैराज्ये तच्चित्रमाश्चर्यमस्ति । यत्कारणादन्नभाजः प्राणिन न विद्यते तत्रैत द्वितीय कारण युगल वा यत्रेत्यद्वैतमसाधारणमानन्दपद हर्षस्थान दधुर्धारयन्ति स्म । द्वैराज्ये हि जनाना विषाद एव स्यात्, अत्र तु परमप्रमोदः, एतदेव महदाश्चर्यम् ॥

स्पर्धां दधन्निजयशःप्रसरैः स्वलक्ष्म्या
क्षोणीभुजा बहिरितो विहितः स्वदेशात् ।
स्वःसिन्धुरोधसि तदादि मृगं दधानो
राजानिशं मृगयुवत्किमु बम्भ्रमीति ॥ ९२ ॥

क्षोणीभुजा अकब्बरनृपतिना निजानामात्मीयाना यशसा कीर्तीना प्रसरैर्विस्तारैः सह स्वलक्ष्म्या आत्मश्चैत्यश्रिया सार्धं स्पर्धा सहर्षमभ्यसूयां दधद्बिभ्राणः सन् राजा चन्द्रो नृपश्च इतोऽस्माद्भूमण्डलवर्तिनः स्वदेशान्निजजनपदादात्मप्रदेशाद्वा बहि कृतो निष्कासित देशत्याग कारित. । उत्प्रेक्ष्यते—तदादि तस्माद्वासरादारभ्य मृग लक्ष्म कृष्णसार दधानः कलयन् मृगयुवल्लुब्धक इव स्वःसिन्धोर्गगनगङ्गाया रोधसि तटे अनिशमहोरात्र किमु बम्भ्रमीति अतिशयेन भ्राम्यतीव । प्रायो मृगेणैव मृगा गृह्यन्ते नद्यादिनीरसंनिधाने च पय पानार्थं वन्यसत्त्वाश्च समायान्ति इति स्वयश.स्पर्धी चन्द्रो राज्ञा पृथ्वीपीठान्निष्कासितो नभसि पर्यटतीत्यर्थ ॥

यस्यौजसि स्फुरति जैत्र इव त्रिलोक्या
त्रासादिवाम्बुनिधिमम्बुधिमन्त्रजिह्वः ।
वज्रः पुरंदरकरं सरसीजपाणि.
पादं हरेरपि दवोऽद्रिभुवं बभाज ॥ ९३ ॥

यस्य राज्ञो जैत्रे जयनशीले इव ओजसि प्रतापे त्रैलोक्या जगत्येऽपि स्फुरति परिभ्राम्यति सति त्रासादाकस्मिकभयात् । उत्प्रेक्ष्यते—अम्बुधे समुद्रस्य मन्त्रजिह्व कृशानुः वडवानलः अम्बुनिधिमूर्मिमालिमध्यमिव बभाजाश्रयति स्म । अपि पुनर्वज्रो दम्भोलिः पुरंदरस्य वासवस्य कर हस्तमिवाश्रित. । अपि पुनः सरसीज कमल पाणौ हस्ते यस्यैतावता मार्तण्डो हरेर्नारायणस्य पाद चरण विष्णुपदमाकाश श्रितवानिव । अपि पुनर्दवो दावानल. अद्रिभुव पर्वतघनगहनावनीमिव सेवते स्म ॥

---

१. लिखितपूर्वटिप्पणिवत् 'परलक्षा' इति भवेत्.

पूर्वापराम्बुनिधिसैकतसीमभूमौ
संचारिचञ्चुरचमूचरभूरिभारम् ।
सोढुं न सासहिरहीश्वर एकमूर्ध्ना
शीर्ष्णां सहस्रमिति किं रचयांचकार ॥ ४० ॥

अहीश्वरः शेषनागनाथः. । उत्प्रेक्ष्यते—इति हेतोः शीर्ष्णां मस्तकानाम् । फणानामित्यर्थः । सहस्रं दशशतीं किं रचयांचकार रचितवानिव । इति किम् । यदह पूर्वापरे प्राच्यप्रतीच्यौ यावम्बुनिधी समुद्रौ तयोः सैकते नीरनिर्मुक्तपुलिने ते एव सीमना मर्यादास्थाने यस्यास्तादृशी भूमी वसुधा तस्या विषये सचारिणा संचरणशीलाना चतुरा शौर्यधैर्यादिगुणगणप्रधानाना स्वस्वामिकार्यकरणप्रवणाना चमूचराणा सेनासुभटाना भूरि भूयिष्ठ भार गजाश्वस्यन्दनपदातिपरम्परावीवध सोढु धारयितुम् । एकेन मूर्ध्ना मस्तकेन कृत्वा न सासहिर्न समर्थः । 'अहिर्महीगौरवसासहिर्यः' इति नैषधे । तत्र सहनशील भृश सहते इति । 'सासहिर्वावदिश्चाचलिःपापतिप्रभृतय इकारान्ता निपात्य' इति नरहर्या नैषधवृत्तौ ॥

पाणौ रणाङ्गणगतस्य कृपाणयष्टिः
क्षोणीमणेस्तृणयतः पृतनां रिपूणाम् ।
भाति प्रचण्डभुजदण्डवसज्जयश्रीः-
केशच्छटा प्रकटतामिव टीकमाना ॥ ४१ ॥

क्षोणीमणेर्भूमीरत्नस्याकब्बरपातिसाहे. पाणौ हस्ते कृपाणयष्टिः करवाललता भाति राजते । किंभूता । रणाङ्गणे युद्धमूर्ध्नि गतस्य प्राप्तस्य । अत एव किं कुर्वत. । रिपूणां प्रतिभटाना पृतना सेना पताकिनीं तृणयतः तृणप्राया मन्यमानस्य तृणीकुर्वतः । न किंचित्करता प्रणयत तृणवत्खण्डयतो वा । उत्प्रेक्ष्यते—प्रकटता प्रकाशभाव जन दृग्गोचरत्व टीकमाना गच्छन्ती । प्रचण्डो जानुयुगव्यायतौ द्विपञ्जनामख्यपराक्रमौ भुजदण्डौ तयोर्वसन्त्या चिर वास सृजन्त्या । तिष्ठन्त्या इत्यर्थः । जयश्रियो जय लक्ष्म्या केशच्छटा कुन्तलहस्तो वेणी वेत्यर्थः ॥

खड्गाहतोद्धतमतङ्गजदन्तकुम्भ-
प्रोद्भूतपावककणोत्करमुक्तिकाभिः ।
क्षुण्णे तुरङ्गमखुरै रणभूतले य
ओजोयशोऽवनिरुहोर्वपतीव बीजम् ॥ ४२ ॥

य साहिस्तुरङ्गमाणा शौर्यादयोत्सुकतया खुरैः शफैर्नराशिगाभिः क्षुण्णे दारिते अनिवाहित 'खेडऊ' इति जनप्रसिद्धे रणभूतले रणाङ्गणे युद्धधरामण्डले । उत्प्रेक्ष्यते—

[illegible]—'कोटिशो [illegible] ॥' इति । [illegible] ॥ इति [illegible]

[illegible]

[illegible]

[illegible]

[illegible] ॥ [illegible]

[illegible]

शोऽप्ययशोऽपि नावापि न प्राप्तः। महाराजा अपि यत्प्रतिपक्षतया परिभवं प्राप्य सर्वं राज्यं जनपदपुरग्रामद्रविणादि निर्गम्य द्रमकीभूय वनेचरा इव कान्तारान्तरचारिणो बभूवुः। अतस्तपक्षिणीभिस्तद्वनिताभिः कुतः सुखाशोऽपि प्राप्यत इत्यर्थः॥

मेरुर्गिरिष्विव गभस्तिरिव ग्रहेषु
बर्हिर्मुखेष्विव वृषा प्रमुखो नृपेषु।
आक्रम्य चक्रिवदसौ क्षितिशक्रचक्रं
शास्ति स साहिरखिलां चतुरब्धिकाञ्चीम्॥ ६१॥

असौ साहिरकब्बरः अखिलां समग्रामपि चत्वारोऽम्बुधयः समुद्राः काञ्ची मेखला यस्यास्तादृशीं पृथ्वीम्। यद्यप्युत्तरस्या चक्रिसाध्यस्य भरतक्षेत्रस्य पर्यन्तो हिमवद्गिरिः तथापि कविसमयानुसार्येदो वचः। तथा च रघुवंशे—'पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीम्' इति। तथा च नैषधे दमयन्तीस्वयंवरसमागमे भूपतीनाम्—'रम्येषु हर्म्येषु निवेशनेन सपर्यया कुण्डिननाकनाथः। प्रियोक्तिदानादरनम्रताभिरुपाचरच्चारु स राजचक्रम्॥ चतुःसमुद्रीपरिखे नृपाणामन्तःपुरे वासितकीर्तिदारे। दानदयासूनृतमातिथेयी चतुष्टयीरक्षणसौविदल्ला'॥' इति। शास्ति पालयते। किं कृत्वा। चक्रिवत् चक्रवर्तिवत् क्षितिशक्राणां मूर्धाभिषिक्तानां महानृपाणां चक्रं वृन्दमाक्रम्य स्वसेवकीकृत्य। असौ किंभूतः। गिरिषु सर्वपर्वतेषु मेरुः सुवर्णाचल इव। यथा ग्रहेषु मङ्गलप्रभृतिष्वष्टाशीतिसंख्येषु गभस्तिर्भास्कर इव। ग्रहपतित्वात्। 'ग्रहाब्जिनीगोपतिर्विकर्तनः' इति हैम्याम्। यथा बर्हिर्मुखेषु वृन्दारकेषु वृषा पुरंदर इव। तथा नृपेषु समस्तभूपतिषु प्रमुखो मुख्यः॥ इत्यकब्बरवर्णनम्॥

श्रीआगरापुरमुपेत्य कियन्ति वर्षा-
ण्यम्भोधिनेमिविधुना वसतिर्वितेने।
भूकश्यपेन मथुरामिव हेमपद्म-
निष्पातिपौष्पकपिशार्कसुताकलापाम्॥ ६२॥

अम्भोधिनेमेः समुद्रकाञ्च्या विधुना सुधाकरेणाकब्बरेण पातिसाहिना दिल्लीनगरात् श्रिया विविधलक्ष्म्या कलिताम् आगरा इत्यभिधानं यस्यास्तादृशीं पुरीं नगरमुपेत्यागत्य कियन्ति कतिचिद्वर्षाणि यावत्स्थितिः वसतिर्वितेने विहिता। स्थित इत्यर्थः। केनेव। भूकश्यपेनेव। यथा वसुदेवेन शौर्यपुरान्मथुरामागत्य कियन्ति हायनानि वसतिर्वितन्यते स्म। 'वसुदेवो भूकश्यपो दुन्दुरानकदुन्दुभिः' इति हैम्याम्। किंभूतां पुरम्। हेमपद्मानां जाम्बूनदारविन्दानां निष्पातिभिर्निरन्तरं पतनशीलैरथ वा काञ्चनारविन्देभ्यो गलद्भिः। 'पशुपतिजटाजूट इव विकसितकनककमलकुड्मलोच्छलितरजःपुञ्जपिञ्जरितराजहंसावतंसया' इति चम्पूकथाया हैमपद्मानां सद्भाव इति। पौष्पैः परागैः कपिशा पिङ्गीकृतपयाः यार्कसुता भानुनन्दना तस्याः कलापः ... ताम्॥

संभोगिना कृतरुच नृपसूरिराज-

लोकावलीभिनयुगेन महोदयेन ।

वैराज्यवज्जगदनूपमगन चित्र-

नंद्वनतमदपदं दधुरन्नमान॥ ९१ ॥

नृपोऽकब्बरपातिसाहिः सूरिराजो हीरविजयसूरिस्तयोराशावनः । उभयवशनंदे-
नयेन अन्यनायको विस्मृतो ना नादिनि सूरिराजानिमानमरणम् । तयोः लोका
रासौ तावेवानतीपर्णा राजाना तयोर्युगेन दन्दुग कृत्वा जगद्विश्वन् । ...

तस्मात्कारणात् काश्यपीपतिर्यवननायकः तस्याः श्रीकर्याः आख्यां नाम फतेपुरमिति प्रददे दत्तवान्। करोति स्मेत्यर्थः । यत्तदोर्नित्याभिसंबन्धाद्यस्मात्कारणात् सोऽकब्बरपातिशाहिः प्राक् पूर्वं वासनसमये तस्याः श्रीकर्याः पुरो नगर्याः प्रतिभटान् प्रत्यर्थिपार्थिवान् विजेतुं प्रचलन् प्रतिष्ठमानः दशापि प्राची–आग्नेयी–दक्षिणा–नैर्ऋती–प्रतीची–वायवी–उत्तरा–ऐशानी–नागी–ब्राह्मीलक्षणा आशा दिशः फते स्वायत्ताः । यवना हि विजयस्याभिधां 'फते' इति कथयन्ति इति । 'दशदिगन्तजिता रघुणा यथा' इति रघुवंशे । दशदिशा जयः कुरुते स्म कृतवान् । जैनमते तु महानद्यादिषु इतस्ततः पयःप्रवाहागमनैर्निम्नीभवद्भूभागनिवासिशबरादिग्रामा शैलसंधिगह्वरमध्यगतभिल्लाद्यो वा अधोदिग्वर्तिनः तथा पर्वतोपरिकोट्टादय ऊर्ध्वदिग्भाज इति तत्त्वम् इति दशदिग्जयं जिगायेत्यर्थः ॥

गौरीमहेश्वरगणा स्फटिकावनद्ध-
मध्या सशेवधिपतिः प्रचलत्कुमारा ।
कर्णातिथीभवदिभाननधीररावा
कैलासभूमिरिव या नगरी रराज ॥ ६९ ॥

या श्रीकरीनगरी कैलासभूमिः स्फटिकाचलक्षोणीव रराज राजते स्म । किंभूता । गौरीभिः काञ्चनचारुवर्णवर्णनीयवर्णिनीभिः कलितानां महेश्वराणां महेभ्यानामगणितद्रविणवतां व्यवहारिणां गणाः प्रजा यत्र । पक्षे पार्वतीसंयुतशंभुः तथा गणाः पार्षदाः प्रमथादयो यस्याम् । पुनः किंभूता । स्फटिकादुज्ज्वलमवनद्धं सुधाकल्पितं गृहविपणिगणमयं मध्यं यस्याम् । पक्षे स्फटिकरत्नैरवनद्धं बद्धं मध्यं यस्याः स्फटिकाद्रित्वात् । पुनः किंभूता । सह शेवधीनां निधानानां पतिभिः स्वामिभिः अगणिताप्रमाणद्रविणत्वात्प्रतिस्थाननिक्षिप्तानेकनिधिनायकैरीश्वरैर्वर्तते या । पक्षे सधनदा । 'कैलासौकायक्षधननिधिकिंपुरुषेश्वरः' इति दैम्याम् । पुनः किंभूता । प्रचलन्तः क्रीडाकृते स्वतन्त्रमितस्ततः परिभ्राम्यन्तः कुमारा राजामात्यसामन्तमहेभ्यादीनां बालका यत्र । पक्षे प्रचलन् पित्रोर्मिलनार्थं गमागमं कुर्वन् कुमारः स्वामिकार्तिको यत्र । स्कन्दस्यान्यत्रापि स्थितिसंभवाद्गमागमौ युक्तौ । तथा—'सुगन्धिगन्धमादनाधिवासिनः स्कन्ददेवस्य दर्शनार्थमितो गतवानस्मि' इति चम्पूकथायाम् । अथ वा गौरीनन्दनत्वात्तत्रापि मातुः पार्श्वेऽवस्थितत्वाच्चेति द्वयोरपि कर्मधारयः । पुनः किंभूता । कर्णातिथीभवन्तः श्रवणप्राघुर्णा जायमाना इभानां मदगन्धबन्धुरसिन्धुराणामाननेभ्यो वक्त्रेभ्योऽर्थान्निर्गता धीराः पानीयपूर्णाप्रमाणश्रावणसंबन्धिजलधरध्वनितानुकारिणो रावा गम्भीरगर्जारवा यस्याम् । पक्षे श्रूयमाणो गणनायकधीरध्वनिर्यस्याम् । विनायकस्यापि गौरीतनूजत्वात् ॥

भूमीभृतां प्रतिभटं सुमनःसु मुख्यं
जिष्णूग्रधन्वपविपाणिसहस्रनेत्रम् ।

[illegible]

[illegible] ॥ [illegible] ॥

[illegible] मद्विधो हि तुरगद्वौ [illegible] इति हैम्याम् । [illegible] देवागमे— [illegible] इत्यादिवत्तन्ता महि [illegible] तस्य मुन [illegible] 'रामादिरोमानि [illegible] गादिवान्तायते बाहुतमन्[illegible] [illegible] निनस्वान् ॥' इत्यादौ नैषधे ॥

पञ्चापि देवतरवोऽवरिताः स्वदान-
लीलायितैर्वसुमतीकुसुमध्वजेन ।
संभूय काञ्चनशिलोच्चयचूलिकाया
किं मन्त्रयन्त्यवनिवृत्रहणं विजेतुम् ॥ ९९ ॥

वसुमत्या वसुधराया अतिरूपरामणीयकेन कुसुमध्वजेन श्रीनन्दनेन । 'निषधवसुधामाना कस्य प्रियाङ्गमुपेयुष' इति नैषधे । 'सर्वातिशायिशरीरसौन्दर्योद्भमीलरेण' इति तद्वृत्तिः । स्वदानस्य निजवितरणस्य लीलायितैर्विलसितैरधरितास्तिरस्कृताः पराभूताः सन्तः पञ्चापि पञ्चसख्याका अपि कल्प–पारिजात–मन्दार–हरिचन्दन–सतानननामानो देवतरवः सुरद्रुमा. । उत्प्रेक्ष्यते—काञ्चनशिलोच्चयस्य स्वर्णशैलस्य मेरोश्चूलिकायाः शिर शिखरे सभूय एकत्र मिलित्वा सर्वेऽप्येकीभूय अवनेर्भूमेर्वृत्रहणं पुरदरमकब्बरसाहिं विजेतुमभिभवितु किं मन्त्रयन्ति रहसि आलोचनमिव कुर्वन्ति । 'रहस्यालोचनं मन्त्र.' इति हैम्याम् । तथा पाठान्तरम्—तत्र कूलकषाणा नदीना प्रणयी पतिः समुद्रः सनेमिः स्यन्दनचक्रधाराकारो यस्याः सा भूमिस्तस्यास्स्वामीविवोढ रजनीरमणस्य । अकब्बरभूपतेरित्यर्थ. । विजिगीषयेव स्वाभिभवविधातुर्विजेतुमिच्छयेव अनिमि-

द्वारका नारायणनगरी पयोधिमध्ये समुद्रसलिलदुर्गान्तराले प्रविशति स्म प्रविष्टा । उत्प्रेक्ष्यते—तस्याः श्रीकरीपुर्याः सकाशादुद्भूता उत्पन्ना भूरितरा अतिमहती या भीतिर्भयं तया कृत्वा विह्वलं व्याकुलीभूतं चेतो मनो यस्याः । किं तादृशीव किं कृत्वा । तस्याः श्रीकर्याः सर्वैरुत्पन्नैर्वर्ण्यैर्जगत्त्रयजनवर्णनीयैर्विभवैः श्रीभिः संस्पर्धया अभ्यसूयया कृत्वा निजस्य द्वारवत्याः आत्मनो जयाय पराभवनाय समुज्जिहानामुद्यतां प्रगल्भमानां कृतोद्यमाना वा यां श्रीकरीपुरीं निर्वर्ण्य दृग्गोचरीकृत्य ॥ इति समुदायेन नगरीवर्णनम् ॥

अथ पृथग्वर्णनम्—

धात्रीधृतौ फणसहस्रभृताभ्यसूयां
 विभ्रद्भुजंगविभुनाम्बरचुम्बिमौलिः ।
सालः स्मयेन कपिशीर्षककोटिमुच्चै-
 र्धर्तुं गरुद्गृहमिव स्वयमप्यधत्त ॥ ६९ ॥

सालो वप्राकारः स्मयेन गर्वावेशवशंवदतया । उत्प्रेक्ष्यते—स्वयमप्यात्मनोऽपि महद्गृहं स्वर्गं धर्तुमुद्वोढुं धारयितुमुच्चैरूर्ध्वमुपरिष्टात् कपिशीर्षकाणामट्टालकानां 'कासीसां' इति प्रसिद्धानां कोटिमधत्त धृतवानिव । सालः किं कुर्वन् । भुजगविभुना शेषनागनायकेन समं अभ्यसूयामीर्ष्यां स्पर्धां बिभ्रद्दधानः । किंभूतेन भुजगविभुना । धात्र्या धरित्र्या धृतौ धारणविषये फणानां स्वशिरसां सहस्रं दशशतीं बिभर्तीति । सालः किंभूतः । अम्बरमाकाशं चुम्बतीति शिखरेण स्पृशतीत्येवंशीलो मौलिर्मूर्धा यस्य । अत्युच्च इत्यर्थः ॥

यद्वप्रवज्ररुचिसंचितशक्रचाप-
 चक्राभ्रचुम्बिकपिशीर्षकराजिराभात् ।
युद्धं विधातुमहितेन विधुंतुदेन
 मित्रान्तिकं किमु समीयुरमी सगोत्राः ॥ ७० ॥

यस्यां नगर्यां वप्रः प्राकारः तस्य तत्संबन्धिनां वा वज्राणां गर्भसंदर्भीकृतकुलिशरत्नानां रुचिभिः कान्तिभिः संचितानि पुष्टानि कृतानि प्रकटीकृतानि वा शक्रचापचक्राणि इन्द्रधनुर्मण्डलानि । अथ च वज्रशक्रकोदण्डचक्राद्यानि आयुधानि यस्यां तादृशी । तथा अभ्रमाकाशं चुम्बत्यालिङ्गतीत्येवंशीला अभ्रंकषा कपिशीर्षकाणां राजिः पङ्क्तिः आभाद्बभौ । उत्प्रेक्ष्यते—अहितेन शत्रुणा विधुंतुदेन राहुणा सार्धं युद्धं संग्रामं विधातुं कर्तुं मित्रस्य सुहृदः सूर्यस्य चान्तिकं समीपममी सगोत्राः स्वजनाः किमु समेता उपगता इव । सगोत्रत्वं तु वृत्ताकारत्वेन प्रकाशकत्वेन च नभःपान्थत्वेन प्रभाकरत्वेन च । तथा सगोत्रा हि सायुधाः संग्रामसमये सगोत्रसमीपे प्रायः समायान्ति इति रीतिरियम् । तत्रापि

अनामयत् स्वपदप्रणतान् प्रणयति स्म । क इव । वायुरंह इव यथा [illegible] विरुहान् पादपान् नामयति नम्रीकरोति । अपि च पुनस्तस्मादम्बरमुद्र[illegible] क्षिणस्यां दिशि भवा दाक्षिणात्यास्ते च ते क्ष्मापतयश्च राजानस्तैर्भयेन [illegible] जगृहिरे पलायितम् । 'पलायितस्तु नष्टः स्यादुद्गीतदिग्गिरङ्गितः' इति [illegible] शरभादिव । यथा अष्टापदात्कुञ्जराराते: सकाशात् । 'शरभः कुञ्जराराति[illegible] पादपि' इति हैम्यात् । किंभूतेन । जातिवाचित्वादेकवचनम् । तेनाष्टापदे[illegible] वेगेन प्रपलाय्यते ॥

आज्ञा यदम्बुनिधिनेमिविधेरधारि
शीर्षेव मूर्ध्नि धरणीरमणैरुदीच्यैः ।
पाश्चात्यभूमिपतयो यतयो बभूवु-
र्भीतेर्विरागत इवोज्झितसङ्गरङ्गाः ॥ ९२ ॥

यश्चासौ अम्बुनिधिनेमिर्वसुधा तस्य [illegible] तस्याम्बरभूमौ [illegible] मुदीच्यैः उत्तरस्या [illegible] धरणीरमणैः पृथिवीपतिभिर्मूर्ध्नि [illegible] [illegible] प्रतिज्ञा । अधारि ध्रियते स्म । तथा पाश्चात्यभूमि[illegible] [illegible] [illegible] समाजाः । '[illegible] [illegible]' इति हैमात् । किंभूताः । [illegible] [illegible] [illegible] ॥

[illegible]
[illegible] ।
[illegible]
[illegible] ॥

[illegible]

पुरि फतेपुरनगर्यां वेश्मव्रजा गृहगणा विभान्ति । किंभूताः । मणीनां विविधरत्नानां मरीचीनां कान्तीनां सचारेण प्रसारेण चूर्णिताः खण्डशः कृताः तमींतिमिराणां निशान्धकाराणां प्रसारा विस्तारा यैः । तत्राहमेव मन्ये मानयामि जाने उत्प्रेक्षे वा । अनया नगर्या स्फूर्त्या स्वविभूषाविस्फूर्जितेन सुमनोनगरी अमरपुरी अमरावती विजित्य परिभूय अदसीयाः स्वपुरीसंबन्धिनो विमाननिवहाः सुरयाननिकरा गृहीता स्वादत्ता इव ॥

चित्ते विचिन्त्य भयमभ्रपथेऽभियाति-
स्वर्भाणुतो निजपरिच्छदमप्यशेषम् ।
आदाय यद्विविधरत्ननिकेतकायाः
सातं क्षिताविव वसन्ति सितांशुसूर्याः ॥ ७४ ॥

यन्नगर्यां विविधानामनेकजातीयानां रत्नानां कर्केतनादीनां मणीनां ये निकेता निकोचितचतुररचनासंदर्भितभवनास्त एव कायाः शरीराणि येषां ते । सितांशव श्वेतकान्तयश्चन्द्राः सूर्या आदित्याः । उत्प्रेक्ष्यते—क्षितौ पृथिव्यां सातं सुखं यथा स्यात् तथा वसन्ति निर्विघ्नं स्थितिं कुर्वन्ति । किं कृत्वा । अभ्रपथे मेघमार्गे गगने अभियातिः प्रतिपन्थी यः स्वर्भाणुर्विधुंतुदः तस्मात्तत्काशाच्चित्ते स्वमानसे भयं निजग्रसनगाध्यस्य विचिन्त्य विमृश्य अपि पुनः अशेषं समस्तमात्मपरिच्छदं ग्रहनक्षत्रतारकादिपरीवारमादाय सार्धं गृहीत्वा ॥

उन्नालनीरजमिव श्रियमापदेक-
स्तम्भं निकेतनमकब्बरभूमिभानोः ।
वंश्या रवेरिव परेऽपि गृहा वहन्ते
शोभां मणीद्युतिविभासितदिग्विभागाः ॥ ७५ ॥

अकब्बरनाम्नो भूमेर्विभ्रमराया भानुर्गोस्वामी तस्य एतावता राज्ञः एक एवाद्वितीयः स्तम्भ आधारस्थूणा यस्य तादृशं निकेतनमेकस्तम्भभवन श्रिय शोभामापः प्राप्तं वा । किमिव । उन्नालं नीरजमिव । यथा उद् ऊर्ध्वमुखं नालं ... नार वा नालं मृणालं यस्य तादृक् नीरजं कमलं श्रियं शोभामाप्नोति । अपि पुनः ... रत्नादेः परेऽन्येऽपि गृहाः सप्तभूमिकादयः प्रासादाः शोभां ... वहन्ते । ... दृश्यन्ते । उत्प्रेक्ष्यते—रवेः सूर्यस्य वंश्या सन्तानाः इव । एकस्मिन् वंशे भवा ... वंश्याः प्रोच्यन्ते एकवंशजा प्रायः सदृशा भवन्ति । अत एव मणीनां ... दृश्यमानानां नानाविधरत्नानां द्युतिभिर्ज्योतिर्भिर्भासिता प्रकाशिता ... दिशां ... विभागाः प्रदेशा यैः ॥ इति नगरवर्णनम् ॥

[तस्थौ समाः स कियतीः पुरमागराख्यां
भूमान्विभूष्य मथुरामिव वृष्णिसूनुः ।
भर्तुर्वशेव सरसा सरसीरुहास्या
श्यामाङ्कमर्कतनुजा भजते स यस्याः ॥

स भूमण्डले मुद्गलेन्द्रतया विख्यातो भूमानकव्वरः आगरा इत्याख्या नाम यस्याः ताद्दशीं पुरं नगरीं विभूष्यालकृत्य कियतीः कियत्सङ्ख्याकाः समा वर्षाणि । 'हायनोऽब्दः समाः शरत्' इति हैम्याम् । यावत्तस्थौ स्थितिमकापात् । क इव । वृष्णिसूनुरिव । यथा वृष्णेरन्धकवृष्णेः सूनुर्नन्दनो वसुदेवोदसारः कंसोपरोधेन कतिचित्सङ्ख्याकान् संवत्सरान् स्थितवान् । यस्या आगराख्याया पुरो मथुरापुर्याश्च अर्कतनुजा कालिन्दी अङ्कं समीपं भजते स्म सिषेवे । 'अङ्को भूषारूपकलक्ष्मसु । चित्राजौ नाटकांशे स्थाने क्रोडेऽन्तिकागसोः ॥' इत्यनेकार्थः । केव वशेव । यथा पत्नी भर्तुरन्तिकमुत्सङ्गं भजते । किंभूता । सह रसैः पानीयैः शृङ्गारादिभिर्वा वर्तते या सा सरसा । पुनः किंभूता । सरसीरुहं पद्मं तदेव तद्वद्वा आस्यं वदनं यस्याः । पुनः किंभूता । श्यामा कृष्णवर्णा । 'जम्मन्तरे न विहडइ उत्तममहिलाण ज कियपि कम्म । कालिन्दी कन्हविरहे अज्जवि कालं जल वहई ॥' इति वृत्तरत्नाकरवृत्तौ । पक्षे षोडशवार्षिकी ॥ पाठान्तरम् ॥]

स श्रीकरीपुरमवासयदात्मशिल्पि-
सार्थेन डावरसरः सविधे धरेशः ।
इन्द्रानुजात इव पुण्यजनेश्वरेण
श्रीद्वारकां जलधिगाधवसंनिधाने ॥ ६३ ॥ ✓

स धरेशः अकव्वरधरणीरमणः आत्मनः स्वाज्ञावशवर्तिना शिल्पिसाधन निवहेन डावर इति नाम्नः सरसः प्राक् साहिनैव स्वयं खानितस्य द्वादशकोशमितस्य तटाकस्य सविधे पार्श्वे श्रीकरी इति नाम्नी पुरं नगरं अवासयत् वासयति स्म । क इव । इन्द्रानुजात इव । यथा 'शक्रावरजो विष्णुः दाशार्हः । पुरुषोत्तमोऽब्धिशयनोपेन्द्राविन्द्रानुजाः ॥' इति हैम्याम् । तथा 'का नुजे मम निजे दनुजारौ' इत्यपि नैषधे । पुण्यजनानां यक्षाणामीश्वरेण स्वामिना । 'कैलाशौकाः यक्षधननिधिपुण्यकिंपुरुषेश्वरः' इति हैम्याम् । शक्रादिष्टधनदेन । जलधिगानां नदीनां धवो भर्ता समुद्रस्तस्य संनिधाने समीपे श्रिया स्वर्णरत्नादिसमृद्ध्या संयुक्तां द्वारकानाम्नीं पुरीं वासयामास निवेशयति स्म ।

प्राक्काश्यपीपतिरकव्वरपातिसाहि-
स्तस्याः पुरः प्रतिभटान्प्रचलन्विजेतुम् ।
आशा दशापि कुरुते स्म फते स यस्मा-
त्तस्मात्फतेपुरमिति प्रददे तदाख्याम् ॥ ६४ ॥

म्बरपातिसाहिः सदा फतेपुराख्यां पुरि नगर्यां राज्यं करोति स्म। समग्रनगरजनपद-मण्डलमर्थं भुनक्ति स्म। क इव। सुरेश इव। यथा स्वर्गे देवलोके देवेन्द्रो राज्यं पालयति। पुनः क इव। शेष इव। यथा अहिलोके नागलोके शेषनागाधिपो धरणेन्द्रो वा राज्यं कुरुते। पुनः क इव। चन्द्र इव। यथा दिवि आकाशे निशापतिर्ज्योतिषामैश्वर्यं कुरुते। पुनः क इव। निधिनाथ इव। यथा अलकायां निधीनां समस्तमहीमण्डलगतनिधानानां नाथः स्वामी धनदः राज्यं पालयति ॥ इत्यकब्बरपालितफतेपुरवर्णनम् ॥

गान्धर्विकाः क्वचन घोषवतीं वहन्तो
गायन्ति यत्र नवपञ्चमगर्भगीतिम् ।
प्रस्थापितास्तमुपवीणयितुं मघोना
स्वर्गायनाः स्वजयशङ्कितचेतसेव ॥ ७९ ॥

यत्राकब्बरसभायां क्वचन कुत्रापि प्रदेशे घोषवतीं वीणां वहन्तः करे धारयन्तः गान्धर्विकाः गायनवरा इतरगायनजनगानेभ्योऽसाधारणोऽश्रुतपूर्वत्वान्नवीनः पञ्चमनामा रागो गर्भे मध्ये यस्यास्तादृशीं गीतिं गानं गायन्ति गेयविषयीकुर्वन्ति । उत्प्रेक्ष्यते—स्वस्यात्मनो जये पराभवे असौ स्वर्गे समेत्य मा मा जयतादिति शङ्कितं शङ्कायुक्तं जातं चेतो यस्य तादृशेन मघोना शक्रेण तं साहिं वीणया कृत्वा उप समीपे समेत्य गातुं गानगोचरीकर्तुं प्रस्थापिताः प्रेषिताः स्वर्गायना हाहाहूहूप्रमुखा देवगन्धर्वा इव ॥

यस्या महीमदनसंसदि नर्तकेषु
नृत्यं मनोनयनवृत्तिहरं सृजत्सु ।
सप्तस्वरैस्तदुदिताप्रमितप्रसत्ति-
सप्ताङ्गलक्ष्मिमुदितध्वनितैरिवासे ॥ ८० ॥

यस्या वर्णनागोचरीकर्तुमारब्धायानतिशायिरूपत्वान्महीमदनो भूमीमनोभूरकब्बरपातिसाहिस्तस्य संसदि सभायाम् । 'निषधवसुधामाना कस्य' इति नैषधे । नर्तकेषु नृत्यकारकेषु मनसो तथा नयनानामर्थाच्चतुरचित्तलोचनानां वृत्तेर्व्यापारस्य हरमपहारकम् अनन्यवृत्तिविधायकं नृत्यं ताण्डवं सृजत्सु कुर्वत्सु सत्सु । षड्ज–ऋषभ–गान्धार–मध्यम–पञ्चम–धैवत–निषधनामभिः सप्तभिः स्वरैरासे । सप्तस्वराणां तानमानमूर्छनाभिर्बभूवे इत्यर्थः । उत्प्रेक्ष्यते—तस्मादकब्बरसाहेरुदिता प्रकटीभूता या अप्रमाणा प्रमाणातीता असाधारणा प्रसत्तिः प्रसन्नता यस्यास्तादृश्याः । स्वामि–अमात्य–सुहृत्–कोश–राष्ट्र–दुर्ग–सैन्यलक्षणानि सप्तसंख्याकान्यङ्गानि अवयवा यस्यास्तद्विधायाः लक्ष्म्या राज्यश्रिया । समासमध्ये लक्ष्मिशब्दो ह्रस्वोऽपि दृश्यते । यथा—'चरणलक्ष्मिकरणग्रहणोत्सवे' इति ऋषभनमस्तवे । तथा—'लक्ष्मीर्लक्ष्मिर्हरेः स्त्रियाम्' इति शब्दप्रभेदेऽपि । मुदितध्वनितैरिव प्रमोदमेदुरमनस्त्वेन शब्दितैरिव ॥

प्रेक्ष्य प्रभुं हरिमिव समुपेतमुर्व्यां
प्रीतेरनूपगतवत्यमरावतीयम् ॥ ६६ ॥

य नृपम्। यन्मूर्तिमित्यर्थः । उर्व्यां महीमण्डले उपेतमागत स्वमात्मीय प्रभु स्वामिन हरिमिन्द्र प्रेक्ष्य विलोक्य । विज्ञायेत्यर्थः । प्रीतेः स्वस्वामिनि स्नेहातिरेकात् अनु पृष्ठ उपगतवती समायाता । उत्प्रेक्ष्यते—इय श्रीकरीरूपा अमरावती इन्द्रनगरीव । किंभूत यं हरिं च । भूमीभृता विपक्षक्षोणीक्षिता पर्वतानां च प्रतिभट विद्वेषिण निहन्तुकम्। पुनः किंभूतम् । सुष्ठु शोभन मनो येषा निरवद्यहृदयेषु महत्सु देवेषु च मुख्यमग्रगण्यम्। पुनः किंभूतम् । जिष्णु जयनशील तथा उग्र प्रचण्ड स्वासहजपर. सहलसहार कारक धन्व कोदण्डं यस्य । तथा पविर्वज्रमाकृत्या पाणौ हस्ते यस्य । प्राय· पुण्यवता पाणिपादेषु वज्रचक्राङ्कुशादिलक्षणानि स्यु. । तथा सहस्र दशशतसख्याकानि नेत्राणि लोचनानि यस्य । 'सहस्रखी राजा' इति लोकवाक्यमपि । चरप्रधानपुरोहितादीना दृग्भिर्भूपाला. पश्यन्तीति कविसमयोऽपि । पश्चात्कर्मधारयः । शक्रस्य त्वेतानि नाम न्येव सन्ति ॥

स्पर्धां यया विदधतं त्रिजगज्जयिन्या
दृष्ट्वा बलेर्गृहमियं क्वचिदौचिती न ।
ध्यात्वेति पद्मजनुषा प्रतिघातिरेका-
त्क्षिप्तः क्षणात्क्षितितले बलिना किमेषः ॥ ६७ ॥

पद्मजनुषा ब्रह्मणा इत्यमुना प्रकारेण ध्यात्वा विचिन्त्य प्रतिघातिरेकादनुचितनिभा वनोद्भूतकोपातिशयात् । उत्प्रेक्ष्यते—बलिना बलिनाम्ना दैत्येन सार्धम् । अत्र सार्धपदा ध्याहारः । अथ वा बलिना बलवता विधिना । बलवन्त विना कापि कार्यसिद्धिः स्यात् । अत एव बलिगृहः क्षणान्निमेषमात्रात्क्षितेः पृथिव्यास्तले अधोभागे क्षिप्तः पाताले प्रवेशित. । 'बलिसद्म दिव सतथ्यवागुपरि स्माह दिवोऽपि नारद.' इत्युक्त स्थितिर्बलिगृहस्य नैषधे । इति किम् । त्रिजगज्जयिन्या भुवनत्रितयीयावन्नगरीजयनशी लया यया श्रीकर्या नगर्या सार्धं स्पर्धामभ्यसूया विदधत कुर्वाणम् । बलेर्गृह नागलोक दृष्ट्वा स्वयमन्विष्य इयमनया श्रीकरीपुरा सह स्पर्धाकृतिः क्वचित्कुत्रापि नाचिता न युक्तिमती इति चेतसि विचार्य ॥

निर्वर्ण्य वर्ण्यविभवैः स्वभवैः पुरीं या
संस्पर्धया निजजयाय समुज्जिहानाम् ।
तद्भूतभूरितरभीतिविहस्तचेता.
किं द्वारका प्रविशति स्म पयोधिमध्ये ॥ ६८ ॥

कुत्रापि साहिसभायाः क्वचन प्रदेशे वैणविकैः वेणुं वादयन्तीति वंशवादकगान्धर्वजनैः प्रगुनः प्रेरितः । वादित इत्यर्थः । वेणुर्वंशः 'वांसली' इति प्रसिद्धः । सान्द्रः मेदुरः श्रवणहृदयप्रेमोत्पादकैर्बहलैर्निरन्तरैर्वा नादैर्निजनिनादैः कृत्वा । उत्प्रेक्ष्यते—इति हेतोस्तान् हरिता महेन्द्रान् इह फतेपुरनाम्नि साहिनगरे वस्तुं वासं विधातुं किमाह्वयति आकारयतीव । अन्योऽपि कश्चिज्जनः केनापि प्रेरितः कमप्यनिर्दिष्टनामानमाकारयति । इति किम् । भो इति संबोधने । अहो हरिता महेन्द्राः दशानामपि दिशामधीशाः, त्रिजगतीजयिनी त्रिभुवननिखिलनगरीनिर्जयनशीला एवंविधा फतेपुरलक्षणा पूः पुरी निवस्तुं वस्तुं निवासं विधातुमाखिलमार्हन्तीयोग्यतामावहति दधातीति ॥

कुत्रापि केलिविहगा मगधा इवोर्वी-
भानोर्मुदा जयजयेदमुदीरयन्ति ।
शास्त्राम्बुधेरिव सुधालहरीर्हृदन्त-
स्थास्नोः कथाश्च कथकाः कथयांबभूवुः ॥ ८४ ॥

कुत्रापि सभायाः कस्मिन्नपि भूमिभागे केलिविहगा राजशुकसारिकाप्रमुखपतत्रिणः मुदा दृष्टफलावलीप्राप्तिप्रमुदितमनस्त्वेन उर्वीभानोरतिशायिप्रतापवत्वेन वसुधाधिपस्य अकब्बरस्य जयजयेदं हे साहे, त्वं चिरं विगलितावधि जय जय सर्वोत्कर्षेण वर्तस्व सर्वोत्कर्षेण वर्तस्व इत्येतदुदीरयन्ति । 'तदर्थमभ्याप्य जनेन तद्वने शुका विमुक्ताः पटवस्तमस्तुवन्' इति नैषधे । कथयन्ति । क इव । मगधा इव । यथा मागधा मङ्गलजयशब्दादिकथकाः जयजयशब्दं राज्ञो वदन्ति च पुनः कथकाः पुराणोदितव्याख्यानकारिणः पुरातनकथाकथयितारो वा ब्राह्मणादयः पुरुषाः कथा महापुरुषचरितानि कथयांबभूवुः । उत्प्रेक्ष्यते—हृदन्तर्हृदयमध्ये स्थास्नोः स्थायुकस्य निवसनशीलस्य शास्त्राम्बुधेर्वाङ्मयसमुद्रस्य सुधालहरीरमृततरङ्गानिव ॥

यस्यामवीज्यत विभुश्चमरैः सुरेन्द्रः
स्वर्वर्णिनीभिरिव वारविलासिनीभिः ।
रेजे पुनर्नृपतिमूर्ध्नि सितातपत्रं
राजत्वनिर्जित इवोपचरन्मृगाङ्कः ॥ ८५ ॥

यस्यामकब्बरसभायां विभुरकब्बरपातिसाहिः वारविलासिनीभिः वार[illegible]नातपत्रधारणादिप्रकारैः पार्थिवसेवाविधायिकाभिः पण्याङ्गनाभिः वारस्त्री[illegible]नाभिः चमरैर्वालव्यजनैः कृत्वा । 'चामरं चामरोऽपि च' इति शब्दप्रभेदे । अवीज्यत वीज्यते स्म । क इव । सुरेन्द्र इव । यथा वासवः स्वर्वर्णिनीभिरप्सरोभिः [illegible] दिव्यप्रकीर्णकैर्वीज्यते । पुनरपरोऽर्थो यस्यां सभायां नृपतिमूर्ध्नि पातिसाहिमस्तके सितातपत्रं सितातपवारणं रेजे शोभते स्म । उत्प्रेक्ष्यते—राजत्वेन राजत्वेन निर्जितः

कश्चित्सगोत्रोऽप्यनिष्टो भावदेव च सत्पय पर मित्र: तत: सर्वमप्युचितमेवेति ॥ इति प्राकार: ॥

यत्रापणेष्वगुरुचन्दनगन्धधूली
चन्द्रप्रकीर्णकमणीसुरदुष्यमुख्या: ।
ज्ञानैर्जिनैस्त्रिजगतीव समस्तवस्तु-
वीथी व्यलोक्यत नरैर्निजनेत्रपद्मैः ॥ ७१ ॥

यत्र फतेपुरे आपणेषु व्यवहारिणा हट्टेषु समस्ताना वस्तूना क्रयाणकाना वीथी श्रेणी नरैर्नगरग्रामजनपदजन्मभिर्जनैर्निजनेत्रपद्मैः स्वनयनारविन्दैर्व्यलोक्यत समीक्ष्यते स्म । किंभूता । अगुरवः काकतुण्डा:, चन्दना: श्रीखण्डा:, गन्धधूल्यः कस्तूरिका:, चन्द्रा: कर्पूरा: सुवर्णानि वा, प्रकीर्णकानि चामराणि मणयश्चन्द्रकान्ताद्या: सर्वजातिरत्नानि वा सुरदुष्याणि देवकुलानि वासासि मुख्यान्यादीनि प्रधानानि वा यत्राम् । कैरिव । जिनैरिव । यथा वीतरागै: केवलिभि: केवलज्ञानै: कृत्वा त्रिजगति त्रैलोक्ये समस्तवस्तुविस्तारो विलोक्यते । समस्तवस्तुविस्तारो लोके एव नालोके, तत त्रिजगद्ग्रहणम् ॥

श्रेणीभवन्त्युभयपक्षवलक्षरत्न-
हट्टावली विलसति स्म फतेपुरस्य ।
सुस्वामिसंमदितयत्पुरपद्मधाम्ना
वक्ष:स्थलीकलितमौक्तिकमालिकेव ॥ ७२ ॥

फतेपुरस्याकब्बरनगरस्य श्रेणीभवन्ती द्विपङ्क्त्या जायमाना उभयपक्षयोर्द्वयो: पार्श्वयो: । 'शय्या जहत्युभयपक्षविनीतनिद्रा: स्तम्बेरमा:' इति रघुवंशे । 'उभयाभ्यां द्वाभ्या पक्षाभ्या पार्श्वाभ्या परिवर्तनेन कृत्वा विनीता अपहस्तिता निद्रा यै:' इति तद्वृत्तौ । वलक्षरत्नाना स्फटिकमणीना स्फटिकोपलकल्पिताना हट्टानामापणानामावली धोरणी विलसति स्म शुशुभे । उत्प्रेक्ष्यते—सुशोभनो नीतिमान् स्वामी अकब्बरसाहिस्तेन समदो हर्ष: सजातोऽस्यास्तया समदितया सजातानन्दया यत्पुरस्य फतेपुरनगरस्य पद्मधाम्न्या अरविन्दमन्दिरया लक्ष्म्या वक्ष:स्थले स्वहृदये आकलिता धृता परिहिता मौक्तिकमालिका मुक्ताहारलतेव ॥ इति हट्टावली ॥

वेश्मव्रजा: पुरि विभान्ति मणीमरीचि-
संचारचूर्णिततमीतिमिरप्रसारा: ।
स्फूर्त्या विजित्य सुमनोनगरी गृहीता
मन्ये विमाननिवहा अनयादसीया: ॥ ७३ ॥

[illegible] ॥ ८८ ॥

[illegible]

[illegible] ॥

[illegible]

[illegible]

[illegible]

स्वर्गे सुरेश इव शेष इवाहिगेहे
चन्द्रो दिवीव निधिनाथ इवालकायाम् ।
प्रीणन्प्रजा दशदिशा विजयं विधाय
तस्यां पुरि क्षितिपतिः स करोति राज्यम् ॥ ७८ ॥

दशानामपि दिशां हरितामासमुद्रक्षितेर्विजयं स्वायत्तीकरणं विधाय कृत्वा प्रजा प्रकृतीः समस्तलोकान् प्रीणन् सन्तुष्टान् कुर्वन् । स क्षितिपतिः जगत्प्रसिद्धिनामक

या सन्ति । सूरीणां द्वादशत्वेन बाहुल्याद्ग्रहाणामपि बाहुल्यम् । सूरीणां ग्रहपतित्वात्
पुन किंभूता । जिष्णुत्वेन सुभटतया शोभन जयनशीलतया रमा लक्ष्मीः तया उ
विरामा गजाश्वयानादिबहुविभूतिभ्राजिनः । 'जिते च लभ्यते लक्ष्मी.' इति वचनात्
सत्तु जेताणा सुभटानां हि प्रायः स्वामिनो ग्रामान्ददते इति रीतिः । के इव । नीरे-
निताार इव । 'वार्नदीश' सरस्वान् इति हैम्याम् । वारिपतिर्नदीपतिश्चेति संयोगाद्वा ।
यथा समुद्रा जिष्णुरमाभ्या कृष्णतत्पत्नीभ्यां कृत्वा मनोज्ञाः । समुद्रशायी कृष्णः ।
लक्ष्म्यास्तजातत्वेन सांनिध्यम् । पुनः किंभूताः । वदान्यभाव दानशौण्डतां प्रक-
र्षेण दधतो बिभ्रतः । के इव । श्रीदा इव । यथा धनदा दानशीलत्व दधते । पुन.
किंभूताः । वागधीशाः । प्रगल्भवाग्विलासाः । 'वागीशो वाक्पतौ' इति हैम्याम् । क
इव । धिषणा इव । यथा गुराचार्याः । 'धिषणः फाल्गुनीभवः । गीर्बृहत्योः पतिः' इति
हैम्याम् । वाचामधीशा भवन्ति ॥

स्वस्त्रैणजैत्रमणिकल्पितशिल्पचञ्च-
त्पाञ्चालिकापहृतलोचनचित्तवृत्तिः ।
पूर्वापराम्बुनिधिसीममहीमघोनो
या संसदाप सुषमां वलभित्सभेव ॥ ९३ ॥

पूर्वापराम्बुनिधी प्राच्यप्रतीच्यसमुद्रौ सीमा अवसान मर्यादा यस्यास्तादृश्या मह्या
भूमेर्मघोनो वासवस्य ससत् सभा सुषमा सातिशायिशोभा प्राप लेभे । केव वलभि-
त्सभेव । यथा वलनामान दानवेन्द्र भिनत्ति हन्तीति वलभित्पुरदरस्तस्य सभा पर्षत्
सुधर्मानाम्नी सुषमामाप्नोति । किंभूता । स्व स्वर्गस्य स्त्रीणा समूह. स्त्रैण सुराङ्गनाग-
णस्तस्य जैत्रीभिर्जयनशीलाभि मणिभिर्विविधरत्नै. कल्पित रचित शिल्प विज्ञान
तेन चञ्चन्तीभि शोभमानाभि. । अथ वा मणिभिर्निर्मित विज्ञान यासा तथा चञ्च-
न्तीभिः पाञ्चालिकाभि पुत्रिकाभिरपहृता स्वायत्तीकृता स्वासु एकताना विहिता
लोचनानामर्थाद्विलोककान्तानयनाना मनसा चेतसां च वृत्तिर्व्यापारो यया सा ॥ इत्यक-
ब्बरसभावर्णनम् ॥

गोष्ठीं सृजन्क्षितिसिताशुरशेषशास्त्रा-
धीतीव तत्सदसि कोविदमेदुरायाम् ।
धर्मं विशिष्य परिचेतुमना इति स
सामाजिकाननुयुनक्ति कदाचिदेषः ॥ ९४ ॥

पोऽकब्बरः क्षितिसिताशुर्धरणीरोहिणीरमण. कदाचित् कस्मिंश्चित्समये विशिष्य
प्रकारेण कृत्वा धर्मं मोक्षसाधक मार्गं परिचेतु परिचितिगोचरीकर्तुं मनोऽन्त.-
यस्य सः । तस्या पूर्वव्यावर्णितस्वरूपाया सदसि सभाया सामाजिकान्

कुत्रापि मौरजिकमण्डलवाद्यमान-
माद्यन्मृदङ्गनिनदाननुकर्तुकामः ।
जैनं पदं परिचरन्विगतावलम्बः
श्रेयोऽनुतिष्ठति घनः किमु कामवर्षी ॥ ८१ ॥

कुत्रापि साहिसभायाः कस्मिंश्चित्प्रदेशे मुरजान्वादयन्तीति मौरजिका मुर[illegible] स्तेषां मण्डलेन सदोहेन वाद्यमानानां विविधतालैः पाणिभिस्ताड्यमानानां [illegible] द्यतां भोजनदानलोभेन मदवतां गम्भीरनिजाभ्यां मृदङ्गानां मर्दलानां [illegible] शब्दाननुकर्तुं सदृशीभवितुं कामोऽभिलाषो यस्य तादृग् घनो जलधरः [illegible] पुण्यमनुतिष्ठति करोतीव । किंभूतः । विगतो निर्यातोऽवलम्ब आश्रयः [illegible] स्तम्भनगराद्युपष्टम्भो यस्य । एतावता एकाकी गगनेस्थितत्वात् न निराधार [illegible] किंभूतः । काममतिशयेन जनमनोभिलाषं वा वर्षति प्रचुरपयोवृष्टिं कुरुते [illegible] शीलः कामवर्षी । पुनः किं कुर्वन् । जैनं जिनोऽर्हन्नारायणश्च तत्सम्बन्धि [illegible] परिचरन् सेवमानः । अर्हच्चरणं विष्णुपदं च भजमानः । आकाशे तिष्ठन्नित्यर्थः ।

स्वर्गे न किंचिदपि दानमवाप्नुवद्भिः
प्राप्तैस्तदाप्तुमवनौ धनदाद्धरेन्द्रात् ।
देवैर्न तुम्बुरुमुखैः क्वचन प्रवीणै-
र्वीणा अवादिषत कर्णसुधां किरन्त्यः ॥ ८२ ॥

क्वचन [illegible] प्रवीणै[illegible] [illegible] वीणाः । [illegible]

[illegible]

वाचं सुधामिव निपीय ततः समुद्र-
नेमीतमीवरयितुः श्रवणाञ्जलिभ्याम्।
सामाजिकैः स जगदे द्विजचन्द्रिकाभिः
संवर्धितस्फुरदुरःस्थलतारहारैः ॥ ९७ ॥

ततः साहिप्रश्नानन्तरं सामाजिकैः पार्षद्यैः स साहिर्जगदे भाषितः प्रत्युत्तरं प्रदीयते स्म। किंभूतैः। निजवदनपद्मविराजिद्विजानां दशनानां चन्द्रिकाभिः कान्तिभिः। दन्ताधिकारे चन्द्रिकाशब्देन कान्तिरेवोच्यते। यथा रघौ—'दशनचन्द्रिकया व्यवभासितम्' इति। संवर्धिताः सम्यक्प्रकारेण वृद्धिं नीताः स्फुरन्तो दीप्यमाना उरःस्थले वक्षःस्थाने स्थितास्तारा उज्ज्वलास्तारकसदृक्षा वा हारा मुक्ताकलापा यैः। किं कृत्वा। श्रवणे कर्णावेवाञ्जलो यो जिनपाणिः एकोऽञ्जलिः ताभ्यां द्वाभ्यां कृत्वा समुद्रनेम्याः क्षोणेः तमीवरयितुः शर्वरीवरस्याकब्बरपातिसाहेः पूर्वप्ररूपितप्रश्नलक्षणां वाणीं निपीय सादरं श्रवणविषयीकृत्य। कामिव। सुधामिव। कश्चिद्भाग्यवान् पुमान् सद्गुरुप्रदत्तमन्त्राराधनविधिना पूर्वप्रेम्णा वा प्राचीनाचीर्णातिशायिपुण्येन वा प्रसन्नीभूतसुधाभुजा प्रदत्तं पीयूषमञ्जलिभ्यां पिबति ॥

अस्माभिरीशितरदृश्यत दर्शनेषु
सर्वेषु शेखर इवाखिलधार्मिकाणाम्।
एकः स हीरविजयाभिधसूरिराजः
क्ष्मापालपङ्क्तिषु भवानिव भूमिपीठे ॥ ९८ ॥

हे ईष्टे सर्वत्र पृथिवीपीठे विजयविधानादौ समर्थीभवतीति ईशिता तस्य संबोधनम् हे ईशितः स्वामिन्, अस्माभिः श्रीमत्सादस्यैः भूमिपीठे निखिलमेदिनीमण्डले सर्वेषु समस्तेषु जैनबौद्धशैवसाङ्ख्यवैशेषिकनास्तिकलक्षणेषु षट्सु दर्शनेषु शासनेषु। अथ वा भाट्टप्राभाकरजैमनीयादिषु षड्दर्शनानां शाखाप्रशाखाभूतेष्वपि। सोऽनाधारप्रमाणितानणुगुणगणैर्जगत्त्रये विख्यातः एको न द्वितीयो यस्मादद्वितीयः हीरविजय इति नाम यस्य तादृशः सूरिष्वाचार्येषु निशातप्रतिरूपादिषु जितपरस्त्रीशशुर्णं राजते शोभते इति राजा एतावता श्रीहीरविजयसूरिपुरुहूतोऽदृश्यत दर्शनगोचरीकृतो नापरः। क इव। भवानिव। यथा निखिलानां मुद्राणां प्रतिष्ठानानां 'पठाण' इति प्रसिद्धानां [illegible] विषजातिनुरुष्काणां राजपुत्राणां क्ष्मापालानां पृथिवीपतीनां पङ्क्तिषु श्रेणीषु भवान् [illegible] सादीनामपि साहिर्दृश्यते। उत्प्रेक्ष्यते—अखिलानामिदानींतनपुरातनानां समस्तानां धार्मिकाणां धर्मकर्तॄणां शेखरोऽवतंस इव मुकुटो वा ॥

हिताहितार्थानावेदयते शुभाशुभान् भावान् कथयति हितमहितं च वक्ति । सूरिः किं कुर्वन् । सध्याभ्राणा सध्याकालसजातविविधनीलपीतरक्तादिरागकलिताभ्रकाणां दिवसावसानपितृ(सू)प्रभवद्विविधरागाणां विभ्रमं विलासमिव । अध्रुवभावभाजमशाश्वतपरिणामजुषं भवं ससारमुद्भावयन् प्रकटीकुर्वन् । च पुन किं कुर्वन् । सिद्धेर्महानन्दनगर्या अभङ्गुरतामनश्वरत्वं शाश्वतसुखानुषक्तितां प्रकटयन् प्रकाशयन् । अर्थाजनानां पुरस्तात् । अत एव सूरिर्यातयामश्च किंलक्षण' । आयतौ उत्तरकाले इहपरलोकादौ सासारिकसर्वव्यवहारादौ च हितः शुभचिन्तकः पथ्यवक्ता च ॥

यस्मिन्गतावधि वसन्ति परे निमग्ना
मीनव्रजा इव जना वृजिनावगूढाः ।
तस्माद्भवाम्बुनिधितः स पृथग्बभूव
पङ्कान्तराद्घनरसादिव पुण्डरीकम् ॥ १०२ ॥

स सूरिस्तस्मादवाङ्मनसगोचरीभूतपूर्वपारादनन्तानन्तपुद्गलपरावर्तिनिवर्तननृत्तसूत्रधारात्ससारो देवागाधापारत्वेनाम्बुनिधि' समुद्रस्तस्मात्सकाशात् पृथक् बभूव भिन्नो जातः । ससारं निरस्य मोक्षमार्गे सयमे तस्थिवानित्यर्थः । किंभूतात्तस्मात् । पङ्कः पापमन्तरे मध्ये यस्य । केवलपापमयादित्यर्थः । 'अहः कलङ्कमघ पङ्क' इति हैम्याम् । किमिव । पुण्डरीकमिव । यथा सिताम्भोज पुण्डरीकं पङ्कः कर्दमोऽन्तरे मध्ये तले यस्य तादृशात् घनरसात्सलिलात्पृथक् भवति । स क. । यस्मिन् भवाम्बुनिधौ संसारसमुद्रे वृजिनैः पापकर्मभिरवगूढा आश्लिष्टा व्याप्ता पापभरभारिता सन्त' परे इतरे बहुलससारिणो जना लोका विगतो विशेषेण यातोऽवधिः सीमावसानं यत्रेति क्रियाविशेषणम् । अनन्तानन्तसमयमित्यर्थ । लीनास्तल्लीनमानसा वसन्ति सतिष्ठन्ते । क इव । मीनव्रजा इव । यथा मत्स्याः समुद्रे निमग्ना एव तिष्ठन्ति ॥

संत्रस्यदेणरमणीदृगपाङ्गरङ्गो-
त्सङ्गप्रणर्तितकटाक्षपरम्पराभि ।
चेतस्यविश्यत मुमुक्षुमणेर्न तस्या-
लोकस्य मध्य इव चण्डरुचीरुचीभि ॥ १०३ ॥

तस्य हीरविजयस्य मुमुक्षुमणे श्रमणमाणिक्यस्य चेतसि चित्ते सत्रस्यन्तीनां व्याघ्रकादीनामाकस्मिकभयाकुलतया पलायमानानामेणरमणीनां सारङ्गाङ्गनानां दृगिव चञ्चललोचनमिव दृक् दृष्टिर्यासां तासाम् । चपलविलोचनानां स्त्रीणामित्यर्थ । दृशो नयनानामपाङ्गयोर्नेत्रप्रान्तयोरेव रङ्गयोर्नर्तनस्थानकयोरुत्सङ्गे क्रोडे प्रणर्तितानि ताण्डवं कारितानि कटाक्षाणामक्षिविघूर्णितानां परम्पराभिः श्रेणीभिर्न्यादिभिरप्यन्त न प्रविष्टम् । कैरिव । चण्डरो(रु)चीरुचीभिरिव । यथा तीव्रकिरणस्य भास्करस्य रश्मिभिः कान्तिभिः ।

जैनसिद्धान्त' स एव कषः शाणाग्र तेनोल्लिखितमुत्तेजित देदीप्यमान नि...
मध्य यस्य ॥

नीत्वा बहिर्निजमनःसदनान्निहन्य-
मानं विभाव्य विभुना स्वमरातिभावात् ।
नश्यन्निवान्यजनहृत्परमाणुमध्ये
रागो विवेश विवशाशयतादधानः ॥ १०६ ॥

रागोऽनुरागः सासारिक. स्नेहः । उत्प्रेक्ष्यते—नश्यन्पलायमानः सन् अन... सूरिव्यतिरिक्तानामितरेषा जनाना हृत् हृदयमेव परम उत्कृष्टो योऽणु सर्वलघुत... सूक्ष्मस्थान तस्य मध्ये विचाले विवेश प्रविष्टवान् । नैयायिकाना मते हि मनस... परमाणुत्वमुच्यते । यथा नैषधे—'यत्पथावधिरणु परम सा योगिधीरपि न पश्यति... साक्षात् । वालया निजमनःपरमाणौ हीदरीशयहरीकृतमेनम् ॥' इति । किंभूत. । विवश... व्याकुलमाशयमभिप्राय मनो वा आ सामस्त्येन सर्वप्रकारेण दधानो बिभ्राण । तदेव... व्याकुलत्वमाह—किं कृत्वा । निजस्यात्मनो मनश्चित्तमेव सदन वाससौध तस्माद्बहिर्बा... स्वप्रदेशभूमौ नीत्वा नि सार्य कर्षयित्वा । निष्कास्येत्यर्थ. । अरातिभावात्प्रतिभवं दु'खदायकत्वेन वैरित्वाद्विभुना सूरिणा निहन्यमान मार्यमाण स्वमात्मान विभाव्य दृष्ट्वा विज्ञाय वा ॥

एतेन दुर्गतिरशोष्यत भूपमुख्य
ग्रीष्मोष्मणेव विगलज्जलपङ्कपङ्क्तिः ।
उल्लङ्घ्यते स्म भवपद्धतिरप्यनेन
पाथोजिनीप्रियतमेन यथाभ्रवीथी ॥ १०७ ॥

हे भूपमुख्य सकलराजचक्रचक्रवर्तिन्, एतेन सूरिणा दुर्गति सम्यङ्नियमयमसयमारा-धनतो दुष्टा अनन्तदु खदायका नरकतिर्यग्लक्षणा कुगतिरशोष्यत निषिद्धा निष्ठापिता स्वत. । केनेव । ग्रीष्मोष्मणेव यथा निदाघदाघेन विगलन्ति तापातिरेकान्निर्यान्ति विशुष्य गच्छन्ति जलानि पानीयानि यस्यास्तादृशी पङ्काना जम्बालाना पङ्क्ति श्रेणी शोष्यते । अपि पुनरनेन गुरुणा भवपद्धति भाविनि भूतोपचारात्ससारमार्ग उल्लङ्घ्यते स्म अति-क्रान्त. । केनेव । पाथोजिनीप्रियतमेनेव । यथा पद्मिनीप्राणनाथेन सूर्येण अभ्रवीथी गगनपदवी मेघमाला वा उल्लङ्घ्यते ॥

वाचंयमावनिभृतः शमनामसाम-
योनिप्रतीपकलिताक्रमनोगुहायाम् ।

[illegible]
मोहं त्यजति ॥

किंभूतः स इत्याह—

भास्वानिव प्रकटयत्यनघं च मार्गं
प्राणानिवासिल[illegible] पिपर्ति समग्रसत्त्वान् ।
[illegible] स्पृहामिव न [illegible] दधाति यो-
ऽनुक्रोशशालिपदवीमिव योजनौघः ॥ २८ ॥
विश्वासुमत्सु समदृक्परमेशितेव
सङ्गं कुसङ्गमिव शान्तमना जहाति ।
यः पोतवत्तरति तारयते परांश्च
संसृत्युदन्वति स कश्चिदिहास्ति साधुः ॥२९॥ (युग्मम्)

इह मनारावर्तिनि महामण्डले सर्वदर्शनेषु वा स प्रसिद्धिमान् साधुर्महात्मा कश्चित्कोऽपि अस्ति वर्तते । यत्तदोर्नित्यसंबन्धात् स कः । यो महात्मा भास्वान् मार्तण्ड इवानघं निष्पापं मार्गं पन्थानं प्रकटयति प्रकाशयति । तथा यो निजानात्मीयान्प्राणान् असूनिव समग्रान् सर्वान् सत्त्वान् प्राणिनः पिपर्ति पालयति । तथा च यः सिद्धो मुक्तात्मेव इह विश्वे पुत्रकलत्रधनादिससाराभिपदे वा क्वचित्कुत्रापि पदार्थे स्पृहां वाञ्छां न धत्ते दधाति सृजति वा । पुनर्योजनानां चतुःक्रोशीमानानां मार्गप्रमाविशेषाणामोघः समूह इव अनुक्रोशेन दयया । 'कृपानुकम्पानुक्रोश' इति हैम्याम् । अनुगतैः परस्परं संबद्धैः क्रोशैर्गव्यूतिभिः शालते शोभते इत्येवंशीला पदवीं मार्गमाचारं पन्थानं च धत्ते । तथा यः परमेशितेव परमेश्वर इव विश्वेषां त्रयाणां भुवनानां समस्तेषु वा असुमत्सु जन्तुषु समा समभावा स्वपरव्यवसायरहिता एकस्वभावैव दृग्दृष्टिर्यस्य । तथा यः शान्तमुपशमशालि मित्रामित्रेषु समतया समपरिणामतया प्रवर्तमानं वा मनः स्वान्तं यस्य तादृक् सन् कुसङ्गं कुकुत्सितं पाप्मभिर्व्यसनिभिः पिशुनैर्वा सङ्गं संगममिव । सङ्गं प्रमुदाप्रमुखसंबन्धं धनभोगविलासादिकं संगमं वा जहाति स्वयं त्यजति । च पुनः संसृतिः संसारः स एवागाधोऽपरचक्षुरलक्ष्यतलः उदन्वानपारः समुद्रः तस्मिन् पोतवद्यानपात्रं इव स्वयं तरति परपारं प्रयासं विनैव सुखेन प्रयाति, परांश्च तारयते परं पारं लम्भयते ॥

हे क्षितीन्दो वसुधासुधांशो, मानोऽभिमानो गर्वः अपमानमर्यात्तेन सूरिणेवाव
गणित. प्रापित सन् पुनर्व्याघुट्य प्रतिघात्कोपात्त सूरिमेवात्मारातिं स्ववैरिण
मभिभवितुमिच्छन् वाञ्छन् सन् जगता त्रिभुवनजनानामुपास्ति सेवा वितनुते ।
धाति । कथम् । नक्तंदिन रात्रिंदिवा । उत्प्रेक्ष्यते—स्वकीयमात्मीय साहाय्यक साहा
चिकारयिषु' कारयितुमिच्छुरिव ॥

विद्वेषिणीयमिति येन निहन्यमाना
शिश्राय शंवरमसौ दितिजं प्रणश्य ।
स्थातुं न तत्र विभुरेतदुदीतभीतेः
प्रत्यङ्गिनं त्रिभुवने भ्रमतीव माया ॥ १११ ॥

इयमस्माकं प्रतिभव विद्वेषिणी वैरिणी महाहानिविधायिनी इति कृत्वा निहन्यमाना
मार्यमाणा सती असौ माया संसारवर्तिसर्वजनहृदयसदत्वेन जगत्प्रतीता माया शठता
दम्भचर्या । कपटवर्तितिरित्यर्थः । प्रणश्य कथंचित्प्रास्या प्रपलाय्य शंवर शंवरनामान दितिर्दा-
नवमाता तस्या जायते स्मेति दितिजस्तं शिश्राय श्रिता । एतस्मात्सूरेरुदीतायाः प्रादु-
र्भूताया भीतेर्भयात् तत्रापि शंवरसमीपेऽपि स्मरेण घातित्वात्स्थातुं स्थितिं कर्तुं न
विभुरसमर्था सती । उत्प्रेक्ष्यते—निर्विघ्नस्थानाभावात्त्रिभुवने त्रैलोक्येऽपि प्रत्यङ्गिन ज-
न्तून् जन्तून् प्रति माया भ्रमति पर्यटतीव ॥

संतोषतोयनिधिमध्य इवास्य मग्नो
दग्ध. किमुद्धतसितप्रणिधानवह्नौ ।
जग्धोऽथ वा चरणकेसरिणा करीव
लोभः प्रभोरिति न चेत्किमनक्षिलक्ष्यः ॥ ११२ ॥

हे प्रभो स्वामिन्, सूरेर्लोभ. । उत्प्रेक्ष्यते—संतोष. धृतिः निर्लोभता स एव तोय-
निधि समुद्रस्तस्य मध्ये गर्भे जलान्तराले मग्नो त्रुडित इव । अथ वा उत्प्रेक्ष्यते—
उद्धत. प्रज्वलन् सितप्रणिधानमेव शुक्लध्यानमेव वह्निर्ज्वालाजिह्व तत्र तन्मध्ये दग्धो
भस्मीभूत इव । अथ वा करीव हस्तीव चरण चारित्र तदेव केसरी पञ्चाननस्तेन
जग्धो भक्षित कुक्षिगतीकृत इव । इति चेन्न तर्हि किं कथमनक्षिलक्ष्य न लोचन-
गोचर कदाचिदपि लोभो न दृश्यत इत्यर्थ ॥

तृष्णा महीतलमहेन्द्र विभुर्विरत्या
यो वागुरामिव कृपाणिकया न्यकृन्तत् ।
दुःखान्यलम्भिषत मुग्धजनैर्निपत्य
यस्या मृगैरिव भव विपिनं भ्रमद्भिः ॥ ११३ ॥

अथ हीरविजयसूरिगुणवर्णनप्रारम्भः—

अध्याप्य देवगुरुणा स्वविनेयवर्गैः
स्वख्यातये प्रतिभुवं प्रहितैरिवैतैः।
सभ्यैर्गुणान्कवयितुं कतिचित्तदीया-
न्प्रारभ्यते स वसुधाधिपतेः पुरस्तात् ॥ ९९ ॥

सभायां साधुभिः सभ्यैः सभास्तारैः वसुधाधिपतेर्भूमण्डलाखण्डलस्य पुरस्तादग्रे तदीयान् हीरविजयसूरिसंबन्धिनः कतिचित्सर्वात्मना कथयितुमशक्यतया कियत्संख्याकान् गुणान्कवयितु स्तोतुम्। 'इंट्टे कवयति कवते' इति क्रियाकलापे। प्रारभ्यते स्म। उत्प्रेक्ष्यते—देवगुरुणा सुराचार्येण वृहस्पतिना अध्याप्य पाठयित्वा स्वयं सर्वशास्त्रकलापारगामिनो विधाय स्वख्यातये सर्वावनीवलये निजप्रसिद्धिविहितये भुवं प्रति भूमीमण्डले प्रहितैः प्रस्थापितैः स्वविनेयवर्गैर्निजान्तेवासिवृन्दैरिव ॥

एतस्य दृष्टिरजनिष्ट विभो सदृक्षा
भिक्षाचरेऽमृतभुजामपि सार्वभौमे।
भक्तेऽप्यभक्तिकृति वार्षिकवारिदस्य
वृष्टिर्यथेक्षुविपिने कनकद्रुमे च ॥ १०० ॥

हे विभो स्वामिन्, एतस्य हीरविजयसूरेर्दृष्टिर्दृक् भिक्षया ग्रासमात्रेण चरति वृत्तिमाजीविका विदधातीति भिक्षाचरो भिक्षुकः। दरिद्र इत्यर्थः। तस्मिंस्तथा अमृतभुजां सुधाशनानां देवानां सार्वभौमे चक्रवर्तिनि पुरंदरे च सदृशा निर्विशेषा सदृशी अजनिष्ट संजाता। पुनर्भक्ते स्वसेवासक्ते भक्तिनिर्भरान्तःकरणतयाशनाशुकादिदायके वा तथा अभक्तिकृति अवज्ञाकारिणि अनिष्टविधायिनि वा पुंसि तुल्यैव अस्य सूरेर्दृष्टिरजनिष्ट। यथा वर्षासु भवो वार्षिकः वर्षाकालसंबन्धिनो वारिदस्य बहुलसलिलप्रचण्डधारावर्षिणो मेघस्य वृष्टिर्वर्षणमिक्षूणां रसालानां 'सेलडी गूदगरी' इति प्रसिद्धानां विपिने वने। क्षेत्रे इत्यर्थः। तथा कनकतरौ धत्तूरकवृक्षे च सदृशैव संजायते ॥

संध्याभ्रविभ्रममिवाध्रुवभावभाज-
मुद्भावयन्भवमभङ्गुरतां च सिद्धेः।
आवेदयत्यसुमतः कुलयातयामो
वंश्यानिवायतिहितः स हिताहितार्थम् ॥ १०१ ॥

स हीरविजयसूरिरसुमतः सकलभविकजन्तून् प्रति हितानिहपरलोकेऽर्थान्। अर्थ अहितान् द्वयोरपि लोकयोरनिष्टविधायिनोऽर्थान् भावान्पदार्थान्वा आवेदयति कथयति क इव। कुलयातयाम इव। यथा गोत्रवृद्धः पुमान् वंश्यानिजपुत्रपौत्रादिकान् प्र

अर्थात्क्षमाधरपदं क्वचिदप्रवृत्तं
यस्यात्मनस्तु गिरिभूपतिभिर्विभक्तम् ।
ज्ञात्वा तदाप्तुमिव शीलति शार्ङ्गपाणि
पर्यङ्कमूर्तिधरकुण्डलिचक्रवर्ती ॥ ११६ ॥

पर्यङ्कस्य पल्यङ्कस्य मूर्ति शरीरं धरतीति बिभर्तीति तादृशः कुण्डलिनां भोगिनां चक्रवर्ती सार्वभौमः शेषनागेन्द्रः शार्ङ्गपाणिं केशवं शीलति सेवते । 'शेषशय्याशायी कृष्ण' इति श्रुतिः । उत्प्रेक्ष्यते—तत्सूरेः स चासौ हीरविजयनामा सूरिराचार्यश्च तस्य क्षमाधरपदम् आप्तुं लब्धुमिव । किं कृत्वा । यस्य सूरेरर्थात्परमार्थवृत्त्या क्षमाधरपदमद्व-तभावेन क्वचिदन्यत्र पुरुषादावप्रवृत्तं कुत्रचित्कदाचित्केनापि न प्राप्तम् । तु पुनः आत्मनः स्वस्य शेषनागस्य तु क्षमाधरपदं गिरिभिः कुलशैलादिशिलोच्चयैः तथा भूपतिभिर्भूपालैः विभक्तं विभागीकृतम् । गिरयो भूपालाश्च क्षमाधराः शेषनागोऽपि क्षमाधरः इति न किमपि । शेषः । सूरिसदृशस्त्वन्यः कोऽपि त्रैलोक्येऽपि क्षमाधरो नास्ति । क्षमा क्षान्तिः क्षितिश्च विज्ञाय ज्ञात्वा ॥

गम्भीरभावं दधता जिनं च हृदा विगीतः प्रभुणा पयोधिः ।
पादारविन्दे किममुष्य लक्ष्मलक्षादुपास्त्यै स्थितवानुपेत्य ॥ ११७ ॥

पयोधिः समुद्रः अमुष्य सूरेरुपास्त्यै सेवायै । उत्प्रेक्ष्यते—लक्ष्मण [illegible] च्छनस्य लक्षात्कपटादुपेत्यागत्य समीपे समेत्य पादारविन्दे सूरिचरणकमले [illegible] वासस्थाविव । किंभूतेन । प्रभुणा सूरीन्द्रेण गम्भीरभावं गाम्भीर्यं तथा च पुनर्जिन-र्हन्तम् । चन्द्रसूर्यादीनां राजधानीषु प्रासादसद्भावात्त [illegible] चत्वार [illegible] पेण वर्धमान-नामानः शाश्वतजिनाः सन्ति । जिनजातिवाचि [illegible] । तथा लोकप्रवादेन कृष्णं समुद्रशायित्वादाश्चर्यं । 'पुरुषोत्तमोऽब्धिशयनोप [illegible]' इति हम्याम् । त दधता । अथ सूरिस्तु जिनशासनापारत्वा [illegible] जिनं वीतराग बिभ्रता । केन । हृदा हृदयेनान्तःकरणेन मार्गेण च ॥

धरेश येनापरितो महिम्ना सुजातरूपेण च धीरताभिः ।
महीधरो गन्तुमुजा[illegible] ॥ ११८ ॥

हे धरेश पृथिवीपते, येन सूरिणा महिम्ना [illegible]

[illegible]

रुचीशब्दो दीर्घइकारान्तोऽप्यस्ति । यथा नैषधे—'वरुणग्रहिणीमाशामासादयन्तमम् रुचीनिचयमिव' इति । 'नो चेत्ता चण्डरोचीरुचिररुचिरुची' इति जिनशतकेऽपि । अलोकस्य जीवाजीवादीनामनाधारक्षेत्रस्य मध्ये विचालेन प्रविश्यते । अलोकेषु सूर्या दीना न प्रकाशः । परशासनेऽपि दृश्यते । यथा रघुवंशे—'सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः । प्रकाशश्चान्धकारश्च लोकालोक इवाचलः ॥' 'चक्रवालस्यार्वाक् प्रकाश. परतश्चाप्रकाशः' इति तद्वृत्तौ । 'लोकालोकश्चक्रवालः' इति हैम्याम् ॥

संसृत्यसारसरणीभ्रमणीभवेन
विश्वत्रयीजनिमतां नयता विमोहम् ।
सङ्गेन यद्यतिपतेः पुरतः प्रणेशे
नागेन नागदमनीत इवोद्धतेन ॥ १०४ ॥

यस्य यतिपतेर्निर्ग्रन्थनाथस्य पुरतोऽग्रे सङ्गेन स्वजनपरिजनाभिष्वङ्गेन प्रणेशे नष्टम् । संसारविरक्तत्वात्तस्य कुत्रापि प्रतिबन्धो नास्तीत्यर्थः । किंभूतेन । संसृतेः संसरणमनन्तभवाटवी पर्यटनं संसारः तद्रूपा विविधनरकतिर्यगादिदुःखपरम्पराकारित्वादसारा निकृष्टा सरणिर्मार्गस्तत्र भ्रमण्या पर्यटने भ्रमणेन कृत्वा भवेनोत्पन्नेन । सांसारिककुटुम्बसंबन्धसंजातेनेत्यर्थ । अत एव किं कुर्वता । विश्वत्रय्यास्त्रैलोक्यस्य जनिमतां सुरासुरनराणां विमोहं मौढ्यं नयता प्रापयता । केनेव नेशे । नागेनेव । यथा उद्धतेन मदेन कोपेन वोद्धुरेण भुजंगमेन नागानां सर्पाणां दमनी शक्तिमती औषधिविशेषस्तस्मात्प्रणश्यते ॥

संक्रान्तशक्रबलिधामधरापदार्थ-
सार्थे जिनागमकपोलिखितान्तराले ।
संक्रान्तिरापि न कदापि हृदात्मदर्शे
सूरीश्वरस्य किमनङ्गतयाङ्गजेन ॥ १०५ ॥

सूरीश्वरस्य हृत् हृदयमेवातिस्वच्छत्वादात्मदर्शो दर्पणस्तत्र अङ्गजेन [illegible] [illegible] । 'अनन्यजोऽङ्गजः' इति हैम्याम् । कदापि कस्मिन्नपि काले [illegible] [illegible] संक्रान्ति संक्रमणं प्रतिबिम्ब [illegible] [illegible] । यस्य मनसि कस्मिन्नपि प्रस्तावे स्मरोद्रेको नाभूदित्यर्थः । [illegible] [illegible] प्रतिबिम्ब [illegible] [illegible]

न कदाचन गोचरा मनाक्त्वा भजन्ते प्रभविष्णुतां प्रभो ।
दशना इव दन्तिनां महीभृति वा भानुमतीव तामसाः ॥ १२१ ॥

हे साधो, प्रभो सूरीन्द्र सकलसामर्थ्यवति त्वा त्वां कदाचन कस्मिन्नपि ताडनादिसमये गोचराः शब्दरूपगन्धरसस्पर्शाख्याः पञ्चापि विषयाः प्रभविष्णुतां सामर्थ्यं न भजन्ते स्म । त्वं न प्राभवन्नित्यर्थः । क इव । दशना इव । यथा दन्तिनां गजेन्द्राणां दन्तकोशा महीभृति पर्वते न प्रभवन्ति । वा पुनस्तामसा इव । यथा तामसास्तमसां समूहा पूर्णा वा भानुमति सहस्रकिरणे न प्रभवन्ति ॥

सुधाधामदुग्धाब्धिकर्पूरपारीकुमुत्कुन्दशुभ्रैर्यशोभिर्यतीन्दोः ।
ककुप्कोटिसटीकमानायशोभिः पुनर्विश्वमीशप्रयागी(गा)यते स्म ॥ १२२ ॥

हे ईशे सकलभूमण्डलैश्वर्यवान् भवतीति ईशस्तस्य सम्बोधनं हे ईश्वर, यतीन्दोः सूरेः सुधाधामामृतकिरणश्चन्द्रः, तथा दुग्धाब्धिः क्षीरसमुद्रः, तथा कर्पूराणां घनसाराणां पारी खण्डानि 'फडलि' इति प्रसिद्धाः समूहा वा कुमुदानि कैरवाणि कुन्दानि शुभ्रकुन्दकुसुमानि तद्वत् शुभ्रैरुज्ज्वलैर्यशोभिः कीर्तिभिः । पुनः ककुभां दिशां कोटिः सटीकमानैः प्रसरद्भिरयशोभिर्वर्णनीयाभिः कीर्तिभिः कृत्वा विश्वमपि जगत् प्रयागी(गा)यते स्म गङ्गायमुनासंयोगवदाचरति स्म । सूरियशांस्युज्ज्वलानि गङ्गाप्रवाहाः, कृष्णाभ्रप्रवसानि स्थानानि कालिन्दीकल्लोलजलानि, तेषां सङ्गो निखिलेऽपि लोकेऽतो विश्वमेव प्रयागी(गा)यति(ते) प्रयाग इवाचरते ॥

राजन्यस्य गुणान्नालम्भितसुधास्यन्दान्निपीयादरा-
न्मङ्क्षोज्या अपि मय्यनादरपरा भोगीश्वरा भाविनः ।
मां तातानुगृहाण तेन सुधयात्यभ्यर्थितः साग्रहं
तानश्रावयितुं किमम्बुरुहभूरेतान्विकर्णान्व्यधात् ॥ १२२ ॥

हे राजन्, अम्बुरुहभूर्ब्रह्मा तान् सूरिगुणान् अश्रावयितुं न श्रवणगोचरीकारयितुम् । उत्प्रेक्ष्यते—एतान् भोगीन्द्रान् विकर्णान् कर्णरहितान् व्यधात् कृतवानिव । 'अथो नागाः फणिनस्तदेव रुचिरं नो चेदहिस्वामिना' इति खण्डप्रशस्तौ । किंभूतो वेधाः । तेन कारणेन हे तात धातः, मामनुगृहाण मय्यनुग्रहं कुरु इत्यमुना प्रकारेण सुधया कफो-त्पादकेन पीयूषेन साग्रहं सोपरोधमभ्यर्थितो याचितः । यस्मात् संभाव्येन कारणेन गलन्ती निर्यान्ती स्थितिर्मानं येषु । अप्रमाणा इत्यर्थः । आदराद् सुधास्यन्दानमृतरसान् यस्य गुरोर्गुणान् निपीय सादरं श्रुत्वा अदृगेव भोज्यं भोजनं येषां ते मङ्क्षोज्या अपि भोगीश्वराः सर्वेऽपि नागेन्द्रा मयि सुधायां विषये न स्थिते आदरः आदृतिः पुरोऽपि येषाम् । अथ वा आदरे तत्परता येषां ते अनादरपरा अस्वीकारपरायणा इत्यर्थः । भाविनो भविष्यन्ति । इत्यस्य हेतुः ॥

स्वालम्भभीलुक इवोत्कटकोपकुम्भी
कर्तुं प्रवेशमपि नो प्रभविष्णुरासीत् ॥ १०८ ॥

हे सकलराजचक्रचूडामणे, वाच वार्णीं यमयन्ति सावद्यव्यवहारे प्रवर्तमाना नियन्त्रयन्तीति वाचयमा वाग्गुप्तिधारका । वाक्कथनेन मनःकायगुप्ती समेते । मध्यग्रहणेन आद्यन्तयोर्ग्रहण कार्यम् । 'तुलादण्डस्येव' इति न्यायेन । तथा 'ढक्कायसमारम्भे' इत्यत्र संरम्भ इति मध्यमपदग्रहणेन सरम्भारम्भयोराद्यन्तयो. पदयोर्ग्रहणम् । 'तुलादण्डन्यायेन' इति श्रीरत्नशेखरसूरिपादाः श्राद्धप्रतिक्रमणसूत्रवृत्तौ प्रोचु । तेषा सगुप्तित्रयधारिणां साधूना तेषु वावनिभृत्पार्थिव' पर्वतश्च तस्य शम. प्रशान्तरस स एव नामाभिधान यस्य तादृशा. । सामवेदाद्योनिरुत्पत्तिर्यस्य । श्रूयते च—'नारायणनाभ्यम्भोरुहकुहरकुटीरमधिशयानस्य वेदविद्यानिगदतो भगवत' पितामहस्य वृहद्रथान्तरविकीर्णाभासनामानि गायतः सामश्लोकरसनिष्पन्दादुदपद्यन्त ऐरावतसुप्रतीकप्रभृतयोऽष्टौ दिग्गजेन्द्रास्तेभ्योऽभवन् भद्रमन्दमृगमिश्रजातयो गिरिचरनदीचरोभयचारिणः । प्रसिद्ध चैतत् सामजा गजा.' इति चम्पूकथायाम् । तस्य तेषा वा प्रतीप शत्रु केसरी तेन कलितोऽङ्क उत्सङ्गो यस्यास्तादृशीम् । मन. चित्तमेव गुहा कदरा तस्यामुत्कटो मदोद्धत. कोपः क्रोध एव कुम्भी हस्ती प्रवेशमपि कर्तुं प्रभविष्णु समर्थो नासीत् न बभूव । उत्प्रेक्ष्यते—स्वस्यात्मन आलम्भो व्यापादन तत्र भीलुको विभ्यदिव ॥

विश्राणयत्यसुमतां क्षितिकान्त बोधि-
बीजं निधिं जनयितेव निजाङ्गजानाम् ।
सिद्धः स्वसिद्धिमिव भक्तिमता विनीता-
न्तेवासिनामिव गुरुः परमात्मविद्याम् ॥ १०९ ॥

हे क्षितेर्भूभामिन्याः कान्त वल्लभ, असुमता भव्यजन्तूना बोधिबीज सम्यक्त्व विश्राणयति ददाति । क इव । जनयितेव । यथा पिता निजाङ्गजाना सानन्दानां निधिं निधानं दत्ते प्रयच्छति । पुनः क इव । सिद्ध इव । यथा विद्यासिद्धिभृद्भक्तिमतां स्वसेवासक्ताना स्वस्यात्मनः सिद्धि मन्त्रादिसामर्थ्य दत्ते । पुनः क इव । गुरुरिव । यथा सम्यग्धर्मोपदेष्टा विनीतानां विनयकलिताना स्वादेशवशवदानामन्तेवासिनां शिष्याणां परमात्मविद्यामध्यात्माम्नाय वितरति ॥

मानोपमानममुना गमितः क्षितीन्दो
जेतुं पुनः प्रतिहतस्तमरातिमिच्छन् ।
साहाय्यकं किमु चिकारयिषुः स्वकीयं
नक्तंदिवं वितनुते जगतामुपालिम् ॥ ११० ॥

[illegible] पूर्वपदवीमालम्बमाना पुन-
[illegible] विभ्रं निजगतां मुक्ताकलापा इव ।
[illegible] यस्य स्फूर्तिमवाप्य [illegible] मिवाणानिव
[illegible] भूषणैरिव गुणैर्नैर्भूष्यते स प्रभुः ॥ १२६ ॥

[illegible] भूषणैरिव [illegible] तिमा [illegible] गुणा [illegible] कुण्डला इव । [illegible] इति लिङ्गानुशासने । [illegible] पूर्वे पूर्वजे [illegible], तेषां पदवीं पदमालम्बमानाः [illegible] । पुनः [illegible] मुक्ताकलापा इव मौक्तिकहारा इव भि- [illegible] प्रिय [illegible] सन्ति । पुन- [illegible] अपि दर्पार्पित प्रब- [illegible] ॥

[illegible] चित्रशिखण्डिना तनुजवचेत्स्यादसाधारणी
यस्यास्ये भुजगप्रभोरिव भवेज्जिह्वासहस्रं पुनः ।
अस्याप्यस्खलिता सुरेश्वरसरिद्वीचीव वाक्चातुरी
स्तोतु प्रभवेत्स सोऽपि सुगुरोर्यावद्गुणान्भूमणे ॥ १२७ ॥

हे भूमणे पृथ्वीमाणिक्य, सोऽपि पुमान् सुगुरोर्हीरसूरेर्यावतः समस्तान् । 'याव-न्तर अनवधी' इति नैषधे । 'समस्तलोकसंतोषोत्पादने रतमस्यास्ति' इति तद्वृत्तौ । गुणान् स्तोतु सम्यग्वर्णयितु सर्वप्रकारेण वर्णयितु न प्रभवेत् समर्थो भवेत् । स क । यस्य पुंसः चित्रशिखण्डिना सप्तर्षीणाम् । 'सप्तर्षयश्चित्रशिखण्डिन' इति हैम्याम् । तनुजवनन्दस्येव बृहस्पतेरिव । 'चित्रशिखण्डिनन्दन.' इति नैषधे । पण्डा तत्त्वानुगामिनी मतिर्यदि असाधारणी विश्वे कस्यापि सदृशी न सर्वेभ्यो वाग्देवतावाचस्पतिप्रमुखम-हागुरुदानवमानवेभ्योऽभ्यधिका । 'साधारणी गिरसुपर्वधनेषधाभ्याम्' इति नैषधे । 'साधारणात्स्त्रियां नो विकल्पो ङीपोऽपि विकल्पोक्ति । साधारणी साधारणा' इति प्रक्रियाकौमुद्याम् । अपि पुनर्भुजगप्रभोर्नागराजस्येव यस्यास्ये यदीयवदने जिह्वाना रसनानां सहस्रे द्विसहस्री वा इत्यर्थोऽभ्यवे । भवेत् । अपि पुनः सुरेश्वरसरितो गगनगङ्गाया । 'मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका' इति हैम्याम् । यथा सुरापगा तथा सुरेश्व-रापगापि । तथा 'सुरेश्वरतटिनीतीरस्खलिद्धाङ्गनाः' इति भोजप्रबन्धेऽपि । वीचीव जातावेकवचनम् । कल्लोलमालिकेवेत्यर्थ. । यस्य वाक्चातुरी वचनविलासः कुत्रापि वर्णनादौ अस्खलिता अकुण्ठा क्वापि न स्खलति ॥

साटङ्का इव कर्णपूरपदवीमालम्बमाना पुन-
र्निर्माणा हृदये श्रियं त्रिजगतां मुक्ताकलापा इव ।
दर्पादुत्तृपिता यस्य स्मृतिवशाद्येषां प्रियाणामिव
क्षोणीभूषण भूषणैरिव गुणैस्तैर्भूष्यते स प्रभुः ॥ १२६ ॥

हे क्षोणीभूषण [illegible], भूषणश्रेणीस्वर्णाभरणैरिव तैर्जगज्जनविख्याति- [illegible] स प्रभुः [illegible] । तैः कैः । ये गुणास्ताटङ्का' कुण्डला इव । [illegible] पुनः पुनः [illegible] । '[illegible] कुण्डलाः' इति लिङ्गानुशासने । [illegible] पूरयन्तीति, [illegible] पूर्वे पूरके येषां, तेषां पदवीं पदमालम्बमानाः [illegible] । पुनर्ये गुणा मुक्ताकलापा इव मौक्तिकहारा इव त्रि- [illegible] वक्षसि च श्रियं शोभां बिभ्राणाः सन्ति । पुन- [illegible] स्मरणयोगाद्धृष [illegible] अपि दर्पाच्चेतःप्रस- [illegible] उत्तृपिता [illegible] ॥

पण्डा चित्रशिखण्डिना तनुजवच्चेत्स्यादसाधारणी
यस्यास्ये भुजगप्रभोरिव भवेज्जिह्वासहस्रं पुनः ।
यस्याप्यस्खलिता सुरेश्वरसरिद्वीचीव वाक्चातुरी
संस्तोतुं प्रभवेन्न सोऽपि सुगुरोर्यावद्गुणान्भूघने ॥ १२७ ॥

हे भूघने क्षोणीशादित्य, सोऽपि पुमान् सुगुरोर्हीरसूरेर्यावतः समस्तान् । 'यावच्चनरकालमती' इति नैषधे । 'सकललोकरागोत्पादने मतमस्यास्ति' इति तद्वृत्तौ । गुणान् संस्तोतुं सम्यक्तया सर्वप्रकारेण वर्णयितुं न प्रभवेत् समर्थो भवेत् । स कः । यस्य पुंसः चित्रशिखण्डिना सप्तर्षीणाम् । 'सप्तर्षयश्चित्रशिखण्डिनः' इति हैम्याम् । तनुजवन्नन्दनस्येव बृहस्पतेरिव । 'चित्रशिखण्डिजनन्दनः' इति नैषधे । पण्डा तदनुगामिनी मतिश्चेद्यदि असाधारणी विश्वे कस्यापि सदृशी न सर्वेभ्यो वाग्देवतावाचस्पतिप्रमुखाम- रानुग्दानवमानवेभ्योऽभ्यधिका । 'साधारणी गिरमुपर्बुधनैषधाभ्याम्' इति नैषधे । 'साधारणात्स्वार्थे नो विकल्पो ङीपोऽपि विकल्पोक्तिः । साधारणी साधारणा' इति प्रक्रियाकौमुद्याम् । अपि पुनर्भुजगप्रभोर्नागराजस्येव यस्यास्ये यदीयवदने जिह्वाना रसनानां सहस्रं द्विसहस्री वा इत्यर्थोऽभ्यर्थ्यते । भवेत् । अपि पुनः सुरेश्वरसरितो गगनगङ्गाया । 'सिद्धसाःस्वर्गिरवापगाः' इति हैम्याम् । यथा सुरापगा तथा सुरेश्वरापगापि । तथा 'सुरेश्वरतटिनीतीरस्थसिद्धाङ्गनाः' इति भोजप्रबन्धेऽपि । वीचीव जातावेकवचनम् । कल्लोलमालिकेवेत्यर्थः । यस्य वाक्चातुरी वचनविलासः कुत्रापि वर्णनादौ अस्खलिता अकुण्ठा क्वापि न स्खलति ॥

लज्जामात्रेऽप्यपत्रपा' इति शब्दप्रभेदे। व्रीडशब्दोऽकारान्तोऽप्यस्ति । 'सरव्रीडसम यानया' इति नैषधे । जडीवभूव मूढ । विचेत इति यावत् । जातः ॥

वाह्यं हन्ति तमो द्विधापि स नृणामस्तंगमी नास्तवा-
न्विश्वस्यैव विबोधकृत्स जगतां कृत्स्नन्पृणन्कौशिकम् ।
गृह्णन्सर्वरसानसौ नवरसांश्चिन्वञ्जनांस्तापय-
ञ्छान्तानेष सृजन्प्रभो तदुपमां धत्ते क भास्वांस्ततः ॥ ११९ ॥

हे प्रभो स्वामिन्, ततस्तस्मात्कारणात् भानुः सूर्यस्तदुपमा सूरिसाम्य क कुत्र लभते। अपि तु न कुत्रापि । यतो हेतोः सूर्यो वाह्य चक्षुर्गोचर लोकगत तमोऽन्धकार हन्ति। पुनः सूरिर्द्विधापि वाह्य तमोऽज्ञान मौर्ख्य तथा वाह्य पापमपि व्यापादयति । तथ भानुः अस्त नाशं गच्छतीत्येवशीलो गमी । सूरिस्तु न विद्यतेऽस्तः क्षयोऽभ्युदयश्च वा यस्येति नास्तवान्। सर्वदोदयीत्यर्थः । पुनः किंभूतः । विश्वस्यैकस्यैव भूलोकस्य वि बोधकृज्जागरकारकः उद्द्योतकर्ता वा सूरिस्तु जगतां त्रयाणा भुवनाना प्रतिबोधवि धाता । भास्वान्कि कुर्वन् । कौशिकमुलूकलोक कृत्स्नन् पीडयन् वासरे तस्यान्धीभवनात्। गुरुस्तु कौशिक पुरदर पृणन् अतिशायिसयमगुणैः कृत्वा प्रीतिमुत्पादयन् । पुनः किंभूतः भानुमान् । सर्वानशेपान् रसान् भूमण्डलगतपानीयानि गृह्णन्नाददानः । 'श्रीने सहस्ररश्मिः भूतलगतरुर्वारसानादत्ते' इति श्रुतिः । मुनीन्द्रस्तु सरसव्याख्यानविधानाव सरे नवान् नवीनान्नवसंख्याकान् शृङ्गारहास्यकरुणारौद्रवीरभयानकबीभत्साद्भुतशा न्ताभिधानान् रसांश्चिन्वन् पुष्टान्कुर्वन् । प्रायश्चरितानुवादेषु सर्वेऽपि रसाः समायान्ति न तथा सिद्धान्तव्याख्यानादिषु । पुनर्मार्तण्डः किं कुर्वन्। जनाल्लोकांस्तापयन् स्वतीव्रत घ्णकिरणैस्तापसतापभाजः सृजन् । भवपरम्परापरिचितीकृतदुरन्तदुरितोदीर्णदुःस हदुःखदावानलज्वालाप्रतप्तानेकभविकलोकान् ध्वसितापरसिद्धान्तवैरुज्जैनराद्धान्त सवन्धिवन्धुरस्तवव्याख्यानप्रागल्भ्यप्रगुणानणुपयोधरामृतधाराधोरणीभिः शान्तानिर्वा पाञ्छीतलान् शान्तरसयुक्तान् वा कुर्वाण. ॥

यद्वाग्विधित्सया धात्रादत्तां वीक्ष्याम्बुधिः सुधाम् ।
खेदादिवोर्मितुमुलैः पतितो रटति क्षितौ ॥ १२० ॥

अम्बुधि. क्षीरसमुद्रोऽर्यालभ्यते उमाणां चतुर्दिग्गमनप्रवृत्तकल्लोलकलापानां तुमु व्याकुलशब्दकोलाहलैः कृत्वा । उत्प्रेक्ष्यते—क्षितौ भूपीठे पतितः सन् रटति रोदन पूत्कुरुते इव । किं कृत्वा । यद्वाचा वाचयमचन्द्रमसा वाणीनां विधित्सया निष्पाद करणस्पृहया धात्रा जगत्स्रजा ब्रह्मणा आदत्ता गृहीता सुधां स्वामृत वीक्ष्य । ... दोहनावसरे प्रेमातिरेका स्वतर्णकपानहृते गोर्गवा वा दुग्धमिव हरिणा मन्थान... नक्रमथनसमये तत्कालकृपचिचोरितवा रक्षित पीयूष प्राप्त ... ॥

अत्रास्मिन् हीरसौभाग्यमिति नाम यस्य तादृशे हीरसूरेर्हीरविजयगणधरस्य चरिते दशमः सर्गः सजातः समभवत् । किंभूत. । रसैः वीरकरुणाबीभत्सशान्तादिभिर्नामभि. कृत्वा उज्ज्वलो दीप्यमानः ॥

इति पण्डितसीहविमलशिष्यपण्डितदेवविमलविरचितायां सोपज्ञहीरसौभाग्यनाममहाकाव्यवृत्तौ दिल्लीमण्डलनगरनागरहमाउतनन्दनाकब्बरसाहिरिपुदिग्विजयफतेपुरस्थापनासाहिसभासाहितप्रश्नसभ्यप्रोक्तश्रीहीरविजयसूरिगुणवर्णनो नाम दशमः सर्ग. ॥

एकादशः सर्गः ।

अथाह्वातुमीहावभूवाब्धिनेमीतमीशो मुनीना सुनासीरमेनम् ।
प्रबोधाय धर्मात्मनः किं निजस्यावतीर्णं पुनर्हेमचन्द्रं यतीन्द्रम् ॥ १ ॥

अथ सभ्यजनवर्णितश्रमणेन्द्रगुणश्रवणानन्तरमब्धिनेमेः समुद्रमेखलाया भूमेरीशो रात्रिपतिश्चन्द्रः । भूपतिरित्यर्थः । स अकब्बरसाहि एन श्रीहीरविजयनामानं मुनीनां सुनासीरं वाचयमपुरंदरमाह्वातुं स्वसमीपे समाकारयितुमीहांबभूव वाञ्छति स्म । धर्म एव आत्मा स्वरूपं यस्य भाविनिभूतोपचारात् तादृशस्य निजस्याकब्बरात्मन. प्रबोधाय धर्मावबोधार्थम् । अथ च धर्मात्मन' कुमारपालस्य । 'कुमारपालश्चौलुक्यो राजर्षि. परमार्हत' । मृतस्वमोक्ता धर्मात्मा मारिव्यसनवारक ॥' इति हैम्याम् । प्रबोधाय प्रतिबोधकृते पुनर्द्वितीयवारमवतीर्णं गृहीतावतारं हेमचन्द्रं यतीन्द्रं हेमाचार्यमिव ॥

ततोऽजूहवद्दूतयुग्मं वियुग्मीकृताराति पक्षः क्षमाकर्मसाक्षी ।
पयोराशिपर्यन्तराष्ट्रप्रतिष्ठा मनीषीव यद्वेद निःशेषभाषाः ॥ २ ॥

ततः सूरेराकारणाकाङ्क्षानन्तरं क्षमायाः क्षोणे. कर्मसाक्षी भास्वानकब्बरसाहि. समाभाया भूमौ च प्रसिद्धं ख्यातिमत् दूतयुग्मं संदेशहारकद्वन्द्वमजूहवदाकारयामास । किंभूत. क्षमाकर्मसाक्षी । वियुग्मीकृताः वियोग स्त्रीभिः सम विरहं प्रापिता अरातीनां वैरिणो पक्षा वशा रिपुवर्गा येन । किंभूत दूतयुग्मम् । यत् नि.शेषा समस्ता भाषा विविधदेशोक्तीर्वेद जानातीति । क इव । मनीषीव । यथा विद्वान् शेषा' षडपि संस्कृत-प्राकृत-मागधी-शौरसेनी-पैशाची-अपभ्रंशी-लक्षणा भाषा वेत्ति । किंलक्षणा भाषा । पयोराशयश्चत्वार. समुद्रा' पर्यन्तः प्रान्तो येषा तादृशा ये राष्ट्र देशा. । राष्ट्रशब्दः पुनपुंसके । 'अग्न्याघ्रपद्मपकरराष्ट्रतक्रजठरा.' इति लिङ्गानुशासने । तेषु प्रतिष्ठा माहात्म्यप्रसिद्धिर्यासां ताः ॥

विपक्षान्क्षितौ क्ष्माभृतो दन्तुभेत्तो पुलोकादिवाखण्डलः स्वर्गिवर्गे. ।
द्विपत्कालरात्रीयितानेकधीरं द्विधा पर्षदीति स्तवीति प्रभु यम् ॥ ३ ॥

यद्दूतयुग्म द्विधा द्विगुणा पर्षदि सभायां प्रभु प्रत्यक्षमनेकधीरत्वगुणा प्रकारेण स्तौति वर्णयति । किंभूतं प्रभुम् । द्विषतां प्रतिपक्षाणां भाषा... ।

सुरशिखरिणस्तुङ्गे शृङ्गे ध्वनिग्रहपारणां
त्रिदशसुदृशां गायन्तीनां गुणाञ्श्रमणेशितुः ।
रसिकमनसौ श्यामारामावराम्बरकेतनौ
किमयत इतो गीतिं श्रोतुं तमीदिवसात्यये ॥ १२५ ॥

श्यामा शर्वरी सैव रामा वनिता तस्या वरो भर्ता । 'यामिनी [illegible]' इति काव्यकल्पलतायाम् । चन्द्रः, तथा अम्बरकेतनः सूर्यः । 'गगनध्वजो [illegible]' इति [illegible] गगनध्वजस्तथा पर्यायपरिवर्तनादम्बरकेतनः । 'द्वयेऽपि भ्रमरादिषु' इति वचनात् । इति तौ तमी रात्रिर्दिवसो वासरस्तयोरत्यये विरामे [illegible] स्त्यायां चेत्यर्थः । उत्प्रेक्ष्यते—त्रिदशसुदृशां सुराङ्गनानां गीतिं [illegible] किमयतः गच्छत इव । त्रिदशसुदृशां किं कुर्वन्तीनाम् । [illegible] तुङ्गे गगनाग्रलग्ने शृङ्गे शिखरे गायन्तीनां [illegible] । श्रमणेशितुः सूरिराजस्य गुणान् । किंभूतां गीतिम् । [illegible] श्रवणानाम् । 'श्रुतौ [illegible]' [illegible] श्रवणं च' इति हैम्याम् । पारणाम् । [illegible] पारणा [illegible] स्यात् तथा सूरिगुणगीत[illegible] । [illegible] श्रुतिपारणां गीतिं श्रोतुं [illegible] कुतः [illegible] ॥

[illegible]
[illegible] ।
[illegible] ।
[illegible] ॥ १२६ ॥

[illegible]

ततः क्षोणिशकाशयं तौ बुभुत्सू स्म युङ्क्तः स्ववक्त्राम्बुजे वाग्विलासैः ।
सरित्प्रेयसश्चेतसस्तादृशानां पुनः केन येन प्रतीयेत पारः ॥ ७ ॥

ततः साहिना दृष्टिसंभावनानन्तरं तौ दूतौ वाग्विलासैर्वचनवैचित्रीभिः स्ववक्त्राम्बुजे निजवदनकमले युङ्क्तः योजयतः स्मेत्यर्थः । किं कर्तुमिच्छू । बुभुत्सू बोद्धुमिच्छू ज्ञातु कामौ । कम् । क्षोणिशकस्य साहेराशयं मनोऽभिप्रायम् । येन कारणेन सरित्प्रेयसः समुद्रस्य पुनस्तादृशानां गम्भीराशयानां महात्मनां चेतसो हृदयस्य च पारं परतीरं पूर्णाशयभावः केन पुंसा प्रतीयेत ज्ञायते । अपि तु न केनाप्यवबुध्यते ॥

हरिर्वा कृतान्तः प्रचेताः कुबेरः किमु त्वद्दिगम्भोजदृग्रक्षकेषु ।
यदेतेषु केनापि कृत्यं भवेत्तत्प्रगल्भीभवावस्तदाज्ञाविधासु ॥ ८ ॥

हे ईश, हरिरिन्द्र, तथा कृतान्तो यमः, तथा प्रचेता वरुण, तथा कुबेरो वैश्रवणः, एतेषु चतुर्षु मध्ये चेद्यदि ते तव एकेनाप्यन्यतमेन कृत्यं कार्यं भवेत्स्यात् । उत्प्रेक्ष्यते—त्वद्दिगम्भोजदृशां तव पूर्वादक्षिणापश्चिमोत्तरालक्षणानां नाम्ना दिङ्मृगाक्षीणां रक्षकेषु किमु रक्षाकारकेष्विव सौविदल्लेष्विव । यतो हरिर्वानरः, कृतान्तः कालः अथवा कृतस्योपकारस्यान्तोऽवसानं यस्मिन् स कृतं किमपि न वेत्ति कृतघ्नः, तथा प्रचेताः सुमना राजपत्नीं जननीं मनुते । तथा कुत्सितशरीरः, एवंविधानामवरोधरक्षणं युक्तमेवेति । त्वदन्तःपुररक्षकेषु तर्हि तदाज्ञाविधासु तेषामिन्द्रादीनां चतुर्णां लोकपालानां प्राकारणप्रकारेषु प्रगल्भीभवाव उद्यमं कुर्वः । तमाकारयाव इत्यर्थः ॥

त्रिलोक्या इवाधीशितुर्भूमिभर्तर्भवत्तो भवेत्कोऽपि वैमुख्यभाग्यः ।
पुरस्तादुदेष्यन्त्यजानन्वनाङ्केष्वनन्तानि दुःखानि खानिः स्मयानाम् ॥९॥

हे भूमिभर्तः हे धरणीरमणीरमण, यः कोऽपि विपक्षादिको भवत्तस्त्वत्तः सकाशात् वैमुख्यभाक् पराङ्मुखताभाजी भवेत् । कस्मादिव । त्रिलोक्यास्त्रिभुवनस्य अधीशितुः स्वामिनः परमेश्वरादिव । यथा कोऽपि पापात्मा परमेष्ठिनः पराङ्मुखो भवति । किं कुर्वन् । अजानन् अविदन् । कानि । वनाङ्केषु काननानां क्रोडेषु मध्येषु पुरस्तादग्रे उदेष्यन्ति प्रकटीभविष्यन्ति उत्पत्स्यमानानि अनन्तान्यपाराणि न विद्यतेऽन्तोऽवसानं येषां तादृशानि दुःखानि । यः किंभूतः । स्मयानामहंकाराणां खानिराकरः स्थानम् । अथ च भगवतः पराङ्मुखोऽपि पाप्मा अनादिकालानामास्माकीनं शैवशासनमिति गर्वावेशवशवदो दुर्बुद्धिर्वनाङ्केषु सूक्ष्मबादरसाधारणप्रत्येकवनस्पतिकायादिमध्येषु पुरस्ताद्भाविसंसारपरम्परासु प्रादुर्भवष्यन्ति समुत्पत्स्यमानानि अनन्तानि अनन्तकालवेद्यानि दुःखानि छेदनभेदनाद्यनेकवेदना न जानीते । मिथ्यामतमूढीभूतत्वान्न वेत्तीत्यर्थः ॥

असंख्येषु संख्येषु विद्वेषिलक्षाविलक्ष्यीकृतेर्बिभ्रदुत्सेकभावम् ।
विधित्सुर्मृधं भूपवौद्धत्यभाग्यस्त्वया पूर्वदेवेशवत्केशवेन ॥ १० ॥

सुरशिखरिणस्तुङ्गे शृङ्गे ध्वनिग्रहपारणा
त्रिदशसुदृशां गायन्तीनां गुणाञ्श्रमणेशितुः।
रसिकमनसौ श्यामारामावराम्बरकेतनौ
किमयत इतो गीतिं श्रोतुं तमीदिवसात्यये ॥ १२४ ॥

श्यामा शर्वरी सैव रामा वनिता तस्या वरो भर्ता। 'यामिनीकामिनीपतिः' इति काव्यकल्पलतायाम्। चन्द्रः, तथा अम्बरकेतनः सूर्यः। 'गगनध्वजाध्वगा' इति हैम्याम्। यथा गगनध्वजस्तथा पर्यायपरिवर्तनादम्बरकेतनः। 'द्वयेऽपि भूभृद्वाचेषु' इति हैमे वचनात्। इति तौ तमी रात्रिर्दिवसो वासरस्तयोरत्यये विरामे क्षये वा। प्रभाते सन्ध्यायां चेत्यर्थः। उत्प्रेक्ष्यते—त्रिदशसुदृशां सुराङ्गनानां गीतिं गुणग्रामगानं श्रोतुं श्रवणविषयीकर्तुं किमयतः गच्छत इव। त्रिदशसुदृशां किं कुर्वन्तीनाम्। सुरशिखरिणः सुपर्वपर्वतस्य तुङ्गे गगनालिङ्गिनि शृङ्गे शिखरे गायन्तीनां गानगोचरीकुर्वन्तीनाम्। कान्। श्रमणेशितुः सूरिराजस्य गुणान्। किंभूतां गीतिम्। ध्वनिग्रहपारणां रञ्जितमानसमनुजानां श्रवणानाम्। 'श्रुतौ श्रवः। शब्दाधिष्ठानपेजूषमहानादध्वनिग्रहाः॥ कर्णः श्रोत्रं श्रवणं च' इति हैम्याम्। पारणाम्। यथा उपोषितानां पड्रससरसीकृतरसवतीवल्लने पारणा तदास्वादे चातितृप्तिः स्यात् तथा सूरिगुणगीतिश्रवणेन कर्णानां तृप्तिः स्यात्। अत एव श्रुतिपारणां गीतिं श्रोतुं प्रयातः कुतः इतोऽस्मात्स्थानान्मेरोः सनाथशिखरसंनिधाने। किंभूतौ। स्वादरसिकमनसौ सरसगानाकर्णने रसकलिते उत्सुकतायुक्ते चेतसी ययोस्तौ ॥

धन्यास्ते नृपते फलेग्रहि पुनस्तेषामभूज्जीवितं
तैः प्रापे स्वजनुःफलं प्रथमतो गण्याश्च पुण्यात्मनाम्।
यैर्लावण्यसुधां न्यपीयततमामाकण्ठमुत्कण्ठितैः
सूरैः स्मेरमुखाम्बुजन्मनि शरच्चन्द्रे चकोरैरिव ॥ १२५ ॥

हे नृपते हे नरनाथ, जगति ते पुरुषा धन्याः कृतपुण्याः पुण्यवन्तः। पुनस्तेषां पुरुषाणां जीवितं प्राणितव्यं फलेग्रहि सफलमभूत्संजातम्। पुनस्तैरेव मानवैः स्वजनुषः निजावतरस्य फलं सार्थकभावः प्रापे लब्धम्। च पुनस्ते नानुषाः पुण्यात्मनां पवित्रात्मनाम्। सुकृतवतामित्यर्थः। मध्ये प्रथमतः आदितो गण्याः पुण्यवन्तो जनास्थानादौ संस्थाप्य गणनीयाः संख्यागोचरीकर्तव्याः। ते के। यैरुत्कण्ठा औत्सुक्यं जातं येषां ते उत्कण्ठितास्तैरुत्कण्ठितैः सद्भिः सूरेर्हीरविजययतिराजस्य स्मेरं विकसितं वदनाम्बुजं तस्मिन्विषये लावण्यं सौन्दर्यमेव सुधाम् आकण्ठं कण्ठमर्यादीकृत्य नितरां ... ता आस्वादिता। कैरिव। चकोरैरिव। यथा शरच्चन्द्रे ... ज्योत्स्नाप्रियैः पीयूषं पीयते ॥

ततः क्षोणिशक्राशय तौ बुभुत्सू स्म युङ्क्तः स्ववक्राम्बुजे वाग्विलासैः ।
सरित्प्रेयसश्चेतसस्तादृशाना पुनः केन येन प्रतीयेत पारः ॥ ७ ॥

ततः साहिना दृष्टिसंभावनानन्तर तौ सूरी वाग्विलासैर्वचनवैचित्रीभि स्ववक्राम्बुजे निजवदनकमले युङ्क्तः योजयत. स्मेत्यर्थ । किं कर्तुमिच्छू । बुभुत्सू बोद्धुमिच्छू ज्ञातु काङ्क्षन्तौ । कम् । क्षोणिशक्रस्य साहेराशय मनोभिप्रायम् । येन कारणेन सरित्प्रेयस समुद्रस्य पुनस्तादृशाना गम्भीराशयाना महात्मना चेतसो हृदयस्य च पार परतीर पूर्णाशयभाव केन पुना प्रतीयेत ज्ञायते । अपि तु न केनाप्यवबुध्यते ॥

हरिर्वा कृतान्तः प्रचेता. कुबेरः किमु त्वद्दिगम्भोजदृग्रक्षकेषु ।
यदेतेषु केनापि कृत्यं भवेत्तत्प्रगल्भीभवावस्तदाज्ञाविधासु ॥ ८ ॥

हे ईश, हरिरिन्द्र , तथा कृतान्तो यम', तथा प्रचेता वरुण , तथा कुबेरो वैश्रवण', एतेषु चतुर्षु मध्ये चेद्यदि ते तव एकेनाप्यन्यतमेन कृत्य कार्य भवेत्स्यात्। उत्प्रेक्ष्यते—त्वद्दिगम्भोजदृशा तव पूर्वादक्षिणापश्चिमोत्तरालक्षणाना नाम्ना दिङ्मृगाक्षीणा रक्षकेषु किमु रक्षाकारकेष्विव सौविदल्लेष्विव । यतो हरिर्वानर , कृतान्त काल अथवा कृतस्योपकारस्यान्तोऽवसान यस्मिन् स कृत किमपि न वेत्ति कृतघ्न , तथा प्रचेता सुमना राजपत्नी जननी मनुते । तथा कुत्सितशरीर', एवविधानामवरोधरक्षण युक्तमेवेति । त्वदन्त.पुररक्षकेषु तर्हि तदाज्ञाविधासु तेषामिन्द्रादीनां चतुर्णा लोकपालानां प्राकारणप्रकारेषु प्रगल्भीभवाव उद्यम कुर्वे । तमाकारयाव इत्यर्थ. ॥

त्रिलोक्या इवाधीशितुर्भूमिभर्तर्भवत्तो भवेत्कोऽपि वैमुख्यभाग्यः ।
पुरस्तादुदेष्यन्त्यजानन्वनाङ्क्ष्वनन्तानि दुःखानि खानि' स्मयानाम् ॥९॥

हे भूमिभर्त. हे धरणीरमणीरमण, य. कोऽपि विपक्षादिको भवत्तस्त्वत्त सकाशात् वैमुख्यभाक् पराङ्मुखताभाजी भवेत् । कस्मादिव । त्रिलोक्यास्त्रिभुवनस्य अधीशितु स्वामिन. परमेश्वरादिव । यथा कोऽपि पापात्मा परमेष्ठिन पराङ्मुखो भवति । किं कुर्वन् । अजानन् अविदन् । कानि । वनाङ्केषु काननाना क्रोडेषु मध्येषु पुरस्तादग्रे उदेष्यन्ति प्रकटीभविष्यन्ति उत्पत्स्यमानानि अनन्तान्यपाराणि न विद्यतेऽन्तोऽवसान येषा तादृशानि दु खानि । य किंभूत । स्मयानामहंकाराणा खानिराकर स्थानम् । अथ च भगवत पराङ्मुखोऽपि पाप्मा अनादिकालानामात्मीन शैवशासनमिति गर्वावेशवशवदो दुर्बुद्धिर्वनाङ्केषु सूक्ष्मबदरसाधारणप्रत्येकवनस्पतिकायादिमध्येषु पुरस्तादागामिससारपरम्परासु प्रादुर्भवष्यन्ति उपत्स्यमानानि अनन्तानि अनन्तकालवेद्यानि दुःखानि छेदनभेदनाद्यनेकवेदना न जानीते । मिथ्यामतमूढीभूतत्वा.न वेत्तीत्यर्थ ॥

असंख्येषु संख्येषु विद्वेषिलक्षाविलक्ष्यीकृतेर्बिभ्रदुत्सेकभावम् ।
विधित्सुर्मृध भूधवौद्धत्यभाग्यस्त्वया पूर्वदेवेशवत्केशवेन ॥ १० ॥

[illegible] ॥ १२८ ॥

[illegible] इति हीरविजयसूरिगुणवर्णनम् ॥

अवनिरजनिजानिः प्रेमरोमाञ्चिताङ्गो
निगदितमिति तेषां कर्णयोः प्रणीय ।
रणरणकितचेता जायते स्म व्रतीन्द्रोः
क्रतुभुज इव सिद्धेर्दायिनो दर्शनाय ॥ १२९ ॥

अवनिः क्षोणी तस्याः । रजनी रात्रिर्जाया यस्य । 'जायाया निङ् [illegible]' इति । रजनिजानिश्चन्द्रः अकब्बरपातिसाहिः व्रतीन्दोः सूरीश्वरस्य दर्शनाय विलोकनार्थं रणरणकमौत्सुक्यं जातं यस्मिन्रणरणकितं चेतो मनो यस्य तादृशो जायते स्म बभूव । किंभूतः । प्रेम्णा स्नेहेन रोमाञ्चेन पुलकेन च युक्तमङ्गं यस्य । कस्येव । क्रतुभुज इव । यथा कश्चित्सिद्धेरभिलषितस्य दायिनो दानशीलस्य दर्शनाय उत्कण्ठमना भवेत् । किं कृत्वा । इति पूर्वोक्तप्रकारेण तेषां सभ्यानां निगदितं भाषितं सूरिस्तुतिरूपं वचः कर्णयोः पेयं पातुं योग्यं श्रवणार्हं प्रणीय कृत्वा ॥

अवनिवलयवासवो वशीन्दोर्जगदतिशायिगुणैकतानचेताः ।
वसुपुरुषमिवात्मदिष्टदिष्टं स्वसविधमेनमुपानिनीपुरासीत् ॥ १३० ॥

अवनिवलयवासवो भूमण्डलाखण्डलः एनं सूरिं स्वसविधं निजसमीपमुपानिनीपुः उपनेतुमिच्छुः आसीत् । किंभूतः । जगन्ति त्रीणि भुवनान्यतिशेरते अतिक्रामन्ति इत्येवंशीला ये गुणास्तेषु एकतानं लयानुगमेकाग्रं चेतो मानसं यस्य सः । कमिव । वसुपुरुषमिव । यथा आत्मनो निजस्य दिष्टेन भाग्येन दिष्टं दत्तं स्वर्णनरं स्वसमीपमानयति ॥

यं प्रासूत शिवाह्वसाधुमघवा सौभाग्यदेवी पुनः
पुत्रं कोविदसिंहसीहविमलान्तेवासिनामग्रिमम् ।
संजातो दशमोऽत्र देवविमलव्यावर्णिते हीरयु-
क्सौभाग्याभिधहीरसूरिचरिते सर्गो रसैरुज्ज्वलः ॥ १३१ ॥

[illegible] ॥

घनैरगुरुधूपितैश्च [illegible] कौसुमसौरभैश्च ।

भजन्तेऽनुकूला [illegible] दिगीशाः [illegible] ॥१४॥

हे मुने, [illegible]

[illegible] ॥

[illegible]

[illegible] ॥ १५ ॥

हे [illegible]

[illegible]

[illegible]

पुरे [illegible]

[illegible] ॥ १६ ॥

हे [illegible]

[illegible]

यामिन्यां कालिका सर्वान् सत्त्वान्कुक्षिगतान्करिष्यति तद्वदाचरितानामशेषीकृताशेषद्विपः संख्यातिगा वीराः सुभटा यस्य तम् । इति किम् । यदस्लाक स्वामी वुलोकादेभवनात्स्वर्गात्स्वर्गिवर्गैर्देववृन्दैः सम विपक्षान्वैरिण एव तद्रूपान्वा क्ष्माभृतः भोगीपालान्पर्वतांश्च हन्तुं व्यापादयितुमुच्छेत्तुं क्षितौ पृथिव्यामेत आगत. आखण्डल शक्र इवास्ते ॥

हताराति‍सारङ्गदृक्कज्जलाङ्कस्रवद्बाष्पभानूद्भवावारिपूरे ।
अभिष्टौति लीलामरालायमानं यशो यत्प्रभोर्वैरभाजा समाजे ॥ ४ ॥

यद्दूतयुग्म वैरभाजा विद्वेषिणा समाजे सभाया हता स्वस्वामिना सनमाहवे व्यापादिता ये अरातयः विपक्षक्षोणीन्द्रा तेषा सारङ्गदृशो मृगलोचना पियतनान्नां दृग्भ्यो नयनेभ्यः कज्जलमञ्जनमङ्के क्रोडे अर्थान्मध्ये मिश्रीभूतत्वाद्येषा तादृशा स्रवन्तो गलन्तो निरन्तरनिष्पतन्तो बाष्पा अम्बु(श्रु)धारास्त एव भानूद्भवा सूर्यसुता यमुना तस्या वारिपुरे पय प्रवाहे लीलामरालायमान क्रीडालसराजहस इवाचरत् प्रभोः स्वामिनो यशः श्लोकमभिष्टौति वर्णयति ॥

वचोवैदुषीमेतदीयामधृष्यां निरूप्य प्रतीपैः क्षितीशैः प्रणेशे ।
यदुर्वीविभोरागमात्प्राग्गभस्तेरिवानूरुरोचिस्तमिस्रप्रसारैः ॥ ५ ॥

एतदीया दूतयुग्मसवन्धिनीमधृष्यामनाकलनीया प्रतिपक्षपक्षलक्षखान्तक्षोभकारी वचोवैदुर्षी वचनचातुरी निरूप्य प्रेक्ष्यार्थादवधार्य यदुर्वीविभो यस्माकन्नरस्यागमादभिषेणनैरागमात्प्राक् पूर्वमेव प्रतीपैर्विरोधिभि क्षितीशैर्भूपालै प्रणेशे प्रणष्टं तम् । कैरिव । तमिस्रप्रसारैरिव । यथा गभस्तेर्भानो आगमादुदयात्पूर्वमनूरोररुणप्रभा विभाव्य । ध्वान्तविस्तारै प्रणश्यते ॥ आदितश्चतुर्भि. कुलकम् । [illegible] दूतस्वभावः ॥

चिरं जीव नन्देति दूतौ निगद्याधिपं नेमतुर्मूर्ध्नि पाणी प्रणीय ।
पुनस्तौ सुधासाधिमानं दधत्या संभावयामास वाचेन दृष्ट्या ॥ ६ ॥

हे प्रभो, त्व चिर बहुकाल [illegible] जीव [illegible] तथा नन्द पुरंदरवत्[illegible]समृद्धिमान् भव । इत्यमुना प्रकारेण [illegible] दृष्टिन्वा । तथा मूर्ध्नि मस्तके पाणी स्वहस्तौ प्रणीय संयोज्य । [illegible] ता [illegible] [illegible] अधिप स्वामिन नेमतु प्रणमत [illegible] । पुन. [illegible] दूतौ प्रति [illegible] पीयूषेन [illegible] [illegible] [illegible] [illegible] इति [illegible] ॥

सम्यक् शिरस्यारोपणपूर्वमादाय गृहीत्वा। उत्प्रेक्ष्यते—अनूनां सपूर्णा तनू शरीरमुद्वहन् बिभ्राणः। तथा यतीन्द्र सूरिराज प्रति प्रसर्पन् गच्छन्। एतदीयोऽकब्बरसाहिसंबन्धी अभिलाषः कामः मनोरथ इव॥

प्रबुद्धैरबोधीति नोत्तालफालं चलद्वीक्ष्य जङ्घालदूतद्वयं तत्।
रयस्फूर्तिरस्थैर्यभाजां मनोभिस्ततस्तेन तेभ्योऽथ वाधीयते स्म॥२१॥

उत्ताला अतित्वरिता फाला गगनगामीनि उछलनरूपा गतिविशेषा यस्य तादृश तत्साहिसंबन्धि साहिप्रेषित वा जङ्घालमतिवेगवद्गतिक दूतद्वय संदेशहारकयामल चलत्पथि प्रसर्पत् वीक्ष्य विलोक्य प्रबुद्धैर्विद्वद्भिरेतन्नाबोधि न ज्ञातम् न मनस्यवधारितम्। इति किम्। न स्थैर्यं स्थिरता भजन्ते इत्यस्थैर्यभाज चपलाशयास्तेषा मनोभिश्चित्तैस्तस्माद्दूतयुग्मात्किमिति उत्प्रेक्षाया विचारणाया वा। रयदाना गतिवेगानाम्। 'रयो रहस्तरः स्यद.' इति हैम्याम्। तथा 'स्यदझाङ्कारितपत्रपद्धति' इति नैषधे। स्फूर्तिरतित्वरितता अधीयते स्म पठिता। अथ वा तेन दूतद्वन्द्वेन तेभ्यो मनोभ्योऽधीयते स्म शिक्ष्यते स्म किम्। इति सशयोत्प्रेक्षा॥

क्रमाभ्यामतिक्रम्य संदेशहारिद्विकं ग्रामकुल्याचलारामसीमाः।
मुदाहम्मदावादमागात्क्रमात्तत्सहाध्यायि किं रहसा मारुतानाम्॥ २२॥

क्रमादनुक्रमत स्वादेशपरदेशप्रचलनपरिपाट्या तत्साहिसंबन्धि संदेशहारिद्विक दूतद्वय मुदा हर्षोत्कर्षेण अहम्मदावादमागादकमिपुरमाजगाम। 'मा गास्त्व खेदमन्दिरम्', तथा 'अरे त्व साध्वस मागा' इति सारस्वतव्याकरणादौ। ग्रामा सवयथास्तोकचातुर्यादिगुणा ग्रामा लघुपुराणि वा उपलक्षणान्नगरपुरपत्तनादीन्यपि, तथा कुल्या लघुमहद्वादिन्य., अचला पर्वता, आरामाः उद्यानानि उपलक्षणाद्वनगहनारण्यादीन्यपि, सीमा ग्रामनगरादीना क्षेत्रभूमयो देशावसानभुवो वा, ता क्रमाभ्या स्वपदाभ्या न तु यानैरतिक्रम्योल्लङ्घ्य। उत्प्रेक्ष्यते—दूतद्वन्द्व मारुताना पवनाना रंहसा वेगाना सह सार्धमध्येतीत्येवशील सहाध्यायि एकगुरुसमीपेऽधीतिकृत्किम्। चेनेन तुल्यत्वादिचगुत्प्रेक्षा॥ इत्यकमिपुरे दूतगमनम्॥

रणे वैरिणा पार्थिवा येन देहा हताः पेतुरुर्वीमिवाम्वा मिलन्ति।
ययौ तत्पुराधीशितुः संनिधाने द्वयं दूतयोर्मुद्गलक्षोणिभर्तुः॥ २३॥

दूतयोः शासनहारिणोर्द्वय युगल तस्याहम्मदावादनाम्न. पुरस्य नगरस्याधीशितु स्वामिन मुद्गलाना काबिलमण्डलजन्मना यवनजातिविशेषाणा क्षोणिभर्तुर्नृपस्य संनिधाने समीपे ययौ। तस्य कस्य। येन साहिवखानेन रणे समराङ्गणे वैरिणा शत्रूणा पृथिवीपरमाणुनिरारब्धाः पृथिवीविभागा पृथिवीसंबन्धिन। 'पार्थिव हि निजमाजिषु वीरा गौरवाद्गुरुपास्य भजन्ते' इति नैषधे। देहाः शरीराणि हताः क-

यामिन्यां कालिका सर्वान् सत्त्वान्कुक्षिगतान्करिष्यति तद्वदाचरितानामशेषीकृता [illegible] द्विषः सङ्ख्यातिगा वीराः सुभटा यस्य तम् । इति किम् । यदस्माकं स्वामी पुलो[illegible] भवनात्स्वर्गात्स्वर्गिवर्गैर्देववृन्दैः समं विपक्षान्वैरिण एव तद्रूपान्वा क्ष्माभृतः [illegible] पालान्पर्वतांश्च हन्तुं व्यापादयितुमुच्छेत्तु क्षितौ पृथिव्यामेत आगतः [illegible] शक्र इवास्ते ॥

हतारातिसारङ्गदृक्कज्जलाङ्कस्रवद्बाष्पभानूद्भवावारिपूरे ।
अभिष्टौति लीलामरालायमानं यशो यत्प्रभोर्वैरभाजां समाजे ॥ ३ ॥

यद्दूतयुग्मं वैरभाजां विद्वेषिणां समाजे सभायां हता[illegible] [illegible] व्यापादिता ये अरातयः विपक्षक्षोणीन्द्राः तेषां सारङ्गदृशो मृगलोचनाः [illegible] दृग्भ्यो नयनेभ्यः कज्जलमञ्जनमङ्के क्रोडे अर्थान्मध्ये मिश्रीभूतत्वाद्येषां तानि [illegible] गलन्तो निरन्तरनिष्पतन्तो बाष्पा अम्बु(श्रु)धारास्त एव भानूद्भवा सुत[illegible] तस्या वारिपूरे पयःप्रवाहे लीलामरालायमानं क्रीडालसराजहंस इवाचरत् प्रभो [illegible] यशः श्लोकमभिष्टौति वर्णयति ॥

वचोवैदुषीमेतदीयामधृष्या निरूप्य प्रतीपैः क्षितीशैः प्रणेशे ।
यदुर्वीविभोरागमात्प्रागभस्तेरिवानूरुरोचिस्तमिस्रप्रसारैः ॥ ४ ॥

एतदीया दूतयुग्मसम्बन्धिनीम [illegible] प्रतिप[illegible] वचोवैदुषीं वचनचातुरीं निरूप्य [illegible] यदुर्वीविभो [illegible] [illegible] पूर्वमेव प्रतीपैः [illegible] क्षितीशैर्भूपालैः [illegible] [illegible] तमिस्रप्रसारैः [illegible] [illegible] [illegible] प्रणश्यते ॥ [illegible] [illegible]नः ॥

चिरं जीव नन्देति दूतौ निगद्याचिरं [illegible]

पुनस्तौ [illegible] ॥ ५ ॥

[illegible]

किंभूतः । वव्वरनामा उर्वीशो मुद्गलेन्द्रस्तस्य वशे गोत्रे भवः वश्य । अहमेवं शङ्के उत्प्रेक्षे । येनाकब्बरसाहिना चण्डेन प्रबलेन प्रतिभटोद्भटभूनीमहेन्द्रासह्येन दोर्दण्डयो-र्भुजपरिघयोर्वीर्येण पराक्रमेण जिताः परिभूता सन्त दिगीशाश्चत्वारोऽष्टौ दश वा दिगीशा दिक्पाला दिशा हरितामन्तेष्ववसानेषु न्यवात्सुरिव निवसन्ति स्म किमु शङ्के इवार्थे ॥

चतुर्वार्धिसंवर्तकीभूततेजस्ततेः सन्ति जैवात्रिकास्तस्य पुत्रा । महीचारिणः पूषविद्वेषिगोत्रद्विपयक्षराजाङ्गजाता इवैते ॥ २८ ॥

हे दूतौ, चतुर्षु प्राच्यप्रतीच्यापाच्योदीच्यलक्षणेषु वार्धिषु समुद्रेषु संवर्तकीभूता वडवानलभाव प्राप्ता तेजसा प्रतापाना ततिर्मण्डली यस्य तस्य साहेः पुत्राः शेखजी–पाहडी–दानिया–इत्यभिधानास्त्रयोऽपि नन्दना जैवात्रिका दीर्घायुप सन्ति । उत्प्रेक्ष्यते—महीचारिण क्षोण्या कौतूहलेन सचरणशीला पूषविद्वेषी ईश्वरो गोत्रद्विप-न्पर्वतरिपुरिन्द्रो यक्षराजो धनदस्तेषा क्रमेणाङ्गजाताः । स्वामिकार्तिक–जयन्त–नल-कूबर–नामानस्तनुजा इव ॥

अये स्वस्तिमन्त्यो नृपाम्भोजनेत्रा उपेता इव क्ष्मां हरेरिन्दुवक्त्राः । परीवार आस्ते शिवः सोऽपि येनावनीन्दोर्मनो ज्ञानिनेवान्वगामि ॥२९॥

अये दूतौ, नृपाम्भोजनेत्रा अकब्बरसाहे. कमललोचना स्त्रिय स्वस्तिमन्त्यः कुशलिन्य. वर्तन्ते । उत्प्रेक्ष्यते—क्ष्मा महीमुपेताः समागता. हरे शचीकान्तस्य जयवा-हिनीवल्लभस्य वासवस्य इन्दुवक्त्रा कान्ताः प्रिया इव । अपि पुनरवनीन्दोर्भूनीतनीरमणस्य राज्ञः स परपक्षविजयित्वेन ख्यात परिवारः स्वजनादिपरिजन. शिवो निरुपद्रवो व-र्तते । स कः । येन परीवारेण ज्ञानिना ज्ञानवतेव ज्ञानाभिप्रायेणेवावनीन्दोः पातिसा-हेर्मनो मानसमन्वगामि । इङ्गिताकारज्ञातृत्वेन मनसोऽभिलषितमेव विधीयते इत्यनु-गम्यते । 'अये कियदावदुपैपि दूरम्' इति नैषधे ॥

अनीकं शुभं भूभुजो येन जज्ञे युगान्तान्धकद्वेषिणेवारिचक्रे । प्रजा आसते प्रीतिभाजः प्रजावन्मुदा प्रश्नयामास तावित्यधीश ॥३०॥

हे दूतौ, भूभुज. अकब्बरसाहेः तद्विजित्वरतया सर्वत्र प्रसिद्धमनीक वाजिवारण-रथपदातिरूप चतुरङ्गकटक शुभ कल्याणकलित वर्तते । तत्किम् । येनानीकेन अरीणा वैरिणा चक्रे वृन्दे सेनाया वा । 'वरूथिनीचमूचक्रम्' इति हैम्याम् । युगान्तस्य कल्पा-न्तकालस्यान्धकनाम्नो दानवस्य द्वेषिणा शत्रुणेव एतावता शम्भुनेव जज्ञे सजातम् । संहारकत्वेन बभूवे इत्यर्थ । 'क्षये जगज्जीवपिव शिव वदन्' इति नैषधे । पुनर्भूभुजः प्रजा प्रकृतयो लोका प्रजावत्सततय इव प्रीतिं प्रमोद स्नेह वा भजन्ते इति प्रीति-भाज. सन्ति । अधीश. अकलिपुरप्रभु इत्यमुना प्रकारेण तौ दूतौ प्रश्नयामास पृच्छति स्म ॥ इति साहिवसानकृतसाहिपरिवारादीना कुशलप्रश्नः ॥

हे भूधन पृथिवीप्रियतम, औद्धत्यवान् उद्धततया उन्मत्तत्वेन वा युक्तः कोऽपि नृपः त्वया भवता साहिना समं मृधं युद्धं विधित्सुः कर्तुमिच्छुर्भवेत्। किंवत्। पूर्वदेवेशवत्। यथा दानवेन्द्रः केशवेन नारायणेन सार्धं संग्रामं विधातुमिच्छति। 'असुरा दितिदनुजाः पातालौकः सुरारयः। पूर्वदेवाः शुक्रशिष्याः' इति हैम्याम्। यः किंभूतः। असंख्येयेषु संख्यातीतेषु अनेकेषु सङ्गेषु संग्रामेषु विद्वेषिणा वैरिणा लक्षाणां शतसहस्राणां विलक्ष्यीकृतेरभिभवनादुत्सेकभावं गर्वावेशवशंवदताम्। 'उपदा विविशुः शश्वन्नोत्सेकाः कोसलेश्वरम्' इति रघौ। बिभ्रद्धान॥

भवच्छिद्रदर्शी भवेद्वा यदन्यः पुरोभागिवद्भागधेयैर्विमुक्तः।
प्रणीयानुकूलीभवन्मानसं तं पदाब्जे प्रभोर्भृङ्गभूयं नयावः॥ ११॥

हे प्रभो स्वामिन्, च पुनर्यद्यदि अन्यः परः कोऽपि वैभववान् पुरोभागिवद्दुर्जनजनदोषदर्शनैकतानदृष्टिरिव भवतस्तव छिद्राणि स्वेन पराभवितुमिच्छया सासूयत्वेन देशादिजिघृक्षया वा अपगुणान्दोषान्पश्यतीत्येवंशीलो भवच्छिद्रदर्शी भवेन्नात. स्यात् किं भागधेयैः सुकृतैर्विमुक्तो भाविराज्यादिभ्रंशात्पुण्यैस्त्यक्तः। तं पूर्वोक्तं सकलमप्यनुकूलीभवत्तव सेवाहेवाकिभावं भवन्मानसं मनो यस्य तादृशं प्रणीय कृत्वा प्रभोः स्वामिनः पदाब्जे चरणकमलाङ्के भृङ्गभूयं भ्रमरीभावं नयावः प्रापयावः॥ त्रिभिर्विशेषकम्॥

तपस्वी सभस्मा श्मशानाश्रयो वा त्रिदण्डी जटी वा मठी रुण्डमाली।
व्रती वाडवो धूमपः सोमपो वा भवेद्येन ते कृत्यमादिश्यतां सः॥ १२॥

हे साहे, तपस्वी तापसः, सह भस्मना भसितोद्धूलितेन वर्तते यः स सभस्मा। योगीत्यर्थः। श्मशाने प्रेतवने आश्रयो यस्य स श्मशानवासी चेटकादिकुमन्त्रसाधकः। तथा त्रिदण्डी त्रयो दण्डा यस्य स कापिलः त्रिशूली वा। तथा जटा भस्मावगुण्ठितकेशकलापः अस्यास्तीति जटी बृहज्जटाधारकः। तथा मठो निवसनस्थानं छात्रपठनशाला वा अस्यास्तीति मठी मठवासी। तथा रुण्डानां विकचनरकपालानां माला हृदये हारोऽस्यास्तीति कपाली। तथा व्रती मौननग्नत्वादिनियमवान् सान्यासिको वा यती वा। तथा वाडवो ब्राह्मणः। धूमं पिबति मन्त्रादिसाधनकृते कष्टक्रियार्थं वा ऊर्ध्वपादाधःशिरा द्रुमशिखासु स्वशरीरलम्बनपूर्वं धूमपानकर्ता। सोमपः अमृतवल्लीरसपायी वा, एतेषु मध्ये येन केनापि ते तव कृत्यं कार्यं स्यात्स आदिश्यतां प्रसाद्यतां कथ्यताम्॥ इति दूतवचनानि॥

निगद्येति विश्रान्तयोरेतयोस्तां गिरं श्रोत्रवर्माध्वनीनां प्रणीय।
अगृह्यन्त वाचः पयोराशिकाञ्चीशचीशेन शङ्के सुधाया वयस्यः॥ १३॥

पयोराशिः समुद्रः काञ्ची मेखला यस्यास्तस्या भूमेः शचीशेन पुरंदरेण वाचो वाण्यः अगृह्यन्त गृहीताः। यथायं इत्यर्थः। तत्र वाक्षु अहमेवं शङ्के वितर्कयामि

कोरा ज्योत्स्नाप्रिया' आकार्यन्ते स्म। अपि पुन' ते भूत्याः क्रमात् स्वस्वामिनिदेशश्रवणप्रणामकरणपरिपाट्या तेपामकमिपुरस्तपापक्षश्राद्धाना सनिकर्षे समीप गताः प्राप्ताः सन्तः प्रभो स्वस्वामिनः सर्वं निदेशमाज्ञा निर्दिशन्ति स्म निवेदयन्ति स्म कथयन्ति स्म॥

समानीयमाना अमीभिर्जनास्तेऽप्यराजन्त मध्येपुरं दानशौण्डाः।
महामात्रवृन्दैर्द्विपेन्द्रा इवोर्वीपतेर्मन्दिरं दानधारा किरन्तः॥ ३५॥

अमीभि. साहिखानभृत्यैर्मध्येपुरमकमिपुरस्य मध्ये। 'पारे मध्ये पष्ठ्या वा समस्यते'। समासश्चाव्ययीभाव। 'गङ्गाया. पारे पारेगङ्गम्। गङ्गायामध्ये मध्येगङ्गम्' इति प्रक्रियाकौमुद्याम्। तद्वन्मध्येपुर सम्यक् समाननादिप्रकारेणास्ते श्राद्धा अपि व्यराजन्त शुशुभिरे। किंभूता। दानशौण्डा. बहुद्रव्यप्रदायिन विश्राणनेन विख्याता वा। 'शौण्डा विख्यातमत्तयो' इत्यनेकार्थ। के इव। द्विपेन्द्रा इव। यथा महामात्राणा हस्तिपकाना 'माहत' इति प्रसिद्धाना वृन्दैराधोरणगणै उर्वीपते राज्ञो मन्दिरे नीयमाना गजराजा विराजन्ते। किं कुर्वन्त। दानधारा मदवारिवृष्टि कुर्वन्त सृजन्त' क्षरन्त'॥

जना जैनपक्षैकदक्षाः क्षितिक्षित्समाजं विशन्ति स्म संभूय सर्वे।
ततस्तेऽप्यनर्घ्योपदापूर्णपाणीन्स्वबन्धूनिवास्थापयत्तानुपान्ते॥ ३६॥

सर्वे समस्ता जनाः जिनाना वीतरागाणामय जैनः स चासौ पक्षश्च। जिनशासनमित्यर्थः। तत्रैकतया अद्वितीयत्वेन दक्षा अतिनिपुणा जना' श्राद्धा' सभूय एकत्र मिलित्वा क्षितिक्षित खानस्य समाज सभा विशन्ति स्म। सभामध्ये ययुरित्यर्थः। ततो जनागमनानन्तर सोऽपि खान अनर्घ्याभि' प्रशस्याभिरुपदाभि. प्राभृतैः पूर्णाः भृता' पाणयो हस्ता येषा तान् जनान् स्वबन्धूनात्मस्वजनानिव उपान्ते स्वसमीपे अस्थापयदुपवेशयति स्म॥

अमी मूलकर्मेव तच्चित्तवृत्तेः पुर' प्राभृतं भूमिभर्तुर्विमुच्य।
अलीकातिथीभूतहस्तेऽरविन्दाः प्रमोदप्रगल्भाः स्म भापन्त इत्थम्॥ ३७॥

अलीके ललाटे अतिथीभूतानि प्राघुणानि जातानि हस्ता एवारविन्दानि पद्मानि येषा कृताञ्जलय इत्यर्थ। अमी श्राद्धा' प्रमोदेन हर्षेण प्रगल्भाः सोत्साहा इत्थमग्रे वक्ष्यमाणमभापन्त प्रोचु.। किं कृत्वा। भूमिभर्तुर्नृपस्य पुरोऽग्रे प्राभृत ढौकितक विमुच्य ढौकयित्वा। उत्प्रेक्ष्यते—तस्य साहिखानस्य चित्तवृत्तेर्मनोव्यापारस्य मूलकर्म कार्मणमिव॥

नृणा शासिता त्वं वय शासनीयाः वय सेवकास्त्व पुन. सेवनीयः।
नियोज्या वय त्वं नियोक्तासि यस्मात्तदादिश्यता कृत्यमस्माकमीश ३८

हे ईश, त्व यस्मात्कारणात् त्व नृणा नराणा शासिता पालयिता असि, पुनर्वयं

नयन् दीपयन्वा। उत्प्रेक्ष्यते—तनूमान् शरीरयष्टिं बिभ्राणः साधुधर्म इव यत्नाचारः किमु। 'धर्मो यमोपमापुण्यस्वभावाचारधन्वसु। सत्सङ्गेऽर्हत्यहिंसादौ न्यायोपनिषदोरपि॥' इति। 'धर्म दानादिके' इत्यनेकार्थः॥

असातस्य लेशोऽपि तेनैकपद्यां यथावाप्यते नात्मना ब्रह्मणीव।
शिवानामिवावासमत्रानयेता भवन्तौ ततः सूरिसारङ्गराजम्॥ १७॥

हे दूतौ, भवन्तौ तथा तेन प्रकारेण ततो गन्धारनगरतस्तं हीरविजयनामानं सूरिष्वाचार्येषु सारङ्गराजं कण्ठीरवमत्र मत्पार्श्वे आनयेताम्। उत्प्रेक्ष्यते—शिवानां सर्वकल्याणानामावासं वासस्थानकमिव। तथा कथं येन प्रकारेण तेन सूरिणा एकपद्यां गन्धारफतेपुरयोरन्तरालमार्गे। 'पदव्येकपदी पद्या पद्धतिर्वर्त्मवर्तनी' इति हैम्याम्। असातस्य दुःखस्य लेशोऽप्यशोऽपि नावाप्यते न लभ्यते। केनेव। आत्मनेव। यथा मुक्तात्मना ब्रह्मणि मोक्षे दुःखांशो न प्राप्यते। 'क्षेत्रज्ञ आत्मा पुरुषः' इति हैम्याम्॥

मदीयानुगः साहिबः खान आस्ते हितैषी पितेवाङ्गिनां गुर्जरेषु।
ददाता युवां तस्य निःशेषवाच्यं दधानं स्फुरन्मानमेतन्मदीयम्॥ १८॥

हे दूतौ, गुर्जरेषु धरित्रीजनपदेषु मध्ये मदीयानुगो मम सेवकः साहिबः साहिबनामा खानः। 'खान' इति नाम यवनजातौ प्रसिद्धम्। सामन्त इत्यर्थः। आस्ते विद्यते। किंभूतः। अङ्गिनां प्राणिनां पितेव जनक इव हितमायतावभीष्टमिच्छत्यभिलपतीत्येवंशीलो हितैषी इष्टाभिलाषुकः। हे दूतौ, एतन्मया भवतोर्हस्ते समर्प्यमाणं मदीयं मम संबन्धि स्फुरन्मानम्। राजलेखमित्यर्थः। 'फरमान' इति यवनभाषया लेखाख्या। तस्य साहिबखानस्य ददातामर्पयताम्। स्फुरन्मानं किं कुर्वाणम्। निःशेषं समस्तमपि वाच्यमुदित(दन्त) मम हृदयहार्दं दधानं धारयत्॥

यदास्तेऽन्य आत्मेव मे देहभेदात्स कर्ता ततः सर्वमस्मद्विधेयम्।
निवृत्ते निगद्येति भूसार्वभौमे परां प्रीतिरन्तर्दधाते स्म दूतौ॥ १९॥

हे दूतौ, तौ अन्तश्चित्ते परां प्रीतिं दधाते स्म दधतुः। कस्मिन्सति। भूसार्वभौमे अकब्बरे इति निगद्य भाषित्वा निवृत्ते विरामे सति। इति किम्। यत्कारणात् स साहिबखानः मम देहस्य शरीरस्य भेदात्पार्थक्यादन्यः अपरः आत्मा जीव इवास्ते विद्यते ततः कारणात्स साहिबखानः सर्वं समस्तमप्यस्मद्विधेयमस्माकीनं कार्यं कर्ता करिष्यति॥ इति दूतयोः साहेः सूरिसमाकारणादेशः॥

ततो दूतयुग्मं क्षमापूपलेखं प्रतस्थे समादाय तत्संनिधानात्।
अनूनां तनूमुद्वहन्नेतदीयाभिलाषः प्रसर्पन्प्रतीव व्रतीन्द्रम्॥ २०॥

ततो भूपालादेशानन्तरं दूतयुग्मं संदेशहारकद्वन्द्वं तस्य साहेः संनिधानात्संनिधेः प्रतस्थे प्रचचाल। किं कृत्वा। क्षमायाः पृथिव्याः पूपा भास्वान् तस्य लेखं स्फुरन्मानं

पाखण्डिसंकल्पानां चहुन्दभ्यात् एव मकरकेतनजयनतो ऽजयत् देव इव देवः. स्फुरन्तान प्रेषितः प्रहितोऽस्ति । किं कुर्वन् । सह मुद्रया मुद्रणेन अनुपानधुरणेन वर्तते यः । मुद्रामुद्र इत्यर्थः । समुद्रः पयोनिधिरपि वारिपूराज्जलप्लवादीति भरं दधत् धारयन् । पुनः किं कुर्वन् । विद्रुमो धवलोऽपि कान्त्या मणिवर्णस्वामिका यन्तः निश्चलकरणम् ॥

अनुनीतसंप्राप्तमङ्गल्यवर्गैर्निजालोकनाविष्कृतातङ्कसर्गैः ।
भविष्यत्यमुष्य व्ययो यत्समाधेः सरस्या इवाकालमेघैः कजानाम् ॥४३॥

त्रियामाविरामा इवाम्भोजबन्धुं यतीन्द्रं ततो यूयमेवानयध्वम् ।
निगद्येति खानेन संमान्य ते स्वान्विसृष्टा निवासान्ययुः प्रीतिमन्तः ॥४४॥

साहिखानेन नाना इति पूर्वोक्तं निगद्य कथयित्वा संमान्य सन्मानं च प्रदाय विसृष्टाः पश्चात्प्रेषिताः अत एव प्रीतिमन्तो हृष्टमानसाः सन्तः स्वान्निवासान् ययुर्जग्मुः । निजनिकेतनस्थानेषु गता इत्यर्थः । इति किम् । हे हीरसूरिभक्तजनाः, ततः कारणात् यूयमेव भवन्त एव यतीन्द्रं सूरिमानयध्वम् । गन्धारनगरादकब्बरपुरे आकारयत । के इव । त्रियामाविरामा इव । यथा विभावरीणां विरामा दिवसावसानसमया अम्भोजबन्धुं भास्करमत्र जीवलोके रोदसीदरे वा आनयन्ति । ततः कुतः । यतः कारणात् निजानामात्मनामालोकनान्मुहुरुज्जातित्वेन भीमाशयत्वाद्दर्शनादेवाविष्कृतः प्रकटभावं प्रापितः आतङ्को भयं तस्य सर्गः सृष्टिर्येस्तादृशैरनुनीतैरपिताकितैरज्ञातपूर्वैः संप्राप्तैरागतैः हीरसूरिसमीपे समागतैर्मङ्गल्यवर्गैस्तैः सेवकगणैरमुष्य हीरविजयसूरेः समाधेर्ध्यानस्य चित्तस्वास्थ्यस्य वा व्ययो व्यपगमः क्षयो भविष्यति । केषामिव । कजानामिव । यथा सरस्या महत्सरसः कजस्य कमलस्य । जातिवाचित्वादेकवचनम् । सर्वजातीयाम्भोजवनस्य अकालमेघैरसमयसंप्राप्तपयोधरैर्व्ययो भवति । 'ववर्षमुराणपयसाना सेहे मधुमदन सः । वातातपनिपाख्जानानकालजलदोदय ॥' इति रघुवंशे ॥ इति राजनगरश्राद्धानामानन्दततहीरविजयसूरीश्वराकारणादेशः ॥

विचिन्त्यात्मचित्ते तदादेशमर्हन्मतस्योदयस्वर्द्रुमस्येव बीजम् ।
तपापक्षमुख्याखिलश्राद्धलोका मिलित्वा मिथः प्रोचुरानन्दसान्द्राः ॥४५॥

तपा इति नाम यस्य तादृग्गणस्य गच्छस्य पक्षः स्वीकारो येषां ते तपापक्षाः । 'अपक्षपातेन परीक्ष्यमाणः पक्षः' इत्यनेकार्थवृत्तौ । तेषु मुख्याः श्रेष्ठाः अखिलाः समग्राः श्राद्धलोकाः श्रावकजना मिलित्वा एकत्र संभूय मिथः परस्परमानन्देन सान्द्रा व्याप्ताः प्रोचुः कथयन्ति स्म । किं कृत्वा । आत्मचित्ते निजमनसि तदादेशं साहिप्रज्ञानामर्हन्मतस्य जिनशासनस्य च उदयः स एव स्वर्द्रुमः कल्पवृक्षः तस्य बीजं निदानमुत्पत्तिकारणमिति विचिन्त्यालोच्य ॥

इतः शासनं शासितुर्नः प्रजानामितो वन्दनीया विशोर्वन्द्यपादाः ।
इदं सौरभारोपणं जातरूपे निरेखे पयःपूर्तिरप्याविरासीत् ॥ ४६ ॥

खालैर्व्यापादिताः सन्तः पेतुः । क्षितौ पतन्तीत्यर्थः । उत्प्रेक्ष्यते—उ[illegible] मातरं मिलन्तीव पृथिव्युत्पन्नत्वेन स्नेहात् ॥

सुवर्णश्रियाद्वैतयालंकृतायाः सुधास्पन्दिवाग्वैदुषीभूषितायाः ।
कुमार्या इव क्ष्मापतेः पत्रिकाया असौ तेन पाणिग्रहः कार्यते स्म ॥ २५ ॥

तेन दूतद्वन्द्वेन असौ साहिबखानः क्ष्मापतेर्भूमीभर्तुः कुमार्याः कन्याया [illegible] रकब्बरसाहेः पत्रिकायाः स्फुरन्मानस्य पाणिना हस्तेन ग्रहणमादानं [illegible] पाणिग्रहणं परिणयनं च कार्यते स्म निर्माप्यते स्म । पाणौ ग्राहितेत्यर्थः । [illegible] पत्रिकायाः कुमार्याश्च । अद्वैतया अनन्यसामान्यया सुशोभनाना [illegible] हेम्नश्च श्रिया लक्ष्म्या सुवर्णतुल्यया वा श्रिया अलंकृताया भूषितायाः । सु[illegible] तायाः । सुधाममृतं स्यन्दते क्षरतीति प्रस्रवतीत्येवंशीला या वाग्वैदुषी [illegible] तया भूषितायाः ॥

ततः कोशवन्मुमहेन्द्रस्य मुद्रां प्रमोदादुपादाय लेखं दधानम् ।
विमुद्राक्षराण्यक्षिलक्षाणि कुर्वन्निवेदाशयं तस्य निःशेषमेषः ॥ २६ ॥

ततो लेखादानानन्तरमेषः साहिबखान तस्य स्फुरन्मानस्य [illegible] निवेदयति स्म । किं कुर्वन् । विमुद्र [illegible] लोचनगोचरान् कुर्वन् । किं कृत्वा । [illegible] 'तसलीम' इति यवनप्रसिद्धेन नाम्ना प्रणामपूर्वं [illegible] । किं कुर्वाणं लेखम् । भूमहेन्द्रस्य [illegible] मुद्रा [illegible] दधानम् ॥ इति साहिस्फुरन्मानव्यापार [illegible] ॥

[illegible]

केर्विविधतीर्थयात्राविधायकैर्जनैः लोकमानैरल्पप्रमाणैः [illegible] श्रीशत्रुंजयशैलस्य सन्निधाने गम्यते । किंभूत [illegible] । [illegible] विवाहे पाणिग्रहणकरणे उत्सुकीभूतमुत्कण्ठितं चित्तं मनो येषां [illegible] ॥ इति [illegible] श्राद्धानां गमनम् ॥

स्फुरद्बाहुशाखः सपाणिप्रवालः प्रवर्द्धश्रियं बिभ्रदभ्रान्तशोभाम् ।
नखानूनसूनार्चिरुद्यन्मरन्दो नगनागरीनेत्रविभ्राजिभृङ्गः ॥ ९१ ॥
द्विजोद्भासितः सिद्धिसस्यैकधारी भवश्रीगतिम्लानिताशुनापापहारी ।
शिवाध्वन्यसंसेव्यमानो न्यभालि यतीन्द्रोऽध्वशाखी स [illegible] पौरपान्थैः ॥ ९२ ॥

तेरकसिपुरसत्कैः तत्रागतैर्वा पौरैर्नागरैरेव पान्थैः [illegible] ख्यातो हीरविजयनामा यतीन्द्रः सूरिरेव [illegible] किंभूतः । स्फुरद्बाहुर्भुजैव शाखा यस्य । पुनः किंभूतः । [illegible] य । पुनः किं कुर्वन् । प्रवर्द्धां प्रकृष्टामेव [illegible] परीवारे कल्पे इत्यनेकार्थः । श्रियं शोभां बिभ्रत् । पुनः [illegible] अभ्रान्तेन [illegible] शोभते इत्येवंशील [illegible] अवसानत्वेन [illegible] शीलः । पुनः [illegible] णानि सूनानि कुसुमानि [illegible] भवन्मरन्दो मधु यत्र । पुनः किंभूतः । [illegible] न्तीनां नागरीणां [illegible] भृङ्गा भ्रमरा यत्र । पुनः किंभूतः । [illegible] किंभूतः । सिद्धिमुक्तिरेव [illegible]

[illegible]

स्थितोऽद्रिः सुराणामिवाक्रम्य सर्वा दिशः साहिगस्ते प्रभो पर्वतायुः।
सुताः शक्तिभेदा इव स्फूर्तिमन्तः सुखिन्यः सुमुख्योऽपि किं राजलक्ष्म्यः ३१
कुले धैर्यभाजामिवाधीश साहेः परीवारतन्त्रे अनातङ्किनी स्तः।
महानन्दयुक्ताश्च मुक्तात्मवत्तत्प्रजा इत्यमुं तद्द्वयं प्रत्यवोचत् ॥ ३२ ॥

तद्द्वय दूतयुग्मम् अमु साहिवखान प्रति इत्यमुना प्रकारेण प्रत्यवोचत् प्रतिभाषते स्म। प्रत्युत्तर प्रददावित्यर्थः। हे प्रभो हे साहिवखान, साहिरकब्बर पर्वतवद्गिरिरिव दीर्घमायुर्यस्य तादृगास्ते। किलक्षण । सुराणामद्रिर्मेरुरिव सर्वा समन्ता अपि दिश आक्रम्य स्वीकृत्य स्थित । पुन सुताः साहिपुत्राः प्रभुत्वोत्साहमन्त्रलक्षणाना तिसृणा शक्तीना भेदा इव स्फूर्तिमन्त प्रोर्जस्वला. सन्ति। अपि पुनः सुमुख्य साहिगृहिण्यः सुखिन्यः शर्मशालिन्य. सन्ति। उत्प्रेक्ष्यते—सुमुख्यो राजलक्ष्म्य इव। प्रबलप्रतिभटाभावात् राजलक्ष्म्यः सुखिन्यो भवेयुः। हे अधीश हे स्वामिन्, साहे परीवारतन्त्रे परिच्छदसैन्ये। 'कटक ध्वजिनी तन्त्रम्' इति हैम्याम्। अनातङ्किनी नीरोगे समाधिशालिनी। के इव। कुले इव। यथा धैर्यभाजां धीरतावारिणा सत्त्ववताम्। महावीराणामित्यर्थः। गोत्रे वशौ अनातङ्किनी निर्भये भवत। 'रोगो रुजा रुगान्तङ्कः,' तथा 'भय भीर्भीतिरातङ्क' इति द्वयमपि हैम्याम्। च पुनस्तस्य साहे प्रजाः पौरजानपदाश्च लोका महानन्देन परमाह्लादेन युक्ता. सहिता वर्तन्ते। किंवत्। मुक्तात्मवत्। यथा संसारनिर्मुक्तात्मानः सिद्धाः महानन्देन मोक्षेण सहिता भवन्ति॥ इति दूतप्रोक्तसाहिप्रमुखकुशलोक्तिः॥ युग्मम्॥

निपीयेति तद्वाग्विलासामृतं स ह्रदं दन्तिवत्प्रीतिमन्तर्जगाहे।
अवेत्य प्रसत्तिं पुनः पातिसाहेरवैति स्म संप्राप्तसर्वस्ववत्स्वम् ॥ ३३ ॥

स साहिवखान इति पूर्वोक्तप्रकारेण तयोर्दूतयोर्वाग्विलासो वचनचातुरी स एवामृतं सुधा निपीय सादर श्रवणगोचरीकृत्य अन्तश्चित्ते प्रीतिं मोद जगाहे प्राप्नोति स्म। किंवत्। दन्तिवत्। यथा हस्ती अमृत पानीय नितरा पीत्वा ह्रद द्रहमवगाहते। पुनरपरार्थकथने। खान पातिसाहेरकब्बरधराधिराजस्य प्रसत्तिं स्वस्मिन्विषये प्रसादं सन्तुष्टिपुष्टिमवेत्य हृद्गोचरीकृत्य स्वमात्मान सप्राप्त हस्ते अधिगत सर्वस्व नि शेषभूमण्डलमध्यवर्तिद्रव्यम् उपलक्षणात् राज्यादिग्रह सर्वपदार्थसार्थो वा येन। तद्वदवैति स्म जानाति स्म बुबुधे॥

अथाकारिता. श्रावकास्तेन भृत्यैश्चकोरा इव श्वेतभासा मयूखैः।
क्रमात्तेऽपि तेषा गताः संनिकर्षं निदेशं प्रभोर्निर्दिशन्ति स्म सर्वम् ॥ ३४ ॥

अथ दूतवचनानन्तर तेन साहिवखानेन भृत्यैः स्वसेवकैः श्रावका अकब्बरपुरस्थाः श्राद्धा आकारिता आहूताः। केनेव। श्वेतभासेव। यथा चन्द्रमसा मयूखैः स्वकिरणैः

पक्षाः परीवाराः सहाया वा मित्राणि वा पक्षतयश्छन्दाश्च येषां तादृशान् सृजन् कुर्वन् । पक्षतिशब्देन पक्षा अप्युच्यन्ते । यथा नैषधे—'दिवमद्राद्भराद्रिरागता चनरत्नकपाटपक्षति' इति । किं कुर्वन् । अनिशं निरन्तरं रत्नगर्भा भूमिरेवावरोधोऽन्तःपुरं तत्र कीर्तय एव दाराः पत्न्यस्तान् वासयन् स्थापयन् निवासं कारयन् । किंभूतान् कीर्तिदारान् । सखीभूता वयस्यो जाताः दिङ्मुखेव आशावशा दिगङ्गना येषां तान् । पुनः किंभूतान् । सौविदल्लीकृता अन्तःपुररक्षकाः कृताः कञ्चुकिभावं प्रापिताः । कञ्चुकिनो हि पुरुषा नृपाणामवरोधरक्षाविधायिनः स्युरिति प्रसिद्धिः । आदार्यं दानशौण्डता । अतिदातृत्वमित्यर्थः । धैर्यं देवदानवमानवादिभिरचालनीयसत्त्वं वीरता आर्द्रा येषां तादृशा भास्वन्तो भुवनेषु स्फूर्तिमन्तः जगच्चेतश्चमत्कारकारिणो वा गुणानामोघाः समूहा येषु येषां वा । किंभूता रत्नगर्भा । चत्वारः प्राच्यप्रतीच्यापाच्योदीच्यलक्षणाश्चतुःसंख्याका ये वीचिमन्तः कल्लोलमालिनः समुद्रा एव खातिका परिखा यत्र । अत्र गर्भितोत्प्रेक्षा ॥ युग्मम् ॥

जगन्मानसानामिवाकृष्टिरश्मीन्सुधाधामवद्बिभ्रतः शुभ्रिमाणम् ।
कदाचित्समाकर्ण्य युष्मद्गुणौघान्प्रभून्प्रेक्षितुं काङ्क्षता तेन साक्षात् ॥ ९७ ॥
तनूमन्निदेशं नृपस्येव लेखं करे बिभ्रतः प्रेषिताद्दूतयुग्मात् ।
प्रभोः सूक्ष्मदर्शीव शास्त्रस्य हार्दं विदित्वा मुदा साहिवः खानमुख्यः ॥ ९८ ॥
इवानूरुरर्चिष्यतीन्पूर्वशैलं तदीयान्तिकं पूज्यपादान्निनीषु ।
सहायान्निवाहूय नः श्रीमुनीन्दो मुखं प्रेषयामास वः संनिधाने ॥ ९९ ॥

हे श्रीमुनीन्दो, साहिब इति नाम्ना खानेषु यवनसामन्तेषु मुख्य [illegible] दर्पेण सहायान् सखीनिव वा अनुजीविन इव न अस्मान् आहूय [illegible] त्वा बहुमानपुरःसरं न तु बलेन वो युष्माकं संनिधाने समीपे प्रेषयामास प्रहिणोति स्म । साहिबखानः किं कर्तुमिच्छुः । पूज्यपादान् [illegible] रणात्तदीया [illegible] श्वरसाहिपार्श्वं निनीषुः नेतुमिच्छुः । क इव । अनूरुरिव । यथा सूर [illegible] यिष्यतोऽन् भास्करान् पूर्वशैलमुदयाचलं नयति । एतावता [illegible] प्यभ्युदयः सूचितः । किं कृत्वा । दूतयुग्मात् [illegible] हार्दं हृदयाभिप्रायं विदित्वा ज्ञात्वा । क इव । सूक्ष्मदर्शीव । [illegible] शास्त्रस्य हार्दमुपनिषदं रहस्यं वेत्ति । [illegible] स्फुरन्मानं बिभ्रतो धारयतः । उत्प्रेक्ष्यते—[illegible] मूर्तां निदेशमाज्ञामिव । पुनः [illegible] प्रेषितात् । किं कुर्वता । प्रभून् [illegible] चारिताञ्जनन्दननलिनाभ्यां प्रेक्षितुं [illegible] [illegible] दर्शितज्ञानिच्चिदपि व्यतिकरे [illegible]

शासनीयाः पालयितव्याः स्म । पुनस्त्वं सेवनीय सेवितव्यः सेवितुं योग्योऽसि, पुनर्वयं सेवकाः सेवाकारकाः स्म । पुनस्त्वं नियोक्ता कार्ये प्रयोजकोऽसि, पुनर्वयं नियोज्याः कर्तव्ये निर्देश्याः स्म । तत्तस्मात्कारणादस्माकं कृत्यं कार्यमादिश्यतां प्रसा-यताम् ॥ इति श्राद्धानामाकरणं तत्प्रश्नश्च ॥

स ऊचेऽथ वाचेति पीयूषवर्षं किरन्कैतवाद्दन्तनिर्यद्द्युतीनाम् ।
चतुर्दिक्षु चण्डांशुवद्यत्प्रतापो भ्रमत्यब्धिनेमीचरोऽकब्बरोऽस्ति ॥ ३९ ॥

अथ श्राद्धजनप्रश्नानन्तरं स साहिवखानो वाचा वाण्या कृत्वा इत्यग्रे वक्ष्यमाणमूचे बभाषे । किं कुर्वन् । दन्तेभ्यो दशनेभ्यो निर्यान्तीनां निःसरन्तीनां द्युतीनां कान्तीनां कैतवात्कपटात्पीयूषवर्षममृतवृष्टिं किरन्विस्तारयन्निवेतीय गर्भितोत्प्रेक्षा । किमूचे तदे-वाह—हे जना, अकब्बरनामा अब्धिनेमीचरः आपाथो नायकपर्यन्तपृथ्वीनाथोऽस्ति । यत्प्रतापश्चतुर्दिक्षु पूर्वापरदक्षिणोत्तरालक्षणासु हरित्सु भ्रमति पर्यटति । किंवत् । चण्डांशुवत् । यथा भास्वांश्चतुरासामुपरि भ्रमति ॥

यया ज्योत्स्नयेवावदातीक्रियन्ते दिशः सस्मिता वा स्वकान्तैः क्रियन्ते ।
सखीभिर्विशिष्येव गोशीर्षचन्द्रद्रवैः पत्रभङ्गैकतालंक्रियन्ते ॥ ४० ॥
कदाचिज्जगत्कर्णपूरायमाणां गुणश्रेणिमाकर्ण्य तां हीरसूरेः ।
तमाह्वातुकामेन तेनात्मदूताविह प्रेषितौ दर्शनोत्कण्ठितेन ॥ ४१ ॥

हे जनाः, तेनाकब्बरपातिसाहिना इहाहम्मदावादे मत्पार्श्वे वा आत्मदूतौ स्वसंदेश-हारकौ प्रेषितौ प्रहितौ स्तः । तेन किं कर्तुकामेन । तं जगत्प्रसिद्धगुणग्रामं हीरविजयसू-रिमाह्वातुमाकारयितुं कामोऽभिलाषो यस्य तादृशेन । अत एव पुनः किंभूतेन । दर्श-नोत्कण्ठितेन गुरोरालोकनौत्सुक्यभाजा । किं कृत्वा । कदाचित्कस्मिन्नपि समये जगतां भुवनानां कर्णौ श्रवणौ पूर्येते अनयेति कर्णपूरा । अथवा कर्णपूरौ कर्णाभरणे तद्वदाच-रिता यावज्जगज्जनाह्लादिनी हीरसूरेर्गुणानां श्रेणीं धोरणीमाकर्ण्य श्रुत्वा । तां काम् । यया गुरुगुणश्रेण्या ज्योत्स्नया चन्द्रचन्द्रिकयेव दिशः सर्वा अप्याशा अवदातीक्रियन्ते श्वेता विधीयन्ते । अथ वा स्वकान्तैरात्मात्मभर्तृभिर्दिशो निजनिजदिगङ्गना नर्मालाप-वशात्सस्मिताः सहासाः क्रियन्ते सृज्यन्ते । वा अथ वा । सखीभिर्वयसीभिर्मण्डनकारि-काभिर्वा गोशीर्षकाणां चन्दनानां चन्द्राणां कर्पूराणां च द्रवैः पङ्कैः कृत्वा यत्र वल्लीनि-'देव भवद्वैरिवधूवदने वने च नागरुचिताश्चन्दनपत्रभङ्गाः' इति चम्पूकथायाम् । उ-त्प्रेक्ष्यते—विशिष्य विशेषप्रकारेणालंक्रियन्ते भूष्यन्ते इव ॥ युग्मम् ॥

समुद्रोऽपि भीतिं दधद्वारिपूराद्विशुद्धोऽपि कार्ष्ण्यं पुनर्बिभ्रदन्तः ।
भुवो वासवेनैष लेखो विशेषप्रवृत्तिं वहँल्लेखवत्प्रेषितश्च ॥ ४२ ॥

हे जनाः, च पुनर्भुवो वासवेनाकब्बरेण पृथ्वीपुरंदरेण विशेषप्रवृत्तिं वहन्सन्

त्मव्यतिरिक्तानामुपकारपरायणाः स्युः । तदेव दर्शयति—केश्चिद्भोगाद्भिरङ्गिभिः पुरुषैः रागत्य प्रसूनानि कुसुमानि किमिति प्रश्ने अभ्यर्थितानि याचितानि येन अस्मान्स्वसौरभैः सुगन्धीकुरुतेति किं प्रार्थितानि । यत्कारणात् स्वैरात्मीयैः सौरभैः परिमलैः कृत्वा जनान् लोकानामोदयन्ति सुरभीकुर्वन्ति । 'आमोदो गन्धहर्षयोः' इत्यनेकार्थः ॥

कदाचिद्वसन्तस्य संदेशवाचोऽपि च प्रेषिता कापि किं कुञ्जलक्ष्म्या ।
मृगाक्षीमिवोत्कण्टका मञ्जरीभिः प्रसूनैरथ हासयामास यत्ताम् ॥६३॥

अपि पुनरर्थे । अपि चापरार्थे च । कदाचित्कस्मिन्नपि समये कापि कुत्रापि स्थाने कुञ्जलक्ष्म्या वनश्रिया वसन्तस्य वसन्तसमयस्य किं संदेशवाचः उदन्ताः प्रेषिताः प्रहिताः सन्ति । यत्कारणादथ वसन्तस्तामुद्यानेन्दिरां मृगाक्षीं स्वसारङ्गलोचनां प्रेयसीमिव प्रसूनैः स्मेरकुसुमैः कृत्वा हासयामास । कान्तोऽपि स्वकान्तां प्रसूनादिक्रीडाभिः हासयति । हास्यकलितामिव चकारेत्यर्थः । किंभूता श्रियः कान्ता च । कलितानि मुरनिसनयन्मयमानामानपादेपु नवप्रकटीभवत्कुसुमकोरकैरुत्कण्टका सरोमाञ्चकञ्चुकाङ्कुरै रोमाञ्चा च ॥

किमभ्यर्थ्यते केनचिच्चण्डरोचिर्यदुर्वीदिवौ भासयत्येष यद्वा ।
विपक्षानिवोद्वासयत्यन्धकारान्पुनर्योजयत्यङ्गनाभी रथाङ्गान् ॥ ६४ ॥

यद्वा अथ वा केनचिच्चक्रवाकादिना चण्डरोचिः सूर्यः किमभ्यर्थ्यते । यत्कारणादेष चण्डरोचिः उर्वीदिवौ भूमीनभसी भासयति प्रकाशयति । पुनर्विपक्षान् शत्रून् इव अन्धकारांस्तमांसि । अन्धकारशब्दः पुंक्लीबलिङ्गयोः । 'नेत्र वक्रपविनिपातमगभीरान्धकारा—' इति लिङ्गानुशासने । उद्वासयति लोकमध्यान्निष्कासयति । पुनर्वियोगव्याकुलान् रथाङ्गांश्चक्रवाकानङ्गनाभिः स्वरथाङ्गीभिः स्त्रीभिः सह योजयति । सङ्गमं कारयतीत्यर्थः ॥

अयाच्यन्त किं वाम्बुदाः केनचित्किं यदुर्वीधराणां व्यपोहन्ति तापम् ।
जलैर्जीवयन्तीह वप्पीहबालान्स्वनादैश्च वैदूर्यमुद्भावयन्ति ॥ ६५ ॥

किं च पुनरर्थे । केनचित्पर्वतचातकादिना किमम्बुदा मेघाः अयाच्यन्त प्रार्थिताः । यत्कारणादुर्वीधराणां पर्वतानां यद्वा उर्व्यां धराणां लोकानां च । 'ग्रावापर्वतभूधराः' इति हैम्याम् । तथा 'धरः कूर्माधिपे गिरौ । कर्पासतूले' इत्यनेकार्थे । तापं निदाघदाघं व्यपोहन्ति निघ्नन्ति शमयन्ति । यदुक्तम्—'धाराधरा एव धराधराणां निदाघदाघोपविघातदक्षाः' इति । पुनरिह जगति वप्पीहबालान्चातकपोतान् जलैः सलिलपानैः कृत्वा जीवयन्ति । पुनः स्वनादैर्निजगर्जारवैश्च वैदूर्यं विदूरपर्वते बालवायुजापरनामकं रत्नं प्रसवन्ति । आतावरजवनम् । उद्भावयन्ति प्रादुर्भावयन्ति । मेघगर्जितैः विदूरशैले वैदूर्यशलाकाः प्रादुर्भवन्तीति वदितव्यम् ॥

उपाकारि किं कैरवैर्वा चकोरैर्यदेतान्सितांशुः पुणत्येष किं वा ।
सगोत्राः पुनश्चन्द्रिकाः किं परिन्धाः सुधीकुर्वते तां यदेताः सुधानाम् ६६

इतोऽस्मिन्पार्श्वे एकपक्षे प्रजाना शासितुरकमिपुराधिपतिसाहिवखानस्य [illegible]
नमादेशः । तथा इतोऽपरस्मिन्पार्श्वे विनो सूरीन्द्रोर्वन्द्यास्त्रिभुवनजननमस्कर[illegible]
पादाश्चरणा वन्दनीया. प्रणतिगोचरीकार्याः । तर्हि इदमेतन्मातरूपे भुवने [illegible]
सुगन्धताया आरोपण कर्तव्यमस्ति । पुनस्त्रिरेखे शङ्खे पयसा दुग्धाना पूर्ति [illegible]
विरासीत्प्रकटीभूतम् ॥

हृदन्तर्मुनीन्द्रोर्जिनंसा पुरास्ते नियुक्ता पुन स्वामिनेदं तदासीत् ।
प्रतिस्थानमालोकमानान्मनुष्यान्समेत्य स्वयं पद्मवासा वृणीते ॥ [illegible]

पुरा पूर्वं हृदन्तरस्मिश्चित्तमध्ये मुनीन्द्रो सूरीन्द्रस्य जिनसा [illegible]
विद्यते । पुनस्तदुपरि स्वामिना खानेन नियुक्ता आदिष्टा । तर्हि इदानीं [illegible]
किं प्रतिस्थान प्रति आलोकमानान्पश्यनो मनुष्यान् जनान् स्वयमात्मना [illegible]
पद्मवासाः कमलालया लक्ष्मीर्वृणीते वरयति ॥

अलं मन्दवद्भो विलम्बैः सगर्भास्त्वरध्व व्रजामः प्रभो संनिधाने ।
विमृश्येति सर्वेऽभिनिर्याणयोग्यं मुहूर्तं मिथो निर्णयन्ति स्म पौराः ॥ [illegible]

सर्वे पौरा नागरिका राजनगरश्रावका. इत्यमुना प्रकारेण विमृश्य [illegible]
अभिनिर्याणस्य स्वप्रस्थानस्य योग्यमुचित मुहूर्त शुभवासरोला निर्णयन्ति [illegible]
ज्ज्योतिषिकैर्निर्धारयन्ति स्म । इति किम् । हे सगर्भा भ्रातर, [illegible]
यानु कुण्टाः सालसा वा तुन्दपरिमृजा वा मूर्खा वा तद्वत्तेपामिव विलम्ब [illegible]
पूर्यता त्वरध्व शीघ्रीभवत । प्रभोर्गुरोः संनिधाने समीपे गन्धारमन्दिरे [illegible]
इत्यकनिपुरश्राद्धाना गुरुवन्दनालोचः ॥

अथालव्य वासानि ते श्राद्धलोकाः पुरे [illegible]
प्रभुं वन्दितुं प्रीतिमन्तः प्रचेलुर्जिनं स्वर्गिवर्गा इव [illegible] ॥ [illegible]

अथ मुहूर्तवासरागमनानन्तर [illegible]
गन्धार इति सज्ञा नाम यस्य तादृशे पुरे प्रभु [illegible]
[illegible]

[illegible]

सम्यग्विधातु प्रयत्नेत प्रयत्नः क्रियेत । तदेव दर्शयति—यः पुमान् निजमात्मानमगुरुमेव चूर्णयित्वा शकलीकृत्य कृशानौ ज्वलज्ज्वलने दहेद्भस्मीकुर्यात् ज्वालयेद्वा स कास्तुण्डः कृष्णागुरुः तमेव स्वदाहकारिण पुमास धूपयेत्सुगन्धी कुर्यात् । तस्य सर्वाङ्गाण्यपि वासयेदेव ॥

सता स्वोपकर्तापकर्ता च चित्तेऽथ वैका तुला प्राप्नुतो निर्विशेषम् ।
विषेन्दू इवानङ्गदस्योः सुधोर्वाविवाब्धेः पुनश्चन्द्रिकाङ्काविवेन्दोः ॥७०॥

अथ वेति पुनः पक्षान्तरे। स्वस्यात्मन उपकर्ता उपकारकः, च पुनरर्थे स्वस्यापकर्ता विरुद्धकृत्, एतौ द्वावपि सतामुत्तमाना चित्ते अन्त.करणे एका साधारणी तुला सादृश्य प्राप्नुतः। सदृशीभाव लभेते इत्यर्थः। कथम्। निर्गतो विशेषो मानापमानलक्षणो यत्र तन्निर्विशेषम् । क्रियाविशेषणम् । कस्येव। अनङ्गदस्योरिव। यथा शभोर्विष कण्ठदाहकृत्कालकूट तथा इन्दु चूडामणिशोभाकृच्चन्द्र ।पुनः कस्येव। अब्धेरिव । यथा समुद्रस्य जगज्जीवनौषध सुधा पीयूष तथा उर्वो निजाखिलसलिलशोषकृद्वडवानलश्च । पुनः कस्येव । इन्दोरिव । यथा चन्द्रिका जगदुद्द्योतविधायिका चन्द्रगोलिका तथा अङ्कः स्वकलङ्कदायक लाञ्छनं च तुल्या तुला लभेते निर्विशेषभाव भजतः ॥ इति सतामपकारकारिण्युपकारकरणविज्ञप्तिः ॥

समुत्कण्ठुलं मानसं मेदिनीन्द्रः प्रभौ यद्बिभर्त्येष सैप्ये करीव ।
जलस्येव दुग्धेन सङ्गं सिसृक्षोस्त्वया किं पुनर्वाच्यमस्योपकृत्यै ॥७१॥

यत्कारणादेषोऽकब्बरनामा मेदिनीन्द्र पृथिवीपुरदरः पातिसाहिः प्रभौ श्रीमद्विषये समुत्कण्ठुलम्। 'सोत्सुकमुत्कण्ठुलम्' इत्याचारप्रदीपे प्रतिक्रमसूत्रवृत्तौ च। श्रीमद्रत्नशेखरसूरिकृतौ । उत्कण्ठाकलित मानस मनो बिभर्ति धत्ते । क इव। करीव । यथा गजेन्द्रः स्वमदशोभाविधायिनि सैप्ये शिशिरऋतौ उत्कण्ठिता मनोवृत्ति दधाति । 'करिणा हि शिशिरर्तौ मदोद्भावो भवेत्' इति वाग्भटकाव्यानुशासने । तत्कारणात् पुनरस्य पातिसाहेरुपकृत्यै उपकृतिकरणाय किं वाच्य श्रीमता वक्तव्य किमस्ति । अस्य किं कर्तुमिच्छो । त्वया भगवता सम सङ्ग सयोग मिलन सिसृक्षो स्रष्टुमिच्छोः कर्तुकामस्य । केनेव कस्य । दुग्धेनेव जलस्य सलिलस्य । यथा जल पयसा साक सङ्ग सिसृक्षति विधातुमिच्छति ॥

प्रणिघ्नन्वने व्याधवन्नैकसत्त्वानसत्त्वीकृताशेषविद्वेषिवर्गः ।
ततो हेमचन्द्रेण चौलुक्यभूमानिवासौ त्वयाकब्बरो बोधनीयः ॥७२॥

ततः कारणात् सत्तमत्वहेतोः त्वया श्रीमता असौ अकब्बरो नाम मुद्गलपातिसाहिर्बोधनीयः प्रतिबोध प्रापयितव्य । केनेव। हेमचन्द्रेणेव। यथा हेमाचार्येण चौलुक्यभूमान् कुमारपालभूपालः प्रतिबोध लम्भितः । असौ किं कुर्वन् । वने कानने उपलक्ष-

कावत्कर्णभूषणमिव कर्णा पूर्यते अनयेति कर्णपूरा तामकर्णपूरां करोति स्मेति कर्णपूरीचकार इति चित्रं महदाश्चर्यमास्ते । यतः कर्णभूषणं तु भोगीन्द्रस्यैव युज्यते न तु योगीन्द्रस्य । अयं तु योगीन्द्रोऽपि सन् कर्णिकां दधारेत्याश्चर्यम् । किंभूतां कर्णिकाम् । सुवर्णेन काञ्चनेनाङ्किता घटिताम्, सुशोभना वर्णा अक्षराणि तैः कलिताम् । पुनः किंभूताम् । सुष्ठु हृदयाह्लादविधायिन्य उक्तयो वचनचातुर्य एव मुक्तावली मौक्तिकपङ्क्तिः तया शालमाना शोभमाना । पक्षे श्लेषे शसयोरैक्यात् शुक्तीनां शुक्तिसंबन्धिनीनां मुक्तानां मुक्ताफलानाम् । एतावता भद्रगजवशानां निषेधः । आवली माला प्रान्तनिबद्धा धोरणी तया शालमाना दीप्यमाना ॥

महीमण्डलान्तः किमाविर्भवन्तं पुनः शासनस्योदयं श्रीजिनेन्दोः ।
अशेषावनीशासितुः शासनं तन्निशम्येत्यसौ चिन्तयामास चित्ते ॥७६॥

असौ हीरविजयसूरिः अशेषावनीशासितुः समस्तक्षितिपालपालयितुरकब्बरस्य तत्स्वस्याकारणलक्षणं शासनमादेशं निशम्याकर्ण्य इत्यमुना प्रकारेणाग्रे वक्ष्यमाणं चित्ते स्वमनसि चिन्तयामास विचारयति स्म । उत्प्रेक्ष्यते—तच्छासनं पुनरस्मिन्वर्तमाने कलिकालेऽपि महीमण्डलान्तः पृथिवीपीठमध्ये आविर्भवन्तं प्रकटं जायमानं श्रीजिनेन्दोर्महावीरस्य भगवतः शासनस्योदयमभ्युद्गममिव ॥

अयं हन्ति दावाग्निवद्वन्यजन्तून्प्रचण्डाशयो दण्डभृद्वद्यदास्ते ।
क्षितौ स्वं निधानं धनीवावनीन्दोस्तदेतस्य चित्ते कृपां निक्षिपामि॥७७॥

यत्कारणादयमकब्बरो मुद्गलपातिसाहिः दवाग्निवद्दावानल इव वने भवान् वन्यान् काननोत्पन्नान् जन्तून् शशशबरवराहहरिणादिसत्त्वान् हन्ति निपातयति स्वतच्चाखेटककीडावशवदतया व्यापादयति । पुनर्यत्कारणादयं हमाऊनन्दनः दण्डभृद्यम इव । प्रचण्डो रौद्रो निर्दय आशयश्चित्तमभिप्रायः परिणामो वा यस्य तादृश आस्ते । तत्कारणादेतस्यावनीन्दोरकब्बरसाहेश्चित्तेऽन्तःकरणे कृपां दयां विश्वसत्त्वोपरि करुणां निक्षिपामि स्थापयामि । क इव । धनीव । यथा धनवान् पुमान् स्वमात्मीयं निधानं सुवर्णरूपकमणिमौक्तिकपूर्णकुम्भमरूपाकूटाहादिकं निधिं क्षितौ वसुधाविषये निक्षिपति न्यासीकरोति ॥

दधानेन धर्म्यां धुरं किं क्षितीन्द्रः कृतः संमुखीनः स केनापि धर्मे ।
फलाभ्युद्गमे विश्वलोकंपृणेन प्रसूनव्रजेनेव विस्मेरशाखी ॥ ७८ ॥

धर्म्यां धर्मसंबन्धिनीं धुरं धुर्वां दधानेन बिभ्रता । धर्मधुरधरेणेत्यर्थः । केनापि सत्तमेन स क्षितीन्द्रः पातिसाहिः धर्मे जैनधर्मविषये संमुखीनोऽभिमुखः कृतः विहितः । केनेव । प्रसूनव्रजेनेव । यथा विश्वलोकंपृणेन समस्तजगज्जनानन्ददायिना कुसुमप्रकरेण विस्मेरशाखी विनिद्रद्रुमः फलानां स्वजातियोग्यानां सस्यानामभ्युद्गमे प्रादुर्भावे संमुखः

समाकर्ण्य सम्यक्प्रकारेण श्रवणगोचरीकृत्य । श्रुत्वेत्यर्थः । गुणान् किं कुर्वत । सुधा-धामवत्पीयूषकान्तीश्चन्द्रानिव शुभ्रिमाणं श्वेतभावं बिभ्रतो धारयत । उत्प्रेक्ष्यते—जगतां त्रिभुवनजनानां सुरासुरनराणामन्तःकरणानामाकर्षणे सन्नीपातनने रज्जूरिव ॥ त्रिभिर्विशेषकम् ॥

सुवर्णोऽप्यवर्णः सुरावासवासी न लेखोऽपि मूकोऽप्युदन्तं ब्रुवाणः।
प्रभो गृह्यतां नागरैरित्युदित्वा स लेखः पुरोऽमोचि वाचंयमेन्दोः ॥१०॥

नागरैरकब्बरपुरश्रावकैरित्यमुना प्रकारेणोदित्वा कथयित्वा वाचयमेन्दो साधुश्रेष्ठस्य सूरेः पुरोऽग्रे अकब्बरसाहिप्रहितो लेखः स्फुरन्मानापरनामा अमोचि मुक्तः। सूरीणां पाणिपद्मे समर्पित इत्यर्थः । इति किम् । हे प्रभो, अयं लेखो गृह्यताम्। किंभूतः । सुशोभनो वर्णो ब्राह्मणादिर्विद्यते यस्य । पुनः किंभूतः । अवर्णः न विद्यते वर्णो यस्य । इति विरोधः । विरोधशान्तौ तु विशिष्टः शुक्लादिरथ वा शोभनः स्वर्णः अथ वा चित्रमालेख्यं वा यस्मिन् सः । अथ कृष्ण इव श्यामा वर्णा अक्षराणि यत्र। 'वर्णः स्वर्णे मखे स्तुतौ ॥ रूपे द्विजादौ शुक्लादौ कुथायामक्षरे गुणे । भेदे गीतक्रमे चित्रे यशस्तालविशेषयोः ॥ अङ्गरागे च वर्णं तु कुङ्कुमे' इत्यनेकार्थः । पुनः किंभूतः। लेखो देवोऽपि सन् सुराणां निर्जराणामावासे वसतीत्येवंशील । अयमपि विरोधः। लिख्यते लिपीक्रियते स्वहृदयगतोदन्तादिरत्रेति लेखः । पुनः किंभूतः । मूकः अवाक्-वचनरहितोऽपि उदन्तं वाचिकं सर्वसमाचारं ब्रुवाणो वदन् । अयमपि विरोधः। शान्तौ तु प्रेषकेणान्तर्लिपिविषयीकृतं सविस्तरं वाचिकं कथयन् ॥ इति श्राद्धानाम-कब्बरसाहिसाहिबखानयोरुदन्तकथनपूर्वं गुरूणां तत्स्फुरन्मानार्पणम् ॥

प्रदेशीव केशिव्रतिक्षोणिशक्रैरसौ बोधनीयो नृपः पूज्यपादैः ।
महान्तो हि विश्वोपकृत्यै यतन्ते घनाः किं न सर्वं जगज्जीवयन्ति ॥११॥

पूज्यपादैः श्रीपूज्यैरसौ नृपोऽकब्बरपातिसाहिः बोधनीयः प्रतिबोधितव्यः धर्मे स्थापनीयः । क इव । प्रदेशीव यथा केशिव्रतिक्षोणिशक्रैः केशिनामगणधरैः प्रदेशी नाम नृपो बोधितः श्रीमज्जिनधर्मे स्थापितः । हि यस्मात्कारणात् महान्तः सन्तो विश्व-जगज्जनस्य उपकृत्यै उपकारकृते यतन्ते उद्यमं कुर्वन्ति । तत्रैव दृष्टान्तमाह—घना मेघाः सर्वं समस्तं सचराचरं जगद्विश्वजनं किं न जीवयन्ति । अपि तु सर्वमपि जीवयन्त्येव । यदुक्तम्—'सम्प्रति न कल्पतरवो न सिद्धयो नापि देवाः ॥ [illegible] जलद त्वयि विश्राम्यति जगतोऽपि हि जीवितारम्भः ॥' इति जीवनदायित्वम् ॥

अपेक्षा च न क्वापि कुर्वन्ति सन्तः स्वभावेन किं नोपकुर्वन्ति सर्वान्।
किमभ्यर्थितानि प्रसूनानि कैश्चिज्जनान्सौरभैः स्वैर्यदामोदयन्ति ॥ १२ ॥

च पुनः क्वापि कुत्रापि स्थाने यः कश्चिदभ्येत्यार्थ्यं नाम [illegible] करोति सापेक्षा । तां न कुर्वन्ति किं तु सन्तः स्वभावेनैव सर्वानुपकुर्वन्ति । [illegible]

हे श्राद्धा', पुनर्नमधिकीपोंरुपरि भूमिभानोरकब्बरसाहेर्ममाह्वाननमाकारण समागात् सम्यग्रीत्या अनुकूलवृत्त्या न बलहठप्रकृत्या। आह्वाननशब्दोऽपि दृश्यते। यथा चम्पूकथायाम्—'तत्तातस्य कृतादरस्य रभसादाह्वानन दूरतस्तचाङ्के विनिवेश्य बाहुयुगलेनाश्लिष्य सभापणम्। ताम्बूलं च तदर्धचर्वितमतिप्रेम्णा मुखेनार्पित पाषाणोपम हा कृतघ्न हृदय स्मृत्वा न किं दीर्यसे ॥' इति। 'समागान्ममाह्वानमुर्वीमघोन' इति पाठान्तर वा। उर्वीमघोनः पृथ्वीपुरंदरस्याकब्बरस्य मम सम्यग्ध्यानपूर्वकमाह्वानमाकारणमागात्। कस्येव। वप्पभट्टेरिव। यथा वप्पभट्टिसूरेरामस्य गोपालगिरिराजनगरराजितकान्यकुब्जजनपदनायकस्य राज्ञो भूपालस्याकारण समागात्। 'पितृदत्तराज्योपविष्टामराजेन स्वप्रधानपुरुपान्प्रेष्यातिमेत्र्याद्गुरुपार्श्वाद्वप्पभट्टिराकारित' इति तत्प्रवन्धात् ज्ञेयम्। ततः कारणात् तत्र पूर्वदेशे गत्वा तमकब्बरपातिसाहिमहमुद्बोधयामि उत्प्रावल्येन सम्यग्ज्ञानशालिन करोमि। प्रतिबोधयामीत्यर्थः। किंभूतम्। मोहोऽज्ञानमेव निद्रा तन्द्रा तया कृत्वा शयालु शयनशीलम्। सदसद्विवेकाभावविकलीभूतमित्यर्थः। किंवत्। दिनारम्भवत्। यथा प्रभात मोढ्येन निद्रया शयान जगज्जागरयति ॥

ततः पूर्वसूरीन्द्रवत्प्राच्यदेशे प्रणम्या मया श्रीजिनाधीशितारः।
मयीतः प्रयाते यतस्तत्र धर्मोऽधिगन्ता विवृद्धिं मृगाङ्के कलावत् ८३ ✓

ततः कारणात् पूर्वसूरीन्द्रवत्प्राचीनाचार्यवत् मया प्राच्यदेशे पूर्वदिग्मण्डले श्रीजिनाधीशितारः श्रीमज्जिननायकाः प्रणम्या नमस्करणीया। यतः कारणात् मयि इतोऽस्मात्स्थानाद्गुर्जरेभ्यो वा तत्र मेवातमण्डले साहिपार्श्वे वा प्रयाते सति धर्मो विवृद्धिं विशेषेण वृद्धिं पुष्टिं दीप्तिं वा अधिगन्ता प्राप्स्यति। 'अधिगत विधिवद्यदपालयत्' इति रघौ। अधिगत प्राप्तम्। 'अधिगत्य जगत्यधीश्वरादथ मुक्तिं पुरुषोत्तमात्तत.' इति नैषधे। अधिगत्य प्राप्येति स्वस्तनीप्रयोगस्तातारौतारम्। किंवत्। कलावत्। यथा मृगाङ्के चन्द्रे पूर्वदेश गते सति कला वृद्धिमधिगच्छति ॥

प्रतिष्ठासमानस्य मे वाङ्निषेधी हितं काङ्क्षता केनचिन्नो निगद्या।
यदत्रान्तरायीभवन्नम्बुदानामिवावग्रहः कस्य न स्यादनिष्टः ॥ ८४ ॥

हे श्राद्धा., प्रतिष्ठासमानस्य पूर्वदेशान् प्रति प्रस्थातुकामस्य प्रचलितुमिच्छतो मे मम हितमायतो इष्ट समीहितार्थं काङ्क्षता वाञ्छता केनचिच्छ्राद्धेन साधुना वा चतुर्विधसंघमध्ये केनापि निषेधी निषेधिका निषेध प्रतिपादयित्री वाक् वाणी नो निगद्या न वाच्या न कथनीया। यत्कारणादत्र कार्ये ममान्तरायीभवन् विघ्नकर्तृत्वेन जायमानः कस्य हितैषिणो धर्मवृद्धिविधातु पुंसोऽनिष्टो द्वेषकारी असूयाकारण न स्यात्। अपि तु सर्वस्यापि धार्मिकस्यानिष्ट एवेति। क इव। अवग्रह इव। यथाम्बुदाना जलदायकाना मेघानामवग्रहो वृष्टिरोधविधायी जगतोऽप्यनिष्टः स्यात् ॥

अनध्यायिकास्ये तिथिर्वास्यते स्माश्रये प्रापुणीवेत्युदित्वाथ तेन।
निजास्यामृताशोस्तिथीना प्रणीत्वं तदा सार्थकं स्वेन निर्मित्सतेव ८५

किं वा अथ वा कैरवैः कुमुदैर्वा अथ वा चकोरैर्ज्योत्स्नाप्रियैः किं सितांशोश्चन्द्रस्य उपाकारि उपकृतम् । यद्यस्मात्कारणादेष प्रत्यक्षः सितांशुरेतान्कैरवचकोरान् [illegible] प्रीणयति । विकाशामृतज्योत्स्नापानैरिति शेषः । 'पृणन् प्रीणने' तुदादिः [illegible] । [illegible] काश्चन्द्रज्योत्स्नाः किं धरित्र्या भूमेः सगोत्राः सज्ञातयः सन्ति । यत्कारणादेता [illegible] ता वसुंधरां सुधावदमृतात्प्लावा इव । छोह' इति लोकप्रसिद्धा [illegible] धवलयन्ति । 'सुधावन्तो दृश्यन्ते अत्र प्रचुराः प्रासादाः [illegible]' [illegible] स्पृकथायाम् ॥ इत्युपकारकरणकथनम् ॥

न चैवं हृदा चिन्तनीयं शमीन्दो दधानोऽसिवत्त्वेन निस्त्रिंशभावम् ।
तमः श्वेतकान्तेरिव म्लेच्छमौलिः कदाचित्स मे मा विदध्याद्विरुद्धम् ॥ [illegible]

शमः क्षान्तिः शत्रौ मित्रे च समभावो विद्यते येषां ते शमिनस्तेषां [illegible] शायिशान्तिरसशृङ्गार तत्संबोधनम् । त्वया हृदा मनसा [illegible] अमुना प्रकारेण [illegible] चिन्तनीयं विचारणीयम् । एकवचनं तु भक्तिवशात् [illegible] वादो दृश्यते—'तवाङ्गे भृङ्गता यान्ति नेत्राणि सुरयोषिताम्' इत्यादि । [illegible] [illegible] मायचपतुमित्तपिय कुरु' इत्यादि । यद्वा अतिनिकटत्वात् [illegible] भावं क्रूरत्वभावम् । 'क्रूरे नृशंसनिस्त्रिंशौ' इति हैम्याम् । [illegible] 'करवालनिस्त्रिंशकृपाणखड्गाः' इत्यपि हैम्याम् । दधानो [illegible] [illegible] मौलिः मुकुटः अकब्बरपातिसाहिः कदाचित्कस्मिन्नपि [illegible] [illegible] मम विरुद्धं [illegible] मा [illegible] [illegible] यथा [illegible] श्वेतकान्तेश्चन्द्रस्य [illegible] इति विरुद्धविलक्षण [illegible] ॥

अपि [illegible] ।
[illegible] ॥

[illegible]

कर्णिका येषु तादृशान्यङ्गानि काया येषाम् । कया । तस्य सूरेर्गिरा वाण्या । तस्य किंलक्षणस्य । लोकपृणस्य त्रैलोक्यलोकस्याह्लादोत्पादकस्य । गिरा किं कुर्वन्त्या । अमृत सुधारसं मोक्षं वा किरन्त्या विस्तारयन्त्या पायन्त्या ददत्या च । अमृतपानमिव प्रीतिमुत्पादयन्त्या मुफिदायिन्या च । कोरकिताङ्गाः क इव । धाराकदम्बा इव । यथा विश्वसौहित्यविधायिनोऽम्बुवाहस्य मेघस्यामृत घनसलिल वितन्वन्त्या वृष्ट्या वर्षणेन कृत्वा धाराकदम्बाः प्रोल्लसन्नोममालिकातुल्यैः कोरकैः कुसुमकलिकाभिः कान्ता' कायाः शाखाप्रतिशाखारूपा देहा भवन्ति । धाराभिर्जलदजलवृष्टिभिराहता कदम्बद्रुमाः धाराकदम्बा' । धाराहताः किल कदम्बा. पुष्यन्तीत्यशास्त्रे सिद्धान्तेऽपि च दृश्यते—'धाराहयकयम्बसमुच्छसिरोमकूवा' इति । तथा 'स्तोकेनेव वहन्ति पुष्पपुलक धाराकदम्बद्रुमाः' इति चम्पूकथायाम् । 'वर्षाकालमधिगत्योज्जृम्भिता नीपाः धाराकदम्बाः । रजसि ये पुष्पन्ति ते धूलीकदम्बा. । वर्षासु ये पुष्पन्ति ते धाराकदम्बाः' इति चम्पूकथाटिप्पनके ॥'' इति पाठान्तरम् ॥

जडिम्ना निजां दूषितामङ्गयष्टिं तपोभिस्त्यजन्नूर्ध्वसंस्थानमुख्यैः ।
सुमेरुः किमादत्त सूरीन्द्रदेहं न चेह प्रतीकाशधैर्यः स कस्मात् ॥८८॥

सुमेरु. सुवर्णाचल. । उत्प्रेक्ष्यते—सूरीन्द्रस्य देह काय किमादत्त गृहीतवानिव । सूरिशरीरी बभूवेत्यर्थ' । किं कुर्वन् । ऊर्ध्वमूर्ध्वीभूय यत्सस्थान सम्यक् समीचीनासमीचीनतया वा स्थितिर्निष्ठा वा तत्प्रमुखैस्तपोभिर्निरन्नपानादिकष्टैर्यमनियमविशेषैर्वा कृत्वा जडिम्ना दृपत्तया जाड्येन दूषिता कलङ्किता निजामात्मीयामङ्गयष्टिं वपुर्लता त्यजन्नुज्झन् । एव चेन्न तर्हि स सूरि कस्मात्कारणात् अप्रतीकाशमसाधारण धैर्य धारिमा यस्य स । अद्वैतधीरताकलितः कथ भवेत् ॥

यदुद्यत्सते भूधवस्योपकर्तुं स्वयं सूरिकण्ठीरवस्तद्धि साधु ।
विनैतं कथं सोऽवबुध्येत धीमान्यथा कार्तिकैकादशीमब्धिशायी ॥८९॥

सूरिकण्ठीरव हीरविजयसूरिसिंह स्वयमात्मना यद्भूधवस्याकब्बरस्योपकर्तुमुपकार कर्तुमुद्यत्सते प्रागल्भते उद्यम प्रयत्न कुरुते । हि निश्चितम् । तत्साधु सम्यक् । यत्कारणादेत सूरिं विना स धीमान् महाप्राज्ञ. कथ केन प्रकारेणावबुध्येत सम्यग्ज्ञानमवाप्नुयात् । क इव । अब्धिशायीव । यथा कार्तिकमासस्यैकादशीं शुक्लैकादशीं हरिप्रबोधतिथिं देवउठणीएकादशी तामन्तरेण कृष्ण कथ जागर्ति । वर्षामयमनुलक्ष्यीकृत्याब्धौ समुद्रे शेते इत्येवंशीलोऽब्धिशायी ॥

अहो पश्यतास्य प्रभोः साहसिक्यं परं येन नापेक्षते कंचनापि ।
द्विजेशद्विपद्वीपिपूषप्रदीपैः प्रतीक्ष्येत किं क्वापि साहायकाय ॥ ९० ॥

अहो इति परस्परसंबोधने । भ्रातर., अस्य प्रभोः श्रीगुरोः साहसिक्य साहसता साहसकर्मता सहसा वर्तते इति साहसिकः । 'ओजः सहाम्भसा वर्तते' इति ठक् ।

णाद्रिरिगह्वरारण्यादौ व्याधवल्लुब्धक इव नैकान्मानातीतान् सत्त्वान् मृगादिप्राणिन प्रणिघ्नन् व्यापादयन्। पुनः किंभूत॰। असत्त्वीकृताः बलरहिताः कृता वैर्यापगमात् कातरा विहिता वा। 'सत्त्वं द्रव्ये गुणे चित्ते व्यवसायस्वभावयोः। पिशाचादावात्मभावे च बले प्राणेषु जन्तुषु ॥' इत्यनेकार्थः। व्यवसायरहिता वा निर्मिता. अशेषा समस्ता विद्वेषिणा वर्गा. पक्षा येन सः ॥

हिमोर्वीधरोर्वीव सिन्धोः सुराणां कृपाया उपादानमुक्तिस्त्वदीया।
महत्त्वं विभोर्लप्स्यते चित्तवृत्तौ पयो मौक्तिकत्वं घनस्येव शुक्तौ ॥७३॥

हे प्रभो, त्वदीया श्रीमत्सवन्धिनी उक्तिर्वचनचातुरी सचितधर्मदेशना वाग्विलासो वा विभो. स्वामिनोऽकब्बरस्य चित्तवृत्तौ मनोविषये महत्त्व प्रौढिमान प्रतिष्ठा लप्स्यते प्राप्स्यति। किमिव। पय इव। यथा घनस्य स्वातिनक्षत्रसवन्धिजलधरस्य पयोऽम्बु वारि शुक्तौ शुक्तिकाया विषये मौक्तिकत्व मुक्ताफलभाव लभते। किंभूतम्। कृपाया जगज्जीवदयाया उपादान मूलकारणम्। केव। हिमोर्वीधरोर्वीव। यथा हिमाचलवसुधा सुराणा देवाना सिन्धोर्नद्याः गङ्गायाः उपादान मौल कारणम्। 'चुल्लहिमवत्पद्मद्रहादाविर्भवति भागीरथी' इति जिनमते। शैवे तु 'हिमवतो गङ्गा प्रभवति' इति भवेत् ॥

पयोदा इव प्रावृषेण्या नमन्तः प्रभोश्चक्रपाणेः पदं संस्पृशन्तः।
निगद्येति वाचंयमेन्दोः पुरस्तान्यषेवन्त जोषं मुखे श्राद्धमुख्याः ॥७४॥

ते श्राद्धमुख्या अकमिपुरसक्तश्रावकपुङ्गवाः वाचयमेन्दोः साधुमुख्यस्य सूरेः पुरस्तादित्यमुना प्रकारेण निगद्य कथयित्वा। विज्ञप्त्येत्यर्थः। मुखे निजानने जोषं मौनं न्यषेवन्त सेवन्ते स्म। मौन कृत्वा स्थिताः। किं कुर्वन्तः। नमन्तः प्रणमन्तः [illegible] वन्त.। पुनः किं कुर्वन्त.। सस्पृशन्त. अर्थान्मस्तकेन सघट्टयन्तः वन्दमाना [illegible] पद चरणम्। कस्य। प्रभो॰ सूरे.। किंभूतम्। चक्र चक्रिणा [illegible] आकृत्या महापुरुषत्वेन हस्ते यस्य। के इव। पयोदा इव। यथा प्रावृषि [illegible] कालसवन्धिनो वारिवृष्टिविशिष्टमेघा नमन्ति सम्मुखम्यायान्ति। [illegible] [illegible] लगन्ति। तथा चक्रपाणेर्विष्णो. पद गगनमण्डल च स्पृशन्ति ॥ [illegible] [illegible] समीपे गमनार्थं श्राद्धाना विज्ञप्ति ॥

तदीयां गिरं कर्णिकावत्सुवर्णाद्दृतां सूक्तिमुक्तावलीशालमानाम्।
विमुक्ताङ्गरागोऽपि भोगीव योगीश्वरः कर्णपूरीचकार [illegible] ॥७५॥

विमुक्ताङ्गरागः [illegible] [illegible] [illegible]

[illegible]

[illegible]

[illegible]

असो प्रत्यक्षा शासनस्वर्मृगाक्षी सिद्धायिकानाम्नी श्रीमन्महावीरजिनशासनदेवतेव समेता समागता किमु । किं कर्तुमिच्छु. । एतदत्रैव काव्ये प्रोच्यमान विवक्षुर्वक्तुमिच्छुः कथयितुकामा । कि तदेवाह—हे सूरे, अह शासनसुरी अभ्यासे श्रीमत्समीपे एव तस्थुषी स्थितवती सती अनिश निरन्तरमहोरात्रमेव ते तव महावीरपट्टधारिण. सूरेः सांनिध्य सत्यवसरे श्रीमत्समीहितकार्य विधास्यामि करिष्यामि । दुष्करमपि भवदीप्सितार्थं साधयिष्यामीति ॥

प्रशान्तै रसैः पूरितः पूर्णकामो भवांस्तूर्णमेवास्तु मद्वन्मुनीन्दो ।
सकान्तोत्तमाङ्गे स्थितः पूर्णकुम्भः पुरोऽभूदितीव प्रभोर्वक्तुकामः ॥९४॥

सह कान्तेन भर्त्रा विद्यते या सा तस्या सकान्ताया सधवाया स्त्रिय उत्तमाङ्गे मस्तके स्थितः पूर्णकुम्भो जलभरभृतकलश प्रभो सूरे पुरोऽग्रे अभूत्सजातः । अभिमुखः समाजग्मिवानित्यर्थः । उत्प्रेक्ष्यते—प्रभोर्हीरविजयसूरेरित्यमुना प्रकारेण वक्तुकाम कथयितुमना इव । इति किम् । हे मुनीन्दो, भवान्मद्वदहमिव प्रशान्तै. प्रकर्षेण शान्तनामभिरुपशमलक्षणै रसै. सर्वेभ्योऽपि रसेभ्यः प्रशस्यत्वान्महानन्ददायित्वाच्च बहुत्वम् । पूरितः परिपूर्णीभूतः भृत सन् तूर्णं शीघ्रमेव पूर्णा सिद्धा निष्पन्नाः कामा अभिलाषा यस्य तादृशोऽस्तु भवतात् । यथाहं रसै सलिलै. पूरित आकण्ठपीठ पूर्णः भृतमध्य सजातोऽत एव पूर्णो जलादानलक्षण. कामो मनोरथो यस्य ॥

प्रणीयाभिभूतिं सुधास्वःस्रवन्तीतमीकान्तमुख्याखिलद्वेषभाजाम् ।
किमु श्लोक एतस्य मूर्तः समेतो दधि व्यालुलोके पुरस्तादनेन ॥९५॥

अनेन हीरगुरुणा पुरस्तादग्रे दधि पयः सुतो व्यालुलोके वीक्ष्यते स्म । सम्मुख दधि दृष्टमित्यर्थ । उत्प्रेक्ष्यते—मूर्तस्तनूमानेतस्य सूरेः श्लोको यश. किमु समेत आगत इव । किं कृत्वा । सुधा पीयूषम्, स्व.स्रवन्ती गङ्गा, तमीकान्तश्चन्द्र, मुख्याः प्रकृष्टा येषामादो वा तादृशा अखिलाः समस्ता. श्वैत्यश्रिया द्वेषभाजो वैरिणः प्रतिपक्षाः तेषामभिभूतिं पराभव प्रणीय विधाय कृत्वा ॥

यदोजोजितः किं प्रसत्त्यै समेतः पुरो हव्यवाहो गलद्वायुवाहः ।
यतीन्द्रेण गर्जन्गजोऽप्यालुलोके प्रयाणे प्रभोर्दुन्दुभि दन्ध्वनन्किम् ९६

यतीन्द्रेण सूरिणा पुरोऽग्रे हव्यवाहो वह्निरालुलोके निरीक्षित. । किंभूत । गलन्निर्गच्छन् वायुवाहो धूमो यस्मात् । निर्धूम इत्यर्थ. । उत्प्रेक्ष्यते—येन सूरिणा ओजसा स्वचलप्रतापेन कृत्वा जितो भूत. सन् प्रसत्त्यै अर्थात्सूरे प्रसन्नीकरणार्थं किं समेतः समागत इव । अपि पुनः सूरिणा गर्जन् बृंहित विदधत् गर्जारव गलगर्जित कुर्वाणः गजो वारणो हस्ती । पुर आगच्छन्नित्यध्याहार्यम् । आलुलोके ददृशे । उत्प्रेक्ष्यते—प्रभोः प्रयाणे पूर्वदिक्प्रस्थाने दन्ध्वननतिशब्दायमानो दुन्दुभिरेव नि स्वान इव भेरीव वा पटहो वा । 'भेरीदुन्दुभिरानक' इति त्रयोऽप्येकार्था हैम्याम् । शास्त्रान्तरे पृथगर्था अपि

क्रियते । यतः प्रायः कुसुमेभ्य एव फलान्याविर्भवन्ति । यदुक्तम्—'अहो [illegible] वृष्टिरहो अकुसुमजं फलम् । अहो पुराकृतं पुण्यं यद्दृष्टो नाथलोचनैः ॥' इति [illegible]

किमाविर्बभूवे स्वभावेन धर्मे धिया शांभवे काश्यपीशासितु[illegible] ।
यदन्तर्मदीयागमं लिप्सतेऽसौ विलासीव पुंस्कोकिलः पुष्प[illegible]

अथ वा काश्यपीशासितुर्भूपालस्य धिया बुद्ध्या स्वभावेन [illegible] । [illegible] 'शंभुः स्वयंभूर्भगवान् जगत्प्रभुस्तीर्थंकरः' इति हैम्याम् । [illegible] आविर्बभूवे प्रकटीभूतम् । यद्यस्मात्कारणादसौ नृप अन्त[illegible] मदीयागम[illegible] लिप्सते कामयते वाञ्छति । क इव । पुंस्कोकिल इव । [illegible] पुष्पकाले वसन्तसमयं समीहते । किंभूतः । विलासी क्रीडा[illegible] । [illegible] मदीयस्यागमस्तस्येव क्रीडासक्तः ॥

[illegible] जल्पतस्तान्प्रति श्रीव्रतीन्दोः क्षितीन्दोर्बभाण[illegible]
[illegible] निर्निमेषो [illegible] गम्भीरिम[illegible] ॥

[illegible]

वा उवाच ब्रूते स्म । उत्प्रेक्ष्यते—विभोः सूरीश्वरस्य सेवनार्थं सेवाम[illegible]
विश्वत्रचीमाकारयन्निव ॥

ममाग्रे द्विजिह्वा यथा यान्ति दूरे तवापीति वग्गुर्वदन्दक्षिणो[illegible]
तवाधीश वामोऽप्यवामोऽस्तु मद्वत्खरस्य स्वरः किं ब्रवीतीव [illegible]

वग्गुर्नकुलः प्रभोर्दक्षिणोऽनुकूलो दक्षिणदिग्भागभाग्भूत् । वामाद्दक्षिणदे[illegible]
त्यर्थः । उत्प्रेक्ष्यते—इति वदन्कथयन्निव । इति [illegible] गर्भितोत्प्रेक्षा । [illegible]
अधीश, यथा ममाग्रे द्विजिह्वा भुजगा दूरे यान्ति तथा तेनैव प्रकारेण तवा[illegible]
जिह्वा द्विरसना मत्सरिणः खलाः पिशुना दूरे यान्तु । पुन [illegible] गर्दभस्य
उत्प्रेक्ष्यते—इति ब्रवीतीव भाषते इव । किंभूतः । वाम [illegible] । इति
हे अधीश, तव वामोऽपि प्रतिकूलोऽपि मद्वद्दक्षिणवामोऽस्तु अनुकूलो भवतात्

यतो जन्मिनामीप्सितं शर्म दत्से प्रभो भिन्धि नत्तेन तिर्यक्त्वदुःखम[illegible]
इतीव स विज्ञप्यते तित्तिरैणैः स सव्यापसव्योद्भवद्गानयाने ॥ १०१

तित्तिराः खरकोणाः । लोके 'गणेश' इति प्रसिद्धाः । तथा एणा मृगा हरिणा[illegible]
सव्यापसव्ययोर्वामदक्षिणयोरुद्भवन्ति प्रकटानि जायमानानि गानि [illegible]
यानानि गमनानि तैः कृत्वा । उत्प्रेक्ष्यते—स सूरिरिति विज्ञप्यते स्म । [illegible]
[illegible]ति विज्ञप्तिर्विधीयते स्म । इति किम् । हे प्रभो, यत [illegible] कारणात् [illegible]
[illegible]प्सित मनोवाञ्छित शर्म सुख दत्से ददासि तेन कारणेन त्व [illegible]
[illegible]त्वेन [illegible] । [illegible] भेदय नाशयेति ॥

व्यपोह्यैकहृत्त्वं त्वमसाद्विगान रसन्तीति किं वायसास्तस्य वामाः ।
शुभायामरी भैरवा चान्युपेताप्यवामागवद्भैरवी निःस्वनन्ती ॥ १०२ ॥

वामाः सव्ये भागे वर्तमाना वायसाः काकाः । उत्प्रेक्ष्यते—[illegible]
[illegible]न्तीव । इति किम् । हे प्रभो, त्वमसाद्विगानमसा[illegible]
[illegible] [illegible]पि ध्वनिः । व्यपोह [illegible]
[illegible] भैरवी पक्षिविशेष । लोके 'भैरव' इति प्रसिद्धा [illegible]
[illegible] । उत्प्रेक्ष्यते—[illegible]
[illegible] देवी वाम्युपेता समागता ॥

[illegible]मुख्य मुख्याः शकुनाः परःशता परेऽप्यभूवन्गुणसालिनः [illegible] ।
तदर्थसिद्धेरुपमान्यताया[illegible] किं [illegible]न्ति ॥ १०३ ॥

[illegible]
[illegible]
[illegible]

अथेति पूर्वोक्तकथनानन्तरं तेन हीरसूरिणा इति पूर्ववाक्यमुदित्वा कथयित्वा श्राद्ध पुरस्तान्निवेद्य आस्ये स्ववदने अनध्यायिका यस्यां तिथौ किमपि नाधीयते सानध्यायिका तिथिः । 'प्रतिपत्पाठनाशिनी' इति वचनात् । वास्यते स्म वासिता । मानं कृत्वा स्थितमित्यर्थः । केव । प्राघुणीव । यथा आश्रये स्वगृहे कापि पूर्वपरिचिताप्यपराप्यभ्यागतिका सौजन्यात्स्थाप्यते आदरपूर्वं रक्ष्यते । उत्प्रेक्ष्यते—तदा तस्मिन्नवसरे निजास्यामृतांशोरात्मीयवदनचन्द्रस्य तिथीनां प्रतिपदादिदिनानां प्रणयति करोति इति प्रणीस्तत्त्वं तिथिकारकत्वम् । 'तिथिप्रणी व्यभिधानत्वात् श्वेतवाज्यमृतसूतिथिप्रणीः' इति हैम्याम् । सार्थकं सत्यार्थं निर्मित्सता निर्मातुं कर्तुमिच्छता वाञ्छतेव ॥ इति हीरसूरिप्रतिवचनम् ॥

प्रभोर्वाक्सुधासारमाकण्ठमेते सकर्णा निपीय स्वकर्णाञ्जलिभ्याम् ।
सृजन्तो निमेषानपि क्ष्मां स्पृशन्तो दधुः सौमनस्यं तदाश्चर्यमेतत् ८६

एते सकर्णाः प्राज्ञाः श्राद्धाः निमेषान्नयननिमीलनोन्मीलनानि सृजन्तः कुर्वन्तोऽपि पुनः क्ष्मां क्षोणीं स्पृशन्तोऽपि पादाभ्यां भुवं संघट्टयन्तोऽपि यत्सुमनसां भावः सौमनस्यं देवत्वं दधुः धारयन्ति स्म । देवा हि निमेषान्न कुर्वते भूमीमपि न स्पृशन्ति च । एते तु तथा नेति एतन्महदाश्चर्यमतिशायि चरित्रम् । वस्तुतस्तु शोभनप्रसन्नमनस्त्वमिति । किं कृत्वा । प्रभोर्हीरसूरेर्वाक् वाणी सैव सुधा पीयूषं तस्या आसारो वेगवती वृष्टिः । अथ वा सुधाया अमृतादपि सारं वस्तु श्रेष्ठः पदार्थः । तं पीत्वा । कथमाकण्ठं कण्ठपीठं यावत् आस्वाद्य सादरं श्रुत्वा वा ॥

किरन्त्यामृतं प्रीणितानेकजन्तोर्गिरा तस्य धाराकदम्बा इवामी ।
समुल्लासिलोमावलीकोरकाङ्गा इदं व्याहरन्ति स्म पौराः प्रमोदात् ८७

अमी अकमिपुरीयाः पौराः श्राद्धाः इदं वक्ष्यमाणं व्याहरन्ति स्म बभाषिरे । किम् । समुल्लासिनी प्रोल्लसनशीला लोमावली रोमराजी एव कोरकाः कलिकाः अङ्गे वपुर्लताया येषां ते । कया कृत्वा । प्रीणिताः प्रीतिं प्रापिताः अनेके यावन्तो जन्तवः प्राणिनो येन तादृशस्य गुरोरमृतं सुधां किरन्त्या विस्तारयन्त्या भव्यानाममृतपानं कारयन्त्या गिरा वाण्या । उत्प्रेक्ष्यते—धाराकदम्बा इव । यथा धाराभिर्जलवाहवृष्टिभिराहिताः संसिक्ताः कदम्बा धाराकदम्बाः कोरकिताः कुड्मलितशाखा भवन्ति ॥

"किरन्त्यामृतं तस्य लोकंपृणस्याम्बुवाहस्य वृष्ट्येव धाराकदम्बाः ।
गिरोल्लासिलोमावलीकुड्मलाङ्गा इदं व्याहरन्ति स्म पौराः प्रमोदात् ८७

पौरा नागरिकाः प्रमोदादानन्दादिदं वक्ष्यमाणं व्याहरन्ति स्म भाषन्ते स्म । किम् । उल्लसतीत्येवंशीला उल्लासिनी या लोमावली रोमराजी सैव कुड्मलाः कोरकाः

द्विपद्वीपिद्विपद्वेष्यमुख्यजन्तूचितां क्वचित्।
पदवीं क्षोणिभृत्क्षोणीमिव सूरिरलङ्घयत् ॥ १०८ ॥

सूरिः क्षोणिभृतः पर्वतस्य तथा देशाधिपस्य च क्षोणीं गह्वरोर्वी भूमीमिव पदवीं मार्गमलङ्घयत् अतिक्रामति स्म। किंभूताम्। क्वापि कुत्रापि प्रदेशे स्वपुटत्व विषमो-न्नत समजातमस्यामिति स्वपुटिता तथा क्वापि स्थाने द्रुमाणां द्रोणीभिर्विविधतरुश्रे-णीभिः सनाथा अनश्वरताम्। द्रोणिशब्दः श्रेणीवाची। यथा चम्पूकथायाम्—'शिखीप-ञ्जरद्रुमा विचिनुते सान्द्रद्रुमद्रोणिषु' इति। 'द्रोणी तु नीवृतिभेदे शैलसर्पा च' इत्यने-कार्थः। तथा 'द्रोणिरिरन्तोऽपि समुदायवाची च' इति तदवचूर्णिः। तथा क्वचित्कुत्र-चिद्देशे वहन्त्यो नद्योपरकुण्डादिभ्यो निःसरन्त्यो वाहिन्यो नद्यो यत्र। पुनः क्वचिद्गह्व-रादिषु भीराणामप्रदेशादिषु वा भोतरा इति प्रसिद्धेषु किरातैर्भिल्लैराकलिता सयु-क्ताम्। पुनः क्वचिदरण्यादा द्विपा मत्तमतङ्गजा द्वीपिनो व्याघ्रचित्रकाया द्विपद्वेष्याः केसरिणस्त एव मुख्या प्रकृष्टाः प्रमुखा या ये जन्तवो वनसत्त्वास्तेषामुचितां निवास-योग्याम्॥ युग्मम्॥

क्रमाद्वटदले फुल्लाम्भोजे भृङ्ग इवागमत्।
स्तम्भतीर्थस्य सङ्घेन तस्मिन्प्रभुरवन्द्यत ॥ १०९ ॥

क्रमाद्विहारपरिपाट्या प्रभुर्हीरसूरिर्वटदले 'वडदलु' इति नाम्ना प्रसिद्धे पुरे आगम-दाजगाम। क इव। भृङ्ग इव। यथा फुल्ले विकसिते अम्भोजे कमले मधुकर आग-च्छति। पुनस्तस्मिन्वटदलाग्रामे प्रभुः स्तम्भतीर्थसंघेन साधुसाध्वीश्राद्धश्राद्धीरूपजनस-मुदायेन अवन्द्यत सनेत नमस्कृत ॥

भक्तिप्रह्वमना जिनाधिपमताधिष्ठायिनी निर्जरी
तस्मिन्नक्तमवाकिरद्व्रतिपतिं नीरन्ध्रमुक्ताफलैः।
श्रुत्वा तीर्थकरानुकारिभगवन्माहात्म्यमुत्कण्ठिता
विद्मो वन्दितुमागता प्रियतमा राज्ञः स्वतारोत्करैः॥ ११० ॥

तस्मिन्वटदलाग्रामे भक्त्या सेवाभक्त्या प्रह्व नम्र प्रवण निर्भर वा मनो मानस य-स्यास्तादृशी जिनमतस्य श्रीजिनशासनस्य अधिष्ठायिनी अधिष्ठापिका निर्जरी विद्या-धिका नारी देवता नक्त रात्रौ। कलौ प्रायो देवताना नक्तमेवागमस्य दृश्यमानत्वात् श्रूयमाणत्वाच्च निशि। नीरन्ध्रैर्निश्छिद्रैर्वेधरहितैः। रक्षितैरित्यर्थः। मुक्ताफलैर्मौक्तिकैर्व्रति-पतिं श्रीहीरविजयसूरिमवाकिरद्वर्धापयामास। 'अवाकिरन्वयोवृद्धास्तं लाजैः पौरयो-षितः' इति रघुवंशे। तत्र वयमेव विद्मो जानीमः। उत्कण्ठिता उत्कण्ठाकलिता उत्सुकीभूता सती स्वताराणां स्वशरणीभूतानामात्मपरिवारीभूताना तारकाणां तारका-भिधसेवकानां ज्योतिषां चोत्करैः समूहैः सार्धं राज्ञः कस्यचिन्नृपस्य चन्द्रस्य वा प्रिय-

स यतिना श्रमणानां मध्ये क्षितेः क्षोण्या द्विजपतिश्चन्द्रः। राजेत्यर्थः। क्रमाद्विहारपरिपाट्या वर्त्म मार्गं व्यलङ्घत अतिक्रान्तवान् उल्लङ्घयामास। किंभूतं वर्त्म। क्वचित्प्रदेशे मृगा कुरङ्गाः उपलक्षणादन्येऽपि वन्यश्वापदाः तथा चित्राः सर्पजातिविशेषाः लोके 'चित्रडि' इति प्रसिद्धा उपलक्षणात्तत्तज्जातयश्च। अथवा चित्रा आखुकपर्णी इन्द्रवारुणी वा उपलक्षणात्सर्वापधयस्ताभिरन्वितम्। किंवत्। पवनवर्त्मवद्यथा आकाशं मृगो मृगशीर्षं पतङ्गः सूर्यः तथा चित्रा नक्षत्रं तैर्युतम्। 'चित्रादन्त्यां सुभद्रायां नक्षत्रौषधिभेदयोः। दिव्यस्त्रीसर्पयोराखुपर्ण्यां च' इत्यनेकार्थतिलके। पुनः किंभूतम्। मदनैर्मण्डल इति नाम प्रसिद्धैः पादपैर्मेदुरं भृतम्। किमिव। कुलमिव। यथा एणकान्ता मृगाङ्गना हरिण्यस्तासां दृश इव दृशोऽतिचपलानि लोचनानि यासां तासां स्त्रीणां वृन्दं मदनेन कन्दर्पेणोपचितम्। पुनः किंभूतम्। सह सहदेवैरौषधिविशेषैस्तथा भीमैराम्लवेतसैः तथा अर्जुनैरर्जुननामवृक्षविशेषैर्वर्तते यत्तत्। किं च कुरुनिकेतवत् यथा कुरूणां कौरववंशीयनृपाणां पाण्डूनां राज्ञाम्। महत्त्वाद्बहुवचनम्। कुरोः पाण्डोर्नृपस्य वा गृहं सह सहदेवो माद्रीनन्दनः भीमार्जुनौ कुन्तीसुतौ वृकोदरकिरीटिनौ तैर्युक्तम्। 'सहदेवेनैकेन स्पर्धमाना अनेकैः सहदेवैः सङ्गताः' इति चम्पूकथायाम्। पुनः किंभूतम्। क्वचित्कुत्रचित्स्थाने कीचकैः सच्छिद्रवंशैः वेणुभिः अञ्चितं कलितम्। किंवत्। विराटनृपगेहवत्। यथा विराटराजस्य गेहं कीचकैर्विराटनृपपत्न्याः सुदेष्णायाः शतसहोदरैः कलितं सहितम्। पुनः किंभूतम्। क्वचित्प्रदेशे विविधा लघुवृद्धादयो वाहिन्यो नद्यस्ताभिर्मण्डितम्। किंवत्। नृपसमीपवत्। यथा राज्ञः पार्श्वे विविधाभिर्गजहयरथपदातिप्रमुखाभिः सेनाभिर्भूषितं भवति। 'वाहिनी सिन्धुसैन्ययोः' इत्यनेकार्थः। पुनः किंभूतम्। शिखिनां मयूराणां विविधैः स्फूर्जितैः केकारवताण्डवक्रीडादिविलासैः कलितम्। किंवत्। अग्निविद्भवनवत् यथा अग्निहोत्रीयाणां गृहं शिखिनां दक्षिणाग्निहवनीयगार्हपत्याभिधानां त्रयाणां हुताशनानां विस्फूर्जितैः स्फूर्तिभिः कलितं भवेत्। पुनः किंभूतम्। करीन्द्राणां यूथनाथानां कुलैर्वंशैः सकुलं व्याप्तम्। किंवत्। विन्ध्यभूमीध्रवत्। यथा विन्ध्याचलो गजेन्द्रकुलैः सकुलो भवति॥ इति गन्धाराकमिपुरमध्यमार्गवर्णनम्॥

विबुधपतिपुरंध्रीवन्धुरारब्धलीलं
जिनपदकृतशोभं संचरच्छ्वेतदन्ति।
तटमिव वरटाया वल्लभः सर्वहाया
अकमिपुरसमीपं भूषयामास सूरिः॥ ११४॥

सूरिरकमिपुरसमीपमहम्मदावादनगरपार्श्वं भूषयामासालंकरोति स्म। किंभूतं। विबुधपतीनां कोविदपुरंदराणां पुरंध्रीभिः शुककामिनीभिः वन्धुराः तरुणकामिजनमनोहराः आरब्धाः प्रक्रान्ता लीला वनवसन्ततरुकुसुमावचयहल्लीसकगाननृत्यान्दोलनादि-

भयो दृश्यन्ते। भेरी प्रसिद्धा मदनभेर्यपि। दुन्दुभिर्निःस्वानो राजवाद्यमानकः [illegible] 'ढोल' इति प्रसिद्धः॥

त्वयारोपि केतुः कुले योगभाजामितीवालपन्तं क्वणैः किंकिणीनाम्।
स्वमूर्ध्ना विहायः स्पृशन्तं स केतुं मुमुक्षुक्षितीशोऽक्षिलक्षीचकार ९७

स मुमुक्षुक्षितीशः। निजाग्रे इति ज्ञेयम्। केतु ध्वजमक्षिलक्षीचकार लोचनगोचरी-कुरुते स्म पश्यति स्म। किं कुर्वन्तं केतुम्। स्वमूर्ध्ना निजमस्तकेन कृत्वा विहायो व्योमाङ्गणं स्पृशन्तं संघट्टयन्तम्। अम्बरचुम्बितमित्यर्थः। उत्प्रेक्ष्यते—किंकिणीनां क्षुद्रघण्टिकानां क्वणैः रणज्झणितिशब्दैः इत्यालपन्तं गुरुं प्रति कथयन्तमिव। इति किम्। हे प्रभो, त्वया योगभाजां योगीन्द्राणां कुले वंशे केतुः पताका ध्वज आरोपितः॥

सशब्दानिवाब्दान्पतद्वारिधारान्ध्वनद्भृङ्गनिर्यद्रसान्सान्द्रसालान्।
निरीक्ष्य क्षणं नृत्यतः क्लृप्तकेकारवान्केकिनो दक्षिणानैक्षतासौ॥ ९८॥

असौ सूरिर्दक्षिणान्दक्षिणदिग्विभागवर्तिनः अनुकूलान्वा केकिनो मयूरानैक्षत आलो-कते स्म। कतिचन शकुना दक्षिणविभागस्थिता सिद्धिविधातारो भवन्ति। [illegible]-क्तम्—'जम्बूवासमयूरो भारद्वाहेतहेवनउलेअम्। दसणमेव पसत्थं पयाहिणे [illegible] पत्ती॥' इति। किंभूतान्केकिनः। क्लृप्तो विरचितः कृतः केकारवो यैस्ते। केकिनो [illegible] केका शुक्लापाङ्गोऽस्य वा केका। अत एव केका विद्यते येषां ते केकिनः तान्। पुनः किं कुर्वतः। नृत्यतः ताण्डवमाडम्बरयन्तः। किं कृत्वा। क्षणं निमेषमात्रं। सान्द्रान् सच्छायान् सस्नेहान्वा सालान्द्रुमान्वृक्षान्निरीक्ष्य दृष्ट्वा। किंभूतान् सालान्। ध्वनन्तो मञ्जुगुञ्जारवं कुर्वन्तः शब्दायमाना भृङ्गा भ्रमरा येषु। पुनः किंभूतान्। निर्यन्तोऽन्तः निर्गलन्तो निःसरन्तो रसा मकरन्दा येभ्यस्तान्। कानिव। अब्दानिव। [illegible] शब्दैर्गर्जारवैर्वर्तन्ते ये ते तथा। पतन्त्यो निरन्तरं निर्यान्त्यो वारिणां [illegible] रेखाकारा दृष्टयो येभ्यस्तादृशान्। मेघानालोक्य मयूरा नृत्यन्ति॥

अवामेव वामाप्यमुष्यानुकूलं चुकूज द्रुमे भक्ष्यमादाय देवी।
त्रिलोकीमिवाकारयन्सेवनायै विभोर्दक्षिणीभूय चापोऽप्युपागात्॥ ९९॥

देवी कृष्णचटिकापोतकी नामा। यदुक्तं गुरुपोतसनकाव्ये—[illegible] च्छवि' इति। लोके तु देवीति प्रसिद्धा। निष्कण्टकदुरितानां [illegible] वामापि सव्यभागवर्तिन्यपि अथ च वामाप्रति[illegible] [illegible] अवामेव दक्षिणेव अनुकूलेव [illegible]। अमुष्य सूरेरनुकूलं [illegible] [illegible] [illegible] [illegible] [illegible]

पर्याण्यन्ते स्म वाहा हरिहय इवोत्तीर्णवन्तः क्षमाया
काप्यप्राप्तावलम्बाम्बरचरणभवद्भूमनिर्वेदभाजः ।
शृङ्गार्यन्ते गजेन्द्रा गिरिगुरुवपुषः क्लृप्तसिन्दूरपूरा
विभ्रः प्रातस्त्यसंध्याः कुनयसमुदयज्योतिरस्तं नयन्त्यः ॥ ११७ ॥

वाहास्तुरगा पर्याण्यन्ते स्म पल्ययनकलिता क्रियन्ते स्म । उत्प्रेक्ष्यते—क्वापि कस्मिन्नपि प्रदेशे अप्राप्तमनासादितमालम्बनमूर्ध्वीभवनोपवेशनादिस्थित्याधारस्थानं यत्र तादृशेऽम्बरे गगनाङ्गणे चरणं परिभ्रमणं तस्माद्भवन्नुत्पद्यमानो यो भूम्ना बाहुल्येन निर्वेदः खेदः तं भजन्तीति तादृशाः सन्तः क्षमायाः पृथिव्यामवतीर्णवन्त आगता इन्द्राश्वा इव । 'शतैस्तमक्ष्णामनिमेषवृत्तिभिर्हरिं विदित्वा हरिभिश्च वाजिभिः' इति रघुवंशे शक्रस्याश्वानां बाहुल्यं न त्वेक एवोच्चैःश्रवाः । अथ वा सूर्याश्वा इव । पुनर्गजेन्द्राः शृङ्गार्यन्ते स्म रक्तपीताम्बरचामरकिंकिणीघण्टाद्यनेकशृङ्गारयुक्ता निर्मायन्ते स्म । किंभूताः । गिरिः पर्वतस्तद्वद्गुरु महद्वपुः शरीरं येषाम् । पर्वतप्राया इत्यर्थः । पुनः किंभूताः । क्लृप्तो रचितः सिन्दूराणां शृङ्गारभूषणानां पूरः समूहो येषु । उत्प्रेक्ष्यते—प्रातस्त्याः प्रातःकालीनाः संध्या इव । किं कुर्वन्त्यः । कुनयानां शाक्यादीनां कुमतानां वा समुदायो गणः स एव ज्योतिर्ग्रहनक्षत्रतारकादिस्तदस्तं नाशं नयन्त्यः प्रापयन्त्यः ॥

भूम्या व्योम्नेर्ष्ययेवाधृषत रविरथाः पद्महस्तैः श्रिताङ्काः
कैश्चित्सज्जीक्रियन्ते कनकमणिमयाः सत्तुरङ्गाः शताङ्गाः ।
पङ्क्तिः पादातिकानां विविधमणिगणालंकृतीरुद्वहन्ती
राभस्यादस्पृशन्ती भुवमपि सुमनःश्रेणिवत्सज्जति स्म ॥ ११८ ॥

कैश्चित्पुरुषैः सन्तः शोभनास्तुरङ्गा अश्वा येषु तादृशाः शताङ्गाः स्यन्दना रथाः सज्जीक्रियन्ते । किंभूताः । कनकं स्वर्णं मणयो रत्नानि प्रचुराणि प्रधानानि वा येषु । पुनः किंभूताः । पद्महस्तैः क्रीडार्थं हस्ते गृहीतकमलैः, अथवा भाग्यवत्तया पद्ममाकृत्या हस्ते येषां ते । श्रितोऽङ्कः सेवित उत्सङ्गो येषाम् । उत्प्रेक्ष्यते—व्योम्ना नभसा सममीर्ष्यया स्पर्धोद्भूताभ्यसूयया भूम्या पृथिव्या रविरथाः सूर्यस्यन्दना इवाधृषत ध्रियन्ते स्म । तेऽपि कमलपाणिभिर्भास्करैरधिष्ठितमध्यास्तथा सुवर्णमणिमयाः शोभनाश्वाश्च । सूर्याणां बाहुल्याद्रथानामपि बाहुल्यम् । पुनः पादातिकानां पत्तीनां महेभ्यानां सार्धम् । सशस्त्राः पत्तिजना भवन्त्येव । अथ वा पदचारिणीमल्पद्रव्यत्वाद्वाहनाभावस्तेन चरणचारिता तेषां पङ्क्तिः परम्परा सज्जति स्म । किं कुर्वन्ती । विविधानामनेकप्रकाराणां मणिगणानामर्थात्स्वर्णरत्नराजीनामलंकृतीर्भूषणानि उद्वहन्ती धारयन्ती । पुनः किंभूता । राभस्यात्तूर्यदर्शनोत्सुक्याद्रव क्षोणीमण्डलमप्यस्पृशन्ती न संघट्टयन्ती । किंवत् ।

पाङ्भ्यः पराः कथिताः' इति क्रियाकलापे। तदर्थसिद्धेस्तस्य सूरेरर्थसिद्धेः कार्यस्य निष्पत्तेः प्राक् पूर्वं प्रकटीभवन्ति प्रकाशानि जायमानानि चिह्नानि [illegible]। शकुनशब्दः पुनपुंसके दृश्यते ॥

वाचोऽनुबिम्बाभिरिवाङ्गनाभिराशीर्भिरध्वन्यभिनन्द्यमानः।
महोदयोदर्कविधायिनो धिया विमृश्य सूरिः शकुनान्पुरोऽचलत् [illegible]

सूरिस्तपागच्छनायकः महानतिशायी उदयो मोक्षश्च स एवोदर्क उत्तरका[illegible]त विदधति कुर्वन्तीत्येवंशीलान् शकुनान् धिया स्वबुद्ध्या विमृश्य विचार्य पुरोऽग्र अचलच्चचाल प्रतिष्ठते स्म। किं क्रियमाणः। अध्वनि प्रस्थानमार्गे अङ्गनाभिः [illegible]धूभिराशीर्भिर्मङ्गलशंसनवाणीभिरभिनन्द्यमानः स्तूयमानः। उत्प्रेक्ष्यते—अङ्गनाभि[illegible] वाग्देवताया अनुबिम्बाभिः प्रतिकृतिभिरिव। सरस्वतीदेवीप्रतिबिम्बाभिरि[illegible]। [illegible] हीरविजयसूरेः प्राचीं दिशं प्रति प्रस्थितौ शुभशकुनानि ॥

द्विवेललीलाप्रविसारिवेलापयोभुजाभ्यां परिरभ्य भूम्ना।
मत्तेभयानामिव वल्लभेनाम्भोराशिना स्वाङ्कमवाप्यमानाम् ॥ १०१ ॥
महीयसीं नाम महीं स्रवन्तीं विजृम्भिहैमाब्जरजःपिशङ्गाम्।
वेणीमिव स्वर्णमयीं नदीशनेमीन्दिरायाः प्रभुरुल्ललङ्घे ॥ १०२ ॥

प्रभुर्हीरसूरिः महीं नाम स्रवन्तीं नदीमुल्ललङ्घे उत्तरति स्म। किंलक्षणाम्। [illegible]रीमतिशयेन महतीम्। महत्प्रमाणामित्यर्थः। पुनः किंलक्षणाम्। विजृम्भि[illegible] शीलानां हैमानां काञ्चनसम्बन्धिनामब्जानां कमलानां रजोभिः पीत[illegible] [illegible] पीतवर्णां सञ्जाताम्। उत्प्रेक्ष्यते—नदीशनेमीन्दिरायाः। [illegible] [illegible]श्रिया इत्यर्थः। स्वर्णमयीं काञ्चनरचितां वेणीं स्त्रीशिरोरुहाभरणं [illegible] [illegible]परि धीयते। केशाः संयतास्सन्बध्नेन क्षिप्यते वा सा स्वर्णमयी [illegible] [illegible]र्णीत्युच्यते। स्वर्णवेणीति शिरोरुहभूषणमनुना [illegible] [illegible]के क्रियमाणाम्। अम्भोराशिना समुद्रेण [illegible] [illegible] [illegible]। वल्लभेन मत्तेभयानामिव। यथा [illegible] [illegible] [illegible]

[illegible] ॥

[illegible]।

[illegible] ॥ १०३ ॥

त्वेन निर्वमे' इति रघौ। उत्प्रेक्ष्यते—गुरो सूरीन्द्रस्य नूतनाम्भसः पयोधरकल्प आलिङ्गनदायिनः अम्भोदस्य मेघस्य [illegible] गर्जारवैरिव॥

केऽपि कुतूहलकलिता वन्दितुमितरे विलोकितुं केचित्।
विकसितसुरतरुसुममिव मधुपाल्लसुपागमन्पौराः॥ १२३॥

केऽपि केचन नागरिकाः कुतूहलेन कौतुकेन कलिता सहिता [illegible] गन्त। पुनः इतरे केचित् अन्ये केचन त गुरुं वन्दितुं नमस्कर्तुमागत [illegible] कितुं तद्रूपमेव द्रष्टुं पौरा नागरिकाः सूरिमुपागमन [illegible] के इव। मधुपा इव। यथा भ्रमरा विकसितं विजृम्भितं [illegible] पुष्पम्। जातिवाचित्वादेकवचनम्। कुसुममुपगच्छन्ति॥

प्रभोः पदाम्भोजयुगं पुरीजना नमस्कृतैर्गोचरतां नयन्ति।
प्रमोदनिर्यन्नयनाश्रुबिन्दुभिः श्रान्तं पथा [illegible]॥ १२४॥

पुरीजना अहम्मदावादवासिश्राद्धसमूहा प्रभोः गुरोः पदाम्भोजयुगं [illegible] द्वन्द्वं नमस्कृतैर्नमस्कारस्य प्रणामस्य गोचरतां [illegible] देनानन्देन निर्यता निगच्छता नयनात् [illegible] उत्प्रेक्ष्यते—पथा मार्गेण [illegible] श्रान्तं [illegible] यन्तीव। मन्ये इवार्थे॥

मुमुक्षुक्षोणीन्द्रक्रमकमलयोर्निर्मितमान-
[illegible]।
[illegible]
[illegible]॥ १२५॥

मुमुक्षूणां संसारकारागाराद्[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] अहम्मदावाद [illegible] परिषत् [illegible] [illegible] [illegible]॥

[illegible]॥ १२६॥

[illegible]

तमा राज्ञी रात्रिर्वा वन्दितु नमस्कर्तुमागता समेतेव । किं कृत्वा । [illegible] राजमनुकरोति युगप्रधानादिमहिम्ना सदृशीभवति इत्येतच्छ्रोत्र [illegible] माहात्म्य महिमान श्रुत्वा समाकर्ण्य ॥

तत्रानन्द्य जनान्दिनानि कतिचिद्वाचंयमाधीशिता
वर्त्मातिक्रमितुं क्रमात्प्रववृते भूमेः समं साधुभिः ।
वाचा चन्द्रिकया तमः प्रशमयन्नेत्राथ कोरान्पुणं-
स्ताराणा निवहैर्विहायस इव श्यामाङ्गनानायकः ॥ १११ ॥

वाचयमाधीशिता मुनिनायकः क्रमादनुक्रमेण साधुभिः [illegible] सार्धं भूमेर्धरित्र्या वर्त्म पन्थानमतिक्रमितुमुल्लङ्घयितु प्रवृत्ते [illegible] कृत्वा । तत्र वटदत्तग्रामे कतिचित्कियन्ति दिनानि वासरान् [illegible] कानानन्द्य प्रह्लाद्य प्रमोदमेदुरान्विधाय । सूरिः किं कुर्वन् । [illegible] कृत्वा तमोऽज्ञान पाप वा प्रशमयन्निष्पापयन् शान्त [illegible] नेत्र [illegible] पुण्यवतां [illegible] गुणान् [illegible] [illegible]

[illegible]

यस्मिन्पुरे पौरैः प्रभोः प्रवेशः कारितः तत्पुरस्मादहमदावादनाम्नो नगरस्य पतिः खानः [illegible] सूरीश्वरमागुत्य [illegible] गुरुहिमजान् [illegible] आनयति स्म आनीतवान् । [illegible] पृथ्वीनाथः श्रीमन्तं गुरुहीरनामानं प्रभुं सूरिं [illegible] । द्वावपि [illegible] पौराणां नागराणां [illegible] पुरस्मादहमदावादस्य पाटलीपुरस्य नगरस्य च अन्तरे [illegible] नीतम् । कस्मिन्सति । [illegible] कौतुकादिरे [illegible] समस्ता अम्बरचराः [illegible] दिका नभश्चारिणो निरन्तरगमनशालिनो [illegible] पूर्णे महोत्सवे [illegible] पौरैः कृते सति ॥

शृङ्गैरम्बरचुम्बिभिर्विदिगतं विश्वं विपक्षद्रुतेः
प्रासादं त्रिदशार्चिगेव परमं प्राप्य [illegible] ।
गर्भेव हिरण्मयं प्रदलितप्रोन्मादिमानद्विषा
रम्योर्णायुमय विनेयनिहितं तेनासनं शिश्रिये ॥ १२१ ॥

तेन सूरिणा रम्यं [illegible] हिरण्मयम् । विनेयेन शिष्येण निहितं स्थापितम् । [illegible] गुरुणा निहितं हिरण्मयं सौवर्णमासनं [illegible] । [illegible] सूरिणा [illegible] प्रदलिता कृता प्रोन्मादिनो [illegible] [illegible] 'प्रासादो देवभूपानाम्' इति हैमः । [illegible] सूरिं [illegible] सूरेर्गृहागमनोपवर्णनम् ॥

उपायनीकृत्य मणीहिरण्यदुकूलमाभरणादि भूमान् ।
कृताञ्जलिः संमदमेदुराङ्गः स [illegible] ॥ १२२ ॥

स भूमान् राजा [illegible] प्रकारेण [illegible] [illegible] [illegible] समदेन हर्षेण [illegible] [illegible] हिरण्यानि [illegible]

विलासा यत्र। पुनः किंभूतम्। जिनानां तीर्थंकृतां पदैः स्थानैः। प्रासादैरित्यर्थः। कृता विहिता शोभा यत्र। पुनः किंभूतम्। संचरन्तः सम्यक् समीचीनं सरोवरसल्लकीक्षुप्रमुखं चरन्तो भक्षयन्तः। अथ वा सम्यक् सहस्तिनीभिश्चरमलर्णपटहपणवशब्दवादित्रविविधविरुदावलीप्रकटनपूर्वकं प्रचलन्तः श्वेता भद्रजातिजातत्वेनोज्ज्वला दन्तिनो गजेन्द्रा यत्र। क इव। यथा वरटाया राजहंस्याः। 'वारला वरला हंसी वारटा वरटा च सा' इति हैम्याम्। तथा 'नवप्रसूतिर्वरटा तपस्विनी' इति नैषधे। वल्लभो भर्ता राजहंसः। स्वर्वाहाया गगननिम्नगाया गङ्गायास्तटं तीरं भूषयति। किंभूतं तटम्। विबुधपतिः सुरेन्द्रस्तस्य पुरंध्रीभिः पत्नीभिः कमनीयप्रक्रान्तजलजन्मोपचयजनोन्मज्जनादिजलविला यत्र। पुरंध्रीशब्दो दीर्घोऽप्यस्ति। यथा 'अखिलपुरपुरंध्रीनेत्रनी–' इति नैषधे। तथा जिनस्य विष्णोस्त्रिभिस्तारारूपैः पदैः कृता निर्मिता शोभा यत्र। अथ वा जिनपदे आकाशे विरचिता श्रीर्येन। एतावता गगनगङ्गेत्युपपन्नम्। तत्रैव च शक्रकान्तानामुपलक्षणात्सुराङ्गनानां च जलक्रीडाया औचिती। तथा सचरज्जलपानाद्यर्थमागच्छन्नैरावणो यत्र॥

प्रभोरागमनोदन्तः प्रससार पुरान्तरे।
चान्दनीय इवामोदः क्षितौ मलयभूभृतः॥ ११५॥

प्रभोर्हीरसूरेरागमनस्यापादावधारणस्योदन्तः प्रवृत्तिः समाचारः पुरान्तरे नगरमध्ये प्रससार विस्तरति स्म। क इव। आमोद इव। यथा चान्दनीयः श्रीखण्डसंबन्धी परिमलः मलयाचलस्य आषाढभूधरस्य क्षितौ भूमौ प्रसरति॥

विज्ञायागमनं यतिक्षितिपतेरामोदमेदस्विता
प्राप्ताः पौरपरम्परा मधुकृतोर्व्यूहा इवोर्वीरुहाम्।
गन्तुं संमुखमस्य नश्यदतनोः सज्जीबभूवुस्ततः
श्राद्धा राजगृहोद्भवा इव मृगारातिध्वजस्यार्हतः॥ ११६॥

ततस्तदागमनश्रवणानन्तरं पौरपरम्परा नागरिकपङ्क्तयः [illegible] नश्यन् द्वेषितया हन्तुं प्रतिश्रुतत्वेन मृतिभीतेः पलायमानः [illegible] 'अतनुना नवमम्बुदमाम्बुदम्' इति नैषधे। तस्यास्य सूरेरभिमुखं [illegible] के इव। श्राद्धा इव। यथा राजगृहे नगरे उत्पत्तिर्येषां तादृशाः श्राद्धाः मृगारातिः [illegible] ध्वजश्चिह्नं यस्य तस्यार्हतस्तीर्थंकरस्य। महावीरदेवस्येत्यर्थः। [illegible] वन्ति स्म। किंभूता। आमोदेन हर्षेण मेदस्विता पुष्टतां प्राप्ता [illegible] पचितकायस्य प्राप्ता इत्यर्थः। किं कृत्वा। यतीनां क्षितिपतेर्मुनिराजस्य [illegible] स्मिन्नपि समवसरणे [illegible] विज्ञायागमनम्। के इव। मधुकृत इव। [illegible] आगमनं [illegible] ज्ञात्वा [illegible] आमोदेन [illegible] [illegible] ॥

यस्मिन्पुरे पौरैः प्रभोः प्रवेशः कारितः तत्पुरस्याहम्मदावादनाम्नो नगरस्य पतिः स्वामी खान. एतं सूरीश्वरमागृह्यात्यामहं विज्ञप्तिं विधाय स्वान् गृहान्निजान् भवनान् आनयति स्मानीतवान् । क इव । सम्प्रतिकाश्यपीपतिरिव । यथा सम्प्रति नामा काश्यपीपतिः पृथ्वीनाथः श्रीमन्तं सुहस्तिनामानं प्रभुं सूरिं स्वान्गेहानप्रस्तानिनाय । द्वावपि विशिनष्टि—एतं किंभूतम् । अतिशीलाधिकप्रमोदेन पौराणां नागराणां प्रकरैर्वृन्दैः पुरस्याहम्मदावादस्य पाटलीपुत्रस्य नगरस्य च अन्तरे मध्ये प्रवेशितं प्रवेशं कारितमानीतम् । कस्मिन्सति । प्रेक्षया विलोकनेन, अथ वा प्रेक्षार्थं दर्शनार्थं प्रस्खलिताः कौतुकातिरेकात्स्थिरीभूताः अखिलाः समस्ता अम्बरचराः सिद्धगन्धर्वविद्याधरदेवतादिका नभश्चारिणो निरन्तरगमनगामिनो यत्र तादृशे क्षणे महोत्सवे प्रणीते अर्थात्पौरैः कृते सति ॥

शृङ्गैरम्बरचुम्बिभिर्विदधतं विघ्नं विवस्वद्गतेः
प्रासादं त्रिदशार्चयेव परमं प्रापय्य भूपाभरम् ।
भूभर्त्रेव हिरण्मयं प्रदलितप्रोन्मादिभावद्विषा
रम्योर्णायुमयं विनेयनिहितं तेनासनं शिश्रिये ॥ १३१ ॥

तेन सूरिणा रम्यं प्रशस्यमूर्णायुमयं कम्बलिकारूपमासनं विष्टरः शिश्रिये भेजे । किंभूतमासनम् । विनेयेन शिष्येण निहितं स्थापितम् । आस्तीर्णमित्यर्थः । केनेव । भूभर्त्रेव । यथा भूपतिना विशिष्टं वस्तु नीयते अर्थात् स्वस्वामिने नीयते प्राप्यते इति । विनेयाः गुरोः सेवकास्तैर्निहितं हिरण्मयं सौवर्णमासनं श्रीयते । किंभूतेन सूरिणा राज्ञा च । प्रदलिता हता प्रोन्मादिनो दुर्धरा भावा अन्तरङ्गाः, तथा प्रोन्मादी प्रबलेन उन्मत्तो भाव आशयः स्वभावो वा येषां तादृशो द्विषो वैरिणो येन स तथा । किं कृत्वा । त्रिदशस्य देवस्य अर्चया प्रतिमयेव । प्रासादं देवगृहं भूपतिनिकेतनं च । 'प्रासादो देवभूपानाम्' इति हैम्याम् । परममतिशायिनं भूपाभरं शोभासमुदयं प्रापय्य प्रापय्यात्मनेव लम्भयित्वा । प्रापय्येति क्रियारत्नसमुच्चये । प्रासादं किं कुर्वन्तम् । अम्बरमाकाशं चुम्बन्त्यालिङ्गन्ति स्पृशन्ति सपदयतीत्येवंविधैः शृङ्गैरात्मीयशिखरैः कृत्वा विवस्वतः सूर्यगमनस्य विघ्नमन्तरायं दधतं कुर्वाणम् ॥ इति सूरेर्भूपगृहागमनोपवेशने ॥

उपायनीकृत्य मणीहिरण्यदुकूलदामाभरणादि भूपान् ।
कृताञ्जलिः संमदमेदुराङ्गः स भृत्यवत्कृत्यविदित्युवाच ॥ १३२ ॥

स भूपान् राजा साहिबखान इत्यमुना प्रकारेण उवाच गुरोः पुरो वभाषे । किंभूतः । कृत्यमुचितानुचितकार्यं वेत्ति जानातीति । अन्तरोपचरणेन स्वे । पुनः किंभूतः । संमदेन हर्षेण कृत्वा मेदुराणि पुष्टीभूतानि अङ्गानि यस्य सः । पुनः किंभूतः । कृताञ्जलिः विहितहस्तद्वितयसंयोजनः । किंवत् । भृत्यवत् । यथा भृत्यः सेवकः स्वामिनः पुरः स्वस्वामिपुरो वक्ति । किं कृत्वा । मणीन् रत्नानि, हिरण्यानि सुवर्णानि दुकूलानि

सुमन:श्रेणिवत्। यथा देवराजी भुवं न स्पृशति। पादाभ्यामिति शेषः। रत्नालंकारकृतीश्च धत्ते॥

प्रसाधिकाभिः परमाणुमध्या विभूषिताङ्ग्यः पुपुषुर्विभूषाम्।
निनंसयेवोपनता व्रतीन्दोर्भुजंगलोकाद्भुजगेन्द्रवध्वः॥ ११९॥

प्रसाधिकाभिर्मण्डनकारिणीभी रमणीभिः। 'प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव' इति रघुवंशे। विभूषितं विचित्रपत्रवल्लीरचनाभिरलंकृतमङ्गं वपुर्यासां तादृश्यः। परमाणुमध्याः कृशोदर्यः। 'अध्यापयाम परमाणुमध्याः' इति नैषधे। भूषा शोभा पुपुषुः चिन्वन्ति स्म। दधुरित्यर्थः। उत्प्रेक्ष्यते—भुजंगलोकान्नागभवनाद्व्रतीन्दोः सूरीन्द्रस्य निनंसया नन्तुमिच्छया उपनता आगता। 'उपनमन्ति तमोशसमुत्सुकाः प्रणयतो वरितुं सकलाः श्रियः' इति ऋषभनमस्तवे। 'उपनमन्त्यागच्छन्ति' इत्यवचूर्णौ। भुजगेन्द्रवध्वः नागनायकनायिका इव॥

सुदृशां शिरसि व्यलीलसत्कलशाली मणिहेमनिर्मिता।
स्तनवैभवभर्त्सितेव यद्विजिगीषुः परमभ्युपेयुषी॥ १२०॥

सुदृशां सकान्तकामिनीनां शिरसि मस्तके कलशानां कुम्भानां माली श्रेणी व्यलीलसत् विलसति स्म। शुशुभे इत्यर्थः। उत्प्रेक्ष्यते—स्तनानामर्थात्तत्कामिनीकुचमण्डलानां वैभवेन तुङ्गतादिशोभया भर्त्सिता अभिभूता सती तद्विजिगीषुस्तान् कुचान् पुनर्व्याघुट्य विजेतुमिच्छुरभ्युपेयुषी। अभिमुखमुपेता समीपे समागता वा॥

विहायोङ्गणालिङ्गिगेहाग्रशृङ्गानिलालोलकेतुक्कणत्किंकिणीभिः।
पुरी प्रेक्ष्य सूरिं किमायान्तमन्तर्भवत्प्रीतिरातन्तनीतीव गीतिम्॥ १२१॥

आयान्तं स्वस्यान्तिकं समागच्छन्तं सूरिं हीरगुरुं प्रेक्ष्य व्यालोक्य अन्तर्मध्ये आत्मनिजचित्ते भवन्त्युत्पद्यमाना प्रीतिः प्रमोदो यस्यास्तादृशी पुरी अहम्मदावादाभिधाना नगरी। गीतिं गानमातन्तनीति अतिशयेन सृजतीव विस्तारयतीव वा। [illegible] विहायोङ्गणं गगनाजिरमालिङ्गन्त्याश्लिषन्तीत्येवंशीलानां गेहानां मन्दिराणां [illegible] उपरितनानि शृङ्गाणि शिखराणि तेष्वनिलैः पवनैरालोलाश्चञ्चला ये केतवो वैजयन्त्यः पताकास्तेषां क्वणन्तीभिः शब्दायमानाभिः किंकिणीभिः क्षुद्रघण्टिकाभिः [illegible] कानि कृत्वा॥

तुमुलैर्वन्दिवृन्दानां तूर्यस्वरकरम्बितैः।
भूपरीरम्भकाम्भोदनिर्ह्रादैरिव निर्ममे॥ १२२॥

वन्दिवृन्दानां [illegible] तुमुलं [illegible] बहुलनादा [illegible] पतनात् [illegible] निर्ममे [illegible] नितरां [illegible] [illegible] [illegible] बन्दि [illegible]

वायुवेगेन चलद्रथाङ्ग रथपादो यत्र। 'इण् गतौ' इत्यस्य धातोः शतृप्रत्यये यत् इति निष्पद्यते। 'यद्दारुणदारण प्रकुर्वाणम्' इति व्यासषष्टिके काव्ये । प्रयोगस्तु क्रियारत्नसमुच्चये। के इव। यदुपतय इव। यथा वासुदेवेशाः उद्दीप्यमान रथाङ्ग प्रतिभजप्रतिहत चक्र नामायुधविशेषो येषा तादृशाः स्यु'। उत्प्रेक्ष्यन्ते—शताङ्गा. त्वष्ट्रा विश्वकर्मणा देववार्धकिना स्वेनात्मना स्रष्टा निर्मिता इव । पुनरेते श्रीमत्पुरस्तादूर्ध्वंदमा पत्तिव्रजा. पदातिप्रकरा जाग्रति सन्ति। 'सत्तायामस्त्यास्ते जागर्ति च विद्यते च ध्रियतेऽथ' इति क्रियाकलापे। उत्प्रेक्ष्यते—मूर्ति तनु दधतो बिभ्राणाः वीर इति नाम येषा तादृशा. पञ्चमा रसा इव।अस्मिन्काव्ये सबोधनपदादग्रे मे इत्यादेशोऽस्ति। स तु यद्यपि सारस्वतव्याकरणे 'सबोधनपदादग्रे न भवन्ति वसादय' इत्युक्तत्वात्तदनुसारेण सबोधनपदादग्रे एते वसादय आदेशा न भवन्त्येव, तथाप्यन्यत्र क्वाप्यादेशा दृश्यन्ते। यथा वाक्यप्रकाशे—'मित्र ते मे मोदते मनः' इत्युक्ते' । तथा वैतालिककृतौ विक्रमादित्यस्तुतावपि—'स्वच्छेऽन्तर्मानसेऽस्मिन्कथमवनिपते तेऽम्बुपानाभिलाप' इत्युक्तत्वाच्च। अत्रापि स्वामिन्निति सबोधनादग्रे 'मे' इत्यादेशपद प्रयुक्त न दोषायेति॥

स्वर्णं तदेतद्भवदङ्गचङ्गिमश्रीस्पार्धिशिक्षावितितीर्षवो रुषा।
निक्षिप्य वह्नौ च घनैर्निहत्य च्छिन्दन्ति टङ्कैरिव यत्कलादाः॥१३५॥

हे गुरो, इद श्रीमत्पुरो टाकित स्वर्ण काञ्चन तत्प्रसिद्धखनीभवमास्ते । अथ वा तद्यत्सवन्वनिष्टम्। तत्किंभूतम्। यत्सुवर्ण भवता श्रीमतामङ्गस्य वपुपश्चङ्गिमा चारुता तस्य श्रिया लक्ष्म्या राजते। 'जिनवचनपद्धतिश्चक्तिचङ्गिममालिनी' इति पद्मसुन्दरकृतमालवरागजिनध्रुवपदे। स्पर्धते इत्येवंशीलमत एव कारणात् शिक्षा ताडनादिदण्ड वितितीर्षवो दातुमिच्छवः कलादा स्वर्णकाराः रुषा अनौचित्यकरणोद्भूतभूमकोपेनेव वह्नौ वैश्वानरे निक्षिप्य क्षेपयित्वा। च पुनर्घनैर्लोहमयकुट्टनोपकरणैर्निहत्य कुट्टयित्वा टङ्कैरायसतीक्ष्णमुखटङ्कनकैश्च छिन्दन्ति शकलीकुर्वन्तीव॥

स्फूर्जज्ज्योतिर्जलदपथवद्वृन्दमेतन्मणीनां
मुक्तापङ्क्तिस्ततिरिव सता शुद्धिमत्ता वहन्ती।
यानव्राता व्रतिप शिबिकाद्या विमाना इवामी
वासास्येतान्यपि सुमनसामंशुकानीव सन्ति॥ १३६ ॥

हे व्रतिप व्रतिनः सयमिन पाति रक्षयति पालयतीति व्रतिपस्तस्य सबोधनम्। एतत्प्रत्यक्ष झगज्झगिति कान्तिततिनिर्दलितान्धकार मणीनां नानारत्नाना वृन्द वर्तते। किंभूतम्। स्फूर्जद्दीप्यमान ज्योतिर्दीप्तिर्यस्य। किंवत्। जलदपथवत्। यथा जलदाना पन्था मार्गो गगनम्। स्फूर्जन्ति झगज्झगिति कान्तिमन्ति ज्योतींषि ग्रहनक्षत्रतारका यत्र तत्। पुनरेषा श्रीमल्लोचनगोचरसञ्चरिष्णुमौक्तिकमाला विद्यते । किं कुर्वन्ती। शुद्धिमत्तामतिशयेन निर्मलत्व वहन्ती धारयन्ती। केव।सता ततिरिव। उत्तमपङ्क्तिर्नि-

पादवचारगमकलिपुरस्थाहम्मदावादस्य अधिभूः स्वामी । 'अधिपस्त्वीश्वरो नेता परिवृढोऽधिभूः' इति हैम्याम् । साहिबखानस्य श्रवणयोः कर्णयोः प्राघुणीभवति स्म । साहिबखानेन सूरिसमागमनमाकर्णितमित्यर्थः । किंवत् । कनकस्य । 'कलधौतलोहोत्तमवह्निबीजान्यपि गाङ्गेयं गैरिकजातरूपे' इति हैमवत् । विलसतां विकस्वरीभवतां दलानां पत्राणां मालया श्रेण्या शालते शोभते ... शीलस्य वारिजस्य पद्मस्य वनमवत् । यथा हैमाम्बुजावतंस श्रवणयोः प्राघुणो भवति ॥

चतुरङ्गचमूचलनप्रसृतैं रजसा निवहैर्हरितां दयितान् ।
सममाह्वयतीव पुराधिपतिर्यतिनाथनिनंसुरसौ प्रचलन् ॥ १२७ ॥

असौ साहिबखाननामा पुराधिपतिः राजनगरराजः रजसा रेणूनां निवहैः समूहैः हरितां दयितान् दिक्पालान् सम समकालमेवाह्वयति । अथ च आत्मना सम ... माकारयतीव । अर्थात्प्रभुं नन्तुम् । किंभूतैः । चत्वारि चतुःसंख्याकानि वाजिकुञ्जर-रथपदातिलक्षणान्यङ्गानि अवयवा यस्याः तादृश्याश्चम्वाः सेनायाश्चलनेन प्रसृतैः प्रति-दिशं विस्तृतैः । असौ किंभूतः । यतिनाथं हीरसूरिं निनंसुर्नन्तुकामः ... प्रचलन्प्रतिष्ठमानः ॥

तत्पुराधिपतिसाधुधरित्रीनाथयोः पथि युगं मिलति स्म ।
कौमुदीदयितनिर्जरराजाचार्ययोर्द्वयमिवैककराशौ ॥ १२८ ॥

तत्पुरस्याहम्मदावादनगरस्याधिपतिः साहिबखानस्तथा साधूनामनगाराणां धरि-त्रीनाथो महीपतिः राजा तयोर्युगं युगलं पथि सूरिसमागमनमार्गे मिलति स्म एकत्र भवति स्म । किमिव । द्वयमिव । यथा एक एव एककः स चासौ राशिश्च मेषादिकः कराशिस्तस्मिन् कौमुदीदयितश्चन्द्रः तथा निर्जराणां सुराणां राजा स्वामी पुरंदरस्तस्या-चार्यो बृहस्पतिः । 'शैशवावधि गुरुर्गुरुरस्य' इति नैषधे । तयोर्द्वन्द्वं मिलति ॥

नमति स्म मुनीश्वरं पुरीपुरहूतोऽमितभक्तिनिर्भरः ।
शिखरीव गरीयसीं श्रियं फलपङ्क्तेः कलयन्निलातलम् ॥ १२९ ॥

न मीयते स्मेत्यमिता प्रमाणरहिता तादृश्या भक्त्या निर्भरः सोत्सुकः तादृशः पुरी-पुरहूतः राजनगराखण्डलः मुनीश्वरं नमति स्म । प्रभो प्रणामं कृतवानित्यर्थः । क इव । शिखरीव । यथा फलानां सस्यानां पङ्क्तेः श्रेण्याः गरीयसीमतिगुर्वी श्रियं शोभां कलयन्बिभ्राणो वृक्षः इलातलं भूमीमण्डलं नमति ॥

प्रेक्षप्रस्खलिताखिलाम्बरचरव्राते प्रणीते क्षणे
पौराणां प्रकरैः प्रवेशितमतिप्रीत्या पुरस्यान्तरे ।
आगृह्यानयति स्म तत्पुरपतिः सूरीश्वरं स्वान्गृहा-
न्नेतं संप्रतिकाश्यपीपतिरिव श्रीमत्सुहस्तिप्रभुम् ॥ १३० ॥

वायुवेगेन चलद्रथाङ्ग रथपादो यत्र । 'ऋणू गतौ' [illegible] [illegible] [illegible] निष्पद्यते । 'रथाङ्गचरणं प्रकीर्णकम्' इति व्याकरणे [illegible] [illegible] [illegible] [illegible] । प्रयोगस्तु [illegible] न [illegible] । किं [illegible] । [illegible] इव । यथा वासुदेवेन [illegible] [illegible] [illegible] [illegible] प्रतिहत चक्र नामायुधविशेषो येषां तादृशा स्युः । उत्प्रेक्ष्यते—[illegible] [illegible] [illegible] कर्मणा देववार्धकिना [illegible] [illegible] निर्मिता इव । पुनरेते [illegible] [illegible] पत्तिव्रजाः पदातिप्रकरा आयान्ति सन्ति । '[illegible] [illegible] न [illegible] न [illegible] तेऽथ' इति क्रियाकलाप । उत्प्रेक्ष्यते—[illegible] तनु दधतो [illegible] [illegible] [illegible] नाम येषां तादृशा [illegible] [illegible] इव । [illegible] संबोधनपदाद्ये मे इत्यादेशो [illegible] । ननु यद्यपि सारस्वतव्याकरणे 'संबोधनपदाद्ये न भवन्ति वसादयः' इत्युक्त[illegible] [illegible] संबोधनपदाद्ये एते वसादय आदेशा न भवन्त्येव, तथापि [illegible] [illegible] [illegible] । यथा [illegible]—'[illegible] ते मे [illegible] [illegible]' इत्युक्त । तथा '[illegible] [illegible] कमादित्यसुतावपि—'[illegible] [illegible] [illegible]' इत्यु[illegible] । अत्रापि [illegible] संबोधनाद्ये 'मे' इत्यादेशः प्रयुक्त न दोषः ॥

स्वर्णं तदेतद्भवद[illegible]श्रीस्पर्धिशिखाविनिर्णीयिनो रुषा ।

निक्षिप्य वह्नौ च पुनर्निहत्य च्छिन्दन्ति टङ्कैरिव [illegible] ॥१२५॥

हे गुरो, [illegible] [illegible] [illegible] स्वर्णं [illegible] [illegible] । [illegible] [illegible] [illegible] । [illegible] । [illegible] वह्नौ [illegible] निक्षिप्य [illegible] । [illegible] [illegible] [illegible] [illegible] टङ्कैः [illegible] [illegible] [illegible] [illegible] ॥

स्फूर्जज्ज्योतिर्[illegible] [illegible]

[illegible] सता [illegible] [illegible] ।

[illegible] [illegible] [illegible] [illegible] [illegible]

[illegible] [illegible] [illegible] [illegible] ॥ १२६ ॥

[illegible]

पादावधारणमकार्षीत्पुरस्याहम्मदावादस्य अधिभूः स्वामी । 'अधिपस्त्वीश्वरो नेता परिवृढोऽधिभूः' इति हैम्याम् । साहिबखानस्तस्य श्रवणयोः कर्णयोः प्राघुणोऽतिथिः सात् भवति स्म । साहिबखानेन सूरिसमागमनमाकर्णितमित्यर्थः । किंवत् । वर्दिवीजस्य कनकस्य । 'कलधौतलोहोत्तमवह्निवीजान्यपि गारुडं गैरिकजातरूपे' इति हैम्याम् । विलसता विकस्वरीभवता दलानां पत्राणां मालया श्रेण्या शालते शोभते इत्येवंशीलस्य वारिजस्य पद्मस्य वतंसवत् । यथा हेमाम्बुजावतंसः श्रवणयोः प्राघुणो भवेत् ॥

चतुरङ्गचमूचलनप्रसृतै रजसां निवहैर्हरिता दयितान् ।
सममाह्वयतीव पुराधिपतिर्यतिनाथनिनंसुरसौ प्रचलन् ॥ १२७ ॥

असौ साहिबखाननामा पुराधिपतिः राजनगरराजः रजसां रेणूनां निवहैः समूहैः हरितां दयितान् दिक्पालान् समं समकालमेवाह्वयति । अथ वा आत्मना समं सार्धमाकारयतीव । अर्थात्प्रभुं नन्तुम् । किंभूतैः । चत्वारि चतुःसंख्याकानि वाजिवारणरथपदातिलक्षणान्यङ्गानि अवयवा यस्याः तादृश्याश्चम्वाः सेनायाश्चलनेन प्रसृतैः प्रतिदिशं विस्तृतैः । असौ किंभूतः । यतिनाथं हीरसूरिं निनंसुर्नमस्कर्तुमिच्छुः पुनः प्रचलन्प्रतिष्ठमानः ॥

तत्पुराधिपतिसाधुधरित्रीनाथयोः पथि युगं मिलति स्म ।
कौमुदीदयितनिर्जरराजाचार्ययोर्द्वयमिवैककराशौ ॥ १२८ ॥

तत्पुरस्याहम्मदावादनगरस्याधिपतिः साहिबखानस्तथा साधूनामनगाराणां मध्ये धरित्रीनाथो महीपतिः राजा तयोर्युगं युगलं पथि सूरिसमागमनमार्गे मिलति स्म एकत्र भवति स्म । किमिव । द्वयमिव । यथा एक एव एककः स चासौ राशिश्च मेषादिः एककराशिस्तस्मिन् कौमुदीदयितश्चन्द्रः तथा निर्जराणां सुराणां राजा स्वामी पुरंदरस्तस्याचार्यो बृहस्पतिः । 'शैशवावधि गुरुर्गुरुरस्य' इति नैषधे । तयोर्द्वन्द्वं मिलति ॥

नमति स्म मुनीश्वरं पुरीपुरहूतोऽमितभक्तिनिर्भरः ।
शिखरीव गरीयसीं श्रियं फलपङ्क्तेः कलयन्निलातलम् ॥ १२९ ॥

न मीयते स्मेत्यमिता प्रमाणरहिता तादृश्या भक्त्या निर्भरः सोत्सुकः तादृशः पुरीपुरहूतः राजनगराखण्डलः मुनीश्वरं नमति स्म । प्रभोः प्रणामं कृतवानित्यर्थः । क इव । शिखरीव । यथा फलानां सस्यानां पङ्क्तेः श्रेण्याः गरीयसीमतिगुर्वीं श्रियं शोभां कलयन्बिभ्राणो वृक्षः इलातलं भूमीमण्डलं नमति ॥

प्रेक्षप्रस्खलिताखिलाम्बरचरव्राते प्रणीते क्षणे
पौराणां प्रकरैः प्रवेशितमतिप्रीत्या पुरस्यान्तरे ।
आगृह्यानयति स्म तत्पुरपतिः सूरीश्वरं स्वान्गृहा-
न्नेतं संप्रतिकाश्यपीपतिरिव श्रीमत्सुहस्तिप्रभुम् ॥ १३० ॥

पिशुनवचनाकर्णनपरान्। पुन किंभूतान्। चक्र जातिस्वभावात्कुटिल कृतमास्य वदन य। तथा परोपकारादिकरणे वैमुख्यभाजः। पुन. किंभूतान्। धृतमङ्गीकृत चापल वक्रगमनोल्लनफालादि यैस्तथा। परदारगमनादिमकलितस्वभावान्। पुन किं कुर्वतः। सकोपानिव क्रोधोद्धतानिव। क्षमा क्षोणीं निघ्नत· पदप्रहारादिना प्रहरतः सकोपाः क्षान्तिमुपशम पातयन्ति। नृपास्तु नवीनकरकरणजननिग्रहदण्डादिना पृथ्वीं पीडयन्ति ॥

मदोद्धतत्वं मधुपानुपङ्गिता मातङ्गतामाश्रयशाखिघातिताम्।
यस्माद्वहन्ते नृपते मतङ्गजाः सतां तदेषां न शिवाय संगमः ॥१४१॥

हे नृपते राजन्, यस्मात्कारणात् एते त्वया मदर्थमानायिता अमी मतङ्गजा हस्तिन. मदै क्षीवताभि दानप्रवाहैश्च उद्धतत्वमुन्मत्तताम्, तथा मधुपैर्मद्यपानविधायिभिर्भ्रमरैश्चानुपङ्ग सङ्गोऽस्त्येषामिति मधुपानुपङ्गिन· तत्ताम्, तथा मातङ्गता चण्डालतामस्पृश्यभाव गजताम्, तथा आश्रयाणा स्थानदायिना छायाशनादिप्रदाने सुखकारिणा वा शाखिना शाखा· पुत्रपौत्रप्रपौत्रादीना विस्तारा विद्यन्ते येषा ते शाखिनस्तेषामाश्रयभूताना कुटुम्बभाजा कुटुम्बवृद्धाना पोषकाणां वा। 'शाखा द्रुमांशे वेदांशे भुजे पक्षान्तरेऽन्तिके' इत्यनेकार्थ.। 'पक्षान्तरे संततिविशेषे' इत्यवचूर्णि। द्रुमाणा च घातिता हननशीलता वहन्ते बिभ्रते। तत्कारणादेषा गजाना सगमः सता साधूना न शिवाय न शुभाय मोक्षाय च ॥

द्यूतकृद्दिवाक्षविलसन्नरियुक्तः पिशुनवत्पुराधीश।
निर्वृण्वद्भिः सद्भिः शताङ्गराशिर्न काम्येत ॥ १४२ ॥ ✓

हे पुराधीश राजनगरनायक, निर्वृण्वद्भि निर्वृतिं सुख मोक्ष च काङ्क्षद्भि. साधुभिः। 'निर्वृणोमि नगतो वसुमत्या स्वारसातलभवाद्भवशङ्की' इति नैषधे। 'निर्वृतिं न प्राप्नोमि' इति तद्वृत्ति। शताङ्गराशि स्यन्दननिवह। शतानि शतश· अङ्गानि उपसर्जनभूताः प्रकारा क्लेशादयो येषु ते भवा जन्मानि तेषा गण भवपरम्परा न काम्येत नाभिलष्येत। 'अङ्गमन्तिकगात्रयो·। उपसर्जनभूते स्यादभ्युपायप्रतीकयो ॥' इत्यनेकार्थ.। तथा 'गौणोपसर्जनोपाप्राप्यप्रधाने' इति हैम्यामपि। किंभूत। अक्षेण रथावयवविशेषेण विलसन् शोभमान। क इव। द्यूतकृदिव। यथा द्यूतकार अक्षै प्रासकै 'पासा' इति प्रसिद्धनामभिर्विशेषेण नक्तदिन लसन् क्रीडन् रममाणो भवेत्। 'लस श्लेषक्रीडनयो' इत्यस्य धातु। पुन किंभूतः। अरा. सन्त्यनयो रथपादयोश्चक्रयोस्ते अरिणी रथाङ्गे ताभ्या युक्त. कलितः। क इव। पिशुन इव यथा द्विजिह्व खल. अरिभिर्युक्तो भवति। प्राय खलाना बहवो वैरिण· स्यु। अथ वा अरित्वेन वैरिभावेन सर्वेषामपि शत्रुतया युक्त.। खल खलु जगतोऽपि शत्रुभूतो न कस्यापि मित्रमिति। यदुक्तम्—'मृगमीनसज्जनाना तृणजलसंतोषविहितवृत्तीनाम्। लुब्धकधीवरपिशुना निःकारणवैरिणो जगति ॥' इति ॥

चरे विशदतां निर्मलतामुज्ज्वलत्वं बिभ्राणा अपि धारयन्तोऽपि अन्तरा मध्ये छिद्रं रन्ध्रं दोषमप्यगुणं वा दधति धारयन्ति अर्थात्पिशुनवदित्यर्थादनुक्तमप्यवगम्यते। यथा खलो वाह्ये विशदतां कान्तिमदनत्वं दधानोऽपि परानर्थप्रथाविधायि दुष्टान्तरतां धत्ते। यदुक्तम्—'मुखं पद्मदलाकारं वाचा चन्दनशीतला। हृदयं कर्तरीतुल्यं त्रिविधं धूर्तलक्षणम्॥' इति। तेन कारणेन द्वेधापि बहिरन्तरापि शुद्धोऽत्युज्ज्वलो निर्मलो निष्पाप आत्मा स्वरूपं येषां तेषां महात्मनामस्मी नोचिता न योग्याः। पुनर्हे भूप, यतो हेतोरमी यानमजा वाहनसमूहा जडात्मवज्जडात्मान इव स्वम्भान् [illegible] च क्षुपन्ते सेवन्ते इति लम्भक्षुप। न पुनः परानन्यान् जन्तून् जीवान् [illegible] हत्वा बाधन्ते पीडयन्ति। ततः कारणादेनिर्मलतिमतामखण्डपण्डाशालिना [illegible] न [illegible] किमपि कार्यं विद्यते॥

भूमीन्दोऽसिचया एते उचिता एव शस्त्रिणाम्।
भवादृशां न चास्माकं शमसौहित्यशालिनाम्॥ १४७॥

हे भूमीन्दो वसुधासुधाकर, एते असिचया खड्गगणा शस्त्राणि [illegible] रक्षन्तीत्येवंशीलाना भवादृशां विविधायुधधारिणां विरोधिवर्गविधानो [illegible] राणां युष्मद्विधानामेव उचिता योग्याः। अथ च [illegible] सिचया [illegible] दृशा बहुमूल्यत्वाद्भूमीन्द्राणामेव योग्यानि। न पुनः शमेन [illegible] हित्य तृप्तिस्तस्तया शालन्ते शोभन्ते इत्येवंशीलाना [illegible] दृशामुचिताः। यदुक्तम्—'भुजीमहि [illegible] सायीमहि महीपीठे कुवासहि किमीश्वरैः॥' इति॥ इति [illegible] गुरोः प्रतिवचनानि॥

एष निपीय कवेरिव वाचं [illegible]
प्रीतमना रति तं प्रति [illegible]॥१४८॥

प्रीत [illegible]

[illegible]

मुक्तास्वर्णमणीगणाः पुनरमी येषां मुनीनां गुणा
यानान्यद्भुतभावनाश्च यशसा पुञ्जाः पुरोगामिनः ॥ १५१ ॥
विश्वस्फूर्जदमारिशिष्टपटहा मोहाद्यरिध्वंसिनः
साम्राज्य दधतेऽनिश दशदिशां ये सार्वभौमा इव ।
ये श्वेतांशुकशालिनः कुमुदिनीकान्ता इव क्ष्मापते
ते प्राप्ताखिलकामिता इव वय नाशास्महे किंचन ॥ १५२ ॥

हे क्ष्मापते राजन्, प्राप्तानि सर्वात्मना लब्धानि अखिलानि समस्तानि कामितानि वाञ्छितानि मानसिकवाचिककायिककामा यैस्तादृशा इव ते वय किंचन किमपि नाशास्महे न कामयामहे । ते के। येषामस्माक प्राणातिपात-मृषावाद-अदत्तादान-मैथुन-परिग्रहविरमणलक्षणानि पञ्च महाव्रतान्येव वाहा. पट्टजात्यतुरङ्गा सन्ति । पुनर्येषा क्षान्त्यादय. क्षमा-आर्जव-मार्दव-निर्लोभतारूपमुक्ति तप'-सयम-सत्य-निष्कपटतारूपशौच-अकिंच ब्रह्मचर्यलक्षणा दशविधसाधुधर्माभिधाना करिणः पट्टगजेन्द्रा विद्यन्ते । पुनर्येषा पार्श्वे सनिधाने सदा निरन्तर नवद्वयमिता नवाना नवसख्याना द्वय युगलमेतावता अष्टादश तेन मिता प्रमाणीकृता । 'नवद्वयद्वीपपृथग्जयश्रियाम्' इति नैषधे । सहस्रा दशशतानि । सहस्रशब्द पुंक्लीबलिङ्गे । शीलाङ्गा इत्याख्या नाम येषा तादृशा रथा एतावता अष्टादशसहस्रा शीलाङ्गरथा वर्तन्ते । पुनर्येषा मुनीना साधूना सप्तविंशतिसख्याका गुणा' । यथा—षण्णा प्राणातिपात-मृषावाद-अदत्तादान-मैथुन-परिग्रह-रात्रिभोजन विरमणलक्षणाना व्रताना परिपालनम्, तथा षण्णा पृथ्वी-जल-अनल-वायु-वनस्पति-त्रासलक्षणाना कायानां रक्षा, तथा पञ्चाना श्रवण-नयन-घ्राण-रसन-स्पर्शननाम्नामिन्द्रियाणा निग्रह , निर्लोभता, क्षमा, भावसत्यक्रिया, विशुद्धिता, मनोवचनकायाना जय , सयमयोगयुक्तता, शीतातपादिवेदनासहनम्, उपसर्गसहन चेति मुक्तास्वर्णमणीगणा. मौक्तिककाञ्चनरत्ननिकरा आसते ।पुनर्येषामद्भुता आश्चर्यकारिण्य द्वादशसख्याका भावना. अनित्य-अशरण ससार-एकत्व अन्यत्व-अशौच-आश्रव-सवर-कर्म-निर्जर-अधर्मस्वाख्यातता-बोधिलक्षणा' ।अथ वा पञ्चाना महाव्रताना पञ्चपञ्चसख्याभिः पञ्चविंशतिर्भावना । यथा मनोगुप्ति-दयासमिति-आदाननिक्षेपासमिति-एषणासमिति-दृष्टान्नपानग्रहणम् एता. प्रथमव्रतस्य पञ्च भावना , तथा हास्यविरति-लोभविरति-भयप्रत्याख्यान-क्रोधप्रत्याख्यान-आलोच्यभाषणम् एता द्वितीयव्रतस्य पञ्च भावना. । आलोच्यावग्रहयाच्ञा, अभीक्ष्णावग्रहयाच्ञा, देशकालापेक्षया एतावन्मात्रावग्रहयाचना, समानधार्मिकेभ्य सकाशादवग्रहयाचनम्, अनुज्ञापितान्नपानभोग , एतास्तृतीयव्रतस्य पञ्च भावनाः । स्त्रीपण्डपशुमद्वेश्मशय्यासनकुड्यान्तरत्यजनम्, सरागस्त्रीकथात्यजनम्, पूर्वक्रीडितसुरतादिस्मृतिनिषेधनम्, स्त्रीणा रम्याङ्गावयवावलोकनस्वाङ्गमार्जनोद्वर्तनादिसंस्कारनिराकरणम्, प्रणीतगलत्स्नेहबिन्दुपातिरसोन्मादकद्रव्यबहुलान्नपान-

यदुक्तम्—'क्षेत्रा नैव नेत्रेभ्यो घनेभ्यो नोपकारिण.। पिकेभ्यो नो प्रियालापा दृश्यन्ते भुवने परे' ॥

कि बहुनाशुगसूनोरिवात्मभर्तुर्विधातुरादेशम्।
नीतिमतो दाशरथेरिव राजन्धर्मलाभोऽस्तु ॥ १५५ ॥

हे राजन्, कि बहुना भूयिष्ठभाषणेन किमस्तु न किमपि। ततस्तव धर्मलाभः धर्मलाभ इति नाना अस्मत्पक्षसमत आशीर्वादोऽस्तु भवतात्। तव किं कर्तुः। आत्मभर्तुः स्वस्वामिनः अकब्बरसाहेरादेशनाज्ञा विदधातीत्येवशीलस्य। कस्येव। आशुगसूनोरिव। यथा पवनात्मजन्मा हनूमान् स्वस्वामिनो रामचन्द्रस्यादेशविधातासीत्। पवनस्य नामपरावृत्तिर्बहुधा दृश्यते। यथा हैम्याम्—'हनूमान् वज्रकण्टकः मारुति' इति। तथा चम्पूकथायाम्—'प्रभञ्जना. खण्डिताञ्जनाधरप्रवाला' इत्यादि। पुनस्तव किंलक्षणस्य। नीतिमतो युक्तन्यायोपपन्नस्य। कस्येव। दाशरथेरिव। यथा दशरथस्यापत्य दाशरथिः श्रीराम. न्यायवानासीत्॥ इति सूरिणा तस्य स्वामिभक्तता प्रकाशिता॥

तदुदितमधिगत्य चित्रमन्तर्दधता तेन पुरीपुरंदरेण।
इव कजमलिनाथ चुम्बता तच्चरणयुगं यतिकुञ्जरो व्यसर्जि ॥ १५६ ॥

अथ सूरिवचनानन्तर तेन पुरीपुरदरेण अकमिपुराधिपतिना साहिबखानेन यतिकुञ्जर श्रीहीरविजयसूरि व्यसर्जि विसर्ज्यते स्म। स्वस्थानगमनायानुमेने। स्ववसतिं प्रति प्रेषित इत्यर्थ.। तेन किं कुर्वता। तच्चरणयुग सूरिपादारविन्दद्वन्द्व चुम्बता स्पृशता। केनेव। अलिनेव। यथा भ्रमरेण कज कमल चुम्ब्यते। पुन किंभूतेन। तदुदित सूरिभाषितमधिगत्य विज्ञाय सम्यगवगम्य अन्त स्वान्तःकरणे चित्रमाश्चर्यं दधता बिभ्रता॥

वसतिमसुमच्चेतासीव प्रविश्य महोत्सवं
वचनविषयातीतं स्फीतं वितन्वति पूर्जने।
सरसिरुहभू प्रोज्जृम्भाम्भोरुहीव सुखं स्थितः
कतिचन दिनास्तस्मिन्सूरीश्वरोऽगमयत्पुरे ॥ १५७ ॥

सूरीश्वरो हीरविजयसूरिः तस्मिन्नकमिपुरे कतिचन कियत्संख्याकान् दिनानगमयदतिक्रामति स्म। किंभूत। सुख यथा स्यात्तथा स्थित। क इव। सरसीरुहभूरिव। यथा पद्मभूर्ब्रह्मा प्रोज्जृम्भाम्भोरुहि विकसिततामरसे तिष्ठति। 'ताम्यत्तामरसान्तरालवसतिर्देव स्वयभूरभूत्' इति खण्डप्रशस्तौ ब्रह्मण कमले वसतिः। किं कृत्वा। वसतिमुपाश्रय प्रविश्य उपाश्रयमध्ये गत्वा। स्थित्वेत्यर्थ.। कानीव। असुमचेतासीव यथा जनाना भव्यलोकानां चेतासि मनासि प्रविवेश। चित्तेषु प्रविष्ट इत्यर्थः। अत्रैकवचनस्य बहुवचनोपमास्ति। अन्यत्रापि क्वाप्येव दृश्यते। यथा रघुवशेऽप्येव दृश्यते—'वै-

राजन्हुताशा इव हेतिभीषणाः पुनर्गिरीशा इव रुद्रनाङ्किताः ।
शान्तात्मनामार्द्रहृदा महात्मना नौचित्यमेते दधते पदातयः ॥ १४३ ॥

हे राजन् भूपते, एते दण्डभृगण्डप्रचण्डाकृतयः पदातयः पादचारिणः शान्तं शमवानात्मा स्वरूपं येषां तेषां शान्तात्मनाम् । तथा आर्द्रं यावज्जन्तुजातोपरि कृपा‍क्लिन्नम् । पूर्णमित्यर्थः । हृदयं येषां तेषामार्द्रहृदां महात्मनां सतां साधूनां वा आचित्यं योग्यता न दधते बिभ्रते । किंभूताः । हुताशाः कृशानव इव हेतिभिर्विविधायुधज्वालावलीभिश्च भीषणा भयानकाः अतिभीतिकारिणः । पुनः किंभूताः । रुद्रतया चण्डत्वेन अङ्किताः कलिताः । क इव । गिरीशा इव । यथा ईश्वरा रुद्राभिधानत्वेनान्विताः । यतः एकादश रुद्राः । 'रुद्रोऽीशो वामदेवो वृषाङ्कः' इति हैम्याम् ॥

माद्यन्त्यष्टापदैः पृथ्वीकान्त कैतवजीविनः ।
सन्तः संयमसाम्राज्या न पुनर्नयचक्षुषः ॥ १४४ ॥

हे पृथ्वीकान्त भूभामिनीवल्लभ, कैतवेन दुरोदरेण जीवन्ति प्राणान्धारयन्तीति कैतवजीविनो द्यूतकाराः अष्टापदैः शारिफलैः द्यूतक्रीडोपकरणविशेषैः कृत्वा माद्यन्ति मदेन हृष्यन्ति । पुनः सन्तः साधवः अष्टापदैः स्वर्णैः कृत्वा न मदयुक्ता भवन्ति । निर्ग्रन्थत्वान्निष्परिग्रहत्वाच्च । किंभूताः । संयमस्य चारित्रस्य साम्राज्यमैश्वर्यं येषाम् । तथा नये नैगमादिसप्तभेदभिन्ने न्याये वा चक्षुर्दर्शनं येषां नय एव चक्षुर्येषां वा ॥

धामसाधिमभृतः कलयन्त्यः स्त्रीत्वमात्मनि पुनर्वनितावत् ।
त्यक्तगेहगृहिणीद्रविणानां प्रीणयन्ति न मनो मणिमालाः ॥ १४५ ॥

हे नृप, त्यक्तानि मुक्तानि गेहानि मन्दिराणि गृहिण्यः स्त्रियः द्रविणानि धनानि यैस्तेषां साधूनां मनश्चित्तं मणिमाला रत्नश्रेणयो न प्रीणयन्ति न तोषयन्ति । किंभूतस्य । धाम्ना तेजसा साधिमानं चारिमाणं स्फूर्तिं बिभ्रतीति । 'त्वयादृतः किं नरसाधिमभ्रमः' इति नैषधे । किं कुर्वन्त्यः । आत्मनि स्वे स्त्रीत्वं स्त्रीलिङ्गतां कलयन्त्यः । किंवत् । वनितावत् । यथा नार्यः धामसु सौधेषु साधुतां धारयन्ति । यतो गृहमण्डनाः स्त्रियः । अथ वा । 'घरघरणीइपणघरचलइनही' इति लोकोक्तिः । पुनरात्मनि विषये स्त्रीत्वं वनिताभावं बिभ्रते ॥

बिभ्राणा अपि बाह्यतो विशदतां छिद्रं दधत्यन्तरा
तेनामी उचिता न मौक्तिकगणा द्वेधापि शुद्धात्मनाम् ।
भूप स्तम्भजुषो जडात्मवदमी यैर्न व्रजा वीवधै-
र्बाधन्ते च परास्ततो मतिमतामेभिर्न कृत्यं पुनः ॥ १४६ ॥

हे भूप हे पृथ्वीपाल, येन कारणेन अमी मौक्तिकगणा बाह्यतो बहिस्तात्ननदशों

क्वापि शार्दूलविक्रीडितं दृश्यते क्वापि दृप्यद्भुजङ्गप्रयातं पुनः।
सूरिशीतद्युतेः सर्पतः पद्धतौ छन्दसां जातिवत्कुञ्जभूमिः स्म भूत्॥३॥

सूरिशीतद्युतेः हीरसूरिचन्द्रस्य पद्धतौ मार्गे सर्पतः प्रचलतः कुञ्जभूमिर्वनावनी छन्दसां विविधवृत्तानां जातिरेव स्म भूत् बभूव। 'स्मयोगेऽप्यडो लोपमिच्छन्ति' इति सारस्वतव्याकरणे। यत्र कुञ्जभूमौ छन्दोजातौ च क्वचित्प्रदेशे वाणिनी। 'छेका मत्ता च वाणिनी' इति हैम्याम्। तथा 'यस्मिन्महीं शासति वाणिनीनां निद्रां विहारार्धपथे गतानाम्' इति रघुवंशे। उद्याने क्रीडार्थं समेता दृश्यते। किंभूता वाणिनी। स्रग्विणी स्रजो मुक्ताफलानां सरिविशेषाः कुसुमानां माला हारा विद्यन्ते यस्याः। पुनः शालिनी अत एवानेकालंकारैः शालते शोभते इत्येवंशीला। तथा वाणिनी, स्रग्विणी, शालिनी चेतास्तिस्रोऽपि छन्दोजातयः। तथा क्वापि प्रदेशे लोकानां कुसुमावचयप्रपञ्चनान्योन्यपरिधापनान्दोलनगाननर्तनादिभिर्नर्मकौतुकक्रीडाकारिणी अनान्तॄणाती [illegible] लोकपृणा [illegible] जनसुखकारका वाताना पवनानामूर्मिका वीची समेति। अत्र च छन्दोजा [illegible] वातोर्मिकाजातिः। पुनः क्वचित्कमलाकरादिषु हंसमाला राजमरालराजी क्रीडन्ती दृश्यते। हंसमाला छन्दोजातिश्च। क्वापि स्थाने समेरोद्यानादौ कन्या पुष्पावचयार्थमागता पुष्पाजीविकुमारिका विलोक्यते। अत्र च कन्या छन्दोजातिः। पुनः क्वापि [illegible] प्रदेशादौ मृगी [illegible] सारङ्गी चरन्ती निरीक्ष्यते। मृगी छन्दोजातिश्च। पुनः कुत्रचित्क्रीडाकाननादौ मालतीजातिनामलता प्रेक्ष्यते। किंलक्षणा। पुष्पिता [illegible] प्रसूनपरम्परापरिचितसमग्र [illegible] यस्या सा तथा। जाति पुष्पिताग्रा च द्वे अपि छन्दोजाती। क्वापि [illegible] कोटरविवरादौ दृश्यते दर्पेण मद [illegible] नदोन्मादिना भुजगमानां सर्पाणां प्रयातं गमनं निभाल्यते। भुजङ्गप्रयातं छन्दोजातिश्च। पुनः क्वापि गिरिगह्वरादीनां प्रदेशे शार्दूलानां व्याघ्राणां [illegible] हिंस्रश्वापदविशेषाणां विरोधेन निजमहिमाभिमानत्वात् [illegible] क्रीडितं विलसितं [illegible] शार्दूलविक्रीडितनाम्नी छन्दोजातिश्च॥ युग्मम्॥

निम्बजम्बीरजम्बूकदम्बद्रुमान्स्मेरमाकन्दकाररकरं [illegible] वीरवत्।
लङ्घयन्ग्रामसीमापुरीः स प्रभुः प्राप्तवान्पत्तनस्योपकण्ठं [illegible]॥ ४॥

स प्रभुः हीरसूरि [illegible] पत्तन [illegible] पुरभेदनस्य उपकण्ठं संनिधानं [illegible] ग्रामान् [illegible] सीमा [illegible] निम्ब [illegible] म दान् जम्बीरान् आम्रतरून् [illegible] सान् कदम्बानीपान् [illegible]

१. [illegible]

याच्ञा मे क्रियतां फलेग्रहिरसौ द्रोणिर्द्रुमाणामिव
प्रोन्निद्रा मधुना स तुष्यति यथा पृथ्वीमहेन्द्रो मयि।
इत्यावेद्य निवृत्तिमीयुषि पुराधीशे वशीन्द्रो गिरं
जग्राहोष्णऋतौ कृतव्यवसितौ मेघाम्बुधारामिव ॥ १४२ ॥

इत्यमुना पूर्वोक्तप्रकारेण आवेद्य कथयित्वा निवृत्तिमुपरतिमीयुषि [illegible] पुराधीशे साहिबखाने सति सूरिहीरगुरुर्गिरं वाणीं जग्राहोपादत्त। [illegible] इव। मेघ इव। यथा कृता निर्मिता व्यवसितिः स्वसमयोचित[illegible] प्रमुखा व्यापृतिर्येन तादृशे उष्णऋतौ निदाघसमये निवृत्ते सति जल[illegible] धरः अम्बुधारा वारिवृष्टिं गृह्णाति। इति किमावेद्य। हे गुरो, [illegible] प्रार्थना फलेग्रहिः सफला क्रियताम्। केनेव। मधुनेव। यथा वसन्तेन [illegible] विविधजातितरूणां द्रोणिः श्रेणिः प्रोन्निद्रा विकसिता फलकलिता [illegible] येन प्रकारेण स पृथिवीमहेन्द्रः अकब्बरसाहिर्मयि तुष्यति हर्षितो [illegible] तथा विधीयताम् ॥

रक्षामो जगदङ्गिनो न च मृषावादं वदामः कचि-
न्नादत्तं ग्रहयामहे मृगदृशा बन्धूभवामः पुन[illegible]।
आदध्मो न परिग्रहं निशि पुनर्नाश्नीमहि त्रुमहे
ज्योतिष्कादि न भूषणानि न वयं दध्मो नृपेनान्नतान् ॥१४३॥

हे नृप, [illegible] नियमविशेषान् [illegible] धारयाम [illegible] दर्शयति— [illegible] पुन [illegible] न [illegible] पुनर्[illegible]

[illegible]

काापि शार्दूलविक्रीडित दृश्यते क्वापि दृप्यद्भुजगप्रयात पुनः ।
सूरिशीतद्युतेः सर्पत. पद्धतौ छन्दसा जातिवत्कुञ्जभूमिः स्म भूत् ॥३॥

सूरिशीतद्युते हीरसूरिचन्द्रस्य पद्धतौ मार्गे सर्पतः प्रचलत कुञ्जभूमिर्वनावनी छन्दसा विविधवृत्तानां जातिरेव स्म भूत् बभूव । 'स्मयोगेऽप्यटो लोपमिच्छन्ति' इति सारस्वतव्याकरणे । यत्र कुञ्जभूमौ छन्दोजाता च कुत्रचित्प्रदेशे वाणिनी । 'छेका मत्ता च वाणिनी' इति हैम्याम् । तथा 'यस्मिन्मही शासति वाणिनीना निद्रा विहारार्धपथे गतानाम्' इति रघुवशे । उद्याने क्रीडार्थं समेता दृश्यते । किंभूता वाणिनी । स्रग्विणी स्रजो मुक्ताफलाना सरिविशेषा कुसुमाना माला हारा विद्यन्ते यस्या । पुन' शालिनी अत एवानेकालकारै शालते शोभते इत्येवशीला । तथा वाणिनी, स्रग्विणी, शालिनी चतास्तिस्रोऽपि छन्दोजातय. । तथा क्वापि प्रदेशे लोकान् कुसुमावचयग्रथनान्योन्यपरिधापनान्दोलनगाननर्तनादिमानेककौतुकक्रीडाकारिणो जनान्पृणातीति लोकपृणा सकलजनसुखकारका वाताना पवनानामूर्मिका वीची समेति । अथ च छन्दसि वातोर्मिकाजाति. । पुन क्वचित्कमलाकरादिषु हंसमाला राजमरालराजी क्रीडन्ती दृश्यते । हंसमाला छन्दोजातिश्च । क्वापि स्थाने स्मेरोद्यानादौ कन्या पुष्पावचयार्थमागता पुष्पाजीविकुमारिका विलोक्यते । अथ च कन्या छन्दोजाति । पुन क्वापि राजलशार्दूलप्रदेशादौ मृगी स्वलघुबालकलिता सारङ्गी चरन्ती निरीक्ष्यते । मृगी छन्दोजातिश्च । पुनः कुत्रचित्क्रीडाकाननादौ मालतीजातिनामलता प्रेक्ष्यते । किलक्षणा । पुष्पित कुसुमित प्रसूनपरम्परापरिचितमग्र शिखर यस्या सा तथा । जाति पुष्पिताग्रा च द्वे अपि छन्दोजाती । क्वापि काररकर कोटरविलादौ दृप्यता दर्प मद बिभ्रता मयूरोन्मादिना भुजगमाना सर्पाणा प्रयात गमन निभाल्यते । भुजगप्रयात छन्दोजातिश्च । पुन क्वापि गिरिगह्वरादीना प्रदेशे शार्दूलाना व्याघ्राणा चित्रकायाना वा अन्यषा अन्य-[illegible]श्वापदविशेषाणा विशेषेण निजमहिलाभिर्बालकैर्वा सम क्रीडित विलसित विभाव्यते शार्दूलविक्रीडितनाम्नी छन्दोजातिश्च ॥ युग्मम् ॥

निम्बजम्बीरजम्बूकदम्बद्रुमान्स्मेरमाकन्दकारस्कर कीरवत् ।
लङ्घयन्ग्रामसीमापुरी' स प्रभुः प्राप्तवान्पत्तनस्योपकण्ठ क्रमात् ॥ ४ ॥

स प्रभु. हीरसूरीन्द्र क्रमाद्ग्रामानुग्रामविहारपरिपाट्या पत्तनस्याणहिल्लपाटकनाम पुटभेदनस्य उपकण्ठ समीपान प्राप्तवान् आसादयामास । कि कुर्वन् । ग्रामान् लघुपुराणि सन्निवेशान्वा सीमामुभयोर्ग्रामयोर्नगरयोर्वा मध्यभूमी ग्रामसमीपभूमी पुरीनगराणि [illegible]पुरमहीशानकादीनि उल्लङ्घयन्नतिक्रामन् । कि [illegible] कीरवत् । यथा शुको [illegible] निम्बान् जम्बीरान् जम्भलान् वृक्षविशेषान् जनप्रसिद्धान् जम्बून् [illegible] कदम्बाभिधान् धाराकदम्बान् भूमी कदम्बान् [illegible]

1. पाठान्तरे [illegible]

परिभोगनिवारणम् एताश्चतुर्थव्रतस्य पञ्च भावनाः । मनोज्ञे शब्दे रागः अमनोज्ञे शब्दे द्वेषः, मनोज्ञे रूपे रागः अमनोज्ञे रूपे द्वेषः, मनोज्ञे गन्धे रागः अमनोज्ञे गन्धे द्वेषः, मनोज्ञे रसे रागः अमनोज्ञे रसे द्वेषः, मनोज्ञे स्पर्शे रागः, अमनोज्ञे स्पर्शे द्वेषः एताः पञ्चमव्रतस्य पञ्च भावनाः । सङ्ख्यया पञ्चविंशतिर्जाताः । अथ वा एकोन[illegible] दपि स्वयमूह्याः । एता भावना वासना यानानि वाहनानि सन्ति । च पुनर्येषां अग्रगामिनः अग्रेगमनशीलाः यशसा श्लोकाना पुजा व्रजा वर्तन्ते । पुनर्यासां [illegible] क्येऽपि स्फूर्जन्तो वाद्यमाना अमारेर्जीवदयायाः डिण्डिमः डिण्डिमानि [illegible] तद्रूपा वा पटहा आनकोद्घोषणानि निःस्वाननिस्वना वा । पुनः [illegible] तथाविधा अरयः क्रोधमानमायालोभमनोभवमिथ्यात्वाद्याः शत्रवः तान् [illegible] न्तीत्येवंशीला मोहाद्यरिघातिन सन्तीति वैरिविजयकारिणः । पुनर्[illegible] र्तिन इव अनिशं निरन्तरं प्राची-आग्नेयी-अपाची-नैर्ऋती-प्रतीची-वायवी-कौबेरी-[illegible] पातालभुवन-ब्राह्मीलक्षणानां दशानां दिशामाशानाम् । [illegible] [illegible] । साम्राज्यं सुरासुरनराराध्यत्वादाधिपत्यं दधते बिभ्रते । पुनर्[illegible] [illegible] इव श्वेतदुज्ज्वलैरंशुकैर्वस्त्रैः । [illegible] माशामाशामाच्छादयन्तममुं कीर्तिं निरमयति च यशश्चन्द्रस्य [illegible] 'कान्तिहीनं च वस्त्रहीनं वा इति' तद्वृत्तिः । शालन्ते शोभन्ते [illegible] [illegible] ॥ इति स्वसमयसमग्रशुद्धिनिरूपणम् ॥

श्रीरामे भरतेनेव भक्तेन स्वामिनि [illegible] ।
[illegible] यदुच्चाने मयि [illegible] ॥ १५२ ॥

[illegible]

[illegible]

सख्य मैत्रीभावो येन तादृश शीतद्युतिश्चन्द्र· पङ्कजेन पद्मेन सम सगतो मिलित इव । चरणस्याम्भोजोपमा वदनस्य च चन्द्रसाम्यमित्युत्प्रेक्षा ॥

प्रश्नयामास भट्टारकाधीश्वरोऽनामयादि स्वयं तस्य सूरीशितुः ।
तेन रेजे पुनः सोऽधिकं सूनुना यौवराज्यान्वितेनैव भूवासवः ॥ ८ ॥

भट्टारकाधीश्वरो वृहद्गणधराधिराजो हीरविजयसूरीश्वर· स्वयमात्मना तस्य सूरीशितुर्विजयसेनसूरेरनामयादि नीरोगताप्रमुख समाधिकुशलतादिक प्रश्नयामास पृच्छति स्म । पुन. स हीरभट्टारकः तेनाचार्येण सगधिक रेजे बभौ । क इव । भूवासव इव । यथा पृथिवीपुरहूतो राजा योवराज्येन युवराजस्य भावस्तेन यौवराज्यपदवीभावेन युक्तेन युवराजेन सूनुना नन्दनेन कृत्वा राजते ॥

नैककायान्प्रणीय स्वयं दर्शयन्द्वादशार्चिः स्वचातुर्यमुर्व्यामिव ।
शिष्यसार्था मिथो नव्यकाव्यैस्तत. संस्तुवन्ति स्म तौ सूरिभूभास्करौ ९

ततो विजयसेनसूरिसमागमनानन्तर शिष्यसार्था विद्वद्विनेयव्रजा मिथ· परस्पर नव्यकाव्यैः सद्यस्ककवित्वै कृत्वा तौ हीरविजयसेननामाना सूरी एव भूभास्करौ सूरिराजौ । 'मध्यदिनावधि विधेर्वसुधाविवस्वान्' इति नैषधे । प्रति सस्तुवन्ति स्म वर्णयामासुः । विजयसेनसूरिं हीरविजयसूरिं श्रीहीरविजयसूरिशिष्या तुष्टुवु । उत्प्रेक्ष्यते— नैकान्बहून् कायान् मूर्ती· प्रणीय कृत्वा । 'निषेधार्थनकारस्य समासत्वान्नलोपाभावो निषेधार्थवाचकौ तत्र निषेधार्थवाची नकारस्तत्र लोपो न भवति नैषधेत्यादौ ज्ञेय· नञस्तु लोपो भवत्येव' इति प्रक्रियाकौमुद्याम् । उक्तत्वात्समासत्वाच्च नकारस्यानादेशो न स्यादिति । द्वादशार्चिर्वृहस्पतिरुर्व्यां पृथिव्या स्वयमात्मनैव स्वस्यात्मनश्चातुर्यं निपुणता दर्शयन्निव । अथ वा दर्शयन् द्वादशार्चिरिव ॥

तत्समीक्षोत्सुकीभूतदिङ्नायके पौरपुञ्जे प्रणीते महाडम्बरे ।
द्यामिवेन्द्रो जयन्तेन भट्टारकस्तेन सूरीन्दुना प्राविशत्पत्तनम् ॥ १० ॥

भट्टारकः । यद्यपि भट्टारकशब्देन पूज्यत्वख्यापनम् 'पादा भट्टारको देव· प्रयोज्याः पूज्यनामत ' इति हैम्यामुक्तत्वात् पूज्यपादा तथा भूपतिर्भोजदेव तथा अर्हद्भट्टारक गृहीत्वेत्यादौ प्रशस्यार्थप्रकारकत्व दृश्यते, तथाप्यत्र जैनशासनानुसारेणाधुना लोकरूढ्या भट्टारकशब्देन वृहद्गणाधिपस्तच्छिष्यस्तस्मिन्वृहद्गणाधिपे विद्यमाने आचार्य इत्युच्यते इति सम्प्रदाय । श्रीहीरविजयसूरि. तेन सूरीन्दुना विजयसेननाम्ना सूरिचन्द्रेणाचार्यचन्द्रमसा साक पत्तन पुटभेदन प्राविशत्प्रविशति स्म । 'द्वीपान्तरेभ्यः पृथिवीपतिभ्य क्षणादवापे पुटभेदन तत्' इति नैषधे । क इव । इन्द्र इव । यथा पुरदरो जयन्तेन निजनन्दनेन जयदत्तेन सम द्या दिव नन्दनादौ क्रीडित्वागत्य प्रविशति । कस्मिन् सति । पौरपुञ्जैर्नागरिकनिकरैर्महाडम्बरे अतिशयितोत्सवे प्रणीते कृते सति । किंभूते महाडम्बरे । तस्य महाडम्बरस्य समीक्षा सम्यक्सर्वप्रकारेणावलोकन तत्रो-

दर्भनिर्दिष्टमथो कुमारो नारीमनासीव चतुष्कमन्तः' इति । कस्मिन्सति । पुनः राजनगरानेकश्रावकवर्गे वचनाना वाचा विषयाद्गोचरादतीतमतिशायितं [illegible] तिक्रान्तम्। वक्तुमशक्यमित्यर्थः । पुनः स्फीत पदे पदे क्षणे क्षणे च वर्धमानं [illegible] हीयमानं महोत्सवमतिमह वितन्वति विस्तारयति कुर्वति सति ॥

यं प्रासूत शिवाह्नसाधुमघवा सौभाग्यदेवी पुनः
पुत्रं कोविदसिंहसीहविमलान्तेवासिनामग्रिमम्।
तद्ब्राह्मीक्रमसेविदेवविमलव्यावर्णिते हीरयु-
क्सौभाग्याभिधहीरसूरिरचिते सर्गोऽयमेकादशः ॥ १३८ ॥

पण्डितदेवविमलगणिविरचिते हीरसौभाग्यनाम्नि महाकाव्ये एकादशानां स[illegible] ॥ पूरणः एकादश सर्गः सजात इति ॥

इति पण्डितसीहविमलगणिशिष्यपण्डितदेवविमलगणिविरचितायां [illegible] ग्याभिधमहाकाव्यवृत्तौ अकब्बरसाहिपुरस्तादाकारित [illegible] पुरपतिपार्श्वगमनश्राद्धाकारणसाहिप्रवृत्तिकथनसूरिपार्श्वप्रस्थापन [illegible] नस्फुरन्मानार्पणसूरिप्रस्थानशकुनभवनराजनगरागमन [illegible] आशादिओकनतन्निषेधनरागचमत्कृतिकरणवसत्यागमनादिवर्णनो नाम एकादश [illegible] ॥

द्वादशः सर्गः।

सूरिराजोऽथ संप्रस्थितस्तत्पुरान्मेदिन्या पुरोगामु[illegible] ।
[illegible] चन्द्रातपश्वेतिताशामुखो [illegible] शशी पू[illegible] ॥ १ ॥

अथ राजनगरे [illegible] सूरिराजः श्रीहीर[illegible]

[illegible]

शुभे । उत्प्रेक्ष्यते—भगवता तीर्थंकरस्य त्रिजगत्साधिपत्य स्वामित्वम् । राज्याभिषेकं । तस्य तत्र या अभिषेचनं स्थापनं तस्य क्षणे प्रस्तावे महोत्सवे वा श्रेयसे कल्याणकृतये कारनिर्मितैरिव । लोकेऽपि प्रायो महोत्सवसमये तोरणानि बध्यन्ते । पुनः यत्र समवसरणे द्वारवारैर्द्वारद्वारै: पुस्फुरे स्फुरितम् । उत्प्रेक्ष्यते—येन भगवता जनान् भव्यलोकान् मुक्तिपुर्यां सिद्धिनगर्यां मोक्षमध्ये नेतु प्रापयितुमुद्घाटितैर्मुकुलीकृतैरस्मान्मुक्तिपुरीद्वारैरिव ॥

शंभुमुद्दिश्य मुक्तैः स्मरेणाशुगैर्मोघता किं गतैरन्तरेऽवस्थितैः ।
दौकितैरात्मनः किं वपुर्लिप्सया पुष्पचापेन वाभ्राजि यस्मिन्सुमैः ॥१५॥

यस्मिन् समवसरणे सुमै पञ्चवर्णजानुप्रमाणाप्रमाणोज्जृम्भमाणकुसुमैरभ्राजि रेजे । उत्प्रेक्ष्यते—स्मरेण मनोभवेन विरोधितया शंभु पार्वतीपतिमर्हन्तं वा उद्दिश्य सकल्प्य मुक्ताः त्रिजगत्साधारणसिद्धयनुभावात् शंभुविषये पुनर्मोघतां विफलता गतै. प्राप्तै । अत एव पद्या लज्जात् अन्तर्मध्ये विचाल एव स्थितै पतितैराशुगैर्बाणैरिव कामस्य च पुष्पशरत्वात् । अथ वा पुष्पचापेन श्रीनन्दनेन अनङ्गत्वादात्मन स्वस्य वपुर्लिप्सया शरीरप्राप्तिकाङ्क्षया ढौकितैरुपदीकृतै शरैः किं स्वविशिखैरिव ॥

धीरिमाधःकृते शीलतीव त्रपासंकुचद्गौरवे स्वर्गिरौ विष्टरे ।
यत्र शौर्येण निर्जित्य वन्दीकृतः श्रीजिनेनेव पञ्चाननोऽधःकृतः॥१६॥

यत्र समवसरणे विष्टरे भगवदुपवेशनोचिते सिंहासने पञ्चाननः केसरी अधः अर्थाज्जिनेन्द्रस्याधस्तात्स्थित तिष्ठति स्म । उत्प्रेक्ष्यते—श्रीजिनेन त्रिभुवनाधिपत्यलक्ष्मीविलासरसिकेन तीर्थंकृता शौर्येण स्वशूरतया साहसिक्येन निर्जित्याभिभूय वन्दीकृतो वन्य विहित सन् अधस्तस्थिवान् विष्टरे । पुनरुत्प्रेक्ष्यते—धीरिम्णा सुरासुरनराद्यचालनासाधारणधैर्येण कृत्वा अध कृते परिभूते नीचै. कृते न्यक्कार प्रापिते । अत एव त्रपया लज्जाधिक्येन सकुचल्लघूभवद्गौरव गुरुत्वमुच्चैस्तरत्व वपुषो महत्त्व च यस्य तादृशे शीलति । अर्थाद्भगवन्तं सेवमाने स्वर्गिरौ सुवर्णाचले ॥

अर्हता त्रातुमात्माश्रितान्संसृतेर्भीलुकान्किं चतुर्दिक्समेताञ्जनान् ।
यत्र तेषा चतस्रो गतीर्वा निराकर्तुमूहे चतस्र. कृता मूर्तयः ॥ १७ ॥

यत्र समवसरणे अर्हता तीर्थंकृता चतस्रश्चतु सख्याका मूर्तय काया कृता निर्मिता । उत्प्रेक्ष्यते—संसृते ससारात् अनादिभवपरम्परापरिभ्रमणदु:खभरात् भीलुकान् बिभ्यतीत्येवंशीलान् । तथा च चतुर्दिग्भ्य पूर्वादक्षिणापश्चिमोत्तरालक्षणाभ्य चतस्रो हरिद्भ्य समेतान् स्वसमीपे समागतान् अत एवात्मान भगवन्तम् । 'क्षेत्रज्ञ आत्मा पुरुष' इति हैम्याम् । आश्रितान् उपेत्य स्वशरणीभूतान् भविकलोकान् किं त्रातु रक्षितुमिव चतस्रो मूर्तयो विहिता. । अथ वा ऊहे अहमेव विचारयामि । पूर्वोक्तविशे-

दर्भनिर्दिष्टमथो कुमारो नारीमनांसीव चतुष्कमन्तः' इति । कस्मिन्सति । पूर्जने राजनगरानेकश्रावकवर्गे वचनाना वाचा विषयाद्गोचरादतीतमतिशायित्वाद्वाग्गोचरमतिक्रान्तम्। वक्तुमशक्यमित्यर्थ. । पुन. स्फीत पदे पदे क्षणे क्षणे च वर्धमानमेव न तु हीयमान महोत्सवमतिमह वितन्वति विस्तारयति कुर्वति सति ॥

यं प्रासूत शिवाह्वसाधुमघवा सौभाग्यदेवी पुनः
पुत्रं कोविदसिंहसीहविमलान्तेवासिनामग्रिमम्।
तद्ब्राह्मीक्रमसेविदेवविमलव्यावर्णिते हीरयु-
क्सौभाग्याभिधहीरसूरिरचिते सर्गोऽयमेकादशः॥ १९८॥

पण्डितदेवविमलगणिविरचिते हीरसौभाग्यनाम्नि महाकाव्ये एकादशाना सख्या पूरणः एकादशः सर्गः सजात इति ॥

इति पण्डितसीहविमलगणिशिष्यपण्डितदेवविमलगणिविरचिताया स्वोपज्ञहीरसौभाग्याभिधमहाकाव्यवृत्तौ अकब्बरसाहिपुरस्तादाकारितदूतद्वन्द्वागमनविज्ञपनतत्प्रेषणाक्मिपुरपतिपार्श्वगमनश्राद्धाकारणसाहिप्रवृत्तिकथनसूरिपार्श्वप्रस्थापनतदागमनतद्वाचिककथनस्फुरन्मानार्पणसूरिप्रस्थानशकुनभवनराजनगरागमनखानसमुखागमनखसदनानयनगजाश्वादिढौकनतन्निषेधनखानचमत्कृतिकरणवसत्यागमनादिवर्णनो नाम एकादशः सर्गः ॥

द्वादशः सर्गः।

सूरिराजोऽथ संप्रस्थितस्तत्पुरान्मेवडाभ्या पुरोगामुकाभ्या युतः।
श्लोकचन्द्रातपश्वेतिताशामुखो यामकाभ्यां शशी पूर्वशैलादिव॥ १॥

अथ राजनगरे कतिचनदिनस्थित्यनन्तर सूरिराज' श्रीहीरविजयसूरिः तत्पुरात् अहम्मदावादनगरात्सम्यक् पदे पदे समानमहोत्सवपूर्वक प्रस्थितः पुरश्चचाल। किंभूतः। पुरो गुरोरग्रे गामुकाभ्या गमनशीलाभ्या मेवडाभ्या मोंदीकमालनामाभ्या साहिप्रेषितदूताभ्या दूताना लेखहारकाणा च। मुद्गलजातिप्रसिद्ध मेवाडा इत्यभिधान प्रोच्यते। पुनः किंभूत। श्लोको यश. स एव चन्द्रातपश्चन्द्रिका तेन श्वेतितानि उज्ज्वलीकृतानि आशानामर्थाद्दशदिगङ्गनानां मुखानि वदनानि येन। क इव। शशीव। यथा चन्द्र आकाशात्पुर. समेताभ्या पुनर्वसूतारकाभ्या युक्तः। 'पुनर्वसू तु यामकौ' इति हैमः। युक्तः पूर्वशैलात्प्राचीपर्वतात्प्रतिष्ठते। किंभूत' शशी। यश एवशचन्द्रज्योत्स्नया उज्ज्वलीकृतदिग्मण्डलः ॥

कुत्रचिद्वाणिनी स्रग्विणी शालिनी यत्र लोकंपृणा क्वापि वातोर्मिका।
हंसमाला क्वचित्क्वापि कन्या मृगी कुत्रचिन्मालती पुष्पिताग्रा पुनः॥ २॥

सजातः । पुनस्त्वं मां त्रिलोक्या भुवनत्रयस्योद्द्योतकं प्रकाशकर्तारं सृज कुरु । यथा द्यावापृथिव्योरुद्द्योतं करोमि तथा स्वर्गपातालभूलोकेषु प्रकाशकारकं निर्माहि इत्यर्थः ॥

बिभ्रतीभिः खगान्पत्त्रविभ्राजिनश्चन्द्रहासप्रसूनप्रतानान्वहन् ।

चैत्यशाखी शिखाभिः श्रिताभिर्नभः स्वर्गिवृक्षान्विजेतुं किमुद्यच्छते २१

यत्र धर्मदेशनवेश्मनि चैत्यशाखी अशोकतरुरपरो वा वटवृक्षादिगालद्रुमावस्थानः चैत्यद्रुमः नभो गगनाङ्गणं श्रिताभिः गाहमानाभिः शाखाभिः कृत्वा । उत्प्रेक्ष्यते—स्वर्गिवृक्षान् सुरद्रुमान् कल्पतरून् विजेतुं पराभवितुमुद्यच्छते उद्यमं करोतीव सज्जीभवतीव वा । किंभूताभिः शिखाभिः । पत्रैः पर्णैर्विभ्राजन्ते शोभन्ते इत्येवंशीलान् खगान् पक्षिणो बाणांश्च बिभ्रतीभिः धारयन्तीभिः । 'बाणपृषत्कविशिखा खगगार्धपक्षाः' । तथा 'विहगो विहगमखगौ खगगार्धपक्षा अपि' इति हैम्याम् । चैत्यशाखी किं कुर्वन् । चन्द्रः सुधाकरः कर्पूरो वा हासो हसितं तयोः श्वेतिम्ना तुल्यानां प्रसूनानां कुसुमानां प्रतानान् स्तबकान् चन्द्रहासखड्गांश्च वहन् बिभ्राणः । अन्योऽपि सुभटो विरोधिनां योद्धुमिच्छुः चतुर्विधान्यायुधानि धत्ते । यथा—पाणिमुक्तानि शक्तिप्रमुखानि, यन्त्रमुक्तानि शरादिकानि, अमुक्तानि शस्त्रिकादीनि, मुक्तामुक्तभेदद्वयात्मकानि दण्डादिमानि, इति । तथैवात्र चैत्यतरुः शरग्रहणेन पाणियन्त्रमुक्तयोर्ग्रहणम् । चन्द्रहासग्रहणेन च मुक्तामुक्तयोः संग्रहः । तथा च हैम्याम्—'अस्त्रं तच्चतुर्विधम् । मुक्तं द्विधा पाणियन्त्रमुक्तं शक्तिशरादिकम् । अमुक्तं शस्त्रिकादि स्याद्वाच्याद्यं तु द्वयात्मकम् ॥' इति ॥

देशनामन्दिरे यत्र जाम्बूनदः शक्रकेतुः पुरश्चुम्बति स्माम्बरम् ।

कौतुकान्नाकिलोकं दिदृक्षुः क्षितेस्तीर्थभर्तुः प्रसर्पन्प्रतापः किमु ॥ २२ ॥

यत्र धर्मदेशनामन्दिरे श्रीजिनराजसमवसरणे जाम्बूनदः स्वर्णनिर्मितः शक्रकेतुरिन्द्रध्वजः पुरो जिनेन्द्राग्रे अम्बरमाकाशं सहस्रयोजनप्रमाणत्वेनात्युच्चस्त्वात् चुम्बति स्पृशति । उत्प्रेक्ष्यते—कौतुकात् हृदयमध्येऽतिकुतूहलात् नाकिनां देवानां लोकं भुवनं वासस्थानं स्वर्गं दिदृक्षुर्द्रष्टुमिच्छुः क्षितेर्भूमेः सकाशात्प्रसर्पन्नूर्ध्वं गच्छन् तीर्थभर्तुर्जिनेन्द्रस्य किमु प्रतापः ॥

विप्रलब्धं विधात्रेव रूपश्रिया स्वं त्रिदश्योऽवयान्ति स्म यद्वीक्षणात् ।

यत्र भान्ति स्म ते शालभञ्जीभरा श्रीसुताम्भोजदृग्विभ्रमभ्राजिनः २३

यत्र श्रीमज्जिनेश्वरसमवसरणे ते जगत्प्रसिद्धाः शालभञ्जीभराः पाञ्चालिकाप्रकराः भान्ति स्म शुशुभिरे । किंभूताः । श्रीसुतस्य कमलानन्दनस्य स्मरस्य अम्भोजवत्कमलवल्लोचना स्त्री रतिस्तस्या विभ्रमः शोभा विलासो वा तद्वद्विभ्राजन्ते इत्येवंशीलाः । अथ वा रतिवद्विभ्रमेण शोभया विलासेन वा शोभनशीलाः । ते के । येषां पुत्रिकाप्रकराणां वीक्षणाद्दर्शनात् त्रिदश्यः सुराङ्गनाः स्वमात्मानं रूपश्रिया सौन्दर्यभरेण विधा ॥ अनयाप्यनुरूपयोषिद्विधाने विधात्रा विप्रलब्धं वञ्चितमवयान्ति स्म

पादपान् तरुवृन्दान् मुदान् स्मेरं विकसितं कुर्वाणः विकसितपल्लवकलिकाकुसुमकलितं कृत्वा माकन्दकारस्करप्रमुखाणां आमोदं गच्छति ॥

श्रोत्रपेयैर्निपीय प्रभोरागमामेयपीयूषमानन्दमेदस्विनः ।

तत्पदाम्भोजमभ्येत्य भेजुर्जना पान्थसार्था इव स्मेरदुर्वीरुहम् ॥ ५ ॥

जनाः पत्तनवास्तव्या लोकाः अभ्येत्यागत्य तत्पदाम्भोजं सूरिचरणारविन्दं भेजुः सेवन्ते स्म । प्रणमन्ति स्मेत्यर्थः । के इव । पान्थसार्था इव । यथा पथिकप्रकराः अभ्येत्य दूरात्समागत्य निदाघातपातप्तीकृताङ्गाः अध्वपथश्रमश्रान्ताश्च सन्तः स्मेरन्तं विकसन्तमुर्वीरुहं संकुलं पुष्पफलकलितमाम्रादि । मार्गवर्तिमहीरुहं भजन्ते । 'स्मेरदम्भोरुहारामपवमानसेवनेन' इति पाण्डवचरित्रे । जनाः किंभूताः । आनन्देन प्रमोदेन मेदस्विनः उपचयवन्तः स्फुरद्रोमाञ्चकञ्चुकितवपुषः । किं कृत्वा । प्रभोः श्रीगुरोरागमम् आगमनं तदेवामेयं प्रमाणातीतं पीयूषममृतं श्रोत्रपेयैः कर्णपर्णपुटैर्निपीयातितृप्ततया पीत्वा । सादरं श्रुत्वेत्यर्थः । अथ च 'पीयूषोऽभिनवं पयः' इति हैम्याम् । नवस्कपयःपानाच्च पुष्टाङ्गा भवन्त्येव ॥

आजगामाथ कम्माङ्गजन्मा यतिक्ष्मातलाखण्डलः संमुखं तत्प्रभोः ।

सूरिणाप्यर्णवेनेव शीतद्युतेः पिप्रियेऽद्वैतमस्योदयं पश्यता ॥ ६ ॥

अथ सूरेः पत्तनसमीपे समागमनानन्तरं कम्मानामसाधोरङ्गजन्मा नन्दनो विजयसेननामा यतिषु मुमुक्षुषु अथ वा यतीनां मध्ये क्ष्मातलस्य महीमण्डलस्याखण्डलो वासवः । सूरीन्द्र इत्यर्थः । तस्य प्रभोः श्रीहीरविजयसूरीन्द्रस्य संमुखमभिमुखमाजगाम समागच्छति स्म । अपि पुनरस्य विजयसूरेरद्वैतमनन्यसामान्यमुदयं वैभवातिशयप्रादुर्भावं पश्यता स्वयं विलोकयता सता सूरिणापि हीरगुरुणापि पिप्रिये प्रमुदितमद्वतप्रीतिमत्ता समजायत । केनेव । यथा शीतद्युतेः कौमुदीदयितस्याद्वैतमभ्युदयं पश्यता समुद्रेण चन्द्रजनकेन प्रीयते । यस्माद्ये समुत्पद्यन्ते स तेषां पिता, चतुर्दशानामपि रत्नानां समुद्रे समुत्पन्नत्वात्समुद्र एव पिता । यथा लक्ष्म्याः प्रसिद्धं नाम क्षीरोदतनया हैम्याम्, तथा चन्द्रोऽपि प्रसिद्धः समुद्राङ्गजः । तथा च नैषधे—'सिताम्बुजानां विरहस्य यच्छलाद्भ्रमावलिश्यामलितोदरश्रियाम् । तमः समच्छायकलङ्कसंकुलं कुलं सुधांशोर्बहुलं वहन्निव ॥' इति । 'कुलशब्देन समूहं वंशं वा वहति' इति तद्वृत्तिः ॥

हीरसूरिक्रमद्वन्द्वनम्रीभवत्तन्मुखं प्राप कामप्यनन्या श्रियम् ।

कल्पितानल्पसख्यः कथंचिन्मिथः संगतः पङ्कजेनेव शीतद्युतिः ॥ ७ ॥

हीरसूरेः स्वगुरुश्रीहीरविजयसूरेः क्रमद्वन्द्वे चरणयुगले नम्रीभवत्संजायमानं तन्मुखं विजयसेनसूरिवदनं कामपि वचनगोचरातीतामसाधारणीं श्रियं शोभां प्राप लभते स्म । उत्प्रेक्ष्यते—मिथः परस्परं कथंचित्केनापि प्रकारेण कल्पितं निर्मितमनल्पं बहुदृष्टं च

समागतस्य गुरोः स्वधर्माचार्यस्य पादुकां पदद्वयीस्थापनाप्रतिबिम्बं स सूरिः प्रणमन्नम-
स्करोति स्म। किंभूतस्य गुरोः। भावडस्य भावडनाम्नो व्यवहारिण आत्मभूर्नन्दनः स
एव सूरिशीतद्युतिः एतावता श्रीविजयदानसूरीन्दुस्तस्य। कामिव। अर्चामिव। यथा
भव्यजनस्य श्रीजिनप्रासादमन्येत्य श्रीमत्तीर्थंकरप्रतिमां प्रणमति॥

ब्रह्मपुत्री स्मितानेकपद्माङ्किता यत्पुरश्रीमणीमेखलेवाजनि।
सूरिकण्ठीरवोऽकुण्ठलोकोत्सवैः सिद्धपूर्वं पुरं पावनं तद्व्यधात्॥२८॥

सूरिकण्ठीरव आचार्यपञ्चाननः अकुण्ठैर्बहुलैर्लोकानामुत्सवैर्महामहैस्तत्प्रसिद्धं सिद्धपूर्वं
पुरम्। सिद्धपुरमित्यर्थः। पावनं पवित्रं व्यधाच्चकार। सिद्धपुरे जगामेत्यर्थः। स्मिते-
र्विकसितैरनेकैरनल्पैर्विविधप्रकारैः पद्मैः कमलैरङ्किता ब्रह्मपुत्री सरस्वती नाम्ना नदी
यत्पुरश्रिया सिद्धपुरलक्ष्म्या मणीनां रत्नखचितमेखलेव काञ्चीव अजनि सञ्जाता॥

श्रीमदाचार्यपादा उषित्वा कियद्वासकांस्तातपादैः समं वर्त्मनि।
ते न्यवर्तन्त तेभ्यस्तदादेशतः सैकतेभ्यः पयोधेरिवाम्भःप्लवाः॥२९॥

श्रीमदाचार्यपादाः श्रीमन्तो विजयसेनसूरयः तातपादैः श्रीहीरविजयसूरीश्वरैः समं
वर्त्मनि मार्गे कियद्वासकान् कतिचित्संख्याकान् निवासान्। वासकशब्देन रात्रय
एवोच्यन्ते। तत्र दिवसास्तु स्वयमेव समेताः। उषित्वा स्थित्वा तेभ्यः श्रीभट्टारकेभ्यः
तदादेशतः तदाज्ञया तदनुशिष्टया न्यवर्तन्त पश्चाद्व्यवलिरे। के इव। अम्भःप्लवा
इव। यथा सैकतेभ्यस्तटेभ्यः सकाशात्पयोधेः समुद्रस्य अम्भःप्लवाः पयःपूरा निवर्तन्ते
पश्चाद्वलन्ते॥

एष निघ्नंस्तमो विश्वमुद्बोधयन्कैश्चिदुद्यन्महोभिर्मुनीन्द्रैः समम्।
तत्पुरात्प्रस्थितिं तेनिवान्पद्धतौ सार्वभौमो ग्रहाणामिवाभ्रे ग्रहैः॥३०॥

एष हीरसूरिर्मुनीन्द्रैर्वाचकपण्डितादिभिः समं तत्पुरात्सिद्धपुराभिधनगरात्पद्धतौ
मार्गे प्रस्थितिं प्रस्थानं तेनिवान् कुरुते स्म। क इव। सार्वभौम इव। यथा ग्रहाणां
चक्रवर्ती भास्वान् ग्रहैः सहाभ्रे आकाशे प्रस्थितिं तनुते। 'ग्रहाब्जिनीगोद्युपतिः' इति
हैम्यानुक्तत्वात् ग्रहपतित्वं भानोः। किं कुर्वन्नेष भानुश्च। तमोऽज्ञानं पापं वा ध्वान्तं
च निघ्नन् व्यापादयन्। पुनः किं कुर्वन्। विश्वं भुवनमुद्बोधयन्प्रतिबोधयन्, बोधिबी-
जान्वितं वा विदधत्, जागरयन्। किंभूतैः मुनिभिः। उद्यत्प्रकटीभवन्महः परवादि-
जनेषु प्रतापो येषां तैः। उत् ऊर्ध्वं यद्गच्छत् उपलक्षणाद्दशदिक्षु स्फुरत् झगज्झगिति
कुर्वन्महस्तेजो येषाम्॥ इति पत्तनात् शिरोत्तरायावन्मार्गे॥

भीरुभावान्निजं व्यालमालाकुलं भीष्ममौज्झ्याश्रमं नागपूरागता।
किं महीमण्डलं भिल्लपल्लीपुरो हीरसूरीन्दुना व्यालुलोके क्रमात्॥३१॥

हीरसूरीन्दुना श्रीहीरविजयसूरिचन्द्रेण क्रमाद्विहारपरिपाटीतः पुरोऽग्रे भिल्लानां

[illegible] ॥ अथ श्रीसूरेः पत्तने आगमनम् ॥

देशनामन्दिरं श्रीजिनेन्दोः पुरो व्यालुलोके नमस्या मुनीन्द्रैस्तत् ।
आप्तमाराद्धुकामेव लोकत्रयी यत्र भित्तीकृतवात्समस्युगी ॥ ११ ॥

तत पत्तने प्रवेशानन्तरं मुनीन्द्र सूरिः [illegible] पुरस्तात् श्रीजिनेन्दो श्रिया त्रैलोक्याधिपलक्ष्म्या कलितस्य जिनाना सामान्यकेवलिना मध्ये इन्दुः चन्द्र इव चतुस्त्रिंशदतिशयवत्त्वात् [illegible] सुरासुरनरेषु प्रसिद्ध यो देशनामन्दिरं समवसरण व्यालुलोके विलोकते स्म । [illegible] । तत्किम् । यत्र धर्मदेशनामन्दिरे वप्रत्रितय्याः प्राकारत्रयस्य व्याजात् । उत्प्रेक्ष्यते—आप्त श्रीजिनेन्द्रमाराद्धुकामा सेवितुमभिलषन्ती लोकत्रयी त्रिलोकी समीयुषी समागतेव ॥

यत्र वापीषु पश्यन्ति शम्भुश्रियं वारिदेव्यः सिताम्भोजनेत्रैरिव ।
अर्हतेव स्ववाचामृतं निर्जितं सेवितुं तं पुनस्तासु संतिष्ठते ॥ १२ ॥

यत्र समवसरणे वापीषु जलसपूर्णदीर्घिकासु वारिदेव्यो जलदेवता सितानि विकसितानि अम्भोजानि कमलानि तान्येव नेत्राणि नयनानि तै । उत्प्रेक्ष्यते—विकचकमललोचनैः कृत्वा शम्भुश्रियं तीर्थंकृतश्चतुस्त्रिंशदतिशायाद्यतिशायिलक्ष्मीं पश्यन्ति विलोकयन्तीव । पुनरर्हता जिनेन्द्रेण स्ववाचा मधुरिमाद्वैतात्मगिरा अमृतं पीयूषं निर्जितमभिभूतं सत् । उत्प्रेक्ष्यते—पुनस्तं जिनेन्द्रं सेवितुमुपासितुमिव तासु वापीषु सतिष्ठते समेत्य स्थितम् ॥

यत्र सोपानपङ्क्तिः शिवाह्वं महागेहमारोढुमूहेऽधिरोहिण्यभात् ।
निम्नगेत्यात्मकौलीननिर्मृष्टये जाह्नवीवोत्तरङ्गागताहत्पदे ॥ १३ ॥

यत्र भगवत्समवसरणे सोपानपङ्क्तिः आरोहणश्रेणी अभाद्बभौ । उत्प्रेक्ष्यते—शिव मोक्षमित्याह्वा नाम यस्य तादृशं महागेहमत्युच्चैःस्थानस्थितप्रासादमारोढुमुच्चैश्चढितुमधिरोहिणी नि श्रेणिकेव ऊहे इवाये । अथ वा वितर्कयामि । 'तपःकृशाङ्गास्त शैलमारोढुं न वय क्षमाः । चटिष्यति कथं प्रौढदेहोऽय गजराजवत् ॥' इति ऋषिमण्डलवृत्तौ । वा अथ वा इय निम्नगा नीचगामिनी । कामिन्यो नीचगामिन्यः इत्यप्यर्थध्वनिः । इत्यमुना प्रकारेण आत्मनः स्वस्य कौलीनस्य जनापवादस्य निर्मृष्टये विनाशनाय अर्हतस्त्रैलोक्यनायकस्य पदे चरणे समवसरणरूपे वा स्थाने आगता समागतवती । उत्तरङ्गा उत् ऊर्ध्वमुच्चैस्तराः सोपानरूपास्तरङ्गा कल्लोला यस्यास्तादृशी जाह्नवी जह्नुकन्या गङ्गेव ॥

यत्र सृष्टैरिव श्रेयसे तोरणैः सार्वविश्वाधिपत्याभिषेकक्षणे ।
येन नेतुं जनान्मुक्तिपुर्यामिवोद्घाटितैर्द्वारवारैः पुनः पुस्फुरे ॥ १४ ॥

यत्र समवसरणे तोरणैश्चतुर्दिक्प्रतोलीषु प्रणीतैर्बहिर्द्वारैर्वन्दनमालाभिर्वा पुस्फुरे

लघुदारीभूतोऽपि पुनः पुलिन्दराजोऽनेन गुरो मधुरमागतः नत्वा पादारविन्दप्रणमनेन कृत्वा निजमात्मानं पावयन् पवित्रीकुर्वन् सन् सूरिं हीरगुरुं स्वान् गृहान् आत्मीयानि मन्दिराणि प्रवर्तयीत् प्रापयामास। निनायेत्यर्थः। काभिः। भक्तिभिः। किंलक्षणाभिः। धार्मिप्णुभिः प्रवर्धनशीलाभिः। उत्प्रेक्ष्यते—यस्य सूरेर्गुरुं वदनं तस्यालोकनेन दर्शनेन कृत्वा प्रकर्षेण उत्सन् सर्वप्रकारेण वर्धमानो यः समदः परमानन्दसंदोहस्तेन सार्धं स्पर्धयेव सपर्ययेव ॥ इत्यर्जुनपालीपतिगृहागमनम् ॥

अथ चतुर्दशभिर्वृत्तैः किराताङ्गना विविनक्ति। चम्पूकथादौ तथाविधशबरदशावर्णनदर्शनात्। यदन्यत्तु चतुर्दशवृत्ते वक्ष्यते किरातवशा सकान्ता अजूहवदिति—

स्मेरपद्मेक्षणा भृङ्गगुञ्जारवा हसकोद्भासिनी सुस्मितश्रीभृतः।
कर्णिकामादधाना रसोल्लासिनीः पद्मिनीर्नीलभासस्तथामोदिनीः ॥३५॥

किंभूताः भिल्लीः। उत्प्रेक्ष्यते—पद्मिनीरिव। पद्मिनीः स्त्रीः कमलिनीश्च। किंभूताः। स्मेराणि प्रबुद्धानि पद्मानि कमलानि तद्वत्तान्येव वा ईक्षणानि नयनानि यासाम्। पुनः किंभूताः। भृङ्गाणां भ्रमराणां गुञ्जा इव रवो ध्वनिर्यासाम्। 'वाण्या भृङ्गीपिकीरवौ' इति काव्यकल्पलतोक्तत्वात्। पक्षे मधुकराणां गुञ्जारवो यासु। पुनः किंभूताः। हसकैर्नूपुरैः पक्षे हंसा एव हसकाः। स्वार्थे कः। तैर्मराले उद्भासन्ते प्राबल्येन शोभन्ते इत्येवंशीलाः। पुनः किंभूताः। सुशोभना स्मितस्य ईषद्धसितस्य सदा हसितवदनत्वस्य वा तरुणार्ककिरणसंपर्कवशविकसितताल्लक्ष्मी च बिभ्रतीर्दधती। पुनः किंभूताः। कर्णिका कर्णभूषणं बीजकोशं च दधानाः। पुनः किंभूताः। नीला मरकतमणिसदृशा भासो दीप्तयो यासाम्। पक्षे नीलाः। पुनः किंभूताः। रसैः शृङ्गारादिभिर्विविधक्रीडारसैर्वा पक्षे मकरन्दैरुल्लसन्तीत्येवंशीलाः। रसैः सलिलैरुल्लसन्ति उद्भवन्तीत्येवंशीला वा, वारिजत्वात्। पुनः किंभूताः। आमोदः आनन्दः परिमलश्च अस्ति आसामासु वा ॥

मेखलामालिनीः शालिपादाः स्फुरद्दन्तिका दन्तियानास्तमालत्विषः।
गण्डशैलोल्लसत्पत्रवल्लीभृतो विन्ध्यशैलाञ्जनोर्वीधरोर्वीरिव ॥ ३६ ॥

पुनरुत्प्रेक्ष्यते—विन्ध्यशैलो विन्ध्याद्रिस्तथा अञ्जनोर्वीधरः अञ्जनशैलः तयोरुर्वीर्भूमीरिव। किंभूताः। मेखला सुवर्णमणीकाञ्चीमद्रिमध्यभागं च मलन्ते धारयन्तीत्येवंशीलाः। पुनः किंभूताः। शालिन्यः शोभनशीलाः पादा भूषणालक्तकरङ्गकलिताश्चरणाः पर्यन्तपर्वता यासाम्। पुनः किंभूताः। स्फुरन्तो दीप्यमाना दृश्यमानाश्च दन्ता एव दन्तकाः दशनाः पर्वता बहिस्तिर्यङ्निर्गता गिरिप्रदेशाश्च यासां यासु वा। पुनः किंभूताः। दन्तिनां मत्तमतङ्गानां यानमिव यानं गमनं यासाम्। मध्यमपदलोपी समासः। पक्षे मत्तेभानां यानं स्वैरगतिर्यत्र। पुनः किंभूताः। तमालास्तापिच्छद्रुमविशेषाः। यदुक्तं नैषधे—'श्रवणपूरतमालदलाङ्कुरं शशिकुरङ्गमुखे सखि निक्षिप' इति। तद्वत् श्यामास्त्विषः शरीरकान्तयो यासाम्। पक्षे। तमालमालाभिः कृष्णकान्तयः। पुनः

पणविशिष्टानामेव तेषा जनानां चतस्रो नरकतिर्यङ्मनुष्यसुरलक्षणाश्चतु:सङ्ख्याका अपि गतीर्भवान्निराकर्तुमिव निवारयितुमिव वा चत्वारो देहा विहिता धृता ॥

भाति भामण्डलं राजवैरादिवाप्तस्य पृष्ठे प्रविष्टः प्रणश्यारुणः।
ब्रह्मणा यत्र मुक्तः किमर्चिर्व्रजो विश्वकृत्तक्षिताङ्गस्य वा भास्वतः १८

यत्र श्रीजिनधर्मदेशनसदने आप्तस्य तीर्थंकृतः पृष्ठे शिरसः पश्चात्प्रदेशे भामण्डल ज्योति पुञ्जो भाति विभ्राजते दीप्यते वा। उत्प्रेक्ष्यते—राज्ञा चन्द्रेण नृपेण वा सह वैराद्विरोधात् चन्द्रोदये क्वापि प्रणश्य याति स्वोदये च स्वकरैरेव प्रातश्चन्द्रश्रिय मुष्णाति। अत एव विरोधः। तस्मात्प्रणश्य प्रपलाय्य आप्तस्य विश्वस्तस्य अथ सर्वथापि प्राणत्यागेऽपि मह्यं कस्मैचिदपि न ददाति इति विश्वास प्राप्तस्य मित्रस्य पृष्ठे प्रविश्य स्थितोऽरुणो भानुमानिव। वाथवा ब्रह्मणा विधात्रा यत्र समवसरणे विश्वकृता देववार्धकिना तक्षित तनूकृत 'ताव्यू' इति लोकोक्त्या तादृशमङ्ग कायो यस्य। स्वदयिताादित्यतेजोसहिष्णुदक्षाङ्गजाभ्यर्थितदेववर्धकिना चक्रभ्रममारोप्य उल्लिखितवपुष इत्यर्थः। तादृशस्य भास्वतो भास्करस्य अर्चिर्व्रजस्तेजोराशिरिव मुक्त. स्थापितः। 'आरोप्य चक्रभ्रममुष्णतेजास्त्वष्ट्रेव यन्त्रोल्लिखितो विभाति' इति रघुवंशे ॥

किं प्रिये पूर्णिमाशर्वरी चन्द्रिका वक्रचन्द्रस्य पत्युर्द्विपार्श्वौ श्रिते।
कुन्तलैर्न्यक्कृते वानुनेतुं स्वयं राजतोऽभ्यर्णयोश्चामराली प्रभोः॥ १९॥

प्रभोर्वृषभतीर्थंकृतोऽभ्यर्णयोः पार्श्वयो· प्रदेशयोश्चामराली वालव्यजनमाले राजत शोभेते। उत्प्रेक्ष्यते—पत्युः स्वभर्तुर्वक्रचन्द्रस्य वदनविधोः। द्वयोः पार्श्वयो समाहारो द्विपार्श्वा तामुपान्तद्वन्द्व श्रिते। किंभूते। प्रिये द्वे कान्ते इव। एका पूर्णिमाशर्वरी राकारात्रिः, अपरा चन्द्रिका ज्योत्स्ना। 'कौमुदी कुमुदिनीभदक्षजारोहिणीद्विजनिशौषधीपतिः' इति हैम्याम्। द्वयोरपि पतित्वात् द्वे अपि उपेत्य द्विपार्श्वा श्रिते। चन्द्रकामिन्याविव वाथवा प्रभोर्नाभेयदेवस्य कुन्तलैः परिव्रज्याया उपादाने पञ्चमुष्टिलोचविरचनावसरे प्रसरत्पवने प्रेरितागता सस्थूललहलहायमानामानमूर्धजनिलोकनानन्दितपुरदरप्रार्थनाक्षणरक्षितैकमुष्टिमस्तकप्रशस्तकुन्तलहस्तेन न्यक्कृता तिरस्कृता सती स्वयमात्मना अनुनेतुमर्थात्प्रभु प्रसादयितु वा श्रिते प्रकीर्णकपङ्क्त्याविव ॥

आतपत्रत्रयी यत्र रेजे विभोः क्ष्माम्बरोद्द्योतकृत्स्वत्प्रसत्त्याभवम्।
मा त्रिलोक्याः पुनर्द्योतकं त्वं सृजेतीव वक्तुं त्रिमूर्तिः श्रितोऽयं शशी २०

यत्र समवसरणे विभोस्तीर्थनाथस्य आतपत्रत्रयी छत्रत्रितयी रेजे [illegible] उत्प्रेक्ष्यते—इत्यमुना प्रकारेण वक्तु कथयितु तिस्रो मूर्तयः [illegible] मूर्तिः तादृशोऽय भगवन्त श्रित· सेवमानः शशी चन्द्र इव। [illegible] त्वत्प्रसत्त्या श्रीमत्प्रसादात् अहं क्ष्माम्बरयोर्भूमिनभसोरुद्द्योतकृत् [illegible]

[illegible]

[illegible] ॥

[illegible] द्रुग्नाङ्गनाः ।

[illegible] पूर्णचन्द्राननाः [illegible] ॥३९॥

[illegible] ॥

[illegible] ।

[illegible] ॥ ४० ॥

[illegible] कृत्वा [illegible] च [illegible] ॥

स्वीयरूपप्रियया मानमातन्वतीः प्रेक्ष्यमाणा मुहुः सोरदम्भोरुहम् ।

[illegible] विशिष्ये किमेतद्द्वयोः [illegible] चित्ते विजिज्ञासया ॥ ४१ ॥

पुनः [illegible] । मुहुर्वारंवार [illegible] प्रेक्ष्यमाणा. [illegible] । उत्प्रेक्ष्यते—[illegible] प्रकारेण विजिज्ञासया विशेषप्रकारे-

मेनिरे। 'मद्विप्रलभ्यं पुनराह यस्त्वा तर्कः स किं तत्फल वाचिमूकः' इति नैषधे। विप्रलब्धुं योग्यं विप्रलभ्यमिति तदर्थः॥

आप्तलक्ष्मीलताया इवोच्चैःफलं वीक्ष्य विश्वेशितुर्देशनावेश्म तत्।
गोचरी स्यान्न वाक्चेतसोर्यः क्वचित्संमदं विन्दति स्म व्रतीन्द्रः स तम्॥२४॥

स व्रतीन्द्रो हीरविजयसूरिः तं मोहदयासादनसदृशं समदमानन्दं विन्दति स्म लभते स्म। तं कम्। यः संमदः क्वचित्कुत्रापि स्थाने नभःकल्लोलिनीविलासकल्लोलमाला- स्खलितवाग्विलासशालिसुरासुरनरसूरिषु वा वाक्चेतसोर्वचनमनसोर्वा न गोचरी स्याद्विषयो भवेत्। किं कृत्वा। विश्वेशितुस्त्रैलोक्यनायकस्य श्रीमत्तीर्थकृतो देशनावेश्म- समवसरणं वीक्ष्य लोचनगोचरीकृत्य। किंभूतं तत्। पूर्वव्यावर्णितस्वरूपम्। उत्प्रेक्ष्यते— आप्तस्य जिनराजस्य लक्ष्मीर्भुवनत्रयैश्वर्यश्रीः सैव लता विक्रमद्रुणी उच्चैःफलं तस्या- लमिव॥ इति पुरकृतानुसारेण समवसरणवर्णनम्॥

तीर्थकृद्वक्त्रचन्द्रेक्षणोद्वेलितानन्दसिन्धोरिवोद्भूतनूतामृतैः।
स्वेन तत्राभिनोनूय नव्यैः स्तवैः श्रीजिनं नेमिवान्हीरसूरीश्वरः॥२५॥

हीरसूरीश्वरस्तत्र समवसरणे स्वेनात्मना नव्यैः [illegible] स्तुतिस्तुतं अभिनोनूय अतिशयेन भक्तिभरेण स्तुत्वा श्रीजिनं श्रीमद्भगवन्तं नेमिवान् प्रणमति स्म। [illegible] क्ष्यते—स्तवैः तीर्थकृतो जिनेन्द्रस्य वक्त्रं वदनमेव चन्द्रः पार्वणशशी [illegible] लोकनादुद्वेलितस्य वेलामतिक्रान्तस्योत्कण्ठितस्य आनन्दो [illegible] एव सिन्धुर[illegible]स्मादुद्भूतैः प्रकटजातैः अमृतैः [illegible]॥

सृष्टसर्वज्ञसंघः सुधाधामवद्भासरान्काश्चिदत्रातिवाह्य प्रभुः।
साधुवर्गैस्ततोऽन्वीयमानः पुरात्पूर्वदेशं प्रति श्रीनिमान्प्रस्थितः॥२६॥

ततः पत्तने [illegible] अनन्तरं पुरा[illegible] [illegible] प्रति प्रस्थितः प्रचलति स्म। किं क्रियमाणः [illegible] [illegible] मुनिमण्डलैरन्वीयमानोऽनुगम्यमानः। किं [illegible] [illegible] [illegible] ॥

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] ॥

[illegible] ।

[illegible] ॥ ३९ ॥

[illegible]

[illegible] ॥

[illegible] ।

[illegible] ॥ ४० ॥

[illegible] ॥

[illegible] प्रेक्ष्यमाणा मुहुः [illegible] ।

[illegible] विजिज्ञासया ॥ ४१ ॥

[illegible] प्रेक्ष्यमाणाः [illegible] प्रकारेण विजिज्ञासया विशेषप्रकारे-

पुलिन्द्राणां पल्ली पुरी शिरोत्तराभिधानग्रामविशेषः इखग्रामो वा व्यालुलोके दृग्गोचरीचक्रे। उत्प्रेक्ष्यते—महीमण्डलं पृथिवीपीठं प्रत्यागता । सप्तमी वा महीमण्डले समेता नागपुः भोगावतीनाम्नी भोगिनगरीव । किं कृत्वा । भीरुभावात् । बिभेतीत्येवशीला भीरुस्तस्य भावस्तस्मात् । अथ वा स्त्रीस्वभावात् । 'योषिद्विशेषास्तु कान्ता भीरुर्नितम्बिनी' इति हैम्याम् । भीतिसौलभ्याच्च । व्यालानां विषधराणां मालाभिः श्रेणीभिराकुलं निर्भरभृतमत एव भीष्मं भयानकं मनस्यत्यन्तभयोत्पादकं निजमात्मीयमनाश्रयं निवासस्थानमौज्झ्य त्यक्त्वा । 'वसीत निर्भये स्थाने' इति वचनात् द्विजिह्वभरभृतं भोगिभवनं मुक्त्वा क्षितौ समायाता नागनगरीव ॥

क्वापि शक्तिं वहद्भिः कुमारैरिवाम्भोजनाभैरिवोद्यद्गदाधारिभिः ।
याभिरूपैरिवाभाति कादम्बरी सादरीभूतचित्तैः किरातैर्भृता ॥ २१ ॥

या भिल्लपल्ली आभाति । किंभूता । बलवतामपि वहद्भिः किरातैर्भृता । तथा क्व[illegible] चित्स्थाने अम्भोजनाभैः कृष्णैरिव उद्यन्ती दीप्यमाना गदा सप्तधातुमयी [illegible] धरन्तीत्येवशीला गदाधारिणस्तादृशैः धारयन्ती शबरैर्व्याप्ता । क्वचन पानभूमौ [illegible] म्बर्यां मदिरापाने सादरीभूतं तत्परं संजातं चित्तं मनो येषाम् । कैरिव । अभि[illegible] यथा कोविदैः कादम्बरीनामा बाणकविकृतग्रन्थविशेषस्तस्मिन्नादरेण [illegible] नासक्तमानसैर्जायते तादृशैः सुरापायिभिर्भिल्लैर्भृता ॥

तत्र वित्रासयन्नर्जुनः शात्रवानस्ति पल्लीपतिः कङ्कपक्षाश्रितः ।
जिष्णुभावं सुभद्रानुषङ्गं पुनर्बिभ्रदक्षैतधानुष्कता पार्थवत् ॥ २२ ॥

तत्र शिरोत्तरानामपल्ल्यामर्जुनो नाम पल्लीपतिः अस्ति [illegible] मपाण्डव इव फाल्गुन इव । किं कुर्वन् । शात्रवान् [illegible] त्रासयन्विनाशयन् । पुनः किंभूतः । कङ्काना [illegible] 'पत्रं पतत्रं पिच्छं वाजस्तनूरुहम् । पक्षो गरुच्छदश्चापि' इति हैम्याम् [illegible] कङ्कपत्राणि बाणास्तैराश्रितः । उभयपार्श्वतूणीर [illegible] कङ्कस्य युधिष्ठिरस्य पक्षः सहायतनाम् [illegible] श्रितः । 'पक्षो मासार्धे गृहसाध्ययोः' [illegible] विरोधे देहाङ्गे सहाये राजकुञ्जरे ॥' इ[illegible] युधिष्ठिरः । कङ्कोऽजनाद[illegible]' इति हैम्याम् । पुन[illegible] [illegible]

[illegible]

[illegible]

[illegible]

त्वया आदातुं गृहीतुमिच्छयैव त्रासमुत्पादयन्ती। असद्वस्तुग्रहणे समीहा भवेत्। यतः स्वय श्यामवर्णत्वेन स्वर्णवर्णवपुः शोभादानमौचितीमञ्चति ॥

क्वापि विश्लेपयन्तीर्वकाञ्जीवनाद्धार्तराष्ट्रान्पुनर्भीमवाहा इव।
राक्षसीवत्क्षपारागिणीरुत्पलाकाङ्क्षिणीः कृप्तकीलालपानाः पुनः ॥ ४५ ॥

क्वापि गृहोद्यानदीर्घिकादिप्रदेशे काश्चित् शबरनायकनितम्बिनीर्जीवनाज्जलात्सकाशात् वकान् वलाहकान् मीनाशिनो जलचरान् पक्षिविशेषान् तथा धार्तराष्ट्रान् सितेतरपक्षान् राजहसजातिविशेषान् विश्लेषयन्तीः परस्पर स्ववशाभिः बालकैर्वा वियोगं नयन्तीः। उड्डाययन्तीरित्यर्थः। का इव। भीमवाहा इव। कुन्तीतनुजन्मत्रिकापेक्षजातीया मध्यमपाण्डवस्य युधिष्ठिरानुजन्मनो वृकोदरभुजा यथा वकानिति वकनामान राक्षसम्। बहुत्व तु लङ्काधिपतिराक्षसराजत्वात्। तथा धार्तराष्ट्रान् धृतराष्ट्रस्यापत्यानि धृतराष्ट्रस्य पितृव्यस्य शत दुर्योधनदुःशासनप्रमुखान् पुत्रान् जीवनाज्जीवितव्यात् विश्लेषयन्तीर्वियोजयन्तीः। निघ्नतीरित्यर्थः। पुनः काश्चित्क्षपासु हरिद्रासु। 'हरिद्रा काञ्चनी पीता निशाख्या वरवर्णिनी' इति हैम्याम्। रात्रिसर्वनामभिरर्थे सति हरिद्रैवोच्यते। यथा चम्पूकथायाम्—'वररजनीकरकान्ते' इति। 'निशानभः सदृशे मज्जनगृहे। किलक्षणा। वरा। विशिष्टविज्ञानोपेता रजनीकरा हरिद्रोद्वर्तनादिकारकाः पुमासस्तैः कान्ते प्रधाने। निशानभवि किलक्षणे। वरः सर्वकलासपूर्णो रजनीकरश्चन्द्रस्तेन मनोज्ञे' इति चम्पूटिप्पनके। रागो वपुरुद्वर्तनादिना आसक्तिर्विद्यते यासाम्। तथा उत्पलानि कुवलयान्याकाङ्क्षन्तीत्येवशीलाः। पुनः कृप्त रचित कृतं कीलालस्य पानीयस्य पान याभिः। किवत्। राक्षसीवत्। यथा निशाचर्यः राक्षस्य क्षपाया रजन्या रागोऽस्त्यासाम्। रात्रिचरत्वात्। तथा उत्प्राबल्येन पल मांसमाकाङ्क्षति सामस्त्येन वाञ्छतीत्येवशीलाः। पलादत्वात्। पुनः निर्मित कीलालस्य रुधिरस्य पान याभिः। असृक्पत्वात्। 'रात्रिचरो रात्रिचरः पलादः कीनाशरक्षोनिकसात्मजाश्च। क्रव्यात्कर्बुरनैर्ऋतास्रपाः' इति हैम्याम्। 'कीलाल रुधिरे नीरे' इत्यनेकार्थः ॥

केलिवापीपयोमज्जनव्याजतो नागनारीर्विजेतुं व्रजन्तीरिव।
नागगेहोपसीदत्तदम्भोजदृग्विभ्रमं कुर्वतीर्निःसरन्ती पुनः ॥ ४६ ॥

काश्चित्किरातेशितुः कान्ताः केलिवापीषु क्रीडाकृते या गृहोपवनदीर्घिकास्तासु पयसि स्वतन्त्रसलिलान्तरालखेलनसमये पयसि पानीये मज्जनाना क्रीडारसाद्रूदनानां तनुप्रादुर्भवनव्यतिकरे वा सलिलाद्वहिर्निर्गच्छन्ती सती नागगेहाद्भुजगभवनादुपसीदन्तीनामागच्छन्तीना तदम्भोजदृशां नागनिकेतननितम्बिनीनां विभ्रम विशेषेण भ्रान्ति कुर्वतीः सृजन्तीरिव। एतद्दीर्घिकावारिवर्त्मना नागलोकात्कथचिद्भूमण्डलालोकनकुतूहलात्क्रीडाकृते वा निर्गता नागाङ्गना इवेति भ्रमः ॥

पुलिन्द्राणां पल्ली पुरी शिरोत्तराभिधानग्रामविशेषः ह्रस्वग्रामो वा व्यालुलोके दृग्गोचरीभूते। उत्प्रेक्ष्यते—महीमण्डलं पृथिवीपीठं प्रत्यागता । सप्तमी वा महीमण्डले समेता [illegible] भोगावतीनाम्नी भोगिनगरीव । किं कृत्वा । भीरुभावात् । बिभेतीत्येवंशीला भीरुस्तस्या भावस्तस्मात् । अथ वा स्त्रीस्वभावात् । 'योषिद्विशेषास्तु कान्ता भीरुर्नितम्बिनी' इति हैम्याम् । भीतिसौलभ्याच्च । व्यालानां विषधराणां मालाभिः श्रेणीभिराकुलं निर्भरं [illegible] मत एव भीष्मं भयानकं मनस्यत्यन्तभयोत्पादकं निजमात्मीयमाश्रयं [illegible] मौज्झ्य त्यक्त्वा । 'वसीत निर्भये स्थाने' इति वचनात् द्विजिह्वभरभृतं भोगं [illegible] मुक्त्वा क्षितौ समायाता नागनगरीव ॥

क्वापि शक्तिं वहद्भिः कुमारैरिवाम्भोजनाभैरिवोद्यद्गदाधारिभिः ।
याभिरूपैरिवाभाति कादम्बरीसादरीभूतचित्तैः किरातैर्भृता ॥ २२ ॥

या भिल्लपल्ली आभाति । किंभूता । बलवतामपि वहद्भिः किरातैर्भृता । [illegible] चित्स्थाने अम्भोजनाभैः कृष्णैरिव उद्यन्ती दीप्यमाना गदा [illegible] धरन्तीत्येवंशीला गदाधारिणस्तादृशैः धारयन्ती शबरैर्व्याप्ता । [illegible] म्बर्यां मदिरापाने सादरीभूतं तत्परं संजातं चित्तं मनो येषाम् । [illegible] यथा कोविदे कादम्बरीनामा बाणकविकृतग्रन्थविशेषस्तस्मिन्नादरेण [illegible] नाग्रक्रमानरोजायते तादृशैः गुरापाणिभिर्भिल्लैर्भृता ॥

तत्र वित्रासयन्नर्जुनः शात्रवानस्ति पल्लीपतिः [illegible] ।
[illegible] सुभद्रानुषङ्गं पुनर्बिभ्रदद्भुत[illegible] ॥ २३ ॥

तत्र शिरोत्तरानामग्रामे अर्जुनो नाम पल्लीपतिः [illegible]

[illegible]

कारयामास । इत्यन्तचतुर्दशभिः कुलकम् ॥ इत्यर्जुनकिरातपतिप्रमदाना विविधविलासचेष्टास्वरूपवर्णनम् ॥

जगमं सार्वभौमं किमुर्वीभृता सूरिशीतांशुमायान्तमालोक्य तम् ।
अर्जुनाम्भोजनेत्रास्तदङ्घ्रिद्वयं नेमुरानन्दसान्द्रीभवन्मानसाः ॥ ४९ ॥

अर्जुननाम्नः पल्लीपतेरम्भोजनेत्रा नलिननयना' कान्तास्तस्य हीरसूरेरङ्घ्रिद्वय चरणयुगलं नेमु' प्रणमन्ति स्म । किंभूता' । आनन्देन प्रमोदेन कृत्वा सान्द्रीभवन्ति निचिडानि जायमानानि मानसानि मनांसि यासाम् । किं कृत्वा । सूरिष्वाचार्येषु ज्योतिश्चक्रायमानेषु मध्ये शीतांशु सुधाकर चन्द्रमायान्तमात्ममन्दिरेषु समागच्छन्तमालोक्य स्वनयनयोर्गोचरीकृत्य । दृष्ट्वेत्यर्थः । उत्प्रेक्ष्यते—जगम सचरन्त वसुधाविहरणशीलमुर्वीभृता पर्वताना सार्वभौम चक्रवर्तिनमिव । मेरुगिरिमिव ॥

कामिनीभिः किराताधिभर्तुस्ततो मौक्तिकौघैरवाकीर्यत श्रीप्रभुः ।
सोऽप्यवैधव्यलक्ष्मीमिवानश्वरीं स्वेन ताभ्यो ददौ धर्मलाभाशिषम् ५०

ततो वन्दनानन्तर किराताना पुलिन्द्राणामधिभर्तु. स्वामिनः अर्जुनस्य कामिनीभि. कान्ताभिः मौक्तिकौघैर्मुक्ताफलमण्डलै श्रीप्रभुः श्रीमान् हीरविजयसूरि' अवाकीर्यत वर्धाप्यते स्म । पुनर्वर्धापनानन्तर सोऽपि श्रीप्रभु स्वेनात्ममुखेन ताभ्यः किरातेन्द्रकामिनीभ्यः धर्मलाभमेवाशिष मङ्गलशसनमाशीर्वाद ददौ दत्तवान् । उत्प्रेक्ष्यते—अनश्वरीं शाश्वतीमवैधव्यस्य अर्थात्तासामेवार्जुननारीणामवैधव्यस्य लक्ष्मीमिव । 'विश्वस्ता विधवा समे' इति हैम्याम् । तथा 'नलात्स्ववैधव्यमनासुमानता' इति नैषधे ॥

देशनाम्भोदधारां सुधाया इव ज्येष्ठजामिं मुनीन्द्रस्य पीत्वादरात् ।
भिल्लभर्तुर्जजृम्भे मन.कानने बोधिफुल्लल्लताश्लेषिहर्षद्रुमः ॥ ५१ ॥ ✓

भिल्लभर्तुरर्जुननाम्नो भिल्लाना शबराणा भर्तुर्नायकस्य पल्लीपतेर्मनो मानसमेव कानन वन तत्र बोधि. सम्यक्त्वमेव फुल्लन्ती विकसन्ती लता वल्ली तया आश्लेष आलिङ्गनमस्त्यस्य एतादृशो हर्षद्रुम. प्रमोदपादप जजृम्भे प्रादुर्भवति स्म । किं कृत्वा । मुनीन्द्रस्य हीरसूरेर्देशना धर्मकथा सैव अम्भोदधारा मेघपयोवृष्टिस्तामादरादेकाग्रचित्ततया पीत्वा निपीय सादर श्रुत्वा । उत्प्रेक्ष्यते—सुधाया. पीयूषस्य ज्येष्ठजामि वृद्धभगिनीमिव ॥

वर्णयामः किमस्यामृतस्राविणीं बिभ्रतो भारतीं वज्रसूरीन्द्रवत् ।
वङ्कचूलो यथा धर्मघोषेण यद्येन रौद्रोऽपि भिल्लप्रभुर्बोधित' ॥ ५२ ॥

अस्य हीरसूरेः किं वर्णयाम किं किं स्तुतिगोचरीकुर्म. । अस्य किं कुर्वत । वज्रसूरीन्द्रवद्वज्रस्वामिनाम्न आचार्यपुरदरस्येव अमृतस्राविणीं सुधारसोद्गारिणीम् । पीयूषवर्षिणीमित्यर्थ । भारतीं वाणीं वाग्विलास बिभ्रतो धारयत. । यत्कारणायेन भगवता

किंभूताः । गण्डशैलयोर्गण्डस्थलयोरुल्लसन्त्यो विचित्रतया स्फुरन्त्यो याः [illegible] पत्रलतास्ता बिभ्रतीः । पक्षे गण्डशैलाः पर्वतात्परितः स्थूलाः उपल [illegible] उल्लसन्त्यो विकसन्त्यः पत्रैः पर्णैरुपलक्षिता उपचिता वा [illegible] 'देव भवद्वैरिवधूवदने च भान्ति नारङ्गतरूपशोभे गण्डशैल [illegible]' इति चम्पूकथायाम् गण्डयोः शैलोपमानम् । अथ वा गण्डशैलो कपोलप्रदेश [illegible]

भृङ्गनेत्रा मृणालीभुजा जृम्भिताम्भोजवक्त्रास्तरङ्गोल्लसत्कुन्तलाः ।
वन्धुरावर्तनाभी रथाङ्गस्तनी हंसयाना यमीवारिदेवीरिव ॥ २७ ॥

पुनरुत्प्रेक्ष्यते—यमी वारिदेवीर्यमुनाजलदेवता इव । किंलक्षणाः । [illegible] दम्भोरुहाभ्यर्णपरिभ्राम्यन्तो भृङ्गा अतिश्यामत्वा[illegible] भ्रमरा इ[illegible] नेत्राणि नयनानि यासाम् । पुनः किंभूताः । मृणाल्यः कमलनाल[illegible] शब्दो [illegible] लिङ्गेषु । यथा—'कुवलयमृणालमण्ड[illegible]मृणाल[illegible]' इ[illegible] शासने । ता इव । मृणाला एव वा भुजा बाहवो यासाम् । भुजा[illegible] पुनः किंभूताः । जृम्भितानि विकाश प्राप्तानि अम्भोजानि [illegible] वक्त्राणि वदनानि यासाम् । पुनः किंभूताः । तरङ्गाः [illegible] [illegible] वा उल्लसन्तो विविधविच्छित्त्या स्फुरन्तः कुन्तलाः केशपाशा [illegible] [illegible]

[illegible]

णामुपधेर्धनपद्यकपटात् तज्जयार्थं तेषां पर्वतानां भूपानां च जयस्य पराभवनस्य अङ्क चिह्नं किमु मायूरं मयूरपिच्छसंबन्धि छत्रमातपत्रमिवाधत्ते बिभर्ति स्म । किं कृत्वा । तुङ्गिम्न उच्चत्वस्य महिम्न पराक्रमस्य करितुरगादिपरिवारस्य जाल्यादेर्वा महत्त्वस्य श्रीभिर्लक्ष्मीभिर्वैभवैर्वा कृत्वा अन्यान्परान् गिरीन्नराधिपान्वा पराभूय विजित्य स्ववशीकृत्य वा ॥

अध्वरोद्धुः सुधाधामचण्डद्युतोर्विन्ध्यधात्रीधरस्येव संस्पर्धया ।
शृङ्गलेखाभिरभ्रंकषाभिर्नभःपद्धतिं रुद्धवानर्बुदोर्वीधरः ॥ ९६ ॥

अर्बुदाभिधान उर्वीधर शैलः अभ्रमाकाशं कषन्ति विलिखन्ति घृष्यन्तीति । 'कषू विलेखने' इत्यस्य धातुः । अभ्रकषास्ताभिर्गगनमण्डलोल्लेखिनीभिः शृङ्गलेखाभि शिखरराजीभिः कृत्वा नभ पद्धतिं व्योममार्गं रुद्धवानात्मना रुणद्धि स्म । उत्प्रेक्ष्यते—सुधाधामा चन्द्र, चण्डद्युत्सूर्य, तयोरध्वनो मार्गस्य रोद्धुः रोधविधातुर्विन्ध्यधात्रीधरस्य विन्ध्याचलस्य संस्पर्धया सहर्षेणेव असूयेव ॥

क्वापि शृङ्गे विनीले तमाले शशी यस्य चूडामणीवत्कचानां चये ।
क्वापि शोणाश्मशृङ्गे पुनर्भानुमान्प्राग्गिरेः सानुनीवोदयँल्लक्ष्यते॥९७॥

यस्यार्बुदाग्रे क्वापि कुत्रापि स्थाने तमालैः समुल्लसद्बहलदलमण्डलसच्छवितापिच्छपादपैर्विनीले अतीव श्यामलीभूते शृङ्गे शिखरे शशी चन्द्रमा कचानां चये कामिनीकेशपाशे चूडामणीवत् चूडारत्नमिव लक्ष्यते ज्ञायते वा । पुनरपरेऽर्थे क्वापि कुत्रापि प्रदेशे शोणाश्मभि पद्मरागमणिभिर्निर्मिते शृङ्गे कूटे भानुमान् सहस्ररश्मि प्राग्गिरेरुदयाचलस्य सानुनी प्रस्थे उदयन्नभ्युद्गम लभमान इव लक्ष्यते निरीक्ष्यते ॥

मौलिलीलायमानामृतांशुक्षरन्निर्झराम्भःप्रवाहस्वरूपैरसौ ।
सातपत्रस्फुरच्चामरैर्भूभृतां राजभावं बिभर्तीव भूमीधर ॥ ९८ ॥

असौ भूमीधर अर्बुदाचलः सहातपत्रेण छत्रेण वर्तन्ते यानि तानि सातपत्राणि । तथा स्फुरन्ति इतस्ततः प्रसरन्ति चञ्चलीभवन्ति यानि चामराणि रोमगुच्छानि तैः कृत्वा । उत्प्रेक्ष्यते—भूभृतां सर्वपर्वतानां राजभावं स्वामित्वमाधिपत्यं वा बिभर्ति धारयतीव । किंभूतः । मौलौ शिरःशिखरोपरि लीलायमानो लीलया स्ववशेनाचरन् प्रवर्तमानः प्रचलन्वा अमृतांशु शीतदीधिति । तथा क्षरतां शिलान्तरालेभ्यो निःसरतां निर्झराणामम्भसां पानीयानां प्रवाहा धारास्त एव स्वरूपमात्मा येषां तैः ॥

कुन्दरुङ्नीरमुङ्नीलकण्ठः पुनश्चन्द्रचूडः शिवः सिंहयानाङ्कितः ।
वातवेल्लल्लताकॢप्तलास्यः सरियोऽनुयातीव दिग्वाससं किं दिवा ॥९९॥

योऽर्बुदगिरि दिवा दिवस दिश आशा एव वासांसि वस्त्राणि यस्यासौ दिग्वासा ईश्वरः तमनुयात्यनुकरोति सदृशीभवतीव । 'दिक्कृत्तिवासा भवनीललोहितो' इति है-

पात्वोऽनुमेच्छया । इति किम् । [illegible] वाले । उतास्य वा एतस्मिन्ननेरम्भोरुहे [illegible] विशिष्यते । 'कथं च स देशः [illegible] न' इति [illegible] । [illegible] भवति स्म यः ॥

निर्जितस्त्वत्सखासन्मुखेन [illegible] ।
वीक्ष्यमाणा वपुर्निभमं दर्पणे सूचयन्तीरिति [illegible] ॥ ३२ ॥

[illegible]

यो धरित्रीधरः अर्बुदपर्वतः क्वापि कुत्रापि प्रदेशे पुर नगर धत्ते बिभर्ति। उत्प्रेक्ष्यते—स्व स्वर्ग बिभ्रतो धारयत सुमेरोः कनकाचलस्य। 'मेरुः स्वर्गाधार.' इति परसमये। यदुक्त च नैषधे—'दिवमङ्कादमराद्रिरागताम्' इति। स्पर्धया सदर्पेणेव। यः किंभूत। अर्जुनाना ककुभद्रुमाणा मेरुपक्षे स्वर्णाना च श्रिय शोभा दधातीति दध। पुनः किंभूत। मर्त्याना विलासागताङ्गनायुतमनुष्याणा पक्षे अमर्त्याना स्वाङ्गनासगतकिंनरसिद्धगन्धर्वादिदेवाना मालाभिः श्रेणिभि स्फुरन्त्य शोभमाना कदरा गुहा यस्य। पुन. किंभूतः। भद्रैः श्रेष्ठैरथवा कल्याणकलितैः कदाचित्केऽपि तान खण्डयन्ति तादृशै सालैः पादपैर्देवदारुभिर्वा उल्लसमुल्लास प्राप्नुवन्। मेरुपक्षे—भद्रशालनाम्ना मन्दरोपत्यकावर्तिना वनेन च शोभमान.। पुन किंभूत.। ऋक्षाणा भल्लूकाना मद्दरकेशाकृताङ्गाना 'रींछ' इति लोके प्रसिद्धाना वन्यस्वापदानाम्। मेरुपक्षे—ऋक्षाणा नक्षत्राणाम्। भू स्थानम्। 'नक्षत्रभू क्षत्रकुलप्रसूतेर्युक्तो नभोगे खलु भोगभाज'। सुजातरूपोऽपि न याति यस्य समानता काचन काननाद्रिः॥' इति चम्पूकथायाम्॥

अम्बरालिङ्गिशृङ्गावलीपल्वलोपाश्रयाः स्मेरदम्भोजिनी रागिणी.।
योऽभिकेनाभ्रपान्थेन साकं सदा मित्रवत्कारयामासिवान्संगमम्॥ ६२॥

योऽर्बुदोऽद्रिर्मित्रवत्सखेव रागिणीः शोणा अनुरक्ताश्च स्मेरन्तीर्विकसन्ती अनुरागातिरेकात्तुरसीभवन्तीश्चाम्भोजिनी पद्मिनीस्त्रियः कमलिनीश्च। अभिकेन कामुकेन। 'कामुक. कमिता कम्रोऽनुक' कामयिताभिक' इति हैम्याम्। तथा 'प्रत्यहमस्याभिकेन रक्षा कर्तु नपोनेव निजारमस्ति' इति नैषधे। अनुरागिणा अभ्रपान्थेन भानुना, साक सदा प्रतिदिन सगम सयोग कारयामासिवान् मेलापयति स्म। प्रियमित्रोऽपि कयाचिदनुरागिण्या पद्मिन्या कामिन्या सम सखीन सगमयति। किंभूता। अम्बरमाकाशमालिङ्गन्ति सस्पृशन्तीत्येवशीलाना शृङ्गाणा शिखराणामावली श्रेणी तस्या ये पल्वला अखातसरासि तेषु उपाश्रय स्थान यासाम्। 'केऽपि पल्वलपयोरुपाश्रये' इति नैषधे। उपाश्रय स्थान साधूनामपि प्रसिद्धम्। अत्युच्चैस्त्वशिखरसरसिस्थितत्वेन रविणा सयोग. सुकर एवेति। पद्मिनीनामपि चन्द्रशालासगतानाम्। 'चन्द्रशाला शिरोगृहम्' इति हैम्याम्॥

सिन्धुशैलोद्भवद्भोरपैर्दुर्वहा बिभ्रतो भूतधात्री फणामण्डलैः।
भोगिना वासवस्येव विश्रान्तये निर्मितो नाभिजातेन यः क्ष्माधरः ६३

यः अर्बुदाचलः। उत्प्रेक्ष्यते—भोगिना भुजगनाथस्य वासवस्य पुरन्दरस्य शेषनागस्य विश्रान्तये विश्राम दातु नाभिजातेन प्रजापतिना ब्रह्मणा निर्मित[illegible] इव। किंभूतस्य वासवस्य। सिन्धवः सर्वेऽपि समुद्रा, शैला मेरुहिमाद्रिप्रभृतयः सर्वेऽपि पर्वता., तेभ्य उद्भवद्भिरत्यन्तमानैर्भारैरत्युरुतरैर्दुर्वहा दु खेन वोढु शक्यान्। दु खेन परानपेक्षत्वेन एकेन वाहनेनोह्यते इति दुर्वहा ताम्। भूत-

भास्वतः कान्तिवद्वारुणीरागिणीः शालिनीः पत्त्रलीः शालिशाखा इव ।
नन्दनानन्दिनीर्मन्दरोर्वीरिव प्रीणयन्तीर्मनः साधुगोष्ठीरिव ॥ ४७ ॥

का इव किरातीः । वारुणी मदिरा तस्या विषये तत्पाने रागः अस्त्यासामिति रागिणीः । 'कादम्बरीमधुपानमदघूर्णितदृशः' इति चम्पूकथायां भिल्लीनामपि मदिरापानं दृश्यते । किंवत् । कान्तिवत् । यथा भास्वतः सहस्ररश्मेः कान्तयो दीप्तयः वारुण्यां वरुणदिक्पालस्य इयं दिग्वारुणी पश्चिमा दिक् तस्यां रागिण्यः । पश्चिमायां समेतस्य भास्वतः मार्तण्डमण्डलस्य मरीचयो रागरञ्जिताः सरागा भवन्ति । रागः आसक्तिररुणिमा च । पुनः किंभूताः । शालन्ते शोभन्ते इत्येवंशीलाः शालिन्यः पत्रवल्यः पत्रलताः यासाम् । का इव । शालिशाखा इव । यथा वृक्षाणां शिखाः शोभनशीलाः पत्राणां पर्णानामावल्यः श्रेणयो यासु तादृश्यो भवन्ति । पुनः किंभूताः । नन्दनैर्निजाङ्गजैः पुत्रैरानन्दः प्रमोदः अस्त्यासाम् । का इव । मन्दरोर्वीरिव । यथा मेरुभूमयः नन्दननामवनेनानन्ददायिन्यः स्युः ताः । जिनशासने मन्दरो मेरुरुच्यते । यथा भक्तामरस्तवे—'किं मन्दराद्रिशिखरं चलितं कदाचित्' इति । यथा ज्ञातस्य स्तुतौ 'मन्दररत्नशैलशिखरे जन्माभिषेकः कृतः' इति । मन्दरेषु पञ्चसु मेरुषु मेरुषु रत्नं लक्षयोजनप्रमाणत्वात्सर्वद्वीपसमुद्राणां मध्यवर्तित्वान्नाभिस्थानकत्वाच्च रत्नम् । अपरे चत्वारो मेरवः चतुरशीतियोजनमानाः । जिनजन्माभिषेको मेरुं विनान्यत्र न स्यादिति । तथा सिद्धान्तेष्वपि मन्दरस्मरणं लभ्यते । 'पञ्चयस्स—' इत्यादि । शैवशासनेषु तु मन्दर इन्द्रकीलशैलः । अत्र तु जैनमतानुसारेणैव मेरुः । पुनः किं कुर्वतीः । मनः तद्विभ्रमविलासक्रीडादिविलोकक्रानामन्तःकरणं प्रीणयन्तीस्तोषयन्तीः । का इव । साधुगोष्ठीरिव । यथा साधूनां संसारमुमुक्षूणाम् । अथ वा साधुभिः सत्तमैः पुंभिः समं गोष्ठीः संसारापारपारावारपारोत्तरणोपायप्रकथनेन सन्मतिशिक्षाप्रदानेन च मानसं परमानन्दसंदोहासादनमेदुरं विदधतीः ॥

आश्मगर्भीयसंदर्भविभ्राजिनीः शालभञ्जीरिव स्वैरसंचारिणीः ।
सूरिपादान्प्रणम्यान्प्रणन्तुं निजास्तत्र कान्ताः किरातेशिताजूहवत् ४८

पुनरुत्प्रेक्ष्यते—आश्मगर्भीयो मरकतरत्नसंबन्धी । 'मरकतं त्वश्मगर्भं' इति हैम्याम् । यः संदर्भो रचनाविशेषस्तेन विभ्राजन्ते इत्येवंशीलाः । पुनः किंभूताः । स्वेच्छया स्वतन्त्रं दिव्यानुभावात्कोकाशसूत्रधारादिकृतकीलिकादिप्रयोगाद्वा संचरणशीलाः । इतस्ततः परिभ्रमणस्वभावा शालभञ्जीः पाञ्चालिका इव । एषु सर्वेष्वपि वृत्तेषु द्वितीयाबहुवचनानि ज्ञेयान्यग्रेतनसंबन्धात् । एवं व्यावर्णितस्वरूपा निजा आत्मीयाः कान्ताः प्रियतमाः किरातानां भिल्लानामीशिता स्वामी अर्जुनस्तत्र भगवत्पादपवित्रीकृतनिकेतने प्रणम्यान् जगज्जननमस्करणीयान् सूरिपादान् प्रणन्तुं नमस्कर्तुमजूहवदा-

येऽपि स्थातुमेकत्र स्थितिं विधातुं यथा एकया मूर्त्या प्रयागे यमुनया सह तिष्ठामि तथा अपरयापि मूर्त्या आधारेऽपि यमुनया सहाहं वसामीति विचिन्त्य मित्रपुत्री कालिन्दीनाम्नी सह सार्धमुपादाय गृहीत्वा ॥

रोहिणीरागिभावान्निजत्यागिनं कान्तमेणाङ्कमुत्सृज्य कोपाकुला ।
औषधीसंततिर्निर्मिमीतेऽनिशं तापसीवत्तपांसीव यस्मिन्गिरौ ॥ ६७ ॥

औषधीनां विधुवधूनाम् । चन्द्रस्य तत्पतित्वात् । 'रोहिणीद्विजनिशौषधीपतिः' इति हैमचन्द्रवचनात् । संततिः श्रेणिर्यस्मिन् गिरौ अर्बुदपर्वते । उत्प्रेक्ष्यते—तापसीव परिव्राजिकाराजीव अनिशं निरन्तरं तपांसि शीतोष्णतापनिरशनादिकष्टानि निर्मिमीते करोतीव । किंभूता । कोपाकुला रोषोद्रेककलुषीकृताशया । किं कृत्वा । रोहिण्या दक्षाङ्गजाया रोहिणीनाम्न्या स्वसपत्न्या पत्न्या विषये रागिभावादत्यन्तानुरक्ताशयत्वान्निजस्यात्मनस्त्यागिनं त्यजनशीलमेणाङ्कं चन्द्रमसं कान्तं स्वभर्तारमुत्सृज्य त्यक्त्वा ॥

भासते शातकुम्भाश्मगर्भोपलश्रेणिसंक्लृप्तशृङ्गद्वयं कुत्रचित् ।
यस्य विश्वातिशायिश्रियं वीक्षितुं मेरुविन्ध्याविवाल्पीभवन्तौ स्थितौ ६८

कुत्रचित्प्रदेशे शातकुम्भानां काञ्चनानां तथा अश्मगर्भोपलानां मरकतरत्नानां च श्रेणिभिः सम्यक्प्रकारेण क्लृप्तं रचितं देवादिना कौतुकाद्विनिर्मितं शृङ्गद्वयं शिखरद्वन्द्वं भासते दीप्यते । उत्प्रेक्ष्यते—यस्य हिमाद्रिनन्दनगिरेः विश्वेभ्यः समस्तपर्वतेभ्योऽपि विश्वेभ्यो जगद्भ्यो वा अतिशायिनीमत्यभ्यधिकां श्रियं शोभां लक्ष्मीं वा वीक्षितुं स्वदृग्गोचरीकर्तुं स्थितावागत्य वसन्तौ तथा अल्पीभवन्तौ वपुषा लघूभवन्तौ स्वशरीरे स्वल्पे प्रणीय मेरुविन्ध्यौ स्वर्णाचलजलवालकशैलाविव । 'विन्ध्यस्तु जलवालकः' इति हैम्याम् ॥

बिभ्रतो वाहिनीर्यस्य वार्धिप्लवाप्लाविनीः श्रीपराभूतभूमीभृतः ।
तिष्ठतः क्षोणिमाक्रम्य पूषार्चिषा वेदगर्भः करोतीव नीराजनाम् ॥ ६९ ॥

वेदगर्भो ब्रह्मा यस्यार्बुदभूमीभृतः पूषा भास्वांस्तस्यार्चिर्ज्योतिरथ च पूष्णोर्भानोस्तुल्यो जाज्वल्यमानत्वात् सहोऽर्चिर्निर्धूमधूमध्वजस्तेन नीराजनामारात्रिकां करोतीवेत्युत्प्रेक्ष्यते—अन्यस्यापि राज्ञ आरात्रिकोत्तारणं क्रियते । यथा कस्यापि भूभृतो वेदगर्भो ब्राह्मणः अर्थात्पुरोधाः । वेदगर्भ इति साभिप्रायं नाम तेन वेदमन्त्रोच्चारपूर्वकं दीप्रवह्निना नीराजनां निर्मिमीते । यस्य किं कुर्वतः । क्षोणिं भूमीमण्डलमाक्रम्याधिष्ठाय सर्वात्मनाभिव्याप्य तिष्ठतः वसतः स्थितिं कुर्वतः । पुनः किंभूतस्य । वार्धीनां चतुःसमुद्राणां प्लवान् वारिपूरानाप्लावयन्त्यतिक्रामन्ति आक्रामन्ति चेत्येवंशीला वाहिनीर्नदीः सेनाश्च बिभ्रतः । किंभूतस्य । श्रिया आत्मीयया शोभया चतुरङ्गचक्रादिवैभवैः कृत्वा पराभूता विजिताः स्वपादपद्ममधुकरीकृता भूमीभृतः पर्वता नृपाश्च येन सः ॥

रौद्रोऽप्यतिक्रूरोऽपि भिल्लप्रभुः पुलिन्दपतिरर्जुन. वोधित' वोधिबीज ग्रापितः। केनेव।
यथा धर्मघोषेण सूरिचन्द्रेण चण्डोऽपि वङ्कचूलनामा राजपुत्रीपल्लीपतिः प्रतिबोधितः।
कतिचिन्नियमान् ग्राहितौ द्वावपीत्यर्थ' ॥

उत्पथे प्रस्थितांस्तन्वतश्चापलं तत्र सूरिः किरातान्परानप्यसौ।
सत्पथेऽतिष्ठिपत्सत्त्वरक्षाव्रतै रश्मिभिः शूकलान्सादिवद्वाजिनः ॥ ५३ ॥

असौ हीरसूरिस्तत्र शिरोत्तरानामग्रामे परानन्यानपि किरातान् भिल्लान् सत्त्वानां जन्तूना रक्षा दया अहिंसा तदादिमै' सैव प्रथमा येषु तादृशैर्व्रतैर्विविधनियमैः कृत्वा सत्पथे शोभनमार्गे अतिष्ठिपत्स्थापयति स्म। किवत्। सादिवत्। यथा तुरगाणा दूषणदूपणलक्षणप्रस्थापनरक्षणनर्तनधौरितादिगतिकारापणादिकलाकुशल सादी अश्ववार' । 'अश्वारोहे चाश्ववार' सादी च तुरगी च स' इति हैम्याम्। शूकलान्दुर्विनीतान्। 'दुर्विनीतस्तु शूकलः' इत्यपि हैम्याम्। रश्मिभिः वल्गाकशादिरज्जुभि कृत्वा सत्पथे सर्वजनातिवाहिते वर्त्मनि स्थापयति। किलक्षणान् किरातान्। उत्पथे हिंसादिविधाने दुष्टाध्वनि मार्गादितरस्थाने वा प्रस्थितान्प्रवर्तमानान्प्रचलितान्। पुनः किंभूतान्। चापल द्यूतमांसमदिरावेश्यापापर्धिचौर्यपराङ्गनागमनाद्यनेकदुर्व्यसनेषु चञ्चलता लौल्यं चक्रपदस्थापनगमनादि च तन्वत' प्रकुर्वत. आद्रियमाणान्विस्तारयतश्च ॥ इत्यर्जुनपल्लीपतितत्सेवकाना नियमदानम् ॥

सूरिशीतांशुरापृच्छ्य भिल्लाधिपं संप्रणिन्ये पुरस्तादथ प्रस्थितिम्।
तावदग्रे ददर्शार्बुदोर्वीधरं विन्ध्यमभ्येतमेतं विनन्तुं किमु ॥ ५४ ॥

अथार्जुनादीना नियमदानानन्तर सूरिशीतांशुर्हीरसूरिचन्द्र भिल्लाधिपमर्जुन किरातराजमापृच्छ्य प्रश्नयित्वा पुरस्तादग्रे प्रस्थिति प्रस्थान गमनम्। प्रयाणमित्यर्थः। संप्रणिन्ये करोति स्म। प्रभुर्भट्टारकस्तावदग्रे पुरतः अर्बुदनामानमुर्वीधर पर्वत ददर्श लोचनगोचरीकरोति स्म। उत्प्रेक्ष्यते—विन्ध्य जलवालकापरपर्याय शैलम्। 'विन्ध्यस्तु जलवालकः' इति हैम्याम्। एत सूरिं विनन्तु विशेषेण नमस्कर्तुम् केन समुखमागतमिव ॥

यो गिरिस्तुङ्गिमश्रीभिरन्यान्पराभूय शृङ्गाग्ररङ्गत्पयोदोपधेः।
छत्रमाधत्त मायूरमुर्वीधराधीशितुर्नन्दनस्तं जयार्द्रं किमु ॥ ५५ ॥

य उर्वीधराणा पर्वताना भूपालाना चाधीशितुर्भर्तुर्नायकस्य भर्तुर्हिमाचलस्य चक्रवर्तिनो वा नन्दनः पुत्र'। 'गौरीवरश्वशुरभूधरसंभवोऽयमत्यर्बुदः कृतवदर्शिहिमाचलेन। मन्दाकिनीधनजटे दधदुत्तमाङ्गे य' शालक शशिभृतोऽभिनय करोति ॥' इति गुर्जरपुरोहितवस्तुपालवयस्यसोमेश्वरभट्टविरचितलक्षणिकवसतिप्रशस्तिकाव्ये। अर्बुदाद्रेर्हिमाद्रिपुत्रत्व प्रकटमास्ते। एतावतार्थेन अर्बुदनामा गिरि' कथितः। ... च। उत्प्रेक्ष्यते—शृङ्गाग्रे शिखरोपरितनप्रदेशे रङ्गता चरता पयोदाना ...

देश भूभागमलङ्करोति स्म भूषयामास। इत्यमुना प्रकारेण वीक्षितुं विलोकयितुं चेतसि स्वमानसे हस्तैरिवोत्कण्ठाकलित इव। इति किम्। गौरवेण माहात्म्येन गुरुतया वा कृत्वा अहमधिको गिरिर्वाऽप्यधिकोऽस्ति। यद्यपि परप्रशमरससुधासमुद्रमध्यनिमग्नमनसां कदाचिदप्याशये लेशमात्रमप्यनुत्सुकता स्यात्, तन्महात्मशालीनां तेषां सूरीणां स्वप्नेऽपि नायमभिप्रायः प्रादुर्भवेत्। किंतु केवलं कवेरियं कल्पनामात्रोत्प्रेक्षेति। अथ वा छाद्मस्थ्यात्कदाचिदुत्कलिकालेशः संभवत्येव गौतमादीनामपि शक्रादिकृतनाटकावलोकने॥

अर्बुदाधित्यकामभ्रविभ्राजिनीं सूरिसिंहः समारोढुमारब्धवान्।
किं व्यवस्यञ्जगन्मूर्धसंस्थायिनीमुद्विवक्षुर्महानन्दसीमन्तिनीम्॥ ७४॥

सूरिसिंहः अभ्रे आकाशे विभ्राजते इत्येवंशीलाम्। अम्बरचुम्बिनीमित्यर्थः। अथ वा अभ्रेमेघैः कृत्वा शोभनशीलाम्। 'गिरौ तिष्ठन्ति वारिदाः' इत्युक्तेः। अर्बुदस्य हिमाद्रिनन्दनशैलस्याधित्यकामूर्ध्वभूमिकां समारोढुं सम्यक्प्रकारेण चटितुमारब्धवान् प्रारम्भते स्म। सिंहस्य तु भूधराधित्यकाध्यारोहणं युक्तमेव। उत्प्रेक्ष्यते—जगतां त्रयाणां भुवनानां मूर्ध्नि मस्तके संस्थायिनीं जगत्त्रयोपरि संतिष्ठते निवसनशीला इत्येवंशीला महानन्दो मुक्तिरेव सीमन्तिनीं प्रौढकुमारिकामुद्विवक्षुरुद्वोढुमिच्छुः परिणेतुकामः सन् व्यवस्यन् व्यवसायमुद्यमं कुर्वाण इव॥

तद्गुणश्रेणिनिर्वर्णनानन्दितो वातपूर्णीभवत्कीचकानां क्वणैः।
अद्रिरभ्यागतस्येव तस्यान्तिकागामिनः प्रीतिमान्पृच्छति स्वागतम्॥ ७५॥

प्रीतिः स्नेहः प्रमोदो वा विद्यते यस्य तादृशोऽद्रिरर्बुदाचलः अन्तिके स्वसमीपे आगच्छति आयातीत्येवंशीलस्य तस्य सूरेः वातेन वायुना पूर्णीभवतामन्तःपूर्यमाणानां कीचकानां सच्छिद्रवंशानां क्वणैर्ध्वनिभिः। 'स कीचको मारुतपूर्णरन्ध्रः कूजन्निरायादितवंशकृत्यम्' इति रघौ। स्वागतं सुखेनागमनादिवार्तां पृच्छति प्रश्नयतीव। कस्येव। अभ्यागतस्येव। यथा स्वसमीपे समेतस्य प्रियप्राघूर्णिकस्य स्नेहकलितः स्वजनः प्रमोदकलितः प्रियत्वात्स्वागतं पृच्छत्यनुयुनक्ति। किंभूतः अद्रिः। तस्य हीरसूरेर्गुणानां श्रेणिनिर्वर्णनाद्दर्शनादानन्दितः प्रहृष्टमानसो जातः॥

लोलरोलम्बकोलाहलप्रस्तुतस्फीतकीर्तिस्तवामोदमेदस्विनी।
या ससैन्येर्नताङ्गी लताविभ्रहावाकिरत्कुञ्जदेवी प्रसूनैः प्रभुम्॥ ७६॥

...र्बुदगिरौ कुञ्जदेवी। ...तावेकवचनम्। वनदेवता प्रसूनैः प्रचलत्पवनप्रेरणप्रपतत्कुसुमोत्करैः कृत्वा तं हीरसूरिमवाकिरत् पर्यापयति स्म। अवाकिरन्नयोऽकुं... 'पर्यापित' इति रघौ। किंभूता कुञ्जदेवी। ... पञ्च ये रोलम्बा मधुकरास्तेषां कोलाहलः गुञ्जारवः ... प्रस्तुता ...

म्याम् । द्वावपि विशिनष्टि—किंलक्षणः । कुन्दानां विकसितकुसुमसततिरिवेत्युत्प्रे[illegible] न्दद्रुमाणां रुक् कान्तिर्यत्र । पक्षे कुन्दवदुज्ज्वला रुक् कायकान्तिर्यस्य । पुनः किं[illegible] नीरमुग्भिः उन्नमन्नीरदैः कृत्वा नीलः श्यामलीभूतः कण्ठः उपलकाभागः शि[illegible] रादधस्तनप्रदेशो यस्य । पक्षे मेघवन्नीलः विषविषमानलज्वालाज्वलित[illegible] गलं यस्य । 'दधदम्बुदनीलकण्ठताम्' इति नैषधे । अर्थः पूर्ववत् । पुनः किं[illegible] चन्द्रो विधुरत्युच्चैस्तरत्वात् चूडायामग्रभागे अभ्रकषशिखरोपरितनप्रदेशे यस्य । [illegible] चूडाया जटाजूटे यस्य । पुनः किंभूतः । शिवो निरुपद्रवः परेषामीतुमशक्यः [illegible] नामा च । पुनः किंलक्षणः । सिंहानां केसरिणां यानानि गमनागमनानि [illegible] कलितः । पक्षे सिंहयानया पार्वत्या अङ्कितश्चिह्नितः । तस्या अर्धाङ्गत्वात् । '[illegible] चेतो हरतोऽर्धशंभोः' इति नैषधे । अर्धशंभोरीश्वरस्य शरीरार्धप्रदान[illegible] पुनः किंभूतः । वातैः पवनैः वेल्लन्त्यश्चलीभवन्त्यो या लता [illegible] लास्यं नाटकं येन । महानटत्वान्नाट्यप्रियत्वाच्च । पुनः किंभूतः । सरि[illegible] [illegible] सरिद्गङ्गा यस्य । पक्षे निर्झरतुल्या गिरीशत्वात् गिरीशो [illegible] तत्र निर्झररूपेण गङ्गा यत्र । अथवा सरति गच्छति [illegible] [illegible] दीर्घत्वाभावस्तादृशी नित्यवाहिनी सर्वाङ्गिनी यस्मात् [illegible] [illegible] तिविस्तारत्वात्पातालमूलत्वाच्च दिग्वासा इत्यत्र [illegible] [illegible] दिशो वासांसि वस्त्राणि यस्य सः । '[illegible]' इति [illegible] [illegible] सरित् गगनगङ्गा यस्य । [illegible] [illegible]—'मन्दाकिनी घनजटे [illegible]' इति ॥

[illegible] ।
[illegible] ॥ १० ॥

[illegible]

पर्वते कुत्रचित्कुर्वतेऽन्तर्मदैर्मेदुराः कुञ्जरा गर्जिविस्फूर्जितम् ।
यज्जितेनेव विन्ध्याद्रिणा प्राभृतं प्रापिताः शक्रनागानुवादा इमे ॥८०॥

पर्वते गौरीगुरुसुतेऽचले कुत्रचित् गह्वरादिप्रदेशे अन्तर्मध्ये मद उन्मादो दानप्रवाहो वा तेन मेदुरा स्वेच्छाचारित्वात्पुष्टाङ्गाः कुञ्जराः षष्टिहायना यूथनाथा गजा । यदुक्तमुत्तराध्ययने—'कुञ्जरे सट्ठिहायने' इति । गर्जिविस्फूर्जितं गर्जारवस्फूर्ति कुर्वते । सजलजलदवद्गर्जन्तीत्यर्थः । उत्प्रेक्ष्यते—यज्जितेन अर्बुदपर्वतपराभूतेन विन्ध्याद्रिणा जलवालकशैलेन शक्रनागमिन्द्रगजमैरावणमनुवदन्त्यनुकुर्वन्ति ऐरावणोपमानाः । अथ वा हरिकरिणमनु पश्चाद्वदन्ति वय पूर्व शोभातिशयादिभिः प्रथमतो गणनीया ऐरावतस्तु अस्मत्पश्चाद्गणनीय इति कथयन्ति वा । हस्तिमल्लप्रतिमल्ला इत्यर्थ । इति शक्रनागानुवादा इमे प्रत्यक्षलक्ष्या गजा हस्तिनः प्राभृतमुपदा प्रापिता ढौकिता इव ॥

आशुगालोलसालाङ्गहारो भ्रमद्भृङ्गवाग्गीतिवेल्लल्लताहस्तकः ।
सूरिपादाम्बुजस्पर्शमासाद्य यो नृत्यतीव प्रमोदं दधद्भूधरः ॥ ८१ ॥

सूरेर्वाचयमचक्रवर्तिनः पादाम्बुजयोश्चरणकमलयोः स्पर्शमनुपद्ममासाद्य सम्प्राप्य प्रमोदं मनस्यानन्दं दधद्वहन् यो भूधरोऽर्बुदाचलो नृत्यतीव नृत्य करोतीव । नृत्यलक्षणानि दर्शयति । किंभूतः । आशुगैः शीघ्रगामिभिरतिवेगवत्तरैः पवनैः कृत्वा आसामस्त्येन शाखाप्रशाखादिभिः सार्धं लोलाश्चपलाः सञ्जायमाना ये साला नानाजातीयतरवः त एव ते कृत्वा वा अङ्गहारोऽङ्गविक्षेपो नाटकाभिनयदर्शनं यस्य । पुनः किंभूतः । भ्रमन्तो विविधविकसितकुसुममकरन्दपानार्थमितस्ततः पर्यटन्तो ये भृङ्गास्तेषा वाग्वाण्येव गीतिर्गानं यस्य । 'वाण्या भृङ्गी पिकीरवा' इति काव्यकल्पलतायाम् । तथा वेल्लन्त्यो मरुत्तरला भवन्त्यो या लता वल्लयस्ता एव हस्तका विविधहस्तचेष्टनानि यस्य ॥

यः परान्कौतुकैः काममुत्कण्ठयन्नास्य जह्रे मनश्चित्रमत्रास्ति किम् ।
स्मेरयन्नप्यशेषं कुमुत्काननं पद्ममुद्बोधयेत्पार्वणेन्दुः किमु ॥ ८२ ॥

योऽर्बुदाचलः परान्परजनान् कौतुकैरात्मीयालोकनीयानेककौतूहलैः कृत्वा काममतिशयेन उत्कण्ठयन्नुत्सुकभावं प्रापयन् सन्नपि अस्य हीरसूरेर्मनो मानसं न जह्रे न हृतवान् न स्ववशीचक्रे । अत्रेह स्थाने किं चित्रं किमाश्चर्यम् । तदेव दृढयति—अशेषं समस्तं कुमुदां कैरवाणां काननम् । वृन्दमित्यर्थः । स्मेरयन्विकाशयन्नपि पार्वणेन्दुः पूर्णिमासंबन्धी चन्द्रमाः पद्मं सूर्योदयविकसनशीलं कमलं किमुद्बोधयेद्विनिद्रीकुर्यात् विकाशयेत् अपि तु न ॥ इत्यर्बुदाचलकौतुकानि ॥

मन्दमन्दं चलन्नर्बुदोर्वीधराधित्यकामध्यरोहद्यतीनां पतिः ।
शंभुसौधैः पवित्रीकृतोर्वीतला रूप्यशैलस्य चूलामिवेच्छावसुः ॥ ८३ ॥

यतीनां श्रमणानां पतिः स्वामी हीरसूरिर्मन्दमन्दं शनैः शनैः ।'गगनमवजगाहे मन्द-

धात्री भूतानां चराचराणां गिरिसमुद्रादिमनुष्यपर्यन्तानां धरणशीला सप्तप्रमितैः फणानां स्वशिरःस्फटानां मण्डलैश्चक्रवालैः कृत्वा बिभ्रतो धारयतः ॥

कण्ठपीठीलुठत्पार्वणश्वेतरुक्तारकानायकोदात्तमुक्तालता ।

व्योम निर्भिद्य यातेन येनोच्चकैर्धार्यते भूभृतेवात्मभूषाकृते ॥ १४ ॥

येन भूभृता अर्बुदाचलेन आत्मनः स्वशरीरस्य भूषाकृते शोभाविधानाय कण्ठपीठ्यां ग्रीवायाम् । यथा नैषधे—'दधदम्बुदनीलकण्ठताम्' राजमन्दिरवर्णने । कण्ठशब्दे कन्धरा । एतावता अधित्यका । पीठशब्दः स्त्रीक्लीबलिङ्गः । 'जयत्युदराने सरद्रुरवा जपीठीपठचतुर्मुखमुखावलीरचितसामनामस्तुति' इति चम्पूकथायाम् । तथा '[illegible] वकोष्ठिककन्यकुब्जपीठानितक्कमवहित्थम्' इति लिङ्गानुशासनेऽपि । लुठन्त [illegible] भवन्तो ये पार्वणाः पूर्णिमासबन्धी श्वेतरुक् चन्द्रमाः तथा तारकास्तारा [illegible] ग्रहनक्षत्राणि तेषां नायको मध्यमणिस्तेन युक्ता उदात्ता उदारा महार्घ्या वा । 'उदात्त नायकोपेता' इति चम्पूकथायाम् । 'उदात्तो महात्मा महार्घश्च' इति [illegible] । मुक्तालता मौक्तिकहारो ध्रियते किमु । भूभृता किंभूतेन । व्योम गगनं निर्भिद्य [illegible] धस्तरस्वाद्भित्त्वा विदारयित्वा उच्चकैरूर्ध्वं यातेन सम्प्राप्तेनेत्यत एव [illegible] क्रमायातम् ॥

अभ्रविभ्राजियन्मेदिनीभृद्भृगुव्रातनिष्पातिपाथःप्रवाहोत्थितैः ।

उत्पतद्भिः पतद्भिर्नभःपद्धतौ बिन्दुवृन्दैरिवाभावि ताराभरैः ॥ १५ ॥

उत्पतद्भिर्महत्प्रस्तरोपरि निपतनादुच्छलद्भिः । अत एव [illegible] गगनमार्गे पतद्भिर्गत्वा तिष्ठद्भिर्बिन्दुवृन्दैर्जलकणनिकरैः । उत्प्रेक्ष्यते—[illegible] निकरैरभावि भूतमिव । शुचिजलकणा एवाकाशे तारा [illegible] । [illegible] अभ्रे गगना[illegible] विभ्राजिना शोभनशीलानाम् । [illegible] [illegible] अर्बुदाचलस्य [illegible] [illegible] [illegible] निर्गमनशीलेभ्यः [illegible] निर्झराणां [illegible] [illegible]रुत्थितैः प्रादुर्भूतैः ॥

[illegible] ॥

[illegible] ॥ १६ ॥

[illegible]

या एता पताकाः किं मा जयिष्यन्तीति गर्वात् इकरोतीत्येवशीला सिद्धसिन्धुः स्व-र्गङ्गा नभ पद्धतौ गगनमार्गे स्पर्धया सहर्षेण वहति प्रसरति। 'स्रोत सारस्वत वहत्' इति चम्पूकथायाम्। 'वहत्प्रवर्तमान प्रसरच' इति तट्टिप्पनके। किं कृत्वा। निक्व-णन्त्य शब्दायमाना किङ्किण्यः क्षुद्रघण्टिका घुर्घुरिका यासु। तथा मारुतै पवनैः आन्दोलितास्तरलीकृता। तथा इन्दुश्चन्द्रः कुन्दानि मुचकुन्दकुसुमानि तद्वदुज्ज्वला धवला येषा चैत्याना पताका वैजयन्तीर्विलोक्य दृष्ट्वा॥ इत्यर्बुदाचलसर्वप्रासादवर्णनम्॥

अथ पृथक्पृथक्प्रासादवर्णनम्—

वैमलीयवसतिं व्रतीशिता दुग्धसिन्धुवयसीमिवैक्षत।
श्वेतदन्तितुरगान्विता सुधाशालिनीं जिनपवित्रितान्तराम्॥ ८७॥

व्रतीशिता मुनिनायक सूरिः विमलस्येय वैमलीया सा चासौ वसतिश्च विमलमन्त्रि-निर्मापितादिदेवप्रासादमैक्षत पश्यति स्म। उत्प्रेक्ष्यते—दुग्धसिन्धो. क्षीरसमुद्रस्य वयसी सखीमिव। क्षीरसमुद्रसाम्य दर्शयति। किंभूता वसति वयसी च। श्वेता ध-वला आरासोपलमयत्वात् तथा दन्तिनो गजा विमलमूर्तिपृष्ठवर्तिनः तथा तुरगो विम-लमविधाध्यासितोऽश्व। अन्ये वा पक्षे श्वेतदन्ती ऐरावणः श्वेततुरग उच्चैश्रवा.। यदुक्तम्—'पयोनिर्लीनाभ्रमुकामुकावली,' तथा 'सहस्रमुच्चै श्रवसा वहन्निव' इति। एतद्द्वयमपि नैषधे। एतेन क्षीरार्णवे ऐरावणोच्चै श्रवसा बाहुल्य प्रतिपादितम्। ततोऽत्राप्यैरावतोच्चै श्रवसश्चेत्युक्ते न कोऽपि दोषः। तैरन्विता कलिताम्। पुनः कि-भूताम्। सुधया पक्वचूर्णकलेपेन अमृतेन च शालते शोभते इत्येवशीलाम्। पुनः किंभूताम्। जिनैर्विविधप्रतिमारूपतीर्थकृद्भि अथ वा जिनेन मूलनायकभूतेन ऋषभ-देवेन कृष्णेन तस्य समुद्रशायित्वेन पवित्रित पावनीकृतम्। अथ वा पवि वज्र त्रायते पाणौ लालयति रक्षतीति पवित्र. शक्र तीर्थे कदाचिद्वन्दनागत, अथ च कदाचिदनुज-मिलनागत पुरदर विष्णुशक्रौ सजातौ सम्यक् प्रादुर्भूतौ अस्मिन् तादृशमन्तर मध्य यस्या॥

कुक्षिसात्कृतमवेक्ष्य सिंहिकासूनुना स्वपतिशीतदीधितिम्।
चैत्यकैतववतीव कौमुदी तद्भयादिह समेत्य तस्थुषी॥ ८८॥

चैत्य विमलवसतिरेव कैतव कपट विद्यते यस्याः सा चैत्यकैतववती कौमुदी चन्द्र-ज्योत्स्ना तस्य स्वभर्तृराहोर्भयादिहार्बुदगिरौ समेत्यागत्य तस्थुषी स्थितवतीव। किं कृत्वा। स्वस्यात्मन पतिं शीतदीधितिं चन्द्रमस सिंहिकासूनुना केसरिणा स्वर्भानुना वा कुक्षिसात्कृत भक्षित गिलित वा अवेक्ष्य दृष्ट्वा॥

चैत्यमूर्धविधुकान्तनिष्पतत्पाथसि प्रतिमितेर्निभाद्विधुः।
लक्ष्मपङ्कमपनेतुमात्मनः स्नाति दुग्धजलधेर्धिया किमु॥ ८९॥

विधुश्चन्द्रमा दुग्धजलधेः क्षीरसमुद्रस्य धिया बुद्ध्या। भ्रमेणेत्यर्थ। उत्प्रेक्ष्यते—

यत्रभःसङ्गिशृङ्गाङ्गणालिङ्गिनां किनराणां समं यौवतैर्गायताम् ।
गीतमाकर्ण्य रङ्कुर्मृगाङ्कं तदाक्षिप्तचेता व्रजन्नग्रतोऽखेदयत् ॥ ७० ॥

रङ्कुश्चन्द्रस्याङ्कमृगः अग्रतः अर्बुदाचलशृङ्गाणि सलज्य पुरस्ताद्व्रजन् प्रतिगमानः मृगाङ्क विधुमखेदयत् महत्खेदमुत्पादयति स्म । किभूतो रङ्कुः । तदाक्षिप्तचेताः तत्र किनरकृतगीते आक्षिप्त विलग्न चेतो मनोवृत्तिर्यस्य स । कि कृत्वा । यत्रार्बुदगिरौ नभसोऽम्बरस्य सङ्गो मिलन विद्यते येषा तादृशानि शृङ्गाङ्गणानि शिखरोपरितनप्रदेशास्तान्यालिङ्गन्त्याश्लिष्यन्ति आश्रयन्तीत्येवशीलास्तादृग्विधानाम् । तथा यौवतैर्युवतीनां किनरीणा गणैः समं सार्धं गायता स्वरसेन गान कुर्वता किनराणा किंपुरुषाणां गीत मधुरध्वनिलयमयगेयमाकर्ण्य श्रवणपारणा प्रणीय ॥

यत्र चन्द्रोदयश्च्योतदिन्दूपलप्रस्थसंस्थायुकोन्निद्रकुन्दद्रुमे ।
राजते राशिरिन्दिन्दिराणां सुधासागरे शेषशायीव शक्रानुजः ॥ ७१ ॥

यत्रार्बुदशैले चन्द्रस्य मृगाङ्कयोदयेनाभ्युद्गमेन श्च्योतन्तः क्षरन्तोऽमृतरसं [illegible] ये इन्दूपलाश्चन्द्रकान्तमणयस्तेषां प्रस्थ शिखर तत्र संस्थायुको वसनशीलः [illegible] स्थायी तथा उन्निद्रो विकसितः सितकुसुमव्रजविशदीकृतो यः कुन्दद्रुमः [illegible] न्दिराणां भ्रमराणां राशिः समूहो राजते शोभते । क इव । [illegible] सुधाया उत्पत्तिस्थाने क्षीरसागरे शेषे नागाधिराजशय्यायां शेते [illegible] शीलः शेषशायी कृष्णः शोभते ॥

मेरुमुख्याखिलोर्वीधराणामिवोपात्तसारैरसौ वेधसासृज्यत ।
एष निःशेषभूमीभृतां निर्जयं निर्मिमीते न चेद्वैभवैः [illegible] ॥ ७२ ॥

मेरुः स्वर्णाचलो मुख्यः सर्वोच्चस्तरत्वात् [illegible] वा मुखे आदौ भव इति व्युत्पत्त्या प्रथमो येषां तादृशानामखिलानां [illegible] राणां पर्वतानामुपात्तैः समीपे आगतैः आत्तैः [illegible] सर्वातिशायिपरमाणुदलैः कृत्वा । उत्प्रेक्ष्यते—[illegible] सृज्यत स्रष्टो विरचित इव । एष चेन तर्हि एषोऽर्बुदाद्रि [illegible] र्वैः [illegible] निर्गत शेषोऽवशिष्टो [illegible] [illegible] निर्जय नितरां जय परिभव [illegible] दानवज्रभवनम् ॥

[illegible]

[illegible]

वा एताः पताकाः किं ना जयिष्यन्तीति गर्वात् हुंकुर्वतीतीवेत्युत्प्रेक्षा । विद्वज्जिष्णुः स्वर्गेङ्गा नभःपद्धतौ गगनमार्गे स्पर्धया सदर्पेण वहति प्रसरति । 'स्रोतः प्रारम्भे वहन्' इति चम्पूकथायाम् । 'वहन्प्रवर्तमानं प्रसरच्च' इति तट्टिप्पनके । किं कृत्वा । निक्वणन्त्यः शब्दायमाना किङ्किण्यः क्षुद्रघण्टिका घुर्घुरिका यासु । तथा मारुतेन पवनेन आन्दोलितास्तरलीकृता । तथा इन्दुश्चन्द्रः कुन्दानि मुचकुन्दकुसुमानि तद्वदुज्ज्वला धवला एषा चैत्याना पताका वैजयन्तीर्विलोक्य दृष्ट्वा ॥ इत्यर्बुदाचलपर्वप्रासादवर्णनम् ॥

अथ [illegible]प्रासादवर्णनम्—

वैमलीयवसतिं व्रतीशिता दुग्धसिन्धुवयसीमिवैक्षत ।
श्वेतदन्तितुरगान्विता सुधाशालिनीं जिनपवित्रितान्तराम् ॥ ८७ ॥

व्रतीशिता मुनिनायकः सूरिः विमलस्येयं वैमलीया सा चासौ वसतिश्च [illegible] निर्मापितादिदेवप्रासादमैक्षत पश्यति स्म । उत्प्रेक्ष्यते—दुग्धसिन्धोः क्षीरसमुद्रस्य वयसी सखीमिव । क्षीरसमुद्रसाम्यं दर्शयति । किंभूता वसतिं वयसीं च । [illegible] धवला आरासोपलमयत्वात् तथा दन्तिनो गजा विमलमूर्तिपृष्ठवर्तिनः तथा तुरगो [illegible] लमविपाल्यासितोऽन्यः । अन्ये पा पक्षे श्वेतदन्ती ऐरावण [illegible]तुरग उच्चैःश्रवा । यदुक्तम्—'पयोनिधानाद्रमुकामुकावली,' तथा 'सहानुजो [illegible]' [illegible] । एतद्द्वयमपि नपर्य । एतेन क्षीरार्णवे ऐरावणोच्चैःश्रवसा [illegible] प्रादुर्भावेन । ततोऽप्यैरावतोच्चैःश्रवसोरुक्ते न कोऽपि दोषः । तैरन्विता [illegible] । पुनः किंभूताम् । सुधया पक्वचूर्णकल्केन अमृतेन च शालते शोभते इत्येवंशीलाम् । पुनः किंभूताम् । जिनविम्बप्रतिमारूपतीर्थंकृद्भिः अथ वा जिनेन [illegible] देवेन कृष्णेन तस्य समुद्रशायित्वेन पवित्रितं पावनीकृतम् । [illegible] पाणो [illegible] रक्षतीति पवि[illegible] तीर्थे [illegible] पुरंदर विष्णुश्चेति सजाता [illegible] माध्यस्थाः ॥

कुक्षिसात्कृतमपेक्ष्य सिद्धिकासूनुना [illegible] ।
चैत्यकैतवपतीव कौमुदी तद्रुषाद्रिह समेत्य [illegible] ॥ ८८ ॥

[illegible] विमलवसतिरेव [illegible] विद्यते [illegible] ज्योत्स्ना तस्य समर्पितदेवाद्रिदादुर्भावस्य [illegible] कृत्वा । [illegible] ॥

चैत्यमूर्धविधुकान्तनिष्पतत्पाथसि प्रतिनितोऽर्बुदाद्रिः ।
[illegible] ॥ ८९ ॥

[illegible]—

स्फीता वर्धमानाः कीर्तेर्यशसः स्तवाः स्तुतयो यया । पुनः किंभूता । आमोदेन पुष्पादिपरिमलेन प्रमोदेन वा मेदस्विनी पुष्टा प्रोद्भूतपुलककोरकाकलिता । पुनः किंभूता । सस्यैः स्वफलभारेण नताङ्गी नम्रीभवत्तनुयष्टी । पुनः किंभूता । लता कुसुमितफलित[illegible] एव विग्रहः शरीरं यस्याः सा ॥

यत्र कल्लोलयन्नैककल्लोलिनीर्मन्दमान्दोलयन्स्मेरदुर्वीरुहान् ।
स्वर्णदीपद्मपौष्पैः करम्बीकृतो गन्धवाहोऽनुगामीव तं भेजिवान् ॥७७॥

गन्धवाहः । गन्धं कुसुमादीनां मृगमदादीनां वा सौरभ्यं वहते धारयतीति गन्धवाहो वायुः पुरुषविशेषणं वा । यत्र पर्वतेऽनुगामीव सेवक इव तं हीरसूरिं [illegible] सेवते स्म । वायुश्च त्रिधा वर्ण्यते—शीतो, मन्दः, सुरभिश्च । तदेव [illegible] किं कुर्वन् गन्धवाहः । नैकाः अनेकस्थानस्थायिनीः कल्लोलिनीस्तरङ्गिणीः [illegible] स्वरहः प्राबल्येन कल्लोलमालाकलिताः कुर्वन् । एतेन शीतलः । पुनः किंभूतः । [illegible] शनैः स्मेरतो विजृम्भमाणान् । कुसुमितानित्यर्थः । उर्वीरुहान् [illegible] आन्दोल[illegible] तरलीकुर्वाणः । एतेन मन्दः । घनगहनानोकहास्फालनेन मन्दीभूत इत्यर्थः । पुनः किंभूतः । स्वर्णद्याः पर्वतस्याभ्रकपत्वेनात्युच्चैस्तरत्वाद्गगनगङ्गायाः पद्मानां [illegible] रजोभिः करम्बीकृतो व्याप्तः । एतेन सुरभिः ॥

कुत्रचित्तोरणस्रग्विलासश्रियं बिभ्रति व्योमसंचारिणः सारसाः ।
सिद्धिपुर्यां यियासोः पुरस्तात्प्रभोर्विश्वकर्त्रेव मङ्गल्यमाला कृता ॥७८॥

कुत्रचित्कस्मिंश्चनापि [illegible] प्रदेशे व्योम्नि आकाशे संचरन्तः [illegible] शीला गगनगामिनः सारसाः पक्षिविशेषाः प्रतिद्वा[illegible] पक्षिणस्तोरण[illegible] [illegible] श्रियं लीलालक्ष्मीं बिभ्रति धारयन्ति । [illegible]—सिद्धिपुर्यां [illegible] यियासोर्गन्तुमिच्छोः प्रभोः [illegible] पुरस्तादग्रतः [illegible] [illegible] कृता [illegible] मङ्गल्यमाला [illegible] ।

क्वापि [illegible] निर्झरान्त [illegible] ॥

सिद्धसिन्धुर्[illegible] ॥

[illegible]

वप्ताब्धिर्मथितोऽनवाप्तपदवत्कुत्रापि बन्धुर्विधुः
शून्ये व्योमनि बम्भ्रमीति विपिनेऽप्यन्यः स्थितः स्वस्तरुः।
क्षिप्तैका तु जनार्दनेन सदने पुंसा पुराणेन मे
जामिः क्षीरपरा सुधापि च सुरैः पानेन निष्ठाप्यते ॥ ९४ ॥

दुःख कामगवी परा चरति च प्रोत्तानयानाम्बरे
धत्ते कौशिकपत्यगोत्रदमनो मन्मूर्ध्नि पादं पुनः।
इत्याद्यार्तिमधीश भिन्धि किमिदं वक्तुं जिनं सप्रजः
स्वर्दन्तीव समागतो गजगणस्तेनालुलोके पुरः ॥ ९५ ॥ (युग्मम्)

तेन हीरसूरिणा पुरोऽग्रे विमलवसतिप्रदेशे प्रथममेव गजाना श्वेतोपलनिर्मिताना हस्तिना गणो व्रज आलुलोके दृष्ट । उत्प्रेक्ष्यते—जिन वृषभतीर्थंकर विश्वस्यादिसृष्टिकरमथ वा जगत्पालकत्वेन जिन ब्रह्मरूपेण विश्व सृजति नारायणरूपेण पालयति ईश्वररूपेण च सहरतीति। 'एकमूर्तिस्त्रयो देवा' इति परसमये। इद वक्ष्यमाण वक्तु कथयितु सप्रज' ससतान । 'तोकापत्यप्रसूतय । तुक्प्रजा.' इति हैम्याम्। स्वर्दन्ती किमैरावण इव समागत इह सप्राप्त' । इद किम्। हे अधीश हे जगत्प्रभो, त्व मे मम इति पूर्वोक्तप्रकारा काव्यस्यादौ वर्तमाना आदौ यस्यास्तादृशीमार्ति मानसीं चिन्तामर्त्युद्भूता पीडा शारीरिकीं व्यथा वा भिन्धि निवारय मूलादुन्मूलय। इति किं तानेव प्रकारान्प्रदर्शयति—मे मम वप्ता पिता अब्धि क्षीरसमुद्र अर्थादेव लभ्यते। चतुर्दशानामपि रत्नाना क्षीरनीरनिधौ समुत्पन्नत्वेन तज्जनक एव गीयते। स मथितो हरिणा सुराभ्यर्थितसुधारसकृते भुजगराज नेत्रीकृत्य मन्दरगिरिं च मन्थानक विधाय विलोडित'। बन्धु पुनर्मम सहोदरो विधुश्चन्द्रमा कुत्रापि नगरग्रामादिस्थाने अनवाप्तमलब्ध पद वासस्थान येन तद्वत् शून्ये निर्मानुषे व्योमनि आकाशमार्गे बम्भ्रमीति अतिशयेन पर्यटति। अपि पुनरन्यो बन्धु स्वस्तरु कल्पद्रुम कुत्रापि जनसगते पुरादौ प्रदेशे अप्राप्तावस्थितिरिव विपिने कानने स्थितो गत्वा उषित । तु पुनरेका मे जामिर्भगिनी श्रीर्लक्ष्मीर्जनार्दनेन लोकपीडाकारकेण पुराणेन जीर्णेन वृद्धेन पुसा पुरुषेण। कृष्णेनेत्यर्थः। सदने स्वमन्दिरे क्षिप्ता रक्षिता। अपि च पुनरपरान्या द्वितीया स्वसा सुधा पीयूषरूपा सुरैर्देवै पानैर्धातिभि कृत्वा निष्ठाप्यते क्षय नीयते। च पुनरितरा तृतीया मम भगिनी कामगवी सुरसुरभी दु ख महाकष्ट प्रोत्तानमूर्ध्वं पादा अधो वपुरिति व्यवस्थया यान गमन यस्यास्तादृशी सती अम्बरे आकाशाटव्या चरति गोचर कुरुते गच्छति वा। 'चर गतिभक्षणयो' इति धात्वर्थात्। तथा 'कस्या नोत्तानगाया दिवि सुरसुरभेरास्यदेश गताग्रे' इति नैषधे। पुनर्गोत्राणा वशाना कुलस्य वा जगद्गोत्राणा यावत्पर्वताना च दमनो ध्वसकृत्पक्षच्छेत्ता च तथा कौशिक उलूकः शक्रश्च न-

मन्द मृगाङ्क' इति चम्पूकथायाम् । चलन्सचरन्नर्बुदोवाधरस्याधित्यकामूर्ध्वभूमिकाम ध्यरोहदारूढवान् संप्राप्तः । क इव । इच्छावसुरिव । यथा धनदः कैलाशशैलस्य चूलामधिरोहति । किभूतामधित्यका चूला च । शभूना वृषभादिचतुर्विंशतितीर्थकृता सौधैः यद्यपि भरतकारितः सिंहनिषद्यानामा एक एव प्रासादः । तथापि सुरविद्याधरराजभिरन्येऽपि तत्पार्श्वे प्रासादाः कारिताः सभाव्यन्ते शत्रुंजयरैवताचलादिवत् । अथ यद्येक एव तदा सर्वोत्तमत्वात्पूज्यत्वाद्वा वहुवचनम् । पक्षे शभोरीश्वरस्य सौधैः पत्नीपुत्रप्रमथादिगणाना परिजनपरिवाराणा मन्दिरैः कृत्वा पवित्रीकृत पावन निर्मितमुर्वीतल भूमीपीठ यस्याः सा ॥

पुण्यभाजां हृदाकृष्टिमन्त्रानिव श्रीमदर्हद्गृहान्निर्जितस्वर्गृहान् ।
अर्बुदश्रीवतंसायमानान्प्रभुर्नेत्रपत्रैरसौ प्रीतचेताः पपौ ॥ ८४ ॥

असौ प्रभुर्हीरसूरिः श्रीमत. शोभाशालिनः अर्हद्गृहान् जिनप्रासादान् । अथ वा श्रीत्रिभुवनाधिपत्यलक्ष्मीर्विद्यते येषाम् तादृशानामर्हता तीर्थकृता गृहान् विहारान् नेत्रपत्रैर्लोचनदलैः नयनपुटकैर्वा पपौ सादरमवलोकयति स्म । किभूतः । प्रीत मोद प्राप्त चेतो मनो यस्य । किभूतान् श्रीमदर्हद्गृहान् । निर्जितानि निजजगज्जैनवैभवैरभिभूतानि स्वर्गृहाणि वैजयन्तादिस्वर्गगेहानि विमानानि वा यैः । पुनः किभूतान् । अर्बुदस्य [illegible] द्रिनन्दनगिरेः श्रिया लक्ष्म्या अवतंसायमानान् शिर.शेखरवदाचरत. । उत्प्रेक्षते— पुण्यभाजा सुकृतिना साधूना हृदा मानसानामाकृष्टेराकर्षणस्य मन्त्रानिव ॥

यत्र विश्वत्रयीश्रीनिवासा जिनाधीशसौधाः स्वशृङ्गाग्रदण्डोपधेः ।
स्वर्गृहानूर्ध्वमुत्तम्भ्य पाणीन्निजान्भर्त्सयन्तीव भूषाभिरुत्सेकिनः ॥ ८५ ॥

यत्रार्बुदाचले जिनाना सामान्यकेवलिनामधीशास्तीर्थनाथास्तेषा सौधा मन्दिराणि प्रासादाः । सौधशब्दः पुनपुसके । 'गुददोहदकुमुदच्छदकन्दार्बुदसौधगेोपोतसौध [illegible]' इति लिङ्गानुशासने । स्वेषामात्मना शृङ्गाणा शिखराणामग्रे उपरिभागे [illegible] ण्डाना ध्वजालम्बनवन्धनयष्टीनामुपधे. कपटान्निजानात्मीयान् पाणीन् उत्त[illegible] र्ध्वीकृत्य । उत्प्रेक्ष्यते— स्वर्गृहान्देवलोकसवन्धिसौधान् वैजयन्तादिकान् [illegible] भूषाभिः स्वकीयशोभाभि' कृत्वा निर्भर्त्सयन्ति तिरस्कुर्वन्तीव । किभूता [illegible] सौधाः । विश्वत्रय्यास्त्रिलोक्या श्रीणा लक्ष्मीणा निवासा' वासवेश्मानि । पुन किभूता भूषाभि स्ववपुर्भिर्वा: उत्सेकिनो गर्वावेशवशवदा मदोद्धुरा' । 'उपदा [illegible] त्सेका' कोशलेश्वरम्' इति रघौ ॥

निक्कणत्किंकिणीमालतान्दोलिता यत्पताका विलोलयन्दुकुन्दोज्ज्वला ।
किं वहत्यूर्मिनिर्घोषहुंकारिणी स्पर्धया सिद्धसिन्धुर्नभ.पद्धतौ ॥ ८६ ॥

उन्माणा मदृ[illegible] निर्घोष. शब्द' कोलाहलैः [illegible]
[illegible] इति स्पर्धामादधाना [illegible]

कारिणी । अथ वा शुभानि मङ्गलानि शमिति कथयति द्यौ येवशीला दृष्टमात्राप्यहं कल्याणानि करोमीति कथयित्रीत्यर्थः । उत्प्रेक्ष्यते—जिनाधिभर्तुर्युगादिदेवस्य मुक्तिकन्यया सिद्धिकुमार्या सहोद्वाहविधौ पाणिग्रहणकरणसमये विरचिना विश्वसृजा किमिव कृता एषा तोरणधोरणी विनिर्मितेव ॥

श्रीभिर्जगन्मूर्धविधूननीभिश्चैत्येऽत्र वैचित्र्यदिदृक्षयेव ।
रूप्याचलोऽनल्पतनुः समीयिवास्तेनैक्ष्यत स्तम्भततिः सिताश्मनाम् १००

तेन सूरिणा सिताश्मनां श्वेतोपलनिर्मितानां स्तम्भानां ततिः पङ्क्तिर्दृश्यतावलोकिता । उत्प्रेक्ष्यते—अनल्पा बहव्यस्तनवो मूर्तयो यस्य तादृशो रूप्याचलः कैलासः समागिवानिव किं समेतः । 'रजताद्रिस्तु कैलासः' इति हैम्याम । कया । जगतां त्रिभुवनानां तात्स्थ्यात्तद्व्यपदेशो सुरासुरनराणां मूर्ध्नां मस्तकानां विधूननीभिः आश्चर्यातिरेकात्कम्पयित्रीभिः । 'अद्भुतकरी परमूर्धविधूननी—' इति नैषधे । श्रीभिः शोभाभिः [illegible] अत्र चैत्ये अस्मिन्विमलमन्त्रिनिर्मापितप्रासादे वैचित्र्यस्य विचित्रताया अथ वा विशिष्टानां जवाजनाश्चर्यविधायिनां चित्राणां पाञ्चालिकाप्रमुखाणां नानारूपाणामाश्चर्याणामालेख्यानां वा दिदृक्षया द्रष्टुमिच्छया दृग्गोचरीकरणवाञ्छया ॥

महाव्रतिमासमूर्ति निजं पतिं समीक्ष्य कामं श्वशुरं जिनं श्रितः ।
सारावरोधः किमु यत्र पुत्रिकाचयोऽमुना लोचनगोचरीकृतः ॥१०१॥

अमुना वाचयमचक्रिणा च । विमलवसतौ पुत्रिकाणां पाञ्चालिकानां प्रचयो समूहो लोचनयोश्चक्षुषोर्गोचरीकृतः लक्ष्यो विहितः । स्व इत्यर्थः । उत्प्रेक्ष्यते—जिनं नाभेयं श्वशुरं स्वभर्तुः पितरं श्रितः सेवमानः पाप [illegible] स्मरस्य सारावरोधः [illegible] किमु । अथ च [illegible] स्वस्यात्मनो [illegible] मोक्षलक्षणाभीष्टदायकं देवं जिनं तीर्थंकरं श्रितः । 'सारावरोधः [illegible]' इति [illegible] । किं कृत्वा । महाव्रती साधुः तस्मात्प्राप्ता अधिगता मूर्तिः स्वरूपं येन तादृशं निजं [illegible] पतिं भर्तारं कामं कन्दर्पं समीक्ष्य । अथ च [illegible] [illegible] सापाद्युपूजनं मामपि दद्यादतो जिनं सारावरोधः सेवते । [illegible] महान्' इति श्रुतेः ॥

एवं तन्वतीर्विभ्रमैर्हस्तकान्दर्शयन्तीरिहानेकपाञ्चालिकाः ।
[illegible] शम्भुं प्रणन्तुं जनानाह्वयन्तीरिवासौ ददर्श प्रभुः १०२

[illegible]

मन्दं मृगाङ्कः' इति वचनात्कृशानाम् । नलिन्मानन्दनुग ॥ तस्यामित्यमूलमूलस्थान-
ध्यरोहदान्दुनान् सप्राह । ... । उच्चाश्रुरि । यथा ... कैलासशैलस्य चूल-
मधिरोहति । किंभूतामधित्यका चूला च । शम्भुना ऋषभादिचतुर्विंशतिजिनवृहद्
सौधैः यद्यपि भरतकारितः सिंहनिषद्यानामा एक एव प्रासादः । तथापि कुमारविहार
रराजभिरन्योऽपि तत्पार्श्वे प्रासादाः कारिताः सम्भाव्यन्ते शत्रुंजयरैवताचलादिवत् ।
अथ यद्येक एव तदा सर्वोत्तमत्वात्पूज्यत्वाद्वा बहुवचनम् । पक्षे शम्भोरीश्वरस्य ग्राम-
पत्नीपुत्रप्रमथादिगणानां परिजनपरिवाराणां मन्दिरैः कृत्वा पवित्रीकृतं पावनं निर्मित-
सुवर्णतलं भूमीपीठं यस्याः सा ॥

पुण्यभाजा हृदाकृष्टिमन्त्रानिव श्रीमदर्हद्गृहान्निर्जितस्वर्गृहान् ।
अर्बुदश्रीवतंसायमानान्प्रभुर्नेत्रपत्रैरसौ प्रीतचेताः पपौ ॥ ८४ ॥

असौ प्रभुर्हीरसूरिः श्रीमतः शोभाशालिनः अर्हद्गृहान् जिनप्रासादान् । अथ वा श्रीस्त्रिभुवनाधिपत्यलक्ष्मीर्विद्यते येषाम् तादृशानामर्हतां तीर्थकृतां गृहान् विहारान् नेत्रपत्रैर्लोचनदलैः नयनपुटकैर्वा पपौ सादरमवलोकयति स्म । किंभूतः । प्रीतं मोदं प्राप्तं चेतो मनो यस्य । किंभूतान् श्रीमदर्हद्गृहान् । निर्जितानि निजजगन्नेत्रवैभवैरभिभूतानि स्वर्गृहाणि वैजयन्तादिस्वर्गगेहानि विमानानि वा यैः । पुनः किंभूतान् । अर्बुदस्य हिमाद्रिनन्दनगिरेः श्रिया लक्ष्म्या अवतंसायमानान् शिरःशेखरवदाचरतः । उत्प्रेक्ष्यते— पुण्यभाजा सुकृतिना साधूना हृदा मानसानामाकृष्टेराकर्षणस्य मन्त्रानिव ॥

यत्र विश्वत्रयीश्रीनिवासा जिनाधीशसौधाः स्वशृङ्गाग्रदण्डोपधेः ।
स्वर्गृहानूर्ध्वमुत्तम्भ्य पाणीन्निजान्भर्त्सयन्तीव भूषाभिरुत्सेकिनः ॥ ८५ ॥

यत्रार्बुदाचले जिनानां सामान्यकेवलिनामधीशास्तीर्थनाथास्तेषां सौधा मन्दिराणि प्रासादाः । सौधशब्दः पुंनपुंसके । 'गुददोहदकुमुदच्छदकन्दार्बुदसौधमेधोत्सेधकबन्धाः' इति लिङ्गानुशासने । स्वेषामात्मनां शृङ्गाणां शिखराणामग्रे उपरिभागे निबद्धानां दण्डानां ध्वजालम्बनबन्धनयष्टीनामुपधेः कपटान्निजानात्मीयान् पाणीन् उत्तम्भ्य ऊर्ध्वीकृत्य । उत्प्रेक्ष्यते—स्वर्गृहान्देवलोकसंबन्धिसौधान् वैजयन्तादिकान् प्रासादान् भूषाभिः स्वकीयशोभाभिः कृत्वा निर्भर्त्सयन्ति तिरस्कुर्वन्तीव । किंभूता जिनाधीशसौधाः । विश्वत्रय्यास्त्रिलोक्याः श्रीणां लक्ष्मीणां निवासा वासवेश्मानि । पुनः किंभूताः । भूषाभिः स्ववपुर्वैभवैः उत्सेकिनो गर्वावेशवशंवदा मदोद्धुराः । 'उपदा विविशुः शश्वन्नोत्सेकाः कोशलेश्वरम्' इति रघौ ॥

निक्वणत्किंकिणीर्मारुतान्दोलिता यत्पताका विलोक्येन्दुकुन्दोज्ज्वला ।
किं वहत्यूर्मिनिर्घोषहुंकारिणी स्पर्धया सिद्धसिन्धुर्नभःपद्धतौ ॥ ८६ ॥

ऊर्मीणां महत्कल्लोलानां निर्घोषैः शब्दैः कोलाहलैः कृत्वा एताः कियन्मात्रावत्सुए-
मेवा ँ, नापरा कापि क्वापि इति स्पर्धामादधती सती हुंकरोतीत्येवंशीला नभ

उत्प्रेक्ष्यते—धर्म एवावनेर्भूमेर्भास्वान् विश्वत्रयातिशायितेजस्त्वया भास्करः एतावता राजाधिराज । 'पाण्डोरवनिमार्तण्डस्यावदातान् गुणान् रहः' इति पाण्डवचरित्रे। राज्ञो भूमीभास्कर इति नामापि। तस्य राजधानी सत्पुरुषनिवासनगरीव। पुनरुत्प्रेक्ष्यते—चित्रितानामालेख्यभावं प्रापितानाममर्त्यानां देवानां मर्त्यानां मनुष्याणामुरगाणां नागानाम्। उपलक्षणादसुरादीनां परिग्रहः। तत्साहचर्यादेव दानवमानवानां पत्न्योऽपि गृह्यन्ते । तन्निभात्कपटात् भूर्भुवःस्वस्त्रयेण पातालभूमण्डलस्वर्गलोकत्रिकेण सम्यक् सेवित इवोपासितः ॥

चैत्यस्य परितो देवकुलिकाः पश्यति स्म सः।
अर्बुदाद्रिश्रियाश्चूडाभरणस्येव मुक्तिकाः ॥ १०७ ॥

स सूरिश्चैत्यस्य विमलवसतेः परितश्चतुर्दिक्षु सर्वतो वा देवकुलिका लघुदेवगृहान् पश्यति स्म प्रदक्षिणाप्रदानावसरे दृष्टवानित्यर्थः । उत्प्रेक्ष्यते—अर्बुदनाम्नोऽद्रेः पर्वतस्य श्रिया लक्ष्म्याश्चूडाया शिखाया आभरणस्य विभूषणस्य। चूडामणेरित्यर्थः। लोके 'चाक' इति प्रसिद्धस्य मुक्तिका लघुमुक्ताफलानीव। 'सिता वमन्त खलु कीर्तिमुक्तिकाः' इति नैषधे। 'मुक्तिका लघूनि मौक्तिकानि' इति तद्वृत्तिः ॥

चैत्यं प्रदक्षिणीचक्रे समं संघेन स प्रभुः।
ज्योतिषां मण्डलेनेव मन्दरं कौमुदीपतिः ॥ १०८ ॥

स प्रभुर्हीरविजयसूरिः संघेन साधुसाध्वीश्राद्धश्राद्धीवर्गेण समं सार्धं चैत्यं मूलप्रासादं प्रदक्षिणीचक्रे। त्रिर्वारं प्रदक्षिणां प्रददिवानित्यर्थः। कौमुदीपतिरिव यथा चन्द्रमा ज्योतिषां ग्रहनक्षत्रतारकाणां मण्डलेन कदम्बकेन साकं मन्दरं मेरुपर्वतं प्रदक्षिणयति। जैनमते मन्दरो मेरुः। यदुक्तं स्नातस्यास्तुतौ—'येषां मन्दररत्नशैलशिखरे जन्माभिषेकः कृतः' इति। सर्वेषां तीर्थकृतां जन्माभिषेकस्थानं मेरुरेवातोऽत्र मन्दरं सुवर्णाचलः। आगमेऽपि 'मंदरस्स पव्वयस्स' इत्यादि । परशासने कविसमये च मन्दरं इन्द्रकीलपर्वतं मेरोः पृथक् दृश्यते, परं त्वत्र जैनमतानुसार्येव मन्दरो मेरुरिति वचनम्॥ इति विमलवसतिमध्यवर्णनम् ॥

विवेश वशिनामीशो गर्भगेहे जिनौकसः।
स्तम्बेरमीविवोढेव गह्वरे विन्ध्यभूभृतः ॥ १०९ ॥

वशिनां जितेन्द्रियाणां योगिनां साधूनामीशो नायकः सूरिर्जिनौकसः वृषभदेवगृहस्य। प्रासादस्येत्यर्थः । गर्भगेहे गर्भागारे विवेश प्रविशति स्म। क इव। स्तम्बेरमीविवोढेव। यथा स्तम्बेरम्या हस्तिन्या विवोढा पतिर्हस्ती । 'विवोढा रमणो भोक्ता' इति हैम्याम्। विन्ध्यभूभृतो जलवालकाचलस्य गह्वरे विविधजातिनिबिडविनिद्रद्रुमक्षोणीद्रुप्रवेशविपिने प्रविशति। 'गौरीगुरोर्गह्वरमाविवेश' इति रघौ। 'गह्वरं बहुवृक्षाढ्यं वनं' इति तद्वृत्तिः। तथा 'गह्वरो बिलदम्भयोः । कुञ्जेऽपि' इत्यनेकार्थः ॥

आत्मनः स्वस्य मण्डलहृदयवर्तिनं लक्ष्म लाञ्छनमेव पङ्कं कर्दममपनेतुं क्षालयितुं किंतु स्नाति स्नानं करोतीव । कस्मात् । चैत्यस्य विमलवसतेर्मूर्धनि शिखरोपरितनभागे सद्भक्त्या संकल्पितेभ्यो विधुकान्तेभ्यश्चन्द्रकान्तरत्नेभ्यो निष्पतति चन्द्रकिरणसंपर्काद्विनिःसरति पाथसि पयःपूरे प्रतिमितेः प्रतिविम्बस्य निभाद्व्याजात् ॥

यन्मणीमयशिखासु बिम्बितं बिम्बमम्बरमणिर्वहन्व्यभात् ।
ईयिवानयमियत्तया श्रियः कौतुकादनुमिमीषयास्य किम् ॥ ९० ॥

यस्या विमलवसतेर्मणीमयशिखासु रत्नराशिरचितशिखरेषु बिम्बितं प्रतिबिम्बितं स्वच्छतया संक्रान्तं बिम्बं स्वमण्डलं वहन्नम्बरमणिर्गगनरत्नं भास्करो व्यभाद्भासते स्म । उत्प्रेक्ष्यते—कौतुकात्कुतूहलादस्य मूलप्रासादस्य श्रियो लक्ष्म्या इयत्तया एतावत्प्रमाणे नानुमिमीषया अनुमातुं प्रमाणीकर्तुमिच्छया अयं भास्वानीयिवान्कि चैत्ये समेतः किम् ।

इह जिनालयवज्रविनिर्मिताम्बरविलम्बिशिखाग्रनिघर्षणात् ।
उरसि रन्ध्रमजायत यामिनीप्रणयिनः कपटादिव लक्ष्मणः ॥ ९१ ॥

यामिनीप्रणयिनो निशाप्राणनाथस्योरसि वक्षःस्थले । उत्प्रेक्ष्यते—लक्ष्मणो लाञ्छनस्य कपटाद्रन्ध्रं छिद्रमजायत जातमिव । कस्मात् । इहार्बुदपर्वते जिनालयस्य भगवद्भवनस्य वज्ररत्नैर्हीरकमणिभिर्विनिर्मिताया रचितायास्तथा अम्बरमाकाशमालम्बते आश्रयते इत्येवंशीलायाः शिखाया शिखरस्य अग्रे उपरितनभागेऽतिघर्षणात् नितरां घर्षात् ॥

अभितः सितयद्वसतेर्विशदः शुशुभे लघुदेवगृहप्रकरः ।
उडुयौवतमेतदिहोपगतं शशिना सह रन्तुमिवाम्बरतः ॥ ९२ ॥

सितायाः श्वेतोपलमयत्वादुज्ज्वलाया [illegible] मूलप्रासादस्य अभितश्चतुर्ष्वपि दिक्षु पार्श्वेषु वा विशदः [illegible] लघुर्मूलप्रासादापेक्षया स्वल्पप्रमाणो विस्तार [illegible] देवगृहाणां देवकुलिकानां [illegible] शुशुभे भासते स्म । उत्प्रेक्ष्यते—शशिना [illegible] सह रन्तुं [illegible] वा तुमम्बरत आकाशादिह [illegible] तारा एव यौवतं चन्द्रबिम्बानि [illegible] ॥

निर्ग्रन्थपृथिवीनाथश्चैत्य विमलमन्त्रिणः ।
वैजयन्तीमिव प्रीत्या प्राहिणोदिदशेश्वर ॥ ९३ ॥

[illegible]

हे इति सम्बोधने । यदुक्तं सारस्वतव्याकरणे—'आमिमुख्यामिन्त्रणे [illegible] प्रयोगः' इति । त्रिजगतां त्रयाणां भुवनानां [illegible] । [illegible] नानाविधत्वं । सुरासुरनराणाम् । जय च त्रयाणां जगतां समाहारः त्रिजगत् [illegible] वा यानीप्सितानि काङ्क्षितानि तेषां पूरणे प्रदाने [illegible] नम् । तथा हे सरोजानन हे [illegible] अस्यन्ते क्षिप्यन्तेऽनेनेति [illegible] तस्य भेदे विदारणे [illegible] कर्मारेन् । [illegible] त्रिदशानां सुन्दर्यः [illegible] त्पलानि इन्दीवराणि कुवलयानि वा [illegible] वदनमेव शीतलचन्द्र[illegible] समान पीयूष सुधारसो यस्य तत्सम्बोधने पुनरपि जय ॥

जय प्रणतपूर्वदिविप्रणयिमौलिमालागल-
न्मरन्दकणधोरणीस्नपितपादपद्मद्वय ।
जय त्रिभुवनेन्दिराभरण नाभिभूमीधना-
न्वयाम्बरगभस्तिमालिन् महोदय [illegible] ॥ ११४ ॥

हे प्रणत [illegible] पूर्वदिवि [illegible] सहितैः पश्चाद् [illegible] पदमौलिमुकुटा [illegible] ये मरन्दा [illegible] तस्मिन् [illegible] पादपद्मे [illegible] इन्दिरा [illegible] वदनः [illegible] महोदय [illegible] ॥

[illegible]

हे [illegible]

जोऽशुभकर्म येन । बहुवचनं वा वाच्यम् । किं कृत्वा । आनन्दो भगवद्दर्शनोद्भूताह्लादः स एव वृन्दारकनिर्झरिणी सुरसरिद्गङ्गा तस्या विषये निमज्ज्य स्नानं कृत्वा । क इव । जम्भद्विपतः करीव । यथा जम्भनाम्नो दानवेन्द्रस्य द्विपतः शत्रोरिन्द्रस्य करी ऐरावणः सुरतटिन्यां निमज्ज्य यथेच्छं जलक्रीडादि निर्माय स्वशरीरादपास्तं च प्राघातादिना विलग्नं रजो येन तादृग्विधो गङ्गाप्रवाहाद्बहिर्निरेति । देवगजानां तु रजोलगभावात् । ऐरिदमनत्वाज्जम्भद्विपत्तुल्यो राजा । 'भूलम्भभिद' इति पाठो वा । भूमेरिन्द्रस्तस्य पट्टहस्ती मन्दाकिन्यां क्रीडित्वा स्ववपुर्विलग्नं रजोऽपास्य बहिर्विनिःसरतीत्यर्थः ॥

पिण्डीभवन्नर्बुदभूमृति वस्तुपालयशः किमालोक्य परं विहारम् ।
तस्मिन्नलीव स्मितपुण्डरीके श्रेयोरसं संस्पृहयन्विवेश ॥ ११९ ॥

सूरिस्तस्मिन्विहारे विवेश प्रविष्टः । क इव । अलीव । यथा भ्रमरो विशिष्टे श्वेतसरोजे मध्ये प्रविशति । किं कुर्वन् सूरिः । संस्पृहयन् वाञ्छन् । कम् । श्रेयो मोक्षस्तस्य रसमास्वादम् । 'रस स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे । बोले रागे देहधातौ तिक्तादौ पारदेऽपि च ॥' इत्यनेकार्थः । भृङ्गोऽपि स्वश्रेयःकारिणं पुष्टिविधायिनं स्वशरीरोपचये परमं मकरन्दमेव । मकरन्दं रसो मधु । मकरन्दोऽमरन्दश्च' इति हैम्याम् । काङ्क्षन् । किं कृत्वा परमन्यविमलवसतेरपेक्षया विहारं जिनसद्म आलोक्य समीक्ष्य । उत्प्रेक्ष्यते—भूभृति अर्बुदाचले पिण्डीभवत्पिण्डाकारं सपद्यमानं वस्तुपालनाम्नो मन्त्रिणो यशः किं मूर्तिमती कीर्तिरिव ॥

चुचुम्बेऽम्बरं यन्महामण्डपेन जगन्नेत्रजैवातृकेणात्ममूर्ध्ना ।
किमु स्नातुमाकाङ्क्षता स्वर्वहायाः प्रवाहे विहायोमणीतापितेन ॥१२०॥

यस्या वस्तुपालवसतेर्महान् सर्वातिशायी यो मण्डपस्तेनात्ममूर्ध्ना स्वमस्तकेन कृत्वा अम्बरमाकाशं चुचुम्बे पस्पृशे । आलिङ्गति स्मेत्यर्थः । किंभूतेन । जगतां जगज्जनानां नेत्राणामाह्लादकरणविधौ जैवातृकेण चन्द्रेण । उत्प्रेक्ष्यते—विहायसो व्योम्नो मणी रत्नं भास्वान् तेन तापितेन तप्तीकृतसर्वाङ्गेण सता स्वर्वहाया गगनगङ्गाया प्रवाहे पयःपूरे स्नातुमाप्रवितुमाकाङ्क्षता किमु वाञ्छतेव ॥

विभाव्य यत्राद्भुतशालिभञ्जीराजीस्त्रिलोकीयुवतीर्जयन्तीः ।
सुरैर्मरुद्यौवतरूपशिल्पी स कल्प्यते कारुरिवानधीतिः ॥ १२१ ॥

यत्र वस्तुपालवसतौ सुरैर्देवैर्मरुतां त्रिदशानां यौवतस्य युवतीसमूहस्य । देवाङ्गनागणस्येत्यर्थः । रूपस्य वपूरमणीयकस्य शिल्पी रचनाकारकः न विद्यते सम्यक् शिल्पकलया अधीतिरध्ययनं यस्य सोऽनधीतिः कारुः नीचजातिशिल्पी निकृष्टशिल्पी च कल्प्यते स्म विचार्यते स्म । किं कृत्वा । यत्र वस्तुपालवसतौ त्रिलोक्या भुवनत्रयस्य युवतीस्तरुणीर्जयन्तीः पराभवन्तीः अद्भुता अतिप्रकृष्टा जगदाश्चर्यकारिणीर्वा शालिभञ्जीराजीः पाञ्चालिकामालिका विभाव्य व्यालोक्य ॥

प्रणन्तु नमस्कर्तुं जनान् लोकान् । उत्प्रेक्ष्यते—इहार्बुदाचले इह विमलवसता वा [illegible] ह्वयन्तीराकारयन्तीरिव ॥

यत्र पाञ्चालिकाशिल्पं निरूप्य सुरसुभ्रुवः ।
मेनिरे पद्मजन्मानं स्वभूपापरिमोपिणम् ॥ १०३ ॥

यत्र प्रासादे पाञ्चालिकाना पुत्रिकाणा शिल्प जगच्चेतश्चमत्कारकारि रचना[illegible] निरूप्य सम्यगालोक्य सुरसुभ्रुवः त्रिदशसुदृश. पद्मजन्मान विधातार स्वस्या [illegible] भूपाया वपु·प्रियरूपकस्य परिमोपिण तस्कर मेनिरे जानन्ति स्म । यदस्मा[illegible] मपि रूपलक्ष्मीमपहृत्य प्रयत्नेन विधिना एताः शालभञ्जीर्विनिर्मिता· ॥

चण्डरुक्किरणमण्डलस्मयं खण्डयन्समवलोकि सूरिणा ।
मण्डपो विमलकीर्तिनर्तकीनर्तनाय नवरङ्गभूरिव ॥ १०४ ॥

सूरिणा मण्डपोऽर्थाच्चैत्यमध्यवर्ती बहुजनाश्रय· समवलोकि सम्यग[illegible] वीक्षित· । देवभवनवैचित्र्यवीक्षणे सयमिनामपि न कश्चिद्दोष· । यतस्तत्र धर्म[illegible] धात् । मण्डप· किं कुर्वन् । चण्डरुच· सूर्यस्य किरणै रश्मिभिर्मण्डितस्य [illegible] विम्बस्य स्मयमहकार खण्डयन् शकलीकुर्वन् । उत्प्रेक्ष्यते—विमलमन्त्रिण [illegible] नर्तकी नृत्यकारिका पात्र तस्या नर्तनाय ताण्डवविधानाय नवा नवीना [illegible] वा ‘णु स्तुतौ’ । नवन नव. नवस्य स्तुतेर्योग्या मध्यपदलोपे [illegible] स्थानक्षोणिरिव ॥

वैजयन्तं विजेतुं विभूपाभरैर्वज्ररोचिःस्फुरच्चापचक्रायुधः ।
यः स्वशृङ्गेण गर्वाद्दिवो गाहिना गन्तुमुच्चैर्व्यवस्यन्निवोर्जस्वल· ॥ १०५ ॥

यो मण्डपो विभूषाभरै. स्वशोभातिशयैः वैजयन्तमिन्द्रप्रासा[illegible] [illegible] दिवो गगनमार्गस्य गाहिना अवगाहनशीलेन । अभ्रलिहेनेत्यर्थ । [illegible] गर्वादहकारादुच्चैरूर्ध्व स्वर्लोके गन्तु प्रयातु व्यवस्यन्[illegible] [illegible] मण्डपः । ऊर्जस्वल. स्फूर्तिमान् प्रबलबलवान्वा । पुन· किंभूत । [illegible] रोचिर्भिः कान्तिभि. कृत्वा स्फुरत्प्रकटीभवद्यच्चापच[illegible] धनुर्मण्डल [illegible] यस्य । अथ च वज्रमिन्द्रायुध तथा रोचिषा [illegible] स्फुर[illegible]
[illegible] चक्र [illegible] तथा आयु[illegible]
[illegible] शस्त्राणि यस्य । परोऽपि [illegible]
[illegible] गृह्णाति ॥

[illegible]
[illegible]
[illegible]

नमनेन मुनीशिता परेष्वपि चैत्येषु जिनेन्द्रसंततेः।
धनकामयितेव संमदं दधते स्माधिगमेन शेवधेः॥ १२६॥

मुनीनां यतीनामीशिता पतिः सूरिः परेष्वपि देवलपाटकवर्तिष्वपि अन्येषु प्रासादेषु जिनेन्द्रसंततेः भगवत्प्रतिमापङ्क्तेर्नमनेन प्रणामकरणेन संमदं हर्षं दधते विधत्ते स्म। 'दधि धारणे' केवलमात्मनेपदी धातुः। क इव। धनकामयितेव यथा द्रव्याभिलाषुकः पुमान् शेवधेर्निधानस्याधिगमेन प्राप्त्या प्रसादं दधाति॥

चौलुक्यचैत्यं विधृतामृतश्रि धर्मप्रपास्थानमिवैष मार्गे।
नत्वा मुनीन्द्रोऽचलदुर्गमध्ये चतुर्मुखे नाभिसुतं व्यनंसीत्॥ १२७॥

एष मुनीन्द्रः। अचलो नाम यो दुर्गः कोट्टस्तस्य मध्ये चतुर्मुखे प्रासादे नाभिसुतम् ऋषभदेवं व्यनंसीत् विशेषेण नव्यस्तुतिपाठाद्भूलगनपूर्वकं नमति स्म। किं कृत्वा। देवलपाटकादचलदुर्गागमनाध्वनि चौलुक्यस्य कुमारपालभूपालस्य चैत्यं प्रासादं नत्वा अर्थात्तत्रार्हन्तं प्रणम्य। उत्प्रेक्ष्यते—चौलुक्यचैत्यं धर्मप्रपास्थानमिव धर्मस्य पानीयशालागृहमिव। लौकिके व्यवहारे धर्मार्थमार्गश्रमश्रान्तपिपासितपथिकनिर्वृत्यर्थं मार्गे प्रपा कार्यते। किंलक्षणेन। विधृता आश्रिता अमृतवदुज्ज्वला श्रीः शोभा येन। अथवा विधृता खलिनानीय रक्षिता अमृतश्रीर्मोक्षलक्ष्मीर्येन। प्रपापि धृता आलम्बिता अमृतानां कुसुमलाकर्पूरादिवासितजलानां प्रागुक्तसलिलैर्वा श्रीः सुषमा येन॥

दिनानि कतिचित्सूरिर्गिरीन्द्रतनुजे गिरौ।
स्थितोऽर्हद्ध्याननिध्यानश्चारणश्रमणेन्द्रवत्॥ १२८॥

सूरिर्गिरीन्द्रस्य हेमाद्रेस्तनुजे नन्दने गिरौ पर्वते अर्बुदाचले कतिचिद्दिनानि कियतो वासरान् यावत्स्थितः अर्हद्दर्शनादिलोभेन तत्र तस्थिवान्। किंभूतः। अर्हतो भगवतो ध्यानेन प्रणिधानेन चित्तैकाग्र्येण कृत्वा निध्यानमवलोकनं यस्य। योगिनो हि स्वहृदयकमले परमात्मानं साक्षात्समीक्ष्य ध्यानाद्विरमन्ति इति कुमारसंभवे पार्वतीपाणिग्रहणात्पूर्वसमये ध्यानव्यतिकरे। अथ वा अर्हता सर्वतीर्थकृता ध्यानं दृष्टोचरीकरणं स्मरणं वा पौनःपुन्येन। वारंवारमित्यर्थः। दर्शनं चैत्यगमनादिना यस्य। किंवत्। चारणश्रमणेन्द्रवत्। यथा जङ्घाचारणविद्याचारणादिर्यतिपुंगवाः यात्रार्थं गताः क्वापि शत्रुंजयादितीर्थपर्वते कानिचिद्दिवसानि तिष्ठन्ति। दिनदिवसवासराः पुंनपुंसकलिङ्गे। श्रूयते तज्जनपदलोकश्रुत्या पूर्वमष्टाशीतिऋषयः अत्र स्थाने तपः कुर्वाणा आसन्। तेषां च होमादिसाधनैका कामधेनुश्चरन्ती सती महागर्तान्तः पपात। ततस्तां निष्कासयितुमशक्ता ऋषयो गत्वा हिमाचलं याचित्वा तत्पुत्रमर्बुदनामानं महानहीधरमत्रानैषुः। तावतासौ कामगवी स्वपयोभिस्तां गर्तामापूर्य तीर्त्वा च बहिर्निःसरति स्म। ततः पुनर्मास्याः धेनोरेतद्गर्तायां पातो भवतु इत्याशङ्क्य ऋषिभिस्तद्गर्तामध्यमर्बुदाद्रिणा

जातोऽक्षलक्ष्मा भगवानदर्शि सुरीन्दुना संमदमेदुरेण ।
जगन्महानन्दपदं निनीषुः स्वर्गं ततः किं कृपयावतीर्णः ॥ [illegible] ॥

संमदैत्तीर्थारोहणनेलप्रतिमानिरीक्षणोद्भूतामन्दानन्दमेदुरेण [illegible] मुनीन्द्रचन्द्रेण जातोऽक्षलक्ष्मा [illegible] भगवान् [illegible] नीतः । निरीक्षित इत्यर्थः । उत्प्रेक्ष्यते—जगत् [illegible] आनन्दः प्रमोदो यत्रेति कृत्वा मोक्षस्तस्य पदं स्थानम् । मुक्तिनगरीम् [illegible] प्रापयितुमिच्छुः । ततो महानन्दप्रापणलक्षणमात्मना कृपया [illegible] भक्तजनानुग्रहेच्छया अवतीर्ण इवागत इव ॥

अपि प्रपन्नो भुवने धुरीणतां पुनस्तदीयस्पृहये [illegible] ।
शीलन्तम [illegible] क्रमाम्बुजं जिनस्य जातो [illegible] ॥ [illegible] ॥

[illegible]

[illegible] ॥ [illegible] ॥

[illegible]

अथार्बुदाचलतीर्थगमनानन्तरं सूरिभूमान् सूरिराजोऽर्बुदाद्रेर्हिमाद्रिनन्दनाननीन-रादवतीर्य अवरुह्य उपत्यकामागत्य भूमौ पृथिवीपीठं विभूषयामास शोभयति स्म। किं कुर्वाणः। वचसा वचनानां तरङ्गैरस्खलितप्रचारनिर्झरद्वारकल्लोलैस्त्रिजगत्त्रिभुवनजनं पुनानः पवित्रीकुर्वाणः। क इव। रय इव। यथा देवनद्याः गङ्गायाः प्रवाहो हिमाद्रे-स्तुहिनाचलादवतीर्य अधः समेत्य भूमीं पुनीते। सोऽपि अस्खलितकल्लोलैस्त्रिजगत्त्रिस्रोत-स्त्वात्त्रिभुवनं पावनं कुर्वाणः॥

यस्या द्विपेन्द्रैः स्वमदप्रवाहैराराभिकौघैरिव वारिपूरैः।
वृक्षा अवर्ध्यन्त विभुर्व्यहार्षीत्तत्रार्बुदाभ्यर्णवसुंधरायाम् ॥ २ ॥

विभुः सूरिस्तत्र तस्यार्बुदाद्रेरभ्यर्णे समीपे या वसुधरा भूमिस्तस्यां व्यहार्षीत् वि-हरति स्म। तस्यां कस्याम्। यस्यामर्बुदाभ्यर्णभूमौ द्विपेन्द्रैर्मत्तगजराजैः स्वेषामात्मनां मदानां दानवारीणां प्रवाहैर्गलत्कपोलेभ्यो निःसृतैः पृथिवीपीठे पतद्भिः वृक्षा द्रुमा अ-वर्ध्यन्त विवृद्धाः सन्तः वृद्धिं नीयन्ते स्म। कैरिव। आरामिकौघैरिव। यथा वनपालवृन्दै-र्वारिपूरैरभिषिक्तनजलपूरैः पादपा वृद्धिं प्राप्यन्ते ॥

मिषं महिम्ना किमनुव्रजन्तं स्वदीर्घभावेन सहायवत्तम्।
इवाचलं शैवलिनीप्रवाहः क्रमान्मुनीन्द्रोऽर्बुदमुल्ललङ्घे ॥ ३ ॥

मुनीन्द्रः सूरिः क्रमाद्विहारपरिपाट्या अर्बुदं पर्वतमुल्ललङ्घे अतिक्रान्तवान्। क इव। शैवलिनीप्रवाह इव। यथा शैवलान्यनवरतप्रबलप्रसरत्पय प्रवाहत्वात्प्रादुर्भूतप्रचुर-बहलसेवालजालानि यस्याः सा शैवलिनी नदी तस्याः प्रवाहः पयःपूरः [illegible]-गतगिरिमुल्लङ्घते। अर्बुदमुत्प्रेक्ष्यते—महिम्ना माहात्म्येन गुरुतया [illegible] [illegible]-मिव। अत एवोत्प्रेक्ष्यते—सहायवत् [illegible]मिव। [illegible] [illegible] [illegible]-यामतयातिलम्बतया [illegible]मनुव्रजन्तमिव पृष्ठे समायान्तमिव। यथा सहायोऽपि प्र-स्थितपुंसोऽनुयाति। अत्र किमिति [illegible] [illegible] [illegible]। [illegible]-रप्युत्प्रेक्षयोः संयोजनीयमिति ॥

प्रतिष्ठमानः पुरतो यतीन्दुर्दुर्गं[illegible]पूः समीपम्।
स्वपादसंस्पर्शनतः पयोजकुञ्जं यथा पङ्कजिनीपिपोटा ॥ ४ ॥

पुरतोऽग्रतः प्रतिष्ठमानः प्रचलन् यतीन्दुः मुनिचन्द्रः सूरिः [illegible] [illegible] [illegible]-णयोः स्वपदसंस्पर्शनतः [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]-पीठं प्रापयामास। क इव। पङ्कजिनीपिपोटेव। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]-रणो भानुमान् [illegible] पादानां [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ॥

[illegible] मुनीन्द्रो[illegible] [illegible] [illegible]।
[illegible] [illegible] [illegible] [illegible] ॥ ५ ॥

चरितसातानन्दादिप्राप्त्या अतिशायी सर्वोत्कृष्ट उदयो यत्र तादृशो मोक्षः स एव पयोरुहं पद्मं तस्योदरं मध्यं तत्र विनोदो विलासस्तत्र पुष्पव्रतो भ्रमरः तत्संबुद्धौ । पुनरम्बुजासनो विधाता तद्वत्स्फुटीकृतः प्रकटितो विशिष्टो मोक्षमार्गाव्यभिचारी [illegible] रचनायाः क्रमः परिपाटी येन तत्संबुद्धिः ॥

जय प्रमथितान्तराहितपताकिनीनायको-
ल्लसत्कनककेतकीकमलगर्भगौरद्युते ।
भवाम्बुनिधिनिष्पतन्मनुजयानपात्रोच्छ्लस-
द्यशःसुमसुगन्धितत्रिभुवनात्र जीयाश्चिरम् ॥ ११६ ॥

हे प्रमथिता निर्दलिता आन्तरा अन्तर्भवा अन्तरङ्गा अहिताः परमप्रत्यनीकभूताः कर्मोदयो रागद्वेषकषायादयोऽष्टादश दोषा वा एव पताकिनीनायकाः सेनापतयो भूपालाः वा येन तस्य संबुद्धिः । तथा हे उल्लसतामुल्लासं भजतां विसेरीभवतां कनकानां काञ्चनसंबन्धिनां स्वर्णमयानां केतकीनां कमलानां च यो गर्भो मध्यभागस्तद्वद्गौरी पीता । 'गौरः श्वेतपीतयोः' इत्यनेकार्थः । द्युतिः कान्तिर्यस्य तत्संबुद्धौ । [illegible] । पुनर्हे भवः संसारः स एव दुस्तरत्वादम्बुनिधिः समुद्रस्तत्र निष्पतन्तो निरवलम्बतया नितरां मज्जन्तो ब्रूडन्तो ये मनुजा मानवास्तेषां त्राणार्थं यानपात्रं प्रवहणं । तथा उच्छ्लसत् विकसत् प्रकटीभवद्यशः कीर्तिरेव सुमं पुष्पं तेन । तत्परिमलेनेत्यर्थः । सुगन्धितं वासितं सुरभीकृतं त्रिभुवनं विश्वत्रयं येन तत्संबोधने । हे ऋषभदेव । अत्र [illegible] दपर्वते भूषणीभवन् चिरं विगलितावधिसमयं जीयाः विजयी भूयास्त्वम् ॥ चतुर्भिः कुलकम् ॥ इति ऋषभदेवस्तुतिः ॥

कैलासलक्ष्मीतिलकायमानमिवेन्द्रभूतिर्व्रतिना विडौजाः ।
तमित्यभिष्टुत्य मुदं दधानः प्रणेमिवान्प्राञ्जलिरादिदेवम् ॥ ११७ ॥

व्रतिनां मुनीनां विडौजाः पुरहूतः सूरिः प्रकृष्टोऽञ्जलिर्भालस्थलमिलित [illegible] यस्य स आदिदेवमृषभस्वामिनं प्रणेमिवान् नमस्करोति स्म । किं [illegible] । मुदं मोदं दधानः बिभ्राणः । किं कृत्वा । तमादिदेवमिति पूर्वोक्तप्रकारेणाभिष्टुत्य [illegible] क इव । इन्द्रभूतिरिव । यथा गौतमस्वामी कैलासलक्ष्म्या अष्टापद[illegible] ललामवदाचरितमाचरन्तं वा नाभेयं जगच्चिन्तामण्यादिस्तुतिभि[illegible] प्रणमति स्म ॥

आनन्दवृन्दारकनिर्झरिण्यां निमज्य नम्रीकृ[illegible] ।
निरस्तनिःशेषरजाः स सूरिर्निरीयिवाञ्श्री[illegible] ॥ ११८ ॥

[illegible] स सूरि[illegible] जगद्गुरुदर्शोनया [illegible]
[illegible]

उत्प्रेक्ष्यते—सितानामुज्ज्वलानां केतूनां ध्वजानां कायाः शरीराणि यस्यास्तादृशी अत्रसरिद्गगनापगा समागता ॥

द्वितीयराशौ शतमन्युसूरिरिव क्रमेणोपगतः स तस्याम् ।
प्रकाशयन्बोधिनिधीन्विदग्धान्महोदयस्याभिमुखीचकार ॥ ९ ॥

स सूरिः क्रमेण प्रवेशपरिपाट्या तस्यां शिवपुर्यामुपगतः समायातवान् सन् विदग्धान् कोविदान् छेकाजनान् महान्पुरनराभ्युदयेभ्योऽतिशायी उदयो यत्र तादृशो मोक्षस्तस्याभिमुखीचकार । धर्मोपदेशश्रवणातदेकाग्र्याराधनमनस्त्वेन सिद्धिगामिनो विदधाति स्म । किं कुर्वन् सूरिः । बोधेरनेकभेदभिन्नसम्यक्त्वरूपात् निधीन्निधानानि प्रकाशयन् प्रकटीकुर्वन् । क इव । शतमन्युसूरिरिव । यथा शतमन्यो शतक्रतोः पुरंदरस्य सूरिराचार्योऽध्यापयिता बृहस्पतिः । यदुक्तं नैषधे—'ईदृशीं गिरमुदीर्य विडौजा जोषमासनविशिष्य बभाषे । नात्र चित्रमभिधाकुशलत्वे शैशवावधिगुरुर्गुरुरस्य ॥' इति । यस्य कस्यचिद्भाग्यवतः पुंसः स्वराशितो द्वितीयो राशिस्तत्र समेतः सन् निधानद्रव्याणि प्रकाशानि विदधानः महोदयस्य राज्यमन्त्रिश्रेष्ठिपदादिरूपस्य महोदयस्यात्यभ्यधिकाभ्युदयस्य संमुखीकरोति । यदुक्तं ज्योतिर्विद्भिः—'द्वितीये नवमे राशौ बृहस्पतिरुपागतः । कुर्यान्महोदयं पुत्रगोत्रवृद्धिं धनं पुनः ॥' इति वचनात् ॥ इति शिवपुर्यां प्रभोः पादावधारणं तन्महवर्णनं च ॥

स प्रस्थितस्तत्पुरतः पुरस्तात्सितप्रसूनादिव चिञ्चिरीकः ।
गण्डे गजस्येव विलङ्घ्य मार्गं स सादडीनाम्नि पुरे जगाम ॥ १० ॥

स सूरिस्ततस्तत्पुरतः सीरोहीनगरात्पुरस्तादग्रे प्रस्थितः प्रचलितः सन् मार्गं पन्थानं विलङ्घ्यातिक्रम्य सादडीनाम्नि पुरे जगाम गतवान् । क इव । चिञ्चिरीक इव । यथा भ्रमरः सिताद्विकसितात्प्रसूनात्कुसुमात्प्रचलितः सन् मार्गमुल्लङ्घ्य गजस्य गन्धसिन्धुरस्य गण्डे कपोलस्थले गच्छति । 'कटेषु करिणां पेतुः पुंनागेभ्यः शिलीमुखाः' इति रघुवंशे । प्रसूनानि त्यक्त्वा भृङ्गा गजेन्द्रगण्डस्थलगलद्दानवारि पातुं समायान्ति ॥

प्राग्वागडावन्तिविराटखानमहादिराष्ट्रापरमण्डलेषु ।
सार्धाधिपेनेव सुतेन सार्धं विहृत्य लाभांश्च बहूनुपार्ज्य ॥ ११ ॥
कल्याणराजद्विजयाभिधानोपाध्यायचन्द्रेण समेत्य तत्र ।
क्रमादविच्छिन्नतमैः प्रयाणैः श्रीतातपादाः प्रणताः प्रमोदात् ॥ १२ ॥ (युग्मम्)

कल्याण इति पदेन राजद्दीप्यमानः विजय इत्यभिधानं नाम यस्य तादृशेनोपाध्यायेषु वाचकेषु चन्द्रेण जनाह्लादकत्वेन विधुना । एतावता कल्याणविजयोपाध्यायेनेत्यर्थः । अविच्छिन्नतमैरतिशयेन खण्डितैः त्वरितत्वरितैः प्रयाणैः प्रतिदिनं पथि प्रचलनैः ... त्मनात् सानवाटयुर्जरार्बुदाद्रिपरिसरदेशोल्लङ्घनपरिपाट्या समेत्य ... पुरे संगत्य

असूयता शुभ्रिमविभ्रमाय युयुत्सु यच्चैत्यमचण्डभासा ।
बिभर्ति विद्वेषिजिगीषयैताममोघशक्तिं किमु दण्डदम्भात् ॥ १२२ ॥

यच्चैत्यं वस्तुपालकारितप्रासादः विद्वेषिणा वैभवेन स्वस्पर्धिना जिगीषया पराभवितुमिच्छया । उत्प्रेक्ष्यते—दण्डस्य ध्वजनियन्त्रणयष्टेर्दम्भात्कपटात् एतां प्रत्यक्षाममोघां कापि न निष्फलीभवन्तीं शक्तिमायुधविशेषं लोहमयीं 'सांगि'नाम्ना प्रसिद्धां बिभर्ति दधतीव । किं कर्तुमिच्छु । चैत्यं युयुत्सु योद्धुमिच्छु । केन । अचण्डभासा चन्द्रभासा सम किं कुर्वता चन्द्रेण । असूयता ईर्ष्यां कुर्वता । केन । शुभ्रिमविभ्रमाय स्वश्वैत्यशोभायै । 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः । क्रुधाद्यर्थानां योगे यं प्रति कोपः स सम्प्रदानसंज्ञः । इति चतुर्थी विभ्रमायेत्यत्र' इति प्रक्रियाकौमुद्याम् ॥

यच्चान्द्रचैत्योपरि शातकौम्भः कुम्भो विभूषां बिभरांबभूव ।
सुधासरःसंभ्रमतः समेतो रथाङ्गनामा किमु रन्तुकामः ॥ १२३ ॥

यदेव चन्द्रकान्तमणीप्रणीतप्रासादस्तत्तुल्यो विहारस्तस्य शातकौम्भः स्वर्णमयः कुम्भः कलशो विभूषां शोभां बिभरांबभूव । उत्प्रेक्ष्यते—सुधासरसः पीयूषपूर्णपद्माकरस्य संभ्रमतो धिया समेतः समागतः रन्तुं जलादिक्रीडां कर्तुं कामोऽभिलाषो यस्य तादृशो रथाङ्गनामा चक्रवाक इव ॥

यद्वैजयन्त्या सितिमश्रिया स्वःपाथोधिपत्नी गमिता विगानम् ।
निम्नं व्रजन्ती त्रपयासिताब्जैः श्यामीकृतास्येव जडाशयासीत् ॥ १२४ ॥

यस्या वस्तुपालवसतेर्वैजयन्त्या पताकया कर्त्र्या सितिमश्रिया स्वश्वैत्यलक्ष्म्या साधनेन कृत्वा स्वः स्वर्गस्य पाथोधेः समुद्रस्य पत्नी जाया एतावता स्वर्गङ्गा सा विगानं वचनीयतां विकारभावं गमिता सम्प्रापिता सती । उत्प्रेक्ष्यते—जडाशया किंकर्तव्यताया विमूढमानसा आसीद्बभूवुरिव । किं कुर्वन्ती । त्रपया स्वहृदयान्तर्दमनेन निम्नं नीचैर्मन्दं मन्दं वा व्रजन्ती गच्छन्ती । पुनः किंभूता । असिताब्जैः नीलोत्पलैः कृत्वा श्यामीकृतास्या कृष्णं विहितं मुखं यया । यो लज्जितः कश्चित्स्यात्स निम्नं मन्दं प्रचलति । श्यामाननः किंकर्तव्यानभिज्ञः स्यादेव ॥

तं रैवतोर्वीधरवत्पवित्रीचिकीर्षयेवार्बुदमभ्युपेतम् ।
निरीक्ष्य तस्मिन्नयनाभिरामं ननाम शैवेयजिनं यतीन्द्रः ॥ १२५ ॥

यतीन्द्रः सूरिरस्मिन् वस्तुपालविहारे शिवायाः समुद्रविजयराज्ञ्याः [illegible] पुत्रः शैवेयः स चासौ जिनश्च तीर्थंकरस्तं श्रीनेमिनाथं ननाम प्रणनाम [illegible] निरीक्ष्य स्वलोचनगोचरीकृत्य अर्थान्नेमिनाथम् । किंभूतम् । नयनयोर्लोचनयोः [illegible] नयोर्हारिणम् । पुनः किंलक्षणं तम् । [illegible]
उत्प्रेक्ष्यते—पवित्रीचिकीर्षया [illegible]
[illegible] पूर्वं [illegible] ॥

पुनर्ध्वलं किं कुर्वाणम् । निजलात्मनो मण्डपान्तः स्तम्भमण्डपमध्ये मेदपाटमण्डलाधिपस्य भूनाथेन्द्रोपनत्न कुम्भो इत्यभिधा नाम यस्य तादृशस्य राणकस्य। केषांचिदपि राजन्याना राणो इत्यभिधा प्रोच्यते । ततः कुम्भोराणो इति प्रसिद्धस्य। राज्ञः पञ्चशतीसुवर्णकाना समर्पणेन स्वनाम्ना कारितान् स्तम्भान् सप्तसंख्याकान् मण्डपावाऽऽरम्भस्थूणाविशेषान्दधान बिभ्राणम् । किंभूतान् स्तम्भान् । अनेकपानां करिणां स्फूर्तानां विलसितानां भुवः स्थानानि । उत्प्रेक्ष्यते—शिवस्य शंभोर्गौरस्य शैलस्य गुणधिया कैलासस्य जैत्रा जयनशीलान् एतान्प्रलक्षान् समज्ञाया कीर्तेः स्तम्भानिव । किंभूतान् । अनेकराजजनान् व्यापदुद्धरणव्यसननिराकरणद्रविणवितरणशरणरक्षणादिभिः पातीति रक्षतीति कृत्वा अनेकपस्तत्त्वेन स्फूर्तय प्रसिद्धयस्तासां भुव आस्पदाः ॥

स्वतुङ्गिमाधःकृतरत्नसानुं विगाहमानं शिखरैर्विहायः ।
प्रगल्भमानं वपुषैव तेनाश्रितानिव प्रापयितुं द्युलोकम् ॥ १७ ॥

चैत्यं किं कुर्वाणम् । शिखरैः स्वशृङ्गैः विहायो गगनाङ्गणं विगाहमानं संस्पृशत् कपट्टा । पुनः किंभूतम् । स्वतुङ्गिना स्वकीयोच्चैस्तरत्वेन अधःकृतो हीनो विहितो रत्नसानुः सुवर्णशिखरी येन । तत्रोत्प्रेक्ष्यते—आश्रितानागत्य स्व सेवमानान् अर्थात् निजनायकजिनभक्तिपरायणान् जनान् तेनैव वपुषा मानुषेनैव द्युलोकं स्वर्गभुवनं प्रापयितुं प्रगल्भमानमुद्यमं कुर्वाणमिव ॥

चेतश्चमत्कारकरीस्त्रिलोक्या लक्ष्मीः समालोक्य रसातिरेकात् ।
संस्तम्भिताङ्गीभिरिवामरीभिः पाञ्चालिकाभिः प्रविभासमानम् ॥ १८ ॥

पुनः किं कुर्वाणम् । प्रविभासमानं प्रकर्षेण दीप्यमानम् । अतिशायिशोभां दधानमित्यर्थः । काभिः । पाञ्चालिकाभिः शालभञ्जीभिः । उत्प्रेक्ष्यते—त्रिलोक्या भुवनत्रितयस्य चेतसामन्तःकरणानां चमत्कारमाश्चर्यरसातिशयं करोतीति तादृशीर्लक्ष्मीरतिशायिशोभाः समालोक्य सम्यक् सर्वाङ्गीणतया निवर्ण्य । रसातिरेकात्केवलं दर्शनेन विस्मयाद्वैततया संस्तम्भिताङ्गीभिर्निश्चलीभूततनूलताभिरिव । अथ वा विमुक्तगमागमस्फुरणवार्तान्योन्यावलोकनावशेषापरशरीरव्यापाराभिरमरीभिर्देवाङ्गनाभिरिव ॥

पाञ्चालिकाप्रौढविलासवीक्षाह्रणीयमानध्रुवधावरोधम् ।
अष्टापदोत्तीर्णनृपाङ्कगेहमसासहीवाद्रिनिवासजातिम् ॥ १९ ॥

चैत्यमुत्प्रेक्ष्यते—अद्रौ पर्वते । शैलशिखरे इत्यर्थः । यो निवासो नित्यनिवसनं तस्माज्जाता या अर्तिः पीडा चिन्ता शारीरिकी मानसी च तामसासहि सोढुमशक्तम् । 'अहिमंहीगौरवसासहिर्यं' इति नैषधे । अष्टापदात्स्फटिकपर्वतादुत्तीर्णं भूपीठेऽभ्युपेतं नृपाङ्कस्यादिदेवस्य गेहं सिंहनिषद्या नाम चैत्यमिव । यद्यपि चतुर्विंशतितीर्थकृतामपि प्रासादोऽस्ति तथा मुख्यवृत्त्या ऋषभदेवस्यैव । यतो भरतचक्रिणा ऋषभदेवसमये

पूर्यते स्म । तैः स्थापितस्तत्रैव स्थितः सोऽयमर्बुदो हिमाद्रिपुत्र इति तत्पा[illegible] वलोकस्य प्रवृत्तिः प्रसिद्धिश्च । तथा वस्तुपालवसतिप्रशस्तावपि 'गौरीवर[illegible] संभवोऽयमस्त्यर्बुदः ककुदमद्रिकदम्बकस्य । मन्दाकिनीघनजटे दधदुत्तमाङ्गे [illegible] शशभृतोऽभिनय करोति ॥' इति दृश्यते ॥

उदयशिखरिणीव श्रीमदम्भोजबन्धु-
विंषमविशिखवैरी स्फाटिकोर्वीभृतीव ।
त्रिदशपतिरिव स्वर्भूधरे सूरिसिंहो
हिमशिखरिसुतेऽस्मिन्कांचनाभा बभार ॥ १२९ ॥

सूरिसिंहो हीरविजयनामा सूरिशार्दूल अस्मिन्नर्बुदाचलाभिधाने हिमशि[illegible] तुहिनाचलनन्दने काचन अनिर्वचनीयामाभा शोभा बभार दधाति स्म । क इव [illegible] दम्भोजबन्धुरिव । यथा श्रीमान् सर्वज्योतिश्चक्रज्योतिः पराभवनप्रवणप्रताप[illegible] अम्भोजबन्धुर्भानुमान् उदयशिखरिणि पूर्वपर्वते अद्वैता शोभा बिभर्ति । पुन[illegible] विषमविशिखवैरीव । यथा विषमाः सोढुमशक्या अथ वा समेतरे पञ्चसं[illegible] बाणा यस्य स स्मरस्तस्य वैरी प्रतिपक्षः पार्वतीपतिः ईश्वरः स्फटिकस्याय स्फ[illegible] स्तादृश उर्वीभृत्पर्वतः एतावता स्फटिकाचले कैलासे । पुनः क इव । त्रिदशपति[illegible] यथा सुरेन्द्रः स्वर्भूधरे मेरुगिरौ असाधारणा भूषां बिभर्ति । 'जाम्बूनदोर्वीधरसा[illegible] इतीन्द्राभिधान नैषधे ॥

यं प्रासूत शिवाहसाधुमघवा सौभाग्यदेवी पुनः
श्रीमत्कोविदसिंहसीहविमलान्तेवासिनामग्रिमम् ।
तद्ब्राह्मीक्रमसेविदेवविमलव्यावर्णिते हीरयु-
क्सौभाग्याभिधहीरसूरिचरिते सर्गोऽभवद्द्वादशः ॥ १३० ॥

इति पण्डितदेवविमलगणिव्यावर्णिते हीरसौभाग्यनाम्नि महाकाव्ये हीर[illegible] चरिते द्वादशानां संख्यापूरणो द्वादशः सर्गः अनवद्यभूत् ॥

इति पण्डितसीहविमलगणिशिष्यपण्डितदेवविमलगणि[illegible]रचिते हीर[illegible] महाकाव्ये [illegible]पुरप्रस्थानविजयसेनसूरिसमु[illegible] [illegible] पुरःप्रस्थानसिद्धपुरागमनविजयसेनसूरि[illegible] [illegible] दाचलगिरौ[illegible]विमल[illegible] [illegible]

त्रयोदशः सर्गः ।

अथार्बुदाद्रि[illegible] भूमौ [illegible] स सूरि[illegible] ।
[illegible] ॥ १ ॥

पूजायां गोचरतां गोचरतो न गच्छेन प्रयायात्। अपि तु सर्वत्रापि पूजा प्राप्नोतीत्यर्थः ॥

पुरं पुनानेऽम्बरवन्मुनीन्द्रे महामहोऽभूदिह द्रानवानाम् ।
तदास्यलावण्यसुधाधयानां ज्योत्स्नाप्रियाणामिव रोहिणीशे ॥ २९ ॥

मुनीन्द्रे हीरसूरिवासवे अम्बरवद्गगनाङ्गणमिव पुरं मेडताख्यनगरं पुनाने पवित्रीकुर्वाणे सति तदा सूरिप्रवेशागमनावसरे आस्ये सूरिवदने लावण्यं सौन्दर्यं लवणिमैव सुधामृतरसं धयन्ति पिबन्तीति तेषां तादृशानां मानवानां मेडतापुरवासिभविकजनानां महामहोऽद्भुतुत्सवोऽभूत्सञ्जायते स्म । केषामिव । ज्योत्स्नाप्रियाणामिव। यथा चन्द्रोऽमृतपायिनां चकोराणामम्बरमाकाशं पुनाने रोहिणीशे चन्द्रमसि महोत्सवो भवेत् ॥

एकोऽहमेव त्रिजगज्जनानां पिपर्मि कामानपरानपेक्षः ।
इति स्मयावेशवशादिवान्तः परानपास्य स्थितमेकमेव ॥ ३० ॥
मरौ सुराणामिव शाखिनं स प्रणेमिवाञ्श्रीफलवर्धिपार्श्वम् ।
अवग्रहो वृष्टिमिवेष्टसिद्धिं बध्नाति तीर्थव्यतिलङ्घनं यत् ॥ ३१ ॥ (युग्मम्)

स हीरसूरिः श्रिया जनातिशायिमाहात्म्यलक्ष्म्या कलितं फलवर्धिनामानं पार्श्वं श्रीपार्श्वनाथं प्रणेमिवान् नमस्करोति स्म । उत्प्रेक्ष्यते—मरौ धन्वमण्डले सुराणां शाखिनं कल्पवृक्षमिव । किंलक्षणम् । परानन्याञ्जिनबिम्बानपास्य विमुच्य एकमेव स्वयमेव स्थितं स्वप्रासादे प्रवसन्तम् । श्रूयते हि तत्पार्श्वे परा कापि जिनप्रतिमापि स्थातु न शक्नोति अतश्चैकाक्येव तिष्ठति । किंचेदमस्माभिरपि श्रुतचरं दृष्टचरं च, यत् फलवर्धिपार्श्वनाथप्रासादद्वारि कपाटौ न तिष्ठतः । कदाचित्कश्चिदानीय योजयति तदा प्रातःसमये प्रासादात्कोशद्वयोपरि पतितौ दृश्येते, न द्वारि स्थितौ । अपि चान्या जिनप्रतिमापि स्थापितापि पार्श्वे न तिष्ठतीति। उत्प्रेक्ष्यते—इत्यमुना प्रकारेण स्मयावेशो गर्वाटोपः तस्य वशादायत्तत्वादिव । इति किम् । परानन्यान्नापेक्षते न काङ्क्षति । अथ वा परेषां न अपेक्षा यस्य स परानपेक्षस्तादृशोऽहमेक एव त्रिजगज्जनानां त्रैलोक्यलोकानां कामान्मनोरथान् पिपर्मि पूरयामि इत्येको हेतुः ॥ युग्मम् ॥

प्रस्थापित.. ।
.... ॥ ३२ ॥

विमल इति पदमादौ यस्य तादृशो हर्षः स एवोपाध्यायेषु सिंहः पञ्चाननः तस्मिन्मेदिनीपुरे मिमेल मिलति स्म। अर्थादस्य सूरेः। किंवत् । महवत् । यथा बुधग्रहो दिवि गगने इन्दोर्मिलति। विमलहर्षः किंलक्षणः । सिद्धपुरात्पूर्वं सिद्धपुरनगरात्पुरोऽग्रे प्रस्थापितोऽपि । कया । साहिरकब्बरपातिसाहेर्हृदयवर्ती य आशयः अभिप्रायः तस्य बुभुत्सया बोद्धुमिच्छया । ज्ञातुमित्यर्थः ॥

ततः शिवपुरीसमागमनानन्तरं सुरत्राणनामा नृपः शिवपुरीमण्डलस्वामी देवताभिधानानां राजपुत्राणां राजा जनानां शिवपुरीवासिनां लोकानामारवः शब्दं। वार्तामित्यर्थः। मुनीन्दोः सूरेरागमनं समवसरणम्। पादावधारणमित्यर्थः। निपीय सादरं श्रुत्वा समदेनानन्देन मेदुरः पुष्टः अभूद्बभूव। क इव। नभोम्बुप इव। यथा चातकः कलापिनां मयूराणां केकाभिः केकाभिधानध्वनिभिः। मयूरवाक् केका इत्युच्यते। जलदस्य मेघस्य आगमनं श्रुत्वा प्रमोदोपचिततनुर्भवति॥

भक्त्या सुरत्राणनृपोऽभिगम्य वेत्रीव दण्डं दधदग्रगामी।
प्रवेशयामास पुरीं स सूरिं पुराङ्गनागीतयशःप्रशस्तिम्॥ ६॥

स पूर्ववृत्तप्रोक्तः सुरत्राणाभिधानो नृपोऽर्बुदचलाधिपतिर्भक्त्या सेवासक्त्या अभिगम्य समुखमागत्य सूरिं पुरीं श्रीरोहिणीं नगरीं प्रवेशयामास। शिवपुरीमध्ये आनिनायेत्यर्थः। ण्यन्तत्वात्कर्मद्वयम्। किंभूतः सः। पुरः सूरेरग्रे गच्छतीति इत्येवंशीलः। पुनः किं कुर्वन्। दण्डं वेत्रं दधद्बिभ्राणः। क इव। वेत्रीव। यथा दौवारिकः प्रतीहारः वेत्रयष्टिं करे दधानः पुरो गच्छति। किंभूतः सूरिः। पुराङ्गनाभिः श्रीरोहिणीनगरीनागरीभिर्गीता गानगोचरीकृता यशसा कीर्तिना प्रशस्तयो विविधा अवदाता यस्य॥

आलेख्यशेषीकृतकामदस्योरुपास्यमानस्य महीमहेन्द्रैः।
चक्रीव चक्रस्य पुरे पुरीन्द्रो महामहं कारयति स्म सूरेः॥ ७॥

पुरीन्द्रः श्रीरोहिणीपुरीपुरंदरः सुरत्राणनामा भूमान् पुरे स्वश्रीरोहिणीनगरे हीरविजयव्रतीन्द्रस्य महामहं प्रतिगृहापणादिषु ध्वजबन्धनादिममतिशायिनमुत्सवं कारयति स्म। क इव। चक्रीव। यथा चक्रवर्ती प्रथमोत्पन्नस्य चक्रस्य रथाङ्गरत्नस्य महोत्सवं निर्मापयति। किंभूतस्य सूरेश्चक्रस्य च। आलेख्यं चित्रं शेषमवशिष्टं यस्य तादृशः कृतो निहितः कामः कंदर्परूपो दस्युः शत्रुर्येन। पक्षे नामशेषीकृता व्यापादिताः कामं अतिशयेन शिरश्छेदादिना वैरिणो येन। पुनः किंभूतस्य। महीमहेन्द्रैः पृथ्वीपुरंदरैः महाराजैर्भाविनि भूतोपचारे उपास्यमानस्य चक्रप्रभावादेव चक्री सेव्यते। अतो मुख्यवृत्त्या चक्रमेव सेव्यम्॥

दिदृक्षुरेतन्महिमानमभ्रसरित्सहस्रं दधती मुखानाम्।
यत्रागता किं सितकेतुकाया पुरीं स तां सूरिरलंचकार॥ ८॥

सूरिस्तां सुरत्राणनृपनिर्मापितानेकमहोत्सवबहुलां शिवपुरीनाम्नीं नगरीमलंचकार विभूषयामास। तां काम्। यत्र श्रीरोहिण्यामेतस्य जगज्जनमान्यस्य हीरविजयसूरेर्महिमानं स्वाभाविकमाहात्म्यम्। अथ वा सुरत्राणधरित्रीसुत्रामनिर्मापितानन्यमहोत्सवादिगरिमाणं दिदृक्षुर्द्रष्टुमिच्छुर्विलोकयितुमाकाङ्क्षन्ती सती। अत एव सुराणां पयःप्रवाहरूपवक्त्राणां सहस्रं दशशतीं दधती बिभ्रती। सहस्रमुखी गङ्गेति जनप्रसिद्धिः।

अथेत्यपरप्रारम्भे मेदिनीपुरात्प्रभोः प्रस्थानात्प्राक् पूर्वं भूप प्रति प्रहितः प्रेपितो विमल इति पदमादौ यस्य तादृग्विधो हर्ष इति नाम्रा श्रियोपाध्यायपदशोभया सहितो वाचकेन्द्र एतावता विमलहर्षोपाध्यायः तावत्समय एव फतेपुरे अगाद्गच्छति स्म । जगामेत्यर्थः । किलक्षणः । विदग्धवृन्देन पण्डितमण्डलेनानुयात. । अनुगम्यमान इत्यर्थ. । क इव । सैन्येश इव । यथा चक्रवर्तिना स्वमित्रमिलनार्थं कश्चित्सैन्येन कटकेनानुगतः प्रहित सेनापतिश्चक्रिमित्रनगरे गच्छति । तावत्कुत्र । यावद्वाचयमाना मुनिना सार्वभौमश्चक्रवर्ती यावता समयेन साह्ना नगर पवित्रीकरोति पुनाति । किं कर्तुमिच्छुः । फतेपुर गन्तुमिच्छु श्रीकरीनगरीं यातुकामः । उत्प्रेक्ष्यते—सागरमेखलाया समुद्रपर्यन्तभूमे. वस्वोकसारामिव धनदनगरीमिव ॥ युग्मम् ॥

संस्निह्यतश्चक्षुरिव प्रियं स्वं श्रीपातिसाहिं मिलति स्म पूर्वम् ।
गोष्ठीमनुष्ठाय पुनः सधर्म्यां प्रामोदयत्प्रीतमना महीन्द्रम् ॥ ३८ ॥

स विमलहर्षोपाध्यायः पूर्वं सूरिमिलनात्प्राक् साहिमकब्बरपातिसाहिं मिलति स्म । किमिव । चक्षुरिव । यथा सस्निह्यत स्नेहातिशय बिभ्राणस्य नयन स्वप्रिय निजमनोदयित प्रति गत्वा तदङ्गसगमात्पूर्वमेव मिलति, पुनर्मिलित्वा अनन्तरं धर्म्यां धर्मसबन्धिनीं गोष्ठीं मिथो वार्तामनुष्ठाय कृत्वा प्रीतमना स्वय हृष्टमानस. सन् महीन्द्र पातिसाहिं प्रामोदयत्प्रह्लादयामास ॥

कल्याणवान्कुत्र कियच्च दूरे कदायियासुः पुनरस्ति सूरिः ।
साहिस्तदोदन्तममु मुनीन्दोः स प्राश्नयत्सख्युरिवातिहृष्यन् ॥ ३९ ॥

तदा वाचकमिलनव्यतिकरे हृष्यन् मनसि प्रमोद प्राप्नुवन् साहिरकब्बरो मुनीन्दोर्हीरसूरेरमुमिहैव वृत्ते कथ्यमानमुदन्त समाचार प्राश्नयत्पृच्छति स्म । कस्येव । सख्युरिव । यथा कश्चित्सखा स्वमित्रस्योदन्त प्रश्नयति । तमेवोदन्तप्रश्नमाह—स सूरिः कल्याणवान् कुशलीवर्तते । पुन सूरि कुत्र स्थाने पुरे ग्रामे वा अस्ति । पुन कियद्दूरे विप्रकृष्टे स्थाने वर्तते । पुनः कदा कस्मिन्काले मासे दिने अवसरे वा आयियासुरत्रागन्तुमिच्छुरस्ति ॥

प्रभु· शुभंयुर्वरिवर्ति नीतिशालीव साङ्गानगरं पुनानः ।
वितिष्ठते वर्त्मनि नातिदूरे विभूषितो वर्ष्मणि वार्धकेन ॥ ४० ॥

शनैः शनैः .... ।
.... ॥ ४१ ॥

स साहिर्वाचकेन्द्र विससर्ज पश्चात्प्रेषयति स्म । किं कुर्वाण. । मनो सूरेरागमन स्वपुरे पादावधारण समीहमानो वाञ्छन् । पुन किंभूत । तेनोपाध्यायेनामुना प्रकारेणोक्तो दत्तोत्तर. । इति किम् । हे साहे, प्रभुर्हीरविजयसूरिर्नीत्या न्यायेन सौभाग्ये नैवेद्य ऽ-

श्रीतातपादाः श्रीहीरविजयसूरिचरणारविन्दाः पितृपादाश्च प्रमोदादानन्दोदयात्मना नमस्कृताः। किं कृत्वा। सार्थविपेनेव सार्थपतीभूतेन सुतेनेव पुत्रेणेव प्राक् पूर्वं गुर्जरमालवाना मध्ये वर्तमाना वागडाः। एतावता गुर्जरकच्छमध्यवर्तिनो वागडा निषिद्धाः। तथा अवन्तयो मालवाः, विराटाः मालवदक्षिणान्तरालशालिनो 'वइराड' इति प्रसिद्धाः, तथा खाना लाटदक्षिणवर्तिनः, तथा महा इति पदमादौ येषा तादृग्विधा राष्ट्राः। महाराष्ट्राः इत्यर्थः। 'मरहट्ठ' इति प्रसिद्धाः। इत्यादिष्वपरेषु गुर्जरापेक्षया अन्येष्वपि मण्डलेषु देशेषु सात सुख यथा स्यात्तथा विहृत्य विहार कृत्वा द्रव्योपार्जनकृते बहुजनपदेषु व्यापारार्थं भ्रान्त्वा च पुनर्बहूननेकान् लाभान्पुण्यान्यनेकधनानि चोपात्तअर्जयित्वा। गृहीत्वेत्यर्थः॥ युग्मम्॥

विभूषयद्विन्ध्यधराभृतोऽष्टापदस्य साकेतमिवोपकण्ठम्।
स वाचकेन्द्रानुगतस्ततः श्रीव्रतीश्वरो राणपुरं बभाज॥ १३॥

ततो वाचकागमनानन्तर वाचकेन्द्रेण कल्याणविजयोपाध्यायेनानुगत. श्रिया नगरकलक्ष्म्या कलितो व्रतीश्वरः सूरिः राणपुर नगर बभाज श्रितवान्। पुर किं कुर्वत्। विन्ध्यधराभृतो विन्ध्याचलस्योपकण्ठ समीप विभूषयदलकुर्वाणम्। किमिव। साकेतमिव। यथा अष्टापदस्य कैलाशशैलस्य समीपमयोध्या अलकुरुते॥

अथ धरणविहारः—

विन्ध्याचलं तुङ्गतया वयस्यभावं भजन्तं प्रविभाव्य विद्मः।
गिरीशशैलं मिलितुं समेतं स प्रैक्षतास्मिन्धरणस्य चैत्यम्॥ १४॥

स सूरिरस्मिन् राणपुरे धरणनामव्यवहारिणः चैत्य प्रासाद प्रैक्षत व्यालोकते स्म। अत्रार्थे वयमेव विद्म. जानीमः। तुङ्गतया अत्युच्चैस्तरत्वेन वयस्यभाव मित्रता भजन्तमाश्रयन्तं विन्ध्याचलं प्रविभाव्य विलोक्य। विज्ञायेत्यर्थः। मिलितु समेतमागत सन्तं समेत गिरीशशैल कैलाशपर्वतमिव। अत्र विद्म इवार्थे॥

विनिद्रनीलाञ्जनिकाननेरुवनीविनीलालकशालमाने।
मौलौ प्रणीतं द्रुहिणेन चान्द्रचूडामणीं किं धरणीन्दिरायाः॥ १५॥

चैत्य पुनरुत्प्रेक्ष्यते—धरणीन्दिराया भूमीमण्डललक्ष्म्या मौलौ मस्तके द्रुहिणेन विश्वसृजा प्रणीत विरचित चान्द्राणा चन्द्रकान्तरत्नाना चूडामणीमिव शिखारत्नमिव। किंभूते मौलौ। विनिद्रा विस्मेरा या नीलाञ्जनिकास्तमालतरवः। 'नीलाञ्जनिकाकुसुमकान्तिनि तमसि'। तथा 'निलाञ्जनिकाकुसुमकान्तयः किरातयुवतयः' इतीद द्वयमपि चम्पूकथायाम्। 'नीलाञ्जनिकास्तमाला.' इति तट्टिप्पनके। कृष्णकान्तिवृक्षविशेषाः तेषां वनी कानन तद्वत्ते एव नीला अलकाः केशास्तै कृत्वा शालमाने शोभमाने॥

भूमीन्द्रकुम्भाभिधराणकस्य स्तम्भान्दधानं निजमण्डपान्तः।
अनेकपस्फूर्तिभुवः समज्ञास्तम्भानिवैताञ्छिवगोत्रजैत्रान्॥ १६॥

अथेत्यपरप्रारम्भे मेदिनीपुरात्प्रभोः प्रस्थानात्प्राक् पूर्वं भूपं प्रति प्रहितः प्रेषितो विमल इति पदमादौ यस्य तादृग्विधो हर्ष इति नामा श्रियोपाध्यायपदशोभया सहितो वाचकेन्द्र एतावता विमलहर्षोपाध्यायः तावत्समय एव फतेपुरे अगाद्गच्छति स्म । जगामेत्यर्थः । किंलक्षणः । विदग्धवृन्देन पण्डितमण्डलेनानुयातः । अनुगम्यमान इत्यर्थः । क इव । सैन्येश इव । यथा चक्रवर्तिना स्वमित्रमिलनार्थं कश्चित्सैन्येन कटकेनानुगतः प्रहितः सेनापतिश्चक्रिमित्रनगरे गच्छति । तावत्कुत्र । यावद्वाच्यमाना मुनिना सार्वभौमश्चक्रवर्ती यावता समयेन साह्वा नगरं पवित्रीकरोति पुनाति । किं कर्तुमिच्छुः । फतेपुरं गन्तुमिच्छुः श्रीकरीनगरीं यातुकामः । उत्प्रेक्ष्यते—सागरमेखलाया समुद्रपर्यन्तभूमेः वस्वोकसारामिव धनदनगरीमिव ॥ युग्मम् ॥

संस्निह्यतश्चक्षुरिव प्रियं स्वं श्रीपातिसाहिं मिलति स्म पूर्वम् ।
गोष्ठीमनुष्ठाय पुनः सधर्म्यां प्रामोदयत्प्रीतमना महीन्द्रम् ॥ ३८ ॥

स विमलहर्षोपाध्यायः पूर्वं सूरिमिलनात्प्राक् साहिमकब्बरपातिसाहिं मिलति स्म । किमिव । चक्षुरिव । यथा संस्निह्यतः स्नेहातिशयं बिभ्राणस्य नयनं स्वप्रियं निजमनोवाञ्छितं प्रति गत्वा तदङ्गसंगमात्पूर्वमेव मिलति, पुनर्मिलित्वा अनन्तरं धर्म्यां धर्मसंबन्धिनीं गोष्ठीं मिथो वार्तामनुष्ठाय कृत्वा प्रीतमनाः स्वयं हृष्टमानसः सन् महीन्द्रं पातिसाहिं प्रामोदयत्प्रह्लादयामास ॥

कल्याणवान्कुत्र कियच्च दूरे कदायियासुः पुनरस्ति सूरिः ।
साहिस्तदोदन्तममुं मुनीन्दोः स प्राश्नयत्सख्युरिवातिहृष्यन् ॥ ३९ ॥

तदा वाचकमिलनव्यतिकरे हृष्यन् मनसि प्रमोदं प्राप्नुवन् साहिरकब्बरो मुनीन्दोर्हीरसूरेरमुमिहैव वृत्ते कथ्यमानमुदन्तं समाचारं प्राश्नयत्पृच्छति स्म । कस्येव । सख्युरिव । यथा कश्चित्सखा स्वमित्रस्योदन्तं प्रश्नयति । तमेवोदन्तप्रश्नमाह—स सूरिः कल्याणवान् कुशलीवर्तते । पुनः सूरिः कुत्र स्थाने पुरे ग्रामे वा अस्ति । पुनः कियद्दूरे विप्रकृष्टे स्थाने वर्तते । पुनः कदा कस्मिन्काले मासे दिने अवसरे वा आयियासुरत्रागन्तुमिच्छुरस्ति ॥

प्रभुः शुभयुर्वरिवर्ति नीतिशालीव साह्वानगरं पुनानः ।
वितिष्ठते वर्त्मनि नातिदूरे विभूषितो वर्ष्मणि वार्धकेन ॥ ४० ॥

शनैः शनैः.................................... ।
.... ॥ ४१ ॥

स साहिर्वाचकेन्द्रं विससर्ज पश्चात्प्रेषयति स्म । किं कुर्वाणः । प्रभोः सूरेरागमं स्वपुरे पादावधारणं समीहमानो वाञ्छन् । पुनः किंभूतः । तेनोपाध्यायेनेत्यमुना प्रकारेणोक्तो दत्तोत्तरः । इति किम् । हे साहे, प्रभुर्हीरविजयसूरिर्लीला न्यायेन शीलते शोभते इ-

प्राप्यानुशास्तिं प्रभुतोंऽशुलक्ष्मीं पर्वात्ययाच्चन्द्रमसेव भानोः ।
कल्याणचञ्चद्विजयाभिधानोपाध्यायचन्द्रेण ततो न्यवर्ति ॥ २१ ॥

कल्याणेन चन्द्राजमान विजय इत्यभिधानं यस्य तादृशेनोपाध्यायेषु [illegible] रेण ततः आउआग्रामान्न्यवर्ति पश्चाद्वलितम् । कल्याणविजयोपाध्यायः [illegible] स्येत्यर्थः । किं कृत्वा । प्रभुतः श्रीहीरसूरेरनुशास्तिमाज्ञां शिक्षां [illegible] केनेव । चन्द्रमसेव । यथा चन्द्रेण भानोर्भास्करात्सकाशादंशुलक्ष्मीं ज्योतिः [illegible] प्राप्य पर्वात्ययादमावास्याविरामान्निवृत्यते ॥

ग्रामक्षमाभृद्वनदेशदुर्गानुल्लङ्घ्य दुर्लङ्घ्यभुवो बभाज ।
स मेदिनीनाम पुरं यतीनां पतिर्यथा तक्षशिलां नृपाङ्कः ॥ २२ ॥

स यतीनां पतिः स्वामी सूरिः मेदिनीनाम पुरं मेडताख्यनगरं [illegible] किं कृत्वा । ग्रामा लघुपुराणि संनिवेशा वा, क्षमाभृतः पर्वताः [illegible] सर्वेषां शैलानां 'पञ्जो' इति नाम प्रसिद्धम् । वनानि काननानि, देशा [illegible] राष्ट्रा मण्डलाः, दुर्गा विषमभूमयः कोट्टा वा,ताननुल्लङ्घ्यातिक्रम्य । [illegible] दुःखेन लङ्घयितुं शक्या भुवो भूमयो येषाम् । क इव । [illegible] ग्रामाद्याननुल्लङ्घ्य तक्षशिलां बाहुबलिनगरीं भजति स्म । [illegible] तस्या 'मक्का' इति नाम प्रसिद्धं श्रूयते ॥

मरुस्थलीविक्रमनागपूर्वपुरीगमव्योमगवान्वितेय ।
वैराटशैलोत्तरदक्षिणाख्यश्रेणीनभोगैरिव स प्रणेमे ॥ २३ ॥

[illegible]

[illegible]

[illegible]

मधोः पिकीकान्त इवैष युष्मत्समागमं काङ्क्षति भूमिकान्तः ।
तद्वाचकेनेत्युदितो व्रतीन्द्रः फतेपुरोपान्तभुवं बभाज ॥ ४५ ॥

व्रतीन्द्रो हीरसूरिः फतेपुरस्योपान्तभुवं समीपक्षोणीं बभाज शिश्राय । श्रीकरीपार्श्वे समेत इत्यर्थः । किंलक्षणः । तद्वाचकेन स चासौ यः साहिपार्श्वे गत्वागतो वाचकश्च तेन इत्यमुना प्रकारेण उदितः कथितः । विज्ञप्त इत्यर्थः । इति किम् । हे प्रभो, एषोऽकब्बरनामा भूमिकान्तः पृथ्वीपतिः युष्माकं समागममागमनं काङ्क्षति वाञ्छति । क इव । पिकीकान्त इव । यथा कोकिलवल्लभो मधोर्वसन्तसमयस्य समागमं कामयते ॥ इति फतेपुरसमीपे प्रभोरागमः ॥

अश्रावि संघेन ततः प्रवृत्तिर्जनाननात्सूरिसमागमस्य ।
द्वीपान्तरोपागतपण्यपूर्णपोतव्रजस्य व्यवहारिणेव ॥ ४६ ॥

ततः सूरेः फतेपुरसमीपागमनानन्तरं संघेन श्रीकरीश्राद्धवर्गेण जनानां वर्धापनिकादायकानामाननान्मुखात्सूरेः समागमस्य प्रभोः पादावधारणस्य प्रवृत्तिर्वार्ता अश्रावि श्रूयते स्म । केनेव । व्यवहारिणेव । यथा व्यापारिणा द्वीपान्तरेभ्यः अन्योन्यद्वीपेभ्यः उपागतानां तथा पण्यैः क्रयाणकैः पूर्णानां भृतमध्यानां पोतानां यानपात्राणां गणस्य समूहस्य समागमवार्ता श्रूयते ॥

उपायनीकृत्य नृपैरिवैतन्महीमघोनः कनकांशुकादि ।
तदागमोऽभाष्यत थानसिंहामीपालमानूमुखसंघमुख्यैः ॥ ४७ ॥

थानसिंहो रामाङ्गजसाहिसेवकः, तथा अमीपालोऽपि साहेः प्रतिदिननालिकेरढौकनकृत्, तथा मानूमुखा आद्या येषु तादृशैः संघैः श्राद्धवर्गैः मुख्यैः प्रकृष्टैः श्राद्धैः एतन्महीमघोनः अकब्बरसाहेस्तदागमः सूरेरागमनमभाष्यत प्रोच्यते स्म । किं कृत्वा । नृपैरन्यभूपालैरिव कनकं स्वर्णमंशुकानि वस्त्राणि आदौ यस्य तादृग्वस्तुजातमुपायनीकृत्य ढौकयित्वा ॥

आज्ञां तवासाद्य समग्रभूमीपालाङ्कपङ्केरुहभृङ्गिताङ्घ्रेः ।
कुर्मो जिनस्येव वयं प्रवेशमहं मुनीन्दोर्महनीयकीर्तेः ॥ ४८ ॥

समग्राः समस्ता ये भूमिपाला राजानस्तेषामङ्क उत्सङ्गः स एव पङ्केरुहं पद्मं तत्र भृङ्गितौ भ्रमराविवाचरितौ अङ्घ्री चरणौ यस्य तत्संबोधनम् । हे साहे, तवाज्ञामादेशमासाद्य संप्राप्य वयं त्वदीया महाजनजनाः श्रावकाश्च महनीया जगज्जनश्लाघ्या कीर्तिर्यशो यस्य तादृशस्य तीर्थकरस्येव मुनीन्दोः श्रीमदाहूतश्रीहीरविजयसूरेः प्रवेशस्य फतेपुरमध्ये समागमनस्य महमुत्सवं कुर्मः ॥

प्रभोर्निपीयोपगमं प्रमोदप्रोत्फुल्लवक्त्राम्बुरुहो महीन्द्रः ।
सुधां स्वगाम्भीर्यजिताब्धिनेवोपदीकृतामुच्चरति स्म वाचम् ॥ ४९ ॥

नहारे केन्तो.................................. ।

.... ॥ ११ ॥

.... ।

.... ॥ १२ ॥

सघः आगराफतेपुरश्राद्धसमुदायो मुनीन्दोर्हीरविजयसूरेरभिमुखं प्रतस्थे प्रचलति स्म। किं कुर्वन्। अकुण्ठामत्यभ्यधिकामुत्कण्ठामौत्सुक्यमस्यास्तीत्युत्कण्ठी तस्य भाव उत्कण्ठिता तामाकलयन्दधत्। क इव। कूलकषाकान्त इव। यथा कूलं मर्यादाभूमीं कषन्ति विलिखन्ति पातयन्तीति कूलकषा नद्यस्तासां कान्तो भर्ता समुद्रो वृद्धा वृद्धिं प्राप्ता उपचिता ये कल्लोलास्तरङ्गास्तैः शालते शोभते इत्येवंशीलः सन् रजनीश्वरस्य विधोरभिमुखं प्रतिष्ठते॥

सुवर्णकायानतिवातवेगान्वीङ्खाविशेषैः क्षितिमस्पृशन्तः।
कृष्णा इवाध्यारुरुहुर्वहन्तः श्रियं हरीन्केचन चक्रहस्ताः॥ ५४॥

केचन जनाः हरीनश्वानारुरुहुः अध्यासामासुः। के इव। कृष्णा इव। यथा नारायणा हरीन् गरुडानारोहन्ति। किं कुर्वन्तो जना नारायणाश्च। वहन्तो धारयन्तः। काम्। श्रियम्, विविधवस्त्राभरणादिशोभां लक्ष्मीं च। उभयेऽपि कमलां कलयन्तो वा। पुनः किंभूताः। चक्रं रथाङ्गमाकृत्या मूर्तिमद्वा सुदर्शनं हस्ते पाणौ येषाम्। किंलक्षणान् हरीन्। सुशोभनो वर्णो रक्तपीतश्वेतादिको येषाम्। यदुक्तं हैम्याम्—'सिते तु तत्र कोकाहो खोङ्गाहः श्वेतपिङ्गले। पीयूषवर्णे सेराहः पीते तु हरयो हये॥ कृष्णवर्णे तु खुङ्गाहः किंयाहो लोहितो हयः। आनीलस्तु नीलकोऽत्र त्रियूहः कपिलो हयः॥' इत्यादिवचनात्। पक्षे। स्वर्णकायास्तन्मयत्वात्। यदुक्तं हैम्याम्—'पक्षिस्वामी काश्यपी स्वर्णकायः' इति। पुनः किंभूताः। अतिक्रान्ता वातानां पवनानां वेगो यैर्द्वयेऽपि। पुनः किंभूताः। वीङ्खानां धौरित-वल्गित-प्लुति-उत्तेजित-उत्तरिताभिधानानां धारागतीनां विशेषैरतिशयैर्विविधप्रकारैर्वा। 'धौरितं वल्गितं प्लुत्युत्तेजितोत्तरितानि च। गतयः पञ्च धाराख्यास्तुरङ्गाणां क्रमादिमाः॥' इति हैम्याम्। क्षितिं क्षोणीमण्डलमस्पृशन्तः पादैर्न संघट्टयन्तः शीघ्रगामितया। अथ वा उत्तालफाललसितैर्भूर्मी स्पृशन्तोऽपि न दृश्यन्ते। यदुक्तं नैषधे—'दृगङ्गेयकेवलनभःक्रमणप्रवाहैर्वाहैरलुप्यत सहस्रदृगर्वगर्वः' इति। पक्षे खगतया॥

वभुर्विभूषांशुतडिद्वितानान्गर्जोर्जितस्पन्दिमदाम्बुधारान्।
शक्रेण कायाः कुतुकात्कृताः किं यानाम्बुदान्केचिदिभान्भजन्तः॥५५॥

केचिज्जनाः वभुः शुशुभिरे। किं कुर्वन्तः। इभान् हस्तिनो भजन्तोऽध्यारोहन्तः। उत्प्रेक्ष्यते—कुतुकात्कौतूहलात् शक्रेण कायाः स्वशरीराणि किं कृताः। किं कुर्वन्तः कायाः। यानानि वाहनीभूतानम्बुदान्मेघानाश्रयन्तः। 'संक्रन्दनाखण्डलमेघवाहनाः' इति हैम्याम्। इभानम्बुदांश्च किंलक्षणान्। विशिष्टा भूषा आभरणानि तेषामंशवः किरणा एव तडितो विद्युतां वितानं वृन्दं येषां तान्। 'विनैव भूषामवधिः श्रियामसौ' इति नैषधे। 'भूषा आभरणानि' इति तद्वृत्तिः। विशिष्टा शोभा येषां तादृशा अंशवो यासां तादृग्विधानां सौदामिनीनां मण्डलं येषु। गर्जाभिर्गर्जारवैः कृत्वा उभयेऽप्यूर्जिताः प्रबलाः स्पन्दन्ति क्षरन्ति इत्येवंशीला मदा दानानि त एवाम्बूनि जलानि तेषां धाराः

भट्टारकेन्द्रो·· ।
·· ॥ ३३ ॥
·· ।
·· ॥ ३४ ॥ (युग्मम्

असौ भट्टारकाणामिन्द्रः पुनर्द्वितीयवारं पूर्वप्रस्थापनापेक्षया तूर्णं शीघ्रं [illegible] दिनीपुराभिधानान्नगरादेतं पूर्वोक्तं वाचकवासवं विमलहर्षोपाध्यायं पुरोऽ[illegible] प्रहिणोति स्म । किं कर्तुम् । क्षितीन्द्रमकब्बरराजमपि पुनरात्मना [illegible] साहेर्निजस्याकारणाभिप्रायं किमर्थमहमाकारितोऽस्मीति साहिमनःपरिणाम [illegible] नबोद्धुम् । किंलक्षणम् । वाचकवासवम् । श्रिया शोभया कलितो योऽसौ सी[illegible] भूतेन राजन्ती शोभमाना विमल इत्याद्या नाम यस्य तादृशेन [illegible] शेरारेण श्रीसीहविमलप्रज्ञाशेन युक्तं सहितम् । उत्प्रेक्ष्यते—साक्षात्[illegible] बृहस्पतिनेव शक्रोऽपि तावद्वाचस्पतिना संयुक्त एव स्यादिति । [illegible] उत्प्रेक्ष्यते—प्रज्ञा स्वप्रतिभा सैवात्मदर्शो दर्पणं तत्र प्रतिबिम्बिता [illegible] विशे समस्ता विशेषा वा त्रयाणां जगतां पदार्थानां सार्थाः समूहा [illegible] मात्मीयं प्रधानमिव मन्त्रिणमिव ॥ युग्मम् ॥ इति [illegible]दिनीपुरा[illegible] वाचकप्रस्थापनं च ॥

प्रतिष्ठमानस्य ततो व्रतीन्दोः पदे पदे पौरपरम्पराभिः ।
महामहश्री समतानि मानोरहःसमूहैरिव शारदीनैः ॥ ३५ ॥

ततो [illegible]नगरात्प्रतिष्ठमानस्य प्रस्थानं कुर्वतः । [illegible] पदे पदे स्थाने पुरनगरग्रामादौ पौराणां नागरिकाणां [illegible] श्रीरतिमहोत्सवश्री [illegible] शोभा समतानि [illegible] दीनैः शरत्काल[illegible] [illegible] श्री [illegible] [illegible] यथा—'[illegible]' [illegible] [illegible] [illegible]

[illegible]

[illegible] ॥ ३६ ॥

[illegible]

[illegible]

उत्प्रेक्ष्यते—पितुरिन्द्रस्य वाहमुच्चैःश्रवसमारुह्य [illegible] अनेका मनसो मूर्तयो [illegible] यस्य । वाहा अपि अनेका इन्द्रस्य विद्यन्ते । यदुक्तं रघुवंशे—'[illegible] निर्दरि विदित्वा हरिभिन्न वाजिभिः' इति वाजिबाहुल्यम् । [illegible] नाद्युपलक्षणादन्यवर्ण[illegible]नोऽपि समाप्यन्ते । अत्र च [illegible] । अनेकमूर्तित्वेन जयन्तस्यारोहणान्ता अप्यनेक जाता एव । अत्र [illegible] गम निषेलन् क्रीडन् । भिन्ना अप्यनेकवर्णा [illegible] समाप्यन्ते । [illegible] गुर्जयदत्ततामेव ॥

तदा कुमारीभिरभाभि भास्वन्मुक्तामणीस्वर्णविभूषणानि ।
इवानुजाभिः सुरराजसूनो रिरंसयोर्वीतलमागताभिः ॥ ८० ॥

तदा तस्मिन्व्यतिकरे भास्वन्ति दीप्यमानानि मुक्तानां [illegible] फलानां मणीनां कर्कतनपद्मरागेन्द्रनीलहीर[illegible] [illegible] पलकाना विभूषणान्याभरणानि यासां तादृशीभि कुमारीभि[illegible] [illegible] लिकाभिरभाभि शुशुभे । उत्प्रेक्ष्यते—रिरंसया [illegible] भूमण्डल [illegible] सेवन्ते इत्येवंदाक्षाभि सुरराजसूनोः [illegible] निरिव । [illegible] सम क्रीडां कर्तुं [illegible] तद्दर्शनोत्पन्न[illegible] [illegible] कृताभिः अनेकाभिर्मूर्तिभिरिवेत्यर्थः । [illegible] ॥

परम्पराभिः पुरसुन्दरीणां राजी [illegible] ।
मध्ये मुनीन्दोः शरदीव राजमराल[illegible] ॥ ८१ ॥

मुनीन्दोः सुरेर्मध्ये [illegible] पुरसुन्दरीणां परम्पराभि [illegible] [illegible] राजमराल[illegible] ॥

भूपामणि[illegible] ।
[illegible] ॥ ८२ ॥

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

भामिति शब्दं कुर्वन्तीति भाकारिण्यस्तादृश्यो भेर्यो दुन्दुभयः अतिलम्बास्ताम्रमया तद्युक्ता या निनदन्त्यः शब्दायमानाः नफेर्यः पित्तलमया विचित्ररचनावत्यः सुख-वाद्या वादित्रविशेषास्ताः कर्णातिथीकृत्य स्वश्रवणानां प्राघुणीः प्रणीय । श्रुत्वेत्यर्थः । कुत्सितः सिद्धान्तविरुद्धः पक्षः स्वीकारो येषामेतावता कुमतभाजाम् अथवा मिथ्या-दृशां लक्षैः परोलक्षैः निर्घोषो नितरां घोषः कटत्कारः भयानकगर्जितं विद्या तया युता निर्घोषिण्यः ताश्च ता वर्षाश्च प्रावृषः तासाम् । वर्षाशब्दस्य बहुवचनान्तत्वात् । शरभीबभूवे । अष्टापदीभावं भेजे । वर्षासु मेघगर्जितं निशम्य शरभा उत्पत्योत्पत्य भूमौ पतित्वा म्रियन्ते । तथा भेरीनफेरीशब्दानाकर्ण्य कुपाक्षिका अपि मृतप्राया इव जायन्ते स्म । किं कुर्वती नफेरीः । नादैः स्वाद्वैतशब्दैर्दिगन्तानपि निखिलहरितामवसानगह्वराण्यपि पूरयन्तीर्निर्भरं भरन्तीः ॥

संध्याद्रुहः केऽप्यवहन्विहायोलिहः शयाम्भोरुहि वैजयन्तीः ।
प्रकाशयन्तः प्रति मुक्तकान्तं मूर्तानुरागानिव रन्तुकामाः ॥ ९७ ॥

केऽपि भव्या अनुचरा वा शयाम्भोरुहि करकमले । एकवचनं जातिवाचित्वात् । पाणि-पद्मेष्वित्यर्थः । वैजयन्तीः पताका अवहन् धारयन्ति स्म । उत्प्रेक्ष्यते—रन्तुकामाः क्रीडितुमिच्छव सन्तः मुक्तकान्तं सिद्धवधूं प्रति मूर्ताननुरागानिव प्रकाशयन्तः प्रकटीकुर्वन्त इव । किंभूता वैजयन्तीः । संध्यां संध्यारागश्रियं रक्ततया द्रुह्यन्तीस्तस्य स्पर्धिनीः । पुनः किंभूताः । विहाय आकाशं लिहन्ति स्पृशन्ति इति गगनमण्डलो-ल्लेखिनीः । अतितुङ्गा इत्यर्थः ॥

मृगीदृशः काचन शातकौम्भान्कुम्भाञ्शिरोभिर्बिभरांबभूवुः ।
प्राक्स्वगृहीतां सुषमां स्तनेभ्यः पश्चाज्जिघृक्षूनुपजग्मुषः किम् ॥ ९८ ॥

काचन मृगीदृशः सधववध्वः शिरोभिरुत्तमाङ्गैः कृत्वा शातकौम्भान् स्वर्णमयान्कु-म्भान् कलशान्बिभरांबभूवुः बिभ्रति स्म । उत्प्रेक्ष्यते—प्राक् पूर्वं स्वामात्मीयां गृहीतां पराभूयोपात्तां सुषमां सातिशायिनीं स्तनेभ्यः युवतीप्रौढपयोधरेभ्यः सकाशात्कथ-चनानुनयादिना पश्चाज्जिघृक्षून् ग्रहीतुमिच्छून् । किंभूतान् । उपजग्मुषः आगतानिव ॥

रौप्यानिपा नीलकजापिधाना मूर्धस्वधीयन्त तदा पराभिः ।
महामहं तं क्वचनाप्यदृष्टं द्रष्टुं मृगाङ्काः किमुपेयिवांसः ॥ ९९ ॥

तदा तस्मिन्प्रभुप्रवेशोत्सवे पराभिरन्याभिः पद्मवदनाभिः रौप्या रजतनिर्मिता निपाः कलशा मूर्धसु मस्तकेष्वधीयन्त ध्रियन्ते स्म । किंलक्षणाः । नीलकजस्य इन्दी-वरस्य अपिधानमाच्छादनं येषु । 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः' अस्मादत्र विकल्पो ग्राह्यः । तेनावगाहो वगाहश्च, अपिधानं पिधानं चेति । तदेव नैषधे-ऽप्याह—'व्रजति कुमुदे दृष्ट्वा मोहं दृशोरपिधायके' इति । उत्प्रेक्ष्यते—क्वचनापि कुत्रापि स्थाने अदृष्टं न नयनाभ्यां निभालितं तं जगदद्वैतमहामहमतिशायिनमुत्सवं द्रष्टुं

महेन्द्र' साहिरांतोमनुसरन्ति स्म स्मा । अथ च—आत्मनो गाम्भीर्य ग-म्भीरतया जितेनाब्धिना सम्फ्रेण उपाधिकृता भूमि । किम्भूतः महेन्द्र । प्रमोदेन-हर्षेण उत्कृष्ट निकटेन तत मुरामेना सुन्दर कमल यस्य । इत कृता । प्रमो' सुर-न्दरागन पारावारण निरीन भाद्र कृता ॥

यस्मिन्महाश्चर्यरसे निमग्नीभूता त्रिलोकीजनता यथा स्यात् ।
निर्निर्मिमीश्व तमिह प्रवेशमहं महीयांसमहो मुनीन्द्रो ॥ ९० ॥

अहो इति संबोधने । हे श्राद्धाः, अहं सम्फतेपुरस्थो मुनीन्द्रो सूरिराजस्त जगति विख्यातिभाजं महीयांसं गुर्वागमत्वाद्गरिष्ठम्। तोरणादिनिबन्धनाकरणादिभिरतिमहान्तं प्रवेशस्य महमुत्सवं । तथा तेन प्रकारेण निर्मिमीध्व कुरुध्वम्। तथा कथं न कथं च। यथा येन प्रकारेण त्रिलोकीजनता त्रैलोक्यलोकनिकरः यस्मिन्प्रवेशमहोत्सवे महानतिशायी य आश्चर्यरसः विस्मयातिरेकस्तस्मिन्निमग्नीभूता निलीयस्थीयमाना ब्रूडितेव स्यात्। अत्र गर्भितोत्प्रेक्षागो ॥

गिरं वरेन्दोर्हृदये निधाय नालीकनेत्रामिव नैगमास्ते ।
वाचस्पतेर्गोचरयन्ति वाचो न या कदाचिन्मुदमादधुस्ताम् ॥ ९१ ॥

ते नैगमा वणिजः श्राद्धास्तामसाधारणां मुदं प्रमोदं दधुर्धारयन्ति स्म । यां मुदं वाचस्पतेः सुराचार्यस्यापि वाचो वचनरचनाः कदाचित्कस्मिन्नपि प्रस्तावे गोचरयन्ति विषयीकुर्वन्ति । गुरुगिरोऽपि या वक्तुं न प्रभवन्तीत्यर्थः । किं कृत्वा । नालीकनेत्रां प्रफुल्लकमललोचनामिव वरेन्दोरकब्बरस्य वसुधाविधोर्गिरं वाणीं हृदये निधाय हृदयं मनो वक्षश्च तस्मिन् स्थापयित्वा वक्षसि वनिता निधीयते मनसि वागवधार्यते च ॥ इति सूरेः प्रवेशोत्सवकरणार्थं साहेर्विज्ञप्तिस्तदादेशप्राप्तिश्च ॥

निवृत्य पृथ्वीपुरहूतपार्श्वात्संघस्य चाथाकथयन्नुदन्तम् ।
सोऽपि प्रसर्पत्प्रमदामृताब्धौ मराललीलायितमाततान ॥ ९२ ॥

अथ साहिनाज्ञाप्रदानानन्तरं स्थानसिंहादयः श्राद्धाः पृथिवीपुरहूतस्य साहेः पा-र्श्वान्निवृत्य पश्चाद्वलयित्वा संघस्य समग्रश्राद्धश्रीद्राजनवर्गस्य उदन्तं भूपतिसंबन्धिनं वृत्तान्तमकथयन्निवेदयन्ति स्म । पुन संघोऽपि । श्रुत्वेत्यध्याहार्यम् । प्रसर्पन्वर्धमानो यः प्रमोदो हर्षः स एवामृताब्धिः क्षीरसमुद्रस्तस्मिन्मराललीलायितं राजहंसविलसितमा-कुरुते स्म । 'हंसासाहतपद्मरेणुकपिशक्षीरार्णवाम्भोभृतैः' इति ख्यातत्वात्सुता । मान २ ३ । व बभारेत्यर्थः ॥

अथ फतेपुरसंघस्य संमुखगमनारम्भः—

संघः प्रतस्थेऽभिमुखं मुनीन्दोरुत्कण्ठितामाकलयन्नकुण्ठाम् ।
कूलंकषाकान्त इव प्रवृद्धकल्लोलशाली रजनीश्वरस्य ॥ ९३ ॥

केऽपि जनास्तत्समये वनप्रदेशा विपिनभूमिभागा इव अलावू तुम्बिनीलता तुम्बकं च विशेषेणालम्बन्ते आश्रयन्ते इत्येवशीला वशा वेणवो येषा येषु वा अमृतीयुक्ताः केवलतुम्बकेन तन्त्रीवादका वा आसन्। तथा केचिज्जनास्तालधरा विशिष्ट रवन्ति ध्वनन्तीत्येवशीला विराविणस्तादृशास्ताला स्वस्वपुटाः सशब्दतालद्रुमा वा येषा येषु वा। 'अभ्यभूयत वाहाना चरतो गात्रशिञ्जितैः। मर्मरं पवनोद्धूतराजतालीवनध्वनिः ॥' इति रघौ। इदानीमपि शुष्कपत्रास्तालतरवः सशब्दा दृश्यन्ते च। केचिज्जनाः मुकुन्दाः कृष्णा इव कम्बुः सामान्यः शङ्खः पाञ्चजन्यश्च हस्ते पाणौ येषा तादृग्विधा बभूवुः। तथा केचित्पुरुषा गणा ईश्वरसेवकदेवविशेषा। 'प्रमथाः पार्षदा गणा' इति हैम्याम्। ते इव वीणा विपञ्ची। तथा 'गणना तु प्रभावती' इति हैमीवचनात् प्रभावतीनाम्नी वल्लकी करे हस्ते येषा तादृशा आसन्नभूवन्॥

अपूरयन्केऽपि तदा त्रिरेखान्हंसायमानान्मुखपङ्कजाङ्के।
चिघ्नाधिपं किं विधृतावधानं जिघांसया विघ्नततेः सृजन्तः ॥ ७४ ॥

केऽपि शाङ्खिकाः शङ्खवादकाः तदा तस्मिन्व्यतिकरे त्रिरेखान्कम्बूनपूरयन् प्राणवातैः पूरयन्ति स्म वादयामासुः। किंभूतान्। मुखमेव पङ्कज कमल तस्याङ्के उत्सङ्गे हंसायमानान् मरालानिवाचरतः। उत्प्रेक्ष्यते—विघ्नाना प्रत्यूहाना ततेर्धोरण्या जिघांसया हन्तुमिच्छया विघ्नाधिपं विनायक विधृतावधान दत्तज्ञानोपयोगम्। सावधानमित्यर्थः। किंभूताः। सृजन्तः कुर्वन्त इव ॥

गीतिं जगुः केचन रासकांश्च सूरेर्यशः केऽपि जयारवांश्च।
कैश्चिन्मुदानर्ति तमोऽप्यकर्ति प्रावर्ति पुण्ये कुपथान्यवर्ति ॥ ७५ ॥

केचन जना गान्धर्विका गीतिं मधुरध्वनिं गान जगुर्गायन्ति स्म। केचन रासकगायका रासकान् जन्मदिनादारभ्य सूरिपदैश्वर्यपर्यन्तान् रासान् प्राकृतभाषया चरित्रप्रबन्धान् विविधपूर्वपुरुषावदातान्वा जगुः। 'कै गै रै शब्दे' इति धातोः। कथयन्ति स्म गायन्ति इव। केचित्स्तुतिव्रता पुरुषाः सूरेर्भट्टारकस्य यशः जगज्जनजेगीयमाना कीर्तिं गायन्ति स्म। केऽपि मङ्गलपाठका जयारवान् जयजयेति शब्दानुदीरयन्ति स्म। पुनः कैश्चिन्नर्तकैः अनर्ति नृत्यं चक्रे। कया। मुदा प्रमोदाधिक्येन। अपि पुनस्तमः स्वाज्ञानं निजपापं वा अकर्ति मूलाच्छेदितम्। पुनः कैश्चिद्द्रविकैः। पुण्ये इदं सर्वमप्युत्सवादिकं पुण्याधीनं तदैहिकामुष्मिककामिवत्तत्तदेव कुर्म इति पुण्यविषये प्रावर्ति प्रवर्तितम्। अत एव कुपथादुन्मार्गान्न्यवर्ति गुरुभक्तीभूतमन्यैर्वा तन्माहात्म्यावलोकनान्मिथ्यादृशा कुपक्षाणा वा मार्गान्मताद्व्यातिवर्तितम्॥

खुरैरखानि प्रचलत्तुरङ्गैर्धात्री खनित्रैः खनकैरिवात्र।
गलन्मदाम्भोभिरिभैरिवाम्भोधरैर्धरा पङ्किलयांबभूवे ॥ ७६ ॥

प्रयाता येषु स्पन्दन्ति निर्गच्छन्ति [illegible] बहिःस्थोऽन्यत्र [illegible]
निता । अथ वा प्रोन्मत्तसिन्धुर [illegible] इति [illegible]
[illegible] युक्ता [illegible] येषाम् । 'मदो रेतस्यहंकारे मद्ये [illegible] । [illegible]
[illegible] इत्यनेकार्थे । [illegible] ॥

रथ्यैः सनाथान्मणिशातकुम्भसंदर्भगर्भान्रथिभिः श्रिताह्नान् ।
मरुद्वशान्स्वःसदना इवात्र व्यभूषयन्केऽपि पुनः शताङ्गान् ॥ १६ ॥

अत्र संमुखागमनोत्सवे पुनः केऽपि जनाः शताङ्गान् रथान् व्यभूषयन् अलंकुर्वन्ति स्म । किंभूतान् । रथ्यैरश्वैस्तुरगैः सनाथान् सहितान् । पुनः किंभूतान् । मणीनां नानाविधरत्नानां शातकुम्भानां स्वर्णानां संदर्भो रचना गर्भे मध्ये येषाम् । पुनः किंभूतान् । रथिभिः रथारोहिभिः श्रितः सेवितः अह्नः उत्सवो येषाम् । के इव । स्वःसदना इव । यथा देवा मरुद्वशान् दिव्यस्यन्दनान् विभूषयन्ति ॥

स्थलप्रफुल्लन्नवहैमपद्मलेखाविभूषामिव लम्भयन्तः ।
क्रमद्वयीचङ्क्रमणक्रमेणालंचक्रिरे केचन वार्धिकार्वीम् ॥ १७ ॥

केचन जनाः क्रमयोश्चरणयोर्द्वयी तया यच्चङ्क्रमणं प्रचलनं तस्य क्रमेण परिपाट्या वार्धिकार्वी भूमीमलंचक्रिरे भूषयन्ति स्म । उत्प्रेक्ष्यते—स्थले जलातिरिक्तप्रदेशे प्रफुल्लन्ति विजृम्भमाणानि नवानि प्रथमप्ररूढानि हैमानि कनकसंबन्धीनि पद्मानि कमलानि तेषां लेखाः श्रेणयस्तासां विभूषा शोभा लम्भयन्तः प्रापयन्त इव । 'उत्फुल्लस्थलपद्मानं भवचरणभूषिता' इति चम्पूकथायाम् ॥

दधुस्तदा जन्मजुषो विभूषां भूषाविशेषान्वपुषा वहन्तः ।
श्रिया जितेनामरसद्मनेवोपदीकृताः स्वीयसुरा नगर्याः ॥ १८ ॥

तदा तस्मिन्नवसरे जन्मजुषो मनुष्या विभूषामलंकारादिकं दधुर्धारयन्ति स्म । किं कुर्वन्तः । वपुषा शरीरेण भूषाणां शोभानां विशेषानतिशयान् वहन्तः दधतः । उत्प्रेक्ष्यते—श्रिया लक्ष्म्या कृत्वा जितेनाभिभूतेन अमरसद्मना स्वर्गेण नगर्याः श्रीकर्णाः स्वीया आत्मीयाः सुरा देवा उपदीकृता ढौकिता इव ॥

आरुह्य वाहं पितुरिन्द्रसूनुः स्निग्धैर्निखेलन्किमनेकमूर्तिः ।
पर्याणितप्रौढहयाधिरूढाः शृङ्गारिता भान्ति तदा कुमाराः ॥ १९ ॥

तदा तस्मिन्प्रस्तावे शृङ्गारो वस्त्रालंकारादिवेषः संजात एषामिति शृङ्गारिताः । अथ वा शृङ्गारसहितान्कुर्वन्तीति शृङ्गारयन्ति शृङ्गार्यन्ते स्मेति शृङ्गारिताः कुमारा भान्ति शोभन्ते । किंलक्षणाः । पर्याणं पल्ययनं जातमेषामिति पर्याणिताः । पर्याणयुक्तं कुर्वन्तीति पर्याणयन्ति पर्याण्यन्ते स्मेति पर्याणिता वा तथा प्रौढाः प्रगल्भाः पुरुषप्रमाणा वा हया अश्वास्तानधिरूढाः । 'जवेऽपि मानेऽपि च पौरुषाधिकम्' इति नैषधे।

कुम्भैः कनककलशैः सह तडिता विद्युता विलासेन विलसितेन लीलया वा वर्तते यत्तम्। पुनः किंभूतम्। रजोभिरुड्डीनधूलीभिरभ्राणि वार्दलकानि 'आभला' इति प्रसिद्धान्यङ्के क्रोडे मध्ये यस्य तम्। पुनः किंभूतम्। तूराणां विविधवादित्राणां स्वरैर्निःस्वनैरुदिता प्रकटीभूता गर्जा गर्जितं गम्भीरध्वनिर्यत्र ॥

उद्धर्षनिध्यानधृतावधानसौधाग्रजाग्रत्पुरसुन्दरीणाम् ।
वीथी दिवो वक्त्रसहस्रपत्रैः सहस्रचन्द्रेव तदा दिदीपे ॥ ८० ॥

तदा तस्मिन्नुत्सवसमये उद्धर्षस्य प्रभुप्रवेशमहोत्सवस्य । 'क्षणोत्सवोद्धवोद्धर्षम्' इति हैम्याम्। निध्याने निरीक्षणे धृतं स्थापितमवधानं मनोध्यानं वा याभिस्तथा सौधानां स्वस्वगृहाणामग्रे शिखरे उपरि जाग्रतीनां सावधानतयोपविष्टानां स्थितानां वा पुरसुन्दरीणां श्राद्धव्यतिरिक्तनगरनारीणां वक्त्रसहस्रपत्रैः वदनकमलैः कृत्वा दिवो वीथी गगनपद्धतिः सहस्रं दशशतीसंख्याकाः सहस्रशो वा चन्द्रा इन्दवो यस्या तादृशीव दिदीपे शोभते स्म ॥

असर्जि सृष्टिर्विधिना नवा किं गर्भाद्भुवो वा किममी निरीयुः ।
समं निपेतुः किमुताम्बराद्वा विज्ञैर्जनान्वीक्ष्य तदेत्यतर्कि ॥ ८१ ॥

तदा तस्मिन् संघस्य सूरिसंमुखसमागमनसमये प्रमाणातीतान् जनान् लोकान् वीक्ष्यावालोक्य विज्ञैर्विशेषेण विचारचतुरैः इत्यमुना प्रकारेण अतर्कि विचार्यते स्म । इति किम्। विधिना सृष्टिकर्त्रा किं नवा अपरा नवीना सृष्टिर्विश्वनिर्मितिः कृता। वाथ वा अमी जना भुवो भूमेर्गर्भान्मध्यात्किं निरीयुः निर्गताः। उताथ वा अम्बरादाकाशात् समं एककालमेतावन्तो निपेतुः निपतिताः ॥

नभोम्बुपानब्द इवानधीतार्थनान्सृजन्नर्थिजनान्परेषु ।
स्वगौरवैर्वीवहनप्रणीतसंशीतिशेषः स चचाल संघः ॥ ८२ ॥

स फतेपुरसत्कः संघो जनसमुदायः । 'संघसार्थौ तु देहिनाम्' । चचाल सूरिसंमुखं प्रतिष्ठते स्म । किंभूतः । स्वस्यात्मनो गौरवेण हास्तिकाश्वीयरथकट्यादिजनितातिभारेण युक्ताया उर्व्या भूमेर्वहने धारणे प्रणीता विहिता संशीतिः संशयो येन । हा मया अतिभारवतीयं जगती कथं वहिष्यते इति संशीतिं तादृशः शेषो नागाधिराजो यत्र । संघः किं कुर्वन्। परेष्वन्यवदान्यजनेषु विषये न अधीता पठिता अभ्यस्ता वा अर्थना याचना यैः तादृशानर्थिजनान् याचकलोकान् सृजन् कुर्वन्। क इव। अब्द इव। यथा वारिदो नभोम्बुपान् नभस्तो वर्षद्धारीदात्पततप्रोच्चैः कृतप्रसारितचञ्चुपुटान्तरायातमम्बु पिबन्तीति नभोम्बुपान् चप्पीहान्। तत एवोक्तम्—'एक एव खगो मानी चिरं जीवतु चातकः । पिपासितो वा म्रियते याचते वा पुरंदरम् ॥' इति । परेषु व्यतिरिक्तजनाशयेषु विषये निर्मुक्तार्थनान्करोति ॥

तदा तस्मिन्नुत्सवे पुरः पुरस्तात्सभाग्रे तुरगा अश्वा ननृतुः स्म । सारङ्गैर्गपालादि-
शृङ्गारिताः अनधिरूढनरा लोके 'जलमतीघोडा' इति प्रसिद्धाः । ते पुरतः प्रचे-
उच्चैःश्रवस इन्द्राश्वस्य अनुनिम्नाः प्रतिकृतय इव । किं कुर्वाणाः । विधुना चन्द्रेण स-
सगर्भभावं भ्रातृताम् । 'सगर्भसहजा अपि' इति हैम्याम् । तुल्यवर्णेन समुद्रोत्पन्नत्वेन च
चन्द्रोच्चैःश्रवसो तथा । पुनः किंभूताः । सारस्वताः काश्मीरदेशोद्भवाः । तथा नव-
सम्यग्लक्षणयुक्तत्वेन मनुष्यैर्निषेव्याः उपास्यमानाः । पक्षे सरस्वति समुद्रे । 'यादः-
स्रोतो नाथो नदीशः सरस्वान्' इति हैम्याम् । भवः सारस्वतः । तथा अमर्त्यैः इन्द्राद्यैर्देवैः
संसेव्यमानाः । ततोऽत्र कर्मधारयः ॥

यस्मिञ्जयन्त्यः कलकण्ठकण्ठाञ्जगुः समुत्कण्ठितकम्बुकण्ठ्यः ।
सिद्धाङ्गनाः स्वर्गिगिरेर्धरायां गुणान्गणीन्दोरिव गातुमेताः ॥ ९४ ॥

यस्मिन्महोत्सवे समुत्कण्ठिताः गुरुगुणान् गातुं सम्यक् त्रियाप्युत्कण्ठा आलुत्व
जातमासामिति समुत्कण्ठिताः । कम्बुकण्ठ्यः सलक्षणलक्ष्मीवन्मृगाक्ष्यः जगुर्मधुरं गायन्ति
स्म । किं कुर्वन्त्यः । कलकण्ठानां कोकिलानां कण्ठान् ध्वनीन् जयन्त्यः । 'कण्ठो
ध्वनौ सनिधाने ग्रीवायां मदनद्रुमे' इत्यनेकार्थः । उत्प्रेक्ष्यते—गणीनां साधूनां
ऽधीतानामिन्दोश्चन्द्रस्य सूरीन्द्रस्य गुणान् गातुं गानगोचरीकर्तुं स्वर्गिगिरेर्मेरुपर्वतात्
आगताः सिद्धा देवविशेषास्तेषामङ्गनाः स्त्रिय इव । किं च किंनरसिद्धाङ्गना एव गा-
प्रसिद्धिभाजः । यदुक्तं भोजप्रबन्धे—'देव त्वं जय कास्ति लुब्धकवधूर्हस्ते किमेतत्
क्षामं किं सहजं ब्रवीमि नृपते यद्यस्ति ते कौतुकम् । गायन्ति त्वदरिप्रियाश्रुतटिनीत-
रेषु सिद्धाङ्गना गीतान्धा न तृणं चरन्ति हरिणास्तेनामिषं दुर्बलम् ॥' इति । तथा
'यस्मिन्नासन्नसारङ्गाः सारं गायति किंनरी' इति चम्पूकथायाम् । किं च । मेरुः सुरावास
सर्वेषामपि देवानां साधारणवासत्वात्सिद्धानामप्यावासः । ततस्तत आगमनं युक्तमेव ।

द्विपैर्व्यतायन्त पटिष्ठघण्टाटङ्कारवाव्याहतबृंहितानि ।
महीतलोद्वासितदुर्नयस्य प्रस्थानढक्काक्वणितानि मन्ये ॥ ९५ ॥

द्विपैर्वारणैरतिशयेन पटूनि पटिष्ठानि तथा घण्टानामन्तर्लम्बितायतदण्डलालाभिवा-
द्यमानवाद्यविशेषाणां देवगृहादौ गजघण्टादिषु च प्रसिद्धानां टङ्कारवैष्टणत्क्वतिक्वतिक-
ध्वनिविशेषैरव्याहतानि अनिह्नुतानि बहुलीकृतानि बृंहितानि गजगर्जारवाः व्यतायन्त
विस्तार्यन्ते स्म । गजशब्दा बृंहितान्युच्यन्ते । यदुक्तं हैम्याम्—'गजानां गर्जबृंहिते'
इति । उत्प्रेक्ष्यते—महीतलाद्भूमीमण्डलादुद्वासितस्य निष्कासितस्य दुर्नयस्यान्यायस्य
प्रस्थाने प्रचलने ढक्का पटहः । 'ढक्का भेरी दुन्दुभिरानकः' इति हैम्याम् । तस्य क्वणितानि
प्रयाणपटहध्वनय इव ॥

भांकारिभेरीनिनदन्नफेरीर्नादैर्दिगन्तानपि पूरयन्तीः ।
कर्णातिथीकृत्य कुपक्षलक्षैर्निर्घोषिवर्षाशरभीवभूवे ॥ ९६ ॥

ग्रासा न ये कुत्रचित्पद्ग्यामेव विवर्जिताः प्रतिदिनं भूमौ विलीनाश्चिरम् । उत्क्षिप्ताश्चपलाशयेन मरुता पश्यान्तरिक्षे सखे तुङ्गानामुपरिस्थितिं क्षितिभृता कुर्वन्त्यमी पांसव ॥' इति सूक्तोक्तेर्लघिमा रेणूनाम् ॥

नम्राङ्गभाजा भगवन्नखेषु दृग्दन्तपङ्क्तिस्मितबिम्बितानि ।
बालेन्दुबिम्बेषु चकोरताराचन्द्रातपाः किं मिलिता विभान्ति ॥ ८७ ॥

भगवन्नखेषु सूरेन्द्रचरणकामाङ्कुशेषु नम्राणां नमनशीलानामङ्गभाजां प्राणिनां दृशो नेत्राणि, तथा दन्तपङ्क्तिः प्रमोदवशाद्विकसितवदनारविन्दानां दशनश्रेणी, स्मितं हसितं तेषां प्रतिबिम्बितानि विभान्ति । उत्प्रेक्ष्यते—बालान्युदयमानानि इन्दूनां चन्द्राणां बिम्बानि मण्डलानि तेषु मिलिताः स्नेहेन एकत्रभूताः चकोरा ज्योत्स्नाप्रियास्तथा तारकाश्चन्द्रकान्ताश्चन्द्रातपाश्चन्द्रिका: किम् ॥

प्रभोर्नखैर्नम्रनितम्बिनीनां कचच्छटानां प्रतिमा ध्रियन्ते ।
स्वर्भाणुविद्वेषिजिगीषयार्भमार्तण्डबिम्बैरिव मण्डलाग्राः ॥ ८८ ॥

प्रभोर्हीरसूरेर्नखैः क्रमकामाङ्कुशैर्नम्राणां भक्तिप्रह्वत्वेन नमस्करणशीलानां नितम्बिनीनां वनितानां कचच्छटानां केशपाशानां प्रतिमा प्रतिबिम्बानि ध्रियन्ते आध्रीयन्ते । उत्प्रेक्ष्यते—स्वर्भाणुर्विधुंतुदः स एव विद्वेषी प्रतिपक्षस्तस्य जिगीषया जेतुमिच्छया हन्तुं वाञ्छया वा अर्भा उदयमाना ये मार्तण्डा भास्करास्तेषां बिम्बैर्मण्डलैर्मण्डलाग्राः खड्गा इव धार्यन्ते ध्रियन्ते इव ॥

जहेषिरेऽश्वाश्च गजा जगर्जुर्निध्यानतः साधुसुधामरीचेः ।
जम्भद्विषद्वाजिगजान्विवात्मगोत्रेषु वृद्धान्पवितुं ह्वयन्तः ॥ ८९ ॥

साधुसुधामरीचेः वाचयमामृतकिरणस्य सूरेर्निध्यानतः दर्शनाद्धेतोः । 'निध्यानमवलोकनम् । दर्शनम्' इति हैम्याम् । अश्वाः प्रमोदाज्जहेषिरे हेषारवं विदधिरे स्म । च पुनर्गजा हस्तिनः जगर्जुः सजलजलधररावानुयायि गर्जारवं विदधिरे । उत्प्रेक्ष्यते—आत्मनः स्वस्य गोत्रेषु वंशेषु वृद्धानग्रजानाह्वयन्त्वाः जम्भद्विषदः पुरंदरस्य वाजिनो वाहा गजा द्विरदाः । उच्चैःश्रवस ऐरावणो गजः समुत्पन्नस्तदुत्पन्नानि रत्नानि गजाश्च । यथा चम्पूकथायाम्—'किलक्षणः । सकलसुरासुरकरपरिभ्रमितमन्दरमन्थानकम्पितदुग्धाम्भोनिधेरजनि जनितजगद्विस्मया स्मरजननी [illegible] सुनोच्चैःश्रवसा सहभूः शशधरकान्तिरैरावतस्तदनु [illegible] यथैव ऐरावतस्य तथैवोच्चैःश्रवसोऽपि प्रसूतिरिति ॥

उत्कण्ठुलास्तन्दुललाजमुक्तापङ्क्त्या प्रमोदात्तमिमं पौरकान्ताः ।
अवाकिरस्तं पृषतैः प्रवृद्धपयोधिवेला इव गर्वशैलान् ॥ ९० ॥

उत्कण्ठुलाः सोत्कण्ठाः । 'उदः कण्ठदुलो मत्वर्थे उत्कण्ठुलः' इति [illegible]

साक्षाच्चक्षुर्लक्षीकर्तुमुपेयिवासः समागताः। किंभूताः। मृगाङ्का. सलक्ष्माणश्चन्द्रा इव। 'राकामृगाङ्का. ससूय विभान्ति शरणागता.' इति पाण्डवचरित्रे पूर्णेन्दुबाहुल्यम्॥

पुरश्चरन्तः पथि हर्षहेषामिषात्तदा वलिगतवेल्लिताङ्गाः।
गायन्ति गन्धर्वगणा गणेन्द्रगुणान्वितन्वन्त इवाङ्गहारम्॥ ७०॥

पथि मार्गे पुरः फतेपुरसघस्य पुरस्ताच्चरन्तो गन्धर्वाणा वाजिना देवगायनाना च गणाः हर्षेण युक्ताः हेषा हयध्वनय । 'हेषा ह्वेषा तुरङ्गाणाम्' इति हैम्याम्। ताता मिषात्कपटात् गणेन्द्रस्य गच्छपुरदरस्य हीरसूरेर्गुणान् गायन्ति। किंलक्षणाः। वलिगत द्वितीयगतिविशेषैः कृत्वा वेल्लितमन्दोलितं चञ्चलीकृतमङ्ग कायो यैस्ते। तत्रापु त्प्रेक्ष्यते—अङ्गहारमङ्गविक्षेप नृत्याङ्गविशेष वितन्वन्तो विस्तारयन्त इव॥

व्यसीसृपच्छ्रोत्रसुधायमानगाना तदा वैणिकपङ्क्तिरग्रे।
किमागतामिन्द्रपुरीं पुरीं तां रसाद्दिदृक्षुस्तुरगास्यसंसत्॥ ७१॥

तदा तत्र प्रक्रमे वैणिकाना पङ्क्तिर्धोरणी अग्रे सघस्य पुरस्ताद्व्यसीसृपद्विसर्पति स्म प्रचचाल। 'गच्छति विसर्पत्ययत्ययते' इति क्रियाकलापे। किंभूता। श्रोत्रयोः श्रोतृश्रवणयोः सुधायमानममृतमिवाचरत् गान गीत यस्या.। उत्प्रेक्ष्यते—अतिक्रान्ता स्ववैभवैः पराभूता इन्द्रपुरी अमरावती यया तस्या. सर्वनगरीभ्योऽतिशायित्वात् तादृशीं श्रीकरी नाम नगरी रसादाश्चर्यौत्सुक्याद्दिदृक्षुर्द्रष्टुमिच्छुरागता समेता तुरगास्याना किंनराणा ससत्सभा इव समूह इव। 'उडुपरिषदः किं नार्हन्ती निशः क्षिमनौचिती' इति नैषधे। 'उडुपरिषद. तारासमूहस्य' इति तद्वृत्तौ॥

निःस्वानवृन्दे प्रददुः प्रहारान्केचिद्विपक्षव्रजवक्षसीव।
अताडयन्केऽपि पुनर्मृदङ्गानमी सरन्ध्रा द्विमुखा इतीव॥ ७२॥

केऽपि निःस्वानवादका जना निःस्वानाना राजवाद्याना 'दामामा' इति प्रसिद्धाना वृन्दे प्रकरे प्रहारान् दण्डमहतीः ददुः। वादयन्ति स्मेत्यर्थ.। विपक्षाना जिनशासनप्रत्यनीकाना व्रजाना समुदायाना वक्षसि हृदये इव प्रहारान्ददते। दुर्वादिहृदयानीव ताडयन्ति। पुनः केऽपि मार्दङ्गिकाः 'माद्दलिया' इति प्रसिद्धा. मृदङ्गान्मुरजानताडयन् धोधो दोदों वा इति शब्द कारयन्ति स्म। उत्प्रेक्ष्यते—इति हेतोस्ताडयन्ति। इति किम्। यदमी यत्कारणादेते सह रन्ध्रैर्दोषैश्छिद्रैर्वा वर्तन्ते इति सरन्ध्राः तथा द्विमुखाः कर्णेजपवद्द्वे मुखे येषा ते। एकत्र पृथक् वदन्ति, अपरत्र च भिन्न वदन्तीति द्विमुखत्वम्। मृदङ्गास्तु नरमादलक्षणत्वे द्वयो. पार्श्वयो शब्दायन्ते॥

वनप्रदेशा इव केऽप्यलाबूव्यालम्बिवंशा सविराविताला।
केचिन्मुकुन्दा इव कम्बुहस्ता वीणाकराः केऽपि गणा इवासन्॥ ७३॥

नोऽपि पूर्वं प्रथम क्षपक इत्यभिधान नाम यस्यास्तादृशीं श्रेणीमलङ्कुरुते प्रथमं क्षपकश्रेणीमाश्रयति ॥

विधातृपुत्रीतनयैरिवायं तोस्तूयमानोऽनुपदं कवीन्द्रैः ।
तत्रापि निर्बन्धवशाद्वशीन्द्रः सामन्तभूभृद्भवने न्यवात्सीत् ॥ ९४ ॥

अथ वशीन्द्र' जितेन्द्रियाणा मध्ये वासवो हीरसूरिस्तत्रापि शाखापुरेऽपि निर्बन्धवशादत्याग्रहानुरोधात् सामन्तभूभृद्भवने सामन्त' स्वल्पजनपदग्रामनगराधिप. स एव भूभृत् पृथिवीपति तस्य भवने । जगन्मल्लनामा कच्छवाह इति केषाचिद्राजन्यानां जातिर्विशेषा एतावता जगमालकच्छवाहा तस्य गृहे न्यवात्सीत् निवसति स्म । कि क्रियमाण । अनुपद पदे पदे स्थाने स्थाने कवीन्द्रै पण्डितमण्डलाखण्डलैः तोस्तूयमानः अतिशयेन काव्यादिभिर्वर्ण्यमान । उत्प्रेक्ष्यते—विधातुर्ब्रह्मणः पुत्र्या नन्दिन्या. । 'दशम ब्रह्मणः सुता' इति सरस्वतीनया अप्यभिधानम् । 'ब्रह्मपुत्री सरस्वती' इति हैम्याम् । वाग्देवताया. तनयै. पुत्ररङ्गजैरिव सारस्वतकुमारैरिव ॥

पचेलिमान्प्राक्तनकर्मरोगान्रसायनं दिव्यमिवापनेतुम् ।
तत्रापि शक्रः शमिना सदस्यानुद्दिश्य धर्मं कथयाम्बभूव ॥ ९५ ॥

हे वसुधासुधांशो सकलावनीरजनीपते भूपते, विश्वस्य जगतः पदार्थसार्थस्य वस्तुव्रजस्य अनित्यता अशाश्वतत्वम्। यतः—'हीं संसारसहावो सुचरिचनेहापुरायरतानि। जे पुव्वन्नेदीष्ठा अवरन्ने ते न दीसंति ॥' तथा 'सज्झरागजलबुब्बुउव्वमे जीवितम्यनलबिंदुचचले। जुव्वणेयनइवेगसंनिभे पावजीवकिमय न बुज्झसि ॥', 'अनित्यानि शरीराणि विभवो नैव शाश्वतः। नित्यं संनिहितो मृत्युः कर्तव्यो धर्मसंग्रहः ॥' 'यदि जन्म जरामरणं न भवेद्यदि चेष्टवियोगभयं न भवेत्। यदि सर्वमनित्यमिदं न भवेदिह जन्मनि कस्य रतिर्न भवेत् ॥' इति वचनात्सर्वमनित्य धर्म एव नित्यः कार्यः इति भावनया वासनया कृत्वा पुनर्नोऽस्माक मनश्चित्तं प्रसन्न धर्मकर्मणि निर्मलमेवास्ते। किमिव। अम्भ इव। यथा कतकस्य कतकनाम्नः फलस्य क्षोदैश्चूर्णैर्जलं प्रसन्न स्वच्छं स्यात्। तथा यदुक्तम्—'विमलस्वामिनो वाचः कतकक्षोदसोदराः। जयन्ति त्रिजगच्चेतोनैर्मल्यहेतवः ॥' इति सकलार्हत्प्रतिष्ठाने ॥

गोशीर्षसौरभ्यमिवानिलेन संदेशहारिद्वितयेन दूतः।
गन्धारनाम्नो नगरान्महीन्दो शनैः शनैर्वृद्धतया समागाम् ॥ १८३ ॥

हे महीन्दो साहे, गन्धार इति नामाभिधान यस्य तादृशान्नगरात्समागाम् अहं आगतः। कथम्। शनैः शनैर्मन्द मन्दम्। कया। वृद्धतया स्थविरत्वेन। किंभूतः। अहं संदेशहारिणोर्दूतयोः। 'शासनहारिणा हरे' इति रघौ। यथा शासनहारी तथा संदेशहारीति। तथा 'दूतः संदेशहारकः' इति हैम्याम्। द्वितयेन युग्मेन दूत आगतः।

भूमानिमावित्यवदत्ततोऽमी कथं समीयुः पथि कीदृशाश्च ।
तावप्यवक्तां तमुपागतं स्वर्बलिद्विषो हन्तुमिवाब्जनाभम् ॥ २०५ ॥

ततो दूतोक्तेरनन्तरं भूमानकब्बरसाहिरिमौ दूतौ प्रतीत्यमुना प्रकारेण अवदद्ब-भाषे । इति किम् । हे मोन्दीकमालो, अमी सूरयः पथि मार्गे कथं केन प्रकारेण स-मीयुः समागताः । मुद्गलम्लेच्छजातित्वाज्जैनमार्गानभिज्ञत्वादयं प्रश्नः । च पुनः । कीदृशाः किमाचाराश्च वर्तन्ते । अपि पुनस्तौ दूतौ तं भूपं प्रति अवक्तां कथयतः स्म । तमुत्प्रेक्षते—बलिनः पराक्रमचतुरङ्गचक्रादिकं बलं भुजवीर्यं चमूश्च विद्यते येषां ते बलवन्तो ये द्विषो वैरिणः तथा बलिनामा पातालाधिपः सुरासुरसेव्यमानो वदान्यमौलिः । यन्नाम्ना पातालं बलिसद्मेति प्रसिद्धम् । स एव रिपुर्दानवेन्द्रत्वात् तांस्तं वा हन्तुं यमा-तिथीकर्तुं स्वर्गादुपेतं देवलोकाद्भुवमागतम् । यदुक्तं चम्पूकथायाम्—'कथं च स देशः स्वर्गान्न विशिष्यते । यत्र गृहे गृहे गौर्यः स्त्रियः महेश्वरो लोकः । सश्रीका हरयः' इति । 'गौराङ्गयः पार्वती च । महेभ्यः शिवश्च । शोभायुक्तो हरश्च । लक्ष्मीयुक्तः कृष्णः' इति तद्वृत्तिः । अतः स्वर्गस्थत्वम् । अब्जनाभं नारायणमिव । अब्जपद्माभि-धेयस्य । पक्षे अब्जं नाभौ यस्येति व्युत्पत्तिमात्रम् । तत्त्वतस्त्वभिधानमेव ॥

चूर्णैरिव स्वक्रमपद्मपांसुभिः प्राचीनसूरिप्रकरैः प्रतिष्ठिताम् ।
सभाजयन्तः प्रतिमामिव क्ष्मां क्रमाम्बुजाभ्यां पथि संचरन्त्यमी २०६

हे देव, अमी सूरयः स्वाभ्यां क्रमाम्बुजाभ्यां पथि चरणकमलाभ्यां मार्गे सञ्चरन्ति सम्यग्रीत्या प्रचलन्ति । उत्प्रेक्ष्यते—प्रतिमां परमेश्वरमूर्तिमिव क्ष्मां क्षोणीं सभाज-यन्तः पूजयन्त इव । सभाजनशब्दः पूजार्थेऽपि । यथा नैषधे—'सभाजनं तत्र स-सर्ज तेषां सभाजने पश्यति विस्मिते सा' इति । 'सभाजनं पूजाम्' इति तद्वृत्तिः । तथा क्रियाकलापेऽपि—'सभाजनार्थे सभाजयति' । प्रतिमां किंभूताम् । प्राचीनसूरि-प्रकरैः पूर्वाचार्यनिचयैः स्वक्रमपद्मानामात्मनो पादारविन्दानां पांसुभिः रजोभिः कृत्वा प्रतिष्ठिताम् । उत्प्रेक्ष्यते—चूर्णैर्वासयोगैरिव पूज्यतया स्थापिताम् ॥

श्रेणीं सतामिव विमुक्तसमग्रदोषा
वल्भाममी विदधते सकृदेव देव ।
आराधयन्ति विधिवद्विधृतावधाना
योगं विधूतवनिताद्यखिलानुषङ्गम् ॥ २०७ ॥

हे देव, अमी गुरवः सकृदेव एकवारमेव वल्भामाहारं विदधते कुर्वन्ति । किंलक्ष-णाम् । सतामुत्तमानां श्रेणीमिव । विमुक्तसमग्रदोषा त्यक्ताः सर्वेऽप्याधाकर्मिका-द्यष्टचत्वारिंशन्मिता अशनदोषा एतावता नवकोटिभिर्विशुद्धा नवकोटयः उच्यन्ते । स्वयं न कुर्वन्ति परेण कारयन्ति परं कुर्वन्तं नानुमोदयन्ति इति नवकोट्यस्तानि-

पुरंदर, त्वया श्रीमता नियुक्तः प्रसादितानुशिष्टिः स साहिजखानो मह्यं बहु धनमभिष्व यच्छन्नासीत्। क इव। मेघ इव। यथा हरिणा वासवेन वर्षितु समादिष्टाः घनाघना बहु प्रचुरतरं नीरं दिशन्ति प्रददते। जनेभ्य इति शेषः। 'जानामि त्वा प्रकृतिपुरुषं कामरूप मघोनः' इति मेघदूते। 'इन्द्रादिष्टा हि मेघाः भूमौ वर्षन्ति' इति श्रुतेः। परमय विशेषः। निखिल समस्तमनुपन्न रामाद्रविणादिसङ्ग मुञ्चति दूर त्यजति तादृशेन मया किंचित्किमपि दीयमान नाग्राहि नादायि न गृह्यते स्म॥

अहो निरीहैर्महतां वतंसैर्भूर्भूपितामीभिरिवांशुभिर्द्यौः।
तज्जन्मभिः पङ्कमिवारविन्दैर्भवं परित्यज्य पृथग्भवद्भिः॥ १८८॥

अहो इत्याश्चर्ये। सदस्या लोका वा। पश्यत कौतुक परैरदीयमानमपि जगति के नाद्रियन्ते। एते तु वङ्गागृहीता अपि सर्वेषामभिलषणीयानामपि स्वर्णाश्वगजादि नाददते। तस्मादमीभिः सूरीन्द्रैः कृत्वा भूरपि क्षोणी विभूषिता अलङ्कृता पवित्रिता वा। कैरिव। अंशुभिरिव। यथा अंशुभिः सहस्ररश्मिभिः। 'आदित्यः सवितार्यमा खरसहस्रोष्णांशू रवि.' इति हैम्याम्। द्यौर्गगनवीथी शोभिता। किंभूतैः अमीभि। निर्गता स्त्रीगजन्मकलत्रपुत्रद्रविणराज्यादियावत्पदार्थसार्थेषु ईहा वाञ्छा येषाम्। निःस्पृहैरित्यर्थः। पुनः किंभूतैः। महता समस्तसाधुजनोत्तमाङ्गेषु अवतंसैः शेखरायमाणैः। पुन किंभूतैः। भव संसार परित्यज्य निर्मुच्य पृथग्भिन्नैर्भवद्भिः। कैरिव। अरविन्दैरिव। यथा पद्मैः पङ्क जम्बाल परित्यज्य पृथग्भूयते। किंभूतैः अमीभिः अरविन्दैश्च। तज्जन्मभिः तत्र भवे पङ्के वा भवित्वात्पङ्कजत्वाज्जन्म उत्पत्तिर्येषां तैः॥

चित्ते दधच्चित्रमिति क्षितीन्द्रः पुनर्युनक्ति स्म मुखं स वाचा।
सौरभ्यविभ्राजिविजृम्भिताब्जं घनात्ययो हंसमृगीदृशेव॥ १८९॥

स क्षितीन्द्रः पातिसाहिः पुनर्वाचा वाण्या मुख स्ववदन युनक्ति स्म सयोजयामास। कि कुर्वन्। इत्यमुना प्रकारेण चित्ते स्वमानसे चित्रमाश्चर्यं दधद्धारयन् मुख वाचा युयोज। क इव। घनात्यय इव। यथा शरत्कालः सौरभ्येन सौगन्ध्येन विभ्राजते शोभते इत्येवंशीलं तथा विजृम्भित विकस्वरमब्ज कमल हसमृगीदृशा राजमराल-महिलया युनक्ति॥

ग्रीष्मागमेनेव मयाध्वगानां वृथा व्यथा वः पथिजा व्यसर्जि।
एतत्पुनर्गोधनवन्न किंचिच्चक्रे स्वहृद्गोचरसंचरिष्णुः॥ १९०॥

हे सूरयः, वो युष्माक मया वृथा मिथ्यैव पथिजा मार्गजनिता व्यथा शीतातपतृट्काकण्टकक्रमादिका पीडा व्यसर्जि विश्राणिता। दत्तेत्यर्थः। केनेव। ग्रीष्मागमेनेव। यथा निदाघसमयप्रादुर्भावेन अध्वगाना पान्थाना व्यथा तापतृषादिका वितन्यते दीयते। पुनरेतच्चङ्क्रमकादिक किंचित्किमपि मया स्वस्यात्मनः हृदो मानसस्य गोचरे विषये सचरिष्णुः सचरणशील हृदये वर्तमानं न चक्रे न कृतम्। किंवत्। गोधनवत्। यथा

चन्द्रस्य योषा कान्ता रात्रिस्तस्या मुखे प्रारम्भे सध्यासमये। 'रजनी वसति-श्यामा वासतेयी तमस्विनी। उषा दोषेन्दुकान्ता' इति, तथा 'प्रदोषो यामि-नीमुखम्' इति हैम्याम्। सरस्वति समुद्रे कुतः कारणाद्यायाद्गच्छेत्। तत्र गमनकारण तु देशारिसेवनैव ॥

कामचापभ्रुवः स्फारशृङ्गारिणी कुम्भिकुम्भप्रगल्भस्तनीः स्रग्विणीः।
स्वर्वशाः किं प्रणश्यत्पृषच्चक्षुषः सुभ्रुवोऽमी तृणं मन्यते क्ष्मापते २१०

हे क्ष्मापते भूनीनायक, अमी सूरय. सुभ्रुवो नारीस्तृण मन्यते तृणप्राया गणयन्ति जानन्ति। किंभूताः सुभ्रुवः। कामस्य मदनस्य चापः कोदण्डः तद्वद्भ्रुवो यासाम्। पुनः किंभूताः। स्फारो विश्वचेतश्चमत्कारकारी मनोहारी च शृङ्गारो वस्त्राभरणाद्याडम्ब-रोऽस्ति आसाम्। पुनः किंभूताः। कुम्भिना गजेन्द्राणा कुम्भौ शिरसः पिण्डौ तद्वत् प्रगल्भो तुङ्गौ पीनौ च स्तनौ कुचौ यासाम्। पुनः किंभूताः। स्रजः स्वर्णरत्नमुक्तादीना रक्तसुमादीना मालाः सन्त्यासाम्। 'अस्मायामेधास्रग्भ्योऽस्त्यर्थे विनिर्वक्तव्यः' इति सारस्वते। पुनः किंभूताः। प्रणश्यन्तो भयपलायमाना ये पृषतो मृगविशेषाः तेषां चञ्चललोचने इव चक्षुषी यासाम्। उत्प्रेक्ष्यते—किं साक्षात्स्वर्वेशा अप्सरस इव। सुराङ्गनासदृशा अपि वशा एते तृणाय मन्यन्ते। व्यञ्जनान्तोऽपि पृषच्छब्दो मृगवाची दृश्यते। यथा नैषधे—'पृषत्किशोरी ऋतामसंगतम्' इति ॥

विरागे नानुरागे न तोषे दोषे न भूविभो।
मुक्तौ न सुभ्रुवां भुक्तौ चेतश्चिन्वन्त्यमी क्वचित् ॥ २११ ॥

हे भूविभो, अमी सूरयः विरागे वैराग्ये सर्वसंसारासारतापरिज्ञानादनित्यभावनाया चेतः स्वमनश्चिन्वन्ति पुष्टं कुर्वन्ति, पर नानुरागे क्वचित्कुत्राप्यवस्थाया न पुन. पुत्रकलत्रमित्रद्रविणाद्यनुरक्तौ आजन्म यावद्वैराग्यरङ्गतरङ्गितमानसा एव वर्तन्ते। तोषे निर्लोभतालक्षणे सतोषे। 'सनिधौ निधयस्तस्य कामगव्यनुगामिनी। अमरा किंकरायन्ते सतोषो यस्य भूषणम् ॥' इत्युक्ते. सास्थ्ये चेतश्चिन्वन्ति, न पुन. क्वचित्कस्मिन्नपि दोषे अपगुणे रागद्वेषकषायादौ च। पुनर्मुक्तौ कदा अनादिसंसारपरम्परालता मूलादु-च्छिद्य मोक्षे वास्याम इत्याशये, न पुनः क्वचिद्देवनरादिकाना कलत्राणा भुक्तौ भोगे वि-लासे राज्यादिसुखलीलासु वा। 'जिनेति जिनभद्रेति वा स्मरन्। नरो न लुप्यते पापे मुक्तिं भुक्तिं च विन्दति ॥' इति जिनकवचनस्तोत्रे। चेतश्चिन्वन्ति ॥

भूलोके भोगिलोके च स्वर्लोके स न कश्चन।
आवाभ्यामुपमीयेत योगिनां मौलिनामुना ॥ २१२ ॥

हे प्रभो, भूलोके निखिलविपुलामण्डले च पुनर्भोगिनां भुजंगनाना लोके भुवने पा-ताले च पुनः स्वर्लोके देवमन्दिरे कश्चन कोऽपि स यतीन्द्रो नास्ति यो योगीन्द्रः योगि-

सान्तरत्वं यथा [illegible] मोहो भोग [illegible] । [illegible] नाषुनमनार[illegible] [illegible] ॥

किमुत्तरं स्यादिति मन्दधीभिर्मीमांसते यावदसौ [illegible] ।

स दीर्घदर्शी शशी रसायास्तं संशयानं प्रतिशमति स्म ॥ १९३ ॥

मन्दा [illegible] [illegible] इति मीमांसते [illegible] । इति किम् । [illegible] किमुत्तरं प्रतिवचनं स्यात् । तावद्दूरत्वे [illegible] परगेन् [illegible] दीर्घदर्शी [illegible] शशी [illegible] संशयानं [illegible] प्रतिशमति [illegible] ॥

एतद्वयं मानसमानसान्ते वलक्षपक्षीकरवाम कामम् ।

इदं त्वयाचिन्त्यत पुण्यलक्ष्मीमाकाङ्क्षता क्षीरधिशायिनेव ॥ १९५ ॥

हे स्थानसिंह, काममत्यर्थं वयमेतदग्रे वक्ष्यमाणं भवन्मनसि वर्तमानं वा [illegible] मदीयमनसस्तदेव मानसं नाम सरस्तस्यान्ते क्रोडे वलक्षपक्षीकरवाम हंसायमान [illegible] वाम इत्याशीःप्रेरणयोरुत्तमपुरुषबहुवचनम् । यदुक्तम्—'कान्तारे निर्गतासि [illegible] सखि पदवी विस्मृता किं तु मुग्धे मा रोदीरेहि यामेत्युपहृतवचसो निन्युरेना वन [illegible]' इति नैषधे । यामेत्याशीरुत्तमपुरुषबहुवचनमपि । वयमेव हृदि [illegible] इत्यर्थः । स्थानसिंह, त्वया भवता इदं मयोच्यमानमचिन्त्यत ध्यातं हृदि विचारितम् । त्वया । कुर्वता । पुण्यलक्ष्मीं धर्मश्रियमाकाङ्क्षता वाञ्छता । केनेव । क्षीरधिशायिनेव । क्षी दुग्धवार्धौ शेते स्वपितीत्येवंशीलेन कृष्णेन पुण्या पतिव्रतात्वेन पवित्रा श्रीः काङ्क्ष्यते ॥

स्वमण्डले भूतलशीतभासानीयन्त एते यदि सूरिशक्राः ।

सुधाशनाम्भोनिधिवल्लभाया भगीरथेनेव पयःप्रवाहाः ॥ १९६ ॥

यदि एते सूरिशक्राः हीरसूरीन्द्राः भूतलशीतभासा साहिना । 'इदं तमुर्वीतलशीत[illegible] द्युतिम्' इति नैषधे । स्वमण्डले निजजनपदे आनीयन्ते आकार्यन्ते । केनेव । भ[illegible] थेनेव । यथा सुधाशनानां देवानामम्भोनिधिवल्लभा समुद्रपत्नी नदी सुरसरिद्गङ्गा पयःप्रवाहाः जलप्लवाः भगीरथनाम्ना भूमीन्दुना भूपालेन स्वदेशे समानीयन्ते । भगीरथेनेव पूर्वेषां पावनक्षमा । इच्छता सततिं तेन न्यस्ता मन्त्रिषु कोशला ॥' रघौ । तथा 'गङ्गामिव क्षितितलं रघुवंशदीपः' इति नैषधेऽपि ॥

सुधारसं प्रीतिभरेण पायं पायं प्रभोर्दर्शननामधेयम् ।

तदा भजामो वयमप्यमर्त्या इव स्वभावादजरामरत्वम् ॥ १९७ ॥

तदा वयं मेवातमण्डलश्राद्धवर्गा अपि अमर्त्या देवा इव स्वभावात्सहजेनैव अ[illegible] मरत्वं जरामरणराहित्यम् । अजरामरभावमित्यर्थः । भजाम आश्रयामः । किं [illegible]

पतिर्यतीनां जगदुत्तमाङ्गोत्तंसायमानक्रमपद्मयुग्मः।
अर्थेन काव्यं कवितेव वक्त्रं संयोजयामास स भाषितेन ॥ २१७ ॥

यतीनां पतिर्हीरसूरिर्भाषितेन वचसा साकं वक्त्रं मुखं संयोजयामास युनक्ति स्म सगमयति। क इव। कवितेव। यथा काव्यकर्ता अर्थेन समं काव्यं योजयति। 'भवद्वृत्त स्तोतुर्मदुपहितकण्ठस्य कवितुः' इति नैषधे कवितृशब्दः कवेर्नामापरपर्यायः। किंभूतः सूरिः। जगतां जगज्जनानामुत्तमाङ्गानि शिरांसि तेषूत्तंसायमानं शेखरायमाणं क्रमौ चरणावेव पद्मौ कमलौ द्वावपि पुनपुंसकलिङ्गयोर्युग्मं युगलं यस्य॥

अथ सूरिः साहिपुरः कानिचित्तीर्थानि कथयति—

राजन्यत्र पतिंवरेव वृणुते कैवल्यलक्ष्मीः स्वयं
संघाखण्डलमूर्ध्नि वर्षति पयोऽब्दालीव राजादनी।
यस्मिन्पङ्क इव प्रयाति वृजिनं मार्तण्डकुण्डाम्भसा
तत्तीर्थं विमलाचलो विजयते सौराष्ट्रचूडामणिः ॥ २१८ ॥

हे राजन् पातिसाहे, जगत्त्रयीप्रसिद्धं पापापायव्यपायक्षेत्रं विमल इति नामाचलः पर्वतः विमलाचलोऽधुना शत्रुंजय इति नाम तीर्थं विजयते सर्वोत्कृष्टत्वेन वर्तते। किंभूतः। सौराष्ट्राणां यात्रागतशत्रुंजयोज्जयन्तपर्वतरूपतीर्थद्वयविलोकनात्प्रमुदितभरतचक्रवर्तिप्रदत्तदेवदेशाभिधानानां चूडामणिः शिखामणिसदृश इव। तत्किम्। यत्र विमलाचले पतिंवरा स्वयंवरा कन्येव कैवल्यलक्ष्मीः मुक्तिश्रीः स्वयमात्मनैव वृणुते वरयति। पुनर्यत्र राजादनी प्रियालद्रुमः। 'नवनवतिपूर्ववारान्यस्मिन्समवासरद्युगादिजिनः। राजादनीतरुतले विमलगिरिरयं जयति तीर्थम्॥' इति पूर्वाचार्यकृतशत्रुंजयस्तुतौ। अब्दालीव कादम्बिनीव संघस्य श्राद्धवर्गस्याखण्डल इन्द्रः संघपतिस्तस्य मूर्ध्नि मस्तकोपरि पयो दुग्धं पानीयं च वर्षति। पुनर्यस्मिन्विमलाचले मार्तण्डकुण्डाम्भसा सूर्यकुण्डजलेन पङ्कः कर्दम इव वृजिनं पापं प्रयाति दूरे गच्छति॥

आस्तेऽभ्रलिहरैवताद्रिरपरः स्वस्याः पवित्रीकृते
जाने सानुनिभेन सप्तजगतीयं सेवतेऽहर्निशम्।
शंभोश्चन्द्रकलेव मूर्धनि पुनर्भाति स्म यस्याम्बिका
यस्मिन्नेमिजिनस्तथा गजपदं कुण्डं पुनीते जगत् ॥ २१९ ॥

हे नृप, अपरोऽन्य अभ्रलिहः अम्बरचुम्बी रैवत इति नामा अद्रिः पर्वत आस्ते अहमेव जाने अवगच्छामि। सप्तजगती सप्तसंख्यया युक्ता जगती। सप्त भुवनानीत्यर्थः। 'त्रिजगतीं पुनती कविसेविता' इति ऋषभनमस्तवे। यथा त्रिजगती स्वस्या आत्मनः पवित्रीकृते पावनीकरणाय सानुनिभेन सप्तशिखरकपटेन अहर्निशं दिवारात्रौ च गिरिनारगिरिं सेवते भजतीव। पुनर्यस्य रैवताद्रेर्मूर्धनि शिरसि शिखरे अम्बिका

नामधेयावभिधानौ शासनहारिणौ दूतौ यवनमुद्गलजातिषु मध्ये मेवडा इति सभ्यौ इतो युष्माक समीपादजिहाताम् गतवन्तावास्ताम् । उत्प्रेक्ष्यते—मूर्तिमन्तौ मनुष्यवपुर्भाजौ लेखौ कान्तलौ स्फुरन्माने इव पुनरुत्प्रेक्ष्यते । मूर्तिमन्तौ लेखौ देवाविव देवा हि न केनचिच्चक्षुषा लक्ष्यन्ते । अतः पार्थिवशरीरभाक्त्वाद्विलोचनगोचरौ । किंलक्षणौ । कामं स्वेच्छया अतिशयेन च दिव्यया देवगत्या चरण व्रजन चारो गमन ययोस्तौ ॥

तैः शासितुः शासनतः पृथिव्या दूतौ पुरस्तादुपसेदतुस्तौ ।
वसुंधराशेषविशेषवृत्ति चिद्गोचरीकर्तुमिवास्य नेत्रे ॥ २०१ ॥

तौ दूतौ पुरस्तात्साहेरग्रे उपसेदतुः आगतवन्तौ । किंभूतौ । पृथिव्या भूमेः शासितुः पालयितुः पातिसाहेः शासनत आदेशात्तैः सभ्यैः सभासद्भिः दूतावाकारितौ । उत्प्रेक्ष्यते—वसुधराया समस्तक्षितिमण्डलस्याशेषा समग्रा विशेषवृत्तिं न्यायान्यायकारिशिष्टाशिष्टमित्रामित्रस्वभावोदन्तसूचयित्रीं वार्ता चिद्गोचरीकर्तुं ज्ञानविषयता विधातुम् । ज्ञातुमित्यर्थः । अस्याकब्बरसाहेर्नेत्रे नयने इव । यथा नेत्राभ्या कृत्वा जनेन सर्वमप्यालोक्यते तथा दूताभ्या राज्ञा परमण्डलोदन्ताद्यखिल विज्ञायते । 'चरलोचना हि राजानः' इति श्रुतिः । यदुक्तम्—'चरैः पश्यन्ति राजानः सुहृदा व्यवहारिणः । देवाः पश्यन्ति ज्ञानेन सर्वेऽन्ये चर्मचक्षुषा ॥' 'वणिक्पुत्रैर्महेश्वरा' इति पाठः । अथ वा प्रतिभाविषय विधातु चिच्छब्देन वुद्धिरपि । 'प्रेक्षाचिदुपलब्धय.' इति हैम्याम् ॥

मुखं मृगाङ्कं मिलितुं स्वबन्धोर्लब्धोदयं वारिरुहे इवैते ।
पाणी प्रणीय प्रणयेन मध्येगोधीति धात्रीशमवोचता तौ ॥ २०२ ॥

तौ दूतौ धात्रीश साहि प्रति इत्यमुना प्रकारेण अवोचता वदतः स्म । किं कृत्वा । प्रणयेन स्वस्वामित्वादिसंबन्धस्नेहेन । भक्तेनेत्यर्थः । अथ वा आदेशयाचनार्थम् । 'प्रणयः स्नेहयाच्ञयो.' इत्यनेकार्थः । मध्येगोधि भालान्तराले पाणी हस्तौ प्रणीय कृत्वा । ललाटेऽञ्जलिं विधायेत्यर्थः । उत्प्रेक्ष्यते—स्वस्यात्मनो बन्धो. सकाशाल्लब्धः स्वात्मा उदयो येन । सूर्यज्योतिरधिगत्य चन्द्रोऽभ्युदयतीति कविसमयः । यथा रघुकाव्ये—'पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव वालचन्द्रमा' इति । तादृश मुखमृगाङ्क वदनमेव चन्द्र मिलीतुमेते समायाते वारिरुहे पद्मे इव ॥

आदिश्यतां देव निदेश्यमित्थं निर्दिश्य तौ संश्रयतः स्म तूष्णीम् ।
धाराधरस्येव ऋतोर्विरामे नभोम्बुपाम्भोदसुहृच्छकुन्तौ ॥ २०३ ॥

हे देव, निदेश्य कथनार्हं वक्तव्यमादिश्यता प्रसाद्यताम् । इत्यमुना प्रकारेण निर्दिश्य विज्ञाप्य तौ दूतौ तूष्णीं मौन संश्रयतः भेजाते । काविव । नभोम्बुपाम्भोदसुहृच्छकुन्तौ यथा धाराधरस्य ऋतोर्वर्षाकालस्य विरामे व्यपाये । चातकमयूरविहगमौ मौनमाश्रयेते ॥

पद्मप्रभ-सुपार्श्व-चन्द्रप्रभ-सुविधि-शीतल-श्रेयास-विमल-अनन्त-धर्म-शान्ति- कुन्थि-मल्लि-मुनिसुव्रत-शान्ति-नेमि-पार्श्वजिनचन्द्राणा विंशतिर्विंशतिसख्याकान् स्तूपान् स्थूलस्तम्भाकृतिविशेषान्वहति बिभर्ति । यत्र तीर्थकृतां चिताया शरीरसस्कारो भवति तत्रेन्द्राः स्तूपान्कारयन्तीति स्थिति । तत्रोत्प्रेक्ष्यते—क्षितिभृतः श्रिया स्वस्पर्धिनः सर्वपर्वतान् नृपाश्च निर्जेतु पराभवितु दशमौलिवद्रावण इव । सयुगे संग्रामे साधवः सांयुगीनास्तान् रणधुरीणान् संग्रामशौण्डान् विंशतिर्भुजान्बाहूनिव बिभर्ति । जैत्रराजस्यापि परराजजेतृत्व युक्तमेव । 'करशाखाः श्रीभर्तुर्विशोपकाः सकलजननखाङ्गुल्यः । दशकधरनेत्रभुजा सख्यया विंशतिर्वाच्या'॥ इति काव्यकल्पलतायाम् ॥

योे लक्ष्म्येव जिताः कुलावनिभृतः सोपानकायाश्रिताः
जह्नुर्यत्परिखीचकार खधुनीं सोऽष्टापदः पर्वतः ।
तेजः सर्वसुपर्वणां परिभवन्भानुर्ग्रहाणां यथा
नाथो यत्र फणिध्वजः समभवत्काशीति तीर्थं पुनः ॥ २२१ ॥

स ईश्वरवैश्रवणनिवासतया प्रथितः अष्टापदनामा पर्वतः स्फटिकाचलाख्यस्तीर्थं मुक्तिक्षेत्र योऽष्टापदे स्वशक्त्यारुह्य देवान्वदते स च तद्भव एव मोक्ष गन्तेति कृत्वा सिद्धिस्थान वर्तते । स क । लक्ष्म्या निधिपतिनिवासित्वान्निधिश्रिया रजतस्फटिकमयत्वेन गौरिमशोभया वा जिताः पराभूताः सन्तोऽष्टसख्याकाः कुलावनिभृतः हिमाद्रि-क्रौञ्च-मलय-मन्दर-विन्ध्य-माल्यवत्-सह्य-इन्द्रकीलाख्याः कुलपर्वता सोपानान्यारोहणान्येव कायाः शरीराणि येषा तादृशा ये अष्टापदाद्रिश्रिताः आगत्य सेवन्ते इव । पुनर्जह्नुनामा नृप. स्वधुनीं गङ्गा परिखीचकार यत्परितः खातिका कुरुते स्म । श्रूयते हि—पुरा श्रीमदजिततीर्थकृत्पितृव्यजभ्रातुः सगरचक्रिणो जह्नुप्रमुखैः षष्टिसहस्रसख्यै पुत्रैः पुत्रप्रेम्णा च पितृप्रदत्तस्त्रीरत्नवर्जत्रयोदशरत्नैः सम यात्रार्थमागतैरष्टापदपर्वते निजपूर्वजभरतकारितसिंहनिषद्या प्रासादे चतुर्विंशतिजिनान्नमस्कृत्य प्रमुदितैः पतितप्रायसोपानानि सजीकृत्य तदद्रिरक्षाकृते पूर्वं पर्वतपरितो दण्डरत्नेन सहस्रयोजनो द्वेधा परिखा कृता पुनर्दण्डरत्नानीतमन्दाकिनीपय प्रवाहेण पूरिता च-इति पुरातनी प्रवृत्ति । विशेषविस्तरस्तु शत्रुंजयमाहात्म्यादिभ्यो ग्रन्थेभ्योऽवसेय. इति । पुनः काशी वाराणसी इति नाम्ना तीर्थं वर्तते । परशासने तु 'वाराणसीमरणान्मुक्ति.' इति श्रूयते । यत्र काश्या फणी नागराजो ध्वजश्चिह्न यस्य स नाथो योगक्षेमकर स्वामी । अलब्धस्य लब्धिर्योग', लब्धस्य परिपालन क्षेम., तयोः कर्ता । श्रीपार्श्वनाथ इत्यर्थ. । समभवत्समुत्पन्न । किं कुर्वन् । सर्वसुपर्वणा लौकिकाना हरिहरयक्षादीना समस्ताना देवाना तेजः प्रताप परिभवन् अपहरन् तिरस्कुर्वन् वा । क इव । भानुरिव । अत्र यथा इवार्थे । यथा भास्वान् सर्वेषा ग्रहाणामुपलक्षणाद्ग्रहनक्षत्रतारकचन्द्राणा तेजो ज्योतिरपहरति जग्रे ज्योतिः सजातः ॥

[illegible]

[illegible] ॥ २०८ ॥

[illegible] तारासार का उपलक्षणात् प्रकृत- [illegible] आकाशमेव चन्द्रोदय उल्लोचत्वेन [illegible] इलेवशीले । पुनः किंभूते । [illegible] भृतः पूरितः य औषधी- प्रियतमः चन्द्रः । 'नवोदय [illegible]' इति [illegible] । स एव स्नेहप्रियः दीप- स्नेनोत्प्रासत्वेन भासते दीप्यते सद्योयोतेन शालते इलेवशीले ॥

वाह्यान्तराह्यजिघांसुघातुकतपस्तेजोभिरेभिर्भुवो
जम्भारे गगनाध्वगो गणधरैर्धिक्कारतां लम्भितः ।
शत्रून्प्रत्यपकर्तुमम्बुधिशयं संशीलतीवानिशं
यायादेष कुतः सरस्वति न चेदेणाङ्कयोषामुखे ॥ २०९ ॥

हे भुवो जम्भारे क्षोणीन्द्र, एभिर्गणधरैर्हीरविजयसूरिभिर्वाह्या बहिर्भवा: कुदृग्प्रमुखा. अवाह्या अन्तरङ्गाः रागद्वेषकषायादयो जिघांसवो द्वेषिणस्तेषां घातुकानि हिंसनशीलानि यानि षष्ठाष्टमादिविकृष्टतपांसि तेषां तेजांसि प्रतापास्तैः साधनैः कृत्वा । तेजःशब्देन प्रतापोऽप्युच्यते । यथा नैषधे—'एतस्योत्तरमद्य न समजनि उत्तेजसा लङ्घने' इति । 'तव प्रतापानामतिक्रमणे' इति तद्वृत्तिः । धिक्कारतां पराभवभावं लम्भितः प्रापितः सन् गगनाध्वगः सूर्यः । उत्प्रेक्ष्यते—शत्रून् सूरिप्रतापरूपान्निजविजयित्वात् स्ववैरिणः प्रत्यपकर्तुं पराभवं विधातुमम्बुधिशयं समुद्रशे(शयि)तारं विष्णुमनिशं निरन्तरं शीलतीव सेवते इव । यः शत्रूभूय परं पराभवति स तेन दैत्य एवोच्यते । ततो विष्णोर्दैत्यनिषूदनत्वेन तत्सेवनं युक्तमेव । एवं चेन्न तर्हि एष भानुरेणाङ्कस्य

पद्मप्रभ-सुपार्श्व-चन्द्रप्रभ-सुविधि-शीतल-श्रेयास-विमल-अनन्त-धर्म-शान्ति- कुन्थु-मल्लि-मुनिसुव्रत-शान्ति-नेमि-पार्श्वजिनचन्द्राणा विंशतिर्विंशतिसंख्याकान् स्तूपान् स्थूलस्तम्भाकृतिविशेषान्वहति बिभर्ति । यत्र तीर्थंकृतां चितायां शरीरसंस्कारो भवति तत्रेन्द्राः स्तूपान्कारयन्तीति स्थिति' । तत्रोत्प्रेक्ष्यते—क्षितिभृत' श्रिया स्वस्पर्धिनः सर्वपर्वतान् नृपांश्च निर्जेतु पराभवितु दशमोलिवद्रावण इव । सयुगे सग्रामे साधवः सांयुगीनास्तान् रणधुरीणान् सग्रामशौण्डान् विंशतिर्भुजान्बाहूनिव बिभर्ति । अत्रराजस्यापि परराजजेतृत्व युक्तमेव । 'करशाखाः श्रीभर्तुर्विशोपका' सकलजननखाङ्गुल्यः। दशकधरनेत्रभुजा सख्यया विंशतिर्वाच्याः'॥ इति काव्यकल्पलतायाम् ॥

यो लक्ष्म्येव जिताः कुलावनिभृतः सोपानकायाश्रिताः
जह्नुर्यत्परिखीचकार खधुनी सोऽष्टापदः पर्वतः ।
तेजः सर्वसुपर्वणां परिभवन्भानुर्ग्रहाणां यथा
नाथो यत्र फणिध्वजः समभवत्काशीति तीर्थं पुनः ॥ २२१ ॥

स ईश्वरवैश्रवणनिवासतया प्रथितः अष्टापदनामा पर्वतः स्फटिकाचलाख्यस्तीर्थं मुक्तिक्षेत्र योऽष्टापदे स्वशक्त्यारुह्य देवान्वदते स च तद्भव एव मोक्ष गन्तेति कृत्वा सिद्धिस्थान वर्तते। स क.। लक्ष्म्या निधिपतिनिवासित्वान्निधिश्रिया रजतस्फटिकमयत्वेन गौरिमशोभया वा जिताः पराभूताः सन्तोऽष्टसख्याकाः कुलावनिभृतः हिमाद्रि-क्रौञ्च-मलय-मन्दर-विन्ध्य-माल्यवत्-सह्य-इन्द्रकीलाख्या. कुलपर्वता सोपानान्यारोहणान्येव काया. शरीराणि येषा तादृशा ये अष्टापदाद्रिश्रिताः आगत्य सेवन्ते इव । पुनर्जह्नुनामा नृप खधुनीं गङ्गा परिखीचकार यत्परितः खानिकां कुरुते स्म । श्रूयते हि—पुरा श्रीमदजिततीर्थंकृत्पितृव्यजभ्रातुः सगरचक्रिणो जह्नुप्रमुखैः षष्टिसहस्रसख्यैः पुत्रैः पुत्रप्रेम्णा च पितृप्रदत्तश्रीरत्नवर्जत्रयोदशरत्नैः समं यात्रार्थमागतैरष्टापदपर्वते निजपूर्वजभरतकारितसिंहनिषद्या. प्रासादे चतुर्विंशतिजिनान्नमस्कृत्य प्रमुदितैः पतितप्रायसोपानानि सजीकृत्य तदद्रिरक्षाकृते पूर्वं पर्वतपरितो दण्डरत्नेन सहस्रयोजनो द्वेधा परिखा कृता पुनर्दण्डरत्नानीतमन्दाकिनीपय प्रवाहेण पूरिता च-इति पुरातनी वृत्ति' । विशेषविस्तरस्तु शत्रुंजयमाहात्म्यादिभ्यो ग्रन्थेभ्योऽवसेय. इति । पुन. काशी वाराणसी इति नाम्ना तीर्थं वर्तते । परशासने तु 'वाराणसीमरणान्मुक्तिः' इति श्रूयते । यत्र काश्यां फणी नागराजो ध्वजश्चिह्न यस्य स नाथो योगक्षेमकरः स्वामी । अलब्धस्य लब्धियोग', लब्धस्य परिपालन क्षेमः, तयोः कर्ता । श्रीपार्श्वनाथ इत्यर्थ. । समभवत्समुत्पन्न । किं कुर्वन् । सर्वसुपर्वणा लौकिकाना हरिहरयक्षादीना समस्ताना देवाना तेज' प्रताप परिभवन् अपहरन् तिरस्कुर्वन् वा । क इव । भानुरिव । अत्र यथा इवार्थे । यथा भास्वान् सर्वेषा ग्रहाणामुपलक्षणाद्ग्रहनक्षत्रतारकचन्द्राणा तेजो ज्योतिरपहरति अभ्रे ज्योतिः सजातः ॥

नामष्टाङ्गयोगभाजां मनोवाक्काययोगवता वा मध्ये मौलिना मुकुटेन [illegible] सममावाभ्यामुपमीयेत उपमानीक्रियेत ॥

नमश्चिकीर्षयामीषां तीर्थानामिव सर्वतः ।
परोलक्षा मृगाक्षीभिः सममायान्ति मानवाः ॥ २११ ॥

हे प्रभो, शत्रुंजयोज्जयन्तगङ्गाप्रयागादितीर्थानामिवामीषां सूरीणां [illegible] नमस्कर्तुमिच्छया सर्वतः सर्वाभ्यो दिग्भ्यः मृगाक्षीभिः [illegible] परे परोलक्षाः सहस्रशः मानवाः समायान्ति समागच्छन्ति ॥

दूतास्यपद्मह्रदनिर्गतेति व्रतीशितुः कीर्तिसुरस्रवन्ती ।
कूलंकषानामिव कामुकेन महीमघोना हृदये न्यधायि ॥ २१२ ॥

इति पूर्वव्यावर्णितस्वरूपयोर्दूतयोः सदेशहारिणोरास्यं [illegible] [illegible]रिमध्यगतसहस्रयोजनविष्कम्भपञ्चशतयोजनायामो [illegible] [illegible]नामा ह्रदो ह्रदस्तस्मान्निर्गता प्रवर्तिता या व्रतीशितुः [illegible] [illegible]शब्दत्वात् सुरस्रवन्ती देवनदी गङ्गा सा कूलंकषाना [illegible] [illegible] भर्ता इव समुद्रेणेव महीमघोना वसुधावासवेन [illegible] [illegible]स्मिन् समुद्रेण [illegible] च [illegible] न्यधायि स्थापिता । [illegible]
इति [illegible]वर्णितसूरिगुणाः ॥

येनाकरा रोहणवन्मणीनाममी गुणाना [illegible] ।
[illegible]तोऽस्माभिरिहेत्युदित्वा [illegible] ॥ २१३ ॥

हे [illegible], येन कारणेन [illegible] सूरीन्द्राः गुणानां शमदमसंयमादीनामाकराः [illegible] [illegible] ॥ [illegible] ॥

[illegible] ।
[illegible] ॥ २१४ ॥

[illegible]

यदन निजमुदेशान्दृष्ट निप प्रीतिभाजानेकान्ते युगमनगेहमिव । आशिष मङ्गलदा-
नं ददत विज्ञापयत । यथा येन प्रकारेण अनया श्रीमदाशिषा अमी त्रयोऽपि
साहिजाता विवर्धन्ते वृद्धिं प्राप्नुवन्ति । क इव । शिरारिणे इव । यथा सारिण्या कुल्यया
द्रुमा विवर्धन्ते ॥

इति नृपमणिवाणीं कर्णपेयां प्रणीय
व्यतरदयमभीभ्यो धर्मलाभाशिषं सः ।
अपि निजकरक्लृप्ताशेषराज्या इवैते-
ऽसमप्रमदसुधाब्धौ राजहंसीबभूवुः ॥ २२६ ॥

अथ मुनीन्द्रः सूरिरमीभ्यः पातिसाहिपुत्रेभ्यः धर्मलाभ इति नाम्नीमाशिषं व्यतर-
द्दादि स्म । किं कृत्वा । इति पूर्वोक्तप्रकारेण नृपमणेः समस्तराजमुकुटरत्नस्य साहेर्वाणीं
कर्णयोः सादरं श्रोतुं योग्यां प्रणीय कृत्वा । श्रुत्वेत्यर्थः । अपि पुनरेते साहिपुत्रा अपि
निजकरे स्वपाणौ क्लृप्तं कृतमागतमशेषं समग्रं राज्यं मेदिनीमण्डलाधिपत्यं यैस्तादृशा
इव । असमोऽसाधारणः यः प्रमोदः । अत्र प्रमदशब्दगतो रेफो न यतिभङ्गाय संभवेत् ।
तथा 'बकुलभ्रमरसंचरतानसे' इत्यस्मिन्काव्ये शिवादयोऽपि सन्तीति काव्यकल्पलता-
वृत्तिरत्नाकरादिवचनात् स एव सुधाब्धिः क्षीरसमुद्रः तत्र राजहंसीभूता सि-
तच्छदा जाता ॥ इति साहिजातानामाशीर्वाददानम् ॥

यं प्रासूत शिवाहसाधुमघवा सौभाग्यदेवी पुनः
श्रीमत्कोविदसिंहसीहविमलान्तेवासिनामादिमम् ।
तद्भ्रातीक्रमसेविदेवविमलेनानन्दतो निर्मिते
वृत्ते हीरगुरोस्त्रयोदशमितः सर्गो बभूवानसौ ॥ २२७ ॥

इति हीरसूरिचरित्रहीरसौभाग्यनाम्नि महाकाव्ये असौ त्रयोदश इति संख्यया
मितः प्रमाणीकृतः सर्गो बभूवान् संजात इति ॥

इति पण्डितसीहविमलगणिशिष्यपण्डितदेवविमलगणिविरचितायां स्वोपज्ञहीरसौभा-
ग्यनाममहाकाव्यवृत्तौ शिवपुरीपादावधारणसुरत्राणमहोत्सवकरणराणपुरयात्राआयुआपुरे-
दाम्रजाप्रभावनाकरणमेडजागमननागपुरविक्रमपुरीयसंघमहोत्सवकरणफलवर्धियाकरणो-
पाध्यायविमलहर्षपुरप्रेषणसाहिमिलनतदुदन्ताकर्णनफतेपुरागमनसंघसमुदागमनशेषणे-
ऽभ्यनन्तसाहिमिलनकुशलप्रश्नालापदूतोक्तसूरिगुणाकर्णनतीर्थकथनसाहिजाताशीर्वाद-
प्रदानादिवर्णनो नाम त्रयोदशः सर्गः ॥

श्रीनेमिनाथशासनाधिष्ठायिका देवता भाति स्म शुशुभे । केव । चन्द्रकलेव । यथा शंभो- रीश्वरस्य मूर्ध्नि मस्तके शशिकला भाति । पुनर्यस्मिन् गिरौ नेमिनामा जिनो द्वाविंश- तितमस्तीर्थनाथोऽधिपतिः श्रीनेमिनाथस्तथा गजपद श्रीनेमिनाथवन्दनागतसौधर्मेन्द्रेण निजगजरत्नैरावणहस्तिपार्श्वप्रदापितपदातिभारपूर्वकं कारित सर्वतीर्थावतार गजपद नाम कुण्डं प्रसिद्धं जगद्विश्वत्रयमपि पुनीते पवित्रीकरोति । यदुक्तं नगरपुराणे—'दृष्ट्वा शत्रुंजय तीर्थं स्पृष्ट्वा रैवतकाचलम् । स्नात्वा गजपदे कुण्डे पुनर्जन्म न विद्यते ॥' इति ॥

अस्त्यद्रिप्रभुनन्दनोऽर्बुदगिरिर्यस्मिन्वसत्यात्मना

स्थाणुक्षोणिभृतीव कल्पितशिवाश्लेषो वृषाङ्कः प्रभुः ।

निर्जेतुं दशमौलिवत्क्षितिभृतः किं सांयुगीनान्भुजा-

न्स्तूपान्विंशतिरर्हतां वहति यः संमेतभूभृत्परः ॥ २२० ॥

हे नृप साहे, परः अर्बुदनामा गिरिः अस्ति तीर्थत्वेन प्रसिद्धो विद्यते । किंभूतः । अद्रिप्रभोर्हिमाचलस्य । 'हिमालयो नाम नगाधिराजः' इति कुमारसंभवे । पर्वतानां प- तिस्तस्य नन्दनस्तनयः । 'गौरीगुरुश्वशुरभूधरसंभवोऽयमस्त्यर्बुदः ककुदमद्रि[illegible] इति वस्तुपालवसतिप्रशस्तौ अर्बुदाचले एव । यस्मिन्नर्बुदगिरौ वृषाङ्कः प्रभुः [illegible] स्वामी स्वयमात्मना वसति । पूर्वं तु भरतादिसंघपतिभिः स्वस्वोद्धारकरणसमये [illegible] दितीर्थकृत्प्रतिमाः स्थापिताः अभूवन्, परमिदानींतनसमये पञ्चमे अरके [illegible] न्त्रिणा सर्वप्रासादनिर्मापणात्पूर्वं स्वकारितविमलवसतौ ऋषभस्वामी वर्तते । [illegible] न्निव । स्थाणुक्षोणिभृतीव । यथा अष्टापदपर्वते सतीष्वपि त्रयोविंशतितीर्थकृत्प्रतिमा[illegible] भरतकारितत्वात्स्वतातत्वाच्च मुख्यतया ऋषभदेव एव स्वामी । अथ च [illegible] भुरचलेश्वरो यत्र परशासनदेवो विद्यते । सोऽपि कस्मिन्निव स्थाणुक्षोणिभृति [illegible] यथा कैलासेऽपि परशासनरीत्या ईश्वरो विद्यते । किंभूतौ द्वावपि । वृषो [illegible] वामोरुचिह्नं यस्य । शंभोर्वाहनत्वे यस्य । 'रुद्रोऽधीशो वामदेवो वृषाङ्कः' इति [illegible] पुनः किंभूतौ । प्रभुः स्वामी सर्वादिभूतत्वात्प्रथमराजत्वात्सर्वव्यष्टिकारणत्वात् [illegible] प्रभुः समर्थः सृष्टिसंहरणकारकत्वात् विश्वं ब्रह्मरूपेण सृजति विष्णुरूपेण पा[illegible] शिवरूपेण संहरति । अत एवोक्तम्—'एकमूर्तिस्त्रयो देवा ब्रह्मविष्णुमहे[illegible] सप्तसर्गनिर्माणपालनक्षयकारिणः ॥' इति । तथा [illegible]ऽप्युक्तम्—'[illegible] [illegible] वदन्' इति । पुनः किंभूतौ । कल्पितः कृतः शिवस्य मुक्ति[illegible] पार्वत्या आश्लेष आलिङ्गनं येन । किं च नहि गुणरूपाया मुक्ते[illegible] [illegible]समयानुसारि वचः 'न[illegible]परीरम्भणलोलुपेन' इत्यादिवक्तारं[illegible] [illegible] पृथगेवेति नात्र [illegible] । पार्वत्याः परीरम्भ[illegible] [illegible]रोऽन्यः [illegible]विंशतितीर्थंकृतां निर्वाणकल्याणकत्वेन विख्यातं [illegible] [illegible] । [illegible] संमेताचलः । अर्हतां जिनेन्द्राणाम् अजित-संभव-अभिनन्दन[illegible]

चित्वा दृष्टिं दृश दिदेश दत्तवान्। क इव। द्विरदद्विपनिव। यथा दन्तिनां प्रतिपक्षः सिंह: कण्ठं विभुज्य दृशं दत्ते। केसरी अग्रे गच्छन् पश्चाद्विलोकयतीति तत्स्वभाव एव। 'गिरा विभुर्द्वारि विभुज्य कण्ठम्' इति नैषधे। ततोऽग्रे कियदागत्य पश्चात् दृष्टिदानानन्तरमेव साहिरनगारपारीन्द्रस्य साधुसिन्धुरारातेः सूरेः। अथ वा अनगारेषु मुनिषु पारीन्द्राः दुर्वादिवारणविनाशकत्वेन कण्ठीरवाः। अथ वा यतिषु मुख्याः। 'स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः॥' इति हैम्याभुक्तत्वात्। तादृशान् मुनीन् श्रमणानजूहवदाकारयामास। एष किं कुर्वन्। यत्र सूरिणा सार्धं मिलितास्तत्रैव स्थितास्तिष्ठतः अथ वा तत्रैवाधोभूय स्थितिं कुर्वतो गवेषयन्पश्यन्॥

सुरैरिवेन्द्रः कलभैरिव द्विपो ग्रहैरिवार्कश्च शशीव तारकैः।

अदिद्युतद्वर्त्मनि सूरिवासवोऽनुगम्यमानो मुनिपुंगवैस्ततः॥ ५॥

ततस्तेषां साहिनाकारणानन्तरं मुनिपुंगवैर्वाचंयमवृषभैरनुगम्यमानो वर्त्मनि तस्मिन्नेव चित्रशालिकाध्वनि सूरिवासवः अदिद्युतत्। क इव। सुरैर्वृन्दारकैः इन्द्रः पुरंदर इव। पुनः क इव। कलभैः त्रिंशद्वर्षीयस्तम्बेरमैर्द्विपः षष्टिहायनयूथनाथ इव गजेन्द्र इव। पुनः क इव। ग्रहैर्मङ्गलादिभिरर्को भास्वानिव ग्रहपतित्वात्। 'ग्रहाब्जिनीगोद्युपतिर्विकर्तनः' इति हैम्याम्। तथा जीवाभिगमसूत्रवृत्तौ—'यावान् चन्द्रपरिवारस्तावान् सूर्यस्यापि परिवारः। परमतितेजस्त्वाद्ग्रहास्तत्पार्श्वे न च दृश्यते।' पुनः क इव। तारकैर्ज्योतिर्भिः शशी चन्द्र इव अनुगम्यमानो दीप्यते॥

अथाधिरुह्योर्ध्वधरां स किंचनात्मना न्यगादीत्पृथिवीपुरंदरः।

दुलीचकाख्यास्तरणं व्रतीश्वराः पुनन्तु भूपीठमिव क्रमाम्बुजैः॥ ६॥

अथ साधूनां सूरिसंनिधावाह्वानानन्तरमात्मना स्वेन किंचन स्तोकमात्रां सोपानत्रयमयीमुच्चैरूर्ध्वधरां सोपानत्रिकेणैव कृत्वा उच्चैर्भूमीमधिरुह्य अध्यास्याश्रित्य वा स पृथिवीपुरंदरो भूपो न्यगादीद्बभाषे। तदेवाह—हे व्रतीश्वराः सूरयः, राज्ञामुपवेशनोचितं विचित्रचित्ररचनाचतुरमणीयं लोकप्रसिद्ध्या दुलीचा इत्याख्या नाम यस्य। स्वार्थे कः। दुलीचकाख्यमस्मत्सभागमनागमनभूमेः आस्तरणमाच्छादनं क्रमाम्बुजैर्निजचरणकमलन्यासैः पुनन्तु पवित्रीकुर्वन्तु। किमिव। भूपीठमिव। यथा क्षोणीमण्डलं स्वपादपद्मैः पवित्र्यते॥

गुरुर्जगादेति कदापि कीटिका भवेदधोऽस्मिन्न पदं दधे ततः।

नृपोऽभ्यधादत्र न कश्चनासुमान्भवेत्सुराणामिव मन्दिरे नरः॥ ७॥

गुरुः सूरिरित्यग्रे वक्ष्यमाणं जगाद वदति स्म। इति किम्। हे साहे, अधो दुलीचकस्याधस्तात् भूप्रदेशे कदाचिदपि दैवयोगात्कीटिकापि चरन्ती तिष्ठन्ती वा भवेत्। ततो जन्तुजातपालनादिहेतोरहमस्मिन्दुलीचके एतावता दुलीचकास्तरणोपरि कदापि कस्मिन्नपि प्रस्तावे पदं चरणं न दधे न मुञ्चामि। चक्षुरदृष्टभूमौ कथमपि क्रमं

श्रीनेमिनाथशासनाधिष्ठायिका देवता भाति स्म शुशुभे। केव। चन्द्रकलेव। यथा शंभो रीश्वरस्य मूर्ध्नि मस्तके शशिकला भाति। पुनर्यस्मिन् गिरौ नेमिनामा जिनो द्वाविंशतितमस्तीर्थनाथोऽधिपतिः श्रीनेमिनाथस्तथा गजपद श्रीनेमिनाथवन्दनागतसौधर्मेन्द्र निजगजरत्नैरावणहस्तिपार्श्वप्रदापितपदातिभारपूर्वक कारित सर्वतीर्थावतार गजपद नाम कुण्ड प्रसिद्ध जगद्विश्वत्रयमपि पुनीते पवित्रीकरोति। यदुक्तं नगरपुराणे—'दृष्ट्वा शत्रुंजय तीर्थं स्पृष्ट्वा रैवतकाचलम्। स्नात्वा गजपदे कुण्डे पुनर्जन्म न विद्यते॥' इति।

अस्त्यद्रिप्रभुनन्दनोऽर्बुदगिरिर्यस्मिन्वसत्यात्मना
स्थाणुक्षोणिभृतीव कल्पितशिवाश्लेषो वृषाङ्कः प्रभुः।
निर्जेतुं दशमौलिवत्क्षितिभृतः किं सांयुगीनान्भुजा-
न्स्तूपान्विंशतिरर्हतां वहति यः संमेतभूभृत्परः॥ २२०॥

हे नृप साहे, परः अर्बुदनामा गिरिः अस्ति तीर्थत्वेन प्रसिद्धो विद्यते। किंभूतः। अद्रिप्रभोर्हिमाचलस्य। 'हिमालयो नाम नगाधिराजः' इति कुमारसंभवे। पर्वतानां पतिस्तस्य नन्दनस्तनयः। 'गौरीगुरुश्वशुरभूधरसंभवोऽयमस्त्यर्बुदः ककुदमद्रि[illegible]' इति वस्तुपालवसतिप्रशस्तौ अर्बुदाचले एव। यस्मिन्नर्बुदगिरौ वृषाङ्कः प्रभुः [illegible] स्वामी स्वयमात्मना वसति। पूर्वं तु भरतादिसंघपतिभिः स्वस्वोद्धारकरणसमये [illegible] दितीर्थंकृत्प्रतिमाः स्थापिताः अभूवन्, परमिदानींतनसमये पञ्चमे अरके [illegible] न्त्रिणा सर्वप्रासादनिर्मापणात्पूर्वं स्वकारितविमलवसतौ ऋषभस्वामी वर्तते। [illegible] न्निव। स्थाणुक्षोणिभृतीव। यथा अष्टापदपर्वते सतीष्वपि त्रयोविंशतितीर्थकृत्प्रतिमा[illegible] भरतकारितत्वात्स्वतातत्वाच्च मुख्यतया ऋषभदेव एव स्वामी। अथ च [illegible] मुरचलेश्वरो यत्र परशासनदेवो विद्यते। सोऽपि कस्मिन्निव स्थाणु[illegible] यथा कैलासेऽपि परशासनरीत्या ईश्वरो विद्यते। किंभूतौ द्वावपि। [illegible] वामो[illegible] यस्य। शंभोर्वाहनत्वे यस्य। 'रुद्रो[illegible]शो वामदेवो वृषाङ्कः' इति [illegible] पुनः किंभूतौ। प्रभुः स्वामी सर्वादिभूतत्वात्प्रथमराजत्वात्स[illegible] प्रभुः समर्थः सृष्टिसंहरणकारकत्वात् [illegible] [illegible] सृजति [illegible] [illegible]रूपेण संहरति। अत एवोक्तम्—'एकमूर्तिस्त्रयो देवा [illegible] [illegible]निर्माणपालनक्षयकारिणः॥' इति। तथा [illegible]प्युक्तम्—'[illegible] [illegible] वदन्' इति। पुनः किंभूतौ। कल्पितः कृतः [illegible] [illegible] आलिङ्गन येन। किं च नन्दि[illegible] [illegible] वचः 'नन्[illegible]' [illegible] [illegible] नात्र [illegible]। पार्श्वे [illegible] [illegible] [illegible] [illegible] समेतपर्वतः। अर्हतां [illegible]

चित्वा दृष्टिं दश दिदेश दत्तवान् । क इव । द्विरदद्विषमिव । यथा दन्तिना प्रतिपक्षः सिंहः कण्ठं विभुज्य दृशं दत्ते । केसरी अग्रे गच्छन् पश्चाद्विलोकयतीति तत्स्वभाव एव । 'गिरा विभुर्द्वारि विभुज्य कण्ठम्' इति नैषधे । ततोऽग्रे कियदागत्य पश्चात् दृष्टिदानानन्तरमेव साहिरनगारपारीन्द्रस्य साधुसिन्धुरारातेः सूरेः । अथ वा अनगारेषु मुनिषु पारीन्द्राः दुर्वादिवारणविद्रावकत्वेन कण्ठीरवाः । अथ वा यतिषु मुख्याः । 'स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुञ्जराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥' इति हैम्यानुशासनात् । तादृशान् मुनीन् श्रमणानजूहवदाकारयामास । एष किं कुर्वन् । यत्र सूरिणा सार्धं मिलितास्तत्रैव स्थितानित्यतः अथ वा तत्रैवाधाभूय स्थितिं कुर्वतो गवेषयन्पश्यन् ॥

सुरैरिवेन्द्रः कलभैरिव द्विपो ग्रहैरिवार्कश्च शशीव तारकैः ।
अदिद्युतद्वर्त्मनि सूरिवासवोऽनुगम्यमानो मुनिपुंगवैस्तदा ॥ ५ ॥

ततस्तेषां आह्वानाकारणानन्तरं मुनिपुंगवैर्वाचंयमपुंगवैरनुगम्यमानो पश्चादेति त[illegible]स्मिन्नेव चित्रशालिकाध्वनि सूरिवासवः अदिद्युतत् । क इव । सुरैरमरैः [illegible] इन्द्रः पुरंदर इव । पुनः क इव । कलभैः त्रिंशद्वर्षीयवल्लभैरुद्भूतैः [illegible] यूथनाथ इव गजेन्द्र इव । पुनः क इव । ग्रहैः आदित्यैः अर्को भास्वानिव ग्रहपतित्वात् । 'ग्रहाधिनायो ग्रहपतिर्विकर्तनः' इति हैम्याम् । तथा जीवाभिगमसूत्रवृत्तौ—'यावान् चन्द्रपरिवारस्तावान् सूर्यस्यापि परिवारः । परमतितेजस्त्वात्ताराग्रहणं न च दृश्यते ।' पुनः क इव । तारैर्ज्योतिर्भिः शशी चन्द्र इव अनुगम्यमानो दीप्यते ॥

अथाधिरुह्योर्ध्वधरां स किंचनात्मना न्यषादीत्पृथिवीपुरंदरः ।
दुलीचकाख्यास्तरणं यतीश्वराः पुनन्तु भूपीठमिव क्रमाम्बुजैः ॥ ६ ॥

अथ साधूनां सूरिसंनिधावाह्वानानन्तरमात्मना स्वेन किंचन सोपाना[illegible] सोपानश्रेणीमिवोर्ध्वधरां सोपानश्रेणिमधिरुह्य [illegible] स पृथिवीपुरंदरो भूपो न्यषादीदुपविष्टः । तदैवाह—हे यतीश्वराः सूरयः, [illegible] विचित्रचित्ररचनाचतुरमणीय [illegible] दुलीचा [illegible] । दुलीचकाख्यमास्तरणम् [illegible] चरणकमलन्यासैः पुनन्तु पवित्रीकुर्वन्तु । किमिव । भूपीठमिव । यथा सो[illegible] सपादपद्मैः पवित्रयते ॥

गुरुर्जगादेति कदापि पीठिका भवेदधोऽलीक पदं दधे ततः ।
नृपोऽन्यपादं [illegible] न कल्पनातुमात्मने [illegible] ॥ ७ ॥

गुरुः सूरिः [illegible]

सूरिपुरंदरगदितानिति तीर्थान्मेदिनीसुनासीरः ।
श्रवणाभरणानीव व्यधित निजश्रोत्रपत्रयुगे ॥ २२२ ॥

इत्यमुना प्रकारेण सूरिपुरंदरेण हीरविजयसूरिराजेन गदितान् [illegible] तीर्थान् शत्रुंजयादिपुण्यस्थानानि । तीर्थशब्दः पुंनपुंसके । [illegible] इति लिङ्गानुशासनपुंनपुंसके । मेदिनीसुनासीरो भूमीजम्भारातिः [illegible] कर्णयोः श्रवणाभरणानि कर्णपूराणीव व्यधित चकार । [illegible] ॥

[illegible] तीर्थततिश्रुतिसुधारसः [illegible] ।
[illegible] कर्णप्रणालिकया ॥ २२२ ॥

अहो सूरयः, अहं वो युष्माकं महीयसीमतिगुर्वीं विश्वप्रशस्यां कृपाळुतां सर्वजगज्जन्तुषु कृपावत्तां किमिति प्रश्ने स्तुवे श्लाघाविषयं नयामि । उताथ वा नो युष्माकं स्वाचरणे निजाचारविधिमार्गपालने प्रवीणतां नैपुण्यं सुशिक्षितततां किं स्तुवे प्रशंसामि । पुनरहं पयोदवद्वार्षिकघनाघन इव परोपकारितां परेषां नि शेषाल्पकुलप्राणिनामुपकर्तृत्वं स्तुवे कथयामि । वाथ वा भवतां शुचेः पवित्रस्य विशुद्धस्य वा पथो मार्गस्य सद्धर्माचरणस्य वा निरूपकमुपदेष्टारं कथयितारं वा स्तुवे स्तुतिविषयीकरोमि । [illegible] स्तुवे श्लाघे, सर्वमपि प्रशंसापरमास्पदमिति ॥

जगत्यसाधारणता व्यतर्कि वः क्षणादनेनाचरणेन शासने ।
सुधाभुजां भूमिरुहीव कामितप्रदातृभावेन मुमुक्षुपुंगवाः ॥ १२ ॥

हे मुमुक्षुपुंगवाः सूरीश्वराः, अनेन समग्रजगज्जन्तुजातपालनलक्षणेन आचरणेन सदाचरणविधानेन कृत्वा क्षणादल्पकालात्तत्कालमेव मया वो युष्माकं शासने जिनदर्शने जगति विश्वे असाधारणता सर्वेभ्योऽद्वैतता एतावता परेभ्यो दर्शनेभ्यो युष्माकं जिनशासनमसाधारणमेवेति व्यतर्कि मया विचारितम् । ज्ञातमित्यर्थः । [illegible] । भूमिरुहीव । यथा कामितानामीहिताशेषमनोभिलषितानां प्रकर्षेण दातृभावेन दायक[illegible] सुधाभुजाममृताशनानां पादपे असाधारणता वितर्क्यते, एतावता यथा [illegible] विशेषास्तथान्यशासनेभ्यः श्रीमच्छासनमिति ॥ इति सूरी[illegible]जिनशासनयोः प्रशंसा ॥

कथीपकस्यास्तरणं ततः करद्वयेन दूरीकृतवान्स्वयं नृपः ।
मुनीन्द्रसङ्गादिव पापमात्मनः प्रभुः पुनाति स्म पुन[illegible] ॥ १३ ॥

ततः प्रभुकृपा[illegible]तावगमनप्रणीतप्रवासानन्तरं नृपोऽकब्बरः स्वयं [illegible]वादात्मनैव करद्वयेन पाणिपद्मद्वन्द्वेन कथीपक इति नाम्ना परदेशोत्पन्न [illegible] सूत्रमयवस्त्रस्यास्तरणं तुलीचवापराभिधानं दूरीकृतवानपसारयति स्म । [illegible] इत्यर्थः । पृथक्चक्रे । उत्प्रेक्ष्यते—मुनीन्द्रस्य हीरसूरेः सङ्गादिव [illegible] दूरीचकार । तस्य दूरीकरणात्प्रभुः सूरिस्तानास्तरणरहितां [illegible] पुनाति स्म [illegible] चामाश्रितवान् । ऊर्ध्वं धरामारुरोहेत्यर्थः । [illegible] ॥

परेशपामापरितादिसूदनोपदीकृतास्थानिव [illegible] ।
विभूषयाञ्चक्रतुरुर्वरावरानगारराजीरमणौ क्रमेण तौ ॥ १४ ॥

[illegible]

चतुर्दशः सर्गः।

अथ प्रदेशीव स केशिनामुना विधातुकामः सुकृतस्य संकथाम्।
इदं महीन्दुर्मुनिचन्द्रमब्रवीत्पुनन्तु पूज्या मम चित्रशालिकाम्॥ १॥

अथ साहिजातानामाशीर्वाददानानन्तर स महीन्दुर्वसुधासुधांशुरकब्बरसाहिर्मुनि-चन्द्र हीरविजयसूरिं प्रति इदमेतदग्रे वक्ष्यमाणमब्रवीद्बभाषे। किंभूत. सः। अमुना सूरिणा सम सुकृतस्य धर्मस्य संकथां वार्ताम्। धर्मगोष्ठीमित्यर्थः। विधातुकामः कर्तुमि-च्छन्। क इव। प्रदेशीव। यथा प्रदेशी नामा राजा केशिना श्रीपार्श्वनाथापत्यकेशिग-णधरेण सार्धं धर्मसंकथां कर्तुकाम आसीत्। इद किम्। हे पूज्या जगन्मान्या भग-वन्तः, मम चित्रशालिका पुनन्तु पवित्रीकुर्वन्तु॥

ततः ककुद्मानिव भूमिमानसौ तमित्युदीर्य क्रमचर्ययाचरत्।
सहामुना सूरिरपि व्यसीसृपद्बिडौजसा सूरिरिवामृतान्धसाम्॥ २॥

ततः सूरेश्चित्रशालिकायामाकारणानन्तर तं सूरिमिति पूर्वोक्तमाकारणलक्षणमुदीर्य कथयित्वा ककुद्मान्मत्तवृषभ इवासावकब्बरो भूमिमान् क्षितिपतिः क्रमचर्यया चरणच-ङ्क्रमणेन अचल(र)त्पुरः प्रस्थितः। अपि पुनः सूरिर्गुरुरपि अमुना साहिना सह सम व्यसीसृपद्विसर्पति स्म जगाम। क इव। सूरिरिव। यथा अमृतान्धसा सुधाशनाना देवानामाचार्यः उपलक्षणादिन्द्रस्यापि। यदुक्त नैषधे—'इदृशीं गिरमुदीर्य बिडौजा जोषमासनविशिष्य बभाषे। नात्र चित्रमभिधाकुशलत्वे शैशवावधिगुरुर्गुरुरस्य॥' इति बृहस्पतेरिन्द्रस्याचार्यत्वम्। सूरिः कलाचार्यो वाचस्पतिर्बिडौजसा शक्रेण सम कार्यव-शात्प्रचलति॥

धरातुराषाट् शमिनां शशी पुनः पथि प्रयान्तौ श्रयतः परां श्रियम्।
कथंचिदुर्व्यामिव केलिशालिनौ विभावरीवल्लभभानुमालिनौ॥ ३॥

धरातुराषाट् भूमीन्द्रः। 'धरातुरासाहि मदर्थयाच्ञा कार्या न कार्यान्तरचुम्बिचित्ते' इति नैषधे। पुनः शमिना शशी साधूना सुधाकरः सूरिः। द्वावपि पथि चित्रशालिका-वर्त्मनि प्रयान्तौ गच्छन्तौ सन्तौ परा प्रकृष्टा श्रिय शोभा श्रयतो लभेते। उत्प्रेक्ष्यते— कथचित्केनापि कुतूहलादिना प्रकारेण एकत्र मिलित्वा उर्व्यां भूमण्डले केलिभिः क्रीडाभिः शालते शोभते इत्येवंशीलौ विभावरीवल्लभभानुमालिनौ चन्द्रसूर्याविव। तस्मिन् समये सूरिदर्शनादतीव शान्तीभूतः साहिश्चन्द्रतुल्यः, सूरिस्तु पुण्यप्रतापा-त्तदाधिक दीप्यमानत्वाद्भानूपमो दृश्यते॥

विभुज्य कण्ठं क्षितिपाकशासनो दृशं दिदेश द्विरदद्विपन्निव।
तथा स्थितानेप गवेपयंस्ततोऽनगारपारीन्द्रमुनीनजूहवत्॥ ४॥

क्षितिपाकशासनो धात्रीसुत्रामा साहिः कण्ठं ग्रीवा विभुज्य वक्रीकृत्य पश्चाद्गल-

तु पुनः केनापि धार्मिकेण पुंसा मरुद्गृहेन्दिरा स्वर्गलोकलक्ष्मीः स्वकामुकी स्वस्मिन्निच्छा यस्याः स्वाभिलाषिणी। 'इच्छायुक्ता तु कामुका'। च्विप्रत्यये कामुकीक्रियते। अथ वा स्वस्यात्मनः कामुकी लालसाकलिता क्रियते। 'वृषस्यन्ती कामुकी स्यात्' इति हैम्याम्। केनेव। सौभाग्यवतेव। यथा 'सद्गमनसन्निरीक्षणसज्जल्पनमिति वदन्ति लावण्यम्। स्पृहणीयो रतिसुभगः स्पर्शगुणो भवति सौभाग्यम्॥' इद च द्वयमपि स्त्रीपुरुषयोः स्यात्। अत्र तु सुभगत्वभाजा वसुदेवेनेव सकलकामिनीजनकार्मणा वा पुरुषेण वशा वनिता स्वकामुकीक्रियते। पुसा किं कुर्वता। दुर्दुष्टोऽन्तोऽवसान यस्य प्रान्ते कठिनः विपाको यस्य तादृश दुःखं यस्मात्तद्विषयविषयाद्गोचरात् शब्द–रूप–गन्ध–रस–स्पर्शलक्षणपञ्चसङ्ख्यकात् गुणाद्बिभ्यता ससारकारागारप्रपतनानन्तासातसहनादिमहाभीतिं बिभ्रता अत एव विगीतोऽपमानितो मुक्तः सङ्गः पुत्रकलत्रधनादिकः सकलससारिकानुषङ्गः ससारिकस्नेहो येन। पुनः किंभूत। कृपानुषङ्गेन पृथ्वी–अप्–तेजो–वायु–वनस्पत्–त्रस रूपाणा षण्णा कायानां रक्षणलक्षणकरुणाकलितेन षट्कायगोकुलपालकेन समस्तयावज्जगच्चराचरजन्तुरक्षाक्षमेणेत्यर्थः॥

क्रमादुपक्रम्य समाधिना भवी भवं स मुञ्चन्भजते महोदयम्।
स्वलोहतां सिद्धरसेन संत्यजन्सुवर्णता धातुरिव प्रपद्यते॥ २५॥

स विषयविमुखो भवी ससारी जीव क्रमात्परिपाटीतः स्वर्गे गत्वा प्रशस्तमर्त्यजन्म सप्राप्य उपक्रम्य चारित्रादिविशिष्टधर्माचरणोपक्रम कृत्वा समाधिना शुक्लध्यानयोगेन भव ससारमुज्झन् मुञ्चन् सन् महोदय मोक्ष निःसीमानमभ्युदय भजते। ससारसागरं निस्तीर्य सिद्धो भवतीत्यर्थः। क इव। धातुरिव। यथा धातुर्लोहादिः सिद्धरसेन रसकूपिकादिपानीयविशेषेण स्वलोहता कालायसभाव नीचधातुता सत्यजन् मुञ्चन् सुवर्णता प्रपद्यते॥ इति धर्मदेशना॥

अभाजि युष्माभिरिवानुगामिभिर्महीमहेन्द्रः परमेशिता स कः।
अवद्यवन्ध्यां पदवीं प्ररूपयन्नुपासनामर्हति कीदृशो गुरुः॥ २६॥
सुधाब्धिवद्यो ददतेऽमृत पुनः स किंविधो धर्म इदं वदन्तु मे।
महीमहेलादयितोदितामिमा गिर निपीय प्रभुरप्यचीकथत्॥ २७॥

इमां वृत्तापेक्षया पूर्वोक्ता मही भूमिरेव महेला कामिनी। 'यश्च परमहेलारतोऽप्यपारदारिकः' इति चम्पूकथायाम्। तथा 'महिला स्यान्महेलया' इति शब्दप्रभेदे। तस्या दयितो भर्ता अकब्बरः तेनोदिता कथिता वाणीं निपीय सादर श्रुत्वा प्रभुः सूरीन्द्रोऽप्यचीकथत् वदति स्म। इमा काम्। हे सूरीन्द्राः, इद मयैव निगद्यमान पृच्छ्यमान मे मम वदन्तु कथयन्तु। इद किम्। यः परमेशिता परमेश्वरो युष्माभिः श्रीमद्भिरभाजि ससेव्यते स्म। कैरिव। अनुगामिभिरिव। यथा महीमहेन्द्रो नीतिमान् भूमान् सेवकैः सेव्यते। स कः परमेष्ठी किंनामा च पुनः किंगुणो गुरुरुपासनामर्हति सेवा

चतुर्दशः सर्गः।

अथ प्रदेशीव स केशिनामुना विधातुकामः सुकृतस्य संकथाम्।
इदं महीन्दुर्मुनिचन्द्रमब्रवीत्पुनन्तु पूज्या मम चित्रशालिकाम्॥ १॥

अथ साहिजातानामाशीर्वाददानानन्तरं स महीन्दुर्वसुधासुधागुरकब्बरसाहिर्मुनिचन्द्रं हीरविजयसूरिं प्रति इदमेतदग्रे वक्ष्यमाणमब्रवीद्बभाषे। किंभूतः सः। अमुना सूरिणा सम सुकृतस्य धर्मस्य संकथां वार्ताम्। धर्मगोष्ठीमित्यर्थः। विधातुकामः कर्तुमिच्छन्। क इव। प्रदेशीव। यथा प्रदेशी नामा राजा केशिना श्रीपार्श्वनाथापत्यकेशिगणधरेण सार्वं धर्मसंकथां कर्तुकाम आसीत्। इदं किम्। हे पूज्या जगन्मान्या भगवन्तः, मम चित्रशालिकां पुनन्तु पवित्रीकुर्वन्तु॥

ततः ककुद्मानिव भूमिमानसौ तमित्युदीर्य क्रमचर्ययाचरत्।
सहामुना सूरिरपि व्यसीसृपद्बिडौजसा सूरिरिवामृतान्धसाम्॥ २॥

ततः सूरेश्चित्रशालिकायामाकारणानन्तरं तं सूरिमिति पूर्वोक्तमाकारणलक्षणमुदीर्य कथयित्वा ककुद्मान्मत्तवृषभ इवासावकब्बरो भूमिमान् क्षितिपतिः क्रमचर्यया चरणचङ्क्रमणेन अचल(र)त्पुरः प्रस्थितः। अपि पुनः सूरिर्गुरुरपि अमुना साहिना सह अव्यसीसृपद्विसर्पति स्म जगाम। क इव। सूरिरिव। यथा अमृतान्धसां सुधाशनानां देवानामाचार्यः उपलक्षणादिन्द्रस्यापि। यदुक्तं नैषधे—'इदृशीं गिरमुदीर्य बिडौजोपमासनविशिष्य बभाषे। नात्र चित्रमभिधाकुशलत्वे शैशवावधिगुरुर्गुरुरस्य॥' इति बृहस्पतेरिन्द्रस्याचार्यत्वम्। सूरिः कलाचार्यो वाचस्पतिर्विडौजसा शक्रेण सम कार्यवशात्प्रचलति॥

धरातुराषाट् शमिनां शशी पुनः पथि प्रयान्तौ श्रयतः परां श्रियम्।
कथंचिदुर्व्यामिव केलिशालिनौ विभावरीवल्लभभानुमालिनौ॥ ३॥

धरातुराषाट् भूमीन्द्रः। 'धरातुरासाहि मदर्थयाच्ञा कार्या न कार्यान्तरचुम्बिचित्ता' इति नैषधे। पुनः शमिनां शशी साधूनां सुधाकरः सूरिः। द्वावपि पथि चित्रशालिकावर्त्मनि प्रयान्तौ गच्छन्तौ सन्तौ परां प्रकृष्टां श्रियं शोभां श्रयतो लभेते। उत्प्रेक्ष्यते—कथंचित्केनापि कुतूहलादिना प्रकारेण एकत्र मिलित्वा उर्व्यां भूमण्डले केलिभिः क्रीडाभिः शालते शोभते इत्येवंशीलौ विभावरीवल्लभभानुमालिनौ चन्द्रसूर्याविव। तस्मिन् समये सूरिदर्शनादतीव शान्तीभूतः साहिश्चन्द्रतुल्यः, सूरिस्तु पुण्यप्रतापैस्तदाधिकं दीप्यमानत्वाद्भानूपमो दृश्यते॥

विमुच्य कण्ठं क्षितिपाकशासनो दृशं दिदेश द्विरदद्विपन्निव।
तथा स्थितानेष गवेषयंस्ततोऽनगारपारीन्द्रमुनीनजूहवत्॥ ४॥

क्षितिपाकशासनो धात्रीसुत्रामा साहिः कण्ठं ग्रीवां विमुच्य चकितत्वं प्रकाश्य

रहसि वा प्रकटं वा नर्म क्रीडा तदेव नर्मदा नैकलाचलजाता नदी नर्मदानाम्नी तस्या हृदो द्रहस्तस्यावगाहे विलोडने जलकेलिविधौ वा न द्विरदायितं गजवदाचरितम्। प्रायो विन्ध्यपर्वतोत्पन्ना हस्तिनो विन्ध्योपकण्ठप्रवहन्नर्मदायामनिशं स्वैरं रमन्ते । यदु-क्तम्—'कौपं वारि विलोक्य वारणपते किं खिद्यसेनालसे प्रायो भाजनमस्य संप्रति भवांस्तत्पीयतामादरात् । उन्मत्तच्छबरीपुलिन्दललनापीनस्तनास्फालनस्फालीभूतमहो-र्मिनिर्मलजला दूरे धुनी नर्मदा ॥' इति गजाष्टके। पुनर्हे भूमण्डलाखण्डल, यो हेतीश्चाप-चक्रशूलगदाप्रमुखानि प्रहरणानि न बिभर्ति । क इव । तनूनपादिव । यथा 'वह्निर्हेती-र्ज्वाला धत्ते । 'हेतिः प्रहरणं शस्त्रम्', तथा 'हेतिः कीलाशिखा ज्वाला' इति द्विकमपि हैम्याम् । पुनर्यः हिंस्रवत् घातुक इव अहितान्वैरिणो न हिनस्ति न घातयति । पुनर्यः भवं संसारं भिनत्ति भनक्ति । क इव । करीव। यथा हस्ती पञ्जरं काष्ठकोष्ठं भिनत्ति भेद-यति । 'जयकोईमणकनेलनसलभयपजरकुजर' इत्यभयदेवसूरिकृतजयतिहुअणस्तोत्रे ॥ त्रिभिर्विशेषकम् ॥ इति देवस्वरूपम् ॥

परिग्रहं यो जलमम्बुदाविलं मरालवन्मुञ्चति सद्म संसृतेः ।
प्रबोधशालीनिह यः प्ररोपयेत्कृपारसापूरितमानसावनौ ॥ २१ ॥
प्रवर्तको यः सुगतेश्च दुर्गतेर्व्यनक्ति मार्गौ रविवच्छुभाशुभौ ।
भवात्तरन्स्वेन परांश्च तारयस्तरीव वार्धौ गुरुरीदृशः स्मृतः ॥ २२ ॥

हे साहे, यः संसृतेः संसारस्य सद्म गृहभूतं परिग्रहं धन-धान्य-क्षेत्र-वस्तु-रूप्य-सुवर्ण-कुप्य-द्विपद-चतुष्पदरूपं नवविधमपि स्वयमात्मना मुञ्चति जहाति । किंवत् । मरालवत् । यथा राजहंसः अम्बुदेन प्रावृषेण्यप्रबलजलधरवारिवर्षणेन जम्बालजलप्र-वाहगमनेनाविलं पङ्किलीकृतं जलं सरसीसलिलं त्यजति । 'गङ्गानीरमपि त्यजन्ति कलुषं ते राजहंसा वयम्' इति सूक्ते । पुनर्यः कृपारसेन कारुण्यामृतेन पूरिताया भरिताया पूर्णी-कृताया वा मानसं भविजनमन एवावनिर्भूमिस्तस्यां प्रबोधाः सम्यग्ज्ञानानि त एव शालयः कलमास्तान्प्ररोपयेत् वपेत् । जलभृतभूमौ हि शालय उत्पद्यन्ते इति स्थितिः । पुनर्यो रविवत्सूर्य इव शुभाशुभौ समीचीनासमीचीनौ मार्गौ पन्थानौ व्यनक्ति प्रकट-यति । किंभूतौ मार्गौ । सुगतेः स्वर्गापवर्गस्य, तथा दुर्गतेर्नरकतिर्यक्त्वादिकुगतेः प्र-वर्तकः । हे साहे, ईदृश ईदृग्लक्षणो गृह्णाति तत्त्वं सम्यग्मार्गं च स्वयं विराय भव्य-जन्तूनुपदिशतीति गुरुः स्मृतः शास्त्रेषु कथितः । किं कुर्वन् । भवात्संसारात् स्वेना-त्मना तरन्पारं प्राप्नुवन् च पुनः परानन्यान् भविकांस्तारयन् उत्तारयन् परपारं प्रापयन् । केव । तरीव। यथा नौर्वार्धौ समुद्रे स्वेन तरति पारं गच्छति परान् स्वाश्रितान् लोकांश्च तारयति परतीरं लम्भयति ॥ युग्मम् ॥ इति गुरुस्वरूपम् ॥

जिनास्यपद्मे मकरन्दविभ्रमं दधद्विपत्पूषसुताप्रलम्बभित् ।
महोदयस्वर्गितरोरिवाङ्कुरः कृपापयोराशितमस्विनीपतिः ॥ २३ ॥

न निक्षिपामीत्यर्थः । ततः सूरीकथनानन्तरं साहिरभ्यधाद्वक्ति स्म । हे सूरक, अत्र मच्चित्रशालिकाया दुलीचकाच्छादितायां च भूमौ कदापि कस्मिन्नपि समये वर्षाग्रीष्मादावपि कश्चन कोऽपि कीटकादिरसुमान् जीवो न भवेत् नैव स्यात् । क इव । यथा सुराणां मन्दिरे देवगृहे स्वर्गे भूचरो नरो मनुजो न स्यात् ॥

गुरुर्जगावाचरणं तथाप्यदः पदं निभाल्यैव ददे परत्र नो ।
यतः स्वकीयाचरणं मुमुक्षुणा प्रयत्नतो रक्ष्यममर्त्यरत्नवत् ॥ ८ ॥

गुरुः सूरिः पुनर्जगौ जल्पति स्म—हे साहे, यद्यपि श्रीमच्चित्रशालिकायां रत्नकचारिमदुलीचकस्य अध उपरि वा सर्वथापि कीटिकादिजन्तुर्न स्यात्, तथापि जीवाभावे सत्यपि ममाद एतदाचरणमाचारो वर्तते यदहं निभाल्य अग्रेतनां युगप्रमाणां भूमिकां नेत्राभ्यां विलोक्यैव पदं ददे स्थापयामि, न परत्र चक्षुरनवेक्षिते स्थाने सर्वथापि क्रमं न मुञ्चामि । 'दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलम् । सत्यपूतं वदेद्वाक्यं मनःपूतं समाचरेत् ॥' इति नीतिशास्त्रेऽपि । हे साहे, यतः कारणान्मुमुक्षुणा संसारकारागारात्स्वं मोचयितुमिच्छता यतिना स्वकीयाचरणं निजस्वाचारः प्रयत्नतः प्रमादनिद्राविकथादीनां निराकरणाद्रक्ष्यं सम्यक्परिपालनीयम् । किंवत् । अमर्त्यरत्नवत् । यथा सत्पुरुषेण केनचिद्देवेन दत्तं चिन्तामणिं सम्यक्प्रयत्नेन कृत्वा रक्ष्यते ॥

ततः स यावत्कुरुते तदुच्चकैर्बभूव तावत्प्रकटैव कीटिका ।
व्रतिप्रभोरप्रतिमां कृपालुतां पुरः क्षितीन्दोर्गदितुं किमात्मना ॥ ९ ॥

ततो गुरुगदितानन्तरं सोऽकब्बरो यावद्दुलीचकं करे गृहीत्वा पश्चादुच्चकैः करोति ऊर्ध्वमुत्पाटयति, तावत्तत्र प्रदेशे कीटिकैव प्रकटा साहिलोचनगोचरा बभूव तदा नृपेण स्वदृष्ट्या दृष्टा । उत्प्रेक्ष्यते—क्षितीन्दोः पुरो राज्ञोऽग्रे व्रतिप्रभोः सूरेः अप्रतिममसाधारणां कृपालुतां दयावत्तामात्मनैव स्वेन गदितुं कथयितुमिव प्रकटीकर्तुमिव ॥

ततः क्षितौ स्वस्य यथैकभूपतां गुरोस्तथाद्वैतदयाधिनाथताम् ।
अवेत्य चित्तेऽतिचमत्कृतिं वहन्मुहुर्मुहुस्तं प्रशशंस भूमिमान् ॥ १० ॥

ततः कीटिकादर्शनानन्तरं स भूमिमानकब्बरसाहिर्मुहुर्मुहुर्वारंवारं तं सूरीन्द्रं प्रशशंस श्लाघते स्म । किं कुर्वन् । चित्ते मनस्यतिचमत्कृतिमतिशयेनाश्चर्यं वहन् दधत् । किं कृत्वा । क्षितौ क्षितिमण्डले स्वस्यात्मनो यथा येन प्रकारेण अन्यराजसु तादृक्स्फूर्तिमाहात्म्याद्यभावात् स्वस्यैव तदद्वैतत्वेन एकभूपतामद्वैतपातिसाहितां तथा तेन प्रकारेण गुरोरद्वैतामनन्यसामान्यां दयायाः कृपाया अधिनाथतां स्वामित्वम् । कृपालुतामित्यर्थः । चित्ते स्वमानसे अवेत्य ज्ञात्वा । चित्ते इत्युभयत्रापि योजनीयम् ॥

कृपालुता वः किमहो महीयसीमुत स्तुवे स्वाचरणप्रवीणताम् ।
पयोदवत्किं तु परोपकारितां निरूपकं वा भवतां शुचेः पथः ॥ ११ ॥

समादाराधिराणि शक्तिन्कि धत्ते । 'शक्तयस्तिस्रः प्रभुत्वोत्साहमन्त्रजाः' इति हैम्याम् । 'विद्यापना शक्तिरिवार्थसञ्चयम्' इति रघौ । पुनः क इव । सुधीरिव । यथा विद्वान् विद्याना व्याकरण-साहित्य-तर्कलक्षणाना त्रितयीं बिभर्ति । भुवनचलिवक्षिविद्या सध्या-गजताजिना भुवननेत्राणि' इति काव्यकल्पलतायाम् । त्रिसख्याकानि ॥ इति साहेः पुरः सूरिभिः सम्य तत्त्वत्रयाराधन प्रोक्तम् ॥

कति व्रतानीह वहध्वमात्मना परेण शक्यानि न वोढुमद्रिवत् ।
इद नृपे पृच्छति भारती विभोर्मुखारविन्दे मधुपी वभूवुषी ॥ ३७ ॥

विभोहीरगुरोर्मुखारविन्दे वदनपद्मे भारती वाणी मधुपी वभूवुषी भ्रमरी सजायते स्म । प्रोवाचेत्यर्थः । कस्मिन् सति । नृपे अकब्बरे इद निगद्यमान पृच्छति प्रश्न कुर्वति सति । इद किम् । हे सूरय', इह जगति सयममार्गे वा यूयमात्मना स्वेन कति कियत्सख्याकानि व्रतानि नियमविशेषान् वहध्व धारयत पालयत वा यानि व्रतानि परेण असत्त्वेन क्लीवप्रायेण पुसा वोढु धारयितु न शक्यानि न समर्थानि । किवत् । अद्रिवत् । यथा विष्णुव्यतिरेकेणेत्यध्याहार । पर्वतोऽन्येन केनचिद्वोढु न शक्यते । 'सोमसिन्धुर्जगन्नाथो गोवर्धनधरोऽपि च' इति विष्णुनामसु हैम्याम् ॥ इति सूरीणा कियद्व्रतधारणविषये साहे प्रश्न ॥

वसुधराभोग इवामराचलान्सुपर्वसालानिव काञ्चनाचलः ।
अह वहे पञ्चमहाव्रतानमून्स्वविक्रमाधःकृतपाकशासन ॥ ३८ ॥ ✓

हे स्वविक्रमेण निजभुजवीर्येण कृत्वा अध कृतो हीनीकृतस्तिरस्कार नीतो वा पाक-शासनो वज्रपाणिर्येन तस्य सबोधनम् । अहममूनग्रे वक्ष्यमाणान्प्रोच्यमानान्पञ्चसख्या-कान्महाव्रतान् सर्वेभ्योऽप्यतिशायिनियमान्वहे बिभर्मि । व्रतशब्दः पुनपुसके । 'व्रतोपवीती पलिलिन्तौ वसन्त' इति लिङ्गानुशासने । क इव । वसुधराभोग इव । यथा वसुधराया सार्धद्वयद्वीपलक्षणमनुष्यक्षेत्रभूमेराभोगो विस्तारः पञ्चामराचलान्मेरून् बिभर्ति । एको जम्बूद्वीपे, द्वितीयो धातुकीखण्डपूर्वार्धे, तृतीयो धातुकीखण्डपश्चिमार्धे, चतुर्थः पुष्करार्धपूर्वार्धे, पञ्चम पुष्करार्धपश्चिमार्धे, एव पञ्च काञ्चनाचलान् धत्ते । पुनः क इव । काञ्चनाचल इव । यथा मेरु' कल्प-पारिजात-मन्दार-हरिचन्दन-सताना-भिधानान्पञ्च सुपर्वसालान् सुरद्रुमान् कलयति ॥

क्षितीन्द्र तेषामिदमादिमं व्रतं समन्तवो मन्तुमुचोऽपि जन्तवः ।
न पञ्चतागोचरचारिणः क्वचित्त्रिधा क्रियन्ते निजनन्दना इव ॥ ३९ ॥

हे क्षितीन्द्र, तेषा पञ्चाना महाव्रताना मध्ये इदमुच्यमानमादिम प्रथम व्रत वर्तते । तदेवाह—यत्क्वचित्प्रदेशे ग्रामे अरण्ये वा रहसि प्रकट वा प्रमोदेन दर्पेण सकल्पेन वा त्रिधा मनोवाक्काये' कृत्वा समन्तव. सापराधाः अपि पुन मन्तुमपराध मुञ्चन्ति

अनश्वरी श्रीर्युवता किमु ध्रुवा जरापि जीर्णा शमनः शशाम किम्।
यदेष जन्तुर्विषयाभिलाषुको दधाति धर्मे न मनो मनागपि ॥ २१॥

हे नृप, श्रीर्लक्ष्मीरनश्वरी शाश्वती अस्थिरैव । यदुक्तम्—'सायरवण्णमुरारिसि चन्दसरीसा भाय । लच्छी हीण्डइ घरि घरि महिला एह सहाय ॥' इति पुनर्युवता यौवनं ध्रुवा नित्या कदापि न यास्यति । 'यौवन जाइ वेगिनदीर्युजलहइ । इन्दुचन्दुनागिन्दु कहो कुणथिररहइ ॥' इत्युक्तेः । पुनर्जरा विस्रसा यौवनवयोहानिलक्षणावस्था जीर्णा स्थविरीभूता स्थातुमुत्थातुमप्यशक्ता जाता किम् यज्जराशक्तभावान्नागमिष्यति । यदुक्तम्—'यौवनकेरेदीहडइ कीजइ मित्त दुच्चार । कालिज वडपण आवशइ को न विवार ॥' इति । पुनः शमनो यमः शशाम शान्तीभूतः । किंभूतः । यदथ कमपि न व्यापादयिष्यामि मृतो वा यत्कारणादेष जन्तुर्जीवो विषयाणां कामभोगादिसुखानामभिलाषुकः कामयिता कामुको लोलुपः सन् धर्मे सुकृताचरणे मनागीषन्मात्रमपि मनश्चित्त न दधाति स्थापयति ॥

प्रसृत्वरः शंबरवैरिविक्रमोऽचिरात्सृजेद्विक्रमिणोऽप्यविक्रमान्।
उदीयतेऽस्मादपि राजयक्ष्मणा तमोभरेणेव तमस्विनीमुखात् ॥ २२॥

हे साहे, प्रसृत्वरः प्रसरणशीलः प्रवर्धमानः शंबरनामा दैत्यविशेषस्तस्य वैरी तस्य हन्ता स्मरस्तस्य विक्रमो वीर्यं प्रतापः स्मरी अपस्मारप्रसारः मदनोन्मादः अचिरादल्पकालादेव विक्रमिणोऽपि महाशक्तिमतोऽपि अविक्रमान् निर्वीर्यान् अबलान् सृजेत् कुर्यात् अपि पुनरस्मान्मदातिरेकात् राजयक्ष्मणा क्षयरोगेण उदीयते प्रादुर्भूयते । केनेव । तमोभरेणेव । यथा तमस्विनीमुखात्प्रदोषात्सध्यासमयादन्धकारेण स्फूर्यते ॥

मनोभुवा मोह्यमानमानसो महाहसां संहतिमात्मनाचरन्।
लभेत कश्चिन्नरकेषु कारणामिहैव शूलामिव पारिपन्थिकः ॥ २३॥

कश्चित्पापीयान् पुमान्नरकेषु कारणा सप्तस्वपि दुर्गतिषु परमाधार्मिकनिर्मिता क्षेत्रोद्भूता महारोगशीतोष्णादिजनिता कासश्वासकठोदरादिकां तीव्रवेदना लभेत प्राप्नुयात् । क इव । पारिपन्थिक इव । यथा परस्वापहर्ता तस्करो नरकेषु नारकित्वेन नरकोद्भूता महतीं पीडा लभते । कामिव । शूलामिव । यथा इह लोके च शूला मार्गमाग...राधिरोपणतीक्ष्णतदादिका महतीं व्यथा प्राप्नोति । जन्तुः किं कुर्वन् । मनोभुवा ...तेन कामेन मोह्यमान मोहं मूर्छा सदसद्विवेचनचातुरीविकलता नीयमान मानस...यस्य तादृशः सन्महाहसा प्रबलपापाना संहतिं श्रेणीमाचरन् । यदुक्त नैष...ल्याः पुरस्तात्—'दयुना नलः पापभीरुरपि त्वत्प्रापकान्नस्यति नैनसोऽग' इति ॥

...न्तदुःखाद्विषयात्तु बिभ्यता विमुक्तसङ्गेन कृपानुपातिना।
...सौभाग्यवता सकामुकीक्रियेत केनापि मरुद्वृन्दिरा ॥ २४॥

उनयत्र योज्यते । अदशा विरुद्धदशा । तदन्यतद्विरुद्धतदभावेषु नञ् वर्तते सारख-
तोपे । दुर्दशा सैव लोलदकामिनी तस्याः प्रियसखी दृष्टवयधीव । च पुनरुत्प्रेक्ष्यते—
अर्जिना प्राणिना गुणाना शीलब्रह्मार्जवमार्दवादीनामावलीनां धोरणीनां समूहनी समा-
र्जनीव । लोके 'सारवणी' इति प्रसिद्धा । केषामिव । रजसामिव । यथा धूलीना गृहा-
दिकचवरकाणा प्रमार्जनकारिका । निष्काशयित्रीत्यर्थः ॥ इति द्वितीय मतम् ॥

तृणादि नोपाददते च किंचनाप्यदीयमानं मुनयो महीमणे ।
पदं किलाविश्वसितेरिवैकदक्ततेररिष्टः पृथिवीपुरंदर ॥ ४३ ॥

हे महीमणे भूमीरत्न, च पुनर्मुनयः साधवः तृणादि दन्तशोधनमात्रप्रमुखं किंचि-
दपि वस्तु अदीयमानं केनाप्यवितीर्यमाणं नोपाददते नैव गृह्णन्ति । हे पृथिवीपुरंदर
मेदिनीमण्डलाखण्डल, किलेति निश्चितं श्रूयते वा । हेतोर्वा । 'किल संभाव्यवार्तयोः ।
हेत्वरुच्योरलीके च' इत्यनेकार्थः । अस्माकं तु सर्वथापि तत्कारणाभावात् लोके जने
एवाकर्ण्यते । अदत्तादानं वस्तु स्वामिना कथमप्यदीयमानवस्तुनो ग्रहणमविश्वसितेरवि-
श्वासस्य पदं स्थानमास्ते । क इव । अरिष्ट इव । यथा निम्बतरुः । 'निम्बोऽरिष्टः पिचु-
मन्दः' इति हैम्याम् । एकदक्ततेः काकश्रेण्या निवासस्थानं स्यात् ॥

अदत्तमादत्त न यस्त्रिधापि तं वृणोति विद्येव विनीतमिन्दिरा ।
मृगी मृगेन्द्रादिव दुर्गतिस्ततः प्रयाति दूरादवनीनभोमणे ॥ ४४ ॥

हे अवनीनभोमणे प्रतापवत्त्वाद्भूमीभानो, यः पुमान् त्रिधापि मनोवचनतनुभिः
कृत्वा अदत्तं वस्तु स्वामिना न वितीर्णं यो नादत्त न जग्राह तं पुमांसं इन्दिरा
लक्ष्मीः स्वयमागत्य वृणोति वरयति । भजते इत्यर्थः । कमिव । विनीतमिव । यथा
विनयवन्तं शिष्यं विद्या निषेवते पुनस्ततस्तस्मान्निःस्पृहान्नराद्दुर्गतिर्नरकादिकुगतिर्दूरा-
त्प्रयाति पलायते । क इव । मृगीव । यथा मृगेन्द्रान्मृगी कुरङ्गी दूरात्प्रयाति ॥ इति
तृतीयं मतम् ॥

पराङ्मुखो स्याद्विषयाद्व्रतिव्रजो निकुञ्जवासीव तदेकभूमिषु ।
क्षमाधरो येन महोदयंगमी वशास्वनीतिष्विव कोऽनुरज्यते ॥ ४५ ॥

हे साहे, व्रतिव्रजो मुनिगणो विषयात् शब्द–रूप–गन्ध–रस–स्पर्शलक्षणात्पञ्चप्रमा-
णाद्गोचरात्पराङ्मुखो स्यात् विमुखो विरक्तो भवेत् । क इव । निकुञ्जवासीव । यथा वने
एव वसनशीलो जन्तुः श्वापदादिर्विषयाज्जनपदाद्विमुखः स्यात्कदाचिन्नगरग्रामादिषु नाग-
च्छेत् । येन कारणेन क्षमायाः क्षान्तेः क्षमाया उपशमस्य वा धरो धर्ता पुनर्महोदयं
मोक्षं गमिष्यति यास्यतीत्येवंशील साधुस्तदेकभूमिषु तेषां पञ्चानामपि विषयाणामेका
अद्वैता भूमयो वासवेश्मानि । नहि वाणिनीं विना विषयाः सुखाय स्युः । तादृशीषु
वशासु स्त्रीषु न अनुरज्यते अनुरक्तीभवति । कास्विव । अनीतिष्विव । यथा क्षमाधरो
युवराजपदवीं प्रापितः सर्वराज्यधुरंधरः पुनर्महान्तं सर्वातिशायिनमुदयं राज्यैश्वर्यं

कर्तुं योग्यो भवति सेवनीयः स्यात्। गुरुः किं कुर्वन्। अवद्येन पापेन वन्ध्यान्। 'अवद्यमुक्तेः पथि यः प्रवर्तते' इति सिन्दूरप्रकरे। सर्वथा पापनिर्मुक्ता पदवीं मार्गं प्ररूपयन्। गुरोर्गुरुरिति विशेषणमपि तत्त्वोपदेष्टा हिताहितनिरूपकः। च पुनः सुधाब्धिवत्क्षीरसमुद्र इव अमृतं सुधा मोक्षं च ददते विश्राणयति। अथ 'दद दाने' धातुरात्मनेपदी भ्वादिश्च। स धर्मः किंविधः कीदृक्प्रकारः॥ युग्मम्॥ इति साहेदेवगुरुन्प्रति देवगुरुधर्माणां प्रश्नः॥

जगन्ति यस्यानुभवेऽनुविम्बितामिवात्मदर्शे दधते धरापते।
जिगाय चाष्टादशदोषविद्विषो नवद्वयद्वीपभुवो जयीव यः॥ २८॥
तरङ्गिणीवेणिमिवाम्भसां प्रभुर्न चाङ्कपालीं नयते नितम्बिनीम्।
क्वचित्पुनर्यस्य न नर्मनर्मदाह्रदावगाहे द्विरदायितं हृदा॥ २९॥
बिभर्ति हेतीर्न तनूनपादिवाहितान्पुनर्यो न हिनस्ति हिंस्रवत्।
भवं भिनत्ति स करीव पञ्जरं दधाति देवः स नमस्क्रियार्हतीम्॥ ३०॥

हे धरापते, स दीव्यति क्रीडति त्रैलोक्यैश्वर्यलक्ष्म्या ब्रह्मश्रिया वा स देवः परमेश्वरो निखिलनरसुरासुराणामपि नायकः नमस्क्रियाया नमस्कृतेरार्हतीमौचितीं योग्यतां दधाति बिभर्ति। 'उडुपरिषदः किं नार्हन्ती निशः किमनौचिती' इति नैषधे। आर्हन्ती विकल्पत्वेन रूपद्वयी आर्हन्ती आर्हती च। अर्हतो भाव आर्हती। 'अणृतृण ईप्' इति प्रत्ययः। इति सिद्धिरपि। स देवः प्रणामयोग्यः स्यात्। स कः। यस्य परमेशितुरनुभवे ज्ञाने जगन्ति त्रीणि–सप्त–चतुर्दश–एकविंशतिर्वा भुवनानि अनुविम्बन्ति सङ्क्रामन्ती[illegible]वशीलानि अनुविम्बीनि अनुविम्बिना भावोऽनुविम्बिता प्रतिविम्बशीलता दधते बिभ्रति। कस्मिन्निव। आत्मदर्श इव। यथा निर्मलदर्पणमण्डले क्वापि भूधनधनिगृहभित्त्यादौ चित्रीकृतानि त्रीणि जगन्ति प्रतिफलन्ति। च पुनर्यः [illegible] देवो दानान्तराय–लाभान्तराय–वीर्यान्तराय–भोगान्तराय–उपभोगान्तराय–हास्य–रति–अरति–भीति–जुगुप्सा–शोक–काम–मिथ्यात्व–अज्ञान–निद्रा–अविरति–राग–द्वेषनामानोऽष्टादशसंख्याका दोषा अपगुणास्त एव विद्विषो महावैरिणो जिगाय पराजितवान्। क इव। जयीव। यथा पराजितवरो राजा नवसंख्याकानां [illegible] द्वय नवद्वयं च ते द्वीपाश्च नवद्वयद्वीपाः इति नैषधटीकाकृतसमासः। [illegible] दशद्वीपानां भुवो भूमीप्रदेशान् जयति स्ववशीकुरुते। 'नवद्वयद्वीप[illegible]' इति नैषधे। तथा 'अष्टादशद्वीपनिखातयूपः' इति रघौ। च पुनर्यः परमेश्वरो [illegible] नितम्बिनीं कान्तामङ्कपालीमालिङ्गनं न नयते न प्रापयति। 'आलिङ्गनं परिरम्भः [illegible] उपगूहनम्। अङ्कपालिः परीरम्भः' इति हैम्याम्। क इव। प्रभुरिव। यथा [illegible] पानीयानां स्वामी समुद्रस्तरङ्गिणीवेणिं नदीप्रवाहं नदीपूरं नदीनां [illegible] नयते लम्भयति। पुनर्यस्य परमात्मनो हृदा हृदयेन [illegible]

पुत्रो नन्दनः । 'उद्वहोऽङ्गात्मजः सूनुस्तनयो दारकः सुतः । पुत्रो दुहितरि स्त्रीत्वे' इति हैम्याम् । 'स्त्रीत्वे स्त्रीलिङ्गे वाच्ये सति नन्दननामशब्दो दुहितरि पुत्र्या स्यु' इति तदवचूरिः । लक्ष्मीस्तद्रूपा वीरुद्वल्ली तत्र । तदुन्मूलने इत्यर्थः । द्विपेन्द्रति ऐरावणोऽन्यो वा गजराजस्तद्वदाचरति । पुनः शमः प्रशान्तता स एवारविन्द कमलं तस्मिंस्तुहिनोदबिन्दति हिमजलकणगण इवाचरति । हिमानीयतीत्यर्थः । अपि पुनर्व्रतानि पञ्चमहाव्रतानि द्वादशाणुव्रतानि वा अन्ये नियमविशेषा वा त एवाम्बुवाहा. पयोधरास्तेषु गन्धवाहति प्रबलप्रभञ्जन इवाचरति । पुनर्व्रीडो लज्जा स एव वह्वा सरित् तस्याः पयःप्लवे पानीयपूरे निदाघति ग्रीष्मकालति । 'जेणिदिनिपवनप्रचण्डलूअझलतापतउक्का । जिणिदिनिनदीनिवाणवाणवाविकूआ सवसुक्का ॥' निदाघे हि प्रायोऽखिला जलाशया. शुष्यन्ति । तथा व्रीडशब्द अकारान्तोऽप्यस्ति । 'व्रीडन व्रीडा चित्तसंकोच. व्रीडोऽपि' इति हेमीवृत्तौ । तथा 'त्वयि स्मरव्रीडसमस्यानया' इति नैषधे । च पुनर्महत्त्व महिमा तदेव गोत्र. पर्वतः तत्राचलच्छेदे सहस्रनेत्रति इन्द्र इवाचरति । पुनर्गुणाः सदाचरणानि त एव द्रुमा वृक्षास्तेषा द्रोणिषु श्रेणिषु । तज्ज्वालने इत्यर्थः । मन्त्रजिह्वति । अर्चादावानल इवाचरति । 'शिखी पल्लवशङ्कया विचिनुते सान्द्रद्रुमद्रोणिषु' इति चम्पूकथायाम् । 'द्रुमद्रोणयो वृक्षश्रेणय.' इति तट्टिप्पनके । 'सर्वप्रातिपदिकेभ्यः क्विप् वाचारे इत्येको कृष्ण इवाचरतीति कृष्णति । एव स्वति स्वामास' इति प्रक्रियाकौमुद्याम् । तस्मादत्र सर्वत्रापि आचारार्थे क्विप्प्रत्ययः ॥ युग्मम् ॥

कृतप्रदोषा पितृसूरिवाशनिश्चला वनीवन्मदनावगाहिनी ।
अहेर्महेलेव च जिह्मगामिनी वधूः पयोधेरिव निम्नगामिनी ॥ ९० ॥
जलैर्विहाया इव मेघमालिका विवर्धिनी वा भवपद्धतेरधैः ।
मनः शमाद्वैतसुखानुषङ्गिना वशीकरोतीश वशा न योगिनाम् ॥ ९१ ॥

हे ईश अर्थात् हे अवनीनायक, इह जगति वशा कामिनी योगिनां मनोवाक्काययोगभाजां वशीकृतात्मनां मुनीनां मनो मानसं न वशीकरोति न मोहयति न हरति । यदुक्तम्—'अकामस्य तृणं नारी निरीहस्य तृणं नृपः । तृणं ज्ञानवतां सर्वं तृणं शूरस्य जीवितम् ॥' इति वचनात् । किंभूतानां योगिनाम् । शमेन शान्तभावेनाद्वैतमसाधारणं यत्सुखं सात तस्यानुषङ्ग आस्वादो विद्यते एषाम् । किंभूता वशा । कृतप्रदोषा कृता उत्पादिता. प्रकर्षेण दोषा दम्भादयः । स्त्रीजातौ दाम्भिकता । तथा 'स्त्रीणां निकृतं कैतवम्' इत्यादिसूक्तोक्ता विविधा अपगुणा यया । केव । पितृसूरिव । यथा सन्ध्या कृतप्रदोषो यामिनीमुखं यया तादृशी स्यात् । पुन. किंभूता । चला अतिचञ्चलस्वभावा । केव । अशनिरिव । अत्र इवशब्दो काकाक्षिगोलकन्यायेन उभयत्रापि योज्यते । ततो यथा अशनिर्विद्युदतिचपला आकालिकी शतह्रदा । 'चञ्चला चपलाशनि ' इति हैम्याम् । 'अशानिर्द्वयोविद्युतोः' इत्यनेकार्थे । पुन. किंभूता । मदनावगाहिनी । मदनं प्रबलं दर्पबला-

कर्तुं योग्यो भवति सेवनीयः स्यात्। गुरुः किं कुर्वन्। अवद्येन पापेन वन्ध्याम्। 'अवद्यमुक्तेः पथि यः प्रवर्तते' इति सिन्दूरप्रकरे। सर्वथा पापनिर्मुक्ता पदवीं मार्गं प्ररूपयन्। गुरोर्गुरुरिति विशेषणमपि तत्त्वोपदेष्टा हिताहितनिरूपकः। च पुनः दुग्धाब्धिवत्क्षीरसमुद्र इव अमृतं सुधां मोक्षं च ददते विश्राणयति। अथ 'दद दाने' धातुरात्मनेपदी भ्वादिश्च। स धर्मः किंविधः कीदृक्प्रकारः॥ युग्मम्॥ इति साहेदेवगुरून्प्रति देवगुरुधर्माणां प्रश्नः॥

जगन्ति यस्यानुभवेऽनुबिम्बितामिवात्मदर्शे दधते धरापते।
जिगाय चाष्टादशदोषविद्विषो नवद्वयद्वीपभुवो जयीव यः॥ २८॥
तरङ्गिणीवेणिमिवाम्भसां प्रभुर्न चाङ्कपालीं नयते नितम्बिनीम्।
क्वचित्पुनर्यस्य न नर्मनर्मदाहृदावगाहे द्विरदायितं हृदा॥ २९॥
बिभर्ति हेतीर्न तनूनपादिवाहितान्पुनर्यो न हिनस्ति हिंस्रवत्।
भवं भिनत्ति स्म करीव पञ्जरं दधाति देवः स नमस्क्रियार्हतीम्॥ ३०॥

हे धरापते, स दीव्यति क्रीडति त्रैलोक्यैश्वर्यलक्ष्म्या ब्रह्मश्रिया वा स देवः परमेश्वरो निखिलनरसुरासुराणामपि नायकः नमस्क्रियाया नमस्कृतेरार्हतीमौचित्यं योग्यतां दधाति बिभर्ति। 'उडुपरिषदः किं नार्हन्ती निशः किमनौचिती' इति नैषधे। अत्र दुर्विकल्पत्वेन रूपद्वयी आर्हन्ती आर्हती च। अर्हतो भाव आर्हती। 'अणॄण ईप्' इत्यौ[illegible] लयः। इति सिद्धिरपि। स देवः प्रणामयोग्यः स्यात्। स कः। यस्य परमेशितुरनुभवज्ञाने जगन्ति त्रीणि–सप्त–चतुर्दश–एकविंशतिर्वा भुवनानि अनुबिम्बन्ति [illegible] वशीलानि अनुबिम्बीनि अनुबिम्बिना भावोऽनुबिम्बिता प्रतिबिम्बशीलता दधते बिभ्रति। कस्मिन्निव। आत्मदर्श इव। यथा निर्मलदर्पणमण्डले क्वापि भूधनवनिगृहचित्रशाला[illegible] दिभित्त्यादौ चित्रीकृतानि त्रीणि जगन्ति प्रतिफलन्ति। च पुनर्ये भू[illegible] देवो दानान्तराय–लाभान्तराय–वीर्यान्तराय–भोगान्तराय–उपभोगान्तराय–हास्य–रति–अरति–भीति–जुगुप्सा–शोक–काम–मिथ्यात्व–अज्ञान–निद्रा–अविरति–राग–द्वेषनामानोऽष्टादशसंख्याका दोषा अपगुणास्त एव विद्विषो महावैरिणो जिगाय जितवान्। क इव। जयीव। यथा परराजजित्वरो राजा नवसंख्या[illegible] द्वयं नवद्वयं च ते द्वीपाश्च नवद्वयद्वीपाः इति नैषधवृत्तिनरहरिकृतसमास[illegible] दशद्वीपानां भुवो भूमीप्रदेशान् जयति स्ववशीकुरुते। 'नवद्वयद्वीपपृथग्[illegible]' इति नैषधे। तथा 'अष्टादशद्वीपनिखातयूप' इति रघौ। च पुनः[illegible] [illegible]म्बिनीं कान्तामङ्कपालीमालिङ्गनं न नयते न प्रापयति। 'आलिङ्गनं [illegible] उपगूहनम्। अङ्कपाली परीरम्भः' इति हैम्याम्। क इव। प्रभुरिव। [illegible] पानीयानां स्वामी समुद्रस्तरङ्गिणीवेणिं नदीप्रवाहं नदीपूरं नदीनां [illegible] नयते इन्नयति। पुनर्यस्य परमात्मनो हृदा हृदयेन [illegible]

त्यजन्ति ते निरपराधाः जन्तवः प्राणिनः पन्नतायाः पन्नत्वस्य मूर्तेर्गोचरे विचरन्ति व्रजन्तीति एवशीलाः नैव क्रियन्ते सर्वथा नैव हन्यन्ते। के इव। निजनन्दना इव। यथा स्वपुत्राः पन्नताया गोचराः केनचित्पित्रा न क्रियन्ते तथा सर्वेऽपि जगज्जन्तवः पाल्यन्ते एव॥

न देवदेवः परमेशितुः परः प्रतापवान्नापि पयोजिनीपतेः।
गुरुर्नमेरुर्न मरुन्मणेर्मणिस्तथा न धर्मोऽस्ति दयाविधेः परः॥ ४०॥

हे देवशब्देन राजभट्टारकादिरुच्यते। 'राजा भट्टारको देवः प्रयोज्याः पूज्यसंमताः' इति हैम्याम्। तथा 'देव त्वद्भुजदण्डदर्पगरिमोद्गीर्णप्रतापानल-', 'देवे दिविजयोद्यते' इति खण्डप्रशस्तौ। तथा 'देव त्वं जय काशि लुब्धकवधूहस्ते क्रिनेदलम्' इत्यादि भोजप्रबन्धादावपि। तथा 'देवेन किं न श्रुतम्' इति चम्पूकथानके। यथा परमेशितुः परमेश्वरात्परो देवो नास्ति। अथ वा परमेश्वरादपरः देवानां भवनपतिवानव्यन्तरज्योतिष्कवैमानिकानां सुराणामपि देवः पूज्यः एतावता देवाधिदेवः। अपरे सर्वे हरिहरपुरंदरादयो देवाः, परमेश्वरस्तु देवदेवः, तथा यथा पयोजिनीपतेः सूर्यात्परः प्रतापवान्महस्वी तेजस्वी नास्ति। पुनर्यथा मेरोर्लक्षयोजनप्रमाणात्सुदर्शननाम्नः स्वर्णाचलात् कोऽपि गुरुर्महान्नास्ति। सर्वेऽप्यपरेऽत्युच्चाश्चतुरशीतियोजनमानाः, अयं तु शतसहस्रयोजनोच्चैस्तरः। पुनर्यथा मरुन्मणेश्चिन्तारत्नात्परो मणिर्नास्ति वज्रपद्मरागकर्केतनमरकतेन्द्रनीललोहिताक्षपुलिन्दाञ्जनहंसगर्भादयोऽनेकेऽपि मणयः सन्ति, परं चिन्तामणिं विना सर्वकामकरः कोऽपि नास्ति। यथा दयानिधेः कृपाकरादन्यो धर्मो न वर्तते। 'नास्ति धर्मो दयापरः' इति गीतायाम्॥ इति प्रथमं व्रतम्॥

वदन्ति वाचंयमपुंगवास्त्रिधा मृषा न भाषामपि जीवितव्यये।
इयं यदंहःपटलीव दुर्गतेर्विमानताया अतिशायि कारणम्॥ ४१॥

हे साहे, वाचंयमपुंगवाः साधुसिन्धुराः जीवितव्यये प्राणत्यागेऽपि त्रिधा मनोवचनकायैः कृत्वा मृषा अलीकां भाषां वाचं न वदन्ति न ब्रुवन्ति। यत्कारणादियं मृषाभाषा विमानताया अवगणनायाः पदे पदे अपमानस्य अतिशयते सर्वेभ्योऽभ्यधिकं भवतीत्येवंशीलमतिशायि कारणं साधनं वर्तते। मिथ्याभाषी सर्वत्राप्यपमानं परानरं च प्राप्नुयात्। केव। अहःपटलीव। यथा अंहसां दुष्कृतानां पटली परम्परा दुर्गतेरतिशायि साधनमास्ते॥

यशःसुधांशोरपिधायिका कुहूरिवादशालोलदृशः प्रियासखी।
समूहनीवारजसामिवाङ्गिना गुणावलीनामनृता हि भारती॥ ४२॥

हे साहे, निश्चितमनृता असत्या भारती वाणी मृषा भाषा कुहूरमावास्येव यशः जगत्प्रसारिकीर्तिकलापः स एव सुधांशुश्चन्द्रमास्तस्यापिधायिका। 'व्रजति कुहूरुदेति नो दृशोरपिधायिका' इति नैषधे। पुनरुत्प्रेक्ष्यते—अत्र इवशब्दो पश्चाल्लातव्यः।

मनोनुगामिन्यः हृत्तलस्थायिन्यो वा । महत्त्वाद्बहुवचनम् । सिद्धयो मुक्तयोऽपि हस्ते ॥ युग्मम् ॥

गजोऽप्यजो गोष्पदमम्बुधिर्मृगो मृगाधिपः स्रग्भुजगस्तमी दिनम् ।
रणः क्षणश्चाल्पगिरिर्मरुद्गिरिस्त्रिधापि यो ब्रह्म बिभर्ति भूपते ॥ ५४ ॥

हे भूपते, यः पुमान् महिला वा त्रिधापि मनोवाक्कायैर्ब्रह्म शीलव्रतं परनारीसहोदरता बिभर्ति धत्ते, तस्य पुंसस्तस्याः स्त्रियो वा गजो मदोद्धुरसिन्धुरोऽपि अजश्छागप्रायः स्यात् । पुनरम्बुधिः समुद्रोऽपि गोष्पदं गोखुरोत्खातभूमिस्थजलमिव तेन तया चोल्लङ्घ्यते । पुनर्मृगाधिपः पञ्चाननोऽपि मृगो हरिण इव तस्या दूरं पलायते । पुनर्भुजगो विषधरोऽपि तेन स्रगिव कुसुममालिकेव तया चाकरे गृह्यते । तमी सान्धकारा रात्रिर्दिनमिव तस्य तस्या वा जायते । रणो घोरोऽपि सङ्ग्रामः क्षण उत्सव इव बिभर्ति । पुनर्मरुद्गिरिः सुराचलोऽपि अल्पगिरिः किंचिदुच्चपाषाणभूमिरिवावरुह्यते ॥ इति चतुर्थं ब्रह्मव्रतम् ॥

परिग्रहः संयमिनापवादवत्त्रिधापि नाङ्गीक्रियते कदाचन ।
तमस्तमीनामुदयादिवोरगाद्विषं यतो दोषभरः परिस्फुरेत् ॥ ५५ ॥

हे भूपते, संयमिना चारित्रवता साधुना त्रिधापि मनोवचनतनुभिरपि अपवादोऽपयश इव । कदाचन कस्मिन्नपि प्रस्तावे सुखे दुःखे वा सुकाले दुःकाले वा सुखाजीविकाया कष्टाजीविकाया वा परिग्रहो धनधान्यक्षेत्रवस्तुसुवर्णरूप्यकुप्यद्विपदचतुष्पदलक्षणो नाङ्गीक्रियते नाद्रियते । यतो यस्मात्परिग्रहाद्दोषाणां निकेतानि दाक्षिण्यलोभाद्यपगुणानां भरो गणः परिस्फुरेत् । किमिव । तम इव । यथा तमीनां कृष्णपक्षक्षपाणामुदयात्प्रकटीभावात्परिभावाद्वा तमो घरोऽन्धकारः स्फुरेत् । परि समन्तात्सर्वेविश्रान्तः स्फूर्तिमत्स्यात् विश्वव्यापिस्फूर्तिमद्भवेत् । पुनः किमिव । विषमिव । यथा उरगाद्भुजगमाद्गरलमाविर्भवेत् ॥

गिरीन्द्रमारोहति लङ्घतेऽम्बुधीन्प्रयाति जन्यं गहनं च गाहते ।
असूंस्तृणानीव सृजेन्निजाञ्जनस्तदुल्लसल्लोभविजृम्भितं विभो ॥ ५६ ॥

हे विभो हे साहे, यज्जनो लोकः गिरीन्द्रं तुङ्गशैलमारोहति पर्वतोपरितलशिखरशिखाया चढति, पुनर्यदम्बुधीन् समुद्रान् लङ्घते यानपात्रादिभिः कथं कथंचिदतिक्रामति अपारं पारावारं प्रतीर्य पारपारं याति । पुनर्यज्जन्यं दुराकलनीयरणाङ्गणं प्रयाति प्रविशति । च पुनर्गहनं भयानकं काननं कान्तारं गाहते सर्वतः परिभ्राम्यति । पुनर्जनो निजानात्मीयानसून्प्राणान् तृणानीव तृणप्रायान् सृजेत् कुर्यात् । हे राजन्, तत् पूर्वोक्तं सर्वमपि उल्लसन् वर्धमानः प्रकटीभवन् वा यो लोभस्तृष्णा तस्य विजृम्भितं विस्फूर्जितं प्रभावः ॥ इति पञ्चमं व्रतम् ॥

त्यजन्ति ते निरपराधाः जन्तवः प्राणिनः पञ्चतायाः पञ्चत्वस्य मृत्योर्गोचरे विषये चरन्ति व्रजन्तीति एवंशीलाः नैव क्रियन्ते सर्वथा नैव हन्यन्ते। के इव। निजनन्दना इव। यथा स्वपुत्राः पञ्चताया गोचराः केनचित्पित्रा न क्रियन्ते तथा सर्वेऽपि जगज्जन्तवः पाल्यन्ते एव॥

न देवदेवः परमेशितुः परः प्रतापवान्नापि पयोजिनीपतेः।
गुरुर्नमेरुर्न मरुन्मणेर्मणिस्तथा न धर्मोऽस्ति दयाविधेः परः॥ ४०॥

हे देवशब्देन राजभट्टारकादिरुच्यते। 'राजा भट्टारको देवः प्रयोज्याः पूज्यमतः' इति हैम्याम्। तथा 'देव त्वद्भुजदण्डदर्पगरिमोद्गीर्णप्रतापानल–', 'देवे दिग्विजयोद्यते' इति खण्डप्रशस्तौ। तथा 'देव त्वं जय काति लुब्धकवधूहस्ते किमेतत्फलम्' इत्यादि भोजप्रबन्धादावपि। तथा 'देवेन किं न श्रुतम्' इति चम्पूकथायाम्। यथा परमेशितुः परमेश्वरात्परो देवो नास्ति। अथ वा परमेश्वरादपरः देवाना भवनपतिवानव्यन्तरज्योतिष्कवैमानिकानां सुराणामपि देवः पूज्यः एतावता देवाधिदेवः। अपरे सर्वे हरिहरपुरंदरादयो देवाः, परमेश्वरस्तु देवदेवः, तथा यथा पयोजिनीपतेः सूर्यात्परः प्रतापवान्महस्वी तेजस्वी नास्ति। पुनर्यथा मेरोर्लक्षयोजनप्रमाणात्सुदर्शननाम्न स्वर्णाचलात् कोऽपि गुरुर्महान्नास्ति। सर्वेऽप्यपरेऽत्युच्चाश्चतुरशीतियोजनमानाः, अयं तु शतसहस्रयोजनोच्चैस्तरः। पुनर्यथा मरुन्मणेश्चिन्तारत्नात्परो मणिर्नास्ति वज्रपद्मरागकर्केतनमरकतेन्द्रनीललोहिताक्षपुलिन्दाञ्जनहंसगर्भादयोऽनेकेऽपि मणयः सन्ति, परं चिन्तामणिं विना सर्वकामकरः कोऽपि नास्ति। यथा दयानिधेः कृपाकरात्परो धर्मो न वर्तते। 'नास्ति धर्मो दयापरः' इति गीतायाम्॥ इति प्रथमं व्रतम्॥

वदन्ति वाचंयमपुंगवास्त्रिधा मृषा न भाषामपि जीवितव्यये।
इयं यदंहःपटलीव दुर्गतेर्विमानताया अतिशायि कारणम्॥ ४१॥

हे साह्हे, वाचंयमपुंगवाः साधुसिन्धुराः जीवितव्यये प्राणत्यागेऽपि त्रिधा मनोवचनकायैः कृत्वा मृषा अलीकां भाषां वाचं न वदन्ति न ब्रुवन्ति। यत्कारणादियं मृषा भाषा विमानताया अवगणनायाः पदे पदे अपमानस्य अतिशयते सर्वेभ्योऽप्यतिशयवतीत्येवंशीलमतिशायि कारणं साधनं वर्तते। मिथ्याभाषी सर्वत्राप्यपमानं पराभवं च प्राप्नुयात्। केव। अंहःपटलीव। यथा अंहसां दुष्कृतानां पटली परम्परा दुर्गतेरतिशायि साधनमास्ते॥

यशःसुधांशोरपिधायिका कुहूरिवादशालोलदृशः प्रियासखी।
समूहनीवारजसामिवाङ्गिना गुणावलीनामनृता हि भारती॥ ४२॥

हे साह्हे, निश्चितमनृता असत्या भारती वाणी मृषा भाषा कुहूरमावास्या यशःजगत्प्रसारिकीर्तिकलाप स एव सुधांशुश्चन्द्रमास्तस्यापिधायिका। 'व्रजति कुहूरिन्दुं दृष्ट्वा दृशोरपिधायिका' इति नैषधे। पुनरुत्प्रेक्ष्यते—अत्र इवशब्दो घण्टालालान्यायेन

मनोनुगामिन्यः दुस्तलस्थायिन्यो वा । मदस्वाहुलुवचनम् । लिङ्गयो मुक्तयोऽपि दृश्ये ॥ युग्मम् ॥

गजोऽप्यजो गोष्पदमम्बुधिर्मृगो मृगाधिपः स्रग्भुजगस्तमी दिनम् ।
रणः क्षणश्चाल्पगिरिर्मरुद्गिरिस्त्रिधापि यो ब्रह्म बिभर्ति भूपते ॥ ९४ ॥

हे भूपते, यः पुमान् महिला वा त्रिधापि मनोवाक्कायैर्ब्रह्म शीलव्रतं परनारीसहोदरता बिभर्ति धत्ते, तस्य पुंसस्तस्याः स्त्रियो वा गजो मदोद्धुरसिन्धुरोऽपि अजश्छागप्रायः स्यात् । पुनरम्बुधिः समुद्रोऽपि गोष्पदं गोखुरोत्खातभूमिस्थजलमिव तेन तया वोल्लङ्घ्यते । पुनर्मृगाधिपः पञ्चाननोऽपि मृगो हरिण इव तस्या दूरं पलायते । पुनर्भुजगो विषधरोऽपि तेन स्रगिव कुसुममालिकेव तया चाकरे गृह्यते । तमी सान्धकारा रात्रिर्दिनमिव तस्य तस्या वा जायते । रणो घोरोऽपि संग्रामः क्षण उत्सव इव बिभर्ति । पुनर्मरुद्गिरिः सुराचलोऽपि अल्पगिरिः किंचिदुच्चपाषाणभूमिरिवावलोक्यते ॥ इति चतुर्थं ब्रह्मव्रतम् ॥

परिग्रहः संयमिनापवादवत्त्रिधापि नाङ्गीक्रियते कदाचन ।
तमस्तमीनामुदयादिवोरगाद्विषं यतो दोषभरः परिस्फुरेत् ॥ ९५ ॥

हे भूपते, संयमिना चारित्रवता साधुना त्रिधापि मनोवचनतनुभिरपि अपवादोऽपयश इव । कदाचन कस्मिन्नपि प्रस्तावे सुखे दुःखे वा सुकाले दुःकाले वा सुखाजीविकाया कष्टाजीविकाया वा परिग्रहो धनधान्यक्षेत्रवस्तुसुवर्णरूप्यकुप्यद्विपदचतुष्पदलक्षणो नाङ्गीक्रियते नाद्रियते । यतो यस्मात्परिग्रहाद्दोषाणां निकेतानि दाक्षिण्यलोभापगुणानां भरो गणः परिस्फुरेत् । किमिव । तम इव । यथा तमीनां कृष्णपक्षक्षपाणामुदयात्प्रकटीभावात्परिभावाद्वा तमो घरोऽन्धकारः स्फुरेत् । परि समन्तात्सर्वविश्रान्तः स्फूर्तिमत्स्यात् विश्वव्यापिस्फूर्तिमद्भवेत् । पुनः किमिव । विषमिव । यथा उरगाद्भुजगमाद्गरलमाविर्भवेत् ॥

गिरीन्द्रमारोहति लङ्घतेऽम्बुधीन्प्रयाति जन्यं गहनं च गाहते ।
असूंस्तृणानीव सृजेन्निजाञ्जनस्तदुल्लसल्लोभविजृम्भितं विभो ॥ ९६ ॥

हे विभो हे साहे, यज्जनो लोकः गिरीन्द्रं तुङ्गशैलमारोहति पर्वतोपरितलशिखरशिलायां चटति, पुनर्यदम्बुधीन् समुद्रान् लङ्घते यानपात्रादिभिः कथं कथंचिदतिक्रामति अपारं पारावारं प्रतीर्य पारपारं याति । पुनर्यज्जन्यं दुराकलनीयरणाङ्गणं प्रयाति प्रविशति । च पुनर्गहनं भयानकं काननं कान्तारं गाहते सर्वतः परिभ्राम्यति । पुनर्जनो निजानात्मीयानसून्प्राणान् तृणानीव तृणप्रायान् सृजेत् कुर्यात् । हे राजन्, तत् पूर्वोक्तं सर्वमपि उल्लसन् वर्धमानः प्रकटीभवन् वा यो लोभस्तृष्णा तस्य विजृम्भितं विस्फूर्जितं प्रभावः ॥ इति पञ्चमं व्रतम् ॥

गमिष्यति लप्स्यते इत्येवंशीलः । अथ वा क्षमावरो जनकेन निजनिजराज्ये [illegible]पितः । पुनर्महान्त सार्वभौमतादिलक्षणमुदयमाधिपत्यं प्राप्स्यते इत्येवंशील । तादृशः कः । अनीतिष्वन्यायेषु अनुरागवान् भवेत् । उदयाभिलाषी सर्वोऽपि नयेष्वे वानुरज्यते । यदुक्तम्—'न निमित्तद्विषा क्षेम नायुर्वैद्यकविद्विषाम् । न श्रीर्नीतिद्विषा मेतत्त्रयं धर्मद्विषा नहि ॥' इति ॥

यतः स शूरः सुदृशां भ्रुवं धनुः कटाक्षबाणान्कबरीकृपाणभृत्।
नितम्बचक्रं भुजपाशमुत्कटं पुनर्वहन्येन जितः स्मरप्रभुः ॥ ४६ ॥

हे मुद्गलेन्द्र, स एव पुमान् शूरः सुभटः । कथ्यते इति शेष. । येन पुसा स्मर एव प्रभुः त्रिजगज्जेतृत्वात्समर्थो राजा इन्द्रनागेन्द्रनरेन्द्राणामपि स्वसेवकीकरणाद्राजा जितो वशीकृतो हतो वा । किं कुर्वन् । सुदृशा चारुलोचनाना भ्रुवमेव धनुः कोदण्डम्, पुनः कटाक्षानपाङ्गदर्शनान्यक्षिविकूणितानि एव बाणान्नाराचान्, पुनर्नितम्बमारोह श्रोण्योः श्चात्प्रदेशम् । येन कृत्वा नितम्बिनीत्यभिधानेन प्रसिद्धा । तदेव चक्रं रथाङ्गायुधम्। पुनरुत्कट केनापि छेत्तुमशक्य भुजौ बाहू एव पाश द्विषद्बन्धनार्थं वज्ररज्जुमयप्रान्तं वहन् धारयन् । किंभूत. । कबरी वेणीमेव कृपाण चन्द्रहास बिभर्तीति भृत्। प्रभुः सकलसुरासुरोरगनरनायकनिर्जयेन सामर्थ्यवानिति साभिप्राय प्रभुरिति पदम् ॥

स भद्रवांस्त्रैणकुचाचलान्तिकप्ररूढरोमावलिसालगह्वरे ।
न दस्युवद्यस्य मनोभुवा शमश्रियो ह्रियन्ते शिवमार्गगामिनः ॥ ४७ ॥

हे साहे, स नरो भद्रवान् कुशली । स क. । शिवे निरुपद्रवे मार्गे पथि मोक्षमार्गे वा गच्छतीत्येवंशीलस्य यस्य महात्मनो दस्युवत्तस्करेणेव । 'दस्युस्तस्करविद्विषो' इत्येकार्थः । मनोभुवा मदनेन शमश्रियः प्रशमविभवा न ह्रियन्ते नाच्छिद्य गृह्यन्ते। कस्मिन्विषये । त्रैणस्य स्त्रीसमूहस्य कुचाः प्रोत्तुङ्गपीनपयोधरास्त एवाचलाः पर्वतास्तेषा मन्तिके समीपे प्ररूढा उद्गता या रोमावल्यो लोमलेखास्ता एव साला [illegible] क्षास्तेषा गह्वरे घननिकुञ्जे तस्करश्वापदादिभयकरकानने ॥

यशस्त्रियामादयिते कलङ्कति द्विपेन्द्रति क्षीरधिसूनुवीरुधि ।
शमारविन्दे तुहिनोदवृन्दति व्रताम्बुवाहेष्वपि गन्धवाहति ॥ ४८ ॥
निदाघति व्रीडवहापयःप्लवे महत्त्वगोत्रे च सहस्रनेत्रति ।
गुणद्रुमद्रोणिषु मत्रजिहति क्षितीश शीलं पुरुषेण खण्डितम् ॥ ४९ ॥

हे क्षितीश भूपते, पुरुषेण उपलक्षणाद्विशेषेण स्त्रिया वा शील [illegible] पलक्षण परपुरुषत्यागलक्षण यावज्जीवनियमपालनविध वा खण्डित [illegible] तस्येति शेष । यश कीर्तिरेव त्रियामादयित. शारदीनचन्द्र[illegible] नमिवाचरति । सकलङ्क. स्वयशो मलिनीकरोति । पुन क्षीरधेः [illegible]

जायमानत्वेन विष्णोः। 'एन महस्विनमुपैहि सदारुणोच्चैः' इति नैषधे । महस्शब्दः सकारान्तोऽप्युत्सववाची वर्तते । 'महस्तेज उत्सवश्च' इति तद्वृत्तिः । पुन. किंभूतः । श्रिया चतुस्त्रिंशदतिशयलक्ष्म्या तस्याः कादाचित्कत्वेन सदा केवलोत्पत्ति मर्यादीकृत्य महानन्दनगरावाप्तिपर्यन्तमष्टमहाप्रातिहार्यलक्ष्म्या युक्तो जिनस्तीर्थकृदन्यतरः श्राद्धत्वेन त सेवते इत्येवशीलः नृपः, तथा श्रिया पाथोधिपुत्र्या युक्तस्तस्याः पतित्वाल्लक्ष्मीयुक्तत्व जिनो विष्णुस्तत्पदसेवित विष्णुपदे व्योम्नि स्थितिमत्त्वेन भानु' कमलाकलितकुण्ठवासिनः समुद्रशायिनो जिनस्य वैकुण्ठस्य पादमश शीलत्येवशील कृष्णस्याशावतारत्वेन न सर्वावतारित्व किं तु दशानामप्यशावतारित्वमेव । गुरोर्बृहस्पते. स्वर्गस्थायुकत्वेन निजकृष्णस्य सेवन सुकरमेव । गुरोस्त्वन्यतरः कश्चिज्जिनो बौद्धो विष्णुरर्हन्वा एतेषामन्यतरशासनस्थत्वात्।पुन' किंभूतम्। मित्र सखाय राजन्यपि कुत्रचित्सेवकादौ हितान्वेषित्वेन मैत्र्य सभाव्यते न सर्वेऽपि नृपा. कृतघ्ना । यदुक्तम्—'सुहृदि निरन्तर-चित्ते गुणवति भृत्ये प्रियासु नारीषु। स्वामिनि सौहृदयुक्ते निवेद्य दुःख सुखीभवति ॥' इति सूत्रोक्तत्वात् । तथा भास्वान्मित्रनामा कुमोदत्वात् मित्रवत्सर्वजनाना दत्ताखुप-द्रवनिराकरणेनानन्दोत्पादत्वाद्विष्णोर्गुरोस्तु । 'प्राप्ते षोडशमे वर्षे पुत्र मित्रमिवाचरेत् ।' पुत्रमिव शिष्यमपीति । तत्त्वतस्तु सूर्यमेव विधुर कष्टभाजमस्तगत मरणावस्था प्रप । सूर्यस्य वैधुर्यमस्तादेव ॥ इति षष्ठ रात्रिभोजनम् ॥

कदापि नैमित्तिकवत्तपस्विनो निमित्तमेते ब्रुवते न किंचन ।
यतश्चरित्रेण निमित्तभाषणात्तमिस्रपक्षाद्विधुनेव हीयते ॥ ६० ॥

हे साहे, एते पूर्वोक्तषड्व्रतपालका प्रत्यक्षा वा श्रीमदाकारितागता पुर उपाश-श्रास्तपस्विनः साधव' कदापि कस्मिन्नपि व्यतिकरे नैमित्तिकवन्निमित्तज्ञा [illegible] अङ्ग–स्वप्न–स्वर–भौम–व्यञ्जन–लक्षण–उत्पात–अन्तरिक्षम् एतेष्वष्टसु निमित्तेषु [illegible] निमित्त ग्रहचारा[illegible]स्फुरणशकुनस्वरादिक न ब्रुवते न कथयन्ति । अथ वा [illegible] किमपि शुभाशुभादिग्रहविचार न भाषन्ते । यत कारणात्तस्य निमित्तस्य [illegible]-स्ताना वा ज्योतिष्कादेर्वा भाषणात्कथनाच्चारित्रेण सयमेन हीयते क्षीयते । [illegible] । विधुनेव । यथा तमिस्रा कृष्णात्पक्षात् विधुना चन्द्रेण क्षय प्राप्यते [illegible] । यदुक्तमुत्तराध्ययने—'जे लक्खणं च सुविणं च अंगविज्जं च जे पउंजंति न हु ते समणा वुच्चंति । एवमायरियेहिं अक्खायम् ।' इति ॥ इति सप्तम [illegible] ॥

इति व्रतान्सप्त बिभर्ति सयतव्रज शिवश्रीपरिरम्भलोलुप ।
वसुंधराभोग इवाम्भसा प्रभूञ्छिखा. शिखीव द्युमणिर्द्युमानिव ॥ ६१ ॥

हे साहे, सयताना सर्वविरतिभाजा साधूना व्रज समुदाय [illegible] पूर्वव्यावर्णितस्वरूपा[illegible] सप्तसंख्याकान् व्रतानियमादिरूपान् बिभर्ति धत्ते । [illegible] शिवश्रिया मोक्षलक्ष्म्या परिरम्भे [illegible]

हते । 'कुंफुमाग्निसदृङ्नारी' इति वचनात् । धारयतीति । किंवत् । वनीवत् । यथा कान्ता मदननामानं द्रुमम् । 'मीढुल' इति प्रसिद्ध लोके । अवगाहते विभर्तीति । 'स्राग्सप्रवदतिपिकापि का' इति नैषधे । पुन किंभूता । जिह्मगामिनी जिह्म वक्र गच्छत्येवशीला । केव । महेलेव । यथा अहेर्भुजगमस्य महेला वनिता भुजगी कुटिलचारिणी भवेत् । पुन' किंभूता । निम्न नीचैर्हीनतमकर्मभिर्गच्छति विचरतीत्येवशीला । अथ निम्नेषु नीचजातिषु गच्छन्ति सङ्ग कुर्वन्तीत्येवशीला । 'कामिन्यो नीचगामिन्य' इति वचनात् । नीचसक्ता प्राय स्यु । केव । वधूरिव । यथा पयोधे' समुद्रस्य वधू नदी निम्नगा नीचैर्वहा जलस्य निम्नगतित्वात्रात्रापि च । पुन किंभूता । अधर्मैः कर्मभि· कृत्वा भवपद्धते: ससाररचनाया अथ वा ससारपरम्पराया ससारमार्गस्य च । 'पद्धतिः पथि पक्तौ च' इत्यनेकार्थे । एतेषा समीचीना पद्धतिरित्यपि हृद्या तत्र । पद्धतिराचरणं रचनापीति । तस्या विवर्धिनी विशेषेण वृद्धिकरणशीला च तत्र विवर्धिनी । केव । मेघमालिकेव । यथा कादम्बिनी जले पानीये वहाया नद्या वृद्धिकारक यदुक्तम्—'वर्षानदीना पतिरङ्गनानामर्थो नराणामृतुराट् तरूणाम् । स धर्मचारी प्रजाना लोकागत यौवनमानयन्ति ॥' इति ॥ युग्मम् ॥

पुर·सरास्तस्य सुरा मरुद्गवी गृहाङ्गणे पाणितले मरुन्मणिः ।
पुरः सुरद्रुर्निकटे मरुद्धटः स्वयंवरा· स्युर्भुवनत्रयीश्रिय ॥ १२ ॥
प्रदक्षिणो दक्षिणवारिजः पुनः खलाः सखाय सविधे च शेवधिः ।
न चित्रकृच्चित्रलता च सिद्धयः करेऽदधायोऽसिशिखोपम व्रतम् ॥ १३ ॥

हे साहे, यः पुमानसिशिखाया· खड्गधाराया उपमा सादृश्य यस्य तादृशं व्रतमाचर्यमदधाद्धारयति स तस्य पुसः सुरा देवा· पुर·सरा अग्रगामिनस्तदग्रे पुरो गच्छन्ति । पुनर्मरुद्गवी कामधेनु' गृहप्रसूता क्रीतगृहीता वा गोरिव गृहाङ्गणे तिष्ठेत् । मरुन्मणिश्चिन्तारत्न तस्य पाणितले करक्रोडे हस्तेलिकायमेव वर्तेत् । पुनः सुरद्रुः कल्पवृक्षः पुरः पुरस्तात् च्छायाकारक इव तिष्ठेत् । पुन मरुद्धट कामकुम्भ निकटे समीपप्रदेशे पानीयपायक इव तिष्ठेत् । पार्श्ववर्तीव वा स्यात् । पुनर्भुवनत्रय्याः त्रैलोक्यलक्ष्म्यः स्वयंवरा आत्मभिरेवागत्य तं वृण्वते । पुनर्दक्षिणोऽपसव्य आवर्तो यस्य स चासौ वारिजश्च । मध्यमपदलोपी समास । दक्षिणावर्तः शङ्खः प्रदक्षिणोऽनुकूलः मार्गित विनैव सर्व समीहित पूरयति । 'कम्बुस्तु वारिजः' इति । पुनः खला द्विजिह्वा दुर्जनाः सखायो मित्राणि भवन्ति । च पुन शेवधिर्निधानं [illegible] अनुलभमिवायाति च । पुनश्चित्रलता चित्रवल्ली न चित्रकृत् । [illegible] स्यात्तस्य तु पदे पदे तत्प्राप्तित्वेन न विस्मयविधायिनी । तथैव [illegible] भवेत् । च पुनः सिद्धयः लघिमा-वशिता-ऐश्वर्य-प्राकाम्य-महिमा-अणिमा-कामावसायित्वम्-प्राप्तिः-इत्यैश्वर्यम् । अथानपि [illegible]

नृपो राजा विभु सूरिं परीक्षितु गुरोः पूर्वोक्तमतानां परीक्षां कर्तुमीहमानो निजहृदि वाञ्छन् पुनर्व्याघुट्य इत्यग्रे वक्ष्यमाणप्रकारेणावोचत वदति । परीक्षितु क इव । रत्नपरीक्षक इव । यथा माणिक्यपरीक्षाकारक 'जवहरी' इति लोके प्रसिद्धः । स मणीन् परीक्षते रत्नगुणान् परीक्षयति । अल्पानल्प वा तन्मूल्य विधत्ते । नृपः किं कुर्वन् । इद सूरिनिगदितमतस्वरूप निशम्य आकर्ण्य प्रमदमानन्दं दधद्बिभ्रत् । किं कृत्वा । इतरा एतस्या वार्तायाः पृथग्वर्तिनीं तात्त्विकीं धर्मतत्त्वसबन्धिनीं गोष्ठीं प्रणीय कृत्वा ॥

पुरेऽनयीवावनिमानुपेयिवान्य एष मीने तरणेस्तनूरुहः ।
स मत्सरीवापकरिष्यति प्रभो क्षितेः पतीनामुत नीवृता किमु ॥६५॥

हे सूरे, यः कृष्णविक्रमार्कादीना सतापकारक एष प्रत्यक्षतया लोकैर्दुष्टाशय इत्युच्यमान मन्दादशराशौ सनेतो वा तरणेर्भास्करस्य तनूरुहः पुत्रः शनैश्चरो मीने मीनराशौ उपेयिवानागतोऽस्ति । क इव । अवनिमानिव । यथा अनयी अन्यायकारको भूपति पुरे नगरे उपैति । हे प्रभो, स शनिर्मत्सरीव अमर्षयुक्त इव पिशुन इव वा । 'पिशुनः सूचको नीचो द्विजिह्वो मत्सरी खलः' इति हैम्याम् । किमु क्षितेः पतीनां राज्ञामुताथ वा किमु नीवृता देशानाम्, देशग्रहणेन देशवासिजनाना दुर्भिक्षडमरमरकपरचक्रादिकोपद्रवकरणादिना अपकरिष्यति दुष्टं विधास्यति । 'वितर्के किं किमुत च' इति हैम्याम् ॥

गुरुर्जगौ ज्यौतिषिका विदन्त्यदो न धार्मिकादन्यदवैमि वाङ्मयात् ।
यतः प्रवृत्तिर्गृहमेधिनामियं न मुक्तिमार्गे पथिकीवभूवुषाम् ॥ ६६ ॥

गुरुर्हीरसूरिर्जगौ पातिसाहिं प्रत्युवाच । अद एतत् श्रीमत्पृच्छ्यमान ग्रहादीना चारशुभाशुभपरिज्ञान ज्यौतिषिका ज्योतिःशास्त्रविदो विदन्ति जानन्ति । पुनरह धार्मिकाद्धर्मसबन्धिनो वाङ्मयात् शास्त्रादन्यत्पर वाङ्मय नावैमि न वेद्मि । यतः कारणादिय ग्रहादीना शुभाशुभपरिणतिकथनादिका प्रवृत्तिः प्रवर्तन व्यापारः प्रकर्षेण वृत्तिराजीविका वा गृहमेधिना गृहस्थानामास्ते । पर मुक्तिमार्गे मोक्षाध्वनि पथिकीबभूवुषां पान्थीभूताना मोक्षमार्गे प्रवृत्तानामिय प्रवृत्तिर्न स्यात् ॥ इति परीक्षार्थं साहिप्रश्ने गुरोर्निषेधवाक् ॥

निपीय स श्रोत्रपुटैः सुधाशनः सुधा सुधाशोरिव ता प्रभोर्गिरम् ।
पुनर्महीमण्डलमत्स्यलाञ्छनश्चकार वाणीं वदनानुपङ्गिनीम् ॥ ६७ ॥

स साहि. पुनर्महीमण्डलस्य क्षोणीचक्रस्य मत्स्यलाञ्छन अतिशायिरूपवत्त्वेन रतिपतिः । 'निपधवसुधामीनाङ्कस्य प्रियाङ्गमुपेयुप.' इति नैषधे । स साहिर्वाणीं वाचं वदनानुपङ्गिनीं मुखपद्मसगता चकार कृतवान् । उवाचेत्यर्थ । किं कृत्वा । श्रोत्रपुटैः स्वकर्णरूपपत्रपुटकैः प्रभो. सूरेः ताम् अहं धर्मशास्त्रादन्यन्न वेद्मीति लक्षणा गिर वाणीं

हवे । 'कुकुमाग्निसदङ्गारी' इति वचनात् । धारयतीति । किवत् । वनीवत् । यथा कान्तारं मदननामानं द्रुमम् । 'मींढुल' इति प्रसिद्धं लोके । अवगाहते बिभर्तीति । 'स्तबकी-सप्रवदतिपकापि का' इति नैषधे । पुनः किंभूता । जिह्मगामिनी जिह्मं वक्रं गच्छती-त्येवशीला । केव । महेलेव । यथा अहेर्भुजगमस्य महेला वनिता भुजगी कुटिलचारिणी भवेत् । पुनः किंभूता । निम्नं नीचैर्हीनतमकर्मभिर्गच्छति विचरतीत्येवशीला । अथ वा निम्नेषु नीचजातिषु गच्छन्ति सङ्गं कुर्वन्तीत्येवशीला । 'कामिन्यो नीचगामिन्यः' इति वचनात् । नीचसक्ताः प्रायः स्युः । केव । वधूरिव । यथा पयोधेः समुद्रस्य वधूः पत्नी नदी निम्नगा नीचैर्वहा जलस्य निम्नगतित्वान्नाम्नापि च । पुनः किंभूता । अघैः पापक-र्मभिः कृत्वा भवपद्धतेः संसाररचनाया अथ वा संसारपरम्परायाः संसारमार्गस्य वा । 'पद्धतिः पथि पङ्क्तौ च' इत्यनेकार्थः । एतेषां समीचीना पद्धतिरित्यपि रूढ्या दृश्यते । पद्धतिराचरणं रचनापीति । तस्या विवर्धिनी विशेषेण वृद्धिकरणशीला च तत्र विव-र्धिनी । केव । मेघमालिकेव । यथा कादम्बिनी जलैः पानीयैः वहाया नद्या वृद्धिकारिणी । यदुक्तम्—'वर्षा नदीनां पतिरङ्गनानामर्थो नराणामृतुराट् तरूणाम् । स धर्मचारी नृपतिः प्रजानां लोकागतं यौवनमानयन्ति ॥' इति ॥ युग्मम् ॥

पुरःसरास्तस्य सुरा मरुद्गवी गृहाङ्गणे पाणितले मरुन्मणिः ।
पुरः सुरद्रुर्निकटे मरुद्भटः स्वयंवराः स्युर्भुवनत्रयीश्रियः ॥ १२ ॥

प्रदक्षिणो दक्षिणवारिजः पुनः खलाः सखायः सविभे च शेवधिः ।
न चित्रकृच्चित्रलता च सिद्धयः करेऽद्य यो [illegible] ॥ १३ ॥

हे [illegible], च. पुमान् [illegible] तस्य पुनः सुरा देवाः पुरःसरा [illegible] । पुनर्निकटे [illegible] [illegible] तस्य पाणितले [illegible] ।

[illegible]

दशाचितु मोहाद्वकः प्रत्युर्यधेच्छति । मन्दधीस्तद्वदिच्छामि कविवृन्दारकायितुम् ॥' इति । स्तुवति स्म । किं कृत्वा । शेखम् अवलफजनामानं निजग्रामन्तीभूतं स्वस्यात्मनः उपवेशदेशं समीपभूभागं गच्छतीति तादृशं विधाय । स्वकीयसंनिधायाकार्येत्यर्थः ॥

मया विशेषात्परदर्शनस्पृशो गवेषिताः शेख न तेषु कश्चन ।
व्यलोकि वाचंयमचक्रिणः सदृङ्मृगेषु कोऽप्यस्ति मृगेन्द्रसंनिभः ॥ ७१ ॥

पराण्यन्यानि बौद्ध–नैयायिक–सांख्य–वैशेषिक–नास्तिक–जैमिनीयादीनि दर्शनानि स्पृशन्त्यनुभवन्त्याद्रियन्ते इति परदर्शनस्पृशः परपाक्षिका मया विशेषात् स्वप्रागल्भ्यप्रकटितपतानल्पप्रश्ननिर्वाहकरणप्रावीण्यप्रगुणीभवद्भूरितममन्दाक्षविलक्षीभवनपरिज्ञानाद्गवेषिता दृष्टाः परं तेषु तत्तद्दर्शनेषु कश्चन वाचंयमचक्रिणः हीरसूरेः सदृक् तुल्यो न व्यलोकि न निरीक्षितः । युक्तोऽयमर्थः । मृगेषु हरिणेषु मध्ये कोऽपि कश्चिदपि मृगेन्द्रस्य केसरिणः संनिभः साधारणोऽस्ति । अपि तु न कोऽपि ॥

स्ववासयोग्यां वसतिं न कुत्रचिन्निरीक्ष्यमाणैरवसादिभिर्गुणैः ।
स्वयंभुवाभ्यर्थ्य निवस्तुमात्मना मणिर्मुनीनां किमकारि मन्दिरम् ॥७२॥

हे शेख, गुणैः शमदमार्जवमार्दवादिभिरभ्यर्थ्य बह्वीं प्रार्थनां कृत्वा आत्मना स्वेषां निवस्तुं नितरां समकालं सर्वैरेकत्र संभूय वासं विधातुं स्यातुं स्वयंभुवा ब्रह्मणा कर्त्रा पार्श्वे । उत्प्रेक्ष्यते—मुनीनां मणिः सूरिरत्नं मन्दिरं वसतिः किमकारि निर्मापितेव । गुणैः किं कुर्वाणैः । कुत्रचित्कस्मिन्नपि स्थाने स्वेषामात्मना वासस्य निवसनस्य योग्यामुचितां वसतिं वासवेश्म नैव निरीक्ष्यमाणैरपश्यद्भिः अत एव वासादिभिरेव खेदखिन्नैः ॥

असौ मुहुर्मीनभुजः शनेः फलं मयानुयुक्तोऽपि न किंचिदूचिवान् ।
यतः क्वचिद्भङ्गुरसंगरो महान्भवेत्सुराणामचलोऽपि चाचलिः ॥ ७३ ॥

हे शेख, असौ हीरसूरिर्मया चतुर्दिक्चक्रचक्रिणा मुहुर्वारं वारं मीनभुजो मीनराशेर्भोक्तुः शनेः शनैश्चरस्य फलं भूपजनपदद्विपदचतुष्पदादीनां क्षेमाक्षेमनिर्माणलक्षणमनुयुक्तोऽपि पृष्टोऽपि सन् किंचित्किमप्यंशमात्रमपि नोचिवान्न बभाषे । यतः कारणान्महांस्तमजनः क्वचित् क्वाप्येकान्ते पर्षदि वा भङ्गुरसंगरो भञ्जनशीलप्रतिज्ञः निर्मुक्ताङ्गीकारः स्यात् । 'प्रतिज्ञागूश्च संगरः' इति हैम्याम् । एतेन प्रागुक्तं यदहं ज्योतिर्निमित्तादि न वच्मि तत्परीक्षार्थमेव केवलं मया स्वमाहात्म्यभयाद्यपि दर्शयित्वा पृष्टम् । पुनरेतेन सत्त्वमात्ममार्गं चानुसृत्य शनिफलं किमपि नोचे । इदं सत्यम् । सुराणामचलः मेरुः क्वचिच्चाचलिरतिशयेन चञ्चलः स्यात्, अपि तु न कदाचिदपि । न कम्पते चलनशीलश्चाचलिः । 'चलिपतिवदिसहिभ्य इणिर्द्वित्वं च, पापतिः वावदिश्चाचलिः सासहिः इति चत्वारः प्रयोगाः' इति प्रक्रियाकौमुद्याम् ॥

वहन्ति पञ्च व्रतिनो महाव्रतान्यमूनि वक्त्राणि मृगाङ्कमौलिवत्।
भजन्ति दन्तद्वितयीं गजा इवापरामिमां देव पुनर्व्रतद्वयीम्॥ १७॥

हे साहे, व्रतिनो नियमवन्तः साधवः अमूनि प्राणातिपातविरमण-मृषावादविरमण-अदत्तादानविरमण-विषयभोगविरमण-परिग्रहविरमणलक्षणानि पञ्चसंख्याकानि महाव्रतानि मेरुवद्गुरुद्वराण्यतिशायिनो नियमान् वहन्ति धारयन्ति। किंवत्। मृगाङ्कमौलिवत्। यथा चन्द्रशेखरः शिवः पञ्चप्रमाणानि वक्त्राणि वदनानि बिभर्ति। 'पञ्चमुखोऽष्टमूर्तिः' इति हैम्याम्। अथ वा 'महामृगारिवत्' इति पाठः। यथा मृगाणां हस्तिनामरयः केसरिणः पञ्च वक्त्राणि बिभ्रति। 'पञ्चास्यो नखरायुधः' इति हैम्याम्। हे देव, पुनः साधवः इमामग्रे वक्ष्यमाणामपरां पञ्चमहाव्रतानि उपरितनीं व्रतद्वयीं भजन्ति श्रयन्ते। के इव। गजा इव। यथा हस्तिनो दन्तद्वितयीं दन्तकोशयुगलं दधते॥ इति पञ्चमहाव्रतस्वरूपम्॥

निशाशनं नीतिजुषा निषिध्यते परिस्रुतापानमिवावनीपते।
निशाशनेभ्योऽपि वरं विहंगमा निशि त्यजन्तो यतिवज्जलाशने॥ १८॥

हे अवनीपते, नीतिजुषा न्यायधर्मवता धर्मे सुनिष्ठावता पुरुषेण परिस्रुतापानं मदिरापानमिव। 'गन्धोत्तमाकल्पमिरापरिस्रुताः' इति हैम्याम्। निशाशनं रात्रिभोजनं निषिध्यते निवार्यते स्वयं नाद्रियते। हे नृपते, निशायां रात्रावशनं भोजनं येषां ते निशाशना रात्रिभोजनास्तेभ्यो जनेभ्यः सकाशात् विहंगमाः पक्षिणोऽपि वरं समीचीनाः। वरमिति समीचीनार्थेऽपि दृश्यते। यथा सिन्दूरप्रकरे—'वरं क्षिप्तो हस्तः कुपितफणिनो वक्त्रकुहरे वरं झम्पापातो ज्वलदनलकुण्डे विरचितः। वरं प्रासप्रान्तः सपदि जठरान्तर्विरचितो न जन्यं दौर्जन्यं तदपि विपदां सद्म विदुषाम्॥' इति। किं कुर्वन्तः। यतिवन्मुनय इव। निशि रात्रौ जलाशने पानीयान्ने त्यजन्तो मुञ्चन्तः न भुञ्जन्तः पिबन्तश्च॥

गवामधीशं भुवनोपकारिणं महस्विनं श्रीजिनपादसेवितम्।
अवेत्य मित्रं विधुरं विधीयतेऽशनादि यत्सा कथमौचिती सताम्॥ १९॥

हे साहे, गवामधीशं राजानं पतिं भास्करं धेनूनामधीशं कृष्णं नन्दगोपकुलजातो-त्पन्नत्वाद्गोनाथत्वाच्च गवां वाचामधीशं वागीशत्वाद्गुरुं वाचस्पतिमप्येतान् वि-धुरमस्तप्राप्तं मृतम्। 'दिष्टान्तोऽस्तं कालधर्मः' इति हैम्याम्। अवेत्य ज्ञात्वा यदशना-दि भोजनप्रमुखं स्वकुलाचारेण विधीयते क्रियते, सा सतामुत्तमानां कथमौचिती केन प्रकारेण योग्यता। अपि तु नैव। किंभूतम्। भुवनोपकारिणं जगतो भुवनस्य पाल-नादुपकारको राजा [illegible] [illegible] [illegible]

पद्मदलानीव कलयति । पुनर्भुजगराजो नागेन्द्रः शेषनागो द्विसहस्रजिह्वतां द्वे सहस्रे जिह्वा रसना जिह्वासहस्रमिता या जिह्वा रसना यस्य तस्य भावः जिह्वानां द्विशतिशती बिभर्ति धारयति । 'प्रजापतिर्वेधा चतुर्मुखो भवान्,' तथा 'मृत्युञ्जयः पञ्चमुखोऽष्टमूर्तिः,' तथा 'कुमारः' इति हैम्यां त्रयमपि । तथा 'यस्यास्तिसुरसप्रसोरिव भवेज्जिह्वासहस्रद्वयम्' इति चम्पूकथायाम् ॥

कलिं कृतीकर्तुमयं स्वयं वपुर्दधाति धर्मः किमिदंनिभाद्भुवि ।
गुणान्निशम्येति गुरोर्नृपस्तुतांश्चमत्कृतः स स्वपदं मुदागतः ॥ ७८ ॥

हे शेख, भुवि पृथिव्यामिदंनिभादस्य सूरेर्व्याजात् अयं प्रत्यक्षलक्ष्यः स्वयमात्मना धर्मो दयारूपः । उत्प्रेक्ष्यते—किम् । वपुः शरीरं दधाति । किं कर्तुम् । कलिं कलिनामानं युगं कृतीकर्तुं कृतयुगं विधातुं कृतयुगतां प्रापयितुं वा । स शेखः अबलफजलनामा इति पूर्वोक्तप्रकारेण नृपस्तुतान् अकब्बरपातिसाहिना स्वमुखेन वर्णितान् गुरोर्हीरविजयसूरेर्गुणान्निशम्य नितरां सोत्कण्ठं सरोमाञ्चकञ्चुकं श्रुत्वा चमत्कृतो निजहृदये विस्मयं प्राप्तः सन्तुष्टः प्रमोदेन स्वपदं साहिसभाया मध्ये यत्र सर्वेऽपि सामन्तभूपाला ऊर्ध्वीभूयावतिष्ठन्ते, यत्र च स्वेनाप्यूर्ध्वीभूय स्थीयते तस्मिन् स्थाने आगमत् ॥ इति शेखपुरः साहिवर्णिता गुरोर्गुणाः ॥

पिबन्मुनीन्द्रस्य शमामृतं दृशा मुदश्रुदम्भेन तदुद्गिरन्निव ।
अकब्बरो बब्बरवंशमौक्तिकं पुनः पुरस्तस्य गिरं गृहीतवान् ॥ ७९ ॥

अकब्बरसाहिस्तस्य सूरेः पुरोऽग्रे पुनः पुनरपि गिरं वाणीं गृहीतवान् आददे । उवाचेत्यर्थः । किंभूतः अकब्बरः । बब्बरोऽस्य पूर्वजः पातिसाहिस्तस्य वंशो गोत्रं वेणी च मौक्तिकं मुक्ताफलोपमः । युक्तम्—'समुद्रस्ताम्रपर्णी च वंशः करिशिरस्तथा । उत्पद्यन्ते मौक्तिकानि प्रायोऽमीषु परत्र न ॥' इति वचनप्रामाण्यतः । किं कुर्वन्नकब्बरः । दृशा स्वनयनेन कृत्वा मुनीन्द्रस्य हीरसूरेः शमामृतं शान्ततासुधारसं पिबन्नास्वादयन् हृदये एव स्वचमत्कारं वर्णयन् सादरं मुहुः पश्यन् । उत्प्रेक्ष्यते—तच्छमामृतपानं मुदश्रुदम्भेन प्रबलप्रादुर्भवत्प्रतिमोदोदीर्णनयनबाष्पव्याजेन उद्गिरन्निव अतितृप्ततया बहुभृतपानं हृदयान्तरादुद्गिरन्निव ॥

स्फुरन्ति शिष्याः कति वो यतीश्वराश्चरित्रदुग्धाम्बुधिनन्दना वराः ।
इभप्रभूणां कलभा इवावनीरुहां सुमानीव करा विवस्वताम् ॥ ८० ॥

हे यतीश्वराः सूरयः, वो युष्माकं चारित्रं सदाचरणमूलगुणयमनादि । दुग्धाम्बुधिनन्दना क्षीरसमुद्रतनया लक्ष्मीः । 'सायमित्यमथ श्रीमन्नन्दनाम्' इति नैषधे । नन्दना नन्दिनी आहारं तारान्तां द्वापि शब्दां दृश्यते । ते तस्या वरा भर्तारः स्वामिनः । अथ या तया लक्ष्म्या कृत्वा वराः श्रेष्ठाः भवहारिणश्चारित्रिणः कति कियत्संख्याकाः शिष्या विनेयाः स्फुरन्ति वर्तन्ते । केषामिव । इभप्रभूणामिव भूपनागराजानामिव । मदस्याद्भुतानां

भोग इव। यथा सप्तद्वीपाया वसुधराया आभोगो विस्तारः। 'प्रपञ्चाभोगविस्तारः' इति हैम्याम्। सप्त लवण-क्षीर-दधि-घृत-सुरा-इक्षु-वारिनाम्नः अम्भसा प्रभून् समुद्रान्। 'यादःस्रोतोवार्नदीशः सरस्वान्' इति हैम्याम्। धत्ते। पुनः क इव। शिखीव। यथा वह्निः सप्त शिखा ज्वाला धत्ते। 'विभावसुः सप्तोदर्चिः स्वाहाप्राही' इति हैम्याम्। पुनः क इव। द्युमणिरिव। यथा नभोरत्न सहस्ररश्मिः सप्त हयान् स्वरथे सप्ताश्वान् धारयति॥

पुरातनैराचरितानि सूरिभिर्यथा तथा धर्तुमहं न तान्यलम्।
मतङ्गजप्रक्षरधारणक्षमा मतङ्गजा एव न यत्तुरङ्गमाः॥ ९२॥

हे नृपते, अहं स्वल्पमन-कायबलाकलितकलिकालोत्पन्नजनः तथा तेन प्रकारेण तानि सप्त व्रतानि धर्तुं धारयितु नाल न समर्थोऽस्मि। तथा कथम्। यथा येन प्रकारेण संपूर्णाद्वैतमनोवाक्कायबलशालिभिः सिद्धिसप्राप्त्युचित चारुसहननैः सुषमासमयसप्राप्तावतारैः पुरातनैः प्राचीनैः सूरिभिराचार्यैरुपलक्षणादुपाध्यायगणावच्छेदकसाधुभिरप्याचारितानि सम्यक्पालितानि यद्यस्मात्कारणान्मतङ्गजाना सनाह्याना समरोचिताना दन्तिना प्रक्षराणा 'पाखर' इति लोकप्रसिद्धाना धारणे उद्वहने परिधाने वा मतङ्गजा एव क्षमाः समर्थाः स्यु. न पुनस्तुरङ्गमाः स्वयोग्यप्रक्षरधारणे समर्था अप्यश्वा. किं गजानामतिशायिभारदुर्वहा प्रक्षरा धारयन्ति। अपि तु न तथा। अहमपि पूर्वाचार्यानुष्ठितोत्कृष्टानुष्ठान विधातु समर्थोऽपि देशकालस्वमनोवपुर्बलानुरूपमनुष्ठानमाचरामिलोकोक्त्या स्वरग्रहणं निन्द्यम्। किं च तस्य मूलत एव प्रक्षैरेव न भाति तद्ग्रहणमयुक्तमेव यानेपु रत्नत्वात्प्रक्षरधारित्वाच्च अश्वाभिधान न्याय्यमेव॥

श्रुतोक्तयावद्व्रतपालने यदाप्यलं न किंचित्तु तथापि शक्तितः।
विधिं बिभर्म्येष तरेन्न तारको नदीमपीशस्तरणेऽम्बुधेर्न यः॥ ९३॥

हे नरेन्द्र, श्रुते शास्त्रे उक्तः प्ररूपितः कथितः यावान् समग्रः यावत्परिमाणमस्येति यावान्। 'यावज्जनरञ्जनव्रती' इति नैषधे। 'समग्रलोकानां रञ्जने प्रीणने व्रतमस्यास्तीति' इति तद्वृत्तिः। विधिः कर्तव्यार्थोपदेश आचारो वा तस्य पालने आचरणे यदापि यद्यपि नाल नाहं प्रभुः, तथापि तर्हि एपा शक्तितः स्वसामर्थ्यानुसारात् यादृशी व्रतपालनशक्तिस्तादृशमित्यर्थः। तु पुनः किंचित्किमपि अल्पमात्र देशकालानुरूपमाचारमाचरामि पालयामि। युक्तोऽयमर्थ। यस्तारकः स्वकलया जलातिक्रामक अम्बुधेः समुद्रस्य तरणे भुजाभ्यामुत्तरणे नेशः प्रभुर्न स्यात् स तारक नदी समुद्रापेक्षया स्वल्पपरिमितसलिला सरित किं न तरेन्नोल्लङ्घयेत् परपार न यायात्। अपि तु तरेदेव॥ इति स्वस्य व्रतपालनसामर्थ्यमुक्तम्॥

इदं निशम्य प्रमदं दधन्नृपः प्रणीय गोष्ठीमितरां च तात्त्विकीम्।
परीक्षितुं रत्नपरीक्षको मणीनिवेहमानः पुनरित्यवोचत॥ ९४॥

पामिव। महामणीनामिव। यथा तद्विदो महामणीगुणवेत्तारः परीक्षका महामणीमभिधा पद्मरकतवैडूर्यपद्मरागादिनामानि कथयति॥ इति यतिना परस्पराभिधाननिवेदनम्॥

गृहादथानायितमङ्गजन्मना स खानखानेन च मुक्तमग्रतः।
महीमरुत्वान्प्रमदादिवोपदा मुनीशितुर्ढौकयति स पुस्तकम्॥ ८४॥

अथ गुरोः शिष्याणा नामावधारणानन्तर महीमरुत्वान् भूमीन्द्रः। 'वृतनापाड्प्रधन्वा मरुत्वान्मघवा' इति हैम्याम्। प्रमदादानन्दात् उपदा प्राभृतमिव मुनीशितुः सूरेः पुरोऽग्रे पुस्तक ढौकयति स्म। किंभूत पुस्तकम्। अङ्गजन्मना शेखूजीनाम्ना वृद्धपुत्रेण गृहात्स्वभवनमध्यादानायित लोके 'अणाव्यु' इति प्रसिद्ध च पुनः खानखानेन मीयाखाननाम्ना साहिसामन्तेन साहेराप्तेन ततः संग्रामे गूर्जरपातिसाहिविजयविधानसमये श्रीमदकब्बरपातिसाहिना स्वय खानखान इति दत्तबिरुदेन अग्रतो नृपपुरस्तात् आनीय मुक्त साहिप्रतिशिष्टशेखूजीसूनुना मन्दिरमञ्जूषाभ्यो निष्काश्य मीयाखानस्य हस्ते प्रदत्त तेन च नृपाग्रे पुञ्जीकृतम्॥

ततस्तदुन्मुच्य पुरो धराविधोरवाचि वाचंयमपुंगवैर्गुरोः।
रहस्यमेतस्य पुनर्न्यगादि तैरमुष्य सख्युः सखिवत्स्वचेतसः॥ ८५॥

तत आनयनानन्तर प्रभोः सूरे वाचयमपुगवैर्यतिकुञ्जरैः पण्डिताखण्डलैः तत्पुस्तकमुन्मुच्य समस्ता पुस्तिकाश्छोडयित्वा धराविधोर्मेदिनीन्दोः पुरोऽग्रे अवाचि वाच्यते स्म। पुनस्तैर्गीतार्थैरेतस्य साहेः पुरोऽमुष्य पुस्तकस्य मध्ये लिखितस्य शास्त्रस्य रहस्यम् इद पुस्तकमेतन्नाम शास्त्रमत्र चैतद्वाच्यमित्यादि हार्द न्यगादि कथितम्। किंवत्। सखिवत्। यथा सखिभिर्मित्रैः सख्युः स्वकीयनिरन्तरमनस सख्युः पुन स्वचेतसो निजहृदयस्य रहस्य गुह्य हार्द निगद्यते प्रोच्यते॥

उदीतमङ्गैरिह रुद्रविग्रहैरिवास्तपुष्पध्वजकालकेलिभिः।
पुनस्तमस्तोमभिदाविदावरैः परैरुपाङ्गैरिव पद्मिनीवरैः॥ ८६॥

इह पुस्तकगञ्जकमध्ये रुद्रा एकादश तेषा विग्रहैरङ्गैरिव एकादशसख्याकैः आचाराङ्ग–सूत्रकृदङ्ग–स्थानाङ्ग–समवायाङ्ग–विवाहप्रज्ञप्ती–ज्ञाताधर्मकथाङ्ग–अन्तकृद्दशान्त–उपासकदशाङ्ग–अणुत्तरोपपातिकादशाङ्ग–प्रश्नव्याकरणाङ्ग–विपाकश्रुताङ्गलक्षणैरङ्गैरुदीत प्रादुर्भूतम्। किं लक्षणैः अङ्गैः रुद्रविग्रहैश्च। अस्त क्षिप्तो विनाशितः पुष्पध्वजः कन्दर्पस्तथा कालः कालकालो दैत्यविशेषस्तयोः केलिर्विलासो यैः। 'उदीतमातङ्कितवानशङ्कृत' इति नैषधे। पुनरिह पुस्तके पद्मिनीवरैर्नलिनीनाथैर्भास्करैरिव परैरङ्गेभ्योऽन्यैर्द्वादशभिः उपपत्तिका–राजप्रश्नीय–जीवाभिगमप्रज्ञापना–जम्बूद्वीपप्रज्ञप्तिका–चन्द्रप्रज्ञप्तिका–सूर्यप्रज्ञप्तिका–निरयावलिका–कल्पिका–कल्पावतसिका–पुष्पिता–पुष्पचूलिका–वृष्णिदशा–इति द्वादशसख्याकैरङ्गानामेव वाच्यसूचकैरुपाङ्गैरुदीये। किंभूतैः उपाङ्गैः सूर्यैश्च।

निपीय सादरमाकर्ण्य पीत्वा च। क इव। सुधाशन इव। यथा अमृतपानकृद्देवः सुधाशोश्चन्द्रमसः सुधां निपीयते। 'पीङ् पाने' दिवादिरात्मनेपदी च॥

द्युतामिवार्काः पयसामिवार्णवा यतः श्रुतीनां निधयः स्थ सूरयः।
इदं न जानीथ ततः कथं भवेदगोचरः कश्चन सर्वविच्चिदाम्॥६८॥

हे सूरयः, यतः कारणाद्यूय श्रुतीना सर्वशास्त्राणा निधयः स्थ निधानानि वर्तध्वे। के इव। अर्का इव। कविसमयोक्तद्वादशानामपेक्षया वहुत्वम्। यथा भास्करा द्युता कान्तीना निधयः। पुनः क इव। अर्णवा इव। अत्रापि कविसमयानुसरणात्सप्तानामपेक्षया वाहुल्यम्। यथा समुद्राः पयसा पानीयाना निधयः सन्ति। जैनसमयानुसारेण त्वसंख्यातास्तत्रापि वहुत्वमेव। ततस्तस्मात्कारणादिद मदुक्त शौरेर्मीनराशावागमनफलमन्यग्रहादिचारागमादिफल वा कथ केन प्रकारेण न जानीथ वित्थ। युक्तोऽयमर्थः। उक्तमर्थमर्थान्तरेण वा द्रढयति—कवि. सर्वे समस्तमतीतानागतवर्तमानरहोगतप्रकटभूत विदन्ति जानन्तीति सर्वज्ञास्तेषा चिदा ज्ञानाना कश्चन पदार्थोऽगोचर' अविषयः अज्ञेयः। अपि तु सर्वमपि सर्वज्ञज्ञानगोचर एव। तस्माद्यूय समस्त स्वपरशास्त्राणि जानीथ एवेति सर्वज्ञज्ञानाना महत्त्वापेक्षया वहुत्वम्। अथ वा मतिश्रुतावधिमनःपर्यवकेवलाभिधानाना वहूनां ज्ञानानामप्यपेक्षया वहुत्वम्॥

प्रवृत्त्य वार्तास्वितरासु तत्फलं पुनः पुनः प्रश्नयति स्म भूधनः।
यदा तदा स्यादपरं न धर्मतः शशाङ्कबिम्बादमृतादिवोदगात्॥६९॥

भूधनोऽकन्वरः पुनः पुनर्वार वार तत्फल तस्य मीनराशिगतस्य छायासुतस्य फल प्रश्नयति स्म शुभाशुभविनिर्माणकारण पृष्टवान्। किं कृत्वा। इतरासु सद्गादिराशिस्थमन्दफलप्रश्नादपरासु वार्तासु किंवदन्तीषु प्रवृत्त्य प्रवृत्ति कृत्वा मध्ये मध्ये अन्या वार्ता विधाय। पुनर्मुहुस्तदेवानुयुनक्ति स्मेत्यर्थः। यदा यस्मिन्काले तदा तस्मात् सूरिवक्त्रात् धर्मतः अपरमन्यन्नोदगात् न प्रकटीभूतम्। कस्मादिव। शशाङ्कबिम्बादिव। यथा चन्द्रमण्डलादमृतात्पीयूषादन्यन्नोद्गच्छति॥

तदा मुदोर्वीवलयोर्वशीवशो विधाय शेषं स्वसर्वेशदेशगम्।
स वन्दिवृन्दारकवत्स्मणीतवान्पुरोऽस्य सद्भूतगुणस्तुतिं गुरोः॥७०॥

तदा तस्मिन् [illegible] ॥ [illegible]

राली-शाकटायन-पाणिनि-अमरचन्द्रजिनेन्द्रौ इत्यष्टौ व्याकरणानि। अथ वा ऐन्द्र-पाणिनि-जिनेन्द्र-शाकटायन-वायने-चान्द्र सरस्वतीकण्ठाभरण बुद्धिसागर विश्रान्तविद्याधरं च भीमासनकलापक मुष्टिव्याकरण शैव गौड नन्दिजयोत्पल-'सारस्वत सिद्धहेन जयहेम तथापरम्। इति व्याकरण प्रोक्त सिद्धप्राभृतसभवम्॥' इत्यष्टादशव्याकरणैः सह वर्तन्ते ये ते तादृशा आगमाः सिद्धान्ताः अङ्गोपाङ्गनिर्युक्तिचूर्णिभाष्यादयः सर्वेऽपि तत्पुस्तकान्तर्वर्तमाना ग्रन्थास्तान् साधुसुधाशोः सूरीन्द्रस्य साधवो गीतार्था नृपस्यादर्शयन् नामग्राह दर्शयन्ति स्म। के इव। भानुभानव इव। यथा दिनकरकिरणा भावान् जगत्पदार्थसार्थान् दर्शयन्ति प्रकाशयन्ति ॥

निभाल्य निःशेषमिदं स्वचक्षुषा हृदा दधत्प्रीतिमिवेन्दिरात्मजः ।
वभाण भूमीद्युमणिर्गणीश्वर तृणीकृतानेकनरेन्द्रविक्रमः ॥ ९० ॥

भूमीद्युमणि' क्षोणीसहस्रकिरणः पातिसाहिः।'मध्यदिनावधिविधेर्वसुधाविवस्वान्' इति नैषधे। गणीश्वरमनूचानचक्रिण प्रति वभाण वदति स्म। किभूतः। तृणीकृत. अधरितस्तिरस्कृतः तृणप्रायो गणितः अनेकेषा परोलक्षाणा नरेन्द्राणा क्षोणीपालाना विक्रमो वीर्यं येन। किं कुर्वन्। हृदा हृदयेन प्रीतिं प्रमोद स्नेह च दधत्। क इव। इन्दिरात्मज इव। यथा कमलानन्दनो हृदा वक्षसा कृत्वा। 'ममासनार्धे भव मण्डन ननु प्रिये मदुत्सङ्गविभूषण भव। भ्रमाद्भ्रमादालपमङ्गमृष्यतां विना ममोरः कररत्नवासनम्॥' इति नैषधे। प्रीतिं प्रीत्या स्वपत्नीं धत्ते। किं कृत्वा। स्वचक्षुषा निजनेत्रेण निःशेष समस्तमपि तत्पुस्तक निभाल्य विलोकयित्वा ॥ इति यतिप्रोक्तपुस्तकरहस्यावबोधः ॥

पुराभवत्प्रीतिपदं वयस्यवद्विशारदेन्दुर्मम पद्मसुन्दर' ।
न येन सेहेऽम्बुरुहामिवावलीं हिमर्तुना पण्डितराजगर्विताम् ॥ ९१ ॥

हे सूरे, पुरा पूर्वं मम वयस्यवन्मित्रमिव प्रीतिपद स्नेहभाजन पद्मसुन्दर इति नामा विशारदेन्दु विचक्षणचन्द्रमाः अभवद्बभूव। येन पद्मसुन्दरेण पण्डितराजस्य कस्यचिद्वाराणसीत पठित्वा समेतस्य स्वगुरुणाप्यजेयता स्वस्य प्रख्यापयत. पण्डितविशेषविप्रस्य पण्डितराजेत्यभिधान प्रकटयत. गर्विता स्वचित्तकल्पितानल्पाहकारित्व न सेहे न सोढा। वादेनि(वि)जित्य सभासमक्ष तद्गर्व निर्वासयामासेत्यर्थ.। केनेव। हिमर्तुनेव। यथा हेमन्तकालेन अम्बुरुहा पद्मानामावलिर्न सह्यते। हिमपातेन पद्मानि कोमलत्वाद्विलित्वा यान्ति ॥

जगाम स स्वर्गिमृगीदृशा दृशामथातिथेर्या परिणामतो विधेः ।
मुहुर्मयाशोचि स वातपातिताजिरप्ररूढामरसालवद्विभो ॥ ९२ ॥

हे विभो हे सूरे, अथ पश्चात्क्वियता कालेन स पद्मसुन्दरो विधेर्दैवस्य परिणामतो वशतः स्वर्गिणा स्वर्गजन्मना देवाना मृगीदृशा सत्रस्तहरिणनेत्राणामङ्गनाना दृशा लोचनानामातिथेयीं प्राघुर्णभाव जगाम सप्राप। ततस्तस्य स्वर्गे गमनानन्तर स मया

यथा सुधाब्धेरपरो न वारिधिर्न सिद्धसिन्धोरपरा तरङ्गिणी।
न पादपः कश्चन कल्पपादपात्परो नृपः कोऽपि न चक्रवर्तिनः ॥७४॥
न धेनुरन्या सुरभेः सुधाभुजां पदं न चान्यत्परमेष्ठिनः पदात्।
परो न धर्मः करुणाविधेर्यथा तथास्ति कश्चिन्न वशी विभोः परः ॥७५॥

हे शेख, तथा तेन प्रकारेण विभोरस्मात्सूरेः परोऽन्यः कश्चिद्वशी जितेन्द्रियमनाः कथनकरणयोः सदक्षो निजाङ्गीकृतप्रतिज्ञानिर्वाहको नास्त्येव। तथा कथम्। यथा सुधाब्धेर्यस्मिन् पीयूषप्रमुखचतुर्दशरत्नान्युत्पाद्यन्ते तस्मात्क्षीरसमुद्रादपरः कः श्लाघ्यो वारिधिरस्ति। न कश्चिदपि। यथा सिद्धसिन्धोर्गङ्गाया अपरा इतरा जगत्या चित्रकारिका त्रैलोक्येऽपि त्रिभिः प्रवाहैः वाहिनी निर्मलजला च तरङ्गिणी नास्ति। यथा कल्पपादपात्सुरतरोः परः कश्चन कामदायकः पादपो नास्ति। पुनर्यथा चक्रवर्तिनः षट्खण्डपृथिवीपतिरन्यः कश्चिन्नृपो नास्ति। पुनर्यथा सुधाभुजां निर्जराणां सुरभेः कामधेनोरपरा कामदुघा सकलकामप्रदा धेनुर्न विद्यते। पुनर्यथा परमेष्ठिनो जगन्नाथस्य पदात्पदव्या अन्यत् अपरं पदं न वर्तते। यत्र त्रैलोक्यैश्वर्यम्, यत्र च शिविकावाहकाश्चतुःषष्टिः सुरासुरेन्द्राश्चतुस्त्रिंशदतिशयाष्टमहाप्रातिहार्यादिलक्ष्मीस्तत्पदादपरं किमपि पदम्। अपि तु न। अथ वा परमेष्ठिनः स्थानान्मोक्षादपरं पदमनन्तसुखानन्दज्ञानात्मकं परमपदमित्युच्यमानं निवर्तते। पुनर्यथा करुणाविधेर्दयापालनात्परो धर्मो नास्ति। यदुक्तम्—'नास्ति धर्मो दयापरः' इति ॥ युग्मम् ॥

श्रवःपथातिथ्यमनायि यादृशो वशी दृशा दृश्यत एव तादृशः।
इदंगुणौघान्गणयञ्जगद्गिरामगोचरान्किं स्थविरोऽभवद्विधिः ॥ ७६ ॥

हे शेख, यादृशो यादृक्प्रकारो मत्सादृश्यैः सम्यक् वर्ण्यमानः असौ वशी यस्येन्द्रियाणि मनश्च वशे स्वाधीनप्रचाराणि सन्त्यस्येति योगीन्द्रः श्रवःपथस्य श्रवणमार्गस्यातिथ्यमातिथेयी प्राघुणता वा अनायि मया नीतः। श्रुत इत्यर्थः। तादृशस्तादृगुणाकार एव दृशा लोचनेन दृश्यते विलोक्यते। हे अवलोकिन शेख, जगतां त्रिजगतां गिरां वाचामगोचरान् अविषयान् सुरासुरनरैरपि स्तोतुमशक्यान् कथयितुं वा इदंगुणौघान् अस्य सूरेर्गुणगणान् गणयन् सङ्ख्यां प्रापयन्। उत्प्रेक्ष्यते—किं विधाता स्थविरो वृद्धः किमभवत्सञ्जातः? इत्युत्प्रेक्षा ॥

ददाति धाता गिरिशश्च शक्तिभृच्चतुर्मुखीं पञ्चमुखीं च षण्मुखीम्।
भुजंगराजो द्विसहस्रजिह्वतां बिभर्ति सन्तोऽनुमितोऽस्तु कीमवत् ॥ ७७ ॥

हे शेख, न सूरिरान्तर्गतान्गुणान् वर्णयितुम्। उत्प्रेक्ष्यते— [illegible] यस्मात् धाता ब्रह्मा चतुर्मुखी चतुर्मुखतां [illegible] गुणाना [illegible] [illegible] पुनः गिरिश [illegible] [illegible] पञ्चमुखी [illegible] [illegible] [illegible] [illegible] षण्मुखी

हे सूरे, ततस्तत्पुस्तकप्रदानयोग्यापरपात्रानवेक्षणरक्षणकारणाद्गुणा एव गणयितुं प्रमाणीकर्तुमशक्याः गणनार्हा गण्या न गण्या अगण्या वा मन्ये रत्नानि तेषां महार्णवाः क्षीरनीराशयाः रत्नाकरत्वात् भवादृशाः श्रीमत्सदृशाः केऽपि परे दृशा मया लोचनेन न वीक्षिता दृष्टाः । युक्तोऽयमर्थः । हे गुरो, निर्जराणामर्जुनी सुरगवी कामधेनुः, मणी सुरमाणिक्य चिन्तारत्नम्, महीजन्मानः सुरतरवः कल्पद्रुमाः, निपाः सुरकलशाः कामकुम्भाः, अवनीधराः सुरगिरयः मेरुपर्वताः । किमु इति प्रश्ने । पदे पदे स्थाने स्थाने किं स्युः । अपि तु न भवेयुः । निर्जरशब्दादग्रे अर्जुन्यादयः शब्दाः योज्याः । ततः कामधेन्वादीनि नामानि भवन्ति । यथा श्रीचिन्तामणिपार्श्वनाथस्तोत्रे— 'गीर्वाणद्रुमकुम्भधेनुमणयस्तस्याङ्गणे रिङ्गिणः' इति ॥

इदं तदादत्तसमस्तपुस्तक मुनीश्वरा मामनुगृह्य शिष्यवत् ।
यदत्र पात्रप्रतिपादन नृणां भवाम्बुराशौ कलशीसुतीयते ॥ ९६ ॥

हे मुनीश्वराः सूरयः, तदुत्तमपात्रत्वादिकारणात् शिष्यवन्निजविनेयमिव स्वनन्दनमिव वा मामनुगृह्य ममोपरि अनुग्रह प्रसाद विधाय इद पद्मसुन्दरगणिकः श्रीमद्गुरो मया ढौकित समस्तमपि पुस्तक लिपीकृतशास्त्रजानमादत्त गृह्णीत । यतो इत्थं न जगति पात्रप्रतिपादन सत्पात्रदान नृणा भव्यजनाना भवाम्बुराशौ संसारसमुद्रे कलशीसुतीयते अगस्त्यमि(म्रि)वाचरति । भवसागर निष्ठापयति । घटः कुम्भः कलश त्रयोऽपि पुंल्लिङ्गे ॥

मति श्रुतिक्षीरधिपारदृश्वरीं यतो वहन्तः स्थ तपस्विशेखरा. ।
इमं ततोऽलंकुरुता मरालवद्विरञ्चिपुत्र्या इव वः कराम्बुजम् ॥ ९७ ॥

हे तपस्विशेखरा, तपोरूप स्व स्वापतेयमस्त्येषामिति तपस्विन । 'अस्त्रं न तपोयोगसमाधयः' इति हैम्याम् । एतावता श्रमणावतरा श्राम्यन्ति तपसा इति श्रमणा इति भगवद्विशेषणेन सार्थक पूर्वोक्त नाम । यत. कारणात् यूयं ... ता एव क्षीरधिर्दुग्धाम्भोनिधिस्तस्य पार दृष्टवतीति पारगामिनीं मति बुद्धि वहन्तो धारयन्त स्थ वर्तध्वे । ततोऽद्वैतबुद्धिमत्त्वहेतोरिद पुस्तक विरञ्चिपुत्र्या. 'दशम ...' इत्युक्तत्वात् विधातुर्नन्दिन्या सरस्वत्या इव वो युष्माक कराम्बुज पाणिपद्ममलंकरोतु । किंवत् । मरालवत् । यथा राजहंसा करतुल्य ... । विरञ्चिपुत्र्या अपि करकमले पुस्तकमास्ते । 'पुस्तकव्यग्रहस्ता च' इति कोशे ॥ इति पुस्तकोत्पत्तितत्प्रदानकथनम् ॥

इद तदाकर्ण्य स कर्णकेसरी गिर न्यगादीत्तमसामसादरीम् ।
अवाप्ततृष्णेरशनैरिवामुना न तृप्यमाना वसुधाधरोदर ॥ ९८ ॥

१ दीपपारान्तोऽपि सर्पिशब्दो नाममालाया प्रसिद्ध एव

बहुत्वम् । कलभास्त्रिंशदब्ददेशीयाः सिन्धुरा भवेयुः । पुनः केषामिव । अवनीरुहामिव । 'रुटरुहजन्मजेः' इति हैम्याम् । यथा वृक्षाणां सुमानि पुष्पाणीव भवेयुः । पुनः केषामिव । विवस्वतामिव । यथा मार्तण्डानां कराः किरणाः स्युः ॥ इति साहेः गुरून्प्रति शिष्यप्रश्नः ॥

नृपं प्रति व्याहृतवानिति व्रतीशिता कियन्तो मम सन्ति भूपते ।
इदं मुनीन्द्राननपद्मसंभवं स भृङ्गवद्वाङ्मकरन्दमापपौ ॥ ८१ ॥

ततो व्रतीशिता सूरिर्नृपमकब्बरं प्रति इत्यमुना प्रकारेण व्याहृतवान् भाषते स्म । हे भूपते, मम शिष्याः कियन्तः कतिचिद्वर्तन्ते । परं संख्या नाख्यायि । यतः सन्तः उत्तमा निजगौरवं स्वमुखेनैव न ख्यापयन्ति । यदुक्तम्—'न सौख्यसौभाग्यकरा नृणां गुणाः स्वयं गृहीता युवतीस्तना इव । परैर्गृहीता द्वितयं वितन्वते न तेन गृह्णाति निजं गुणं महान् ॥' इति । ततोऽनन्तरं स भूमान् इदं स्वमदपरिहारद्वारा शिष्यसंख्याकथनरूपं मुनीन्द्रस्य सूरेराननं मुखमेव पद्मं कमलं तस्मात्संभव उत्पत्तिर्यस्य तादृशं वाक् वचनमेव मकरन्दं मधु आपपौ सादरं शृणोति स्म । किंवत् । भृङ्गवत् । यथा भ्रमरकः कमलोद्भवं मकरन्दमापिबति । 'सुरासुरनराकारमधुपापीतपत्कजः' इति सारस्वतव्याकरणप्रान्ते आपीत इति प्रयोगो दृश्यते ॥

जगाद गाजी गणपुंगवं पुनः पुरा मयेति श्रुतिगोचरीकृतम् ।
विलोचनानामिव भोगिनां विभोः सहस्रयुग्मं शमिनां समस्ति वः॥८२॥

मुद्गलजनपदप्रसिद्धं महत्त्वख्यापकं यवनज्ञातेरभिधानं गाजीति । स गाजी अकब्बरसाहिः गणपुंगवं तपागच्छवृषभं मुख्यं वा प्रति जगाद गदति स्म । हे व्रतीश्वराः, पुरा पूर्वं मया जनवार्तया इति श्रुत्योः श्रवणयोर्गोचरीकृतं विषये विहितमास्ते वर्तते । इति किम् । वो युष्माकं शमिनां शिष्यीभूतानां साधूनां सहस्रस्य युग्मं युगलं द्विसहस्री । सम्यक् विद्यते इति समस्ति । केषामिव । विलोचनानामिव । यथा भोगिनां भुजंगमानां विभोः स्वामिनः शेषनागराजस्य नेत्राणां नयनानां सहस्रद्वयी आस्ते । 'शेषो नागाधिपोऽनन्तो द्विसहस्राक्ष आलुकः' इति हैम्याम् । सहस्रफणामण्डलैर्धरणीधारकत्वात् सहस्रफणानां सहस्रनेत्रद्वयभावात् ॥ इति साहिना स्वयमेवोक्तसूरिशिष्यसंख्या ॥

ततः क्षितीन्द्रः.. ।
....॥ ८३ ॥

ततः स्वयं सूरिशिष्यकथनानन्तरं क्षितीन्द्रः साहिः व्रतीश्वरं सूरिं प्रति समीपं भगवत्सन्निधानं भजन्ति इति तत्समयसूरिसमीपस्थायुकानां व्रतिनां साधूनामभिधा नामानि पृच्छति स्म । ततस्तस्य नृपस्य पुरोऽग्रे परस्परमन्योन्यं तद्विदो व्रतिनामज्ञाः एव व्रतिनो गीतार्था एव ताः पण्डितनामाभिधा अभिधानानि अवदन्कथयन्ति स्म । के-

प्रत्यक्षीभूतः प्रत्यक्षीभूतश्च देवो मन्त्राधिष्ठाता सुसाधकस्य मनोवाञ्छितं पूरयति ॥
इति साह्ये पुस्तकदानामद सूरेर्निषेधवच. ॥

यदाददे नैष मुहुर्बहूदितस्तदा हृदा भूपतिनेत्यचिन्त्यत।
विधीयते किं बहुनिःस्पृहा अमी इवानुरागा न च विक्रमोचिताः॥१०१

यदा एष सूरि भूपतिना मुहुर्वारंवार बहु अत्यभ्यधिकमुदितो विज्ञप्तोऽपि नाददे सहिपुस्तकं न गृहीतवान्, तदा भूपतिना अकब्बरेण हृदा मनसा इत्यग्रे वक्ष्यमाणमचिन्त्यत विचारितम्। अहो किं विधीयते क्रियते। अमी सूरयो निःस्पृहा निरीहा महानुभावा मुक्तिं विना क्वापि वस्तुनि न साभिलाषाः च पुनर्महत्त्वेन विक्रमस्य बलात्कारस्यापि नोचिता नार्हा। क इव। अनुरागा इव। यथा आदिरागा बलयोग्या न भवन्ति। यतः सूक्तम्—'कविता वनिता गीतिः स्वयमेवागता वरम्। बलादाकृष्यमाणापि सरसा विरसा भवेत्॥', तथा—'जरा यौवनस्तु प्राणन होइ जातइं प्राणइ प्राणन होइ। प्राणनाथस्तु प्राणन होइ कीर्तिप्रीतिस्तु प्राणन होइ ॥' इत्युक्तेः। नात्र बलदर्शनमुचितम् ॥

अमीभिरुक्तिर्मम मन्यते न चेत्ततोऽन्तरा कश्चन सधिकर्तृवत्।
विधीयते यद्विविधोक्तिभिः प्रभूनुरीकृतिं स्वेन स एव कारयेत्॥१०२॥

चेद्यदि अमीभिः सूरिभिर्ममोक्तिः मत्कथितं न मन्यते नाङ्गीक्रियते ततः कारणात् सधिकर्तृवत् सधिकारक इव कश्चन शेखप्रमुखः कोऽपि अन्तरा ममैतेषां च साक्ष्ये विधीयते यत्कारणात्स मध्यविहित एव प्रभून् सूरीन् विविधा नानाप्रकारा या उक्तय अनुनयविनयमत्सामर्थ्यैस्वभावजातिप्रकटीकारकाणि वाक्यानि वचनचातुरीविशेषास्ताभिः कृत्वा उरीकृतिं स्वीकारं कारयेत्। यतो महत्सु विक्रमो नौचितीमञ्चति किं तु विज्ञप्तिरेव विधेया, यद्वा कमप्यन्तरा विधायानुनत्या प्रणत्या कथमपि कार्यं कार्यमिति नीतिः ॥

इमं विकल्पं परिकल्प्य चेतसा विभूषयन्भागमितः क्षितेः परम्।
सुधारुचेश्चारवशात्स्ववेशगो ग्रहः पदव्या इव मन्युभोजिनाम्॥१०३॥
महीमरुत्वानथ शेखशेखरं प्रतापदेवीतनयं तथाह्वयत्।
ततः सृजन्तौ प्रणतिं ग्रहेशितुर्महाविवास्यान्तिकमागतावुभौ ॥१०४

अथ विचारकरणानन्तरमपरप्रदेशागमनानन्तरं च महीमरुत्वान् धरित्रीसुधाशनः शेखेषु यवनानां मान्येषु शेखरमवतंसं मुकुटं वा अबलफैजं तथा पुनः प्रतापदेवी रामासाधुतृतीयलघुपत्न्यास्तनयं नन्दनं थानसिंहाह्वयं चाह्वयदाकारयामास। किं कुर्वन् इमं पूर्वोक्तं मनसैव विचारितं विकल्प्य विचारं चेतसा चित्तेन परिकल्प्य कल्प... इतः सूरिपार्श्वात्परमन्यं क्षितेर्भूमेर्भागं प्रदेशं स्थानं विभूषयन् सेवां कुर्वन्। क...

तमसामज्ञानानां दुष्कृतानां वा अन्धकाराणां स्तोमस्य समूहस्य भिदाया विदारणे विदांवरैः कुशलैः वेत्तृषु मुख्यैः ॥

प्रकीर्णकैर्धर्मधरापतेरिव प्रकीर्णकैः प्रादुरभावि तत्र च ।
परश्वधैश्छेदकरैर्धरारुहामिवांहसां छेदवरागमैस्तथा ॥ ८७ ॥
चतुःप्रमाणैरपि मूलवाङ्मयैश्चतुर्गतीनां प्रतिषेधकैरिव ।
युगेन वा नन्द्यनुयोगशास्त्रयोर्दृशोरिव श्रीजिनशासनश्रिया ॥ ८८ ॥

च पुनस्तत्र पुस्तके चतुःशरण–आतुरप्रत्याख्यान–महाप्रत्याख्यान–भक्तपरिज्ञान–तंदुलवैकालिक–चन्द्राविध्वज–गणिविद्या–मरणविभक्ति–देवेन्द्रस्तव–संस्तारकप्रकीर्णक–इति नामभिर्दशप्रकीर्णकैः प्रादुरभावि प्रकटीभूतम् । उत्प्रेक्ष्यते—धर्मधरापतेः धर्मनाम्नो राज्ञः प्रकीर्णकैश्चामरैरिव । तथा पुनः निशीथ–महानिशीथ–व्यवहार–दशाश्रुतस्कन्ध–पञ्चकल्प–जीमूतकल्प–बृहत्कल्पनामभिः छेद इति संज्ञया वरैः प्रधानैः आगमैः सिद्धान्तैः आविर्भूयते स्म । किंभूतैः । अंहसां पापानां छेदकरैः खण्डशः कारिभिः । कैरिव । परश्वधैरिव । यथा कुठारैः धरारुहां वृक्षाणां शतसहस्रलक्षशः शकलकारकैः भूयते । अपि पुनश्चत्वारि प्रमाणानि येषां तैश्चतुःप्रमाणैः मूलवाङ्मयैः आवश्यकदशवैकालिक–उत्तरायन–पिण्डनिर्युक्ति–रितिमूलाभिधानैराद्धान्तैराविरभावि । उत्प्रेक्ष्यते—चतुःप्रमाणत्वेन चतुर्णां नरक–तिर्यङ्–मानव–दानवाहितानां दुष्टानां निकृष्टानां भवभ्रमणहेतूनां नीचजातीनां वा गतीनां प्रतिषेधकैर्निवारकैरिव । वा पुनः नन्दी तथा अनुयोग इति नाम ययोस्तादृशयोः शास्त्रयोर्युगेन द्वन्द्वेन प्रकटीभूतम् । उत्प्रेक्ष्यते—श्रीजिनशासनश्रिया श्रीमन्महावीरार्हन्मतलक्ष्म्या दृशोर्द्वयं नयनयोर्यामलम् किमेतावता पञ्चचत्वारिंशदागमाः संजाताः ॥ युग्मम् ॥

अलंकृतिज्यौतिषकाव्यनाटकप्रमाणवेदान्तसलक्षणागमान् ।
अदर्शयन्साधुसुधांशुसाधवो नृपस्य भावानिव भानुभानवः ॥ ८९ ॥

अथापरशासनसत्करशास्त्राणां नामान्याह—अलंकृतिः वाग्भटालंकार–काव्यानुशासन–छन्दोनुशासन–वृत्तरत्नाकरादयोऽलंकारग्रन्थाः, ज्यौतिषाणि नारचन्द्र–आरम्भसिद्धि–वाराहीसंहिता–खण्डखाद्य–कर्णकुतूहलादीनि ज्योतिःशास्त्राणि, काव्यानि रघुवंश–मेघदूत–कुमारसंभव–किरात–माघ–नैषध–चम्पू–कादम्बरी–पद्मानन्द–यदुसुन्दराद्यानि, नाटकानि पिङ्गलभरतादीनि तथा हनूमत्–दूताङ्गद–रघुभीमनाटकादीनि च नाटकशास्त्राणि, तथा प्रमाण तर्कपरिभाषा–सप्तपदार्थी–मितभाषिणी–प्रमाणमञ्जरी–शशधरवरदराजी–मणिकण्ठवर्धमान–प्रशस्तपादभाष्य–वर्धमानेन्दु–किरणावली–चिन्तामणि–खण्डन–पूर्वमीमांसा–पञ्चाध्यायी–जैनप्रमाण–प्रमाणमञ्जरी–स्याद्वादमञ्जरी–रत्नाकरावतारिका–सन्मति–स्याद्वादरत्नाकरादीनि प्रमाणशास्त्राणि, वेदान्त उपनिषद्–ऋग्यजुः–साम–अथर्वाभिधानवेदानां श्रुतयः, षडङ्ग इन्द्र–चन्द्र–[illegible]–आपि

हे सूरयः, इमाउसूरकल्परपातिशाहि सोमयशसो बाहुबलेर्नन्दपुत्रस्य यनामा चन्द्रयशोऽजनि तस्मादङ्गजन्मा पुत्रः श्रेयांसस्तद्ददाति। आवश्यकवृत्त्यनुसारेण बाहुबलिसुतः सोमप्रभस्तस्य पुत्रो युवराजः श्रेयांसः। आवश्यकचूर्णौ तु 'भरहस्स पुत्तो सेज्जंसो अन्ने भणंति। बाहुबलिस्स पुत्तो सोमप्पभोत्ति अन्नो अत्थि तच्च केवलिगम्यम्॥' पुनर्युगादिवन् ऋषभजिनेन्द्र इव। गुरवो यूयं पात्रं सम्यक् श्रेयो बुद्ध्या दानोचितं स्थानमपि तु पुनर्यथा इक्षो रसालस्य रसः स्यन्दः तत्राभूत्। तथा अत्र पुस्तकं दातव्यं वस्तु। 'अथेक्षुः स्याद्रसालोऽपि पत्रकः' इति हैम्याम्। तथा 'रसाल इक्षौ चूते च' इत्यनेकार्थः। ततो दानृपात्रयुवगुत्रयाणामप्यत्र सुयोगो वर्तते, तत्कारणादस्मनः सकाशादनुचितं ग्रहीतुं योग्यं यूयं कथं केन प्रकारेण न गृहीथ ग्रहणं वे। अवश्यं गृह्णीतामेवेति भावविशेषोक्तिः॥

अमुं च जानीथ न मुद्गलेश्वर निदेशशूरं द्विषतां निषूदनम्।
दिगीश्वरा यच्चकिता इवाखिलास्त्यजन्ति नाद्यापि दिगन्तवासिताम्॥

हे प्रभवः, च पुनरमुमकब्बरं परमा मुद्गर्यो गतानि दर्शनयति। यातीत्यर्थः। हे [illegible] यस्ते मुद्गलास्तेषामपीश्वरं पराभवनकरणे समर्थं स्वामिनं न [illegible] गुरीनचक्रवर्तिन न जानीथ सम्यक् हृदये न चित्ते नावधारयत। निदेशे आज्ञायां शूरमतिकठिनं य आज्ञां न मन्यते तं स्वशासनोल्लङ्घिनमवश्यमेव निगृह्णाति। पुनः [illegible]। द्विषतां वैरिणां निषूदनं मूलादुन्मूलनकारकम्। हे प्रभवः, [illegible] दिगीश्वरा दिक्पालाः। उत्प्रेक्ष्यते—यच्चकिता यस्माद्भयभ्रान्ताः [illegible] सन्तीत्येवंशीलास्तेषां भावं दिशां प्रान्तेषु दूरे [illegible] यावन्न त्यजन्ति॥

निजानुकूलीभवता तनूमता गुणालयेव नतिचक्रवर्तिना।
प्रविभ्रता स्वप्रतिकूलतां पुनर्विपरय शारीव समुन्निपत्यते॥ ११०॥

हे नतिचक्रवर्तिन्, [illegible] निजस्यात्मनोऽनुकूलीभवता [illegible] तनूमता नराणां राजसामन्तादयः सर्वेऽपि तनुमन्त [illegible] तवतिरिव समुन्निपतति जीवातुरिवोदेति। पुनरयं [illegible] प्रद्विष्टभावं प्रावनता विद्विषता विपक्ष [illegible] समुन्निपत्युदस्थाति॥

यदात्मनोऽर्वां परमेश्वरा स्वागता स्म साक्षादुपकर्तुमिन्निनान्।
इदं विदन्त्येव मुनीन्द्रवो [illegible]॥ १११॥

हे मुनीन्द्र, [illegible]
[illegible]
[illegible]

हे सूरयः, इमाउसूरकब्बरपातिसाहि सोमयशसो बाहुबलेर्वृद्धपुत्रस्य यत्राग्मा चन्द्रवंशोऽजनि तस्याङ्गजन्मा पुत्रः श्रेयांसस्तद्वद्ददाति । आवश्यकवृत्त्यनुसारेण बाहुबलिसुतः सोमप्रभस्तस्य पुत्रो युवराजः श्रेयांसः । आवश्यकचूर्णौ तु 'भरहस्स पुत्तो सेजंसो अन्ने भणंति । बाहुबलिस्स पुत्तो सोमप्पभोसे जसो अत्ति तत्त केवलिगम्यम् ॥' पुनर्युगादिवत् ऋषभजिनेन्द्रा इव । गुरवो यूयं पात्रं सम्यक् श्रेयो बुद्ध्या दानोचितं स्थानमपि तु पुनर्यथा इक्षो रसालस्य रसः स्यन्दः तत्राभूत् । तथा अत्र पुन्यदानब्यवस्तु । 'अथक्षु स्यादरसालोऽपि पत्रकः' इति हैम्याम् । तथा 'रसाल इक्षौ चूते च' इत्यनेकार्थः । ततो दातृपात्रसुवस्तुत्रयाणामप्यत्र संयोगो वर्तते, तत्कारणादात्मनः स्वस्यार्हमुचितं प्रहीतुं योग्यं यूयं कथं केन प्रकारेण न गृह्णीथ प्रहयाथ । अनघं गृह्णीतामेवेति भावविशेषोक्तिः ॥

अमुं च जानीथ न मुद्गलेश्वरं निदेशशूरं द्विषतां निषूदनम् ।
दिगीश्वरा यच्चकिता इवाखिलास्त्यजन्ति नाद्यापि दिगन्तवासिताम् ॥

हे प्रभवः, च पुनरमुमकब्बर परेषां मुद्गलानां [illegible] । जानीथ । [illegible]श्वरते मुद्गलाख्येषामपीश्वरं पराभवनकरणे समर्थं स्वामिनं च ऐन्द्रं युगीनचक्रवर्तिनं न जानीथ सम्यक् हृदये न वित्थ नावधारयत । निदेशे आज्ञायां शूरमात्मनो[illegible] आज्ञा न मन्यते तं स्वशासनोल्लङ्घिनमवश्यमेव निगृह्णाति । पुनः [illegible] । द्विषतां वैरिणां निषूदनं मूलादुन्मूलनकारकम् । हे प्रभवः, अखिलाः समस्ता अपि दिगीश्वरा दिक्पालाः । उत्प्रेक्ष्यते—यच्चकिता यस्माद्भयभ्रान्ताः सन्त इव [illegible] स्थाने सन्तीत्येवंशीलास्तेषां भावं दिशां प्रान्तेषु दूरे [illegible] यावन्न त्यजन्ति ॥

निजानुकूलीभवतां तनूभृतां सुधालतेव [illegible] ।
प्रविभ्रतां स्वप्रतिकूलतां पुनर्विषस्य शाखीव [illegible] ॥ ११ ॥

हे मतिपवर्तिनः, असावकब्बरो निजानुकूलो[illegible] भजतां तनूभृतां नराणां राजसामन्तादीनां [illegible] तदन्तिकेव समुन्मिषति जीवातुरिवोदेति । पुनरसौ [illegible] विलोमभावं प्रातिकूल्यभावं प्रविभ्रतां [illegible] किंपाकतरुः समुन्मिषत्युदुच्छति ॥

यदात्मनोर्वीपरमेश्वरा इवागताः [illegible] ।
इदं विदन्त्येव मुनीन्द्रवो [illegible] ॥ १२ ॥

हे मुनीन्द्रव, [illegible]
[illegible]
[illegible]

स कर्णकेसरी पण्डितपञ्चाननः सूरिस्तदा पुस्तकदर्शनसमये इदं पुस्तकं यूयं गृह्णीत इति नृपतिनिगदितमाकर्ण्य श्रुत्वा तमसामज्ञानानां पाप्मनां वा अवावरीमपनेत्रीम्। 'ओणृ अपनयने' ओण् धातुः। 'अन्येभ्योऽपि दृश्यते' इति वनिप्प्रत्ययः। 'वनोर च' ... 'णोन्ताद्वातो ङीप्रौ' इति केचिदिति वन्प्रत्ययस्य ङीप् आगमो नकारस्य राकारादेशः। 'विड्वनोरनुनासिकस्य' इति सूत्रेण धातोर्णकारस्याकारादेशः। ओकारस्यावादेशः। अवावरी इति सिद्धम्—इति प्रक्रियाकौमुद्याम्। दुरितहर्त्रीं गिरं वाणीं न्यगादीत् बभाषे। किमुवाच—बहवो धीमन्तो बुद्धिमन्तो वर्तन्ते यस्यां सा बहुधीवरी नगरी श्रीकरी तस्या वरः पतिस्तस्या वरः श्रेष्ठ सर्ववेतृत्वात् सर्वाधिपतित्वात्तस्य संबोधनम्। बहुव्रीहौ वा ततो बहुधीवरी बहुधीवा इति प्रयोगद्वयं स्यात्। 'वनोर च' वनन्तात्स्त्रियां ङीप् रश्चान्तादेशादि सर्वं पूर्ववत्। अयमपि प्रयोगः प्रक्रियायामेव। पुस्तकेन कृत्वा मम किमपि कृत्यं कार्यं नास्ति न विद्यते। कस्येव। अवाप्ततृप्तेरिव। यथा अवाप्ता लब्धा तृप्तिः सौहित्यं येन। एतावता आकण्ठमिच्छापूरणपर्यन्तं भुक्त्वोत्थितस्य पुंसः अशने भोजने कृत्वा किमपि कार्यं न स्यात्॥

नरेन्द्र यावद्व्रतिनां विलोक्यते तदस्त्यमीषां क्रियतेऽधिकेन किम्।
विभोरिमां दामवदुद्वहन्हृदा गिरं पुनः क्षोणिपुरंदरोऽवदत्॥ ९९॥

हे नराणां मध्ये इन्द्र सहस्रलोचन साहे, व्रतिनां सर्वविरतिवतामनगाराणां यावत्प्रमाणमध्येतुं वाचयितुं विलोकयितुं विलोक्यते तावत्प्रमाणं पुस्तकममीषां यति(ती)नामस्ति विद्यते तर्हि मूर्छाकारिणा अधिकेन बहुना किं क्रियते। न किमपीत्यर्थः। पुनः क्षोणिपुरंदरो नृपोऽवदत् जगाद। किं कुर्वन्। विभोः सूरेरिमां यावत्पुस्तकं विलोक्यते तावन्मात्रं तत्पुस्तकं वर्तते। साधूनामधिकेनाधिकरणभूतेन पुस्तकेन किं विधीयते न किंचिद्विधेयमित्यादिकां गिरं वाणीं हृदा मनसा उद्वहन्। किंवत्। दामवत्। यथा कश्चिद्भोगी पुमान् हृदा वक्षसा कुसुममालिकामुद्वहते धारयति॥

ब्रवीमि किं वो बहु येन निःस्पृहा महीधनाकिंचनतुल्यचक्षुषः।
तथापि मन्त्राहुतिसिद्धदेववत्प्रसाद्य मे पिप्रतु यूयमीहितम्॥ १००॥

हे सूरयः, वो युष्मान् प्रति बहु पुनः पुनः [illegible] किं ब्रवीमि कथयामि। येन [illegible] [illegible]

रुम्काः प्रस्थानालाभपुरीयादयस्तथा मुद्गला. काबिलखुरासानादिजनपदजन्मानो म्लेच्छास्तेषामवनीधनो राजा थानसिंह समाहूय आकार्य गिर वाणीं गृहीतवान् जल्पति स्म । किं कृत्वा । सद्गुरोः श्रीहीरविजयसूरिसकाशाद्दयान्वित कृपाकलित धर्ममवाप्य लब्ध्वा । कमिव । कृष्णलताङ्कविद्रुममिव । यथा कश्चिदर्णवाज्जलनिधेः कृष्णलता 'कालीवेलि' इति लोके प्रसिद्धा । सा अङ्के हृदये मध्ये यस्य तादृश प्रवाल लभते ॥

मदीयतूर्यादिनिनादसादरं जगज्जनानन्दिमहेन मेदुरम् ।
स्वमालयं लम्भय साधुसिन्धुरं तटं शशीवामृतवाहिनीवरम् ॥ ११६ ॥

हे थानसिंह, त्व साधुसिन्धुर श्रीगुरु मदीयानि तूर्याणि मम सबन्धीनि वादित्राणि तेषा निनादैर्घोषैः सहादरैर्वर्तन्ते एव स्यात्तथा आलय स्वावासमुपाश्रय वा लम्भय प्रापय । क इव । शशीव । यथा चन्द्रमा अमृतवाहिनीवर सुधासिन्धुधव क्षीरसमुद्र तट वेलावनीं लम्भयति । ण्यन्तात्कर्मद्वयम् । पुन कथम् । जगता भुवनाना जनान् सुरासुरनरानानन्दयति प्रमोदयतीत्येवशीलेन महेनोत्सवेन कृत्वा मेदुर स्यादेवम् ॥

प्रमाणमाज्ञा जगतीवसन्तिका सृजामि निःशेषमिदं नियोगिवत् ।
पुरा मदीहा पुनरीशशासनं पयस्तदेतत्सितया करम्बितम् ॥ ११७ ॥

हे प्रभो, जगतीवसन्तिका समस्तक्षोणीचक्रशिर शेखरायमाणा । 'आपीडशेखरोत्तसावतंसा शिरस स्रजि' इति हैम्याम् । 'विदर्भसुभ्रूश्रवणावतसिका' इति नैषधे । आज्ञा श्रीमदादेश. प्रमाण शिरस्यारोपयामि । हे स्वामिन्, इद श्रीमत्प्रसादित निःशेष समस्तमपि सृजामि करोमि । किंवत् । नियोगिवत् । य कश्चित्स्वस्य सुकरे दुष्करेऽपि कार्ये आप्रयुक्त. स वनिजजीवमपि दु खाकुलकल्प कुरुते स नियोगी सेवक इव । यद्यप्यह श्रीमत्सेवकोऽस्मि पर नियोगिवत्कार्यकर्ता नास्मि केवल सेवाकार्येव । यथा परे नियोगिन आथवाः श्रीमद्वार्ताकारका श्रीमन्निर्दिष्ट कार्यं कुर्वन्ति तथाहमपि करोमीत्यर्थः । पुनर्हे प्रभो, पुरा पूर्व मदीहा मम वाञ्छा आसीत् । यदेतान्महामहेन स्वालय नयामि । पुनस्तदुपरि ईशस्य पृथ्वीनाथस्य पातिसाहेः शासन आदेश. तदेतत्सितया शर्करया करम्बित मिश्रित पयो दुग्ध दुग्धपानमिव सजातमिति ॥

अथैनमापृच्छ्य स भूमिभूषणं प्रदाय धर्माशिषमात्मना पुनः ।
सहानगारैर्निरगात्समाजतः शशीव तारैः शरदभ्रगर्भतः ॥ ११८ ॥

अथ थानसिंहस्य साहेस्तूर्यदानायादेशानन्तर स सूरिरनगारैः सहागतसाधुभि सह समाजत सभामध्यान्निरगात् निर्जगाम । क इव । शशीव । यथा तारापतिस्तारैस्तारकैरुपलक्षाद्वहोडुभिः । 'प्रथमसुपहृत्यार्थ तारैरखण्डिततन्दुलैः' इति नैषधे । तारशब्दोऽकारान्तः । सर्वज्योतिर्भिः सार्ध शरदभ्रस्य शारदीनघनाघनस्य गर्भात् उदरात् निर्गच्छति । किं कृत्वा निर्गतः । एनमवनीश्वर भूमिभूषण क्षोणीमण्डनानि ...

ग्रह इव । यथा भौमादिग्रहः चारवशाद्गतिविशेषायत्तत्वात् सर्वेशगः समीपप्राप्तः सुधारुचेश्चन्द्रस्य पार्श्वात्परं मन्यु यज्ञाश भुञ्जते इत्येवशीला देवास्तेषां पदव्या मार्गस्य गगनस्य भागमन्य प्रदेशं भूषयति । ततः साहिना आकारणानन्तरमुभौ शेखथानसिंहौ प्रणतिं 'पातिसाहिसलामत' इत्युक्त्वा भूमौ हस्तं दत्त्वा पुनर्भाले ददतौ पुनस्तदेव वदन्तौ तथैव विदधातौ च इति सलाममिति यवनजातिषु नमस्कृतेरभिधानं तामेव सृजन्तौ कुर्वाणौ सन्तौ अस्य साहेरन्तिकं संनिधानमागतौ । काविव । ग्रहाविव । यथा कौचिच्चारवशाद्ग्रहेशितुः सूर्यस्य पार्श्वे आगच्छतः ॥ युग्मम् ॥

अमी न गृह्णन्ति मदीयपुस्तकं निरीहभावेन वहूदिता अपि ।
ततो युवां ग्राहयतां कथंचनाप्यमून्यशो मूर्तमिवेन्दुसुन्दरम् ॥१०५॥

हे शेखथानसिंहौ, अमी सूरयो मया वहूदिता वारवार विज्ञप्ता अपि निरीहभावेन निःस्पृहत्वेन मदीयं मम संवन्धि अथ वा पद्मसुन्दरसत्कमपि मदधीनत्वान्मदीयमेव मद्दत्तं पुस्तकं न गृह्णन्ति नाददते, ततः कारणाद्युवां भवन्तौ सूरिपार्श्वे गत्वा वहु वहु उक्त्वा कथंचन केनचित्प्रकारेणापि विज्ञप्त्यनुनयमतसामर्थ्यान्वयप्रकटनप्रकारेणापि अमून् सूरीन्प्रति इन्दुसुन्दरं चन्द्रोज्ज्वलं मूर्तं प्रत्यक्षं यशः कीर्तिमिव मदीयपुस्तकं ग्राहयतां आदापयताम् । स्वीकारयतामित्यर्थः ॥

इदं गदित्वान्तरिते स्थिते नृपेऽशुमालिनीवाभ्रकशालिनि क्षणात् ।
उपेत्य तावूचतुरित्यमून्प्रति प्रणीततत्पत्कजरेणुचित्रकौ ॥ १०६ ॥

उपेत्य प्रभुपार्श्वं समेत्य तौ शेखथानसिंहौ अमूनेतान्सूरीन्प्रति इत्यग्रे वक्ष्यमाणं ऊचतुः कथयतः स्म । किंभूतौ । प्रणीतं विहितं तत्पदकजरेणुभिर्नमस्करणसमये सूरिचरणारविन्दरजोभिश्चित्रकं भालस्थले तिलकं याभ्यां तौ । कस्मिन् सति । इदं पूर्वोक्तं गदित्वा भाषित्वा अभ्रके मध्ये मध्ये शालते शोभते इत्येवंशीले अभ्रकेणाद्दृश्यमाने अंशुमालिनि भास्करे इव अन्तरिते व्यवहिते नृपे राज्ञि स्थिते सति । दृग्गोचरे नृपो जात इत्यर्थः ॥

इदं व्रतीन्द्राः क्षितिशीतदीधितेर्गृहीतवत्तिष्ठति धाम्नि पुस्तकम् ।
दधाति खेदं पतितं यत क्षितौ रजःस्थितं रत्नमिवात्र भूतलात् ॥१०७॥

हे व्रतीन्द्राः सूरयः, इदं पुस्तकं [illegible] । क्षितिशी [illegible] नृप [illegible] [illegible] । यत्र कारणादत्र [illegible] पतितं खेदं [illegible] । [illegible] 'नदाखम्' इत्युच्यते । दधाति [illegible] । [illegible] । यथा [illegible] [illegible] सूरीणां [illegible] [illegible] ॥

[illegible] ।
[illegible] ॥ १०८ ॥

तदा तस्मिन्वसतिसमागमनसमये तन्मता भविकजनानां प्रमोदेन प्रोल्लसत्प्रबलप्रमोदेन मान्तो बहुलीभवन्तो ये तुमुला व्याकुलशब्दाः 'अथ धावत यात मुनत पुरः प्रधानम्' इत्यादिकोलाहलास्तैः कृत्वा जगद्विश्वं शब्दमयं केवलं नादस्वरूपं जायते स्म। किंभूतैः तुमुलैः। आहतानि हस्तदण्डादिभिस्ताडितानि उपलक्षणान्मुखैर्वादितानि च परस्परं दण्डैर्वा घर्षितानि आतोद्यानि नानाविधानि वादित्राणि तेषां निनादैर्निर्घोषैः गान्द्रितैर्निरन्ध्रीभूतैः। उत्प्रेक्ष्यते—मिलन्तः क्षिप्यन्तः दिग्दिग्भ्यः आगत्य एकीभवन्तो वा अविरलसलिलपटलैः पर्युभ्रमन्तो वा पयोवाहाः प्रबलजलभृतगर्भघना यत्र तादृशस्य पयोधेर्गर्जितैर्गम्भीरघोरारवैरिव ॥

कुलाङ्गनाभिः प्रभुमूर्ध्नि हैमनप्रसूनमुक्ताफललाजराजिभिः।
ववर्षिरे प्रावृषि मेघपङ्क्तिभिस्तदाम्बुधारा शिखरे गिरेरिव ॥ १२२ ॥

तदा तस्मिन्व्यतिकरे प्रभुमूर्ध्नि हीरसूरेर्मस्तकोपरि कुलाङ्गनाभिः सुकुलोद्भवसधववधूभिर्हैमनानि हैमानिमानि सुवर्णसबन्धीनि। 'हीराङ्कुरश्चारुणि हेमनीव' इति नैषधे। 'हेम अकारान्तं पुनपुंसके नकारान्तस्तु नपुंसके एव' इति लिङ्गानुशासनावचूर्णौ। प्रसूनानि कुसुमानि। उपलक्षणात् रूप्यपुष्पाणि च। तथा मुक्ताफलानि मौक्तिकानि। तथा लाजा अक्षता उपलक्षणादक्षततन्दुलाश्च तेषां राजयः श्रेणयो ववर्षिरे वृष्टाः। काभिरिव। मेघपङ्क्तिभिरिव। यथा प्रावृषि वर्षाकाले धाराधरधोरणीभिर्गिरेः पर्वतस्य शिखरे शृङ्गोपरि अम्बुधाराः पयःप्रवाहाः वर्ष्यन्ते। 'वर्ष वर्षणे' धातुः। यदुक्तम्—'गर्जति शरदि न वर्षति वर्षति वर्षासु निःस्वनो मेघः' इति वचनात् ॥

परार्ध्यसंख्यैः पुरुषैः परिष्कृतः प्रभुर्महे बिभ्रति मेदसा भरम्।
चतुर्निकायप्रभवैरिवामरैः प्रतिष्ठते स्म त्रिजगत्पुरंदरः ॥ १२३ ॥

प्रभुर्हीरसूरिः प्रतिष्ठते स्म। राजद्वाराद्वसतिं प्रति प्रचलति स्म। कस्मिन् सति। महे यानसिद्धादिश्राद्धजननिर्मितमहोत्सवे मेदसा पुष्टीना भरमतिशयं बिभ्रति धारयति सति। 'तपर्तुपूर्तावपि मेदसा भरा विभावरीभिर्बिभराबभूविरे' इति नैषधे। किंभूतैः पुरुषैः। परार्ध्या सर्वोत्कृष्टा लौकिकसंख्या। यथा 'एकं दश शतं सहस्रमयुतं लक्षं प्रयुतं कोटी अर्बुदमब्जं खर्वं निखर्वं महाम्बुजं शङ्कुं वार्धिरन्त्यं मध्यं परार्ध्यमेतत्प्रमाणर्गणनातीतैर्मनुष्यैः प्रकृष्टा वा संख्या प्रमाणमुत्तमो विचारो धर्मतत्त्वादिको वितर्को येषाम्। 'संख्यैकादौ विचारे च' इत्यनेकार्थः। 'परार्ध्यं च प्रकृष्टे स्यात्संख्यायामपि' इत्यनेकार्थे। परिष्कृतः परीतः परिवृतः। क इव प्रतस्थे। त्रिजगत्पुरंदर इव। जगत्त्रयीनायकस्तीर्थंकर चत्वारो निकाया नगराणि भवनानि ज्योतिर्विमानानि करणानि च गृहाणि येषां चत्वारो निकायाः संघाः समुदाया वा येषाम्। अथ व्यन्तरभवनपतिज्योतिष्कवैमानिकलक्षणा निकाया वैक्रियशक्तिकामचारिदेवत्वेन समानधर्मिकजातिप्रभवैः। 'निकायस्तु सधर्मिणाम्' इति हैम्याम्। 'निकायः

[illegible] । यथा भोमादिग्रहः [illegible] सौराग: [illegible] दुवास्यचैन्द्रस्य [illegible] भुजते [illegible] ममनस्य आगमन्नं प्रवेश भुज्यते । ततः [illegible] अकारणानन्तरमुभौ [illegible] निरो भणति 'पातेमाहिसआमत' [illegible] पुनमोऽ [illegible] इति [illegible] नमस्कृतेसि [illegible] इजन्तो [illegible] सन्नामागतो । [illegible] आगच्छत' ॥ शुभम् ॥

[illegible] न गृह्णन्ति [illegible] निरीक्ष्माणेन [illegible] अपि ।

[illegible] कान्तनाप्यमुनाशो मूर्तिमन्दुसुन्दरम् ॥१०५॥

[illegible]

[illegible] ॥ १०६ ॥

[illegible]

भतिशयेन त्यागेनानेनापात् वर्षति अपूरयति इत्येवंशील: कामवर्षी तस्य भावस्तत्ता तया इव दृष्टा । 'तत्पाणाने रोप—' इत्यनेन ककारदन्तलोपः ॥ इति धानसिंहकृतसूरिस्वागतमहोत्सवः ॥

स्वकोशरक्षापि कृतज्ञ भूमिमानिवाखिलक्षोणिजयार्जितैर्धनैः ।
विधाय कोशं नृपदत्तपुस्तकैः स स्थानसिंहस्य वशंवदं व्यधात् ॥१२८॥

स श्रीविजयसूरिः नृपेणाकब्बरनाम्ना दत्तपदीकृतैः पुस्तकैः कोशं भाण्डागारं विधाय निष्पाद्य स्थानसिंहस्य वशंवदमायत्तं व्यधाच्चक्रे । क इव । भूमिमानिव । यथा भूमिमान् अखिलाया: समस्ताया: क्षोणेः पृथिव्या जयेन स्वायत्तीकरणेनार्जितैः संचितैर्धनैः द्रव्यैः । इदं तु साधितनिखिलवसुधामण्डलस्यैव मण्डलीकस्य राजाधिराजस्य घटते । कोशं निधानं स्वस्यात्मनः कोशस्य भाण्डागारस्य रक्षायामनधिकृतत्वादृतत्वात् सम्यग् नीतिमत्त्वादथवा स्वामिभक्ततया अङ्गीकृतस्य भाण्डागारिणो वशं विधत्ते ॥ इति पुस्तककोशः ॥

क्रमान्महादेशमिवावनीशितुर्निदेशमासाद्य पयोधरोदये ।
फतेपुरात्स प्रभुरागरापुरं पवित्रयामास पदाम्बुजन्मभिः ॥ १२९ ॥ ✓

स प्रभुः सूरिः पयोधरोदये वर्षाकालप्रारम्भे क्रमादनुक्रमतः फतेपुरात् श्रीकरीननगरात् उग्रसेनपुरापरपर्यायमागरा इति नाम पुरं पदाम्बुजन्मभिः चरणकमलैः कृत्वा पवित्रयामास पावनमकरोति स्म । किं कृत्वा । क्रमात् त्यक्तुर्द्विवासरैरवनीशितुरकब्बरसाहेर्निदेशमाज्ञामासाद्य प्राप्य । कमिव । महादेशमिव । यथा कश्चिद्राजसेवक: राज्ञः सकाशान्महान्तं जनपदमासादयति लभते ॥ इत्यागरानगरे गमनम् ॥

न राजहंसान्कचन प्रवासयन्वियोगिनोऽपि प्रणयश्च निर्वृतान् ।
न दुर्दिनं क्वापि सृजंस्तमोद्विप न च द्विपन्निर्दलयञ्जलोदयम् ॥ १३० ॥
मनोभव चाग्निभूर्वन्गुरोर्महो न निह्नुवानः स्थिरतां पुनर्वहन् ।
अभूदपूर्वः प्रभुरम्बुदः पुरे जिनक्रमोपासनकृद्दिवानिशम् ॥ १३१ ॥

प्रभुरीश्वरसूरिः पुरे-तत्रागरानगरे अपूर्वोऽसाधारणोऽम्बुदो मेघोऽभूद्बभूव । किं कुर्वन् । राजहंसान् नृपपुङ्गवान् प्रधानान्स्वाश्रान प्रवासयन् न पीडयन् । आनन्दयन्नित्यर्थः । 'उद्वासयति निर्दलयति निर्वासयति प्रवासयति' इति क्रियाकलापे हिंसार्थाः क्रियाः । यदि वा नृपश्रेष्ठान् प्रकर्षेणातिशयेन वासयन् दयादिधर्मतत्त्वे स्थापयन् वासं कारयन् । अथ वा कृपाधर्मसुगन्धवस्तुसौरभेण न सुगन्धीकुर्वन्नपि वासयन्नेव । नकारः काकुध्वनिवाची । मेघस्तु वर्षाकाले हंसान्मानसं प्रति प्रस्थापयति । यथा—'प्रोषितकलहंसवयसि' इति चम्पूकथायाम् । 'प्रोषिता मानसं प्रस्थापिता हंसपक्षिणो येन' इति तद्वृत्तिः । पुनः किंविशिष्टः । विशिष्टः मनोवाक्कायसंबन्धी अथ वा यमावग्रहयुक्तः प्रश-

८७

हृदा स्वमनसा कृत्वा हृदि सम्यग्विमृश्य सर्वं च श्रीमन्तो विदन्त्येव। यतः परमेश्वरत्व ततः सर्वज्ञत्वमप्यास्ते तेन जानन्त्येव। पुनरावयोर्वचः साहिस्वरूपनिरूपणवचनं द्विरुक्तितुल्य पुनर्भाषणसाधारणं केवल पिष्टपेषणमेव ॥

स्ववत्तदादत्त समस्तपुस्तकं स्थितौ गदित्वेति पुरः प्रभोरुभौ।
ततो विनेया अपि तद्बभाषिरे निवार्यते कैः स्वयमागतेन्दिरा ॥ ११२ ॥

उभौ शेखथानसिंहौ प्रभोर्हीरसूरेः पुरोऽग्रे इत्यमुना प्रकारेण गदित्वा स्थितौ तूष्णीं कृतवन्तौ इति पूर्वोक्तकारणात्स्ववदात्मीयमिव समस्तपुस्तकमादत्त ग्रहयताम्। ततस्तयोरुक्तेरनु पश्चात् विनेया हीरसूरिशिष्याः वाचकविचक्षणगणिप्रमुखा गीतार्था अपि शेखथानसिंहकथित स्वीकारयोग्यमास्ते तद्गृह्यतामिति तत्तदुक्तमेव बभाषिरे प्रोचुः। युक्तोऽयमर्थः। स्वयमात्मनैवागता सम्प्राप्ता इन्दिरा लक्ष्मीः कैर्मूर्खैर्निवार्यते निषिध्यते। अपि तु न कैश्चिदपि ॥

अवेत्य चेतस्यमुना समुन्नतिं स्वशासने पुस्तकसंग्रहेण सः।
मुदामिवौङ्कार इदंक्षितिक्षितस्तथेति वाचंयमवासवोऽवदत् ॥ ११३ ॥

वाचंयमवासवः यतिजम्भारातिः तथेति एवमस्तु मया साहिप्रदत्त पुस्तकं ग्रहीष्यते इत्यवदत् भाषते स्म। उत्प्रेक्ष्यते—इदंक्षितिक्षितः अस्याकब्बरपातिसाहेर्मुदा परमानन्दानामोङ्कारः आदिरिव। किं कृत्वा अवदत्। इत्यमुना मुद्गलाखण्डलेन चतुर्दिगधिपतिना पातिसाहिना स्वयमत्याग्रह्य प्रदत्तानामेतत्पुस्तकानां संग्रहणं कृत्वा स्वशासने जैनमते तपागच्छे वा समुन्नतिं दीप्तिमुद्द्योतं वा प्रभावनां चेतसि स्वहृदये अवेत्य विज्ञाय ॥

उपेत्य ताभ्यां तदभापि भूपतेस्तदेष निश्चेतुमपृच्छदात्मना।
मुदं प्रणेतुं द्विगुणामिवावनीमणेर्गणेन्द्रोऽप्यवदत्तथैव तम् ॥ ११४ ॥

ताभ्यां शेखथानसिंहाभ्यामुपेत्य पातिसाहिसमीपे समागत्य भूपतेरकब्बरस्य तत्सूरिकथितपुस्तकस्वीकारवचः अभाषि प्रतिपादितम्। पुनः साहिस्तयोस्तद्वचो निश्चेतुं सत्यतया ज्ञातुमात्मना स्वेन स्वयं वा तानपृच्छत् प्रश्नयति स्म श्रीमद्भिर्मदीयं पुस्तकं गृहीतं न वेति स्वयं पुनः पृष्टवान्। अपि पुनर्गणेन्द्रो गच्छनायकोऽपि तं भूपतिं तथेति मया श्रीमत्पुस्तकं गृहीष्यते गृहीतं वा इत्येनमवदत् जगाद। उत्प्रेक्ष्यते—अवनीमणेरकब्बरस्य मुदमानन्दं द्विगुणां प्रणेतुं विधातुमिव ॥ इति शेखथानसिंहविज्ञपनात्साहिपुस्तकग्रहणम् ॥

दयान्वितं धर्ममवाप्य सद्गुरोरिवार्णवात्कृष्णलताङ्कितद्रुमम्।
स थानसिंहं यवनावनीधवस्ततः समाहूय गिरं गृहीतवान् ॥ ११५ ॥

सूरेः तत्र पुनः दानादानशीला ध्वनव्यमानन्तरं वा गोऽह-नगाद वचनानु-

सीता मधुरदैत्य । कः इव । अ परमव । यथा कुतुका आगमविद्भिः चतुर्दीणकर्म-
प्रकाशे गुरुवरा गजात सभार अनरति । पाठान्तरे तथा नाना कृत्वा अर्वर्णो भानो-
नन्दना पुनर्नदा यमुना प्रतीरे । क इव । नाव । यथा भव्यजीवो नरतादिवस्त्रावनया
गुणात्यवगानेन मुक्ति प्रसरति ॥

यमीसमीपे रपटीपुरे क्रमात्स सपत्नीकेन समं समीयिवान् ।

मनोरथाकृष्टमिवागतं पुरो व्यलोकयच्छौर्यपुरं पुरस्ततः ॥ १३४ ॥

स सूरिः क्रमात्प्रयाणपरिपाटीतः यमुना यमुनानद्याः समीपे पार्श्ववर्तिनि रपटीनाम्नि
पुरे समीयिवान् समागतः । कथम् । समं सार्धम् । केन । सपत्नीकेन आगराप्रमुखनगरश्राद्ध-
समुदायेन । श्राद्धानामनु श्राद्धयोऽपि समेता एव । ततः रपटी आगमनानन्तरं पुरो-
ऽग्रे शौर्यपुरं नाम नगरं 'सौरीपुर' इत्यधुना प्रसिद्धं व्यलोकयत्पश्यति स्म । उत्प्रे-
क्ष्यते—मनोरथेन सूरीणां पुरनिरूपणेच्छया कृष्टमानीतमिव प्रभुपुरः प्रादुर्भूतम् ॥

प्रभुः प्रियस्येव सधर्मचारिणीमहर्निशं शौर्यपुराङ्कचारिणीम् ।

च्युतोत्तरीयां कबरीमिवार्णवाम्बरेन्दिराया नवभङ्गसङ्गिनीम् ॥ १३५ ॥

यमुनानदीमग्रे वक्ष्यते । कैवले कालिन्दीमेव पश्यते—यमुना किंभूताम् शौर्यपुरं सौ-
रीपुरस्य अङ्के समीपे । 'अङ्कः स्थाने भोऽङ्केऽन्तिकागसोः' इत्यनेकार्थे । चरति वहती-
त्येवंशीलाम् । कथम् । अहर्निशं निरन्तरम् । कामिव । सधर्मचारिणीमिव । यथा प्रियस्य स्व-
भर्तुः समानेन धर्मेण चरणशीला पतिव्रता पत्नी नक्तं दिनमङ्के उत्सङ्गे क्रोडे वा समीपे वा
चरति प्रवर्तते इत्येवंशीला स्यादति व्यतिकरे भर्तुरुत्सङ्गे उपविशति । यदुक्तं नेमि-
चरित्रे—'अनुशाप्य सवितरौ देवदन्तीमुपेयुषीम् । रथमारोपयामास नलोऽङ्के न न्य-
वीविशत् ॥' इत्युत्सङ्गारोपणम् । तथा 'विना मनोरः फलतस्तदापनम्' इति नैषधे । इति
भोजे । 'अथ सधर्मिणी । पत्नी सहचरी' इति हैम्याम् । सहचरत्वेन समीपचारिणी ।
उत्प्रेक्ष्यते—अर्णवाम्बरेन्दिरायाः समुद्रवसनालक्ष्म्याः क्षोणीश्रियः कबरीं वेणीमिव ।
किंभूतां कबरीम् । च्युत विरल. सल्लमुत्तरीयमुपर्याच्छादनवसनं यस्याः । पुनः किंभू-
ताम् । नवा नवस्था. नवा नवतरङ्गा रचनाश्च विद्यन्ते यस्याम् ॥

व्यवस्यमानामिव जेतुमम्बरापगां तरङ्गैर्गगनावगाहिभिः ।

प्रियेण चाणूरभिदा वियोगिनीं निषेवमाणामिव तीर्थमेदिनीम् ॥ १३६ ॥

पुनरुत्प्रेक्ष्यते—गगनावगाहिभिर्नभोऽङ्गणालिङ्गनशीलैस्तरङ्गैः कल्लोलैः कृत्वा अम्बरापगां
स्वर्गङ्गां जेतुं श्रिया पराभवितुं व्यवस्यमानामुद्यमं कुर्वाणामिव । 'प्रगल्भमानाम्' इति
पाठो वा । अर्थः पूर्वोक्त एव । पुनरुत्प्रेक्ष्यते—चाणूरनामानं मल्लं भिनत्ति सोऽपि
चाणूरभित् तेन विष्णुना भर्त्रा समं वियोगिनीं विरहिणीम् । अत एव वैराग्यादुःखो-
द्विग्ना वा । 'जम्मन्तरे न विहडइ उत्तममहिलाणअ किअ पिम्मम् । कालिन्दिकन्ह-
विरहे अज्जवि काळ जलं वहइ ॥' इति वचनात्कृष्णेन कान्तेन वियोगिनीं वियोगवतीम् ।

त नेमिनाथप्रासाद न्यभालयद्विलोकते स्म ॥ पञ्चभिः कुलकम् ॥ यमुनावर्णनम् । इति सूरेः शौर्यपुरागमनम् ॥

स तूररावैः कुलशैलकंदरोदरप्रसर्पत्प्रतिनादमेदुरैः ।
निनाय नेमेर्वसतिं प्रदक्षिणां महोदयाम्भोनिधिनन्दनामिव ॥ १४० ॥

स हीरसूरिः तूररावैरनेकवादित्रनिर्घोषैः सार्धं नेमेः श्रीअरिष्टनेमिनाथस्य वसतिं प्रासादं त्रिर्वारं भ्रमणीरूपां परितः प्रदक्षिणां निनाय प्रापयति स्म । त्रिः प्रदक्षिणीकरोति स्मेत्यर्थः । किंभूतैः तूररावैः । कुलशैला मन्दरमेरुकैलासहिमाचलप्रमुखाः सप्त कुलपर्वतास्तेषां कंदराणां गुहानामुदरेषु मध्येषु प्रसर्पन्तः प्रवर्तमानाः प्रसरन्तो वा ये प्रतिनादाः प्रतिशब्दाः 'पडुच्छन्दा' इति प्रसिद्धा तैर्मेदुरैः सान्द्रैः पुष्टीभूतैः । उत्प्रेक्ष्यते—महोदयो महानतिशायी अभ्युदयो विशिष्टवैभवप्रारम्भः स एवाम्भोनिधिनन्दना लक्ष्मीं प्रदक्षिणां प्रकर्षेणातिशयेन दक्षिणां स्वानुकूलां निजानुरागिणीमिव निनाय कृतवान् ॥

निजां तनूजां धरिणीप्रचारिणीमिवाभ्रकेतौ मिलितुं समीयुषि ।
विवेश तस्मिञ्छमिना शतक्रतुः शिवासुतस्यायतने हिरण्मये ॥१४१॥

शमिनां शतक्रतुर्वाचंयमवासवः तस्मिन् प्रह्लादपूर्वं पूर्वमेव दृष्टे शिवायाः समुद्रविजयराजजायायाः सुतस्य नेमिनाथस्य आयतने प्रासादे विवेश प्रविष्टवान् । किंभूते । हिरण्मये स्वर्णनिर्मिते सुवर्णप्रधाने । उत्प्रेक्ष्यते—धरिण्या भूमीमण्डले प्रकर्षेण चरति प्रसरति इत्येवंशीलां निजामात्मीयां तनूजां पुत्रीं यमुनानाम्नीं मिलितुं सुतात्वेन स्नेहसंबन्धान्मिलनार्थं समागते गगनाङ्गणारक्षोणीचक्रे संप्राप्ते अभ्रकेतौ नभःकेतने सूर्य इव । 'हरी द्युचीनौ गगनाध्वगाध्वगौ' इति हैम्याम् ॥

जनार्दनान्दोलनकेलयेऽभवत्प्रलम्बदोलेव यदीयदोर्लता ।
य उग्रसेनस्य सुतां प्रभुर्जहौ पतिस्तमीनामरविन्दिनीमिव ॥ १४२ ॥

प्रभुर्हीरसूरिः नेमिं ददर्श इत्यग्रे वक्ष्यते । इति संबन्धः । यच्छब्देन तद्वर्णनमाह—यदीयदोर्लता श्रीनेमिनाथसंबन्धिनी दक्षिणबाहुवल्ली जनार्दनस्य नारायणस्य आन्दोलनस्य प्रेङ्खोलनस्य केलये क्रीडायै प्रलम्बा अतिव्यायता दोला प्रेङ्खा इवाभवत् । पुनर्यो भगवान् उग्रसेनस्य भोजकवृष्णेः सुतस्योग्रसेननृपतेः सुतां नन्दनां राजीमतीं जहौ तत्याज न परिणिन्ये । क इव । पतिरिव । यथा तमीनां पतिः रजनीदयितश्चन्द्रमा अरविन्दिनीं कमलिनीं जहाति ॥

तनुश्रिया येन निजौजसा पुनर्जितो ह्रियानङ्ग इवाङ्गजोऽजनि ।
यदङ्गरुङ्निर्जितनीलनीरजैरभाजि दुःखादिव पुष्करे तपः ॥ १४३ ॥

पुनर्येन नेमिनाथेन तनुश्रिया शरीरशोभया पुनर्निजौजसा स्वबलेन [illegible]

[illegible] । परमात्मनि [illegible] । [illegible] । [illegible]
[illegible] इति हैम्याम् । [illegible] ॥

निपीयमानो नयनैर्मृगीदृशामिवार्च्यमानो विकचाम्बुजन्मभिः ।
प्रणूयमानः कविभिर्नवस्तवैर्जगत्पृणन्स्वीयगुणैश्च वास्तवैः ॥ १२४ ॥
मृगारिरद्रेरिव कन्दरोदरे कृशोदरीणां मनसीव मन्मथः ।
अमर्त्यदन्ती चत्वरे हरेरिव व्रतिक्षितीन्द्रो वसतौ विवेश ॥ १२५ ॥

स व्रतिक्षितीन्द्रः श्रीविजयसूरिराजो वसतौ उपाश्रये विवेश प्रविष्टवान् । क इव । मृगारिरिव । यथा कण्ठीरवः अद्रेः पर्वतस्य कन्दरोदरे गुहामध्ये प्रविशति । पुनः क इव । मन्मथ इव । यथा मनोभवः कृशोदरीणां तरुणीनां मनसि चित्ते प्रविशति । पुनः क इव । अमर्त्यदन्तीव । यथा सुरगजः ऐरावणगजः हरेरिन्द्रस्य चत्वरे हस्तिशालायां प्रविशति । 'हस्तिशाला तु चत्वरम्', 'वाजिशाला तु मन्दुरा' इति हैम्याम् । स किं क्रियमाणः । मृगीदृशां सारङ्गलोचनानाम् । 'सारङ्गी सिंहशावं स्पृशति सुतधिया नन्दिनी व्याघ्रपोतम्' इत्यादि समवसरणवर्णने । नयनैर्नेत्रैर्निपीयमानः सादरं निरीक्ष्यमाणः । उत्प्रेक्ष्यते—विकचाम्बुजन्मभिर्विनिद्रनीलोत्पत्तिरिवार्च्यमानः पूज्यमान इव । पुनः किं क्रियमाणः । कविभिः काव्यकर्तृभिः पण्डितैर्वा नवस्तवैः सद्यस्कैः काव्यैः स्तुतिभिर्वा प्रणूयमानो वर्ण्यमानः स्तूयमानः । स किं कुर्वन् । वास्तवैः । स्वाभाविकैः जिनवचनम्कालोत्पन्नैः स्वीयगुणैः कृत्वा जगद्विश्वलोकं पृणन् आनन्दयन् ॥ इति सूरेः स्वगृहवसतावागमनम् ॥

प्रतापदेवीतनयस्तदुत्सवे समर्थयन्नर्थिततेर्मनोरथान् ।
दरिद्रमुद्रामभिनत्तमां तटीं प्रवाहवत्प्रावृषि वार्धियोषितः ॥ १२६ ॥

तस्मिन् सूरेरुपाश्रयसमागमनमहामहे प्रतापदेवीतनयः स्थानसिंहः अर्थिततेर्याचकश्रेणेर्मनोरथानभिलाषान् समर्थयन् दरिद्रमुद्रां दुःस्थावस्थामभिनत्तमामतिशयेन भिनत्ति स्म । किंवत् । प्रवाहवत् । यथा प्रावृषि बहुसलिलभरनिर्भरातिसमुन्नमननिरन्तरनिष्पतन्नीरधाराधोरणीबन्धुरधाराधरसमये वार्धियोषितः समुद्रमहिलाया नद्याः प्रवाहः पानीयपूरः तटीं सरिदुभयसमीपोच्चभूमीम् । तीरभित्तिमित्यर्थः । भिनत्ति पाटयति ॥

तडिद्वता तस्य निजातिपातुकां समीक्ष्य सर्वार्थिषु कामवर्षिताम् ।
शितीकृतास्येन पदं सुरद्विषो निषेव्यते तत्तुलनाकृते किमु ॥ १२७ ॥

तडिद्वता विद्युद्वनितानुषङ्गभाजा मेघेन तत्तुलनाकृते तदवसरदानशौण्डीभवत्स्थानसिंहसमानताप्राप्तये । उत्प्रेक्ष्यते—सुरद्विषः पदं निषेव्यते विष्णुपदं व्योम समुपास्यते इव । किंभूतेन तडिद्वता । शितीकृतं कृष्णं विहितमास्यं वदनं येन । किं कृत्वा । तस्य स्थानसिंहस्य निजमात्मानमतिपतति अतिक्रामतीत्येवंशीला निजातिपातुका काम-

तरीव वार्धौ तमसीव शारदारविन्दिनीशः सरसीव धन्वनि ।
दरिद्रतायामिव शेवधिर्मया कलौ जिनेन्दो त्वमलम्भि दुर्लभः ॥ १४७ ॥

हे त्रिलोक्या जगत्त्रयस्य जनानां सुरासुरनराणां कामितानां मनोभिलाषाणां पूरणे प्रदाने कल्पपादप सुरतरो । पुनर्हे पुनर्भवश्रिया मोक्षलक्ष्म्या सार्धं परिरम्भे गाढालिङ्गने लोलुप अतिशयेन लोल चपल हे नेम, त्वं जय सर्वोत्कर्षेण वर्तस्व । पुनर्हे प्रमोदा आनन्दाः । यद्दर्शनात्पुत्रकलत्रमित्रधनधान्यराज्यैश्वर्यादयः सर्वेऽप्यानन्दकारिणः पदार्थाः प्रादुर्भवेयुः, तस्मात्तेऽपि प्रमोदा एवोच्यन्ते । तत्र च बहुत्वम् । प्रमोदा एवाङ्कुराः प्ररोहास्तेषां कोटयस्तेषां वृद्धिकरणे इत्यर्थः । वारिमुक् वार्षिकवारिवाह । पुनर्हे प्रभया नीलोत्पलदलश्यामलदेहदीप्त्या भर्त्सिता तिरस्कृता नीलरत्नानां इन्द्रनीलमणीनां रुक्कान्तिर्येन तादृक् शिवानन्दन, त्वं जय । हे जिनेन्दो हे नेमिनाथ, मया कलौ कलियुगे पञ्चमे अरके दुःखेन महाकष्टेन कृत्वा लभ्यते इति दुर्लभः [illegible] प्राप्तः । केव । तरीव । यथा प्रलयकालोद्दामदावानलज्वालायमाना [illegible] योद्भवन्मध्यदिनदीप्तदिनकरघोरघर्मरुचिचयसंतापितानां [illegible] [illegible]च्छायप्रच्छन्नानेकाकारखरकोटिशिशिरीकृतसलिलशालिमहाप्रसरोवर [illegible] । पुनः क इव । शेवधिरिव । यथा दुःखावस्थायां निधानमासाद्यते ॥

तमित्यभिष्टुत्य हृदा दधन्मुदं चकार पञ्चाङ्गनतिं यतीशिता ।
विवक्षुरेतत्किमु पञ्चमीं गतिं दिश प्रभो पञ्चमकेऽरकेऽपि मे ॥ १४८ ॥

यतीशिता सूरि[illegible] तं नेमिनाथमिति पूर्वोक्तप्रकारेणाभिष्टुत्य स्तुत्वा हृदा मनसा [illegible] कृत्वा मुदमाह्लादं दधद्धारयन् सन् पञ्च अङ्गानि प्रकृतानि [illegible] । पञ्चानामङ्गानां समाहारो वा इति पञ्चाङ्गी । द्वौ जानू द्वौ करौ एकं शिरः इति पञ्चाङ्गानि । तथा [illegible] स्पृश्यते इति पञ्चाङ्गनतिं चकार कृतवान् । उत्प्रेक्षते—एतदुच्यमानं [illegible] मिनाथं प्रति विवक्षुः किमु वक्तुमिच्छुरिव । एतत्किम् । हे प्रभो, [illegible] [illegible]ऽपि पञ्चमीं नरकतिर्यग्मनुष्यदेवगतिभ्य उपरितनां [illegible] सङ्ख्यापूरणीं गतिं दिश प्रदेहि । चतुर्थारके तु तव [illegible] [illegible] नरके मुक्तिप्राप्तेरभावात्तस्याः प्रार्थनाया अपेक्षा ॥

मुनीन्दुना शौर्यपुरे पदाम्बुजैर्विभूष्य हर्षी [illegible] ।
[illegible]पाङ्गनेमिप्रतिमे पुरातने प्रतिष्ठिते तत्र सनेमिपादुके ॥ १४९ ॥

मुनीन्दुना हीरसूरिचन्द्रेण [illegible] शौर्यपुरे पुरातने [illegible] [illegible]

स्तोऽन्यो वा योग एषामस्तीति । यदि वा सर्वसांसारिकसद्भ्राद्वियोगो विरहः पृथग्भावो विद्यते येषां ते वियोगिनः संयमिनस्तेषां निर्वृत्तिं मोक्षं प्रणयन् कुर्वन्। विरहिणामपि प्राचीनाचीर्णकर्मपरिणतिप्रकटनपूर्वं संसारानित्यतां प्रकटयन् धर्मोपदेशप्रदानादिना सुखयन्। मेघस्तु वियोगिनो व्यथयति। पुनः किंभूतः। क्वापि कुत्रापि स्थाने दुर्दिनं दुष्टं दिवसं न सृजन्। अपि तु प्रतिबोधप्रदानेन धर्ममाहात्म्यात्सुदिवसानेव कुर्वन्। मेघस्तु दुर्दिनं घनघटासंघट्टप्रकटीभवद्विकटान्धकारं करोति। च पुनस्तमसामज्ञानानां पाप्मनां वा द्विषं भेदकं ज्ञानिनं साधुं वा न द्विषन्न संतापयन् प्रत्युत प्रीणयन्। मेघस्तु तमोद्विषं भास्करं चन्द्रं वा द्वेष्टि आवृणोति। पुनः किंभूतः। डलयोरैक्यात् भावप्रधाननिर्देशाच्च जडत्वस्य जाड्यस्योदयमज्ञानप्रादुर्भावं निर्दलयन् व्यापादयन्। मेघस्तु जलोदयं वर्धते। च पुनर्मनोभवं काममभिभवन् पराजयमानः। मेघस्तु मदनं मदयति। पुनः किं कुर्वाणः। गुरोः स्वधर्माचार्यस्य विजयदानसूरेर्महःप्रतापं तेजो वा न निह्नुवानः प्रकटीकुर्वाणः। मेघस्तु बृहस्पतितारकतेजो निह्नुते विलुम्पति। पुनः किं कुर्वन्। स्थिरतां संयमधर्मादिषु साहसिक्यात्स्थैर्यं वहन्। मेघस्तु चपलाशयत्वान्नैकत्र कुत्रचित्तिष्ठति। पुनः किंभूतः। दिवानिशं दिवसे निशायां च जिनानां तीर्थकृतां क्रमाणां पादारविन्दानामुपासनां स्तुतिध्यानप्रणामादिभिः सेवां करोति। मेघस्तु जिनक्रमस्य विष्णुपदस्य सेवां वर्षास्वेव तत्रापि कदाचिन्न यावद्धर्मकालमत एव गुरोर्मेघादसाधारणता॥ युग्मम्॥

क्रमाच्चतुर्मासकवासरान्पयोधरे दधाने बहलीभविष्णुताम्।
निनाय तस्मिन्परिवर्ततां धुनीधवेऽब्धिशायीव गणेन्द्रिरावरः॥१३२॥

गणेन्द्रिरावरस्तपागच्छलक्ष्मीपतिः तस्मिन्नागरानगरे क्रमात्पर्युषणादिपरिपाट्या चतुर्मासकवासरान् वर्षाशरदृतुदिनान् परिवर्ततां क्षयभावं निनाय अतिक्रामति स्म। 'कल्पो युगान्तः कल्पान्तः संहारः प्रलयः क्षयः। संवर्तः परिवर्तश्च' इति हैम्याम्। संपूर्णतां प्रापयामास। कस्मिन्सति। पयोधरे जलवाहे घने बहलीभविष्णुतां दशभ्योऽपि दिग्भ्योऽभ्येत्य समुन्नम्य समुन्नम्य अखण्डवारिधारावर्षणशीलतां दधाने सति। क इव। अब्धिशायीव। यथा समुद्रशयनशीलो विष्णुः वर्षासु नारायणः शेषशय्यायां समुद्रे शेते इति लोकरूढिः। यदुक्तं चम्पूकथायां वर्षावर्णने—'क्षीरसमुद्रनिद्राणबाणबाहुच्छिदि' इति। वारिर्वा वर्षा वासरान्परिवर्ततां लम्भयति॥ इत्यागरानगरे चातुर्मासकरणम्॥

ततोऽल्पकर्मा तपसेव संसृतिं प्रतीर्य पोतेन पतङ्गनन्दनाम्।
अरिष्टनेमेर्जनुषा पवित्रितं प्रतस्थिवाञ्छौर्यपुरं प्रति प्रभुः॥ १३३॥

ततश्चतुर्मास्या अनन्तरं प्रभुः सूरिः शौर्यपुरं प्रति प्रतस्थिवान् प्रचलितः। किंभूतं शौर्यपुरम्। अरिष्टनेमेर्द्वाविंशतितीर्थकृन्नेमिनाथस्य जनुषा जन्मना पवित्रितं पावनीभूतम्। किं कृत्वा। पोतेन यानपात्रेण कृत्वा पतङ्गनन्दनां सूर्यपुत्रीं यमुनां प्रतीर्य

तरीव वार्धौ तमसीव शारदारविन्दिनीशः सरसीव धन्वनि ।
दरिद्रतायामिव शेवधिर्मया कलौ जिनेन्दो त्वमलम्भि दुर्लभः ॥ १४७ ॥

हे त्रिलोक्या जयत्रयस्य जनाना सुरासुरनराणा कामितानां मनोभिलाषाणां पूरणे प्रदाने कल्पपादप सुरतरो । पुनर्हे पुनर्भवश्रिया मोक्षलक्ष्म्या सार्धं परिरम्भे गाढालिङ्गने लोलुप अतिशयेन लोल चञ्चल हे नेम, त्वं जय सर्वोत्कर्षेण वर्तस्व । पुनर्हे प्रमोदा आनन्दाः । यद्दर्शनात्पुत्रकलत्रमित्रधनधान्यराज्यैश्वर्योदयः सर्वेऽप्यानन्दकारिणः पदार्थाः प्रादुर्भवेयुः, तस्मात्तेऽपि प्रमोदा एवोच्यन्ते । तत्र च बहुत्वम् । प्रमोदा एवाङ्कुराः प्ररोहास्तेषां कोटयस्तेषां वृद्धिकरणे इत्यर्थः । वारिमुक् वार्षिकवारिवाह । पुनर्हे प्रभया नीलोत्पलदलश्यामलदेहदीप्त्या भर्त्सिता तिरस्कृता नीलरत्नानां हरिन्मणीनां रुक्कान्तिर्येन तादृक् शिवानन्दन, त्वं जय । हे जिनेन्दो हे नेमिनाथ, मया कलौ कलियुगे पञ्चमे अरके दुःखेन महाकष्टेन कृत्वा लभ्यते इति दुर्लभः दुःप्रापस्त्वमलम्भि प्राप्तः । केव । तरीव । यथा प्रलयकालोद्दामदावानलज्वालायमाना माननिदाघसमयोद्भवन्मध्यदिनदीप्तदिनकरघोरघर्मरुचिचयसंतापितालानीभूतसिकतभूमण्डलमरुस्थले सच्छायपत्रच्छन्नानेककारस्करकोटिशिशिरीकृतसलिलशालिमहापद्मसरोवरं लभ्यते । पुनः क इव । शेवधिरिव । यथा दुःखावस्थायां निधानमासाद्यते ॥

तमित्यभिष्टुत्य हृदा दधन्मुदं चकार पञ्चाङ्गनतिं यतीशिता ।
विवक्षुरेतत्किमु पञ्चमीं गतिं दिश प्रभो पञ्चमकेरकेऽपि मे ॥ १४८ ॥

यतीशिता सूरिः तं नेमिनाथमिति पूर्वोक्तप्रकारेणाभिष्टुत्य स्तुत्वा हृदा मनसा कृत्वा मुदमाह्लादं दधद्धारयन् सन् पञ्च अङ्गानि प्रकृतानि यत्र सा पञ्चाङ्गा । पञ्चानामङ्गाना समाहारो वा इति पञ्चाङ्गी । द्वौ जानू द्वौ करौ एकं शिरः इति पञ्चाङ्गी । तथा भूः स्पृश्यते इति पञ्चाङ्गनतिं चकार कृतवान् । उत्प्रेक्ष्यते—एतदुच्यमानं जिननेमिनाथं प्रति विवक्षुः किमु वक्तुमिच्छुरिव । एतत्किम् । हे प्रभो, मे मम पञ्चमकेरके कलिकालेऽपि पञ्चमीं नरकतिर्यग्मनुष्यदेवगतिभ्य उपरितनीं मुक्तिलक्षणां पञ्चानां संख्यापूरणीं गतिं दिश प्रदेहि । चतुर्थारके तु तव मुक्तिदातृत्वमस्त्येव । परं पञ्चमे त्वरके मुक्तिप्राप्तेरभावात्तस्याः प्रार्थनाया उत्प्रेक्षा ॥

मुनीन्दुना शौर्यपुरे पदाम्बुजैर्विभूष्य दृष्टी इव तत्पुरश्रिया ।
वृषाङ्कनेमिप्रतिमे पुरातने प्रतिष्ठिते तत्र सनेमिपादुके ॥ १४९ ॥

मुनीन्दुना हीरसूरिचन्द्रेण तत्र शौर्यपुरे पुरातने जीर्णे पूर्वं केनापि कारिते न परं प्रतिष्ठापिते कथंचिदप्रतिष्ठिते एव स्थिते वृषाङ्कस्य श्रीऋषभदेवस्य नेमेररिष्टनेमिनाथस्य प्रतिमे मूर्ती प्रतिष्ठिते अञ्जनशलाक्यादिकरणेन स्थापिते । किं च श्रीहीरसीहविमलगणिपितामहसोहिलसंघपतिकारिते इति मूलशौर्यपुरलोके किंवदन्ती इति । उत्प्रेक्ष्यते—तत्पुरश्रिया शौर्यपुरलक्ष्म्या दृष्टी नेत्रे इव । किंभूते प्रतिमे । सह नेमेः शैवेयस्य पादुकाभ्यां

वियोगिनां वैराग्य दुःखोच्छेदकरण गुरुणेव । तीर्थमहिमा श्रीमन्नेमिनाथजन्मकल्याणकभूमीं निषेवमाणां भजन्तीमिव ॥

जलावगाहागतदन्तिपङ्क्तिभिर्निलीनशैलाब्धितुलावहामिव ।
भुजामिवाम्भोजमुखीं मृणालिका हिरण्यबाहुं दधतीं च नाभिवत् १३७

पुनरुत्प्रेक्ष्यते—जलावगाहार्थं सूर्यातपातितप्तवपुस्तया वा गातेन वा तरुणकरिणीभिः सम सलिलकेलिकरणायागताभिः समेताभिर्दन्तिपङ्क्तिभिर्गजराजीभिः कृत्वा निलीना वज्रपाणिभयात्प्रणश्यास्वगाधपानीयप्रविष्टाः शैलाः पर्वता यत्र तादृशस्याब्धेः समुद्रस्य तुलायाः साम्यस्य वहां धारिणीमिव । पुनरुत्प्रेक्ष्यते—किं कुर्वतीम् । दधतीं बिभ्रतीम् । काम् । मृणालिकां पद्मनालिकाम् । कामिव । अम्भोजमुखीमिव । यथा पद्मवदना स्त्री कोमलां भुजां बाहुलतां धत्ते । च पुनः स्त्रीनाभिवत्तुन्दकूपिकामिव हिरण्यबाहुं शोणं हृदं दधतीम् । अथ चन्द्रमाः । अम्भोजं कमलमेव मुखं वदनं यस्याः ॥

अमुं नमन्तीमिव वीचिसंचयैर्विभावयन्तीं शफरीक्षणैरिव ।
अभिष्टुवन्तीमिव विष्किरकणैर्लुलत्कजैर्नृत्यमिव प्रकुर्वतीम् ॥ १३८ ॥

पुनरुत्प्रेक्ष्यते—वीचिसंचयैः उन्नमन्नमद्भिः परिस्फुरत्तरङ्गगणैः कृत्वा अमुं सूरीन्द्रं नमन्तीमिव कल्लोलमालानामुन्नम्य नम्रीभवनेन प्रणामं सृजन्तीमिव । पुनरुत्प्रेक्ष्यते—शफर्यो मत्स्या एव ईक्षणानि । अथ वा 'मीनलोचनैः' इति पाठे मीना एव लोचनानि नयनानि तैर्विभावयन्तीमिव । सूरीन्द्रं निर्निमेषं निरीक्ष्यमाणामिव । तथा 'विस्फुरच्छफरीनेत्रा तत्रापि रणसाक्षिणी। अस्ति ज्योत्स्नासपत्नाम्बुरियमेव सरस्वती ॥' इति पाण्डवचरित्रे । पुनरुत्प्रेक्ष्यते—विष्किराणां जलचारिणां हंससारसक्रौञ्चादीनां पानीयपानागतानामपरेषां वा पक्षिणां क्वणैः शब्दैः कृत्वा मुनीन्द्रममुमभिष्टुवन्तीमिव सूरेः स्तुतिं विदधतीमिव । पुनरुत्प्रेक्ष्यते—लुलन्ति प्रचलत्कल्लोलैस्तरलीभवन्ति यानि कजानि कमलानि तैरस्य पुरो नृत्यं ताण्डवं कुर्वतीमिव ॥

निखेलियोषास्तनचन्दनद्रवैः सरिद्वरासंवलितप्लवामिव ।
क्रमात्स तत्राप्यवतीर्य सूर्यजां न्यभालयन्नेमिनिकेतनं पुरः ॥ १३९ ॥

पुनरुत्प्रेक्ष्यते—नितरां स्वस्वकान्तैः समं सखीभिः सार्धं वा खेलन्ति जलक्रीडां कुर्वन्तीत्येवंशीला निखेलिन्यो या योषा विविधभूचरखेचरचञ्चललोचनास्तासां स्तनानां कुचान्तरकुचोपरिविरचितविचित्रपत्रवल्लीविलेपनादिसत्कसलिलसंयोगगलच्चन्दनद्रवैः श्रीखण्डवर्चोरसैः कृत्वा सरिद्वरया गङ्गया संवलितो मिश्रीभूतः प्लवः पयःपूरो यस्यास्तादृशीमिव । तत्रापि गङ्गायमुनाप्रवाहद्वयकलितामिव स प्रभुहारसूरिः क्रमात्सकलोकशिष्याद्युत्तरणानुपूर्व्या रपडीपार्श्वे पूर्वव्यावर्णितस्वरूपां सूर्यजां मार्तण्डनन्दनां यमुनामवतीर्योल्लङ्घ्य पुरोऽग्रे नेमिनिकेतनम् । लोकरूढ्या यत्र स्थाने श्रीनेमेर्जन्मकल्याणकमजायत तस्मिन्नेव पुण्यपृथ्वीप्रदेशे प्रासादः कारितोऽस्तीति श्रूयते । पश्चाज्जिनो वेद

हे प्रभो, ते प्रतिद्धाः प्रबलप्रत्यर्थिपृथिवीपालदलविदलनोपार्जितानेकबिरुदा मदोद्धता मे मम अभ्रमूः नामा हस्तिनी तस्या वल्लभ ऐरावणः। 'अभ्रमूवल्लभारूढ निशः शेषे कदाचन। स्वप्ने महेन्द्रमद्राक्षीत्पृथा पृथुमनोरथा॥' इति पाण्डवचरित्रे। तथा 'गजानामभ्रमूपतिः' इति काव्यकल्पलतायां च। तस्य लक्ष्मीं शोभां लभन्ते इत्येवशीला'। 'लक्ष्मिर्लक्ष्मी हरेः स्त्रियाम्' इति। तथा 'चरणलक्ष्मिकरग्रहणोत्सवे' इति जिनप्रभसूरिकृतऋषभनम्रस्तवेऽपि च। तथा 'स्वस्थानात्पदमात्रमप्यचलतो विन्ध्यस्य चानेकशो जायन्ते मदपालित·········श्रीलम्भिनः कुम्भिन' इति सूक्ते लम्भितः 'लभेर्धातोः सार्वधातुकपरोक्षार्थवर्जे यथाप्रयोग नुम् इत्यनुस्वारः' इति प्रक्रियायाम्। गजा हस्तिनः स्फुरन्ति स्फूर्ति दधते। उत्प्रेक्ष्यते—कौतुकिना कुतूहलाकलितेन जह्नुना नारायणेन चतुर्दशरत्नकर्षणाल्लब्धास्वादतया पुनर्द्वितीयवार पयोनिधिं समुद्र प्रमथ्य विलोडयित्वा परश्शताः शतात्परे सहस्रश' कृष्टा निष्काशिता इव ऐरावतभ्रातर.॥

यतीन्द्र यत्पञ्चमचङ्क्रमोपमामवाप्तुकामेन महीविहायसोः।
अमी समीरेण किमु प्रणीयते तिरस्कृतोच्चैःश्रवसश्च ते हयाः॥१६२॥

हे यतीन्द्र, तिरस्कृतः स्वशोभया धिकृत' उच्चै श्रवा इन्द्राश्वो यैस्ते विविधजातीयाः मम हयास्तुरङ्गाः सन्ति। ते के। येषा हयाना पञ्चमचङ्क्रमस्य उत्तेरितनाम्न्या पञ्चम्या गतेः उपमान साम्यमवाप्तुकामिना लब्धुमिच्छता। शिक्षितु काङ्क्षतेत्यर्थः। समीरेण वायुना महीविहायसोर्भ्रमी भ्रमण प्रणीयते किमु। 'अपि भ्रमीभङ्गिभिरावृताङ्गम्' इति नैषधे॥

रथाः सरथ्या मम कामगामिनो मुमुक्षुमार्तण्ड मरुद्रथा इव।
पुनः कृतारातिचमूविपत्तयः कृतान्तदूता इव सन्ति पत्तयः॥ १६३॥

हे मुमुक्षुमार्तण्ड सूरे, मम रथाः शताङ्गा' सन्ति। किंभूताः। सह रथ्यै रथधुराधुरीणैर्वृषभैस्तुरगैर्वा वर्तन्ते ये ते। पुनः किंभूता.। कामगामिन. काममतिशयेन इच्छया वा गच्छन्तीत्येवशीला.। के इव। मरुद्रथा इव। यथा सुरस्यन्दना देवानामिच्छयैव गमनशीला भवेयु। पुनरर्थान्तरन्यासे। पुनर्मम पत्तय. सन्ति। किंभूता.। कृता निष्पादिता अरातिचमूना वैरिसैन्याना विपत्तयो भङ्गमारणादि नानानिष्टानि यैस्ते। उत्प्रेक्ष्यते—कृतान्तदूता इव चण्डमहाचण्डाख्या यमस्य किंकरा इव॥

जनार्दनस्येव ममेयमिन्दिरा सुरेश्वरस्येव च राज्यमूर्जितम्।
इदं तथान्यद्यदभीप्सितं हृदो मुनीन्द्र तन्मामनुगृह्य गृह्यताम् १६४

हे मुनीन्द्र, इय मम गृहे इन्दिरा धनरत्नस्वर्णरूप्यादिलक्ष्मीर्वर्तते। कस्येव। जनार्दनस्येव। यथा नारायणस्य मन्दिरे प्रत्यक्षा लक्ष्मीरस्ति। च पुनः ऊर्जित प्रबल राज्य हस्त्यश्वरथराष्ट्रदुर्गबलरूप वर्तते। कस्येव। सुरेन्द्रस्येव। यथा पुरंदरस्य प्रबलं राज्य वर्तते। हे प्रभो, इद यन्मया विज्ञप्त गजाश्वादिक तथा अन्यत्परमपि युष्माक

[illegible]

[illegible]

[illegible]

...शीलि शीलेन ...तेन येन किं ह्रिया कुमारेण गिरेरधित्यका ।
प्रभुर्जिनं नं यदुवंशभास्करोदयोदयक्षोणिधरं दृशा पपौ ॥ १४५ ॥

येन भगवता शीलेन ब्रह्मचर्येण ...तेन तिरस्कृतेन कुमारेण ...
'षाण्मातुरो ब्रह्मचारी गङ्गोमाकृत्तिकासुतः' इति हैम्याम् । उत्प्रेक्ष्यते—ह्रिया लज्जया
गिरेर्गन्धमादनाभिधानभूधरस्याधित्यका ऊर्ध्वभूमिः ...मशीलि सेवितम् । तत्र गत्वा
स्थित इत्यर्थः । 'सुगन्धिगन्धमादनाधिवासिनः स्कन्ददेवस्य दर्शनार्थमितो गतवानस्मि'
इति चम्पूकथायाम् । तथा पित्रोरपेक्षया तु कैलासाचलचूलिकाया स्थानम् । तथा
'स्कन्दो मन्दमतिश्चकार न करस्पर्शं श्रियाः शङ्कितः' इति सम्ड्प्रशस्तौ । प्रभुः सूरिस्तं
पूर्वव्यावर्णितं जिनं नेमिनाथं दृशा नेत्रेण पपौ सादरं पश्यति स्म । किंभूतः । यदूनां
यादवानां वंशोऽन्ववायः स एव भास्करः सूर्यस्तस्योदयार्थमुद्गमनाय उदयक्षोणिधरः ।
पूर्वपर्वत इत्यर्थः ॥ चतुर्भिः कलापकम् । नेमिनाथवर्णनम् ॥

जय त्रिलोकीजनकल्पपादप पुनर्भवश्रीपरिरम्भलोलुप ।
जय प्रमोदाङ्कुरकोटिवारिमुक् जय प्रभाभर्त्सितनीलरत्नरुक् ॥ १४६ ॥

१. 'विघातशक्तेः स्पृहया वाञ्छयेव सेवते' इति टीकादर्शनात् 'विघातशक्तेः स्पृहयेव यत्पदम्' इति पाठो भवेत्

हे प्रभो, ते प्रसिद्धाः प्रबलप्रत्यर्थिपृथिवीपालदलविदलनोपार्जितानेकविरुदा मदोद्धता मे मम अभ्रमूः नामा हस्तिनी तस्या वल्लभ ऐरावणः। 'अभ्रमूवल्लभारूढं निशः शेषे कदाचन। स्वप्ने महेन्द्रमद्राक्षीत्पृथा पृथुमनोरथा॥' इति पाण्डवचरित्रे। तथा 'गजानामभ्रमूपतिः' इति काव्यकल्पलतायां च। तस्य लक्ष्मीं शोभां लभन्ते इत्येवशीलाः। 'लक्ष्मिर्लक्ष्मी हरेः स्त्रियाम्' इति। तथा 'चरणलक्ष्मिकरग्रहणोत्सवे' इति जिनप्रभसूरिकृतऋषभनवस्तवेऽपि च। तथा 'स्वस्थानात्पदमात्रमप्यचलतो विन्ध्यस्य चानेकशो जायन्ते मदपालित·········श्रीलम्भिनः कुम्भिनः' इति सूक्ते लम्भितः 'लभेर्धातोः सार्वधातुकपरोक्षार्थवर्जे यथाप्रयोग नुम् इत्यनुस्वार' इति प्रक्रियायाम्। गजा हस्तिनः स्फुरन्ति स्फूर्तिं दधते। उत्प्रेक्ष्यते—कौतुकिना कुतूहलाकलितेन जह्नुना नारायणेन चतुर्दशरत्नकर्षणाह्लब्धास्वादतया पुनर्द्वितीयवार पयोनिधिं समुद्रं प्रमथ्य विलोडयित्वा परश्शताः शतात्परे सहस्रशः कृष्टा निष्काशिता इव ऐरावतभ्रातरः॥

यतीन्द्र यत्पञ्चमचङ्क्रमोपमामवाप्तुकामेन महीविहायसोः।
अमी समीरेण किमु प्रणीयते तिरस्कृतोच्चैःश्रवसश्च ते हयाः॥१९२॥

हे यतीन्द्र, तिरस्कृतः स्वशोभया धिकृत उच्चैःश्रवा इन्द्राश्वो यैस्ते विविधजातीयाः मम हयास्तुरङ्गाः सन्ति। ते के। येषां हयानां पञ्चमचङ्क्रमस्य उत्तेरितनाम्न्याः पञ्चम्या गतेः उपमानं साम्यमवाप्तुकामिना लब्धुमिच्छता। शिक्षितुं काङ्क्षतेत्यर्थः। समीरेण वायुना महीविहायसोर्भ्रमणी भ्रमणं प्रणीयते किमु। 'अपि भ्रमीभङ्गिभिरावृताङ्गम्' इति नैषधे॥

रथाः सरथ्या मम कामगामिनो मुमुक्षुमार्तण्ड मरुद्रथा इव।
पुनः कृतारातिचमूविपत्तयः कृतान्तदूता इव सन्ति पत्तयः॥ १९३॥

हे मुमुक्षुमार्तण्ड सूरे, मम रथाः शताङ्गा सन्ति। किंभूताः। सह रथ्यै रथधुराधुरीणैर्वृषभैस्तुरगैर्वा वर्तन्ते ये ते। पुनः किंभूता.। कामगामिन. काममतिशयेन इच्छया वा गच्छन्तीत्येवशीलाः। के इव। मरुद्रथा इव। यथा सुरस्यन्दना देवानामिच्छयैव गमनशीला भवेयु.। पुनरर्थान्तरन्यासे। पुनर्मम पत्तय सन्ति। किंभूता.। कृता निष्पादिता अरातिचमूनां वैरिसैन्यानां विपत्तयो भङ्गमारणादि नानानिष्टानि यैस्ते। उत्प्रेक्ष्यते—कृतान्तदूता इव चण्डमहाचण्डाख्या यमस्य किंकरा इव॥

जनार्दनस्येव ममेयमिन्दिरा सुरेश्वरस्येव च राज्यमूर्जितम्।
इदं तथान्यद्यदभीप्सित हृदो मुनीन्द्र तन्मामनुगृह्य गृह्यताम् १९४

हे मुनीन्द्र, इय मम गृहे इन्दिरा धनरत्नस्वर्णरूप्यादिलक्ष्मीर्वर्तते। कस्येव। जनार्दनस्येव। यथा नारायणस्य मन्दिरे प्रत्यक्षा लक्ष्मीरस्ति। च पुनः ऊर्जितं प्रबल राज्य हस्त्यश्वरथराष्ट्रदुर्गबलरूप वर्तते। कस्येव। सुरेन्द्रस्येव। यथा पुरंदरस्य प्रबल राज्य वर्तते। हे प्रभो, इद यन्मया विज्ञप्त गजाश्वादिक तथा अन्यतरमपि यद्युष्माकं

येन वा जितोऽभिभूतः अङ्गजः कामः । '[illegible]' [illegible] । [illegible] 'कमनः कलाकेलिरनन्यजोऽङ्गजः' इति हैम्याम् । उ[illegible]—[illegible] मुक्तावागिरजनि सजात इव । पुनर्यस्य परमेष्ठिन अङ्ग[illegible] [illegible] निमग्नकान्त्या निर्जिते. परिभूतः नीलनीरजानि [illegible] कुवलयं [illegible] न । 'कुवलयं तु जले [illegible] नीलं कु[illegible]' इत्यनेकार्थे । [illegible] इव । निर्जितो हि ह्रिया [illegible] पराभ[illegible] [illegible] ॥ [illegible] ॥

रवेण वाद्याहितजित्वरस्तरोऽप्यभिप्रपन्नः पुनरान्तरद्विषाम् ।
विघातशक्ति स्पृहयन्त यत्पदं हरेर्गिरीशोऽद्भुतभिगान्निषेवते ॥ १४४ ॥

हरेर्विष्णोर्गिरीशः पाञ्चजन्यनामा शङ्खः अद्भुतभिगात् [illegible] यत्पदं नेमिनाथचरणं निषेवते । उत्प्रेक्ष्यते—रवेण निजशब्देन बाह्या भूमिनभःसञ्चारिणः प्रत्यर्थी ये अहिताः प्रतिपक्षास्तेषां जित्वरः जयनशीलतरो बलं अभिप्रपन्नः सम्प्राप्तोऽपि । यदुक्तम्—'अम्भोनेरेव जाता जगति हति न ते हन्त सन्तीह शङ्खा यान्विश्राणा भ्रमन्ति प्रतिभवनममी भिक्षवो जीवनाय । एकः श्रीपाञ्चजन्यो हरिकरकमलक्रोडहंसायमानो यस्य ध्वानैरमानैरसुरसुरवधूवर्गगर्भा गलन्ति ॥' इति । पुनरान्तराणामन्तरङ्गानामनन्तकालादात्मना प्रतिबद्धानां द्विषां कर्मशत्रूणां विघातशक्तेर्व्यापादनसामर्थ्यस्य स्पृहया वाञ्छयेव सेवते ॥

अशीलि शीलेन जितेन येन किं ह्रिया कुमारेण गिरेरधित्यका ।
प्रभुर्जिनं तं यदुवंशभास्करोदयोदयक्षोणिधरं दृशा पपौ ॥ १४५ ॥

येन भगवता शीलेन स्वब्रह्मचर्येण जितेन तिरस्कृतेन कुमारेण स्वामिकार्तिकेन । 'षाण्मातुरो ब्रह्मचारी गङ्गोमाकृत्तिकासुतः' इति हैम्याम् । उत्प्रेक्ष्यते—ह्रिया लज्जया गिरेर्गन्धमादनाभिधानभूधरस्याधित्यका ऊर्ध्वभूमिः श्रृङ्गमशीलि सेवितम् । तत्र गत्वा स्थित इत्यर्थः । 'सुगन्धिगन्धमादनाधिवासिनः स्कन्ददेवस्य दर्शनार्थमितो गतवानस्मि' इति चम्पूकथायाम् । तथा पित्रोरपेक्षया तु कैलासाचलचूलिकाया स्थानम् । तथा 'स्कन्दो मन्दमतिश्चकार न करस्पर्शं श्रियाः शङ्कितः' इति खण्डप्रशस्तौ । प्रभुः सूरिस्तं पूर्वव्यावर्णितं जिनं नेमिनाथं दृशा नेत्रेण पपौ सादरं पश्यति स्म । किंभूतः । यदूनां यादवानां वंशोऽन्ववायः स एव भास्करः सूर्यस्तस्योदयार्थमुद्गमनाय उदयक्षोणिधरं । पूर्वपर्वत इत्यर्थः ॥ चतुर्भिः कलापकम् । नेमिनाथवर्णनम् ॥

जय त्रिलोकीजनकल्पपादप पुनर्भवश्रीपरिरम्भलोलुप ।
जय प्रमोदाङ्कुरकोटिवारिमुक् जय प्रभाभर्त्सितनीलरत्नरुक् ॥ १४६ ॥

---

१. 'विघातशक्तेः स्पृहया वाञ्छयेव सेवते' इति टीकादर्शनात् 'विघातशक्तेः स्पृहयेव यत्पदम्' इति पाठो भवेत्

चतुरग तुरगजिम वकापायठवति ॥' इति । जात्यश्वा हि सदश्ववारे समारूढे अतिचञ्चलकुटिलगामिनो भवन्तीति ख्यातिः । पुनः किंभूताः । अमर्षणाः कोपनाः । कस्यापि वचनमात्रमपि न सहन्ते । अमर्षभाजः परोपरीर्ष्याजुषः । तत्त्वार्थे कोपकलिताः । यदुक्तम्—'दुप्पलकप्रावकमुद्द बहुभोअणा सरोस । जेता तुरियां होइ गुण ते ता नरवइ दोस ॥' इत्युक्तेः । सुप्त निद्रां प्रमादमज्ञान परोपकारादिकरणे निद्रा बिभ्रतीति। तत्त्वार्थे बहुप्रमिला रणतूररावाकर्णने जाग्रतीति जनप्रसिद्धिः । अतः कारणात्खलोपमाः सन्ति । च पुनः रथाः कामचारिणः अतिशयेन वाताधिकवेगेन चरन्ति प्रचलन्तीत्येवशीलाः । के इव । खिङ्गा इव । यथा विटाः काम स्वेच्छया अथ वा कामेन कदर्पचेष्टया मदविह्वलत्वेन वा चरन्ति व्यवहरन्तीत्येवशीला भवन्ति । पुनः किंभूताः । स्वमात्मान वहन्ति शुभस्थान सुमार्गं वा नयन्तीति स्ववाहिनो वृषभास्तेषां बन्धविधायिनः योक्त्र(ग्य)बन्धकारिण । तथा खिङ्गा स्ववाहिनीमाजीविकादिकारिणां कुकर्मरतत्वेन बन्धवधायवस्थाया स्वदानादिना मोचयितृणामपि ऋणप्रत्यर्पणानध्यवसायेन कथचिदभ्याख्यानप्रदानादिना अनार्यत्वात्तेषा साधूनामुपकारिणामपि नियन्त्रणा निर्मापयन्तीत्येवशीलाः ॥

अमी नृशंसाः परघातिनः क्षितेः शतक्रतो शल्यजुषः पदातयः ।
इयं च लक्ष्मीः करिकर्णतालवच्चलानिलान्दोलितकेतुवत्पुनः ॥ १६८ ॥

हे क्षितेः शतक्रतो भूजम्भारे, अमी पदातयो नृशसाः क्रूराः । तथा परान् शत्रून् स्वव्यतिरिक्तानन्यान्वा पातयन्तीत्येवशीलाः । शल्यानि शस्त्राणि कुन्तान्वा । 'परस्परोल्लासितशल्यपल्लवे । मृषा मृध सादिबले कुतूहलान्नलस्य नासीरगते वितेनतुः ॥' इति नैषधे । 'शल्य शस्त्र कुन्तश्च' इति तद्वृत्तिः । तथा समरावसरे शरीरान्त प्रविष्टानि लोहशल्यानि वा । तथा रागद्वेषद्रोहादिशल्यानि वा जुषन्ते भजन्तीति शल्यजुषो वर्तन्ते । च पुनरियं लक्ष्मी चला चपला वर्तते। किंवत्। करिणा दन्तिना कर्णतालवत्। पुनरनिलेन प्रबलपवमानेनान्दोलितो वेल्लितस्तरलीकृतो य केतु प्रासादशिर.शिखरस्थायुकध्वजस्तद्वत् ॥

इदं च राज्यं नरकप्रतिश्रुतेः सुभूमभूभर्तुरिवास्ति लग्नम् ।
परं पुनः कारणमस्ति संसृतेर्नभोम्बुदाम्भोऽङ्कुरसंततेरिव ॥ १६९ ॥

हे नृप, च पुनरिद श्रीमदादिमहामण्डलीकैः समाङ्क्ति भुज्यमान राज्य समग्रदिगन्तभूमण्डलप्रभुता सुभूमनाम्नो भूभर्तुर्भूमीसार्वभौमस्य चक्रवर्तिन इव नरकस्य सप्तमदुर्गतेः प्रतिश्रुतेरङ्गीकारस्य लग्न प्रतिभू साक्षिकमिवास्ति । च पुनरिद राज्य राज्ञो भावो राज्य भूपतित्व संसृतेः संसारस्य पर प्रकृष्ट कारण हेतुरस्ति । किमिव । नभोम्बुदाम्भ इव । यथा श्रवणवारि अङ्कुरसततेर्धान्यतृणादिप्ररोहपरम्पराया परम कारण विद्यते ॥

भवन्ति योग्या विभवा भवादृशां न काविलक्ष्माधव मादृशा पुनः ।
यदन्तरायं प्रणयन्ति मुक्तिपूःप्रयायिना दुःशकुना इवाङ्गिनाम् ॥१७०॥

पेन वा जितोऽभिभूतः अनङ्गः कामः । 'अनङ्गः पुष्पकामनो.' इत्यनेकार्थः । 'कमनः कलाकेलिरनन्यजोऽनङ्गः' इति हैम्याम् । उत्प्रेक्ष्यते—ह्रिया मन्दाक्षेण । अन मुक्तकायष्टिरजनि सजात इव । पुनर्यस्य परमेष्ठिनः अङ्गकान्त्या शरीरत्विषा मरकत णिमयूखकान्त्या निर्जितैः परिभूतैः नीलनीरजैरिन्दीवरैः दुःखातुरैः नीरनिधिमग्न न । 'पुष्करं तु जले व्योम्नि तीर्थे कुण्डे न' इत्यनेकार्थः । तापः अभाजि तपस्त्य इव । निर्जितो हि द्विषा तपस्यति पराभवदुःखोद्विग्नो वा तत्तुल्यताप्राप्तये वा ॥

रवेण वाह्याहितजित्वरं तरोऽप्यभिप्रपन्नः पुनरान्तरद्विषाम् ।
विघातशक्तिं स्पृहयन्त यत्पदं हरेस्त्रिरेखोऽङ्कमिषान्निषेवते ॥ १४४

हरेर्विष्णोस्त्रिरेखः पाञ्चजन्यनामा शङ्खः अङ्कमिषाल्लाञ्छनच्छलात् यत्पदं नेमि नाथचरणं निषेवते । उत्प्रेक्ष्यते—रवेण निजशब्देन वाह्या भूमिनभःसंचारिणः प्रलय ये अहिताः प्रतिपक्षास्तेषां जित्वरं जयनशीलं तरो बलमभिप्रपन्नः सम्प्राप्तोऽपि । य क्तम्—'अम्भोधेरेव जाता जगति कति न ते हन्त सन्तीह शङ्खा यान्विभ्राण भ्रमन्ति प्रतिभवनममी भिक्षवो जीवनाय । एकः श्रीपाञ्चजन्यो हरिकरकमलक्रोडहंस यमानो यस्य ध्वानैरमानैरसुरसुरवधूवर्गगर्भा गलन्ति ॥' इति । पुनरान्तराणामन्तरङ्ग नामनन्तकालादात्मना प्रतिबद्धानां द्विषां कर्मशत्रूणां विघातशक्तेर्व्यापादनसामर्थ्यस्य स्पृहया वाञ्छयेव सेवते ॥

अशीलि शीलेन जितेन येन किं ह्रिया कुमारेण गिरेरधित्यका ।
प्रभुर्जिनं तं यदुवंशभास्करोदयोदयक्षोणिधरं दृशा पपौ ॥ १४५ ॥

येन भगवता शीलेन स्वब्रह्मचर्येण जितेन तिरस्कृतेन कुमारेण स्वामिकार्तिकेन 'षाण्मातुरो ब्रह्मचारी गङ्गोमाकृत्तिकासुतः' इति हैम्याम् । उत्प्रेक्ष्यते—ह्रिया लज्जय गिरेर्गन्धमादनाभिधानभूधरस्याधित्यका ऊर्ध्वभूमिः स्कन्दमशीलि सेवितम् । तत्र गत्वा स्थित इत्यर्थः । 'सुगन्धिगन्धमादनाधिवासिनः स्कन्ददेवस्य दर्शनार्थमितो गतवानस्मि' इति चम्पूकथायाम् । तथा पित्रोरपेक्षया तु कैलासाचलचूलिकायां स्थानम् । तथा 'स्कन्दो मन्दमतिश्चकार न करस्पर्शं श्रियाः शङ्कितः' इति खण्डप्रशस्तौ । प्रभुः सूरिस्त पूर्वव्यावर्णितं जिनं नेमिनाथं दृशा नेत्रेण पपौ सादरं पश्यति स्म । किंभूतः । यदूना यादवानां वंशोऽन्ववायः स एव भास्करः सूर्यस्तस्योदयार्थमुद्गमनाय उदयक्षोणिधरः । पूर्वपर्वत इत्यर्थः ॥ चतुर्भिः कलापकम् । नेमिनाथवर्णनम् ॥

जय त्रिलोकीजनकल्पपादप पुनर्भवश्रीपरिरम्भलोलुप ।
जय प्रमोदाङ्कुरकोटिवारिमुक् जय प्रभाभर्त्सितनीलरत्नरुक् ॥ १४६ ॥

---

१. 'विघातशक्तेः स्पृहया वाञ्छयेव सेवते' इति टीकादर्शनात् 'विघातशक्तेः स्पृहयेव यत्पदम्' इति पाठो भवेत्

र्दानार्दस्य दानावसरे करस्य हस्तस्योपरिष्टान्न स भूत् नाजनि न सजातः । स पुमान् विपिनप्रसूनपत्कान्तारकुसुममिव मोघजन्मा निष्फलावतारो जातः ॥

नवोद्धृतं दध्न इवाम्बुधेः सुधां मृदश्च हेमोपकृतिस्तनोरिव ।
श्रियस्तथा सारमिदं मुनीन्द्र यत्क्रियेत सा पात्रकराब्जसङ्गिनी ॥१७३॥

हे मुनीन्द्र, तथा तेन प्रकारेण श्रियः लक्ष्म्या इदमेतत्सारं वर्तते । यत्सा श्रीः पात्रस्य साधोः कराब्जस्य पाणिपद्मस्य सङ्गोऽस्ति अस्याः इति पात्रकराब्जसङ्गिनी क्रियेत विधीयेत । तथा कथम् । यथा दध्न पयःसुतस्य सारं नवोद्धृतं नवनीतं म्रक्षणमास्ते । पुनर्यथा अम्बुधेः क्षीरसमुद्रस्य सारं सुधा पीयूषम् । नवीनसृष्टिनिर्माणमनुजान्यवहारेषु धान्येषु जुगुप्सां कुर्वाणैर्गीर्वाणैः स्वाशनार्थमभ्यर्थितो मधुमथनः प्रथमतः पीयूषार्थमेव पयोनिधिं मथितवानिति श्रुतिः । पुनर्यथा मृदो धातुमृत्तिकायाः सारं हेम स्वर्णम् । पुनर्यथा तनोः शरीरस्य सारमुपकृतिरुपकारः । यदुक्तम्—'दानवित्तादृत वाचः कीर्तिधर्मौ तथायुषः । परोपकरणं कायादसारात्सारमुद्धरेत् ॥' इत्युक्तेः ॥ इति गुरोर्दानाय पुनराग्रहः ॥

ततो बभाण प्रभुरब्धिनन्दना स्वतन्त्रचारा व्यभिचारिणीव या ।
श्रयेत तां गन्धकलीमलीव को वृणोमि किं चान्यदहं महीमणे १७४

ततो नृपवाक्यानन्तरं प्रभुर्हीरसूरिर्बभाण भाषते स्म । हे महीमणे राजशिरोरत्न, या अब्धिनन्दना क्षीरनीरनिधितनया श्रीर्व्यभिचारिणीपांसुलीव स्वतन्त्रं स्वेच्छया चरति भ्राम्यतीत्येवंशीला स्वतन्त्रं चारो विचरणं भ्रमणं यस्याः सा स्वतन्त्रचारा आस्ते । ततः कारणात् तां पांसुलामिव श्रियं को महात्मा उत्तमः पुमान् श्रयेत भजेत । अपि तु न कोऽपि । कामिव । गन्धकलीमिव । यथा अली भृङ्गो भ्रमरः गन्धकलीं चम्पककलिकां नाश्रयेत् । 'न षट्पदो गन्धफलीमजिघ्रत' इति सूक्तेः । किं च मत्कथितमभ्यर्थ्यताम् । एतेषु भवत्कथितपदार्थेषु मम प्रयोजनं नास्ति । अहं किंचिदन्यद् वृणोमि भवत्पार्श्वे याचे ॥

निवेशिता ये नरकेषु नारका इवाङ्गिनो गुप्तिषु सन्ति ते विभो ।
विमुञ्च तानित्थमुदीर्य तस्थुषि व्रतीश्वरेऽभाषत भूभुजा पुनः ॥ १७५ ॥

पुनः प्रभुयाच्ञोपरि भूभुजा मुनीन्द्रोऽभाषत । कस्मिन् सति । इत्थमनुना प्रकारेण उदीर्य उक्त्वा याचनां कृत्वा व्रतीश्वरे सूरीन्द्रे तस्थुषि स्थिते सति [illegible] सति । इत्थं कथम् । हे साहे, नरकेषु दुर्गतिषु नारका इव ते तव गुप्तिषु कारागृहेषु ये अङ्गिनः प्राणिनो जना निवेशिताः क्षिप्ताः सन्ति तान् विमुञ्च स्वस्थानेषु [illegible] कुरु ॥ इति गुरोर्बन्दिमोचनार्थं याचना ॥

पुपत्सपत्त्रैरिव पन्थजन्तवः शकुन्तपोता इव वा शशादनैः ।
पिसारवारा इव देव धीवरैरमीभिरुद्वेगमनायिता जनाः ॥ १७६ ॥

सुधारसद्रवानमृतनिःस्पन्दान् च श्रवःपुटैः कर्णपुटकैः श्रवणनामदुन्दुकैः पिबन्नास्वादय-
सादरं शृण्वन् ॥

मघासुवेवासुरशीतभानुना विधाय गोष्ठीं सदसद्विचारणा ।
मुनीश्वरेणाम्बुधिनेमिभानुना स्थिरीकृतार्हन्मतसंप्रधारणा ॥ १८८ ॥

मुनीश्वरेण सूरीन्द्रेण सच असच सदसती तयोर्विचारणा इदं सत् इदमागमविरु-
मिदं च लोकविरुद्धमिदमुभयाभिमतमिति विमर्शो यस्यां तादृशी अर्हन्मतप्रधार-
जिनशासनसमर्थना सर्वेष्वपि शासनेषु विचार्यमाणं सर्वकोटिविशुद्धं जिनशासनं
दृश्यते इति संप्रधारणा स्थिरीकृता । सत्या चक्रे इत्यर्थः । किं कृत्वा । मघासुवे-
भार्गवेनेव असुरशीतभानुना दैत्येन्द्रेणेव अम्बुधिनेमिभानुना जलधिनेमिखलाभास्क-
साहिना सार्धं गोष्ठीं धर्मतत्त्वविचारवार्तां विधाय कृत्वा ॥

तदिष्टगोष्ठीसमये महीहरेर्हृदन्तरानन्दरसः स कोऽप्यभूत् ।
गिरां हि पारेऽजनि यो गिरां पतेर्न यत्र काव्यं न च काव्यचातुरी १८९

स्वं साहिसूरिद्वन्द्वसबन्धिनी इष्टा मनसोऽभिप्रेता साहिहृदयंगमा गोष्ठी स्वतत्त्ववार्ता
तस्याः समये प्रस्तावे स कोऽप्यद्भुताश्चर्यकारी वाचामगोचरो महीहरेर्भूमीन्द्रस्य हृद-
न्तरा मनोमध्ये आनन्दरसः प्रह्लादास्वादः । 'रसः स्वादे जले वीर्ये शृङ्गारादौ' इत्यने-
कार्थः । अभूद्बभूव । य आनन्दरसो गिरां पतेः सुराचार्यस्य हि निश्चितं गिरां पारे
वाचां परतीरवर्ती वक्तुमशक्योऽजनि संजायते स्म । 'गिरा हि पारे निपपेन्द्रवंशवन्'
इति नैषधे । च पुनर्यत्रानन्दरसे काव्यस्य शुक्रस्य काव्यानां कवित्वानां चातुरी नाजनि
वाचस्पतिर्वाचा वक्तुं न शक्नोति । शुक्रोऽपि काव्यरचनां रचयितुं नालं भवतीत्यर्थः ॥
इति सूरिणा सम साहेर्द्वितीयवार गोष्ठी ॥

ततः प्रदित्सुर्गुरवे स किंचनात्मनो घनो भूभवनाय नीरवत् ।
प्रणीतवान्सप्रणयं गिरां गृहं मुखारविन्दं वसुधावधूवरः ॥ १९० ॥

ततो गोष्ठीकरणोद्भूतानन्दरसानन्तरं सोऽकब्बर एव वसुधावधूवरः भूमीनायको-
नतं सप्रणयं सस्नेहं याच्ञासहितं वा । 'प्रणयः स्नेहयाच्ञयोः' इत्यनेकार्थः । यथा स्या-
त्तथा मुखारविन्दं वदनकमलं गिरां वाचां गृहं वासस्थानं प्रणीतवान् चकार । इति
किं कर्तुमिच्छुः । गुरवे हीरविजयसूरये आत्मनः स्वस्य किंचन आत्मीयं वस्तु किंचित्
प्रदित्सुः प्रदातुमिच्छुः । किंवत् । नीरवत् । यथा घनो धाराधरो भूभवनाय पृथ्वी-
लोकाय नीरं दातुमिच्छति तथा अकब्बरोऽपि प्रभवे आत्मीयवस्तु दातुमुत्कण्ठितः
सन्नित्यर्थः ॥

पदस्थिताः कौतुकिना पयोनिधेः समेत्य कृष्णा इव जह्नुना पुनः ।
स्फुरन्ति तेऽत्रा मम मत्कुटिनः मनोऽद्भुतदर्शनादिदर्शिनः १९१

इयं तु पूज्येषु परोपकारिता प्रसादनीयं निजकार्यमप्यथ ।
तमूचिवानेष यदङ्गिनोऽखिलानसूनिवावैमि ततः परोऽस्तु कः॥१७९॥

हे सूरय. । तु इति विशेषद्योतकम् । अवधारयन्तु वा । 'तु विशेषेऽवधारणे' इत्यनेकार्थः । इय वन्दिजनमोचनलक्षणा पूज्येषु भुवनजनाभ्यर्चनीयेषु श्रीमत्सु केवल परोपकारिता परेषु आत्मव्यतिरिक्तेषु जीवेषु उपकारिता उपकारकरणशीलता परोपकर्तृत्वमेव । अपि पुनर्निजकार्य सकलमपि प्रसादनीय प्रसाद्य सद्योवाच्यम् अथ इत्युक्तेरनन्तरमेष सूरिस्तमकब्बर प्रति ऊचिवान् कथयति स्म । हे साहे, अहमखिलान् समस्तानपि अङ्गिनो जन्तून् असून् स्वप्राणानिवावैमि निजजीववज्जानामि । तत. तर्हि परः कोऽस्तु । न कोऽपीत्यर्थ. ॥

सुख निखेलन्तु विलासविष्किरास्त्वया विमुक्ता निजपञ्जरात्पुनः ।
निरोधदुःखं स्वगृहैर्वियोगिनस्तुदत्यमून्यत्तुहिन तरूनिव ॥ १८० ॥

हे साहे, निजपञ्जरात्स्वकीयकाष्ठकोष्ठात्त्वया विमुक्ता. श्रीमता निष्कास्य रोधान्मुत्कला मुक्ताः स्वेच्छाचारिण कृता' विलासविष्किरा क्रीडाविहगमाः पुन' पूर्ववत्सुख सुखेन निखेलन्तु रमन्ताम् । यत्कारणात्त्वेषामात्मना गृहैर्दारैर्वियोगो विरहोऽस्त्येषामिति वियोगिनस्तानमून्विहगान्निरोधो निरुध्य रक्षण पञ्जरक्षेपणं च तस्य दुःखमसात तुदति पीडयति । किमिव । तुहिनमिव । यथा तुहिन हिम हिमानीव तरून्पीडयति दहति ॥

नभश्चराम्भश्चरभूमिचारिणां वपुष्मतां स्वैरसुखप्रचारिणाम् ।
निभालयन्नीतिदृशा चराचर भवानिशं साधुरिवाभयप्रदः ॥ १८१ ॥

हे साहे, नभस्याकाशे चरन्तीति नभश्चरा. पक्षिण , तथा अम्भसि पानीये चरन्तीति अम्भश्चारिणो मत्स्या मकरादय , तथा भूमौ पृथिव्या चरन्तीत्येवशीला भूमिचारिण शशशम्बरवराहहरिणादयो वन्या गोमहिषपश्वेडकादयो ग्राम्याणास्तेषा वपुष्मता देहिनां जन्तूना त्व नीतिदृशा न्यायचक्षुषा चराचर स्थावरजङ्गमरूप जगन्निभालयन् स्वात्मवत्सर्वेऽपि सत्त्वा पालनीया इति बुद्ध्या पश्यन्ननिश निरन्तर साधुरिव पृथिवीजलानलवायुवनस्पतित्रसाभिधानाना षण्णा कायाना पालयितेव अभय जीवितदान प्रददातीत्यभयप्रदो भव एधि । किं च । वपुष्मता स्वैर स्वेच्छया सुखेन मनसा तेन च प्रचरन्तीत्येवशीलास्तेषाम् ॥ इति पञ्जरपक्षिमोचनमार्गणम् ॥

इति निशम्य दयोदयगर्भितं क्षितिपतिर्यतिशीतरुचेर्वच. ।
कवितृकाव्यमिवाप्रतिमं गुणैर्मनसि त प्रशशंस चमत्कृतः ॥ १८२ ॥

क्षितिपतिरकब्बरसाहि. चमत्कृत आश्चर्य प्राप्तः सन् मनसि चित्ते एव गुणै' शमदमकृपावत्त्वादिभिरप्रतिममसाधारण त सूरि प्रशशस श्लाघते स्म । किं कृत्वा । च-

चिन्तारत्नम् । नैःस्व्य दारिद्र्य निहन्ति नाशयति । पुनर्हरिचन्दनानि श्रीखण्डपादपाः हरितो दिश आमोदयन्ति सौरभयन्ति सुरभीकुर्वाणाः सन्त आमोदयन्ति सप्रमोदान् कुर्वन्ति हर्षयन्ति पुनरम्बरकेतवो भास्करा सतमसमन्धकार भिन्दन्ति निर्दलयन्ति । च पुन सालाः सर्वजातीया पादपा. पचेलिमानि फलानि दिशन्ति यच्छन्ति । तथा वार्धे. समुद्रस्य वशा पत्न्यो नद्योऽपि पयःप्रवाहान् पानीयपूरान् वहन्ति । उत्प्रेक्ष्यते— विश्वेषा जगता समस्तजन्तुजाताना वा य उपकारः समीहितकरण तत्र एका अद्वितीया निबद्धा रचिता कक्षा स्वीकारो यैस्तादृशैरेभिश्चन्द्रादिपदार्थैः सूरिभिर्वा वसुधा एषा विश्वंभरा रत्नगर्भा बभूव रत्नानि मणयो रत्नपुरुषा वा गर्भे मध्ये यस्याः तादृशी जातेव । रत्नगर्भेत्यभिधानमेभिर्भूनेरभूदिव ॥ त्रिभिर्विशेषकम् ॥

शशंस साहिर्जनयन्ति मन्मनोविनोदमेते विबुधा इव प्रभो ।
अमून्परं नाहमवैमि बिभ्रतः शमीद्रुमान्वह्निमिवार्तिमन्तरा ॥ १८६ ॥

साहिरकब्बर शशस कथयति स्म । हे प्रभो, एते विहगमा मन्मनोविनोद मम मनसश्चित्तस्य विनोद क्रीडा जनयन्ति । के इव । विबुधा इव । यथा पण्डिता विविधशास्त्रगोष्ठीकाव्यादिरसै. मनोविनोदमुत्पादयन्ति । यदुक्तम्—'गीतशास्त्रविनोदेन कालो गच्छति धीमताम्' इति । पर पुनरहममून् विहगान् अन्तरा मनोमध्ये अर्तिं पीडान्विता वा बिभ्रतो धारयतो नावैमि न जाने । कानिव । शमीद्रुमानिव । यथा शमीवृक्षा 'खेजडी' इति प्रसिद्धाः अन्तरा मध्ये वह्निमनल बिभ्रति । 'शमीमिवाभ्यन्तरलीनपावकाम्' इति रघुवशे ॥

शापेन कस्यापि मुनेरिवानिश निरुध्यमाना विविधाः खगा मया ।
निर्मुक्तिभाजो भवदीयभाषितैरेते स्वतन्त्र विचरन्तु सत्वरम् ॥ १८७ ॥

हे प्रभो, एते विविधा नानाजातीया अनेकजातिजन्मानो मयूरशुकसारिकाकाकपिकचकोरप्रमुखाः खगाः विहगमाः भवदीयैः श्रीमत्सबन्धिभि भाषितै कथितैः निर्मुक्ति बन्धन परेभ्यो मोक्ष भजन्तीति निर्मुक्तिभाज मया विमुक्ता. सन्त. सत्वर शीघ्र स्वतन्त्र स्वेच्छया विचरन्तु सुख स्वैरमितस्ततो व्रजन्तु विशिष्टा मनोभिलषिता वा चूर्णि कुर्वन्तु । खगा किं क्रियमाणा. । मया अनिश निरन्तर निरुध्यमाना. पञ्जरादिषु प्रक्षिप्य सरक्ष्यमाणा रोध प्राप्यमाना । उत्प्रेक्ष्यते—कस्यापि कोपनस्य दुर्वास.प्रमुखस्य कस्यचिदनिर्दिष्टनाम्नो मुनेस्तापसस्य आक्रोशवाक्येनेव अनिष्टवद्वसेत् ॥

भास्वत्करा इव सुदूरभुव. समेता
गृह्णीत दन्तिहयहेममुख न किंचित् ।
तेन प्रसाद्य किमपि स्वविधेयमेष
प्राप्यः कृतार्थपदवीमिति भूभुजोचे ॥ १८८ ॥

हे काविलनाम्नो मुद्गलमण्डलस्य श्रीमज्जन्मजनपदस्य क्ष्माधव चक्रवर्तिन्, अमी विभवा विशिष्टराज्यादिलाभाकलिताः भवा उत्पत्तय इत्यर्थध्वनिरपि। विभवा विभूतयः धनधान्यद्विपदचतुष्पदसंपदः भवादृशां सांसारिकसुखाभिलाषिणां युष्मादृशामेव योग्या उचिताः। न पुनर्मादृशां विमुक्तसर्वसङ्गानां निवृत्तिनितम्बिनीविनिर्मितविरलविलासाखादरसिकायितमनसां साधूनाम्। यत्कारणादमी विभवा विशिष्टा विरुद्धा वा भवाः जन्मपरम्पराः अथ वा धनधान्याद्युपरि अतिमूर्छावत्तया विशेषेण सूक्ष्मबादरादिभेदभिन्नपृथिव्यप्तेजोवायुवनस्पतिनिगोदाधिक्येन भवः संसारो येभ्यस्ते विभवा मुक्तिपुरीं सिद्धिनगर्यां प्रयान्ति गच्छन्तीत्येवंशीलानामङ्गिनां भविकजनानां दुःशकुना इव प्रतिकूलविहगा इव विघ्नमन्तरायं कुर्वन्ति। यतः सग्रन्थाः मोक्षं गन्तुमशक्तास्ततो निर्ग्रन्थत्वमेव वरं शिवपदप्राप्तिसाधनम्॥

शिखामणेस्तस्य निरीहताजुषां वलाहकस्येव निशम्य निःस्वनम्।
मुदाविरासीदवनीशमानसे विदूरभूमाविव वालवायुजम्॥ १७१॥

अवनीशस्य विश्वंभराभर्तुरकब्बरसाहेर्मानसे हृदये मुत् प्रमोदः आविरासीत्प्रकटीभवति स्म। किमिव। वालवायुजमिव। यथा विदूरनाम्नो भूधरस्य भूमौ रत्नोत्पत्तिपृथिव्यां वालवायुजं वैदूर्यरत्नमाविर्भवति। किं कृत्वा। निरीहताजुषां निर्गता ईहा सर्वेष्वपि पुत्रकलत्रधनप्रमुखसांसारिकानुषङ्गेषु स्पृहा वाञ्छा येषां ते निरीहास्तेषां भावं जुषन्ते सेवन्ते इति निरीहताजुषस्तेषां निःस्पृहत्वभाजां वशिनां शिखामणेः चूडामणेः शिरोरत्नस्य सूरेर्निःस्वनं पूर्वोक्तवस्तूपादाननिषेधसूचकवाचं निशम्य श्रुत्वा। कस्येव। वलाहकस्येव। यथा मेघस्य निःस्वनं वालवायुजं शृणोति। वर्षाकाले हि सजलजलदगर्जितमाकर्ण्य विदूरपर्वतक्षितौ वैदूर्यरत्नशलाकाः प्रादुर्भवन्तीति ख्यातिः। अधुनापि यथा अर्बुदाद्यचलवंशभूमीषु प्रथमवृष्टिजलक्लिन्नमेदिनीषु वंशाङ्कुरा भुवं निर्भिद्य निर्गच्छन्तः श्रूयन्ते दृश्यन्ते च कैश्चित्तद्वदिति॥ इति साहिदीयमानवस्त्वनुपादाने सूरिप्रत्युत्तरवचः॥

शशंस सूरिं कमिता ततः क्षितेः किमप्युपादाय कृतार्थ्यतामहम्।
न यत्करः पात्रकरोपरि स्म भूत्स मोघजन्मा विपिनप्रसूनवत्॥ १७२॥

ततो मुदाविर्भवनानन्तरं क्षितेः कमिता भूमीकामुको वसुधाधवोऽकब्बरः। 'इलागी वसुमतीकमितारः' इति नैषधे। सूरिं प्रति शशंस शशंसति स्म बभाषे। किमुवाच। हे प्रभो, किमपि किंचिदपि मदीयं मामकीनं वस्तु पदार्थमुपादाय गृहीत्वा प्रभुणाहं कृतः सिद्धोऽर्थः कार्यं यस्य स कृतार्थः कृतकृत्यः कृतार्थं करोतीति कृतार्थयति ततः कर्मणि कृतार्थ्यतां सफलः क्रियताम्। हि यस्मात्कारणात् यत्करो यस्य पाणिः पात्रस्य साधो·

१. 'स्मृत्' इति पाठः प्रतिभाति.

महानुभावा एवेत्याश्चर्यम्। आ सामस्त्येन सर्वाङ्गीणोल्लसद्रोमाञ्चकञ्चुकत्वेन दधान बिभ्राण. ॥

प्रारभ्यमेचकनभोदशमीं शमीश
यावन्नभस्य बहुलेतरपष्ठिका स्यात् ।
तावच्चरन्तु सुखमङ्गिगणास्त्रिलोकी-
जीवातुनेव भवता वचसेत्युदित्वा ॥ १९१ ॥
स्वाहाङ्कितं कजसुहृन्मितवासराणां
बिभ्रद्विचित्ररुचिकाञ्चनचारिमाणम् ।
अम्भोनभोवनतनूमदमारिसत्क
मादायि तेन गुरवे फुरमानपट्टम् ॥ १९२ ॥

तेनाकव्वरसाहिना स्वाहाङ्कित निजनामकलितम्, तथा कजसुहृद· कमलबान्धवाः सूर्याः तैर्मितानां प्रमाणीकृतानां द्वादशसंख्याकानां वासराणां दिवसानाम्, तथा अम्भसां पानीयानाम्, तथा नभसाम्। वियच्चराणामित्यर्थः । तथा वनानामुपलक्षणाज्जनपदनगरपुरग्रामाणां ये तनूमन्त अम्भश्चरा मत्स्यकच्छपादयः नभश्चरा मयूरशुककलिविङ्कादयः वनचराः शशशम्बरहरिणादय· ग्रामादीनां महिषमेषादय. एतेषां जीवानाममारिः जीवबधपालनदया तत्सत्क तत्सबन्धि स्फुरन्मानानां साहिनाममुद्राङ्कितलेखविशेषाणां पट्ट गुरवे हीरविजयसूरये आदायि प्रदत्तम् । किं कुर्वत्। विशिष्टानि विचित्राण्यालेख्यानि यत्र रुच्या स्फुरज्ज्योतिषा युक्तस्य काञ्चनस्य। अथ वा विशिष्टा मनोज्ञा चित्रा विस्मयकारिणी। अथ वा विचित्रा नानाप्रकारा रुचि. कान्तिर्यस्य तादृशस्य काञ्चनस्य कनकस्य चारिमाणं मनोहरता बिभ्रद्धारयत्। दत्त किं कृत्वा । इत्यमुना प्रकारेणोदित्वा कथयित्वा। इति किम्। त्रिलोक्यास्त्रिभुवनस्य जीवातुना जीवनौषधिनेव। आकाशेन खला ऊर्ध्वलोकः, बिलादिना अधोलोक, भूमिर्मध्यमलोक, इति त्रिलोकी जाता । भवता श्रीपूज्यानां वचसा अङ्गिगणा जन्तुप्रजाः तावत्तावन्त समय सुखं सातेन चरन्तु पर्यटयन्तु भक्षयन्तु वा यदृच्छया। 'चर गतिभक्षणयो' अर्थत्वात् । किं यावत् हे शमीश उपशमवतामवतंस, मेचकनभोदशमीमारभ्य श्रावणबहुलदशमीदिनमादौ कृत्वा इदं तु गुर्जरमण्डलानुगतं वचः अन्यदेशापेक्षया तु भाद्रपदकृष्णदशमी स्यादिति श्रावणकृष्णदशमीं प्रथम सस्थाप्य यावत् यावता कालेन नभस्य भाद्रपदमासस्य बहुलेतरा शुक्ला अथ वा बहुल. कृष्णपक्ष. तस्मादितरोऽन्य. शुक्लपक्षस्तस्य षष्ठिका षष्ठी तिथि स्याद्भवेत् ॥ युगलम् ॥

व्यक्तिर्यथा प्रथममाप्स्यत गुर्जराणा
सौराष्ट्रमण्डलफतेपुरदिल्लिकानाम् ।

हे देव भट्टारक, अमीभिः कारागारवासिभिः अन्यायाजन्यकारिभिः नृशंसैर्जना प्रजा लोकाः उद्वेगं सतापमकराकरदण्डादिकरणैर्महोपद्रवमवापिता लम्भिताः । कैरिव । पृषत्सपत्नैरिव । यथा पृषतां मृगविशेषाणां सपत्नैः प्रत्यर्थिभिः केसरिभिः । 'पृषत्किशोरी कुरुतामसंगतम्' इति नैषधे । वन्या वने भवाः मृगशशशम्बरादयो जन्तवः प्राणिनः काननसत्त्वाः संताप्यन्ते । पुनः कैरिव । शशादनैरिव । यथा श्येनैः शकुन्तानां विहगमानां पोता बालाः शकुन्ताः पोताश्च लघुवृद्धपक्षिण उद्विज्यन्ते । 'श्येनः पत्त्री शशादनः' इति हैम्याम् । तथा च—'नभसि महसां ध्वान्तध्वाङ्क्षप्रमापणपत्रिणामिह विहरणैः श्येतां पाता रवेरथ धारयन् । शशविशशनत्रासादाशामयाचरमां शशी तदधिगमनात्तारापारापतैरुदडीयत ॥' इति नैषधे । पुनः धीवरैरिव । यथा कैवर्तकैर्विसारवारा मत्स्यगणा उद्वेगं प्राप्यन्ते । 'विसारः शकली शल्की शम्बरोऽनिमिषस्तिमिः' इति हैम्यां मीननामानि ॥

अमी प्रजाम्भोजरमाहिमागमा मुनीन्द्र नीतेः परिपन्थिका इव ।
पचेलिमेनेव निजांहसा मया निगृह्य तच्चारकगोचरीकृताः ॥ १७७ ॥

हे मुनीन्द्र, यत्कारणादमी वन्दिजनाः नीतेर्न्यायस्य शिष्टाचारस्य परिपन्थिकाः प्रतिपक्षा इव वर्तन्ते । किंलक्षणाः । प्रजाः प्रकृतयः नगरग्रामजनपदादिवासिजना एवाम्भोजानि पद्मानि सुकुमारत्वात्कमलतुल्यास्तेषां रमा लक्ष्म्यः तासु हिमागमाः हेमन्तशिशिरसदृशाः । यथा हिमागमेन लक्ष्मीरादाय । विच्छायीकृत्योत्सर्वैः । कमलानि गाल्यन्ते, तथा एभिरपि श्रीणां ग्रहणे कथैव का जीवा अभिगृह्यन्ते जनानां तस्मात्कारणान्नीतिविदा न्यायनिष्ठेन मया निगृह्य निग्रहं कृत्वा निगडयित्वा च चारकगोचरीकृताः कारागारनिवासिनो विहिताः । उत्प्रेक्ष्यते—पचेलिमेन परिपाकं प्राप्तेनोदयानिदशायामागतेन निजांहसा स्वकीयपापेनेव । 'अत्युग्रपुण्यपापानामिहैव फलमश्नुते' इति वचनात् ॥

अगण्यपुण्यादिव पक्रिमान्निजात्तथापि वाक्याद्यतिजम्भनिद्विषाम् ।
समुद्धृता दुःखमहान्धकूपतो यदृच्छयामी विचरन्तु वन्दिनः ॥ १७८ ॥

हे प्रभो, अमी वन्दिनो वन्दिजनाः कारागारनिभृताः अपि यदृच्छया [illegible] चरन्तु स्वस्वस्थाने गत्वा स्वैरं क्रीडन्तु । किंभूताः । [illegible] [illegible] तथापि [illegible] [illegible] [illegible] ॥ [illegible] ।

महानुभावा एवेत्याश्चर्यम्। आ सामस्त्येन सर्वाङ्गीणोत्पन्नरोमाञ्चकञ्चुकत्वेन दधानः चित्राणि ॥

प्रारभ्य मेचकनभोदशमीं शमीश
यावन्नभस्य बहुलेतरपष्ठिका स्यात्।
तावच्चरन्तु सुखमङ्गिगणास्त्रिलोकी-
जीवातुनेव भवता वचसेत्युदित्वा ॥ १९१ ॥

स्वाह्वाङ्कितं कजसुहृन्मितवासराणां
बिभ्रद्विचित्ररुचिकाञ्चनचारिमाणम्।
अम्भोनभोवनतनूमदमारिसत्कं
प्रादायि तेन गुरवे फुरमानपट्टम् ॥ १९२ ॥

तेनाकब्बरसाहिना स्वाह्वाङ्कितं निजनामकलितम्, तथा कजसुहृदः कमलबान्धवाः सूर्याः तैर्मितानां प्रमाणीकृतानां द्वादशसंख्याकानां वासराणां दिवसानाम्, तथा अम्भसां पानीयानाम्, तथा नभसाम्। वियच्चराणामित्यर्थः। तथा वनानामुपलक्षणाज्जनपदनगरपुरग्रामाणां ये तनूमन्तः अम्भश्चरा मत्स्यकच्छपादयः नभश्चरा मयूरशुककलिविङ्कादयः वनचराः शशशम्बरहरिणादयः ग्रामादीनां महिषमेषादयः एतेषां जीवानाममारिः जीववत्पालनदया तत्सत्कं तत्सम्बन्धि स्फुरन्मानानां साहिनाममुद्राङ्कितलेखविशेषाणां पट्टं गुरवे हीरविजयसूरये प्रादायि प्रदत्तम्। किं कुर्वत्। विशिष्टानि विचित्राण्यालेख्यानि यत्र रुच्या स्फुरज्ज्योतिषा युक्तस्य काञ्चनस्य। अथ वा विशिष्टा मनोज्ञा चित्रा विस्मयकारिणी। अथ वा विचित्रा नानाप्रकारा रुचिः कान्तिर्यस्य तादृशस्य काञ्चनस्य कनकस्य चारिमाणं मनोहरतां बिभ्रद्धारयत्। दत्तं किं कृत्वा। इत्यमुना प्रकारेणोदित्वा कथयित्वा। इति किम्। त्रिलोक्यास्त्रिभुवनस्य जीवातुना जीवनौषधिनेव। आकाशेन खला ऊर्ध्वलोकः, बिलादिना अधोलोकः, भूमिर्मध्यमलोकः, इति त्रिलोकी जाताः। भवता श्रीपूज्यानां वचसा अङ्गिगणा जन्तुव्रजाः तावत्तावन्तं समयं सुखं सातेन चरन्तु पर्यटयन्तु भक्षयन्तु वा यदृच्छया। 'चर गतिभक्षणयोः' अर्थत्वात्। किं यावत् हे शमीश उपशमवतामवतंस, मेचकनभोदशमीमारभ्य श्रावणबहुलदशमीदिनमादौ कृत्वा इदं तु गुर्जरमण्डलानुगतं वचः। अन्यदेशापेक्षया तु भाद्रपदकृष्णदशमी स्यादिति श्रावणकृष्णदशमीं प्रथमं संस्थाप्य यावत् यावता कालेन नभस्य भाद्रपदमासस्य बहुलेतरा शुक्ला अथ वा बहुलः कृष्णपक्षः तस्मादितरोऽन्यः शुक्लपक्षस्तस्य षष्ठिका षष्ठी तिथिः स्याद्भवेत् ॥ युगलम् ॥

व्यक्तिर्यथा प्रथममार्प्यत गुर्जराणां
सौराष्ट्रमण्डलफतेपुरदिल्लिकानाम्।

[illegible]

[illegible]—

[illegible]

[illegible] ॥ १८२ ॥

मूर्ध्ना दधाति वसुधां भुजगाधिराजो

नैःस्व्यं निहन्ति मणिरध्वरभागभाजाम् ।

आमोदयन्ति हरितो हरिचन्दनानि

भिन्दन्ति संतमसमम्बरकेलयोऽपि ॥ १८३ ॥

साला दिशन्ति च फलानि पचेलिमानि

वार्धर्वशा अपि वहन्ति पयःप्रवाहान् ।

विश्वोपकारकरणैकनिबद्धकक्षै-

रेभिर्बभूव वसुधा किमु रत्नगर्भा ॥ १८४ ॥

एषाममीषां सूरीणामन्येषां स्वव्यतिरिक्तानां जन्तूनां हितकर्मणि इष्टनिर्मापणे प्रावीण्यं चातुर्यं पश्यत भो लोकाः, विलोकयत । यतः कारणान्महतामुत्तमानां व्यवसितिर्व्यापारः प्रयत्नो वा परेषामेवार्थः प्रयोजनं यस्यास्तादृश्य इति । तथा मल्ला तदेव दर्शयति—शशी चन्द्रमाः कलाभिश्चन्द्रिकाभिः कृत्वा विश्वं जगद्धवलत्युज्ज्वलीकरोति । किंभूतं विश्वम् । अखिलं समस्तमपि । अपि पुनर्जलधरो मेघोऽपि अम्भोभिर्वृष्टिरूपैः पयःसमूहैः कृत्वा धरां वसुधां भूमीं धिनोति निदाघदाघनिवारणनवाङ्कुरनिकुरम्बकरणादिना प्रीणयति । पुनर्भुजगाधिराजः शेषनागेन्द्रो मूर्ध्ना मस्तकेन वसुधां दधाति बिभर्ति । पुनरध्वरभागभाजामध्वराणां यज्ञानां भागमंशं भजन्तीति देवाः क्रतुभुक्त्वात् । 'स्वाहास्वधाक्रतुसुधाभुज आदितेयाः' इति हैम्याम् । 'मखांशभाजां प्रथमो निगद्यसे' इति रघौ । 'मुखं मखास्वादविदां वदन्ति' इति नैषधे । मखास्वादविदां देवानां मुखं वह्निरित्यर्थः । 'बर्हिर्मुखा निमिषदेवतनाकिलेखाः' इति हैम्याम् । तेषां सुराणां मणि-

नाम यस्य तादृश सरो महातटाक तेभ्यो हीरविजयसूरिभ्यः अदत्त ददिवान् । किंभूतम् । नैके बहवः क्रोशा गव्यूतानि तैर्मीयते स्म प्रमाणीक्रियते स्मेति द्वादशक्रोशप्रमाणम् । पुनः किंभूतम् । दृशा चक्षुपा विषय गोचरीं भजतीति तादृक् पारं परतट यस्येवंविध न । अदृग्गोचरपारमित्यर्थः । किंवत् । पयोराशिवत् समुद्रमिव ज्ञायते । पुन. किंभूतम् । क्रीडन्तो जलकेलीं कुर्वाणा ये कुञ्जरा हस्तिनस्तथा वाजिनस्तुरङ्गमास्तेपा राजयः श्रेणयस्तथा वनिता युवतयस्ताभिर्युक्ता मर्त्या मानवाः सतरुणीकास्तरुणास्तेपा व्रजा गणास्तैर्भ्राजित भूषितम् । पुन किंभूतम् । नाना विविधजातिजन्मानो ये नीडजाः पक्षिणः तथा मीना मत्स्या जातयो यत्र तादृशेन नीरेण भरित सपूर्णम् ॥ इति डामरतटाकार्पणम् ॥

भूजानिरित्यालपति स सूरयः श्रीमद्गिरा मे न्यवसद्दया हृदि ।
हंसी पयोदध्वनिनैव मानसे पृच्छामि किं त्वेतदहं गुरून्प्रति ॥१९६॥

भूर्भूमी जाया यस्यासौ भूजानिः पृथ्वीपतिरित्यग्रे वक्ष्यमाणमालपति स कथयामास । हे सूरयः, श्रीमद्गिरा युष्माक वाचा मे मम हृदि हृदये दया सर्वसत्त्वोपरि कृपा न्यवसन्निवास कृतवती । केव । हसीव यथा पयोदध्वनिना पर्जन्यगर्जारवेण मराली मानससरसि निवसति । मेघागमे हि राजहसाः कलुषजलत्वादितो मानससरसि यान्तीति कविसमय. । चम्पूकथायामपि 'प्रोपितकलहसवयसि' । 'वर्षावर्णने प्रोपिता मानसं प्रति प्रस्थापिता हसपक्षिणो येन' इति तद्वृत्तिः । किं तु परं विशेष प्रश्नो विद्यते । अह गुरून् युष्मान्प्रति पृच्छामि ॥

कः प्रश्नस्तमेवाह—

अनेहसीव युग्मिनां न कोऽपि कं हनिष्यति ।
कदाचिदीदृशं दिनं समेष्यति क्षितौ प्रभो ॥ १९७ ॥

हे प्रभो, कदाचित् कस्मिन्नपि प्रस्तावे क्षितौ पृथिव्यामीदृशं दिनमेवंविधो वासरः समेष्यति समायास्यति । यस्मिन् समये दिवसे वा कोऽपि लघुर्वृद्धोऽपि सिंहव्याघ्रादिर्हिंसकोऽपि कमुत्तममपि जन्तु न हनिष्यति नैव व्यापादयिष्यति । कस्मिन्निव । अनेहसीव । यथा युग्मिना युगलिकाना समये अवसर्पिण्याः प्रथमद्वितीयतृतीयारकलक्षणे काले कोऽपि न हन्ति ॥ इति सर्वजगज्जन्तुकृपाविषयः प्रश्न. ॥

कलौ युगे पाप्मपूर्णे दुर्लभं दिनमीदृशम् ।
इत्युक्ते गुरुणा किंचिद्विचिन्त्येत्यब्रवीन्नृपः ॥ १९८ ॥

अहो दुर्लभ पाप्मभिर्दुष्कृतैः पूर्णे भरिते कलौ ईदृश धीमदुक्त जगज्जन्तुहितावहं दुष्प्राप्यम् । गुरुणा इत्युक्ते कथिते सति किंचिद्विचिन्त्य विचारयित्वा नृप इत्यग्रे वक्ष्यमाणमब्रवीज्जगाद ॥

[illegible]

च पुनः स्वैरं चरन्तु भक्षणसञ्चरणादि कुर्वन्तु। निर्भयत्युक्तिषु मद्वत्। यथाह सुखी वर्ते स्वैरं रने स्वेच्छया चास्मि चरामि विलसामि च॥ इति मृगयानिषेधः॥

प्रागागमे प्राभृतवत्किमेषां कार्यं मया चिन्तयतेति चित्ते।
प्रवर्तितासौ नवरोजघस्रामारिः क्षितौ खेलनकौतुकेन॥ २०२॥

हे सूरयः, क्षितौ पृथिव्यां खेलनकौतुकेन क्रीडाकुतूहलेन कृत्वा असौ सर्वजनसाक्षात्कारिणी प्रत्यक्षा वा श्रीमदुचिता श्रीमन्निर्मितप्राभृतरूपा मया नवरोजनाम्नां घस्राणां दिनविशेषाणाममारिः कोटिकायानामपि जीवानां वधनिषेधः प्रवर्तिता मया कृता मत्सेवकैश्च कारिता प्रकटीकृता वा। मया किं कुर्वता। एषां जगन्मान्यानां षट्काय-गोपालानां सूरीणामागमे आगमने मन्नगरसमीपे समवसरणे प्राभृतवत् ढौकनमिव प्राक् पूर्वं किं कार्यं विधेयम्। कर्तव्यमित्यर्थः। इत्यमुना प्रकारेण चित्ते स्वमनसि चिन्तयता विचारयता॥ इति नवरोजनामामारिप्रदानं गुरोः॥

आघाटनगरक्षोणीशक्रेणेव तपा इति।
द्वादशाब्दाचाम्लकर्तुर्जगच्चन्द्रयतीशितुः॥ २०३॥
यथा दफरखानेन स्तम्भतीर्थे प्रमोदतः।
मुनिसुन्दरसूरीन्दोर्वादिगोकुलसंकटः॥ २०४॥
गुणश्रेणीमणीसिन्धोः श्रीहीरविजयप्रभोः।
जगद्गुरुरिदं तेन विरुदं प्रददे तदा॥ २०५॥

तदा तस्मिन्नवसरे तेन प्रमुदितेनाकब्बरसाहिना शमदमार्जवमार्दवादीनां गुणानां श्रेण्य एव मण्यो रत्नानि तेषां सिन्धोः समुद्रस्य श्रीहीरविजयाभिधानस्य प्रभोः सूरीन्द्रस्य अयं जगद्गुरुरिदं विरुदं प्रसिद्धिकृन्नामविशेषं प्रददे दीयते स्म दत्तम्। केनेव। आघाटनगरक्षोणीशक्रेणेव। यथाधुना 'आहड' इति प्रसिद्धस्य मेदपाटमण्डलमण्डनस्याघाटनगरस्य क्षोणीशक्रेण भूमीन्द्रेण राणकेन द्वादशसंख्याकानि वत्सराणि यावत् आचाम्लानां तपोविशेषाणां कर्तुः कारकस्य जगच्चन्द्रनाम्नो यतीशितुः सूरिराजस्य तपा इति विरुदं ददे। पुनः केनेव। दफरखानेनेव। यथा स्तम्भतीर्थे तन्नगरनायकेन दफरनाम्ना खानेन यवनाधिपतिना प्रमोदतो हर्षातिशयतः वहत्सावधानिनो मुनिसुन्दरनाम्नः सूरीन्दोराचार्यचन्द्रस्य वादिगोकुलसंकट इति विरुदं दत्तम्॥ त्रिभिर्विशेषकम्॥ इति जगद्गुरुविरुदम्॥

नीत्वास्तोकान्बन्दीलोकाञ्श्रीमत्सूरेः पादोपान्ते।
प्रोज्झाचक्रे क्षोणीशक्रो देहीवांहोव्यूहांस्तीर्थे॥ २०६॥

क्षोणीशक्रोऽकब्बरसाहिः श्रीमान् साहिविहितसन्मानदानकृतलक्ष्मीकलितो हीर-

[illegible]

[illegible]

[illegible] ॥ १८९ ॥

[illegible] किं लक्षणाममारिम्। [illegible] आमुष्मिकं स्वर्गापवर्गभवं तथा ऐहिकं पुत्रकलत्रधनधान्यमान्द्यक्षेमारोग्यानादिपदार्थभवं न च [illegible] सुखे साते तयोः प्रतिभूभविष्णु साक्षिणी भवनशीला ॥

उद्वेलिताखिलशरीरिकृपापयोधी-
न्प्रेक्ष्य प्रभून्हृदि चमत्कृतिमादधानः।
चत्वार्यहान्युपरि सन्तु भवद्वृताना
चूलावदत्र मम त नृप इत्यवादीत् ॥ १९० ॥

नृप. साहिस्तु सूरिं प्रति इत्यवादीत् इदं वदति स्म। इति किम्। हे प्रभो, भवद्भिर्वृताना श्रीमद्याचितानां पर्युषणाष्टदिनानामुपरि अधिकानि मम पुण्यार्थं चत्वारि अहानि दिनानि सन्तु भवन्तु। किंवत्। चूलावत्। यथा दशवैकालिकादिकाना केषाचिच्छास्त्राणामुपरि चूला भवति, यथा वा सप्तदशसहस्रयोजनप्रमाणलवणसमुद्रजलानामुपरिष्टाज्जलशिखा जायते, तथैवैते वासराः श्रीमद्वृतेभ्यो दिवसेभ्योऽभ्यधिका भूयासुः। नृप. किं कुर्वाण.। वेला कूलभूमीमतिक्रान्त उद्वेल उत्कण्ठ॰। उद्वेलता संजाता अस्मिन्नित्युद्वेलितः। अखिलाना समग्राणा शरीरिणा जलस्थलाम्बरचारिणा प्राणिनामुपरि कृपा दयोदय॰ तद्रूप. पयोधि समुद्रो येषा तादृशान्प्रभून् हीरसूरीन्प्रेक्ष्य दृष्ट्वा चमत्कृतिं यत्र तत्राप्येतेषा केवलं सर्वप्राणिषु करुणापरिणाम एव तदहो

येन प्रकारेण त्वमिह मौनदीक्षया वाचा वचनेन प्रलापैर्निर्वृति स्वैरं सञ्चारितारूप पुण्यानि प्राप्त लब्धम् । तथा तेन प्रकारेण अस्माकमपि मङ्गलशब्दवाचा त्वं निर्गत मार्गाभिरामं च शुचिगुणं च लभस्व प्राप्नुहि । प्रायोऽर्थकानामाशीर्वाक् फलेग्रहिर्भवतीत्यादरस्य त्वं निवृत्ति लभस्व ॥ इति पदिमोचनम् ॥

त्रिजगज्जनगीयमानयानुगतोऽद्वैतयशःश्रियालये ।
भरतावनिभृज्जयश्रिया पुरि चक्रीव ततः स जग्मिवान् ॥ २११ ॥

ततो बन्दीमोचनानन्तरं स हीरविजयसूरिः आलये वसतौ उपाश्रये जग्मिवान् गच्छति स्म । किंभूत । त्रिजगज्जनैः सुरासुरनरनिकरैर्गीयमानया गानगोचरं नीयमानया अद्वैतया न विद्यते द्वैतं युगलं सदृशोपमानं यस्याः सा तया असाधारणया यशःश्रिया कीर्तिलक्ष्म्या अनुगत सहितः । क इव । चक्रीव । यथा भरतक्षेत्रस्य अवनिभृता द्वात्रिंशत्सहस्रपार्थिवाना जयश्रियानुगतः प्रत्यक्षर्भरतक्षेत्रस्यायुक्तत्वेन भरतक्षेत्रस्यैव नामानातम् । चक्री चक्रवर्ती भरतादिसार्वभौमः पुरि स्वराजधानीनगरे गच्छति । अत्रापर पाठान्तरमपि—'त्रिजगज्जनगीयमानयानुगतः सूरिशशी यशःश्रिया । वसतिं मुदृशा नवोढया परिणीतेव ततो व्यभूषयत् ॥' त्रैलोक्यलोकगीयमानया यशःश्रिया सहितः सूरिशशी वसतिमालयं व्यभूषयदलंकरोति स्म । यथा परिणेता पाणिग्रहणकर्ता नवोढया तत्कालपरिणीतया सुदृशा मृगलोचनया सहितो वसतिं वासगृहं विभूषयति ॥

अथामारिप्रवर्तनम्—

प्रावर्तयत्पुनर्भुवो भास्वानमारिमङ्गिनाम् ।
मूर्धाभिषिक्तवन्निजामाज्ञामशेषमण्डले ॥ २१२ ॥

भुवो भास्वान् अत्युत्कटप्रतापवत्त्वेन प्रतिपक्षक्षोणीक्षिल्लक्षाणा कल्पान्तकालोद्दण्डचण्डमार्तण्डमण्डलवत् सहोऽकव्वरसाहि पुनर्हीरविजयसूरेरालये पादावधारणानन्तरं स्वयं च अशेषमण्डले स्वायत्तीकृतसमस्तजनपदव्रजे अशेषाश्च ते मण्डलाश्चाशेषमण्डलाः, अशेषमण्डलाना मण्डलमशेषमण्डलम् । 'सरूपाणामेकशेषः', सरूपाणां सदृशाना शब्दाना मध्ये एक एव शिष्यते रक्ष्यते नान्य इति एकमण्डलशब्दस्य लोपः । अथवा मध्यमपदलोपी समासः शाकपार्थिवादिवत् । अङ्गिना प्राणिनाममारिं वधनिषेधं प्रावर्तयत् प्रवर्तयति स्म । किंवत् । मूर्धाभिषिक्तवत् । यथा श्रेष्ठिसेनापतिसचिवपुरोहितसामन्तादिभिरभिषिक्तः सप्ताङ्गराज्याधिपतिबलन्यायशक्तिकलितः पृथ्वीपतिरशेषमण्डले निजामात्मीयपितृप्रदत्ते निखिले देशे आज्ञा प्रवर्तयति ॥

तत्र च व्यतिकरेऽटवीवियद्वारिचारियुवजानिजन्मिनाम् ।
संकथा विरहदाववारिमुग्मालिका इव मिथोऽत्र जज्ञिरे ॥ २१३ ॥

द्वैतीयिकं [illegible]

तुर्यं पुन[illegible] ॥ १९२ ॥

.. ..

.. .. ।

.. ..

.. . . ॥ १९३ ॥

तेषां षण्णामपि फुरमानानां [illegible] अन्यकृता प्रोच्यते । प्रथमं फुरमानं [illegible] । [illegible] । तेनापि सहकारो न कृतः । इति गुर्जराणां [illegible]मण्डलस्य । [illegible] देवदेशनामतान् [illegible] मण्डल । अथवा सौराष्ट्रनाम्नो [illegible] मण्डलो देशः सौराष्ट्रमण्डलः । तथा फतेपुर साहिराजधानी तदाश्रयेण [illegible]मण्डलमागतम् । तथा [illegible] दिल्लीनामनगरी तत्कथनेन तत्पार्श्ववर्तिनोऽन्योऽपि मण्डला समायाताः । एतेषां मण्डलानां द्वितीनमेव द्वैतीयिकम् । सार्थे इकण् । तथा [illegible] प्रधानो योऽजमेरुदेशः तेन वनरकोटीकामरुस्थलीनागपुरादिदेशा लभ्यन्ते । तत्कृते तदर्थं तृतीयम् । पुनर्निखिलः समग्रोऽपि मालवमण्डलोऽवन्तिदेशस्तस्य । तद्ग्रहणेन निखिलापि दक्षिणदिक् तुर्यं चतुर्थम् । तथा श्रिया लक्ष्म्या लाभः प्राप्तिर्यत्र तादृशेन लाभपुरेण लाभपुरदेशेन पञ्जापनाम्ना । मण्डलेनेत्यर्थः । तत्समीपस्था अपि तद्ग्रहणेन ज्ञेया । युनक्तीति तादृक् मुलताननामा नीवृज्जनपदः तयोर्द्वयमुच्चमुलतानादिभेदाद्युग्मं तस्य कुसुमाशुगः स्मरस्तस्य बाणाः शरास्तेषां सख्या यस्य । पञ्चममित्यर्थः । पुनः साधुषु मुनिषु सिन्धुः समुद्रः स एव रसना मेखला यस्याः सा पृथ्वी तस्या रजनीश्वरश्चन्द्रः तस्य । एतावता यतिराजस्य हीरसूरेः स्वस्यात्मन. सवेशदेशे समीपे रक्षणकृते कदाचित्कस्याप्याकस्मिकागतस्य प्रत्ययकृते दर्शनार्थं स्वपार्श्वे स्थापनार्थं षष्ठ स्फुरमानमार्प्यत अर्पितम् ॥ युग्मम् ॥ इति पर्युषणाद्वादशदिनामारिफुरमानप्रदानम् ॥

नैकक्रोशमितं न दृग्विषयभाक्पारं पयोराशिवत्-
क्रीडत्कुञ्जरवाजिराजिवनितामर्त्यव्रजभ्राजितम् ।
नानानीडजमीननीरभरितं तड्डामराख्यं सर-
स्तेभ्योऽदत्त निषिद्धमीननिधनं तद्विज्ञवाग्भिर्नृपः ॥ १९९ ॥

नृपोऽकब्बरस्तेषां सूरीणां विज्ञाः पण्डितशान्तिचन्द्रगणयस्तेषां वाग्भिः डामरसरो मत्सीविज्ञस्युपदर्शकश्लोकोक्तियुक्तिभि. निषिद्ध निवारित मीनाना मत्स्यानां निधनं वधो यत्रैवंविध तत्स्वयं साहिना खानितत्वान्महत्तया प्रसिद्ध डामर इत्याख्या

येन प्रकारेण त्वद्गिरा श्रीमदीयया वाचा वचनेन अस्माभिर्निर्गति स्वैरं संचारितास्त्व-त्कृपापि प्राप्ता अस्माभिः । तथा तेन प्रकारेण अस्माकमाशिषा मङ्गलप्रापकवाचा त्वं नि-र्वृतिं मानसिकं सौख्यं मुक्तिसुखं च अनश्वरं प्राप्नुहि । प्रायोऽव्यक्तानामाशीर्वाक् फलप्र-दिनी तेनावश्यं त्वं निर्वृतिं लप्स्यसे ॥ इति पक्षिमोचनम् ॥

त्रिजगज्जनगीयमानयानुगतोऽद्वैतयशःश्रियालये ।
भरतावनिभृज्जयश्रिया पुरि चक्रीव ततः स जग्मिवान् ॥ २११ ॥

ततो बन्दीमोचनानन्तरं स हीरविजयसूरिः आलये वसतौ उपाश्रये जग्मिवान् ग-च्छति स्म । किंभूतः । त्रिजगज्जनैः सुरासुरनरनिकरैर्गीयमानया गानगोचरं नीयमानया अद्वैतया न विद्यते द्वैतं युगलं सदृशोपमानं यस्याः सा तया असाधारणया यशःश्रिया कीर्तिलक्ष्म्या अनुगतः सहितः । क इव । चक्रीव । यथा भरतक्षेत्रस्य अवनिभृता द्वा-त्रिंशत्सहस्रपार्थिवानां जयश्रियानुगतः ग्रन्थकर्तुर्भरतक्षेत्रस्यायुक्तत्वेन भरतक्षेत्रस्यैव नामानीतम् । चक्री चक्रवर्ती भरतादिसार्वभौमः पुरि स्वराजधानीनगरे गच्छति । अत्रापरं पाठान्तरमपि—'त्रिजगज्जनगीयमानयानुगतः सूरिशशी यशःश्रिया । वसतिं सुदृशा नवोढया परिणीतेव ततो व्यभूषयत् ॥' त्रैलोक्यलोकगीयमानया यशःश्रिया सहितः सूरिशशी वसतिमालयं व्यभूषयदलंकरोति स्म । यथा परिणेता पाणिग्रहणकर्ता नवोढया तत्कालपरिणीतया सुदृशा मृगलोचनया सहितो वसतिं वास-सौधं विभूषयति ॥

अथामारिप्रवर्तनम्—

प्रावर्तयत्पुनर्भुवो भास्वानमारिमङ्गिनाम् ।
मूर्धाभिषिक्तवन्निजामाज्ञामशेषमण्डले ॥ २१२ ॥

भुवो भास्वान् अत्युत्कटप्रतापवत्त्वेन प्रतिपक्षक्षोणीक्षित्क्षाणां कल्पान्तकालोद्दण्ड-चण्डमार्तण्डमण्डलवद्दु सहोऽकब्बरसाहिः पुनर्हीरविजयसूरेरालये पादावधारणानन्तरं स्वस्य च अशेषमण्डले स्वायत्तीकृतसमस्तजनपदव्रजे अशेषाश्च ते मण्डलाश्चाशेषम-ण्डलाः, अशेषमण्डलानां मण्डलमशेषमण्डलम् । 'सरूपाणामेकशेषः', सरूपाणां सदृशानां शब्दानां मध्ये एक एव शिष्यते रक्ष्यते नान्य इति एकमण्डलशब्दस्य लोपः । अथ वा मध्यमपदलोपी समासः शाकपार्थिवादिवत् । अङ्गिनां प्राणिनाममारिं वधनिषेधं प्रावर्तयत् प्रवर्तयति स्म । किंवत् । मूर्धाभिषिक्तवत् । यथा श्रेष्ठिसेनापतिसचिवपुरोहि-तसामन्तादिभिरभिषिक्तः सप्ताङ्गराज्याधिपतिबलन्यायशक्तिकलितः पृथ्वीपतिरशेषम-ण्डले निजामात्मीयपितृप्रदत्ते निखिले देशे आज्ञां प्रवर्तयति ॥

तत्र च व्यतिकरेऽटवीवियद्वारिचारियुवजानिजन्मिनाम् ।
संकथा विरहदाववारिसुग्मालिका इव मिथोऽत्र जज्ञिरे ॥ २१३ ॥

पलाशतां बिभ्रति यातुधाना इवाखिला अप्यनुगामिनो मे ।
अमारिरेषां न च रोचते कनिन्मलिम्लुचानामिव चन्द्रचन्द्रिका १९९

हे गुरो, मे मम अखिलाः समस्ता अपि अनुगामिनः सेवकाः । 'सहायोऽभिसरोऽनुजीविगाम्यभिसरप्लवाः । सेवकोऽर्थी' इति हैम्याम् । मुद्गलप्रधानाद्यो नराः पलाशताः पलं मांसमश्नन्ति भक्षयन्तीति पलाशास्तेषां भावं मांसभुक्त्वं बिभ्रति । मांसाशिनः सन्तीत्यर्थः । के इव । यातुधाना इव । यथा राक्षसाः पलादतां दधते । न पुनरत एव कारणादेषामनुचराणां यावनानाममारिर्जीवदया न रोचते न स्वदते । दुःखकानिवैतान् जीवानुकम्पा न प्रीणाति इत्यर्थः । केव । चन्द्रचन्द्रिकेव । यथा चान्द्रस्य सुधारुचेश्चन्द्रिका कौमुदी मलिम्लुचानां चौराणां न रोचते । दन्तानामपि चन्द्रिका स्यात् । यथा 'दशनचन्द्रिकया व्यवभासितम्' इति रघौ प्रोक्तमास्ते । तन्निरासार्थं चन्द्रचन्द्रिकेति ग्रहणमत्र ॥

शनैः शनैस्तेन मया विमृश्य प्रदास्यमानामथ सर्वथैव ।
दत्तामिवैतामवयान्तु यूयममारिमन्तर्महतेव कन्या ॥ २०० ॥

हे पूज्याः, यस्माज्जीवदया मुद्गलानां म्लेच्छानां न रोचते तेन कारणेन त्रिकरणशुद्ध्यैव दानाभिप्रायेण विमृश्य अमारिप्रदानयोग्यदिवसादीनां विचारं विधाय शनैः शनैर्मन्दं मन्दं मस्तकैरिव दिनैः प्रदास्यमानामेतां श्रीमदुक्काममारिं जीवपालनरूपां सर्वथा सर्वप्रकारेणैव यूयमन्तश्चित्ते दत्तामेवावयान्तु जानन्तु । कामिव । कन्यामिव । यथा महता उत्तमेन । 'अमोघा महतां वाणी' इति वचनात् । तथा च 'कूर्मकुलाचलफणिपतिविधृतापि चलति वसुधेयम् । प्रतिपन्नमचलमनसां न चलपुंसां युगान्तेऽपि ॥' इत्यपि वचनाच्च प्रदास्यमाना स्वयं मनसि कल्पिता कथिता वा दत्तामिव ज्ञायतेऽवश्यम् ॥ इति गुरोः पुरः इत्यग्रे जीवामारिप्रदावकथनम् ॥

प्राग्वत्कदाचिन्मृगया न जीवहिंसां विधास्ये न पुनर्भवद्वत् ।
सर्वेऽपि सत्त्वाः सुखिनो वसन्तु स्वैरं रमन्ता च चरन्तु मद्वत् ॥२०१॥

हे गुरो, अहं कदाचित् कस्मिन्नपि समये मृगयामाखेटकं न विधास्ये । किंवत् । प्राग्वत् । यथा पूर्वं श्रीमन्मिलनात्प्रथमं मृगयां कुर्वाणोऽभवं तद्वत्पुनर्मृगयां विनापि जीवहिंसां निरपराधवन्यग्राम्यजन्तूनां वधं न करिष्ये । किंवत् । भवद्वत् । यथा भवन्तः कदाचिन्मृगयां न कुर्वन्ति, अथ सर्वप्राणातिपातविरतत्वात्सापराधनिरपराधजीववधं सर्वथा न कुर्वते, अहं तु गृहमेधित्वाद्धरणीधरत्वेन दुष्टादुष्टनिग्रहपालनधर्मत्वान्निरपराधजीववधं निर्मास्ये । अथ मृगयान्यसत्त्ववधनिषेधानन्तरं सर्वे समस्ता अपि जलजाः स्थलजा वनजा नगरग्रामजाश्च मत्स्यादयो मृगादयः श्वापदा गोमहिषमेषादयश्च सत्त्वाः प्राणिनः सुखिनः सौख्यभाजः वसन्तु भवन्तु । पुनः स्वैरं स्वेच्छया रमन्ता क्रीडन्तु । स्त्रीभिः समं

येन प्रकारेण त्वद्गिरा श्रीमदीयया वाचा वचनेन अस्माभिर्निर्वृति स्वैरं सञ्चारितारूपं सुखमापे प्राप्त लब्धम्। तथा तेन प्रकारेण अस्माकमाशिषा मङ्गलप्रसक्रवाचा त्वं निर्वृतिं मानसिक सौख्य मुक्तिसुख च लभस्व प्राप्नुहि। प्रायोऽव्यक्तानामाशीर्वाक् फलेग्रहिर्भवेत्तेनावश्य त्वं निर्वृतिं लप्स्यसे॥ इति पक्षिमोचनम्॥

त्रिजगज्जनगीयमानयानुगतोऽद्वैतयशःश्रियालये।
भरतावनिभृज्जयश्रिया पुरि चक्रीव ततः स जग्मिवान्॥ २११॥

ततो वन्दीमोचनानन्तरं स हीरविजयसूरिः आलये वसतौ उपाश्रये जग्मिवान् गच्छति स। किंभूत। त्रिजगज्जनैः सुरासुरनरनिकरैर्गीयमानया गानगोचरं नीयमानया अद्वैतया न विद्यते द्वैत युगल सदृशोपमान यस्याः सा तया असाधारणया यश श्रिया कीर्तिलक्ष्म्या अनुगत सहित। क इव। चक्रीव। यथा भरतक्षेत्रस्य अवनिभृता द्वात्रिंशत्सहस्रपार्थिवाना जयश्रियानुगतः ग्रन्थकर्तुर्भरतक्षेत्रस्थायुकत्वेन भरतक्षेत्रस्यैव नामानीतम्। चक्री चक्रवर्ती भरतादिसार्वभौम' पुरि स्वराजधानीनगरे गच्छति। अत्रापरं पाठान्तरमपि—'त्रिजगज्जनगीयमानयानुगत सूरिशशी यश श्रिया। वसतिं सुदृशा नवोढया परिणीतेव ततो व्यभूषयत्॥' त्रैलोक्यलोकगीयमानया यशःश्रिया सहितः सूरिशशी वसतिमालय व्यभूषयदलकरोति स। यथा परिणेता पाणिग्रहणकर्ता नवोढया तत्कालपरिणीतया सुदृशा मृगलोचनया सहितो वसतिं वाससौध विभूषयति॥

अथामारिप्रवर्तनम्—

प्रावर्तयत्पुनर्भुवो भास्वानमारिमङ्गिनाम्।
मूर्धाभिषिक्तवन्निजामाज्ञामशेषमण्डले॥ २१२॥

भुवो भास्वान् अत्युत्कटप्रतापवत्त्वेन प्रतिपक्षक्षोणीक्षिताक्षाणां कल्पान्तकालोद्दण्डचण्डमार्तण्डमण्डलवद् साहोऽकब्बरसाहिः पुनर्हीरविजयसूरेरालये पादावधारणानन्तरं स्वयं च अशेषमण्डले स्वायत्तीकृतसमस्तजनपदव्रजे अशेषाश्च ते मण्डलाश्चाशेषमण्डला', अशेषमण्डलाना मण्डलमशेषमण्डलम्। 'सरूपाणामेकशेष', सरूपाणां सदृशानां शब्दाना मध्ये एक एव शिष्यते रक्ष्यते नान्य इति एकमण्डलशब्दस्य लोप। अथ वा मध्यमपदलोपी समासः शाकपार्थिवादिवत्। अङ्गिनां प्राणिनाममारिं वधनिषेध प्रावर्तयत् प्रवर्तयति स। किंवत्। मूर्धाभिषिक्तवत्। यथा मेदिनीसेनापतिसचिवपुरोहितसामन्तादिभिरभिषिक्त सम्राड्राज्याधिपतिवंश्यादिलक्षितः पृथ्वीपतिः स्वमण्डले निजामात्मीयपितृप्रदत्ते निखिले देशे आज्ञां प्रवर्तयति॥

तत्र च व्यतिकरेऽटवीपियद्वारिचारिमुखजानिजन्मिनाम्।
संकथा विरहदावदारिमुग्धमालिका इव मिथोऽन्न जज्ञिरे॥ २१३॥

विजयनामा सूरिस्तस्य पादोपान्ते चरणसमीपे नीत्वा आनीय अन्योहान् बहून् वन्दीलोकान् कारागारनिक्षिप्तजनान् प्रोज्झानके वन्दीतो निष्क्रयदण्डान् कृत्वा मुञ्चत्वत् मुञ्चति स्म । क इव । देहीव यथा भव्यजीवस्तीर्थे श्रीशत्रुंजये अन्यतीर्थे वा जहोव्यूहा-न्निजदुरितसंघातान्मुञ्चति निष्पापो भवेत् ॥

प्रणम्य ते प्रभोः पदानवीवदन्निद मुदा ।
मुनीन्द्र नन्दताच्चिरं सुवर्णसानुमानिव ॥ २०७ ॥

ते वन्दीलोकाः प्रभोर्हीरसूरेः पदान् । पूज्यत्वाद्बहुवचनम् । चरणान्प्रणम्य स्वशिरसा संस्पृश्य मुदा प्रमोदेन कृत्वा इदमेवविधमवीवदन् अतिशयेन बाढस्वरेण वा वदन्ति स्म । इद किम् । हे मुनीन्द्र चिरादस्माकं कारागारनरकुहकनिपातिनामुद्धारकारक त्व गुरो, चिर गलितावधिसमय यावन्नन्दतात् समृद्धिमान् भव जीव चिरस्थायी भव । क इव । सुवर्णसानुमानिव । यथा मेरुगिरिः कल्पवृक्षादिसमृद्धिमांस्तथा शाश्वतस्थायुकोऽस्ति तथा त्वमपि भूयाः ॥ इति वन्दीमोचनम् ॥

उत्थाय निशीथिन्या प्रभुपार्श्वात्पक्षिणा विमुक्तिकृते ।
डावरसरसि स गतवान्धनविजयं सार्धमादाय ॥ २०८ ॥

सोऽकब्बरसाहिः प्रभुपार्श्वात् श्रीहीरविजयसूरीन्द्रस्य सनिधानादुत्थाय पक्षिणा केलिकुतूहलकृते स्वयरक्षिताना विविधविहगमाना विमुक्तिकृते स्वयमेव विमोचनार्थं धनविजयनामानं सूरिसचिव सार्धं स्वेन सममादाय सूरीणा विम्बार्थं गृहीत्वा डावरनाम्नि सरसि तटाके गतवान् जगाम ॥

पक्षिणस्तत्क्षणात्क्षोणिचक्रेन्दुना पञ्जरेभ्यो विमुक्ताः समस्ता अपि ।
प्राप्तवन्तः स्वनीडद्रुमान्धन्विना कार्मुकेभ्यः शरव्यं पृपत्का इव २०९

क्षोणिचक्रेन्दुना मेदिनीमण्डलचन्द्रेण पञ्जरेभ्य. पक्षिरक्षणकाष्ठमयादिस्थानकेभ्यः तत्क्षणात्सरोगमनानन्तरकालं निशीथिन्या वा विमुक्ता मोक्ष प्रापिताः सन्तः मुकुलीकृताः सन्तः समस्ता. सर्वेऽपि पक्षिणो नैकजातिशकुन्ता. स्वनीडद्रुमान् निजालयकुलायस्थानद्रुमान् प्राप्तवन्त. समाश्रितान् केपाचित्स्थानतरवः परेपा तु भाविनः भाविनि भूतोपचारस्तु वर्तते एव । के इव । पृपत्का इव । यथा धन्विना धनुर्धरेण कार्मुकेभ्य कोदण्डेभ्यः पृपत्काः शराः क्षिप्ताः सन्तः शरव्य लक्ष्य वेध्य प्राप्नुवन्ति ॥

तेऽपि पत्नीपरीरम्भिणो भापितैर्बिभ्रतः संमदं सूरिमित्यूचिरे ।
त्वद्गिरास्माभिरापे यथा निर्वृतिस्त्वं लभस्वाशिपा नस्तथा निर्वृतिम् २१०

पत्नी स्वजाया पक्षिणी परीरम्भन्ते आलिङ्गन्ति इत्येवशीलास्ते पक्षिणोऽपि समद [illegible] विभ्रतो हृदि धारयन्तः सन्तः भापितैः स्वस्वभापाभिः सूरिं हीरविजययतीन्द्रमित्यमुना प्रकारेण ऊचिरे प्रोक्तवन्तः । इति किम् । हे प्रभो, यथा

इति काचिदुवाच हयद्विपती प्रमदं प्रिय मुञ्च सचिन्त इव ।
भुजमूर्धविरोधितयेव यतः प्रणिहन्तुमना अयमेति नृपः ॥ २१६ ॥

काचित् हयद्विपती वनखण्डमहिषी । 'महिषो यमवाहनः । रजस्वलो वाहरिपुः' इति हैम्याम् । इत्यमुना प्रकारेण उवाच भाषते स्म । इति किम् । हे महिष प्रिय, सचिन्त इवात्यार्तियुक्त इव प्रमदमानन्द मुञ्च त्यज । यतः कारणात् प्रणिहन्तुमनाः त्वा घातयितुकाम. अयमतिभयात्प्रत्यक्ष इव लक्ष्यते साक्षादकब्बरः नृपो राजा समेत्यायाति । उत्प्रेक्ष्यते—भुजमूर्धविरोधितया स्कन्धश्रीस्पर्धोद्भूतवैरित्वेनेव । 'स्कन्धयों वृषरक्ताक्षस्कन्धोपमः' इति काव्यकल्पलतायाम् ॥

इत्यवक्सोऽपि कान्तेऽधृति भूपतेर्मा कृथा यन्निदेशेन सूरीशितुः ।
सोऽप्यवद्येन नश्चक्षुषा नेक्षते यानभावेन बिभ्यत्कृतान्तादिव ॥ २१७॥

सोऽपि हयद्विपन् महिषोऽपि इत्यमुना प्रकारेण अवक् जगाद । हे कान्ते सैरभि, भूपतेरकब्बरात्सकाशादधृतिमस्वास्थ्यम् । भीतिमित्यर्थः । मा कृथा मा कुर्याः । 'माङि लुङ्,' माङ्योगे लुङ् स्यात् । 'मा कार्षीत् । लुङ्शब्देन भूते सि.' इति प्रक्रियाकौमुद्याम् । तथा च हेमचन्द्रः—'मा कार्षीत्कोऽपि पापानि मा च भूः कोऽपि दुःखितः' इति वचनाद्भविष्यदर्थे भूते सिप्रयोग. । यत् यस्मात्कारणात् सूरीशितु' हीरविजयसूरीन्द्रस्य निदेशेनानुशिष्टया नोऽस्मानवद्येन पापेनासमीचीनेन चक्षुषा नेत्रेण नेक्षते न पश्यति किं पुनर्वधेच्छया तन्मा शङ्कस्व । उत्प्रेक्ष्यते—यानभावेन वाहनत्वेन कृतान्ताद्बिभ्यदिव । स्ववाहनपरिभव विभाव्य ममोपरि मा कुप्यादित्यन्तकाद्भय प्राप्नुवन्निव ॥ इति महिषमिथुनालापः ॥

कापि प्रियं वदति वारणवैरिणीति
शेषे सुखं कथमहो गिरिगह्वरेषु ।
हन्ता नृपस्तव कलत्रकलतृलक्ष्मी-
स्पर्धाक्रुधा निजगजारितयाथ वा किम् ॥ २१८ ॥

कापि वारणवैरिणी गजद्वेषिणी सिंही प्रिय स्वभर्तार पञ्चानन प्रति इति वदति । इति किम् । अहो कान्त केसरिन्, गिरिगह्वरेषु भूधराणा कदरेषु घननिकुञ्जेषु वा यथा स्यात्तथा कथ केन प्रकारेण शेषे स्वपिषि । यस्मादित्यधिकारात्प्राक्तनमेव सर्वत्र गृह्यते । वारणान्नृपोऽकब्बरो मृगयारसिकतया तव भवतो हन्ता घातको व्यापादयिता वर्तते । उत्प्रेक्ष्यते—कलत्राणा स्वपत्नीना कलत्रलक्ष्म्या कटितटीश्रिया सह स्पर्धा सघर्षस्तस्यास्तया वा या क्रुध् कोपस्तेन किम् अथ वा निजा आत्मीया ये गजा रणकरणधुरीणा वारणास्तेषामरित्वेन किं शत्रुभावेनेव ॥

[illegible]

[illegible]

[illegible]

[illegible] ॥ २०७ ॥

[illegible]

उत्थाय निशीथिन्या प्रभुणा [illegible] विमुक्तिकृते ।

डाभरसरसि स गतवान्धनविजयं [illegible] ॥ २०८ ॥

सोऽकब्बरसाहिः प्रभुणा स्वामिना श्रीहीरविजयसूरीन्द्रस्य [illegible] केलिकुतूहलकृते [illegible] विमुक्तिकृते [illegible] मोचनार्थं धनविजयनामानं सूरिसचिवं सार्धं स्वेन [illegible] सूरीणां चिन्त्यं गृहीत्वा डाभरनाम्नि सरसि तटाके गतवान् जगाम ॥

पक्षिणस्तत्क्षणात्क्षोणिचक्रेन्दुना पञ्जरेभ्यो विमुक्ताः समस्ता अपि ।
प्रासवन्तः स्वनीडद्रुमान्धन्विना कार्मुकेभ्यः शरव्यं पृषत्का इव २०९

क्षोणिचक्रेन्दुना मेदिनीमण्डलचन्द्रेण पञ्जरेभ्यः पक्षिरक्षणकाष्ठमयादिस्थानकेभ्यः तत्क्षणात्सरोगमनानन्तरकालं निशीथिन्या वा विमुक्ता मोक्षं प्रापिताः सन्तः मुक्तीकृताः सन्तः समस्ताः सर्वेऽपि पक्षिणो नैकजातिशकुन्ताः स्वनीडद्रुमान् निजालयकुलायस्थानद्रुमान् प्रासवन्त समाश्रितान् केषाचित्स्थानतरवः परेषां तु भाविनः भाविनि भूतोपचारस्तु वर्तते एव । के इव । पृषत्का इव । यथा धन्विना धनुर्धरेण कार्मुकेभ्यः कोदण्डेभ्यः पृषत्काः शराः क्षिप्ताः सन्तः शरव्यं लक्ष्यं वेध्यं प्राप्नुवन्ति ॥

तेऽपि पत्नीपरीरम्भिणो भाषितैर्बिभ्रतः संमदं सूरिमित्यूचिरे ।
त्वद्गिरास्माभिरापे यथा निर्वृतिस्त्वं लभस्वाशिषा नस्तथा निर्वृतिम् २१०

पत्नी स्वजाया पक्षिणी परीरम्भन्ते आलिङ्गन्ति इत्येवंशीलास्ते पक्षिणोऽपि संमदं [illegible] बिभ्रतो हृदि धारयन्तः सन्तः भाषितैः स्वस्वभाषाभिः सूरिं हीरविजययतीन्द्रमित्यमुना प्रकारेण ऊचिरे प्रोक्तवन्तः । इति किम् । हे प्रभो, यथा

इत्यनेकार्थः। क इव। सुदृष्टिरिव। यथा सम्यग्दर्शवान् श्राद्धः पुण्डरीकं शैलं शत्रुंजय पर्वतं प्रीत्या पिबति गच्छन्नागच्छन् वलितग्रीवं मुहुर्मुहुरतृप्त इव प्रेक्षते। चैत्रपूर्णिमायां पञ्चकोटीमुनिपरिवृतपुण्डरीकगणधरस्य मोक्षगमनात्। पुण्डरीक इति नामाद्रिरप्यासीत्। तथा च हैमनाममालायाम्—'अथ व्याघ्रो द्वीपी शार्दूलचित्रकौ। चित्रकायः पुण्डरीकः' इत्येकार्थान्येव नामानि दृश्यन्ते। वृत्तावपि तथैव व्याख्यानात्। तथा च शत्रुंजयकल्पे शत्रुंजयनामसु—'विमलगिरिमुत्तिनिलउसित्तुंजो सिद्धखित्तपुण्डरिउ' इति॥ इति व्याघ्रमिथुनालापः॥

पोत्रिणी वदति काचन दयितं किं निखेलसि निपद्वर सुखितः।
रुद्र एष निहनिष्यति मखवत्त्वां विचिन्तय तदायतिकुशलम्॥२२२॥

काचन पोत्रिणी काननसूकरी दयितं वनसूकरं प्रति वदति। किं वक्ति तदेवाह—हे वराह निपद्वर जम्बाल, सुखितः सौख्ययुक्तः सन् कथं निखेलसि मया समं स्वैरं क्रीडां कुरुषे। यत्कारणादेष प्रत्यक्षः प्रत्यहमाखेटकागमनेन स्मृतिगोचरीकरणात्प्रत्यक्ष एव लक्ष्यते। आगतोऽकच्चरः रुद्रश्चण्डस्त्वां सुखनिखेलिनं भवन्तं निहनिष्यति नितरां पातयिष्यति मृगयाक्रीडारसावेशात्किमप्यगणयन्प्रमथयिष्यति। किंवत्। मखवत्। यथा रुद्रेण शंभुना मखो नाम दैत्यविशेषो निहतः। तत्तस्मात्कारणात् त्वमायतिकुशलमुत्तरकाले दीर्घदर्शितामाश्रित्याग्रे आत्मनः कुशलं चिरजीवितां निर्विघ्नतां विचिन्तय विमृश॥

पातालावटकोटरान्तरपतत्पाथोधिनेमिर्मया
दंष्ट्रया यदधारि धेनुकभिदो भागीभवद्वर्ष्मणा।
भूभृत्त्वादिव गोत्रिणं न भिनुयाद्धात्रीधरः पोत्रिणि
श्रीमत्सूरिगिरा शुभंयुरिव तत्स्वैरं चरेत्याह सः॥ २२३॥

स पोत्री पोत्रिणीमित्याह ब्रूते स्म। इति किम्। हे पोत्रिणि वराहि, तत्कारणात् शुभंयुः शुभसंयुक्ता कल्याणवती त्वं स्वैरं स्वेच्छया चर संचर। इतस्ततो याहि कन्दान्मुस्ताश्च खाद भक्षय। यद्यस्मात्कारणात् हे पोत्रिणि सूकरि, श्रीमत्सूरिगिरा श्रीहीरविजयसूरिवाचा धात्रीधरोऽकब्बरो मां न भिनुयात् पातयेत्। उत्प्रेक्ष्यते—भूभृत्त्वात् धरणीधारकत्वात् गोत्रिणं स्वजनमिव। यतो महात्मा सर्वथा स्वशक्त्या स्वजनं रक्षतीति रीतिः। अथ भूभृत्त्वमेव दर्शयति—यत्कारणात् पातालमधोलोकः स एवावटः कूपः तस्य कोटरोऽधोभागवर्ती महागर्तस्तस्यान्तरे मध्ये पतन्ती यान्ती पाथोधिनेमिरासमुद्रान्तक्षितिर्धेनुकभिदो विष्णोर्भागीभवत् अंशरूपेण जायमानं वर्ष्म शरीरं यस्य तादृशेन मया महीवराहरूपेण दंष्ट्रया दाढामध्ये अधारि। श्रूयते च शास्त्रे—पुरा पाताळं प्रविशन्ती क्षितिर्विष्णुना वराहरूपेण स्वदंष्ट्रया धृता इति॥ इति वराहमिथुनालापः॥

विजयनामा सूरिस्तस्य पादोपान्ते चरणसमीपे नीत्वा आनीय अस्तोकान् बहून् बन्दीलोकान् कारागारनिक्षिप्तजनान् प्रोज्झाचक्रे वन्दीतो निष्करदण्डान् कृत्वा मुत्कलान् मुञ्चति स्म। क इव। देहीव यथा भव्यजीवस्तीर्थे श्रीशत्रुञ्जये अन्यतीर्थे वा अहोव्यूहान्निजदुरितसंघातान्मुञ्चति निष्पापो भवेत् ॥

प्रणम्य ते प्रभोः पदानवीवदन्निदं मुदा ।
मुनीन्द्र नन्दताच्चिरं सुवर्णसानुमानिव ॥ २०७ ॥

ते वन्दीलोकाः प्रभोर्हीरसूरेः पदान्। पूज्यत्वाद्बहुवचनम्। चरणान्प्रणम्य स्वस्वशिरसा संस्पृश्य मुदा प्रमोदेन कृत्वा इदमेवविधमवीवदन् अतिशयेन वाढस्वरेण वा वदन्ति स्म। इद किम्। हे मुनीन्द्र चिरादस्माक कारागारनरकुहकनिपातिनामुद्धारकारक त्वं गुरो, चिरं गलितावधिसमय यावन्नन्दतात् समृद्धिमान् भव जीव चिरस्थायी भव। क इव। सुवर्णसानुमानिव। यथा मेरुगिरिः कल्पवृक्षादिसमृद्धिमांस्तथा शाश्वतस्थायुकोऽस्ति तथा त्वमपि भूयाः ॥ इति वन्दीमोचनम् ॥

उत्थाय निशीथिन्यां प्रभुपार्श्वात्पक्षिणा विमुक्तिकृते ।
डावरसरसि स गतवान्धनविजयं सार्धमादाय ॥ २०८ ॥

सोऽकव्वरसाहिः प्रभुपार्श्वात् श्रीहीरविजयसूरीन्द्रस्य सनिधानादुत्थाय पक्षिणा केलिकुतूहलकृते स्वयंरक्षिताना विविधविहगमाना विमुक्तिकृते स्वयमेव विमोचनार्थं धनविजयनामानं सूरिसचिवं सार्धं स्वेन सममादाय सूरीणा विम्वार्थं गृहीत्वा डावरनाम्नि सरसि तटाके गतवान् जगाम ॥

पक्षिणस्तत्क्षणात्क्षोणिचक्रेन्दुना पञ्जरेभ्यो विमुक्ताः समस्ता अपि ।
प्राप्तवन्तः स्वनीडद्रुमान्धन्विना कार्मुकेभ्यः शरव्यं पृषत्का इव २०९

क्षोणिचक्रेन्दुना मेदिनीमण्डलचन्द्रेण पञ्जरेभ्यः पक्षिरक्षणकाष्ठमयादिस्थानकेभ्यः तत्क्षणात्सरोगमनानन्तरकालं निशीथिन्या वा विमुक्ता मोक्ष प्रापिताः सन्त. मुकुलीकृताः सन्तः समस्ताः सर्वेऽपि पक्षिणो नैकजातिशकुन्ता. स्वनीडद्रुमान् निजालयकुलायस्थानद्रुमान् प्राप्तवन्तः समाश्रितान् केषाचित्स्थानतरव परेषा तु भाविनः भाविनि भूतोपचारस्तु वर्तते एव। के इव। पृषत्का इव। यथा धन्विना धनुर्धरेण कार्मुकेभ्यः कोदण्डेभ्यः पृषत्काः शराः क्षिप्ताः सन्तः शरव्य लक्ष्य वेध्य प्राप्नुवन्ति ॥

तेऽपि पत्नीपरीरम्भिणो भाषितैर्बिभ्रतः संमदं सूरिमित्यूचिरे ।
त्वद्गिरास्माभिरापे यथा निर्वृतिस्त्वं लभस्वाशिषा नस्तथा निर्वृतिम् २१०

पत्न्या स्वजाया पक्षिण्या परीरम्भन्ते आलिङ्गन्ति इत्येवशीलास्ते पक्षिणोऽपि समदबन्धनागमनात्परमानन्द बिभ्रतो हृदि धारयन्तः सन्त भाषित. स्वस्वभाषाभिः सूरिं हीरविजययतीन्द्रमित्यमुना प्रकारेण ऊचिरे प्रोक्तवन्तः। इति किम्। हे प्रभो, यथा

[illegible] ॥ २२८ ॥

[illegible]

[illegible] ॥ २२९ ॥

[illegible] विभुवनस्य [illegible] प्राणानां [illegible] प्रबलतमभयस्य [illegible] न पातयति [illegible]

विभुवनस्य [illegible]

न पुनरमारि· प्रवर्तिता, अत [illegible] सकलजन्तूनां [illegible] । [illegible] प्राप्ता इति च[illegible]न्दार्थं । तत्र च [illegible] तस्मिन्नेतामारि[illegible] अ[illegible] अकब्बरभूतले जगति [illegible] अट्व्यामरण्ये । उपलक्षणाद्[illegible] । [illegible] आकाशे, [illegible] सलिले चरन्ति [illegible] वनचारिणो मृगाद्य [illegible] । यदुक्तं पाण्डवचरिते—'[illegible] ॥' इति । [illegible] 'श्रीमेऽस्मिन्काल· [illegible]ऽपि' इत्युक्तम्, [illegible] इति । वियच्चारिणो मयूरादय पक्षिण, [illegible] जलचारिणो [illegible] पत्नी येषाम् । 'जायाया निङ्' । [illegible] 'लोपो व्योर्वलि' इति सूत्रेण यकारस्य लोप । [illegible] ता· दृशा ये जन्मिनो जीवा [illegible] तथा मिथ परस्पर स्त्रीभि सार्धं सकथा वार्ता । '[illegible]' इति भक्तामरस्तवे । 'स· कथा वार्ता' इति [illegible] । [illegible] उत्प्रेक्ष्यते—विरह स्त्रीभर्त्रो· रितरेतर वियोग स एव दावो दावानल तत्र वारिमुचा मेघाना मालिका घोरणय: कादम्बिन्य इव ॥

अथ प्रथम वनचारिणा वार्ता—

काप्याचख्यौ प्रियमिति करिणी किं मत्तो मद्यप इव रमसे ।

नो जानीषे मृगयुमिव नृप हन्तार तद्व्रज गज गहनम् ॥ २१४ ॥

कापि अनिर्दिष्टनामा करिणी हस्तिनी प्रिय करिणमित्यमुना प्रकारेण आचख्यौ व· दति स्म । किमाचख्यौ तदेवाह—हे प्रिय हस्तिन्, मद्यपो मदिरापायीव मत्तोऽति· क्षीव· सन् रमसे मया सह क्रीडसि यद्यस्मात्कारणात् त्व मृगयुमिव प्रबलाखेटककारि· णममु नृपमकब्बरसाहि ते तव हन्तार घातक नो जानीषे नो वेत्सि काक्वा । तत्त· स्मात्कारणात् हे गज 'जीवन्नरो भद्रशतानि पश्येत्' इति वचनात् गहन गिरिगह्वर प्रति व्रज मारणभयात्प्रणश्य याहि ॥

सोऽप्य[illegible]करिणि मा बिभीहि न: सूरिशासनवशान्न हन्ति स ।

वि[illegible] रणेषु मद्गोत्रिणामुपकृतिस्मृतेरिव ॥ २१९ ॥

सोऽ[illegible] पक्ष व्याचष्टे [illegible] वान् । हे करिणि, भीरुत्वात् भीरुकस्व· भावत्वात् [illegible] मनसि भ[illegible] स अकब्बर· सूरिहीरविजयगुरो [illegible]सनस्य [illegible] नोऽ[illegible] न्ति व्यापादयति । उत्प्रेक्ष्यते—अ· [illegible] वा रणेषु सग्रामाङ्गणेषु मद्गोत्रिणा [illegible]रस्य । [illegible] कारस्य स्मृते सस्मरणा· ॥ २[illegible]

जीवितलाभे द्वन्द्वचारि चक्रवाकि, कृपावान् श्रीहीरसूरीन्द्रधर्मोपदेशश्रवणात् कृपाकलितचेतोभूतः स नृपोऽकब्बरसाहिः मा नैव हन्ति निशुम्भति । अहमेव जाने वेद्मि । उत्प्रेक्ष्यते—इत्यर्थे जाने । निजयौवतस्य स्वतरुणरमणीगणस्य रतस्य संभोगस्यानन्दनवसमयत्वादुत्सव इवोत्सवः तत्रोच्छ्वासितं उच्चैः कृतो हृदयादुत्तार्यान्यत्र क्षिप्तो वा कञ्चुको निचोलो येभ्यस्तादृशेषु कुचेषु पीनप्रोत्तुङ्गपयोधरेषु सञ्चारिता सक्रामिता चित्तवृत्तिरन्तःकरणव्यापारो वर्तनं वा येन तादृश इव । विगलन्निचोलचारुलोचनोच्चकुचकलशस्मरणात्तत्तुल्यत्वेनास्मानाय निहन्तीत्यर्थः । जाने ज्ञानार्थे इवार्थे वा ॥ इति चक्रवाकनिधुनालापः ॥

प्रियाश्चकोरानपि खञ्जरीटान्वदन्त्यदस्तिष्ठथ किं सुखेन ।
पुरा हि वध्नाति वधूविलोचनश्रियोऽधमर्णान्भवतो यतो नृपः ॥ २३३ ॥

प्रियास्तेषामङ्गना चकोर्यः तथा चकोरान् ज्योत्स्नाप्रियान् खञ्जरीटान् खञ्जनान् प्रति प्रियास्तेषामङ्गना चकोर्यः तथा खञ्जरीटचटुललोचना. अद एतद्वदन्ति निर्दिशन्ति कथयन्ति । तदेवाह—हे प्रियाः, सुखेन शर्मणा निश्चिन्ततया वा किं कथं प्रश्ने तिष्ठथ वसथ वा स्थिता वा । यतः कारणाद्धूना निजयुवतीनां विलोचनानां चारुचञ्चलविचित्रनेत्राणां श्रियो लक्ष्म्या अधमर्णान् ग्राहकान् भवतो युष्मान् नीतिनिपुणो नृपोऽसौ पुरा वध्नाति वन्त्स्यति वन्धं प्रापयिष्यति गृहीतं पश्चाददददानोऽधमर्णः समर्थेन उत्तमर्णेनावश्यं निगृह्यते इति लोकव्यवहारः ॥

इत्थममी प्रति दयिताः प्रोचुर्मा स्म भयं मनसापि जिहीध्वम् ।
येन सपक्षतयेव न पश्येत्सूरिगिराभिमुखं नृपतिर्नः ॥ २३४ ॥

अमी चकोरखञ्जरीटा पतत्रिणः दयिताः स्वस्वप्रिया प्रति इत्थममुना प्रकारेण प्रोचुर्व्याचक्षते स्म । इत्थं कथम् । हे कान्ताः, यूयं मनसापि स्वचित्तेनांशमात्रमपि भयं साध्वसं मा स्म जिहीध्वं मा गच्छत । येन कारणेन सूरिगिरा गुरोर्दयोपदेशप्रदानश्रवणेन नृपतिर्नोऽस्माकमभिमुखं कुदृष्ट्या घातवार्ता तु दूरे तिष्ठतु विरुद्धदृशापि समुखं पश्येन्नावलोकयेत् । उत्प्रेक्ष्यते—सपक्षतयेव सह पक्षेण परिवारेण वर्तन्ते ये ते सपक्षास्तथा । 'जे परिवारइ अग्गला ते गञ्जणा न जाइ' इति वचनात् । पक्षैः पक्षकाकारिभिर्मित्रादिभिर्वा वर्तन्ते ये अथवा समानः पक्षो गोत्रं येषां ते सगोत्राः । 'पक्षो गोत्रे परीवारे पक्षतौ च' इत्यनेकार्थः । तेषां भावः सपक्षता तया पक्षयुक्तत्वेन एकगोत्रत्वेन वा । बहुपक्षो हन्तुमशक्यः एकपक्षश्च हन्तुमयुक्तः ॥ इति चकोरखञ्जनमिथुनालापाः । इति खचराः ॥

न्यगददनिमिषीनं मीनमेतत्किमु रमसे रमणीसखः सुखेन ।
अनय नयपयोधिपारदृश्वा किमु कुलवैरितया हनिष्यति त्वाम् ॥२३५

वादाली किमालपत् तदेवाह—

वादाल कुद्दालवदानने किं दंष्ट्राः स्फुटीकृत्य सुखेन शेषे ।
गम्भीरताभिश्चुलुकीकृताब्धेस्त्वद्भानुसूनुर्यदुपैति भूप. ॥ २२८ ॥

हे वल्लभ वादाल सहस्रदंष्ट्र, आनने समुखे कुद्दालवद्भूखननोपकरणविशेषानिव । 'कोदालाः' इति लोके प्रसिद्धाः । दंष्ट्रा दाढाः स्फुटीकृत्य विकास्य सुखेन जलशयेन किं कथं शेषे निद्रायमाणो वर्तसे । यत्कारणात् त्वद्भानुसूनुः तव भवतो भानोरादित्यस्य सूनुर्नन्दनो धर्मराजो वर्तते त्वद्वधक अकब्बर उपैति समागच्छति । [illegible] अत्र समुद्रमध्ये, तन्मां कथं मारयिष्यति । अत एव सा [illegible] । [illegible] गम्भीरताभि खगाम्भीर्यैः चुलुकीकृत गण्डूषमात्राम्भोविहितोऽब्धिः समुद्रो येन । [illegible] द्रववत्पीतपयोनिधिस्तत्कथमात्मानं रक्षसि ॥ [illegible] ॥

स साहेति सहस्रदंष्ट्रमहिलामालिङ्ग्य लीलालसो
मा गाः साध्वसमध्वराशनपतेः पाथोधिनेमेरतः ।
श्रीमत्सूरिगिरा महाव्रतिवपुःपाथोनिशोपारना-
प्रोद्भूतप्रणयादिव प्रियतमे नास्मान्हिनस्ति प्रभुः ॥ २२९ ॥

लीलया विलासेन नर्मणा वा मन्थरोऽपरकर्मण्यलस [illegible] वादालीमालिङ्ग्य स्वहृदयेन दयिताहृदयं गाढमालिङ्ग्य स वादालः [illegible] हे प्राणितप्रियतमे भीरु, अतोऽस्मादकब्बरात् पाथोधिनेमेर्जलधि [illegible] अध्वराशनपतेर्यज्ञभोजनप्रभोरिन्द्रस्य अध्वरा [illegible] पति स्वामी तस्माद्भूमीन्द्रात् साध्वसं भयं मा गा मा भज । [illegible] वाक्यात् स प्रभुः साहिरस्मान् हिनस्ति [illegible] । [illegible] मेरुवद्दुर्लभशब्दानि यस्य [illegible] महाव्रतिनो वपुः शरीरं [illegible] पानीयं [illegible] प्रोद्भूतः प्रकटो जातः प्रणयः स्नेहः प्रेमातिरेक [illegible] ॥ [illegible]

न [illegible] नुपरहृत्य [illegible] प्रियतमा [illegible]
फीलादिष्विव [illegible] पासावतया [illegible] ।
तेऽप्यारण्यमिति [illegible] पवन [illegible]
[illegible] पितामह [illegible]

[illegible]

इति पृषती शंसति दयितं स्वं किमु जितकासीव विगतभीतिः ।
स्वयुवतिजङ्घाप्रतिभटभावादिव तव हन्ता यदवनिकान्तः ॥ २२४ ॥

पृषती मृगीविशेषा स्व दयित प्रेयांसमात्मीय पृषत प्रति शसति कथयति । इति किम् । हे प्रिय, त्व जितकासीव जिताहव विजयीव किमु कथ विगतभीतिर्निर्मुक्तभयो वर्तसे । यत्कारणादवनिकान्तोऽकव्वरसाहि तव भवतो हन्ता व्यापादयितास्ते । मृगयुत्वेन त्वा हनिष्यतीत्यर्थ । उत्प्रेक्ष्यते—स्वस्यात्मनो युवतीना तरुणीना स्त्रीणा जङ्घाना प्रतिभटभावाद्वैरवैरित्वादिव । जङ्घयो मृगजङ्घोपमा योगशास्त्रवृत्त्यादिष्वास्ते अतस्तदुत्प्रेक्षा । 'पृषतीमस्पृशती तदीक्षणे' इति नैषधे ॥

पृषदिति कान्ता निगदति भूभृद्रतिविभुवाचा व्यथयति नास्मान् ।
इह शत्रुंजयशैलतलहट्टिकायां पादलिप्तं पादलीताणाभिधानं पुरं श्रिया शोभया लक्ष्म्या वा स्फुरति दीप्यते। उत्प्रेक्ष्यते—विमलशैलस्य पुण्डरीकाद्रेर्यात्राकृते स्पर्शन-देवदर्शनपूजनार्थं स्वर्गतो देवलोकात्क्षितौ पृथिव्याममर्त्याद्रिमलाचलसंनिधौ सम्यक्प्रकारेण महत्या उपजग्मुषी समागता किममरावती इन्द्रनगरीव। किंभूता। सुरा देवाः। आदिशब्दाद्देव्यः इन्द्राण्यः मन्दिराणि कोटवाप्यः वनानि सरांसि पुरीपरिकरादि सर्वमपि संगृह्यते। सुरादिभिः परिवारः संजातोऽस्या इति परिवारिता परिच्छदकलिता। उताथ वा इह गिरेरुपान्ते आगतं संप्राप्तं बलेर्गेहमिव नागलोक इव। किं कृत्वा। द्विजिह्वैर्भुजंगमैः पिशुनैर्वा निचितं व्याप्तमाश्रयं स्वस्थानं विहाय त्यक्त्वा। यदुक्तम्—'शृङ्गिणं दशभिर्हस्तैः शतहस्तेन वाजिनम् (?)। गजं हस्तसहस्रेण देशत्यागेन दुर्जनम् ॥' इति ॥

भवाहितभिदोदयत्परमसातमाशंसता
पुरी निजनिवासिनामसुमतां समूहानसौ।
महोदयमहापुरं विमलशैलमूलाध्वना
निनीपुरमुना किमु स्थितवती समेत्यान्तिके ॥ ६ ॥

असौ पादलिप्ताभिधाना नगरी अन्तिके शत्रुंजयाद्रिसमीपे समेत्यागत्य स्थितवती उवास स्थितिं कृतवती। उत्प्रेक्ष्यते—निजनिवासिनां स्वस्या नितरां सातेन वसनशीलानाम्। 'निजनिषेविनाम्' इति पाठे तु निजमात्मानं नितरामतिशयेन सेवन्ते इत्येवंशीलानामसुमतां प्राणिनां समूहान् गणान् अमुना प्रत्यक्षलक्ष्येण विमलशैलरूपो यो मूलं अध्वरोऽध्वा मार्गस्तेन कृत्वा महोदयो मोक्षः अथ वा महानतिशायी उदयः मानससमीहितं सर्वसंपत्प्राप्तिर्यस्मिन् तादृशं महापुरमनन्तसुखविधायकत्वात्सर्वनगराभ्यधिकपत्तनं किमु निनीषुर्नेतुमिच्छुरिव। असुमतां किं कुर्वताम्। भवः संसारः स एवाहितं शत्रुर्न विद्यते हितं शुभोदर्को यस्मात्सोऽहितः केवलानिष्टतरायतिफलप्रदस्तस्य भिदा व्यापादनं तया कृत्वा उदयत्प्रकटीभवत्परममुत्कृष्टं सातं शर्म आशंसतां काङ्क्षताम् ॥

विजित्य निजवैभवैः सुरनरोरगस्वामिनां
स्फुरत्पुरपरम्परां जगति पादलिप्तं वरम्।
परश्शतजिनेश्वराश्रयशिखाङ्गणालिङ्गिनी-
र्द्विपद्विजयबोधिका व्यधृत वैजयन्तीरिव ॥ ७ ॥

[illegible] विद्याधरः [illegible] इव [illegible] एवंविधाः [illegible] प्रज्वालितकाष्ठपाः [illegible] नामो भान्ति [illegible] [illegible] [illegible] गर्भितोत्प्रेक्षा। काभिः कृत्वा। [illegible] [illegible] [illegible] [illegible] [illegible] ऽस्तोमा तादृशा ये [illegible] [illegible] [illegible] [illegible] [illegible] हुताशानामनुच्छिन्नर्वीनां [illegible] ॥

निर्गत्वरप्रसृमरद्युतिवारिपूर-
पूर्णान्तरस्फटिकफलितकूटकोटीम्।
जज्ञे किमु प्रतितटं तटिनी विपाशा
प्रेक्ष्येत्यनुश्रुत विमुग्धजनेन यस्मिन् ॥ ७५ ॥

यस्मिन् शत्रुंजये विमुग्धजनेनाज्ञानलोकेन इत्यमुना प्रकारेणानुश्रुत जातम्। वितर्कितमित्यर्थः। किं कृत्वा। निर्गत्वरा निःसरणशीलाः प्रसमरा द्युतयः किरणास्ता एव वारिणा नीराणां पूरा [illegible] प्रवाहास्तैः पूर्णं सपूरितमन्तरं मध्यं यस्यास्तादृशीं स्फटिकश्वेतोपलैः फलिता रचिता कूटानां शिखराणां कोटीं प्रेक्ष्य दृष्ट्वा। इति किम्। प्रतितटं शिखरं शिखरं प्रति विपाशा तटिनी अनुसर्पिणी नदी किमु जज्ञे सजाता। 'उत्सर्पिणी न खलु तत्र तरङ्गिणी या लक्ष्मयोरहह तत्र विपाशि जाता। नीराजनाय नवनीरजराजिरास्तामत्रास्मिन्सानुरजराजनि राजमाने॥' इति नैषधे। तत्र द्वीपे विपाट् नदी न प्रसरणशीला आविर्भवति किल तत्र जातत्वात् अन्यत्र द्वीपेषु यथा सरित्प्रसरन्ती दृश्यते तथा तत्र विपाट् नेति पुराणप्रसिद्धिः। 'तत्र तस्या विपाशि जाता नवपद्मपङ्क्तिः लक्ष्मयोर्नीराजनायास्ताम्। अहहेत्याश्चर्ये। अत्रास्मिन् राजनि साकल्येनानुरज अनुरक्ता भव। 'अजेश्च' इत्यनुनासिकलोपः। 'विपाशा तु विपाट् स्त्रियाम्' इत्यमरः।' इति नैषधवृत्तौ॥

गुहागृहशयानानां खगसारङ्गचक्षुषाम्।
राजीं जागरयन्तीव स्तनितैः स्तनयित्नवः ॥ ७६ ॥

यत्र पुण्डरीकपर्वते स्तनयित्नवो वारिवाहाः स्तनितैर्निजगर्जारवैः। 'जलदस्य तु। स्तनितं गर्जितं गर्जिः स्वनितं रसितानि च॥' इति हैम्याम्। मेघगर्जाभिधानानि कृत्वा। उत्प्रेक्ष्यते—गुहाः शत्रुंजयकदरा एव गृहा रमणीयत्वान्मणीगणसोद्योतत्वाच्चालयतुल्यास्तेषु शयानानां वहुदेवगृहगमनसजातपरिश्रान्तिवशात्सुखसुप्तानां खगसारङ्गचक्षुषां विद्याधरहरिणीनयनानां खे नभसि गच्छन्तीति खगाः सुरास्तेषामपि मृगेक्षणानाम्। देवीनामित्यर्थः। राजीं श्रेणीं जागरयन्तीव पुनर्देववन्दनपूजनार्थं प्रबोधयन्तीव॥

स्वभक्तभव्यजन्तूनामन्तरङ्गविरोधिनाम्।
योऽरुंतुदानां संदोहं स्पृहयन्हन्तुमात्मना ॥ ७७ ॥

तत्सहिता इत्यर्थः । तुरङ्गा अश्वास्तथा शिबिका याप्ययानानि 'पालखी' इति प्रसिद्धाः सुखानि येषु तादृशानि प्रमुखाणि प्रकृष्टानि यानानि वाहनानि भजन्ते संश्रयन्ते इति ॥

अगाधभववारिधेरभिलषद्भिरेतुं बहिः
समुद्धरणधुर्यता प्रदधदन्तरीप किमु ।
व्रजद्भिरिह यात्रिकैः प्रति सहस्रपत्राचलं
तदा विदधिरेऽखिला अपि निजावशेषा दिशः ॥ १० ॥

तदा हीरविजयसूरियात्रासमये इह जगति सहस्रपत्राचलं शत्रुंजयशैलोच्चयं प्रति व्रजद्भिः प्रतिष्ठमानैर्यात्रिकैर्यात्राकारकैर्लोकैरखिलाः समस्ता अपि दिशः हरितः निजआत्मा एव अवशेषोऽवशिष्टो यासां तादृश्यो विदधिरे विहिताः । दिशः केवलं स्वयमेव स्थिताः, जनास्तु सर्वेऽपि प्रस्थिता इत्यर्थः । यात्रिकैः किं कुर्वद्भिः । अगाधोऽलब्धमध्यपूर्वपरपारो यो भवः संसारः स एव वारिधिः समुद्रस्तस्माद्बहिः पारे मोक्षलक्षणे वाह्यप्रदेशे एतुमागन्तुमभिलषद्भिर्वाञ्छद्भिः । अत एवोत्प्रेक्ष्यते—समुद्धरणे भवसमुद्रमध्ये मज्जतां जन्तूनां सम्यगुद्धारकरणे धुर्यतां प्रकृष्टधोरेयतां प्रदधत् प्रकर्षेण धारयत् । अत एवान्तरीपं किमु अन्तर्जले तटमिव ॥

महोदयविधायिना विमलभूभृताहूतव-
त्स कोऽप्यजनि नो जनोऽगमि न येन यात्राकृते ।
न काचिदचलाभवत्पथि च या न तद्यात्रिकै-
रनीयत पवित्रतां त्रिपथगाप्रवाहैरिव ॥ ११ ॥

स कोऽपि तत्तदुत्तमजातिजनितः कश्चिदनिर्दिष्टनामा जनो लोको नाजनि नो सजातः । स कः । येन जनेन यात्राकृते शत्रुंजययात्रार्थे नागमि नागतम् । किंवत् । विमलभूभृता शत्रुंजयशैलेनाहूतवदाकारितेनेव । 'निहोत्रो' इति लोकप्रसिद्ध्या । यथा कश्चित्सन्मानपूर्वकमाकारित आगच्छति । किंभूतेन विमलाद्रिणा । महोदयो मोक्षः महान् त्रिभुवनजनतानिषेव्यलक्षणोऽभ्युदयस्तं विदधाति करोतीत्येवंशीलेन च पुनः सा काचिदचला पृथिवी नाभवन्न बभूव । याचला पथि मार्गे तद्यात्रिकैः शत्रुंजययात्राकारकैः पवित्रतां पावनीभावं नानीयत न प्रापिता । कैरिव । त्रिपथगाप्रवाहैरिव । यथा गङ्गाया ओघैः सहस्रसंख्याभिर्वेणिभिः पयःपूरैः पवित्रतां नीयते प्राप्यते ॥

शिवश्रिय इवावनीवलयशालिलीलाचलं
जनैः प्रचलितैः समं परिजनेन शत्रुंजयम् ।
स्ववर्तिविविधासुमत्प्रकरकीलनाविश्रमा-
द्दधुः सुखमिहाखिला अपि दिशः प्रदेशास्तदा ॥ १२ ॥

मलयो दक्षिणाचलः गोशीर्षचन्दनोत्पत्तिस्थानं मलयगिरिनामा कुसुमागमसमीरैर्मम-यप्रमाणं लीलया स्वरसेन स्थानं शिखरेण वा विलासं विभ्रमं कलयति बिभर्ति । अपि पुनर्विन्ध्यशैलो जलवालकाचलः मत्तानां मदोद्धतानां मतङ्गजेन्द्राणां गजेन्द्राणां धत्ते धारयति । विन्ध्याद्रौ हि भद्रमन्द्रमृगमिश्रजातयो गजा उत्पद्यन्ते तद्विमानं । पुनस्तुहिनवरगिरिः हिमाचलस्तावताभिरामः कस्तूरिकामृगगोरोचनाप्रमुखसमग्रवस्तुभिर्मनोज्ञः । तथा मेरुः सुवर्णपर्वतः तावन्मात्रं महिमानं गरिमाणं वहति । पुनर्दरगिरिः कैलासस्तावन्तं कालमाभां शोभां गाहते आलम्बते यावत् यावता समयेन स त्रिभुवनप्रसिद्धः पर्वतेन्द्रः शत्रुञ्जयशैलाखण्डलः नयनपुटैः नेत्रपत्रामत्रैर्न पीयते सादरं स्वदृशा नावलोक्यते । किंभूतः । तीर्थानां पुण्यस्थानानां मोक्षगमनक्षेत्राणां वा अधिराजश्चक्रवर्ती तीर्थाधिराजः पर्वतेन्द्रः । 'प्रिय' पदम्' इति शत्रुञ्जयमाहात्म्योक्ताभिधानत्वात् ॥

विविधकमलाकेलीगेहं क्षमाक्षणदापते-
र्गृहमिव महीकान्तारत्नावतंसमिवोन्नतम् ।
सफलमखिलं कर्तुं काङ्क्षञ्जनुर्गिरियात्रया
व्रतिवसुमतीशक्रः शत्रुंजयं स्वदृशा पपौ ॥ ८१ ॥

व्रतिनां संयमिनां मध्ये वसुमतीशक्रो राजा । 'राजा राट् पृथिवीशक्रः' इति हैम्याम् । हीरविजयसूरीश्वरः शत्रुंजयं विमलाचलं स्वदृशा निजनयनेन पपौ सादरमवलोकयति स्म । प्राक् सर्गस्य तृतीये 'सिद्धिशैलं ददर्श' इत्युक्तमास्ते तत्र तु दूरत्वेन दृश्मात्रावलोकनम् । इदानीं तु शनैः शनैः संनिधानागमनेन सम्यगवेक्षणत्वेन शिखरादिस्थानविशेषविभूषितं पुण्डरीकपर्वतं स्वलोचनाभ्यां सादरं दृष्टवानिति विशेषः । किं कर्तुमिच्छन् । शत्रुंजयशैलारोहणप्रासादप्रतिमादर्शनसर्वतः स्पर्शनादिभिरखिलमशेषमपि जनुर्जन्म स्वावतारं सफलं फलेग्रहिं कृतार्थं फलकलितं कर्तुं विधातुं काङ्क्षन् वाञ्छन् । किंभूतं शत्रुंजयम् । विविधानां कमलानां केलीगेहं क्रीडासदनम् । 'केलीभिरुद्वर कृशोदरि' इति नैषधे । किमिव । गृहमिव । यथा क्षमाक्षणदापतेर्वसुधासुधाकरस्य आसमुद्रान्तभूमीभर्तुर्भवनं भाण्डागारगेहमन्यद्वा सौधं विविधश्रीणां स्थानं भवेत् । शत्रुंजयमुत्प्रेक्षते— महीकान्ताया भूमीभामिन्या रत्नावतंसं मणिमयशेखरमिव । किंभूतम् । उन्नतं तुङ्गम् ॥

यं प्रासूत शिवाह्वसाधुमघवा सौभाग्यदेवी पुनः
श्रीमत्कोविदसिंहसीहविमलान्तेवासिनामग्रिमम् ।
तद्ब्राह्मीक्रमसेविदेवविमलेनानन्दतो निर्मिते
वृत्ते पञ्चदशोऽत्र हीरचरिते सर्गो बभूवानसौ ॥ ८२ ॥

आनन्दतः सकलतीर्थाधिराजस्मरणवर्णनोद्भूतनूतनप्रमोदाद्देवविमलेन निर्मिते विर-

अग्रतः पुरस्तादागमेन आगमनेन कृत्वा प्रथमतः पूर्वमेव स्वयमात्मना शिवश्रियं मुक्तिलक्ष्मीं गृहीतुमनस आदातुकामा इव । के इव । धनार्थिन इव । परेषु अन्येषु द्रव्याभिलाषिषु विगतो मलः किट्टो रत्नोत्पत्त्या यस्मात्तादृशमचलम् । रोहणाद्रिमित्यर्थः । परदेशं वा प्रति प्रजन्तु अत्यौत्सुक्यादतिशायितृष्णाभाजो धनार्थिनः बहुलाभाभिलाषिण अतिधनलुब्धाः नि प्रत्यूहनाजन्मसुखकारकत्वेन शिवश्रियं कल्याणकृद्व्रतादिमसपद गृहीतुकामा अग्रे गच्छन्ति ॥

पुरःप्रचलितैर्जनैर्घननिरुद्धवर्त्मान्तरः
पुनः प्रणुदितस्तमां द्रुतमुपेत्य पश्चात्तनैः ।
अमन्यत तदा हृदा क्वचन यात्रिकैः स्वं भ्रम-
द्धरट्टघटितं क्षणं कणमिवातिसंघट्टितः ॥ १९ ॥

तदा सघप्रस्थानसमये क्वचन कुत्रचित्स्थानके कश्चिद्यात्रिकजनो भ्रमति भ्रमणीं कुर्वाणे घरट्टके कणचूर्णीकरणोपयुक्तपाषाणयुगलरूपे घटित योजित तदन्तर्निक्षिप्त कण धान्यमिव क्षण निमेषमात्र हृदा स्वमनसा स्वमात्मानममन्यत जानाति स्म । किंभूतो यात्रिकः । अत्यधिक संघट्टितः बहुजनसमर्देन पश्चादागच्छद्भिः पुरश्चलद्भिश्च जनैरतिसकीर्णतया निष्पीडित । अत एव पुनः किंभूतः । पुरोऽग्रे प्रचलितैः क्रमाक्रमाभ्या प्रस्थितैर्जनैर्लोकैर्घनं बहु निबिड वा नीरन्ध्रमन्तरालरहित वा निरुद्धमतिसकीर्णतया कथमप्यग्रे गन्तुमशक्यीकृत पुरस्तात्प्रचलल्लोकमध्ये प्रवेष्टुमशक्य कृत वर्त्मनो मार्गस्य अन्तर मध्य यस्य वर्त्मान्तरः अपरमार्गो वा यस्य सः । पुनः किंभूतः । पश्चात्तनैः पृष्ठे समागतैर्जनैर्द्रुतं शीघ्रमुपेत्यागत्य तमामतिशयेन प्रणुदितः अग्रे गमनाय प्रेरितः वाक्शरीरादिभिस्त्वरितीकृतः ॥

चतुर्जलधिमेखलावनिनिकेतलोकैस्ततः
समीपमवनीभृतः सममलम्भि शोभा पराम् ।
पुरंदरगिरेरिवाखिलचतुर्निकायामरै-
र्जिनेन्द्रजननाभिषिञ्चनमहोत्सवप्रक्रमे ॥ २० ॥

ततः स्वस्वादिग्भ्यः प्रस्थितेरनन्तर चत्वारः पूर्वापरदक्षिणोत्तरलक्षणाश्चतु सख्याका जलधयः समुद्रा एव मेखला काञ्ची यस्यास्तादृश्यामवनौ निकेत गृह येषा तादृशैर्लोकैर्यात्रिकजनैः समनेककालमवनीभृत अर्थाधिकारायात्रासमत्वाच्च श्रीशत्रुंजयगिरे समीप तलहट्टिकारूपपार्श्वे परां प्रकृष्टां शोभामलम्भि प्रापितम् । कैरिव । अखिलचतुर्निकायामरैरिव । यथा जिनेन्द्रस्य तीर्थंकरस्य जननस्य जन्मनोऽभिषिञ्चनस्याभिषेकस्य । जन्माभिषेकस्येत्यर्थः । प्रक्रमे प्रस्तावे । 'वेलावारावसरः प्रस्तावः प्रक्रमोऽन्तरम्' इति हैम्याम् । अखिलैः समस्तैश्चत्वारो निकाया उत्पत्तिगतिसाधर्म्येण सादृश्य येषा ते ।

पुनःकीदृशानन्दपुरं तादृशं पुरम् । आनन्दपुरमित्यर्थः । नगनागेति । किं कुर्वन् । अतिदूरभावमतिशयेनात्यन्तं निकृष्टतां नयन् सुरान् ॥

नभोगमनभेषजव्रजविधेरनुग्राहिणा

गुरोरभिधया पुरं गृहमिव त्रिलोकीश्रियाम् ।

सुवर्णरससिद्धिमान्विविधसिद्धविद्यान्वितः

स वासयति संनिधौ नगवरस्य नागार्जुनः ॥ ३ ॥

नागार्जुनो नाम योगीन्द्रः पादलिप्तसूरेरभिधया नाम्ना नगेषु सर्वपर्वतेषु वरः सिद्धिदायकत्वात्प्रधानः शत्रुंजयशैलेन्द्रस्य संनिधौ समीपे पुरं पादलिप्तनगरं वासयति स्म निवेशितवान् । उत्प्रेक्ष्यते—त्रिलोकीश्रियां त्रैलोक्यसंबन्धिलक्ष्मीणां गृहं निवाससौधमिव । गुरोः किंभूतस्य । नभसि आकाशे गम्यते पादलेपप्रभावाद्भ्रम्यते अनेनेति नभोगमनं भेषजानां सप्रभावाणां औषधानां व्रजः अष्टोत्तरशतसंख्यः समूहास्तस्य विधेः प्रकारस्यानुगृह्णाति स्वभक्तीभवनात्प्रसादं करोतीत्येवंशीलस्य । किंभूतो नागार्जुनः । सुवर्णस्य सार्धषोडशवर्णिकाभाजो हेम्नः कोटीवेधीति नाम्नो रसस्य जलरूपस्य सर्वधातुभेत्तुः सिद्धिर्निष्पादनं विद्यते अस्येति सुवर्णरससिद्धिमान् । नवीनं सुवर्णरसं स्वयं निष्पादयतीत्यर्थः । पुनः किंविशिष्टः । विविधा नानाप्रकाराः सिद्धाः परिपाकं प्राप्ताः कार्यकारिणः । अथ वा प्रत्यक्षीभूततदधिष्ठायकदेवतास्तादृश्यो विद्या आम्नायमन्त्रास्ताभिरन्वितः । नागार्जुनयोगी श्रावकीभूय श्रीपादलिप्तसूरीशितुः सकाशात् गगनगमनदायकभेषजाम्नायमग्रहीदिति श्रूयते ॥

यदीयविभवैर्जगत्त्रयपुरीपराभावुकैः

पुरी त्रिदिवसद्मना परिभवं भराल्लम्भिता ।

उपास्तिमतनोन्निजाश्रयजुषस्त्रिलोकीसृजः

सरोजवसतेरिवाकलयितुं स्वयं तत्तुलाम् ॥ ४ ॥

त्रिदिवसद्मनां देवानां पुरी नगरी अमरावती नाम्नी निजमात्मैवाश्रयः स्थानं जुषते भजते स्वस्याश्रये स्थानं सेवते वा तादृशस्य सरोजवसतेः । 'ताम्यंस्तामरसान्तरालवसतिर्देवः स्वयंभूरभूत्' इति खण्डप्रशस्तौ । तथा 'नाभिपद्मात्मभूतिः' इति हैम्याम् । ब्रह्मणः । उत्प्रेक्ष्यते—उपास्तिं सेवामतनोच्चकारेव । किंभूतस्य सरोजवसतेः । त्रिलोकीसृजः जगतां त्रयीं सृजति करोतीति । किं कर्तुम् । स्वयमात्मना तस्य पादलिप्तपुरस्य तुलां साम्यमाकलयितुं प्राप्तुम् । किंभूता अमरावती । जगतां पातालभूमिस्वर्गाणां त्रयस्य । त्रिभुवनस्येत्यर्थः । पुरीणां समग्रसुरासुरनरनगरीणां पराभावुकैरभिभवनशीलैर्यदीयैः पादलिप्तपुरसंबन्धिभिर्विभवैः शोभातिशयैर्भरादाधिक्यात्परिभवमभिभूतिं लम्भिता प्रापिता ॥

समग्रसुखसंपदभ्युदयसिद्धगोत्रान्तिके
व्यभूषि ललिताभिधं सर उपेत्य संघैः समम् ॥ १९ ॥

गंपर्यान्तिकपान्थपार्थ. उपेत्य समीपे आगत्य ललित [illegible] नाम यस्य तादृशं सरः । ललितसरोवरमित्यर्थः । सम [illegible] व्यभूषि अलङ्कृतम् । [illegible]—जडी-करणस्य । 'जडो मूर्खे हिमाघाते मूकेऽपि च' इत्यनेकार्थे । [illegible] वा हिमोपघातीकरणस्य वा यो बहुना तुहिननाम्नो [illegible] प्राणं [illegible] यदायः स्यात्तथा मूर्खमूकीकरणादपि [illegible] हिमाकरस्तुहिना [illegible] त्रयणस्य अपत्यस्य । [illegible] । इहामित्र [illegible] शर्मणो सम्पदा विभूतीनां वा अभ्युदय आविर्भावो [illegible] पर्वतस्य शत्रुंजयशैलस्य मन्त्रतन्त्रनिर्यापणीरसादिभिः सिद्धानां पुरुषाणां [illegible] अन्तिके यत्र गोत्रे सर्वेऽपि सिद्धतरालोपो [illegible] इव । [illegible] । [illegible] पुनर्गात्रपर्णा [illegible] दृशानां छितच्छदानां [illegible] । हिमाचल [illegible] यदुक्तं चम्पूकथायाम्—'[illegible] हिमाचल ॥' इति । तत्र आगमनं गुरुणैव ॥

गजा इव जनाग्रतः सलिलकेलिमातन्वते
पिबन्ति च पिपासिताः सलिलमत्र पान्था [illegible] ।
विजृम्भिजलजावलिः कुसुममालिका मालिका
इवावनिरुह पुनः [illegible] ॥ २० ॥

तरन्ति च सितच्छदा इव परे [illegible]
विशन्ति रसिका पुनस्तामसगणा इवान्तः [illegible] ।
तपर्तुरविताषिता इव [illegible] परे
चिरेण [illegible] ॥ २१ ॥

[illegible]

पादलिप्तं पुरं नाम नगरं द्विपता श्रिया कृत्वा सप्रतिमल्लाना विजयस्य पराभवस्य बोधिका कथयित्रीम्। 'निजत्रिनेत्रावतरलबोधिकाम्' इति नगर्ये। उत्प्रेक्ष्यते—वैजयन्तीर्महापताका व्यक्तं धारयति स्मेव। किंभूता वैजयन्तीः। परङ्गता. शतसहस्रसंख्याकाः ये जिनेश्वराणां तीर्थंकराणामाश्रया गेहाः। प्रासादा इत्यर्थ.। तेषां शिखराङ्गणानि श्रृङ्गाजिराणि आलिङ्गन्त्याश्लिष्यन्तीत्येवंशीला.। किं कृत्वा व्यक्तं। जगति त्रैलोक्येऽपि सुरा देवाः नरा मानवा उरगा असुरनागास्तेषां स्वामिनां नायकानां सुरेन्द्रनरेन्द्रनागेन्द्राणां स्फुरता लक्ष्म्या दीप्यमानानां पुराणां नगराणां परम्पराः श्रेणीः निजवैभवैः स्वकीयसमृद्धिशोभातिशयैर्विजित्य परिभूय॥

नृशंसनिकषात्मजव्रजनिवासतो बिभ्यती
पयःप्रकटसंकटाज्जलधिजाच्च निर्वेदभाक्।
अपास्य पदमात्मनः किमियमत्र लङ्कागता
पुरी पुरजनोत्सवैरलमकारि सूरीन्दुना॥ ८॥

सूरीन्दुना हीरविजयसूरिचन्द्रेण पुरजनानां नगरलोकानामुत्सवैर्महामहैर्जायमानैः सद्भिः पुरी पादलिप्तनाम्नी नगरी अलमकारि भूष्यते स्म। उत्प्रेक्ष्यते—अत्र शत्रुंजयसमीपे तलहट्टिकाप्रदेशे आगता समागता लङ्का दशकंधरनगरीव। किं कृत्वा। आत्मनः स्वस्याः पदं जलधिमध्यगतं स्थानमपास्य त्यक्त्वा। किंभूता। नृशंसानां निर्दयानां निकषात्मजानां राक्षसानाम्। 'कीनाशरक्षोनिकषात्मजाश्च' इति हैम्याम्। व्रजानां कुलकलापानां निवासतोऽनिशं स्वस्या निवसनं ततो बिभ्यती भीतिं प्राप्नुवती। च पुनः किंभूता। निर्वेदभाक् खेदोपगता। कस्मात्। जलधिजात्समुद्रोत्पन्नात्। परिखास्थाने परितः पयोधिमध्ये लङ्का तादृग्जलमध्यस्थितिलक्षणात्पयसा पानीयानां प्रकटादुल्बणात्संकटात्क्लेशात्। 'स्थानं त्रिकूटः परिखा समुद्रो रक्षांसि योधा धनदाच्च वित्तम्। संजीविनी यस्य मुखे च विद्या स रावणो दैववशाद्विनष्टः॥' इत्युक्तेः॥ इति पादलिप्तपुरम्॥

अशेषविषयान्तराद्व्यतिकरेऽत्र संघाधिपाः
समं मनुजराजिभिर्जयिमहीमहेन्द्रा इव।
भगीरथगिरीश्वरं प्रति शताङ्गमातङ्गयु-
क्तुरङ्गशिबिकासुखप्रमुखयानभाजोऽव्रजन्॥ ९॥

अत्र व्यतिकरे पादलिप्तपुरे सूरिसमागमनप्रस्तावे अशेषविषयान्तरात्समस्तजनपदमध्यात्संघाधिपाः संघपतयः मनुजानां मनुष्याणां राजिभिः श्रेणिभिः समं भगीरथगिरीश्वरं विमलाचलेन्द्रं प्रति अव्रजन् प्रतिष्ठन्ते स्म। 'बाहुबलिर्मेरुर्देवो भगीरथः सहस्रपत्रशतपत्रः' इति शत्रुंजयकल्पे। के इव। जयिनो विजयकरणशीला महीमहेन्द्रा महामण्डलीकमहीपाला इव। तेऽपि मानवमण्डलीभिः प्रतिष्ठन्ते। अर्थात् दिग्विजयाय। किंभूताः संघाधिपाः नृपाश्च। शताङ्गा रथा मातङ्गा हस्तिनः तैर्युञ्जन्ति युक्ता भवन्ति।

विनिर्मितिभिर्विधानैः कृत्वा निखिलां समस्तां चतुर्यामवर्ती निशां रात्रीं निनायातिचक्राम । यथा स्वधर्मानुष्ठानैस्तथा । पुनः काभिः । लसन्तीभिश्चैनोद्दरानिर्गतिभिर्गानैः । कासाम् । उत्पलदृशां कुवलयलोचनानां तरुणीनाम् । उत्प्रेक्ष्यते—हरेरिन्द्रस्य मृगदृशामिन्द्राणीनामिव । पुनः कैः । मुदितैर्यथेप्सितदानाधिगमादानन्दमेदुरैर्नाट्यकृद्भिर्नर्तकैर्वर्तितैर्निर्मितैस्ताण्डवानां नाटकानामाडम्बरैः ॥ इति शत्रुंजयान्तिकग्रामप्रासादे वासकावस्थानम् ॥

गते तमसि तद्गिरेरिव निरीक्षणात्तत्क्षणा-
स्खगैर्गुरुजयारवे किमु कृतेऽथ साराविणे ।
समीयुषि खरत्विषि द्विषि निशां नभोमण्डले
विधित्सति सहामुना विमलशैलयात्रामिव ॥ २८ ॥

सुधाशनपथातिथिं शिवनिकेतनिःश्रेणिका-
मिव व्रतिशतक्रतुर्विमलशैलपद्या ततः ।
सबालवरवर्णिनीनिवहनैकतौर्यत्रिका-
नुयातजनसंयुतः समधिरोढुमारब्धवान् ॥ २९ ॥

स व्रतिशतक्रतुहीरविजयसूरीन्द्र विमलशैलस्य शत्रुंजयाद्रेः पद्यां [illegible] 'पाज' इति समधिरोढुमारब्धवान् प्रारेभे । किंभूतः स । [illegible] रिकाश्च तैस्तासिश्च । 'सरूपाणामेकशेषे' । वर्तन्ते [illegible] तीर्थयात्रादिधर्मकारकत्वात् प्राधान्यम् । अथवा उत्तमा [illegible] 'वरवर्णिनी' इत्यमरः । तासां निवहाः प्रकराः । [illegible] तौर्यत्रिकाणि गीतनृत्यवाद्यानां त्रिकाणि तदनुयाता [illegible] संयुतः परिकलितः । किंभूतां विमलशैलपद्याम् । [illegible] गगनं तस्यातिथिं प्राघुणिकीम् । [illegible] णिकामिव मोक्षप्रासादे अधिरोहणार्थमधिरोहिणीमिव 'निःश्रेणी' [illegible] दाम् । [illegible] सति । [illegible] लोकाणि गते सति । उत्प्रेक्ष्यते—तद्गिरेः [illegible] तस्य निरीक्षणाद्दर्शनादिव पापे नष्टे । [illegible] पश्चात्समीगमनानन्तरं [illegible] [illegible]

तदा तस्मिन् संघप्रस्थानावसरे इह जगति अखिलाः समस्ता अपि दिशां हरितां प्रदेशाः भूमिभागाः सुखं शर्मातिशयं दधुर्धृतवन्तः । कुत. । स्वस्मिन्नात्मनि विषये वर्तन्ते तिष्ठन्तीत्येवशीलास्तथाविधा अनेकजातीया ये असुमन्त. प्राणिन. जनाः खखजनगजवाजिकरभमहिषवृषभप्रमुखास्तेषां प्रकराः समुदायास्तैः कृत्वा कीलनात्ताडना पीडाः ताभ्यो विश्रमः क्षणमात्रं स्वस्थीभवन ताडनाद्विरमण तस्मात्सकाशात्कैर्विश्रमः शत्रुंजयाचल प्रति परिजनेन स्वस्वसमस्तपरिवारेण समं प्रचलितैः प्रस्थितैर्जनै र्धार्मिकलोकैः । उत्प्रेक्षते—शत्रुंजयम् । शिवश्रियो मोक्षलक्ष्म्या अवनीवलये भूमीमण्डले शालते शोभते इत्येवशीलं लीलाचल क्रीडाकरणार्थं पर्वतमिव ॥

महेन्द्रमिहिराङ्गजाम्बुनिधिधामपौलस्त्यदि-
क्पथेषु पृथु पप्रथे प्रथितजन्तुसार्थैस्तथा ।
तिलैर्न जगतीतलं क्वचिदलम्भि कीर्णैर्यथा-
वसानमिव मानसैर्जनमनोरथस्फूर्जितैः ॥ १३ ॥

प्रथितैः सकर्तव्यैः सद्गुणैर्वा जगति विख्यातिमद्भिर्जन्तूनां भविकप्राणिनां सार्थे. । 'संघसार्थौ तु देहिनाम्' इति हैम्याम् । वृन्दे' 'पान्थसार्थे.' इति पाठे तु पान्थाः विमलगिरिमार्गं प्रति स्यायुकास्तेषां प्रकरैरिति । महेन्द्र. शक्रः मिहिरः सूर्यः तस्याङ्गजो नन्दनो यमस्तथाम्बुनिधिधामा वरुणस्तथा पौलस्त्यो धनदस्तेषां दिशो हरितः पूर्वा, पश्चिमा, दक्षिणा, उत्तरा, तासां पथेषु मार्गेषु पृथु विस्तीर्णं विपुलं यथा स्यात्तथा तेन प्रकारेणातिबाहुल्येन पप्रथे विस्तृतम् । यथा येन प्रकारेण विकीर्णैर्विक्षिप्तैस्तिलैः स्नेहधारिधान्यविशेषै. क्वचित्कुत्रापि स्थाने जगतीतलं भूमण्डलं नालम्भि न प्राप्तम् भूमेस्तत्सङ्गो न लेभे जनमस्तकेष्वेवातिष्ठत् । विक्षिप्तास्तिलाः क्षितौ नापतन्नित्यर्थं । किमिव । अवसानमिव । यथा मानसैर्मन संबन्धिभिर्जनानां मनोरथानामभिलाषाणां स्फूर्जितैर्विलसितैरवसानं प्रान्तो न प्राप्यते संसारिणां प्राणिनामवसानमेव नास्ति । 'इच्छा हु आगाससमा अनन्तिआ' इत्युत्तराध्ययनोक्तेः ॥

चलत्सु विमलाचलं निखिलयात्रिकेष्वोजसा
पुरस्त्वरितमेयरुः क्वचन केचिदुत्कण्ठिताः ।
गृहीतुमनसः शिवश्रियमिवागमेनाग्रतः
स्वयं प्रथमतः परेष्विव धनार्थिनोऽर्थप्रयाम् ॥ १४ ॥

क्वचन कुत्रचित्स्थाने उत्कण्ठिताः श्रीशत्रुंजययात्राजिनदर्शने सुत्कण्ठिताः केचन पुरुषा ओजसा बलेन त्वरितं शीघ्रं पुरः अग्रतः ... ॥ ... केषु सत्सु । ... निखिलेषु समस्तेषु यात्रिकेषु जनेषु विमलाचलं शत्रुंजयशैलं प्रति चलत्सु प्रस्थितवत्सु सत्सु । उत्प्रेक्षते—

मार्गे वा वर्तमाना याः प्रपाः पानीयशालास्तासु यात्रिकैः श्रीशत्रुंजययात्राकारकैर्लोकैरमृतस्य पीयूषस्य पानवद्धीतिरिव। 'धीतिः पाने' इति हैम्याम्। 'धेट् पाने'। धयनं धीतिरिति व्युत्पत्तिः। अथ वा मुक्तिरसास्वादवत्। 'अमृतं मुक्तिपानीयपीयूषेषु' इत्यनेकार्थः। आतृप्तितस्तृप्तिं मर्यादीकृत्य। आङादियोगे पञ्चमी। सितोपलाभिः शर्कराभिः कलितं करम्बितं बहुव्याप्तं तोयं पानीयमपीयत पीतम्। पुनर्हीरविजयसूरिणा तु शमसुधा उपशान्तरसनाम्नी सुधा समास्वाद्यत सम्यक् पीयते स्म। किंभूता शमसुधा। अवनिधरे शत्रुंजयशैले यदधिरोहणं चढनं तेनोदयत्प्रकटीभवन् यः प्रमोदाभिधरसो हर्षोत्कर्षः आनन्दातिरेकनिस्पन्दस्तेन मिश्रिता करम्बिता व्याप्ता॥

स्फुरत्खरकरोद्धुरद्युतिवितानसंतापिता-
जनाञ्जनितनिर्झरोत्करजलाप्लवा वायवः।
भवार्तिविधुरीकृतानिव महात्मनां संगमाः
सृजन्ति शिशिरान्गिरौ क्षणमपास्य तापं तनौ॥ ३२॥

गिरौ पुण्डरीकपर्वते वायवः पवनाः जनान्यात्रिकलोकान् क्षणं क्षणमात्रं शिशिरान् शीतलान् सृजन्ति कुर्वन्ति। किं कृत्वा। निमेषमात्रं च तनौ शरीरे तापं घर्ममपास्य निवार्य। जनान् किंभूतान्। स्फुरन्दीप्यमानस्तीव्रं तपन्वा खरकरश्चण्डरश्मिः सूर्यस्तस्योद्धुराणामुत्कटानां द्युतीनां कान्तीनां वितानेन समूहेन संतापितान्पीडितान् अतितप्तीकृतान्। किंभूता वायवः। जनितो निर्मितो निर्झराणां गिरिरान्तरनिःसरत्पयःप्रवाहाणामुत्कराणां संदोहानां जलेषु पानीयेषु आप्लवः स्नानं यैस्ते। के इव शिशिरयन्ति। संगमा इव। यथा महात्मनां साधूनां संगतयः भवस्य संसारस्यार्तिभिर्विपाधिव्याधिदुःखपीडा तया ताभिर्बहुत्वं वा विधुरीकृतान् व्याकुलान् विहितान् भविनः संसारासारतोद्भावनविधिधर्मोपदेशप्रदानादिना शीतलयन्ति॥

झरज्झरपयःप्लवप्रसरशीतलोर्वीतले
सहसरुचिसंचरद्रुचिचयस्य दुःसंचरे।
विलासिकदलीगृहे भुजगगुल्मिनीमण्डपे
स्फुरद्विविधविष्टरे पृथुलशैलतल्पाङ्किते॥ ३३॥
सितद्रुमगलन्मणीचकचयोपचाराञ्चिते
द्विरेफरवगानितानिलकुलकृतनाताण्डवे।
जनान्भवनपट्टने भ्रमनुदेऽतिघर्मान्मुनि
सबिन्दुकितवक्षसो ह्वयति कोऽपरालापकैः॥ ३४॥

शत्रुंजयाचले जनान् ... [illegible]

'निकायस्तु सधर्मिणाम्' इति हैम्याम् । भवनपतिव्यन्तरज्योतिष्कवैमानिकलक्षणा-श्चतुर्निकायास्तादृशा अमरा देवास्तैः पुरंदरगिरेर्मेरोः समीपं शोभा लभ्यते । यथा सुरगिरिः तथा सुरेन्द्रगिरिरपि । यथा सुरनागेन्द्रपुरंदरगुरुरपि । यथा नैषधे—'शत-वाचमपि गुरुर्गुरुरस्य' । अत्र शक्रस्य । तथा श्रीपालचरिते—'शक्रगुरूच्चैरमहे ऽ' इति । तथा नैषधे—'जाम्बूनदार्थी धरणीभोमः' । यथा शक्रनाम्नेद तथा शक्रस्यायमपि शैल इति ॥

धराधिविबुधैरिता किमु सहैव संकेतभा-
क्किमत्र सुकृतैरुत व्रतिपतेरिवाकर्षिता ।
शताङ्गमुखवाहनानुगतयौवतभ्राजिना
यदेकसमये ततिस्तनुमतामुपेता गिरौ ॥ १७ ॥

गुरौ शत्रुंजयाचले तनुमतां प्राणिनां यात्रिकजनानां ततिः श्रेणी यद्यस्मात्कारणात् एकसमये एकस्मिन्नेव प्रस्तावे उपेता समकालं समागता । किंभूता । शताङ्गाः स्यन्दना रथा मुखे आदौ येषां तादृशानि वाहनानि यानानि तैरनुगतानां युक्तानां यौवतैर्युवती-समूहैर्भ्राजन्ते शोभन्ते इत्येवशीलास्तेषां द्वयोरपि कर्मधारयः । तत्रोत्प्रेक्ष्यते—धरस्य विमलाद्रेरधिविबुधैरधिष्ठायकसुरैः ईरिताः प्रणुन्नाः किमु । अथ वा सहैव एककालमे-केन वारेणैव संकेतं परस्परसंगमस्थानं भजतीति तादृशी किमु । उताथ वा व्रतिपते-र्हीरविजयसूरेः सुकृतैः पुण्यैराकर्षिता अत्र शत्रुंजये आकृष्यानीतेव वा कश्चिदाकर्ष-यति । स्वार्थे णिप्रत्ययः । आकर्ष्यते स्मेत्याकर्षिता ॥

तुरङ्गममतङ्गजाग्रिमशताङ्गरङ्गन्मरु-
प्रियोक्षतरवेसरोत्करपुरःसरप्राञ्चिता ।
पुरीपरिसरावनी समजनिष्ट संघागमे
तदा विजयिमेदिनीरमणराजधानीव सा ॥ १८ ॥

तदा तस्मिन् यात्रिकजनव्रजागमनसमये पुर्याः पादलिप्तनगर्याः परिसरस्य समी-पप्रदेशस्य अवनी भूमी कर्त्री विजयिनो विजयकरणशीलस्य मेदिनीरमणस्य राज्ञो राजधानी स्कन्धावतार इव समजनिष्ट संजाता । किंभूता । तुरङ्गमा अश्वा मतङ्गजा हस्तिनः तथा अग्रिमाः प्रकृष्टाः शताङ्गाः रथास्तथा रङ्गन्तो मरुप्रियाः करभाः तथा उक्षतरा महोक्षाः पुष्टबलीवर्दास्तथा वेसरा अश्वतराः लोके 'खचर' इति प्रसिद्धास्ते-षामुत्कराः समूहास्तथा पुरःसराः पादचारिणः तैः प्राञ्चिताः परिपूर्णा निभृत भृताः ॥ इति संघागमनम् ॥

जडीकरणभीतितो हिमगिरेः प्रणश्यागतं
सरः किमिह मानसं सकुलराजहंसाकुलम् ।

गुंजारवैर्मिश्रा करम्बीकृता गिर वाणीं मृदु सुकुमार मधुरमतृप्तत्वेन श्रवणपुटकनिपीयमान यथा स्यात्तथा जगुर्वदन्ति स्म । के इव । विदग्धा इव । यथा छेका लोका गीतिमिश्रां वाणीं वदन्ति । किंभूताम् । श्रुत्योः श्रोतृश्रवणयोः सुखा सातोत्पादकत्वेनामृतायमानाम् । च पुनः क्वचिद्वनवने शिखण्डिना परिपूर्णकलापकलितानां मयूराणा मण्डलाः संततयो नन्नृतुर्नृत्यन्ति स्म । च पुनः क्वचित्प्रदेशे जलदो मेघो जगर्ज गर्जति स्म । गिरौ मेघाना सद्भावो वर्ण्यते । उत्प्रेक्ष्यते—भूमीभृत शत्रुंजयाद्रे राज्ञो वा करिघटेव गजराजीव । 'बहूना घटना घटा' इति हैम्याम् ॥

मरुन्मिथुनमण्डिता खगविनोदसान्द्रीकृता
मरुत्तरुपरंपरा विविधसिद्धसौधान्तरा ।
मणीशिखरशालिनी पुनरनिन्दिताष्टापदा
नितम्बविलसद्वनी भगवतालुलोके गिरौ ॥ २६ ॥

भगवता हीरसूरिणा गिरौ शत्रुंजयशैले नितम्बे मेखलायां विलसन्ती स्फुरन्ती शोभमाना वनी काननमालुलोके निरीक्षिता । तीर्थस्थान्यपि सर्वाणि स्थानानि पावनान्येव । वनीशब्दोऽन्यत्रापि दृश्यते । यथा 'यवनी नवनीतकोमलाङ्गी शयनीय यदि पावनीकरोति । अवनीतलमेव माननीय न पुनर्माघवनीवनीविनोद. ॥' इति कविकल्लोले । तथा 'स्ववनी सप्रवदत्पिकापि का' इति नैषधे । किंभूता वनी । मरुतां देवाना मिथुनानि देवदेवीयुगलानि तैर्मण्डिता अलङ्कृता । पुन किंभूता । खगानां विविधजातीयविहङ्गमाना खकामिनीकलितविद्याधराणा वा विद्यासाधकखेचराणा वा विनोदः क्रीडातिरेक रसैर्विशिष्टैर्गुरुप्रमुखे साधनोपायकरणादिषु नोदैः प्रेरणै सान्द्रीकृता स्नेहलीकृता निविडा विहिता वा । पुनः किंभूता । मरुद्भिर्यक्षादिदेवै अधिष्ठितानाम् । 'गुह्यको वटवास्यपि' इति हैम्याम् । तरूणा द्रुमाणा देवद्रुमाणा वा परपरा श्रेणयो यत्र । पुनः किंभूता । विविधानि नानाप्रकाराणि स्वर्णरूप्यरत्नमयानि वा सिद्धानामर्हता पुण्डरीकादिमुनीनामेव सिद्धाना वा सौधानि चैत्यानि सिद्धायतनानि । अथ वा विविधमन्त्रतन्त्रौषधीरससिद्धिभाजा सिद्धाना गृहाणि । तत्रस्था हि केचिन्मन्त्रादिसाधना विदधतो विविधौषधीजिघृक्षवोऽपि सौधमाधाय तिष्ठन्तीति तानि अन्तरे मध्ये यस्याः सा । पुनः किंभूता । मणीना शिखरैः शृङ्गैः शालते इत्येवशीला । पुन किंभूता । अनिन्दिता श्वापदनीपाल्लीधानुभावेनाक्रूरत्वात्प्रशस्ता अष्टापदा शरभा उपलक्षणादन्येऽपि श्वापदा अष्टापदानि खानौ स्वर्णानि वा यस्याम् । अत्रापि मेरुमेखलाया अप्यर्थध्वनिः, तत्रापि सुरयुग्मानि खेचराणा विविधनिधुवनविनोदै सान्द्रीकृतकदरान्तरा कल्पद्रुमाश्च सिद्धायतनानि रत्नशिखराणि स्वर्णमया च ॥

प्रभो शिरसि भूरुहैर्विदधिरे छदैश्छायिका
निरुद्धरविरश्मिभिः सहचरैरिव साशुकैः ।

लोचनदलेनेगपुगव मनप्राणेरिनरेषु तन्तुजाः नेत्राः ...दलनेन नतिस्कुम्भ-प्रधानभव्यजनैः भुवि पृथिव्यां चनिर्भिरिन्द्रेरिव श्रमणा । कैरुतः । नौ तस्य स्थितैरेवाद्रिरपि । संसारस्थैरिह कदापि नेत्रुन्मिलन्ति । पुनः किंभूतः । तस्कूटा शृं-गयष्टिमालम्बन्ते भवन्ते स्नेहमालिराशि । शरीरं निश्चाद्रिराशि भुक्तिर्नो लभ्यते । कैरिव । अपेतभवविग्रहैरिव । यथा अपेतो निर्गतो भवः संसारः पुनर्भवः येषां वा तथा विग्रहः शरीरं समानो वा येऽन्यत्रादृश्योऽभिव्यादृशा सिद्धस्थाने तथा शब्दब्रह्म समस्तानां लोकानां त्रयाणां सप्तानां चतुर्दशानां वा भुवनानामग्रे उपरितनभागे गच्छन्ति तिष्ठन्तीति कृत्वा तादृशैः । 'लो अग्रमनुगमनात्मम्' इति वचनात्सिद्धैरिव निर्वृतिलक्ष्मा । 'निर्वृतिः शिवशर्मणोः' इत्यनेकार्थः । इति जगति तत्र निर्वृतिप्राप्ति-प्रकारे महत्कुरु चित्रमाश्चर्यं वर्तते ॥

ततः श्रमणशर्वरीपतिरुपत्यकायां गिरे-
र्गिरीशसदनान्तरे सह महेश्वरैर्भावुकैः ।
चरन्नमृतपत्तनं किमतिदूरभावात्पथो
निशि न्यवसदन्तराप्रमितसार्थसार्थेशवत् ॥ २६ ॥

ततस्तलहट्टिकागमनानन्तरं श्रमणशर्वरीपतिः साधुसुधांशुः सूरीन्द्रो गिरेः शत्रुं-जयाद्रेरुपत्यकायामधोभूमिभागप्रदेशे अन्तरा पादलिप्तपुरशत्रुंजयादिमार्गमध्ये गि-रीशस्य शंभोः सदनं गृहं शिवप्रासादस्तस्यान्तरं मध्यं तत्र निशि रात्रौ न्यवसन्निवासं कृतवान् वासकं वसति स्म । तिष्ठति स्मेत्यर्थः । कथम् । सह । कैः । महेश्वरैर्भावुकैर्महेभ्यैः श्राद्धैः जिनभावकैः । अथ च शिवसदने महेश्वरजनैः कश्चिद्वसति । उत्प्रेक्ष्यते—अमृत-पत्तनं मुक्तिनामपुटभेदनं प्रति चरन् गच्छन् पथो मार्गस्यातिशयेन दूरभावाद्दवीयस्त्वात् किमन्तरा निवसति स्म । किंवत् । अप्रमितसार्थसार्थेशवत् । यथा अप्रमितः प्रमाणर-हितः सार्थः मनुष्यसमूहो यस्य तादृशः सार्थपतिः केनापि नगरं गन्तुमिच्छन्मार्ग-स्यातिदूरत्वेन अन्तरा मार्गमध्ये एव निशायां निवसति ॥

हरेर्मृगदृशामिवोत्पलदृशां लसद्गीतिभिः
पुनर्मुदितनाट्यकृद्घटिततताण्डवाडम्बरैः ।
निनाय निखिलां निशां वशिशशी स धर्मक्रिया-
विनिर्मितिभिराश्रये रजनिजानिचूडामणेः ॥ २७ ॥

स वशिशशी हीरविजयसूरिचन्द्रः रजनी रात्री जाया पत्नी यस्य । 'जायाया निङ्' इति निप्रत्ययः । 'लोपो व्योर्वलि' इति यकारस्य लोपः । रजनिजानिरिति सिद्धम् । रजनिजानिश्चन्द्रः चूडामणिः शिरोरत्नं यस्य । एतावता ईश्वरस्तस्याश्रये वसतौ तत्र-प्रासादे धर्मस्य स्वाचारलक्षणस्य क्रिया अनुष्ठानं सन्ध्यायाः प्रतिक्रमणादिकरणं तस्य

स्वचैत्यचटुलध्वजोपधिकरैरिवाकारय-
न्प्रभञ्जननमद्द्रुमैः किमतिगौरवं कल्पयन् ।
मनीषिशुकभाषितैरिव सुखागमं प्रश्नय-
न्झरज्झरमुदश्रुभाग्गिरिरभूद्गुरोरागमे ॥ ३९ ॥

गुरोः सूरीन्द्रस्य आगमे गिरिर्विमलाचलः अद्भुतमोदप्रादुर्भावादेवेति [illegible] अभूद्बभूव । किंभूतः । झरन्तो निष्पतन्तो ये झरा निर्झरवारिधारास्त एव मुदश्रूणि हर्षबाष्पान् भजतीति । उत्प्रेक्ष्यते—स्वस्यात्मनश्चैत्यानां परमेश्वरप्रासादानां चटुला पवनान्दोलनविलोला ये ध्वजा वैजयन्त्यस्त एवोपधिः कपटं येषां तादृशैः करैर्हस्तैः [illegible] किमाकारयन्नाह्वयन्निव । पुनरुत्प्रेक्ष्यते—प्रभञ्जनेन वायुवेगेन नमन्तो नम्रीभवन्तो ये द्रुमाः पादपास्तैः कृत्वा अतिगौरवमतिशायिनीं भक्तिं नमनचरणलगनलक्षणां [illegible] कुर्वन्निव । 'अनुतिष्ठति विदधाति रचयति कल्पयति चेति करणार्थे' इति क्रियाकलापे । पुनरुत्प्रेक्ष्यते—मनीषिणां विविधशास्त्राध्येतॄणां शुकानां कीराणां भाषितैर्[illegible] रीभिः कृत्वा । सुखागमं यूयमत्र सुखेन समाधिना आगता इत्यादि [illegible] पृच्छन्निव । अन्यो महात्मा कमपि स्वाभीष्टमभ्यागच्छन्तं विलोक्य [illegible] तथा नमनपदलगनादिभिर्गौरवं कल्पयति । तथा मधुरया गिरा [illegible] कुरुते । तथा हर्षाश्रूण्यपि भजते ॥ इति गुरोर्विमलाचलस्यारोहणे [illegible] वर्णनम् ॥

क्रमेण धरणीभृतः समधिगत्य सोऽप्युत्यकां
ददर्श वशिनां शशी चरणमन्दिराण्यर्हताम् ।
धृतं विमलभूभृतोद्भटभवाभिमातेर्भया
ज्जनं स्वशरणागतं किमिह रक्षितुं [illegible] ॥ ४० ॥

स वशिनां वशात्मनां जितेन्द्रियाणां मध्ये [illegible] च शशी । [illegible] एकमपि पद [illegible] शमात्क्ष्यते [illegible] क कृत्वा । क्रमेण [illegible] रपित्यकानूर्ध्वभूमौ समधिगत्य [illegible] 'अधित्यका [illegible]' इति [illegible] 'उपत्यका [illegible]' इति [illegible] [illegible] जनं स्वशरणागतं [illegible] भवाभिमाते [illegible] ता [illegible] विमलभूभृता [illegible]

[illegible]
[illegible]
[illegible] ॥

[illegible]
[illegible] ।
[illegible]
[illegible] ॥ ३० ॥

[illegible] । किंभूतया [illegible] । उत्प्रेक्ष्यते—[illegible] समारसमुद्र [illegible] समुद्र [illegible] । किंभूता मेखलाम् । हृदयानि मनांसि । '[illegible] हृदय [illegible]', तथा '[illegible]' इति द्वयमपि हैम्याम् । अत एवानेकार्थे—'हृदयं मनो वक्षश्च' । तान्येवोन्मत्तत्वाद्दन्तिनः करिणः तन्निबद्धुं नियन्त्रयितुं शृङ्खला निगडमिव । शृङ्खलशब्दस्त्रिलिङ्गः । 'शृङ्खला निगडोऽन्दुकः' इति हैम्याम् । तथा 'नालप्रणालपटलार्गलशृङ्खलकदला' इति लिङ्गानुशासने स्वतत्रिलिङ्गे । तथा मेखला मुञ्जदोरिकामिव । दोरिकया हि करिणो नियन्त्र्यन्ते । यथा चम्पूकथायाम्—'ब्राह्मीव दार्जनी समेखला समेमित्रे । अमित्रे च समभावभाजि सार्वा विपये वेला मत्सरवती दौर्जनी श्रेणी ब्राह्मी तु सह मेखलया मौञ्जीदोरिकया वर्तते या' इति चम्पूटिप्पनके । इति गर्भितोत्प्रेक्षा । पुनः किंभूताम् । सु शोभनानि पर्वाणि शाखादिनिर्गमस्थानानि येषां येषु वा तादृशैर्वृक्षैस्तरुभिः नन्दयति प्रीणाति समृद्धिं प्राप्नोतीति वा । उत्प्रेक्ष्यते—सुमेरुभूमीभृतो मन्दरमहीधरस्य मेखला नितम्बमिव । किंभूताम् । सुपर्वतरुभिः कल्पवृक्षैर्नन्दयति समृद्धिं प्राप्नोति । अथ वा कल्पद्रुकलितनन्दनवती । एतावता प्रथममेखलामारूढवान् ॥ इति पद्यद्वया प्रथममेखलारोहणम् ॥

प्रपासु गिरिपद्धतेरमृतपानवद्यात्रिकै-
रपीयत सितोपलाकलिततोयमातृप्तितः ।
पुनर्मुनिमहीन्दुनावनिधराधिरोहोदय-
त्प्रमोदरसमिश्रिता शमसुधा तदास्वाद्यत ॥ ३१ ॥

तदा शत्रुंजयप्रथममेखलाधिरोहणसमये गिरेर्विमलाचलस्य पद्धतेर्मार्गस्य पद्धतौ

यदीक्षणजितो मृगः श्रित इवाङ्ककायः क्रमं
मृगध्वजजिनं ततः प्रमुदितः स तं नेमिवान् ।
जिनेन्द्रमजित पुनर्नजितमान्तरैर्वैरिभिः
कदाचिदपि पद्मिनीप्रियतमस्तमिस्रैरिव ॥ ४३ ॥

स सूरिस्ततो मरुदेवीनमस्कृतेरनन्तरं त शान्तिकारकत्वेन सर्वत्रापि प्रसिद्ध मृगो हरिणो ध्वजश्चिह्नं यस्य तादृश जिन षोडशतीर्थनाथ श्रीशान्तिनाथ नेमिवान् प्रणमति स्म । अत्र क्वसो' प्रत्ययस्य प्रयोगः । स च णमादिवत् ज्ञेयः । किंभूतः सूरिः । प्रमुदितो हृष्टमानसः । यत्तदोर्नित्यसंबन्धात् यस्य श्रीशान्तिनाथस्य क्रम चरण मृगः सारङ्ग. श्रितः समेत्य सेवते स्म । उत्प्रेक्ष्यते—यदीक्षणाभ्या यस्य नयनाभ्या जितः श्रिया पराभूत इव अङ्कोऽभिज्ञानमेव कायो वपुर्यस्य तादृशः सन् श्रित इव । पुनरपरविहारे अजित द्वितीय जिनेन्द्र परमेष्ठिन नेमिवान् प्रणनाम । किंभूतम् । नेति निषेधे । जित पराभूत न जितनजितम् । कैः । आन्तरैरन्तरङ्गैः कर्मार्थैर्भाववैरिभि. । कथम् । कदाचिदपि कस्मिन्नपि काले प्रस्तावे । कैरिव । तमिस्रैरिव । यथा अन्धकारै. कदाचिदपि पद्मिनीप्रियतमो भानुमान्न जीयते ॥

स सिद्धगृहवज्जिनं प्रणमति स्म पृथ्वीधर-
प्रणीतजिनमन्दिरे मुनिपुरंदरः संमदात् ।
प्रधान इव पर्षदं क्षितिपति स छीपाभिधा
समेत्य वसतिं पुनर्जिनसुधांशुमाराधयत् ॥ ४४ ॥

शत्रुंजयोज्जयन्तादितीर्थाना करमोचयिता मुनीना तपागच्छश्रमणाना पुरंदरः अतिशायिलब्धिमत्त्वेन वासवसदृशः सूरिः समदादानन्दात् पृथ्वीधराभिधेन मण्डपाचलपातिसाहिमन्त्रिणा पेथडदेसाधुना निर्मापिते जिनमन्दिरे प्रासादे जिन भगवन्त प्रणमति स्म । किंवत् । सिद्धगृहवत् । यथा कश्चिद्विद्याधरो लब्धिमान्वा साधुः सिद्धायतने शाश्वततीर्थंकर नमस्करोति । पुनस्तस्मादन्यत्र स्थाने छीपा इत्यभिधा नाम यस्य तादृशीं वसतिम् । अत्र तीर्थादौ वसतिशब्देन केवल चैत्यमेव प्रतिपाद्यते न गृहादि प्रासाद समेत्य जिनाशुसुधांशुर्महद्भट्टारकमाराधयत् भजते स्म । 'वरिवस्यत्यन्वास्ते जुषते शुश्रूषतेऽनुकूलयति । आराध्नोत्याराध्यत्याराधयतीति सेवायाम् ॥' इति क्रियाकलापे । क इव । प्रधान इव । यथा सचिवः पर्षद सभा समागत्य क्षितिपतिं स्वस्वामिनृपतिमाराधयति ॥

अवन्दत स टोटराभिधविहारतीर्थेश्वरं
पुनः प्रभुमबीभजद्वसतिमेत्य मौल्हाभिधाम् ।

शयैः हस्तैर्वने स्वनिकुञ्जे ह्वयत्याकारयतीव। इति गर्भितोत्प्रेक्षा। किंभूतान् जनान्। अतिघर्माम्बुभिः अत्यभ्यधिकप्रस्वेदसलिलैर्विन्दुकितवक्षसः विन्दुभिः श्रमोदककणगणैर्युक्तं जातम्। स्वार्थे के जातार्थे इतप्रत्यये। विन्दुकितं वक्षो हृदयं येषाम्। अत एव कस्मै हेतवे। श्रमनुदे मार्गक्लमापनोदाय। 'स्वेदविन्दुकितनासिकाशिखाम्' इति नैषधे। किंवत्। भवनवत्। यथा कश्चित्सुजनः कमपि मार्गक्लमप्राप्तं निजनिकेतने समाह्वयति। किंभूते वने। झरन्तो निःसरन्तो ये झरा निर्झरास्तेषां पयःप्लवानां वारिपूराणां प्रसरैर्विस्तारैः कृत्वा शीतलं शिशिरीभूतमुर्वीतलं भूमीमध्यं यस्य। पुनः किंभूते। सहस्ररुचेः सूर्यस्य संचरन्तीनामितस्ततो दशदिक्षु प्रसरन्तीनां रुचीनां कान्तीनां वितानं समुदायस्तस्य दुःखेन संचरः प्रसरणं प्रवेशो वा यत्र। पुनः किंभूते। विलासिनः शोभनशीलाः कदलीगृहा रम्भाभवनानि यस्मिन्। पुनः किंभूते। भुजगगुल्मिनीनां नागवल्लीनां ताम्बूलवल्लीनाम्। 'ताम्बूलवल्ली ताम्बूली नागपर्यायवल्ल्यपि' इति हैम्याम्। मण्डपा यस्मिन्। पुनः किंभूते। स्फुरन्तो विकसन्तः प्रकटीभवन्तो वा दृश्यमाना वा विविधा विष्टरा वृक्षा आसनानि वा यस्मिन्। 'क्षितिरुहः कारस्करो विष्टरः', तथा 'विष्टरः पीठमासनम्' इति द्वयमपि हैम्याम्। विष्टरः पुंसि। पुनः किंभूते। पृथुलानि विस्तीर्णानि शैलानि शिलासमूहा वा। यथा ज्ञातस्यास्तुतौ 'मन्दररत्नशैलशिखरे' एतस्यार्थद्वयम्। यथा मन्दरेषु पञ्चसु सुमेरुषु मध्ये रत्नं श्रेष्ठो यः सुदर्शनाख्यो मेरुः शैलः पर्वतस्तस्य शिखरे शृङ्गे। अपरोऽप्यर्थः—यथा मन्दरस्य मेरो रत्नानां शैलाः शिलासमूहा यस्मिंस्तादृशे इति। ततो पृथुलानि विपुलानि शैलानि एव तल्पानि पल्यङ्काः शय्यास्तैरङ्किते कलिते युक्ते। पुनः किंभूते। स्मिता विकसिता ये द्रुमा वृक्षास्तेभ्यो गलन्ति वातादिवशात्स्वभावपरिपाकाद्वा निष्पतन्ति यानि मणीचकानि कुसुमानि तेषामुपचारः प्रकरः 'पगर' इति लोकप्रसिद्धः रचनाविशेषस्तेनाञ्चिते सहिते। पुनः किंभूते। द्विरेफाणां भ्रमराणां रवा गुञ्जितानि त एव गानितं गीतिर्जातं यस्मिन् तादृशमनिलेन पवमानेन लुलन्तीनां चपलीभवन्तीनां लतानां विविधजातिवल्लीनां ताण्डवं नाटकं यस्मिन्। सर्वाण्यप्येतानि चित्रेपणानि भवनेष्वर्थात्संबध्यन्ते। किं चात्र भवनशब्देन राजमन्दिरादि ग्राह्यम्। तत्र सर्वेऽप्यर्थाः संभवन्त्येव दृश्यन्ते च। अथ वा पुण्याढ्यानामाढ्यानामपि भवने भवन्ति शालिभद्रादिमन्दिरवत् इति॥ युग्मम्॥

क्वचिद्विकचकानने मधुपगीतिमिश्रा गिरं
जगुर्मृदु फलादनाः श्रुतिसुखा विदग्धा इव।
क्वचिच्च ननृतुर्नटा इव शिखण्डिना मण्डला
जगर्ज जलदः क्वचित्करिघटेव भूमीभृतः॥ २५॥

क्वचित्कुत्रापि शत्रुंजयवनैकलाशालिप्रदेशे विकचे विकसितकुसुमितमाकन्दद्रुमश्रेणीके कानने वने फलादनाः शुकाः मधुपानां षट्पदानां गीतिमिश्रां गिरं

वन्पि शिखर समेत्य समागत्य। च पुनस्तत्र चरणस्यान्तिके सचिवो वीरधवलधराधवप्रधानो यो वस्तुपालस्तेनावतारित रचनया नवीन निष्पादितमुज्जयन्त गिरिनारिगिरिप्रपन्न विलोक्य। 'प्रणीय नयनातिथि स च कुमारदेवीसुवा' इत्यपि पाठ। तत्र च पुन' कुमारदेवीत्याख्यो राणराजस्य पत्नी तस्या भूरुत्पत्तिर्यस्य तादृशेन वस्तुपालेनावतारित प्रतिरूप कृतमुज्जयन्त रैवताचल नयनयोरतिथि प्राघुणिक प्रणीय विधाय। लोचनगोचरीकृत्येत्यर्थ.। स सूरिस्तत्रोज्जयन्तावतारे वस्तुपालविहारे अर्हतः श्रीनेमिनाथप्रमुखान् जिने-द्रानमति स्म ॥

ततः खरहताभिधा वसतिमभ्युपेत्य प्रभुः
स्ववासत इवागत रचनयात्र नन्दीश्वरम्।
सराजिमतिका स्फुरच्चतुरिका पुनर्नेमिनो
निभाल्य जिनपुंगवानिह तमामनंसीन्मुदा ॥ ४८ ॥

प्रभुर्हीरसूरिः इह खरहतवसतौ मुदा हर्षेण जिनपुगवान् तमामतिशयेन पञ्चाङ्गप्रणतिनमस्तवादिना अनसीनतवान्। किं कृत्वा। ततो रैवतावतार-वस्तुपालवसति-जिनपति-नमनानन्तर खरहत इत्यभिधा यस्यास्तादृशीं वसतिं खरहतनाम्ना व्यवहारिणा स्वनाम्नैव कारितप्रासादमभ्युपेत्यागत्य। पुन' किं कृत्वा। नन्दीश्वरमभ्युपेत्य। उत्प्रेक्ष्यते—रचनया शिल्पघटनाविशेषेण कृत्वा इह शिखरवसतो स्ववासतो निजवसनस्थानात् अष्टमद्वीपभूमेरागत सम्प्राप्त नन्दीश्वरमष्टमद्वीपलक्षण द्विप वा तत्प्रसादलक्षणमिव। पुन. किं कृत्वा। अत्र खरहतवसतो नेमिनो द्वाविंशतितमतीर्थकृन्नेमिनाथस्य स्फुरन्तीं रचनाचातुर्येण शोभमाना चतुरिका 'चउरी' इति लोकप्रसिद्धां पाणिग्रहणस्थान निभाल्य दृष्ट्वा। किंभूता चतुरिकाम्। सराजिमतिका सह राजीमत्या वर्तते या सा सराजिमतिका। राजिमतीत्यत्र जिकारो ह्रस्वोऽपि दृश्यते श्रेण्यामिव राजिः राजी। तथा च 'स्वामिन्मामुग्रसेनक्षितिपकुलभवा सानुरागा सुरूपा बालां त्यक्त्वा कथ त्व बहुमनुजरता मुक्तिनारीमरूपाम्। वृद्धा मूकामकुल्या करपदरहितामीहसेऽशेषविच्छ्रागित्युक्तो राजिमत्या यदुकुलतिलक श्रेयसे सोऽस्तु नेमि ॥' इति पूर्वसूरिप्रणीतस्तवे। तथा 'काव्यत' इति सारस्वतसूत्रेण कापि परे ह्रस्वे राजिमतिका ॥

स घोटकचतुष्किकादिमगवाक्षजैनालये
चकार च नमस्कृतिं चरणयोर्जिनोर्वीभृताम्।
गिरेरिव विशेषके तिलकतोरणे श्रीजिना-
न्पुनर्मुनिमतङ्गजो नवनवैः स्तवैरस्तवीत् ॥ ४९ ॥

स सूरिर्घोटकचतुष्किका इति आदौ नवमादिम पद यत्र तादृशो गवाक्ष इत्यभिधानो 'घोडाचोकी गउख' इति नाम्नि जैनालये तीर्थकृत्सबन्धिनि मन्दिरे। प्रासादे

अवीज्यत पुनर्जनः क्वचन तालवृन्तैरिव
प्रसारिझरसीकराकलितलोलरम्भादलैः ॥ ३७ ॥

क्वचन कुत्रापि गिरिमेखलायां भूरुहैः सच्छायतरुभिः कर्तृभिः निरुद्धाः पिहिता आच्छादिता रवेर्भानुमालिनो रश्मयः किरणा यैस्तादृशैश्छदैः स्वपर्णैः साधनैः कृत्वा प्रभोः सूरीन्द्रस्य शिरसि मस्तके छायिका भास्करातपावृतयः 'छाहडा' इति जनप्रसिद्धाः विदधिरे कृताः । कैरिव । सहचरैरिव । यथा सेवकलोकैः प्रभोः स्वस्वामिनः शिरसि स्वांशुकैः स्वकीयवसनैः कृत्वा छायिकाः क्रियन्ते । पुनः क्वचन कुत्रापि स्थाने प्रसारिभिर्विस्तरणशीलैः झराणां शिखरान्तरनिःसरत्पयःप्रवाहाणां सीकरैर्वा तास्ता वारिबिन्दुभिः कलितैर्मिश्रीभूतैस्तथा लोलैः पवनान्दोलनचपलीभूतै रम्भाणां कदलीद्रुमाणां दलैः पृथुलपर्णैः कृत्वा जनः अवीज्यत । अर्थाद्गिरिणैव । कथम् । पुनर्वारं वारम् । कैरिव । तालवृन्तैरिव । यथा व्यजनैर्वीज्यते ॥

विदग्धविहगा जयारवमुदीरयन्त्यध्वनि
स्तुतिव्रतजना इवान्तरभिमातिभेत्तुः प्रभोः ।
क्वचिन्निचितमारुतोपचितकीचकानां क्वणै-
र्गुरोर्गुणगणः पुनर्गिरिसुरैरिवोद्गीयते ॥ ३८ ॥

क्वचित्क्वापि प्रदेशे विदग्धाः कौतुकक्रीडाकृते अध्याप्य पश्चात् श्रीभूतमहेभ्यैः पञ्जरेभ्यो निजेच्छया गमनाय विमुक्ताः । 'तदर्थमध्याप्य जनेन तद्वने शुका विमुक्ताः पटवस्तमस्तुवन्' इत्यपि नैषधादौ दर्शनादिदमपि युक्तिमदेवेति । तथा श्रावकसंगत्या श्राद्धत्वं च प्रपन्नाः । अत एव तीर्थाधिराजं स्वतिर्यक्कृतपयोहाय सेवमानाः पण्डिता विहगाः शुकसारिकादयः पक्षिणः अध्वनि शत्रुंजयाचलारोहणमार्गे प्रभोः सूरीन्द्रोर्जयारवं जयजयेति शब्दमुदीरयन्ति कथयन्ति । किंभूतस्य प्रभोः । अन्तर्मध्ये स्वात्मनि वर्तमानानामभिमातीनां रागद्वेषकषायादिविद्विषां भेत्तुर्दन्तुः । के इव । स्तुतिव्रतजना इव । यथा स्वामी प्रमुखाणां पूर्वपुरुषकर्तव्यादिषु प्रवर्तमाननृपादिमानां वैरिजयवर्णकार्यदानप्रमुखे विधेये स्तवने व्रतं नियमो येषां तादृशा जना वन्दिलोका वैरिविजेतुः स्वामिनो मङ्गलपाठका जयजयारवमुदीरयन्ति । पुनः क्वचिद्भूमिभागे निचितैरन्तःप्रविष्टैर्निभृतैर्निश्चलीभूतैः अथवा निभृतं परिपूर्णं यथा स्यात्तथा मारुतैः पवनैरुपचिताः पुष्टाः कृताः । समन्तात्रन्ध्रेषु पूरिता इत्यर्थः । ये कीचका वंशकीचकाः छिद्रवंशाः । 'स कीचकैर्मारुतपूर्णरन्ध्रैः' इति रघुवंशे । तेषां क्वणैः शब्दैः कृत्वा । उत्प्रेक्ष्यते—गिरिसुरैः श्रीशत्रुंजयाधिष्ठायकदेवैः कपर्दिचक्रेश्वरीगोमुखप्रमुखैर्गुरोः श्रीसूरेर्गुणानां गणः समूहः उद्गीयते उत्साहत्वेन गानं क्रियते इव ॥

विमुच्य मृडमद्रिजापरिभवेन सापत्न्यतः

किमम्बरतरङ्गिणीं विदधती विरक्तेस्तपः ॥ ९२ ॥

मलीमसजनाप्लवैर्निजमपावनीभावुकं

पवित्रयितुमीयुषी किमथ वात्र शत्रुंजये ।

मुरारिमथनोदितस्वतनुजादिविश्लेषजा-

सुखादुत सुधाम्बुधिः किमु तनोति तीर्थे तपः ॥ ९३ ॥

अथ सूरिर्वरणस्य प्राकारस्य गोपुर प्रतोली तस्याभ्यन्तरे मध्ये स्फुरद्भिः करैः किरणैः कृत्वा तरङ्गा. कल्लोलाः सजाता अस्यामिति तरङ्गिता तादृशी तथा स्फटिकैः श्वेतरत्नैः कल्पितां निर्मितामारोहणाना सोपानानामावलीं श्रेणीममार्गयत्पश्यति स्म । 'मार्गयति मृगयतेऽपि च मार्गति चेत्याहुरीक्षार्थे' इति क्रियाकलापे । उत्प्रेक्ष्यते—समान एकः पतिर्यस्या. सापत्नी तस्या भाव. सापत्न्य ततः कारणादद्रिजायाः पार्वत्याः परिभवेन सतापेन । उद्विग्नेत्यध्याहार्यम् । मृडमीश्वर विमुच्य त्यक्त्वा विरक्तेर्वैराग्यात्तपो विदधतीं तीर्थे तपस्यन्तीमम्बरतरङ्गिणी गङ्गामिव । अथ वा पुनरुत्प्रेक्ष्यते—मलीमसा जात्या अन्त्यजाः कर्मणा महाक्रूरकर्माणो जीवादिघातनान्महापापिनो मलिनजनास्तेषामाप्लवैः स्नानकरणादिभिः कृत्वा अपावनीभावुकमपवित्रीभवनशील निजमात्मान पवित्रयितु पावनीकर्तुम् । तीर्थसेवया इत्यध्याहार्यम् । अस्मिन् सर्वतीर्थाधिराजे सौराष्ट्रमण्डलकमलाचूडामणौ श्रीशत्रुंजये ईयुषी समागतवती किमु । अर्थात्पूर्वप्रतिपादिता गङ्गेव वा । उताथ वा मुरारिणा नारायणेन यन्मथन मन्दरगिरिणा कृत्वा आमूलाद्विलोडन तस्मादुदितप्रादुर्भूतो यः स्वस्य क्षीरसमुद्रस्यात्मनः तनुजानां 'लक्ष्मीः कौस्तुभपारिजातकसुरा धन्वन्तरिश्चन्द्रमा धेनुः कामदुघा सुरेश्वरगजो रम्भादिदेवाङ्गना । अश्वः सप्तमुखोऽमृत हरिधनु. शङ्खो विष चाम्बुधे रत्नानीति चतुर्दशापि कविभि सकीर्तितानि स्फुटम् ॥' एषां चतुर्दशानां मध्ये केचित्पुत्रा आदिशब्दात्काश्चित्पुत्र्यस्तासा विश्लेषो वियोगः तस्माज्जात यदसुख सुखादन्यत् विरुद्ध वा सुखस्याभावो वासुखम् । 'तदन्यत्वविरुद्ध-तदभावेषु नञो वर्तमानत्वात् त्रयोऽप्यर्थाः सगच्छन्ते' इति सारस्वतव्याकरण[illegible]रिवचः । एतावता दुःख तस्मात्कारणात्सुधाम्बुधिः क्षीरसमुद्रो महानन्द[illegible]देऽत्र शत्रुंजयतीर्थे तपस्तनोति किमु । अशनादित्यागलक्षण नियमविशेष [illegible] ॥ युग्मम् ॥ इति सर्वाभ्यन्तरप्राकारप्रतोलीसोपानानि ॥

स हीरविजयप्रभुर्वरणगोपुरं प्राविश-

त्प्रवेशनमिवर्षभध्वजजिनावनीवज्रिणः ।

सुराम्बुधिवधूप्लवेऽम्बुजपरागपिङ्गमिव-

त्सितच्छद इव व्यभासत ततोऽन्य सोपानके ॥ ९४ ॥

विवेश वशिशर्वरीवरयिता नृणां श्रेणिभिः
समं वरणगोपुरं पुरमिवावनीवासवः ।
स धर्मधरणीपतेरिव निवासवेश्मावलीं
व्यलोकत पुरःस्फुरज्जिननिकेतपङ्क्तिं पुनः ॥ ४१ ॥

स वशिनां संयमिनां मध्ये शर्वर्या निशाया वरयिता भर्ता चन्द्रो हीरविजयसूरिर्नृणां यात्रिकसंघलोकानां श्रेणिभिः समं वरणं शत्रुंजयशिखरबाह्यप्राकारस्तस्य गोपुरं प्रतोलीं विवेश प्रविष्टवान् । क इव । अवनीवासव इव । यथा विजयी राजा दिग्जैत्रयात्रां प्रणीय पुरं स्वां राजधानीं नगरीं प्रविशति । पुनरन्यार्थोपन्यासे । स हीरसूरिः पुरोऽग्रे वरणप्रवेशानन्तरमेवाग्रत एव स्फुरन्तीं प्रकटीभवन्तीं दीप्यमानां वा जिनानां तीर्थंकृतां निकेतानां मन्दिराणाम् । प्रासादानामित्यर्थः । पङ्क्तिं मालिकां व्यलोकत निरीक्षते स्म । उत्प्रेक्ष्यते—धर्मनामा यो धरणीपतिस्तस्य निवासार्थं वासकृते वेश्मावलीं भवनराजीमिव ॥ इति शत्रुंजयतीर्थे प्रथमप्राकारे प्रवेशः ॥

मृगेन्द्रशरभाङ्कुशाः परिभवन्ति मां निर्दया
इमां जहि जगत्पतेर्जननि दुःखितामुल्बणाम् ।
इतीव गदितुं गजो भजति यानदम्भेन यां
वृषध्वजजिनप्रसूः प्रथममेव नेमेऽमुना ॥ ४२ ॥

अमुना सूरिचन्द्रेण प्रथमप्राकारप्रवेशे पूर्वमेव सातात्कालिकोत्पन्नकेवलज्ञानेन चतुर्निर्मितसमवसरणमध्ये सिंहासनमधितस्थुषा चतुर्विधसंघस्थापनकृते भरतभूपागमनं प्रतीक्षमाणेन श्रीऋषभदेवेन तीर्थस्थापनसमयात्प्राक् सिद्धिगामुकत्वेन अतीर्थसिद्धत्वेन च अस्यामवसर्पिण्यां भरतक्षेत्रे प्रथमसिद्धत्वेन वा प्रसिद्धा वृषो वृषभो ध्वजश्चिह्नं मूर्तलाञ्छनं यस्य स युगादिदेवः स एव जिनः प्रथमतीर्थंकृत्तस्य प्रसूर्माता मरुदेवा नेमे नमस्कृता प्रणता । सा का । या मरुदेवीं यानदम्भेन वाहनच्छलेन गजो हस्ती भजते सेवते । उत्प्रेक्ष्यते—इति गदितुं कथयितुमिव । इति किम् । हे जगत्पतेस्त्रैलोक्यनायकस्य जननि माता निर्दया निर्याता दया करुणा येभ्यस्तादृशा मृगेन्द्राः केसरिणः तथा शरभा अष्टापदाः । 'हर्यक्षः केसरी इभारिः' तथा 'शरभः कुञ्जराराति:' इदं द्वयमपि हैम्याम् । तथा शिरसि घातदायकत्वादङ्कुशाः सृणयः एतत्प्रमुखा मृगयाविधायिव्याधभूपादिकाः मां परिभवन्ति यावद्गजजातिमपि निघ्नन्ति । इमामुल्बणामुत्कटां घातनलक्षणां दुःखितां दुःखिनो भावं जहि विनाशय निवारय । हन्तेर्धातोर्हिविषये जहिरादेशः । यदुक्तं सारस्वते—'जह्येविशाधि:, हन्तेर्जहिशब्दोऽस्तेरेधिः शास्तेः शाधि' निपात्यते हि विषये' इति वक्तुमिव ॥

सर्वतः सर्वास्वपि दिक्षु अर्हता भगवता लघुभिरल्पप्रमाणैर्गृहैर्देवकुलिकाभिरलङ्कृत शोभित वृषभकेतनार्हतः वृषभदेवस्य गृह चैत्य स्फुरति दीप्यते। कैः क इव। तारकैर्ज्योतिर्भिस्तनीशश्चन्द्र इव। पुनर्ग्रहाणां मङ्गलादीनामोघैः समूहैर्ग्रहपतिः सूर्य इव। पुनरसुरैः दानवैरसुरेश्वरो दानवेन्द्रवत्। पुनः सुरैर्देवैः सुरेशो देवेन्द्र इव। पुनर्मानवैर्मनुष्यैः नरेन्द्रो राजेव॥

क्षयं प्रलयकालजं निजमवेक्ष्य साक्षान्मरु-
त्सरिज्जलरयैरिवाक्षयपदोदयाकाङ्क्षया।
उपासितुमुपागतैरिह पदारविन्दं प्रभो-
र्व्यलासि सदने वृषध्वजजिनस्य सोपानकैः॥ ९७॥

वृषध्वजजिनस्य युगादिदेवस्य सदने गृहे मूलप्रासादे प्रवेशनमार्गे सोपानकैरारोहणैर्व्यलासि शुशुभे। अत्र कः स्वार्थे। उत्प्रेक्ष्यते—न वियते क्षयो विनाशो यत्र तादृशस्य पदस्य स्थानस्य सपदो वा उदय आविर्भाव तस्याकाङ्क्षया वाञ्छया इह शत्रुञ्जये प्रभो ऋषभस्य युगादिदेवस्य पदारविन्द चरणकमलमुपासितु सेवितुमुपागत. समीपे समेतैर्मरुत्सरितो गङ्गाया जलरयैः पयःप्रवाहैरिव। किं कृत्वा उपागतैः। प्रलयकालः कल्पान्तपञ्चारकलक्षणः तस्माज्जात निजमात्मीय स्वसम्बन्धिन क्षय विनाश पञ्चारके क्रमाद्विशुष्यज्जला रथचक्रमार्गमात्रप्रवाहा गङ्गा भविष्यतीति श्रुतिः। सार्धद्विषष्टियोजनमानजलप्रवो विशोष्य द्विहस्तप्रमाणप्रवाहो भविता इति। अल्पशब्दस्याभाववाचित्वात्क्षय एव साक्षादागमोक्तवाक्यात्प्रत्यक्षेणेवावेक्ष्य दृष्ट्वा। ज्ञात्वा इत्यर्थ॥

इमा अनिशनिम्नगा बत जडाशया वक्रता
वहन्त्यहरहस्तया सम्प्रतिकूलवृत्तिप्रथा।
श्रितोत्पलमधुव्रतान्कृतकुलक्षयैराश्रिता
धरन्ति च पदे पदे भुवनभङ्गरङ्ग पुन॥ ९८॥
नमन्निकटवर्तिनामवनिजन्मना पातुकाः
स्वकीयवचनीयतामिति जिघांसुभिः सिन्धुभिः।
निषेवितुमिव प्रभोः पुर उपागताभिर्घने
यदाप्तसदनाग्रतो विविधरत्नसोपानकैः॥ ९९॥

यस्य श्रीशत्रुञ्जयसम्बन्धिनः आसरादनस्य मूलजिनगृहस्याग्रत [illegible] नाप्रकाराणां रत्नानां मणीनां सोपानकैः [illegible] स्पते—निषेवितुमर्थाद्युगादिजिनमुपासितुं प्रभो [illegible] पुरोऽग्रे [illegible] संप्राप्तानि. [illegible]

विलोक्य च कपर्दिनं सकलसंघविघ्नच्छिदं
परगिरिमिवार्बुदादिमविभुं स्तवैरस्तवीत् ॥ ४१ ॥

स सूरिः टोटरा इत्यभिधा नाम यस्य तादृशे विहारे प्रासादे तीर्थेश्वरं जिननन्दनं नमस्कुरुते स्म । पुनरन्यत्र प्रदेशे मोल्हा इत्यभिधा नाम यस्यास्तादृशी [illegible] समेत्य प्रभुं परमेश्वरमत्रीभजदुपास्ते स्म । च पुनः स सूरिः । उत्प्रेक्ष्यते—परम[illegible] पर्वतमिव तादृशमर्बुदनामानमादिमविभुमादिनाथं स्तवैः स्तोत्रैः कृत्वा अस्तावीत् स्तौति स्म । किं कृत्वा । सकलानां विभिन्नदेशागतत्वेन बाहुल्यात्समस्तानां संघानां [illegible] विघ्नानामन्तरायाणां छिदं विघातकं कपर्दिनामानं शत्रुंजयस्याधि[illegible] विलोक्य दृग्गोचरीकृत्य ॥ इति बाह्यप्राकारप्रासादेषु सकलजिनवर्णनम् ॥ इति [illegible]शिखरवर्णनम् ॥

सरस्यनुपमाभिधे शिखरिशेखरे मानसा-
लये तुहिनमेदिनीधर इव [illegible]णी ।
[illegible] समधिरूढवान्स शिखरं स्वरारोहणा-
भिधं कृतमिवामुना स्वरधिरोहणायाङ्गिनाम् ॥ ४२ ॥

[illegible]

निजस्य वह्लीभवत्यपि महोत्सवे द्वारि मां
जना असहजा इव प्रतिपदं निबध्नन्त्यमी ।
जहीति मम दुःखितां किमिति वक्तुकामं प्रभोः
पुरः स्थितमुपेत्य यज्जिननिकेतने तोरणम् ॥ ६१ ॥

यदस्मिन् जिनस्यार्हतो निकेतने गृहे मूलविहारे उपेत्य कुतश्चिदागत्य तोरण स्थित तिष्ठति स्म । उत्प्रेक्ष्यते—प्रभो ऋषभदेवस्य पुर इत्यमुना प्रकारेण वक्तुकाम कथयितुमीहमान किं स्थितमिव । इति किम् । हे प्रभो, निजस्यात्मन निजस्यात्मीयस्य वा कस्यचिन्महोत्सवे अतिशायिनि महे वह्लीभवति सान्द्रे निबिडे निरन्तर जायमाने सति असहजा वैरिण इवामी भूमीलोकवर्तिनो लोका मा तोरण प्रतिपद स्थाने स्थाने गृहद्वारि बहिर्लात्मार्गे वा निबध्नन्ति इत्यमुना प्रकारेण विद्यमाना मम दु खमस्यास्तीति दु खी दु खिनो भावो दु.खिता तामसुखवत्तां जहि व्यापादय । निवारयेति यावत् ॥ इति तोरणम् ॥

यदीयविभवैः पराजितजगत्त्रयस्पर्धिभिः
स्वकीयमुपदीकृतं विजितवैजयन्तेन किम् ।
दधार मणिमण्डपं किरणखण्डिताखण्डरु-
क्प्रचण्डरविमण्डलं वृषभतीर्थकृन्मन्दिरे ॥ ६२ ॥

वृषभतीर्थकृतो युगादिदेवस्य मन्दिर कर्तुः किरणै प्रतिदिश प्रसरज्ज्योतिर्दण्डैः खण्डित तिरस्कृतमखण्डाभिरक्षताभिः क्वचिदप्यप्रतिहताभिः रुग्भिः प्रचण्ड दुरालोक रवेर्भास्करस्य मण्डल बिम्ब येन तादृश मणिमण्डप विविधरत्नघटितजनाश्रय दधार धत्ते स्म । उत्प्रेक्ष्यते—पराजिताः पराभव लम्भिता जगत्त्रय्यास्त्रैलोक्यस्य त्रिभुवनस-बन्धिनः स्पर्धिनस्तुल्यविभवत्वेन सघर्षणशीला यैस्तादृशैर्यदीयविभवैः ऋषभदेवप्रा-सादसंबन्धिभिर्विभ्रमैः शोभातिशयैर्विजितेन परिभव नीतेन वैजयन्तेन इन्द्रप्रासादेन उपदीकृत ढौकित स्वकीयमात्मसंबन्धिनमर्थात्किं मणिमण्डपमिव ॥

अनन्यशिवकन्यका मनसि धर्मभूमीभृता
प्रदातुमिह काङ्क्षतोचितवराय कस्मैचन ।
स्वयंवरणमण्डपं मणिसुवर्णचित्रश्रिया-
ञ्चितः किमु विधापितः स्फुरति यन्महामण्डपः ॥ ६३ ॥

यस्य मूलप्रासादस्य महान् गगनाङ्गणालिङ्गी मण्डप. स्फुरति शोभते । उत्प्रेक्ष्यते—अनन्यामसाधारणीं सर्वातिशायिनी शिवकन्यका मुक्तिकुमारिका कस्मैचनानिर्दिष्टनाम्ने उचिताय भव्यादिसामग्रीभृते योग्याय वराय प्रधानाय परिणयनकामाय पुरुषाय इह

इत्यर्थः । च पुनर्जिनोर्वीभृता जिनराजाना चरणयोः पादयोः नमस्कृतिं प्रणाम चकार । पुनरपि मुनिमतङ्गजः साधुसिन्धुरः तिलकतोरणे 'तिलकुतोरण' इति नाम्नि विहारे श्रीजिनान् श्रीमत्तीर्थकृतो नवनवैर्नूतनैर्नूतनैः तात्कालिकैः सत्कृतैः स्तवैः स्तोत्रैः अस्तवीत्तुष्टाव । उत्प्रेक्ष्यते—गिरेः श्रीशत्रुंजयाद्रेस्तिलके विशेषके इव ॥

जिनाधिपसभाजनाप्लवविधानबद्धादरा-
रविन्दनयनाजनैः सममलंकृतं सर्वतः ।
जलाधिसुरयौवतैः प्रभुनिनंसयेव स्फुटी-
भवद्भिरमुना न्यभाल्यत पतङ्गकुण्डं ततः ॥ ९० ॥

ततस्तत्र तिलकतोरणे जिननमनानन्तरममुना सूरीन्द्रेण पतङ्गकुण्ड सूर्यकुण्डम् । कुण्डशब्दस्त्रिलिङ्गः । 'पेटो मठः कुण्डनीड—' इति लिङ्गानुशासने । न्यभाल्यत ददृशे । किंभूतम् । सर्वतः सर्वेष्वपि प्रदेशेषु सममेव एककालं समलंकृत सम्यक्प्रकारेण शोभितम् । कैः । जिनाधिपानामृषभदेवतीर्थकृता सभाजनार्थं पूजाकृते । 'सभाजने पश्यति विस्मिते सा सभाजनं तत्र ससर्ज तेषाम्' इति नैषधे । 'तेषा देवाना सभाजन पूजा ससर्ज चकार' इति तद्वृत्तिः । यः आप्लवः स्नानम् । 'स्नान सवनमाप्लव' इति हैम्याम् । तस्य विधाने करणे बद्ध आदरो बहुमान यैस्तादृशैररविन्दनयनारूपैर्जनैः । स्त्रीसमूहैरित्यर्थः । उत्प्रेक्ष्यते—प्रभोर्हीरविजयसूरेर्निनंसयानन्तुमिच्छया स्फुटीभवद्भिः प्रकटैर्जायमानैः जलाधिसुराणा सलिलाधिष्ठायकदेवाना जलदेवतानां यौवतैर्युवतीसमूहैरिव ॥ इति द्वितीयप्राकारप्रासादेषु देववन्दनम् ॥

विजित्य कलिना समं दुरितदुर्धरद्वेषिणः
सुखं स्थितिमुपेयुषः शिखरिमण्डलाखण्डले ।
ससालमणिमन्दिरं किमिह धर्मभूमीभुजो
न्यभालयदयं पुरः प्रवरवप्रवेश्मार्हतः ॥ ९१ ॥

अथ हीरविजयसूरिः पुरोऽग्रतः अर्हतः ऋषभदेवतीर्थकृतः सत्कः प्रवरः प्रकृष्टः वप्रः प्राकारो यत्र तादृग्वेश्म भवनं ससालं युगादिजिनविहारं न्यभालयत्पश्यति स्म । उत्प्रेक्ष्यते—इहास्मिन् शिखरिणां सर्वपर्वतानां मण्डलानां समूहानां मध्ये आखण्डलः शक्र इवाखण्डले सुखं सातं यथा स्यात्तथा स्थितिं निवासलक्षणामुपेयुषः प्राप्तवतो धर्मनाम्नो भूमिभुजः भूपालस्य सह सालेन प्राकारेण वर्तते यत्तत्ससालं तादृशं मणिमन्दिरं किं रत्नगेहमिव सुखं स्थितस्य । किं कृत्वा । कलिना कलिकालेन समं सार्धं दुरितानि पापान्येव दुर्धरानुत्कटान् दुष्टत्वात् द्वेषिणः सपत्नान् विजित्य सर्वात्मना पराभूय ॥

स्फुरत्करतराजिता स्फटिककल्पितारोहणा-
वलीमथममार्गयद्वरणगोपुराभ्यन्तरे ।

न्बहून् लोकान् पान्ति आजीविकाभिः रक्षयन्ति पालयन्तीत्यनेकपा.। 'बन्धनस्थोऽपि मातङ्ग' परेषा मरणक्षम' इति सूक्तवचनात्। सन्तो हस्तिनश्च तेषा कदनं व्यापादन मारणम्। 'निर्ग्रन्थन प्रमथन कदन निबर्हणम्' इति हैम्याम्। घातनाभिधानानि ॥ इति चैत्यकधरामुनेन्द्रा. ॥

युगादिजिनमन्दिरे शिखरमम्बराडम्बरं
विडम्बयति चण्डरुक्किरणमण्डलं वैभवैः ।
पुनर्निजसपक्षतामिव समीहमानो जिन
भजन्नमरभूधरो भुवनकामितस्वस्तरुम् ॥ ६६ ॥

युगादिजिन. प्रथमतीर्थकरस्तस्य मन्दिर गृह प्रासादस्तत्राम्बरे आकाशे आडम्बरः शोभातिशयो यस्य तादृश शिखर शृङ्ग वैभवैः सुषमाभि. कृत्वा चण्डरुच' सूर्यस्य किरणमण्डल ज्योति पुञ्ज विडम्बयति धिक्करोति अनुकरोति वा । यदुक्तम्—'विकलयति कलाकुशल हसति शुचिं पण्डित विडम्बयति । अधरयति धीरपुरुष क्षणेन मकरध्वजो देव. ॥' इति चम्पूकथाया विडम्बनार्थः। 'पुण्डरीकातपत्रस्त विकसत्कासचामर । ऋतुर्विडम्बयामास न पुन' प्राप तच्छ्रियम् ॥' इति रघौ। अनुकरणार्थोऽत्र। इत्यर्थद्वयमपि। उत्प्रेक्ष्यते—पुनर्द्वितीयवारमिन्द्रेण छिन्नपक्षत्वात् अपरवेलाया निजस्यात्मन' सपक्षता पक्षयुक्तत्वम्। पूर्वं सर्वेऽपि पर्वताः सपक्षा आसन्। तत स्वेच्छयोड्डीयोड्डीय यत्र तत्राप्यकाण्ड एवातर्किता आगत्य पतन्त सन्तः पृथिवीमतीव व्याकुलीकुर्वन्ति स्म। ततः पृथिवी स्वर्लोके पुरदरपुरो गत्वा पुत्करोति स्म। तदनु दम्भोलिपाणिना सादर सस्नेह पृष्टा सती लोचनयुगलगलद्बाष्पपय प्लवा सगद्गदस्वर कथकथमपि कथयामास। यत् 'मध्यमलोके समग्रा अपि गिरय. सपक्षत्वाद्यथाकाममुत्पत्योत्पत्य स्वरुचितस्थाने निपतन्तो मामतिभारभङ्गुरगात्रीं कुर्वाणाः खेदखिन्नमनस्का विदधते। तस्मादह तदतिगरिमोद्गारिस्फारभारासासहितया पातालमूल प्रवेक्ष्यामि।' इति वसुधावचनश्रवणानन्तर सजातातिकोपेन पुरहूतेन स्वपाणिप्रज्वलज्ज्योतिर्ज्वालाकरालदम्भोलिना कृत्वा सर्वेषामपि पर्वताना पक्षाः क्षणाच्छेदिता'-इति पुराणोक्ति श्रूयते। अथ पुनः पक्षाभ्या सहितत्व समीहमानो वाञ्छन् भुवनाना तात्स्थ्यात्तद्व्यपदेशात्त्रिभुवनजनाना सुरासुरनराणा कामिते वाञ्छितप्रदाने स्वस्तरुं कल्पवृक्ष तादृश नाभेय देव भजन् सेवमान. अमरभूधरो मेरुरिव ॥

अवेत्य जगदीहितं प्रददतं कदम्बाचलं
द्विधापि वसुधातलेऽखिलमहाभयालम्भिनम् ।
दरेण धरवैरिणः किमु भजन्ति यं भूधरा
यदल्पशिखरच्छलाल्पिततनूलतालम्बिनः ॥ ६७ ॥

[illegible] ततो [illegible] सोपानके तस्मिन् । [illegible] हैमकूटस्था [illegible] पीतपद्मानि अथ [illegible] तेषां [illegible] जायमानः [illegible] ॥

चतुष्कमधिरोहणात्क्रमविहारयोरन्तरा
व्यलोकत समाजवत्सुकृतभूमिभर्तुः प्रभुः ।
पुनर्मणिहिरण्मय जिननिकेतन तत्पुरः
सुधाशवसुधाधरोल्लसितचूलिकाचैत्यवत् ॥ ९५ ॥

प्रभुर्हीरविजयसूरिः अधिरोहणादधस्तनसोपानात्क्रमादुपरितनसोपानागमनात् सोपानक एव स्थितः । यत्र विहारयोर्मूलप्रासादप्राकारयोरन्तरा मध्ये चतुष्क 'चौक' इति प्रसिद्धम्। प्रासादाङ्गणभूमिमित्यर्थः। व्यलोकत दृष्टवान्। किंवत्। समाजवत्। उत्प्रेक्ष्यते— सुकृतभूमिभर्तुः धर्माभिधानपार्थिवस्य समाज सभामिव । पुनरन्यत्तत्पुरः तस्य चतुष्कस्याग्रे मणयः कर्केतनचन्द्रकान्तादिकास्तैर्युक्त हिरण्मय स्वर्णप्रधान रक्तकाञ्चनरचित जिननिकेतनमृषभदेवप्रासाद व्यलोकत ददर्श । किंवत्। सुधाममृतमश्नन्तीति सुधाशा देवास्तेषा वसुधाधरः पर्वतो मेरुगिरिस्तस्योल्लसिता उल्लास प्राप्ता शोभायुक्ता जाता या चूलिका शिखा अधित्यका वा तस्याश्चैत्यवत्सिद्धायतनमिव ॥

अथैकविशतिकाव्यैर्मूलप्रासादवर्णनम्—

तमीश इव तारकैर्ग्रहपतिर्ग्रहौघैरिवा-
सुरेश्वर इवासुरैरिव सुरैः सुरेशः पुनः ।
नरेन्द्र इव मानवैर्वृषभकेतनार्हद्गृहं
गृहैर्लघुभिरर्हता स्फुरति सर्वतोऽलंकृतम् ॥ ९६ ॥

[illegible]पर्ति [illegible] मन्दारमन्दारे। तेषां [illegible]वरं जयनशीलम् ॥ इति [illegible]कम् ॥

धनादि जगदीहितं प्रभवितास्मि दातुं पुन-
शिवादिकमलाकर प्रणय मां प्रभो त्वामिव।
इतीव जगदीश्वरं गदितुमुत्सुकीभावुकः
समेत्य सुमनोनिधो भजति चैत्यशृङ्गे स्थितः ॥ ६९ ॥

सुमनोनिधः [illegible] चैत्यशृङ्गे प्रासादशिखरे स्थितस्तिष्ठन् [illegible] जगदीश्वरं [illegible] भजति उपास्ते। उत्प्रेक्ष्यते—इत्यमुना प्रकारेण गदितुं [illegible] उत्कण्ठीभवनशीलः सन्निव। इति किम्। हे प्रभो [illegible], अहं धनादि [illegible] जगदीहितं जनमनःकाङ्क्षितं दातुं प्रभवितास्मि समर्थो भवामि। पुनस्त्वं मां शिवादिकमलाकर स्वर्गापवर्गप्रमुखल-क्ष्मीकारक प्रणय कुरु। किमिव। त्वामिव। यथा त्वां सर्वे सिद्धिकमलाकारिणं निगदन्ति ॥

विधास्यति विभोरहर्निशमुपास्तिमभ्येत्य यः
स मद्वदमृतस्फुरन्नुपरि सस्थितिं लप्स्यते।
विसृत्वरविनि सरत्करभरैरिदं प्राणिना
पुरः प्रवदतीव यत्कनकक्लृप्तकुम्भः स्वयम् ॥ ७० ॥

यस्य चैत्यस्य कनकेन काञ्चनेन क्लृप्तो रचितः कुम्भः कलशः विसृत्वरैः प्रसरणशीलैः विनि सरद्भिर्बहिर्निर्गच्छद्भिः करभरैः किरणसमूहैः हस्तसंपातैश्च कृत्वा स्वयमात्मना प्राणिनां सर्वेषां जगज्जन्तूनां पुरः पुरस्तात् इदमेतल्लिखेव काव्ये कथ्यमानं प्रवदति प्रकर्षेण कथयतीव। इदं किम्। हे प्राणिनः, यो जनः अभ्येत्य भगवत्पार्श्वे समागत्य अहर्निशम-होरात्रं विभोः ऋषभदेवस्योपास्तिं सेवां विधास्यति करिष्यति स पुमान् अमृते मोक्षे स्फुरन् कर्मराहित्याज्ज्योतिर्मयत्वाद्दीप्यमानः सन् उपरि त्रिभुवनस्याप्युपरितनप्रदेशे लोकाग्रे संस्थितिं निवासं लप्स्यते प्राप्स्यति। किंवत्। मद्वत्। यथाहं पार्थिवः कलशो-ऽहर्निशं विभुं सेवमानः अमृतेन पानीयेन स्फुरन् पूर्णत्वेन प्रकटीभवन् सर्वेषामपि चक्षुर्लक्ष्यः संपद्यमानः सन् उपरि जनमस्तकोपरि संस्थितिं लभे प्राप्नोमि ॥ इति चैत्यकलशः ॥

विभाव्य भुवनत्रये स्वविभवाङ्कारव्रजा-
न्विजेतुमनसामुना किमु जिनेशितुः सद्मना।
सपत्ननिवहस्सयाम्बुनिधिमाथमन्थाचलं
शिरःशिखरसंस्फुरन्निबिडदण्डरत्नं दधे ॥ ७१ ॥ ✓

[illegible] अवनिजन्मा [illegible] इमाः [illegible] निरन्तर [illegible] मन्दमनन्दकाः [illegible] कुटिलभाः [illegible] पुनरपि [illegible] नाभि [illegible] विस्तारेण [illegible] भावोऽत्र [illegible] नवोत्पन्न [illegible] प्रत्युत [illegible] गच्छते । यथा—'[illegible]' इति [illegible] । इति न दोषः । पुनरिमाः [illegible] मत्तमे [illegible] नियमो [illegible] । तत्त्वतस्तु मे- [illegible] भ्रमरान् । पुनः [illegible] मेत्संतराभिनाः । पुनरिमा पदे पदे स्थाने स्थाने [illegible] श्रयन्ति । तत्त्वतस्तु [illegible] पानीयानाम् । 'नीरं वारि जलं [illegible] पानीयमम्भः कुशं तोयं [illegible] ॥' [illegible] पुष्करमेतुल्य [illegible]-न्यागः पयःपाथसी [illegible] धारनिवासोऽमृतम्' ॥ इति हैम्याम् । [illegible] कल्लोलाः । 'तरङ्गे भङ्गवीच्युर्मिः' इत्यपि हैम्याम् । तेरद्व श्रयन्ति । पुनरिमा न- मन्तो नद्यीभवन्तः पार्श्वयोर्लगन्तः तथा निकटे समीपे वर्तन्ते आजीविका कुर्वन्तीत्येव- शीलास्तादृशानामवनिजन्मनामवन्या भूमानेव जन्मावतारो येषां त्रसानां द्वित्रिचतुःपञ्चे- न्द्रियाणां तिरश्चां तथा । खेचरजलचरभूचराणामवन्यामेवोत्पत्तिर्न तु देवगृहादौ, स्थाव- राणां तूभयत्रापि दृश्यमानत्वात्त्रसानामुपादानम् । तत्त्वतस्तु अवनिजन्मना वृक्षाणाम् । घा- तुका हननशीला इति श्वापदं निराकर्तुकामाभिः ॥ युग्मम् ॥ इति मूलप्रासादसोपानानि ॥

जिनेन्द्रसदनाग्रतोऽद्युतदनल्पशिल्पोल्लस-
त्सुवर्णमणितोरणं शिवसुधाब्धिजाकार्मणम् ।
निबद्धमपवर्गपूः प्रथमसाधनप्रक्रमे
जिनावनिबिडौजसः किमिह मुक्तिगेहे गिरौ ॥ ९० ॥

जिनेन्द्रस्य ऋषभस्वामिनः सदनस्य प्रासादस्याग्रतः पुरस्तात् द्वाराग्रे अनल्पैर्बहुभिर- नेकजातीयैः शिल्पैर्विज्ञानै रचनाविशेषैरुल्लसद्दीप्यमानं सुवर्णानां मणीनां सुवर्णमणिभिर्वा घटितं स्वर्णमाणिक्यमयं वा तोरणमद्युतत् द्योतते स्म दिदीपे । किंभूतं तोरणम् । शिवं मुक्तिरेव सुधाब्धिजा क्षीरसमुद्रपुत्री लक्ष्मीस्तस्याः कार्मणं संवननम् । वशिक्रिया- करणमित्यर्थः । उत्प्रेक्ष्यते—इहास्मिन्मुक्तिगेहे गिरौ शत्रुंजयशैले 'विमलगिरिमुत्ति- निलउ' इति शत्रुंजयकल्पे । तथा 'मुक्तिगेहं श्रियः पदम्' इति शत्रुंजयमाहात्म्ये । जिनावनिबिडौजसः श्रीजिनराजस्य अपवर्गो मोक्षः स एव पूर्नगरी तस्याः प्रथममादित एव साधनं स्वायत्तीकरणं तस्य प्रक्रमे प्रारम्भे निबद्धं रचितमिव । राज्ञा हि नवीननग- रग्रहणे पूर्वं तत्र तोरणं बध्यते इति रीतिः ॥

स्पर्धाविधायिनः विरोधिनो वा जगति विश्वे वैजयन्त इन्द्रप्रासाद आदौ येषां ते । स्वार्थे के । आदिकाल्लानिविजित्वरीभिः प्रतिस्पर्धिना विशेषेण जयनशीलाभिः पुवद्भावे विभूतिभिः स्वश्रीभिर्विजित्य पराभूय द्विपता सर्ववैरिणा विजयस्य पराभवनस्य बोधिका ज्ञापयित्रीं परेषां कथनशीला मूर्ध्नि निजमस्तके वैजयन्ती ध्वजोऽध्रियत धृतेव ॥

दिनं दिनमुदीत्वरद्युमणिचण्डिमाडम्बरो-
द्धुरप्रसृमरप्रभाप्रकरतापसंतापितः ।
रसं रसितुमम्बराम्बुधिवधूप्रवाहान्तरे
दिवि प्रकटितो ध्वजः स्वरसनेव जैनौकसा ॥ ७४ ॥

जैनौकसा अर्हत्प्रासादेन भगवत्सबन्धिविहारेण ध्वजो राजते इति सबन्धः । अम्बरस्याकाशस्य या अम्बुधेः समुद्रस्य वधूः पत्नी नदी एतावता गगनापगा स्वर्गङ्गा तस्याः प्रवाहस्य पयःपूरस्यान्तरे मध्ये रस पानीय रसितु पातुम् । 'क्षारं जलं जलनिधे रसितु क इच्छेत्' इति भक्तामरस्तोत्रे । दिवि आकाशे । उच्चैरित्यर्थः । उत्प्रेक्ष्यते— प्रकटिता स्फुटीकृता वक्राद्बहिर्विहिता ध्वजरूपा पताका काया स्वरसना आत्मजिह्वेव । कुत कारणात् । दिन दिनम् । अत्र प्रातरध्याहारः कार्यः । प्रतिवासरम् । 'दिनेश्वरश्रीरुदयं दिने दिने' । अत्रापि सप्तमी वा । उदीत्वरस्योदयनशीलस्य द्युमणेर्भास्करस्य चण्डिमतीव्रताया आडम्बर आटोपो बाहुल्य तेनोद्धुरा असह्यास्तया प्रसृमरा प्रसरणशीला या प्रभाः कान्तयस्तासां प्रकरः सहस्रसंख्यत्वेन समूहस्तस्य तापः सज्वरः ऊष्मातिरेकः तेन संतापितः ॥ इति पताका ॥

न कश्चिदुपलब्धिमान्न जनसंशयच्छेदकृ-
न्न कोऽपि च शिवगामी जगति पूर्ववद्दृश्यते ।
महोदयविधायकोऽर्हति निषेव्यता सांप्रतं
मही महिमसंपदां तदयमेक एवाचलः ॥ ७५ ॥

सदाकृतिवपुः पदं परिचरामि यस्य प्रभोः
प्रकाशितमिद स्वयं जगति तेन मत्स्वामिना ।
पट्टु प्रकटयाम्यहं गणिवदस्य तीर्थस्य त-
त्प्रभावमतिशायिनं त्रिभुवनाद्विचिन्त्येति किम् ॥ ७६ ॥

जिनेन्द्रसदनाम्बरान्तरनुपङ्क्तिश्रृङ्गाङ्गना-
निलप्रचलकेतनस्फुरदकुण्ठकण्ठीरवः ।
पुरस्त्रिजगदङ्गिनामिति निजान्तिकाकारण-
क्वणज्झणिति किङ्किणीध्वनिमिषेण किं ... ॥ ७७

सिद्धशैले प्रदातुमिच्छता पाणिं ग्राहयितुं वाञ्छता नाभिनाम्ना भूमीन्द्रेण राज्ञा मणीनां रत्नानां चन्द्रकान्तादीनामुपलक्षणात्कर्केतनादीनां गृहाणां काननानां निःशाखाविहारि तेषां श्रिया अथ वा चित्रकारिण्या आश्चर्यकारिण्या शोभयाभिनः कल्पितः नव-वरणमण्डपः स्वयं रोचिष्णुः, न तु पित्रादिभिरलंकृतः, रणमर्थ्यमानाभिरितरगिरिस्नुः कण्ठपीठे वरमालार्पणेन स्वीकरणं यत्र तादृशो विभाति: किमु शिल्पिना निर्मा-पित इव ॥

अवेत्य कलितौकस नभसि सिंहिकानन्दन
वनान्मिलितुमागताः किमिह गोत्रहार्दादमी ।
यदाप्तगृहकंधरास्फुरदमानपञ्चानना:
परा श्रियमशिश्रियन्नमृतकान्तिकान्तद्विपः ॥ १४ ॥

यस्य विमलाचलशिरःशेखरस्याप्तगृहस्य जैनप्रासादस्य कंधरायां शिखरोपत्यकायां स्फुरन्तो दृश्यमानाः शोभमाना वा अमानाः प्रमाणातीताः अतिबहवो ये पञ्चानना मृगेन्द्राः। 'यदनेककंधराहरिभिः कुक्षिगतीकृता इव' इति नैषधेऽपि । परा प्रकृष्टां श्रियं शोभामशिश्रियन् लभन्ते स्म । किंभूताः । अमृतकान्तिकान्ताश्चन्द्रमणयस्तेषां द्विपः श्वेतमविभ्रमवैरिणः । उत्प्रेक्ष्यते—नभसि आकाशे कलितौकसं निर्मितनिकेतनम् । गगनस्थायिनमित्यर्थः । सिंहिकानन्दनं स्वर्भाणुं केसरिणं वा अवेत्य ज्ञात्वा गोत्रस्य ज्ञातेर्हार्दात् । स्नेहला हि स्वजनाः स्वजनं प्रस्तावे मिलितुमायान्त्येवेति प्रथमव्यवहारतः वनात्स्वकाननात्सकाशात् अमी प्रत्यक्षलक्ष्याः पारीन्द्राः मिलितुं मिलनार्थमिह प्रासा-दोपरितनप्रदेशे आगताः समेता इव ॥

वने वसतिरेकिका जनुषि नः प्रसूतिः परि-
च्छदो न कदनं सदा पुनरनेकपानां हहा ।
जहीत्यसुखमाशु नः किमिति भाषितुं नाभिजं
भजन्ति गृहकंधरागतमृगेश्वराः श्रीजिनम् ॥ १५ ॥

गृहकंधरायामर्थाज्जिनसदनशिखरोपत्यकायां गताः शिल्पेन स्थिताः मृगेश्वराः केस-रिणः नाभेर्नाम्नो नृपाज्जायते स्म इति नाभिजः अथ च नाभेस्तुन्दकूपिकाया जायते स्मेति नारायणनाभिपुण्डरीकोत्पन्नं ब्रह्माणं श्रिया अतिशयलक्ष्म्या युक्तो जिनस्तीर्थकृत्त तथा श्रिया समुद्रनन्दिन्या युतो जिनो नारायणस्तं भजन्ते सेवन्ते । इत्यमुना प्रकारेण नोऽस्माकमसुखं दुःखं जहि घातय । इति किम् । हे जगन्नाथ, नोऽस्माकं वसति-र्वासो वने न च नगरादौ । पुनर्जनुषि अखिलेऽप्यवतारे एकैव प्रसूतिः संतानमेकमेव नान्यत् । 'एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम्' इति वचनात् । पुनः परिच्छदः परिवारोऽपि न स्ववपुः सहायत्वमेव । पुनर्हहा इति खेदे । सदा सर्वकालमपि अनेका-

केसरी मृगेन्द्रः लक्ष्मीं शोभा कलयति भगवच्चरणे ध्वजे वा कृत्येव न तु मूर्तिमान् । अतएवोत्प्रेक्षणम् । उत्प्रेक्ष्यते—द्युनिशमहोरात्र सेवन्ते इत्येवंशीलः सेवी तस्य भावः सेविता तया सेवनशीलत्वेन य. स्नेहः प्रेमातिरेक· तेन कारणेन स्वयमात्मनापि तं भगवन्तमनु पश्चात्पृष्ठे वा यियासुर्गन्तुमिच्छु किमु । इतो भूमिसकाशादम्बरमाकाशमुपगत प्राप्त यच्चैत्यस्य प्रासादस्य शृङ्ग शिखर तस्याध्वना मार्गेण कृत्वा प्रचलितः किमु प्रस्थित इव । इति गर्भितोत्प्रेक्षा । किं कृत्वा । स्वमात्मानमर्थाल्लाञ्छनपञ्चानन भुवि पृथिव्यामिवोज्झ्य मुक्त्वा च पुनः स्वयमात्मना निर्वृतावनन्तसुखस्थाने मोक्षे गत यात्वा च निरवधिसतिष्ठमान सिंहध्वज श्रीमन्महावीरदेवमवेत्य ज्ञात्वा ॥ इति पताकापञ्चाननः ॥

मृगाङ्ककरसंगमक्षरदमन्दपाथःप्लवै-
र्यदुच्चशिखरात्तमीमणिमणीगणैर्निर्मितात् ।
रजोभिरवगुण्ठितं प्रबलगन्धवाहव्रजै-
र्वपुः पवितुमात्मनो जिनगृहं निशि स्नाति किम् ॥ ७९ ॥

तमीमणिमणीना चन्द्रकान्तनाम्ना रत्नानाम् । 'निशारत्नकरौ चन्द्र' इति, तथा 'चन्द्रकान्तश्चन्द्रमणिः' इति द्वयमपि हैम्याम् । गणैर्निवहैर्निर्मितान्निष्पादितात् घटितात् प्रासादस्य उच्चाद्गगनसङ्गिनः शिखरात् मृगाङ्कस्य चन्द्रमसः करा· किरणास्तेषां संगमेन संपर्केण क्षरन्तो निःसरन्तो ये अमन्दा अविरला पाथसा पानीयाना प्लवा पूराः । प्रवाहा इत्यर्थः । तैः कृत्वा । उत्प्रेक्ष्यते—जिनगृहं भगवत्प्रासाद· निशि स्नाति किं स्नान करोतीव । किंभूतम् । प्रबलैः प्रचण्डैर्गन्धवाहव्रजैर्महावातैः कर्तृभि रजोभिरुड्डीनधूलीभिरवगुण्ठित धूसरित मलिनीकृतमात्मनः स्वस्य प्रासादसंबन्धिनो वपु· शरीरं पवितु पवित्रीकर्तुम् । निर्मला कर्तुमित्यर्थ. ॥

स्फुटस्फटिककल्पिता क्वचन जाह्नवीवावनी
क्वचिन्मरकताङ्किता स्थिरजला यमीवाजनि ।
कृतारुणमणीगणैः किमुत कुङ्कुमैरर्चिता
क्वचिद्विकचचम्पकैः परिचितेव चन्द्राश्चिता ॥ ८० ॥

क्वचन कुत्रापि प्रदेशे अवनी प्रासादमेदिनी स्फुट प्रकट यथा स्यात्तथा स्फटिकैः श्वेतरत्नैः कल्पिता रचिता अजनि । उत्प्रेक्ष्यते—स्थिर कथंचिद्दैवयोगादुमगमना स्थानाभावाद्वा अप्रवहमान जल सलिल यस्यास्तादृशी जाह्नवी गङ्गेव । पुनः क्वचित्प्रदेशे मरकतै· अश्मगर्भैर्नीलमणीभिरङ्किता कीलिता भूरजनि संजाता । उत्प्रेक्ष्यते—स्थिरजला केनचिद्देवेन दानपेनाकुतूहलात्कृतमप्रचलत्पयो यस्यास्तादृशी यमी यमुनेव । क्वचित्कुत्रचित्स्थाने अरुणमणीनां पद्मरागापराभिधाना रक्तरत्नाना गणैः पुञ्जैः कृता निर्मिता भूमिरजनि । उत्प्रेक्ष्यते—कुङ्कुमैः केसरैरर्चिता पूजितेव । पुन क्वचित् क्वापि स्थानके

यस्य प्रासादस्य अल्पानि मूलशिखरापेक्षया लघूनि यानि शिखराणि शृङ्गाणि तेषां छलेन कपटेन अल्पिता अल्पाः कुर्वन्तीति अल्पयन्ति अल्प्यन्ते स्मेत्यल्पिताः अल्पाः कृताः। 'मृषा न चक्रेऽल्पितकल्पपादपः प्रणीय दारिद्र्यदरिद्रतां नृपः' इति नैषधे। यास्तनूलताः शरीरयष्टीरालम्बन्ते आश्रयन्ते इत्येवंशीलाः भूधराः पर्वताः कदम्बाचल शत्रुंजयशैलम्। 'लोहिच्चिउ तालज्झउ कयउत्ति' इति शत्रुंजयकल्पे कदम्ब इत्यभिधानम्, तथा एकचत्वारिंशदभिधानेष्वपि कदम्बाभिधास्तीति। य कदम्बाचल भजन्ते। उत्प्रेक्ष्यते—वराणां गिरीणां वैरिणः शत्रोरिन्द्रस्य दरेण किमु भयेनेव। किं कृत्वा। वसुधातले भूमण्डले द्विधापि द्वाभ्यां प्रकाराभ्याम् ऐहिकामुष्मिकभेदात् जगतां भुवनानामीहितमभीप्सितं प्रददतं प्रकर्षेण सर्वोत्कृष्टतया विश्राणयन्तम्। अर्थात्स्वर्गे-वाकारिणं शत्रुंजयाद्रिमवेत्य ज्ञात्वा। तथा अखिलानां समस्तानां महाभयानां रोगगज-मृगेन्द्रदवानलविषधरसंग्रामसमुद्रवैरशत्रुप्रभृतीनां प्रबलभीतीनामालम्भो व्यापादनम-स्यास्तीति अर्थात्स्वाश्रितानां तादृशं वयमवेत्य शास्त्रवचसा लोकपरंपरया वा ज्ञात्वा॥

जगद्गिरिविजित्वरं महिमभिर्महीभृद्भरै-
रवेत्य भुवि भूधराभिनवसार्वभौमं नगम्।
स्वबालशिखरैरमुं किमु न सेवितुं प्रेषितैः
कुमारशिखरैर्बभे यदतितुङ्गशृङ्गाश्रयैः॥ ९८॥

यदतितुङ्गे यस्य प्रासादस्य अतिशयेन गगनालिङ्गित्वेन अत्युच्चैस्तरे महति शृङ्गे मूल-शिखरे आश्रयो निवासो येषाम्। मूलशृङ्गे लगन्ति अनेकानि अन्यानि अल्पानि शिख-राणि भवन्तीति प्रत्यक्षमपि लक्ष्यते। तादृशैः कुमारशिखरैर्लघुशृङ्गैः बभे शुशुभे। कुमारशब्दोऽत्र केवलं लघुत्वमेव वक्ति। यथा नैषधे—'रचयति रुचिं शोणिमेतां कुमारितरा रवेः'। अत्र तु कुमारितरा रवेः। कुमारितरा प्रथमनिर्गतत्वेन लघ्वी रुचिः कान्तिः। तथात्रापि महच्छिखरापेक्षया लघूनि अत एव कुमाराणि शृङ्गाणि इति। उत्प्रेक्ष्यते—महीभृतां भरैर्गिरीणां गणैः राज्ञां चक्रैश्च भुवि पृथिव्यां भूधराणां शैलानां भूपतीनां च मध्ये अभिनवं नवीनं प्रादुर्भूतं सार्वभौमं चक्रवर्तिनममुं नगं शत्रुंजयाच-लमवेत्य विज्ञाय तं सेवितुमुपासितुं प्रेषितैः स्वबालशिखरैः किमु निजनिजडिम्भशृ-ङ्गैरिव। राजानो हि चतुर्दशस्वप्नसूचितनवीनोत्पन्नचक्रवर्तिनं विज्ञाय स्वस्वकुमारनन्द-नास्तत्सेवार्थं प्रेषयन्तीति स्थितिः। यथा कल्पसूत्रव्याख्याने महावीरचरित्रे—'गजवृ-षभपञ्चाननादिमचतुर्दशस्वप्नसूचितमहावीरदेवजन्म ज्ञात्वा श्रेणिकचण्डप्रद्योतादय कुमाराः सेवार्थं स्वपितृभिः प्रहिताः'। इति किम्। नगं महिमभिस्तुङ्गताभिः। यदुक्तम्—'सर्वेषामपि शैलानामुन्नतो विमलाचलः। यदारोहेण लोकाग्रं प्राप्यते बालकैरपि॥' इति वचनात्तुङ्गिमा। माहात्म्यमस्य तु सर्वेभ्योऽभ्यधिकं प्रसिद्धमेवास्ति। जगत्सु विश्वेषु ये गिरयः पर्वताः पर्वतप्रायाः उच्चैस्तरत्वेनाभिमानितया वा तुङ्गाः। यथा—'तं मानतु-

उपेत्य जिनमन्दिरान्तरमितीव विज्ञीप्सया
भजन्ति सुरसुभ्रुवः प्रभुमनन्यचित्रोपधेः ॥ ८३ ॥

जिनमन्दिरान्तः श्रीऋषभचैत्यमध्ये उपेत्य अर्थात्स्वर्गलोकादागत्य अनन्यानामसाधारणाना चित्राणामुपधेशलेख्याना छलात्सुरसुभ्रुवः अप्सरस । 'स्वःस्त्रीगिवध्वोऽप्सरसः' इति हैम्याम् । प्रभु भगवन्त भजन्ति सेवन्ते । उत्प्रेक्ष्यते—इत्यमुना प्रकारेण किं विज्ञीप्सया विज्ञप्ति कर्तुमिच्छयेव । इति किम् । हे श्रिया चतुस्त्रिंशदुदयलक्ष्म्या त्रैलोक्याधिपत्यलक्ष्म्या वा लक्षितविभो स्वामिन् परमेष्ठिन्, भवचरणसेवनैः श्रीमत्पदपरिचरणैरस्माभिर्द्युलोकेन्दिरा स्वर्गलोकलक्ष्मीमधिगताः प्राप्ता । अथ नरजन्म विना मनुष्यावतार विनैव नोऽस्माक पुरातनाना शिवश्रिय मोक्षलक्ष्मीं सिद्धिसपत्ति दिश प्रदेहि ॥

प्रयोजयति नः सदा स्वपदसाभिलाषीभव-
त्तपस्वितपसां व्ययीकृतिविधौ विभो जम्भभित ।
इमा जहि विडम्बनां किमिति भाषितुं मण्टपे-
ऽथ वाप्सरस आगताः परिचरन्ति चित्रोपधेः ॥ ८४ ॥

हे विभो स्वामिन्, स्वस्यात्मनः पदे स्थाने इन्द्रैश्वर्यप्राप्तौ साभिलाषण [illegible] तेन्ते ये तादृशा भवन्तः सपद्यमाना ये तपस्विनस्तापसास्तेषा तपसां घोरानुष्ठानोपवासादिकष्टाना व्ययीकृतिविधौ नाशनिर्मापणप्रकारे जम्भभिद्वासव सदा चतुर्ष्वपि युगेषु नः अस्मानप्सरसः प्रयोजयति प्रयुङ्क्ते प्रेषयति । तथा च इन्द्रपदप्राप्त्यभिलाषेण तपः कुर्वतस्तापसान् कष्टध्यानतपोभ्य पातयितु पुरदरेण प्रेषिता अप्सरस [illegible] तद्रूपलावण्यमोहिता विस्मृतस्वतपोध्यानानुष्ठानास्ते ता एव [illegible] भाजो भूताः सन्तस्ततः सर्वं स्वकीय पुराचीर्णतपोमूलादेव हारयन्ति इति [illegible] कविसमयः । तत्कारणात् हे विभो त्रिभुवनजननाथ, त्व नोऽस्माक [illegible] । इमा येषा तेषा बालयुववृद्धकृशाजातिजातिप्रमुखाणा तपसा[illegible] [illegible] वनिता उर्वशीमेनकाघृताचीरम्भादिकाः प्रासादमण्डपे आगता [illegible] रन्ति भजन्तीव ॥ इति मण्डपमध्यचित्राणि ॥

कुतूहलिकृतासितोपलतलोर्ध्वमध्या क्वचि-
न्महारजतनिर्मिता जिननिकेतनस्तम्भकाः ।
विचित्रसुरविभ्रम प्रदधतः श्रिय बिभ्रते
तलोपरि विचा[illegible]नभूतः किमु [illegible] ॥ ८५ ॥

[illegible]

[illegible]

त्रिविष्टपविभूतिभिः प्रतिपदं परिस्पर्धिनो
विजित्य जिनसद्मना जगति वैजयन्तादिकान् ।
द्विषद्विजयतोषिकामिव नयन् मूर्ध्नि मन्येऽमुना
विहारशिखरे मरुत्तरलवैजयन्ती व्यधात् ॥ ७२ ॥

विहारस्य ऋषभचैत्यस्य शिखरे उपरि मरुता पवनवेगेन तरला चञ्चला अन्दोलायमाना वैजयन्ती महापताका व्यधाद्भासते स्म । तत्राहमेवं मन्ये विचारयामि । उत्प्रेक्ष्यते वा—अमुना सर्वप्रासादमूलभूतेन जिनगृहेण युगादिजिनचैत्येन प्रतिपद पातालोके स्वर्लोके भूलोके च स्थाने स्थाने क्रम क्रम वा । निजेनात्मना सह स्पर्धिन

रिवशेति प्रतिपादितम् । तस्या अस स्कन्धमासेदुषी आश्रितवती मरुदेवी नातिनृपपत्नी ऋषभदेवजननी अभाद्बभौ । उत्प्रेक्ष्यते—इति वक्तुं निवेदयितुं समेत्य कुतश्चित्स्थानादागत्य पुरो युगादिदेवस्याग्रे तिष्ठति स्मेव । इति किम् । हे आत्मज औरसपुत्र, अनन्यानामसाधारणानां गुणानां शौर्यौदार्यधैर्यगाम्भीर्यशौण्डीर्यार्जवमार्दवादीनामम्भोनिधिर्भर्तुः समुद्रस्य तव भवतः कृते अर्थाय अनन्तानां प्रमाणातीतानां ज्ञानिवचनगोचरातिक्रान्तावसानानां सातानां महासुखानामेका अद्वितीया भूः स्थानं शिवश्रीरेव मुक्तिरूपा कामिनी । पाणिग्रहणकरणोत्सुकयाद्भुच्यरुच्याध्वानं विलोकयतीत्यत एव स्मेरदृक्प्रोक्तम् । मुक्तिमानिनी मया तज्जनन्या निरीक्षिता नितरां सर्वगुणाधारतया प्रार्थिना विलोकितास्ति । तत्तस्मात्कारणात् त्वं वृषभ, एहि त्वरितमागच्छ । आगत्य च तां निर्वृतिनाम्नीं कनीम् अष्टादशकोटाकोटीसागरोपमप्रमितकालोऽभूत् कोऽपि भारतीयक्षेत्रसत्कपुमान् इतो नास्ति, अत एव प्रौढा कुमारिका इणु वस्य पारेणयेति ॥

> अयं श्रयति मां सदा तनय वाहनव्याजत-
>
> स्तदुद्धरतमाममुं श्रितहितो महान्यद्भवेत् ।
>
> इतीव गदितुं मुदा भगवतः पुरस्तस्थुषी
>
> समेत्य मरुदेव्यसौ गजपतेरुतासासिता ॥ ८८ ॥

असौ मूलप्रासादगर्भाग्रे दृश्यमाना मरुदेवी भगवन्माता उत गजपतेर्द्विपराजस्य [illegible] स्कन्धे आसिता उपविष्टा सती समेत्य ऋषभान्यर्णऽभ्यागत्य मुदा [illegible] भगवतः स्वपुत्रस्य परमेष्ठिनः पुरोऽग्रे पुरस्तात् तस्थुषी स्थितवती । उत्प्रेक्ष्यते—[illegible] गदितुं कथयितुमिव । इति किम् । हे तनय ऋषभदेव, अयं द्विपराजो [illegible] यानमिभात्सदा सर्वदापि मां तव मातरं मरुदेवीं [illegible] सेवते । तस्मात् [illegible] णादमुं करीन्द्र जगदुद्धरणधीर, उद्धरतमां सर्वथा सर्वप्रकारेण [illegible] न्मोचय । यद्यस्मात्कारणान्महानुत्तमः पुरुषः श्रितं [illegible] निजस्य पुरः समीहितमवश्यं करोत्येव । तदुक्तम्—'[illegible] न जो समुद्धरइ । सरणागयं [illegible] तिम्‌ तहि [illegible] ॥' [illegible] रुदेवा मरुदेव्यपि' इति [illegible] केचित्करिणीस्कन्धारूढा केचित्तु गजराजारूढा [illegible] अपि पुत्रगुणोद्देशे स्तुतनाब्द' ॥ इति [illegible] ॥

> [illegible] ॥
>
> [illegible] ।
>
> [illegible]
>
> [illegible] ॥ ८९ ॥

[illegible] इत्यर्थः । [illegible] भगवान् [illegible] प्रचल[illegible] ॥ [illegible] निजसा[illegible]. अनि[illegible] लघुपुरि[illegible] सुरासुरनराणां पुरः किम् । [illegible]—इत्यमुना प्रकारेण [illegible] भाति न वेति । इति किम् । [illegible] परिणमति येन, तेन [illegible] श्रीशत्रुंजयगिरावस्य जगति विषये । [illegible] इत्यर्थः । प्रकाशितं प्रकटतया कथितम् । यस्मादिति [illegible] प्रभावमहि- मानं पटु स्पष्टं यथा स्यात्तथा प्रकटयामि प्रकटी करोमि । किंवत् । गणिवत् । यथा गण- धरो भगवन्नार्थप्रतिपादितं सूत्रं पटु सहेतु युक्तिकं विस्तारयति, तथा श्रीमन्महावी- रार्हत्प्रकाशितमद्भुतमपि विमलाचलस्याद्भुतमाहात्म्यं प्रकाशयामीत्यर्थः । इदं किम् । यत- स्मात्कारणात् एतस्मिन्कलिकाले जगति विश्वेऽखिले । भरतक्षेत्रे इत्यर्थः । कश्चित्कोऽपि मुनिप्रमुखः उपलब्धिमान् मतिश्रुतावधिमनःपर्ययकेवलज्ञानयुक्तः पूर्ववच्चतुर्थारक इव न दृश्यते न चक्षुषा लक्ष्यते न च श्रवसा श्रूयते च । पुनर्जनानां भारतभूमिजन्मनां लोकानां संशयानां मानसिकानां शास्त्रसंबन्धिनां वा संदेहानां छेदकृन्निवारकः कोऽपि कश्चिदपि पूर्ववत्प्रदेशिराजस्य केशिगणधर इव नैव विभाव्यते नाकर्ण्यते च । च पुनर- धुना कोऽपि कश्चनापि शिवगमी चरमशरीरत्वेन केवलज्ञानमासाद्य मोक्षं गमिष्यतीति । 'यथा विदूराद्रिरदूरतागमी' इति नैषधे । तादृशोऽपि लोचनाभ्यां न विलोक्यते नापि च श्रुतेर्गोचरीक्रियते । तत्तस्मात्करणात् साम्प्रतं पञ्चमे दुःखमानाम्नि अरके लोकोक्त्या कलिकाले च महिमसंपदां मानातीतमाहात्म्यसंपत्तीनां महीं स्थानमाधारः । तथा महो- दयस्य राज्याद्वैताभ्युदयस्य मोक्षस्य च विधायकः । एकोऽद्वितीय एवायं न चापरः । अयं प्रत्यक्षलक्ष्यस्तया निश्चयेनाचलः श्रीशत्रुंजयशैलः निषेव्यतां सेवनीयत्वमर्हति योग्यो भवति । सर्वेषामपि भव्यानामयमेव सेवायां उचितोऽस्तीत्यर्थः ॥ त्रिभि- र्विशेषकम् ॥

स्वमौञ्ज्य भुवि निर्वृतौ गतमवेत्य सिंहध्वजं
यियासुरनु तं स्वयं ध्वनिशसेविता स्नेहतः ।
इतः प्रचलितोऽम्बरोपगतचैत्यशृङ्गाध्वना
ध्वजाङ्कगतकेसरी कलयति स्म लक्ष्मीमिह ॥ ७८ ॥

इह मूलप्रासादस्य शिखरे ध्वजस्य पताकाया अङ्के उत्सङ्गे गतः प्राप्तः स्थितो वा

विधिना निहितम् । अथवा सम्यग्दृशा सुदृष्टीना भव्याना दृशा नेत्राणां शीतलताकृते अमृताञ्जन सुधासवन्धि कज्जलमिव वेधसा सृष्टम् ॥

युगादिसमये यथा भुवनमुद्धृत संसृते-
स्तथैव पुनरुद्धराम्यहमवद्यकाले कलौ ।
विचिन्त्य किमिदं हृदा वृषभकेतुरत्रात्मना-
वतीर्य कुरुते स्थितिं स्थिरतयात्ममूर्तिच्छलात् ॥ ९२ ॥

वृषभकेतुर्युगादिदेव आत्मना स्वयमेवात्र शत्रुजयमूलविहारे अवतीर्य मोक्षादागत्य आत्मनो निजस्य वृषभस्यैव मूर्तेः प्रतिमायाश्छलात्कपटात् स्थिरतया अव्यग्रचित्तत्वेन न तु गमनौत्सुक्येन स्थितिं निवास कुरुते । उत्प्रेक्ष्यते—हृदा स्वमनसा कृत्वा इद वक्ष्यमाण किं विचिन्त्य विचार्यैव । इति किम् । यथा युगस्य लक्षणया चतुर्थारकस्यादेस्तृतीयारकस्य पर्यन्तसमयस्तस्मिन्प्रस्तावे ससृतेः ससारात्सकाशाद्भुवन विश्वमुद्धृत निस्तारित पुनर्द्वितीयवार तथा तेनैव प्रकारेणाहमृषभः अवद्यकाले प्रबलपापोपचितसमये कलौ कलियुगे पञ्चमारकेऽपि भुवन जगदुद्धरामि ससारकारागारादुद्धृत्य सुखेन महानन्दपुर प्रापयामीति ॥ इति ऋषभप्रतिमा ॥

चतुष्कपृथिवीं ततः परिचरन्स विस्मेरिता-
रविन्दसवयोविलोचनयुगेन योगीश्वरः ।
जगद्विजयिनीं जिनाधिपतिवेश्मलक्ष्मीं पिब-
न्हृदा त्रिजगदिन्दिरां करगतामिवामन्यत ॥ ९३ ॥

योगिना मनोवचनकाययोगवता वशीकृतेन्द्रियाणा वा ईश्वर स्वामी स हीरविजयसूरिः हृदा स्वमनसा कृत्वा त्रिजगदिन्दिरा त्रैलोक्यलक्ष्मीं करगता हस्तप्राप्तामिवामन्यत जानाति स्म । यथा कश्चित्पुमान् जगदाधिपत्य कथमप्यधिगत्य परमानन्द विन्दति तथा सूरीन्द्रोऽपि प्रासाददर्शनानन्तरमद्वैता मुदमालोकयाचकार । स किं कुर्वन् । पिबन् सादरमवलोकयन् । काम् । जगद्विजयिनीं त्रिभुवनप्रासादपरम्परावैभवपराभवित्रीं जिनाधिपतिवेश्मन. ऋषभचैत्यस्य लक्ष्मीं शोभाम् । केन । विस्मेरत्व सजातमस्मिन्निति विस्मेरित सूर्येण विकासित यदरविन्द कमल तस्य सवयसा मित्रेण । तत्तुल्येनेत्यर्थ. । विलोचनयोर्नयनयोर्युगेन द्वन्द्वेन कृत्वा । पुन स किं कुर्वन् । तत प्राकारमध्ये आगमनानन्तर चतुष्कपृथिवीं प्रासादाग्रेतनभूमिकाम् 'चउक' इति लोकप्रसिद्धाम् । 'नारीमनासीव चतुष्कमन्त' इति रघुवशे । परिचरन् सेवमान । प्रासादाग्रचतुष्के समेत इत्यर्थ ॥

जिनेन्द्रभवनं शिखोदयनभःपरीरम्भण
प्रतिक्षितिशतक्रतुः स शमपक्ष्मया सगतः ।

च चन्द्रेण काञ्चनेन । 'तपनीयचामीकरचन्द्रभर्म' इति हैम्याम् । तथा 'चन्द्रोऽम्बुकाम्ययोः । स्वर्णे सुधांशौ कर्पूरे कम्पिल्ले मेचकेऽपि च ॥' इत्यनेकार्थः । अनेन सहिता भूमिका अजनि भवति स्म । उत्प्रेक्ष्यते—निकनचम्पककलिं कनकचम्पककुसुमोपचारैः परिचिता सहितेव ॥ इति शिखरपार्श्वप्रदेशाः ॥

सुरासुरनरस्फुरन्मिथुनचारुचित्रव्रजः
पुपोष सुषमां जिनावसथमण्डपस्यान्तरे ।
जगत्त्रयमिवागतं विमलशैलयात्राकृते
स्थितं किमतिभावतः पुनरिहार्हतः संनिधौ ॥ ८१ ॥

जिनावसथस्य ऋषभचैत्यस्य मण्डपस्य रङ्गमण्डपस्यान्तरे मध्ये सुरासुरनराणां देवदानवमानवानां स्फुरतां शोभां लभमानानां मिथुनानां दम्पतीसत्कनिवयुगलानां चारूणि त्रिलोकमनोहराणि यानि चित्राणि आलेख्यानि तेषां व्रजः सुषमां सातिशायिशोभां पुपोष पुष्णाति स्म । उत्प्रेक्ष्यते—विमलशैलस्य श्रीशत्रुंजयाद्रेर्यात्राकृते यात्राकरणार्थमागतं स्वस्वस्थानात्समायातं सत् अतिभावतो वासनाधिक्यात्पुनरर्हतः श्रीऋषभदेवस्य संनिधौ समीपे किमु स्थितं निरन्तरमुषितं जगत्त्रयं त्रैलोक्यमिव ॥

वरीतुममृताह्वयामिह पतिंवरां कन्यकां
स्वयंवरणमण्डपे किमुपजग्मिवांसः समम् ।
जिनेन्द्रगृहमण्डपे लसदनल्पशिल्पीकृताः
सुरासुरधरास्पृशां समुदया ददन्ते मुदम् ॥ ८२ ॥

जिनेन्द्रगृहस्य प्रासादस्य मण्डपे जनाश्रये लसन्ति परस्परं श्लिष्यन्ति क्रीडन्ति वा शोभमानानि वा । 'लस श्लेषणक्रीडनयोः' अयं धातुः शोभार्थेऽपि दृश्यते । तथा अनल्पानि बहूनि विविधजातीयानि वा शिल्पानि चित्रविज्ञानानि । त्रिष्वपि कर्मधारयः । लसदनल्पशिल्पानि कृता लसदनल्पशिल्पीकृताः तादृशाः सुरा देवाः, असुरा दानवाः, धरास्पृशो मनुष्यास्तेषां समुदाया गणा मुदं प्रमोदं ददन्ते यच्छन्ति । आनन्दयतीत्यर्थः । 'दद दाने' आत्मनेपदी । अत्र बहुवचनम् । उत्प्रेक्ष्यते—अमृतं मुक्तिस्तदेवाह्वयो नाम यस्याः । 'अथाह्वयोऽभिधा गोत्रं संज्ञानामधेयाः' इति हैम्याम् । तादृशीं पतिंवरां स्वेच्छया स्वाभिलषितयोग्यवरस्य वरयित्रीं स्वयंवरां कन्यकां कुमारिकाम् । कन्यैव पतिं वृणोति नान्येति रीतिनीतिधर्माः । इत्याशयाद्वरीतुं परिणेतुम् । अत्र तु मुक्तेः कनीत्वं कविसमयानुसारेणैव । केवलं स्वयंवरणमण्डपे समं समकालमेकसमय एव देवदानवमानवव्रजाः किमुपजग्मिवांसः समागता इव ॥

भवच्चरणसेवनैरधिगता द्युलोकेन्दिरा
विनैव नरजन्मना दिश शिवश्रियं श्रीप्रभो ।

स्वर्णानि पुष्पाणि जलस्थलजातानि कमलमालतीप्रमुखाणि तेषां व्रजाः समूहाः तैरव-ध्यंत वर्धिता । क इव । जगद्गुरुरिव । यथा तीर्थनाथः अग्निभिर्भव्यजनैः सुरासुरनरैर्मौक्ति-ककलितरजतमदारजतनयर्युमं स्वाभाविकजुगुमैश्च वर्ध्यते । किंभूतानाम् । सुमनसां पुष्पाणां देवानां च । 'प्रतिशाखं प्रतिपत्रं प्रतिफलं देवैरधिष्ठिता' इति शत्रुंजयमाहात्म्ये । समूहैः श्रिता । जगद्गुरुरपि समवसरणे जानुप्रमाणपुष्पैश्चतुर्निकायनाकिनिकरैश्च से-वितः स्यात् । च पुनर्या सपभर्तुः सपपतेः शिरसि मस्तके पयसा क्षीरवृक्षत्वात्क्षीराणां भरैर्धाराभिर्वर्षणं वृष्टिं कृतवती । केव । घनागमोन्नमदमन्दकादम्बिनीव । यथा घनानां मेघानामागमे प्रावृट्समये । 'वर्षास्तपात्ययः प्रावृड्मेघात्कालागमौ क्षरि' इति हैम्याम् । उन्नमन्ती जलभरैर्नम्रीभवन्ती तथा अमन्दा मिलदद्भ्राभ्रिकाभिर्बहुला जायमाना का-दम्बिनी मेघमाला गिरेः पर्वतस्य शिरसि शिखरे पानीयानां व्रजैर्वर्षति ॥

असावपि किमक्षयाजनि न सिद्धशैलाश्रया-
दनन्तयतिनः शिवश्रियमवापुरस्यास्तले ।
युगादिजिनपादुका किमधिदेवतास्या मरु-
द्रवीव विहितेहिता श्रियमुवाह राजादनी ॥ ९७ ॥

मन्त्रतन्त्रयन्त्रविधाना विविधा सिद्धयो यस्य स सिद्ध उच्यते । तादृशश्चासौ शैलश्च शैलनामा कश्चित्सिद्धपुरुषः शत्रुंजयपर्वतश्च तस्याश्रयो नित्याङ्कस्थायुकत्वेन सश्रयस्त-स्मात्कारणादसावपि राजादन्यपि । उत्प्रेक्ष्यते—अक्षया सर्वदैव विद्यमानत्वाद्वा क्षयर-हिता किमजनि जातेव । पुनरस्या राजादन्यास्तले मूलसंनिधौ भूमिभागे अनन्ता अन्तातीता यतिनः साधवः । मत्वर्थीय इन्प्रत्ययः । 'ब्रह्मशर्मभरचारुयतीव' इति नै-षधे । शिवं मोक्षमवापुर्लेभिरे । पुनरस्यास्तले अधोभूमिभागे युगादिजिनपादुका ऋष-भदेवपादद्वन्द्वप्रतिमा आस्ते । उत्प्रेक्ष्यते—अस्या राजादन्या अधिदेवता किमधिष्ठात्री देवीव । पुनर्या विहितं निष्पादितम् । पूरितमित्यर्थः । ऐहिकमिहलोकसंबन्धि पुत्रकलत्रवै-भवादिकमामुष्मिकं परलोकसंबन्धि स्वर्गापवर्गादिमभीहितं यया तादृशीव वर्तते । केव । मरुद्गवीव । यथा कामधेनुः कृतजनाभिलषिता भवति तादृशी सा राजादनी शोभामु-वाह वहते स्म ॥

विहारमिव संमदाद्व्रतिवसुंधरावासवः
प्रदक्षिणयति स्म तत्प्रथमतीर्थकृत्पादुकाम् ।
जिनाधिपमिवाध्वनि द्रुमपरम्परा तं तदा
ननाम किमु भक्तितः फलभराच्च राजादनी ॥ ९८ ॥

व्रतिवसुंधरावासवो मुनीनां मध्ये मेदिनीन्द्रो राजा हीरसूरिर्विहारं जिनप्रासादमिव सा चासौ प्रथमतीर्थकृतो नाभेयदेवस्य पादुका च तत्पादप्रतिकृतिं प्रदक्षिणयति स्म

रस्थूणाः श्रियं शोभां बिभ्रते कलयन्ति। किंभूताः। स्वर्णघटिततलेऽपि शिरोभागे—ॠ-तुहलिभिः कैश्चित्कौतुकवद्भिः शिल्पिभिः कृतानि असितोपलानामिन्द्रनीलमणीनां तल स्तम्भाधो विभागः ऊर्ध्वं स्तम्भोपरितनप्रदेशः मध्ये स्तम्भान्तराले तत्र प्रदेशद्वये। कर्मधारये। मध्यानि येषां ते। किं कुर्वन्तः। विशिष्टचित्ररूपाः सुरा देवा अथ वा विचित्रा विविधजातीयाश्चतुर्निकायिका देवतास्तेषां विभ्रममन्त कल्पितशिल्पत्वेन विलासं विभूषां भ्रान्तिं वा प्रदधतो धारयन्तः। उत्प्रेक्ष्यते—तलमधोवर्ती भूमिभागः भूमीप्रदेश एव विवक्षया न तु भूमध्यगो विभागः तथा उपरिशिखरोच्चचूलिका मध्ये स्तम्भविलासे एतावता मध्ये भागद्वयं तानि भजन्ति इति तलोपरि विचालभाञ्जि तादृशानि वनानि अधोभूमौ भद्रसालवनं शिखरचूलिकायां पाण्डुकवनं विचालभागद्वये तु नन्दनं सौमनसं चैत्याख्यानि चत्वारि काननानि बिभ्रतीति भृतः तादृशाः स्वर्णगा मेरुपर्वता इव। 'रत्नसानुः सुमेरुः स्व'स्वर्गिकाञ्चनतो गिरिः' इति हैम्याम्॥

हरिर्य इह सेवकस्तव जिनेन्द्र सोऽस्मद्द्विप-
न्विधापय मिथस्ततस्त्वदमुना समं सौहृदम्।
इतीव गदितुं वृषध्वजजिनालयस्तम्भको-
पधेरखिलभूभृतः प्रभुमुपेत्य शीलन्त्यमी॥ ८६॥

वृषो वृषभो ध्वजश्चिह्नं लाञ्छनं यस्य तादृशो जिनो युगादिदेवस्तस्यालयं गृहं ऋषभविहारस्तस्य स्तम्भका आधारस्थूणास्तेषामुपधेर्व्याजादमी प्रत्यक्षलक्ष्या मन्दरादयः अखिलाः समस्ताः भूभृतः पर्वता उपेत्य अत्र प्रासादे समागत्य प्रभुं श्रीऋषभस्वामिनं शीलन्ति भजन्ति। उत्प्रेक्ष्यते—इत्यमुना प्रकारेण गदितुं कथयितुमिव। इति किम्। हे जिनेन्द्र युगादिप्रभो, इह जगति यो हरिरिन्द्रस्तव भवतः सेवकस्त्वत्पादपद्मसेवाविधातास्ते सोऽस्माकं द्विपन् शत्रुः पक्षच्छेदकर्तृत्वेन प्रबलप्रतिपक्षो वर्तते ततस्तस्मात्कारणात् हे प्रभो, त्वदमुना त्वद्भक्तिभाजा हरिणा सममस्माकं मिथः परस्परं सौहृदं मैत्र्यं सखिभावं विधापय कारय। महात्मना प्रभुणा च स्वयमन्तरा भूय: कृतः संधिः कदाचिदपि न विघटते इति वक्तुमिव॥ इति प्रासादमध्यस्तम्भाः॥

अनन्यगुणवाहिनीशितुरनन्तसातैकभूः
कृते तव निरीक्षितात्मज मया शिवस्मेरदृक्।
तदेहि वृणु तां कनीमिति समेत्य वक्तुं पुरः
स्थितेव मरुदेव्यभात्करिवशासमासेदुषी॥ ८७॥

यस्मिन् प्रासादे करिणो हस्तिनो वशा पत्नी हस्तिनी। यद्यपि वशाशब्देन करिणी कथ्यते। 'इभः करेणुर्गजोऽस्य स्त्री धेनुका वशापि च' इति हैमीवचनात्। तथापि वशाशब्दो नार्यामेव प्रायो वर्तते। तत्कारणादेव मनुष्यजातिस्त्रीभ्रमनिवारणार्थं च क-

ल्गम् । कमिव । भक्तमिव । यथा सेवासक्त पुमान् स्वामिपुरस्तात्प्रत्यासन्ने नातिदूरे तिष्ठति ॥

प्रणम्य जननीं जिनेशितुरिभांसमासेदुषीं
स गर्भभवने पुनः किमु न देवयुक्छन्दके ।
जिनं स्वयमिव स्थितं विकचनेत्रपद्मैः पिब-
न्नवाङ्मनसगोचरां मुदमविन्दत श्रीगुरुः ॥ १०१ ॥

स हीरविजयसूरिरिति नाम्ना प्रसिद्धः श्रिया गणभृल्लक्ष्म्या युक्तो गुरुस्तत्त्वज्ञः जैनधर्माद्धाना धर्मोपदेष्टा जिनं श्रीऋषभतीर्थंकरं विकचैर्विनिद्रैर्नेत्रपद्मैः । पूज्यत्वाद्बहुत्वम् । नयनकमलदलैः पिबन् सादरमवलोकयन् सन् अवाङ्मनसयोर्न वचनचेतसोर्गोचरं विषयातीतम् । वाचा वक्तुं न शक्यते चेतसा च ज्ञातुं न पार्यते इत्यर्थः । तादृशीं मुदमानन्दमविन्दत प्राप्नोति स्म । किंभूतं जिनम् । स्थितं स्थितिं कृतवन्तम् । उत्प्रेक्ष्यते—स्वयमात्मनैव मोक्षादागत्यात्र तस्थिवांसमिव । क्व स्थितम् । गर्भभवने भवनस्य गर्भो गर्भभवनं । 'क्वचिदमाद्यन्तस्य परत्वम्' इति सूत्रेण भवनस्य परत्वम् । तस्मिन् गर्भागारे । उत्प्रेक्ष्यते—देवेत्यादिपदेन युनक्ति योगं प्राप्नोति संबन्धं लभते इति देवयुक् तादृशश्छन्दकः । स्वार्थे कः । एतावता देवच्छन्दकस्तस्मिन्निव । प्रागपि समवसरणे मध्ये प्राकारान्तर्देवच्छन्दक आसीत्, तत्र च सुखं तिष्ठन्नासमानः शयान आसीत्तद्वत् । किं कृत्वा मुदमविन्दत । जिनेशितुः श्रीऋषभध्वजस्य जननीं मातरं प्रणम्य मरुदेवीं प्रणामविषयीकृत्य । किं चकुषी । इभस्य गजराजस्य अंसं स्कन्धमासेदुषीमाश्रितवतीम् । आरूढामित्यर्थः । यदुक्तं स्थानाङ्गे चतुर्थस्थानकचतुरन्तक्रियाधिकारे—'मरुदेवा हि स्थावरत्वेऽपि क्षीणप्रायकर्मत्वेनाल्पकर्मा अविद्यमानमानतपोवेदना च सिद्धा गजवराधिरूढाया एवायुःसमाप्तौ सिद्धत्वात् ।' इति ॥

जिनाननिशीथिनीमणिनिरीक्षणप्रोल्लस-
द्गदन्तरमुदम्बुधिस्फुरदभङ्गभङ्गैरिव ।
स गौतमगणीन्द्रवच्चरममादिमं श्रीजिनं
सुधामधुरिमाङ्कितैरभिनवैः स्तवैरस्तवीत् ॥ १०२ ॥

स सूरिरादिमं प्रथमं श्रीजिनमृषभं सुधावत् पीयूषैरिव मधुरिम्णा माधुर्येण अङ्कितैः कलितैस्तथा अभिनवैर्नवीनैः स्वयं विहितैः स्तवैः स्तोत्रैः अस्तवीत् तुष्टुवे । 'ष्टुञ् स्तुतौ' धातुरुभयपदी । किंवत् । गौतमवद्गणीन्द्रवत् । यथा गोतमनामा गणिना साङ्गे प्रवचने अधीतानां मध्ये इन्द्रो गणधरश्चरमं श्रीजिनं महावीरं भगवन्तम् अथ वा शत्रुंजये यात्रार्थं समेतो जगच्चिन्तामणिः इति नमस्कारो नाभिनरिन्दमल्हार इति स्तवनमित्यादि प्रघोपान् स्तवैश्च स्तौति स्म । अथ स्तवैः । उत्प्रेक्ष्यते—जिनस्यादिदेवस्य आननं मुखं

युगादिजिनसद्मनि विमलाचलमूलप्रासादे गर्भगेहः गर्भागारः श्रियं शोभां श्रयति । उत्प्रेक्ष्यते—वृषकेतुना जातोक्षध्वजेन ऋषभदेवेन कर्त्रा स्वयमात्मना अत्र विमलशैलस्य शत्रुंजयाद्रेश्चूलिकायां पर्वतोपरिविभागे अधित्यकोर्ध्वप्रदेशे नाभीभुवा सृष्टिकर्त्रा । नि-वातु पार्श्वे इत्यर्थः । विलासार्थं क्रीडाकृते मणिमयं मन्दिरं रत्नमन्दिरमकारि कारि-तमिति । ण्यन्तप्रयोगः । कया । महोदयनाम्न्या मृगीदृशा सिद्धिवध्वा सह सार्धं विनो-दस्य विविधविलासस्य निर्मित्सया निर्मातुं काङ्क्षया ॥

अनेकनरनिर्जरोरगपुरंदरोपासितं
सदःसदनमुन्नये विमलशैलभूमीभुजः ।
वृषाङ्कजिनवासवौकसि विचित्रतौर्यत्रिक-
प्रपञ्चपटुमण्डपे श्रियमुवाह गर्भालयः ॥ ९० ॥

वृषाङ्को युगादिदेवः स एव जिनानां सामान्यकेवलिनां मध्ये वासवः पुरंदरस्तस्यौको मन्दिरं तस्मिन् गर्भालयो गर्भागारः श्रियं लक्ष्मीं शोभामुवाह धारयति स्म । किंभूते ओकसि । विशिष्टानि चित्राण्यालेख्यानि येषां विविधप्रकाराणि वा विशेषाश्चर्यकार-काणि वा तौर्यत्रिकाणि गीतनृत्यवादित्राणां त्रयाणि त्रित्वसंख्याकानि तेषां प्रपञ्चो वि-स्तारस्तेन पटुः प्रकटः स्पष्टभूतो मण्डपो यत्र तत् । तत्र गर्भागारवर्णने अहमेवमुन्नये विचारयामि । 'वितर्कः स्यादुन्नयनम्' इति हैम्याम् । विमलशैलः श्रीशत्रुंजयाद्रिः स एव भूमीभुक् राजा अथवा विमलनाम्नः शैलानां सर्वपर्वतानां भूमीभुजो राज्ञः सदः-सदनं सभागृहमिव । 'नृपस्य नातिप्रमनाः सदोगृहम्' इति रघुवंशे । किंभूतं सद-नम् । अनेके बहवो ये नराणां मनुष्याणां निर्जराणां देवानामुरगाणां नागानामुपल-क्षणादसुराणां पुरंदरा इन्द्रास्तैरुपासितं सेवितम् ॥ इति गर्भागारः ॥

सुरासुरनरेन्दिरादिमसमग्रकामप्रदा
कृताम्बुजभुवा लता क्रतुभुजामपूर्वा किमु ।
रसायनमिवान्तरामयजुषां च सम्यग्दृशां
दृशा किममृताञ्जनं वृषभमूर्तिरत्राबभौ ॥ ९१ ॥

अत्र मूलप्रासादगर्भागारे वृषभमूर्तिर्युगादिजिनप्रतिमा आबभौ शोभते स्म । उ-त्प्रेक्ष्यते—अम्बुजभुवा पद्मजन्मना जगत्सृष्टिविधायिना विधिना सुरासुरनराणां देवदा-नवमानवानामिन्दिरा आधिपत्यलक्ष्मीः आदौ प्रथमं येषां ते समग्राः सर्वेऽपि कामा मनसामभिलषितानि तान्प्रकर्षेणातिशयेन ददातीति तादृशी । अत एवापूर्वा नान्यगदृशी किंत्वसाधारणा क्रतुभुजां देवानां लता वीरुत् कल्पवल्लीव कृता किमु निर्मितेव । च पुनः आन्तरामयान् अन्तरा अष्टकर्माण्येव रोगास्तान् जुषन्ते भजन्ते तादृशानां पुं-सामाभ्यन्तररोगोच्छेदनाय रसायनं पारदजातभस्मौषधमिव सदौषधमिव

एतेनापि दर्शितः एव चतुस्त्रिंशत्तदतिशयरूपा पद्मिनीसद्मा पद्मवासा लक्ष्मीः । पद्मिन्याः कमले सद्म गृहं यस्याः सा । एतावता । 'श्रीर्हरिप्रिया । पद्मवासा' इति हैम्याम् । तथा 'पद्मिनी योषिदन्तरे । अब्जेऽब्जिन्यां सरस्यां च' इत्यनेकार्थः । तया । किंवत् । विटपिवत् । यथा विटपी पादपः विनिद्रया विकसितया वनवीरुधा विपिनवल्लया समालिङ्ग्यते ॥

जय प्रकटयन्पथो रविरिवाथ मथ्नंस्तमः
कुदृग्भिरिव कौशिकैर्जगति दुर्निरीक्ष्यः पुनः ।
गजेन्द्र इव वज्रिणः स्फुरदखण्डशौण्डीरिमा
मृगारिरिव निर्भयः परिभवन्कुरङ्गान्पुनः ॥ १०५ ॥

हे ऋषभ, त्वं चिरं जय । किं कुर्वन् त्वम् । प्रकटयन् । कान् । पथो मार्गान् । धर्मकर्मसबन्धिनः स्वर्गापवर्गनरकादिकान्वा । क इव । रविरिव भास्वानिव । यथा भास्करः पथो भुवो मार्गान् प्रकाशयति स्पष्टान् दर्शयति । अथ पुनः रविरिव तमोऽज्ञानं पापं वा ध्वान्तं च मथ्नन्निर्दलयन् । पुनः रविरिव कौशिकैर्घूकैरिव जगति विश्वे कुदृग्भिः कुपाक्षिकैः दुःखेन कष्टेन निरीक्षितुं द्रष्टुं शक्यः । पुनर्वज्रिणो वासवस्य गजेन्द्र इव ऐरावण इव । स्फुरन् स्फूर्तिं प्राप्नुवन् अखण्डः परैः सुरासुरनरैरप्रतिहतः शौण्डीरिमा पराक्रमो यस्य । पुनर्मृगारिरिव निर्भयो देवमनुजतिर्यक्कृतोपसर्गपरिषहादिभ्यो भीतिरहितः । पुनः कुरङ्गः कुमतकुदर्शनमिथ्यात्वादिषु रङ्गो रागो वासना येषां तान् । 'रङ्गः स्यान्नृत्तयुद्धयोः । रागे' इत्यनेकार्थः । मृगांश्च परिभवन्मथ्नन् ॥

जयानिमिषसानुमानिव सुजातरूपः पुनः
प्रभञ्जनभरैः कथंचन न कम्प्रभावं भजन् ।
सुधांशुरिव बोधयन्कुवलयं विलासैर्गवा
समुल्लसितगौरिमा कलितशीतलेश्यः पुनः ॥ १०६ ॥

हे युगादिदेव, त्वं जय चिरं विजयवान् भव त्रिभुवनोपकारं कुर्वाणः प्रवर्तस्व । किंभूतः । अनिमिषाणां देवानां सानुमान् शैलः सुमेरुरिव सुष्ठु शोभनं त्रैलोक्यातिशायि जातमुत्पन्नं प्रादुर्भूतं वा रूपं यस्य मेरौ तु प्रकृष्टं जातरूपं स्वर्णं यस्मिन् । पुनः किंभूतः । प्रकर्षेणातिशयेन भजता उपमर्दनाव्याघातादिकारिण उपसर्गाः प्रतिकूलदेवादयो वा तेषां भरैर्गणैः कथंचन कम्प्रभावं कम्पनशीलतां कातरतया भग्नपरिणामतां न नैव भजन् । मेरुस्तु वातवेगैश्चाचलित्वं न भजते चालयितुमशक्यः । पुनः सुधांशुश्चन्द्र इव गवां विलासैः पञ्चत्रिंशद्गुणाकलितयोजनविस्तरद्वाचां चातुरीभिश्चन्द्रिकाप्रचारैश्च कुवलयं मेदिनीमण्डलं तत्र स्थायुकत्वेन उपलक्षणत्वाज्जगत्त्रयमपि उत्पलं च बोधयन् प्रतिबोधं प्रापयन् प्रतिबोधकलितं कुर्वन् विकाशयंश्च । पुनः किंभूतः । समुल्लसिता स्फूर्तिमत्ता प्राप्तः चतुरलोचनपुटकपेयतां प्राप्तो वा गौरिमैव विकचचम्पककाञ्चनवद्वपुःपीतिमा

प्रदक्षिणयितुं मुदारभत गीतिभिः सुभ्रुवा
सुमेरुमुडुमालयेव सममोषधीनायकः ॥ ९४ ॥

स व्रतिक्षितिशतक्रतुः हीरविजयसूरिराजः सुभ्रुवां स्त्रीणां गीतिभिर्मङ्गलगानैः सम जिनेन्द्रभवन भगवत्प्रासाद मुदा हर्षेण प्रदक्षिणयितु त्रिः प्रदक्षिणागोचरीकर्तुमारभत। प्रारब्धवानित्यर्थः । किंभूतो व्रतिपतिः। शमः शान्तिर्नाम तस्य वा पद्मा लक्ष्मीस्तया सगतः सहितः। किंभूतं जिनेन्द्रभवनम्। शिखायाः शिखरस्य उदयेन उच्छ्रायेन। 'उच्छेद उदयोच्छ्रायौ' इति हैम्याम्। उच्चत्वेन कृत्वा नभ आकाशं परीरम्भते आलिङ्गतीत्येवशीलम्। भवनशब्दः पुनपुंसकलिङ्गे। 'भवनभुवनयानोद्यानवातायनानि' इति लिङ्गानुशासने। तेन पुलिङ्गविशेषणम्। क इव। औषधीनां नायक इव। यथा औषधीनाथश्चन्द्र उडुमालया नक्षत्रश्रेण्या सम सुमेरु स्वर्णाचल प्रदक्षिणयति प्रदक्षिणीकृत्य भ्राम्यति दक्षिणपार्श्वे प्रणीय पर्यटति ॥

स देवकुलिकान्तरे जिनपुरंदरान्संमदा-
दवन्दत तदा जिनाधिपतिकेतनस्याभितः।
मरुद्वसतिवत्ततः सुरपरम्परोपासिता
व्यलोकि विभुना पुरः प्रमुदितेन राजादनी ॥ ९५ ॥

तदा प्रदक्षिणादानन्दसरससूरिर्जिनाधिपतिकेतनस्य मूलचैत्यस्याभितः परितश्चतुर्दिक्षु देवकुलिकाना लघुदेवगृहाणा 'देहरी' इति प्रसिद्धानामन्तरे मध्ये जिनपुरंदरान् भगवत्प्रवरप्रतिमाः समदादानन्दादवन्दत नमस्करोति स्म। ततः कतिचिद्देवकुलिकासु जिनबिम्बवन्दनानन्तर प्रमुदितेन हृष्टमनसा विभुना गणस्वामिना गुरुणा पुरोऽग्रे राजादनी क्षीरिका 'रायणि' इति प्रसिद्धा। 'नवनवति पूर्ववारान् यस्मिन्समवसरय्युगादिजिन। राजादनीतरुतले विमलगिरिरय जयति तीर्थम् ॥' इति पूर्वसूरिकृतस्तुतौ। व्यलोकि दृष्टा। किंभूता। सुराणा चतुर्निकायिकदेवाना परम्पराभिः श्रेणीभिरुपासिता सेविता। केव। मरुता भवनपतिव्यन्तरज्योतिष्कविमानिकाना वसतिर्निवास स्थानमिव। यथा मरुद्वसतिः सुरालीभिः परिशीलिता आस्ते ॥

अवर्ध्यत स मौक्तिकैः रजतहेमपुष्पव्रजै-
र्जगद्गुरुरिवाद्रिभिः सुमनसां समूहैः श्रिता।
गिरेरिव घनागमोत्तमदमन्दकादम्बिनी
ववर्ष पयसां भरैः शिरसि संघभर्तुश्च या ॥ ९६ ॥

या राजादनी अद्रिनिर्यासि[illegible] यद् मौक्तिकैर्मुक्ताफलैर्वर्तन्ते ये [illegible] रजताना [illegible]निर्मिता हेम्ना सुवर्णेन [illegible]निर्मिता पुष्पाणि कुसुमानि [illegible]

रजोवगुण्ठनं वा यस्माद्यस्य वा तत्त्वेनोदितं कथितं प्रादुर्भूतो वा । पुनः किंभूतः । जलजवत् शङ्खवन्निरेखइव विशुद्धो निष्पापो निर्मलश्च आशयो मनो मध्यं च यस्य सः । पुनः किंभूतः । सुधारसः पीयूषमिव सकलानां त्रिभुवनभवनोदरवर्तिनां जन्तूनां प्राणिनां जीवातुको जीवनौषधम् । पुनः किंभूतः । जगति विश्वे भवभूतो भविकजीवान् भवात्संसारात्तारयन् संसारपरपारवर्तिमुक्तिनगरीं प्रापयन् । किंवत् । पोतवत् । यथा पोतो यानपात्रमम्बुधे समुद्रमध्याज्जनान् सांयात्रिकलोकान्निस्तारयति ॥

जयेश इव कालभिच्छ्रितशिवश्च मृत्युंजयो
वहन्निरवलम्बतां गगनवत्पदं ज्योतिषाम् ।
युगादिसमये पुनर्जगदशेषसृष्टिं सृजन्
न्सरोजतनुजन्मवत्कलमराललीलागतिः ॥ १०९ ॥

हे सुरभीनन्दनकेतन जिन, त्वं जय सर्वेभ्योऽप्युत्कृष्टतया प्रवर्तस्व । त्वं किंभूतः । कालभित् कालं कलियुगं भिनत्तीति । क्विप्प्रत्यये । पुनः किंभूतः । श्रितं शिवं कल्याणं महानन्दश्च । पुनः किंभूतः । मृत्युं मरणं जयतीति जरामरणरहितत्वात्सिद्धत्वाच्च । क इव । ईश इव । यथा शंभुरपि कालनामानं दानवं भिनत्तीति । तथा श्रिता अर्धाङ्गीकृता शिवा पार्वती येन । तथा मृत्युंजयनाम लोके अनाद्यन्तत्वात् वर्तते । पुनः किं कुर्वन् । गगनवदाकाशवत् निर्गतं अवलम्बं आधारं आश्रयो वा यस्मात्तस्य भावस्तत्तां वहन्धारयन् । पुनर्ज्योतिषां तेजसां पृष्ठवर्ति भामण्डलभावाद्ग्रहनक्षत्रतारकाणां च पदं स्थानम् । पुनः किं कुर्वन् । सृजन् विदधत् । काम् । जगदशेषसृष्टिं जगतां भुवनजनानामशेषां समस्तां कुलशिल्पशिक्षकादिकां सर्गरचनाम् । क । युगस्यादौ सर्वलौकिकव्यवहारप्रकटीकरणप्रथमसमये । पुनः किंभूतः । कलो मनोज्ञो यो मरालो राजहंसस्तद्वल्लीलया मन्थरत्वेन न त्वौत्सुक्येन त्वरिततया वा चापल्येन वा गतिर्गमनं यस्य । किंवत् । सरोजतनुजन्मवत् । यथा पद्माङ्गजन्मा विधाता । 'पद्मनन्दनसुतारिरंसुता' इति नैषधे । युगानां कृतद्वापरत्रेताकलिनाम्नां कालविशेषाणामादिसमये जगतां सुरासुरनरनारकतिरश्चां समग्रां गृहाट्टनगनगरादिकां सृष्टिं सृजति स्म । कलमरालेन कृत्वा क्रीडया गमनं यस्य हंसवाहनत्वात् ॥

शरत्समयपङ्कजाकर इव प्रसन्नाशयः
कुशेशयपलाशवन्निरुपलेपभावं भजन् ।
प्रमद्वरपदं दधन्न च कदापि भारुण्डव-
द्विशेषक इवालिकं विमलभूधरं भूषयन् ॥ ११० ॥

हे वृषभध्वज जिनेन्द्र, त्वं जयेति संबन्धः । त्वं किंभूतः । शरत्समयो जलदाहविरामकालस्तस्य तन्नाम्ना यः पङ्कजाकरस्तटाकः तद्वत् प्रसन्नः प्रसादोपेतः अच्छोऽना-

प्रदक्षिणीचकार । च पुनस्तदा तस्मिन् सूरे प्रदक्षिणादानावसरे फलाना सस्थाना भराद्भारादतिशयाद्वा राजादनी ननाम नम्रीवभूव । उत्प्रेक्ष्यते—भक्तितो गुरौ सेवासक्तिवशादिव नमति स्म । केव । द्रुमपरम्परेव । यथा पादपानां पटली अध्वनि भगवति विहार कुर्वाणे सति मार्गे जिनाधिप नमति तीर्थनाथं प्रति प्रह्वीभवति ॥ इति राजादनी ॥

समीक्ष्य शिखिभोगिनौ स सखिवन्मिथः संगतौ
ततो यमिमतङ्गजो जिननिशीथिनीनायकान् ।
जसूप्रथमठक्कुरप्रवररामजीकारितो-
ल्लसज्जिनविहारयोस्त्रिचतुरास्ययोर्नेमिवान् ॥ ९९ ॥

ततो राजादनीऋषभपादुकाप्रदक्षिणाप्रणमनानन्तरं यमिमतङ्गजो वाचंयमकुञ्जरः सूरिर्जिननिशीथिनीनायकान् जिनचन्द्रविम्वान् नेमिवान् नतिगोचरीचक्रिवान् । कयो' । जसू इति शब्दः प्रथम पूर्वं यत्र तादृशठक्कुरः एतावता लोकप्रसिद्ध्या जसूठार इत्यभिधानः, तथा प्रवरो धर्मकर्मदातृतादिगुणप्रधानो यो रामजी नामा व्यवहारी ताभ्या कारितयोः शिल्पिभिर्निर्मापितयोः । तथा उल्लसतो विविधरचनाचारुशोभाभि' स्फुरतोस्तादृशयोर्जिनविहारयोस्तीर्थंकृत्प्रासादयोः। किभूतयोः । त्रिचतुरास्ययोः त्रीणि तथा चत्वारि आस्यानि द्वाराणि ययोः । त्रिमुखचतुर्मुखयोरित्यर्थः । कि कृत्वा । समीक्ष्य दृग्गोचरीकृत्य । कौ शिखिभोगिनौ मयूरभुजगमौ । किभूतौ । मिथः परस्पर सगतौ मिलितौ । किवत् । सखिवत् सखायाविव मित्रे इव ॥

स भक्तमिव नाभिभूप्रभुपुरोऽनिशस्थायिनं
प्रणम्य गणधारिणं तदनु पुण्डरीकाभिधम् ।
जिनेन्द्र इव देशनासदनमादिदेवालयं
समं मनुजराजिभिः श्रमणपुंगवः प्राविशत् ॥ १०० ॥

श्रमणेषु साधुषु पुंगव' प्रधान श्रेष्ठ । 'स्युरुत्तरपदे व्याघ्रपुगवर्षभकुञ्जराः' इति हैम्याम् । तथा 'पुगवो गवि भैषज्ये प्रधाने चोत्तरस्थितः' इत्यनेकार्थः । अथ वा श्रमणाना मध्ये पुगवो वृषभो गणभारधुरधरत्वात् सूरिर्मनुजराजिभिः भव्यलोकमालिकाभिः सममादिदेवालयमृषभप्रासाद प्राविशत्प्रविशति स्म । क इव । जिनेन्द्र इव । यथा तीर्थंकर' सुरासुरैर्नरै' सार्धं देशनासदन समवसरण प्रविशति । किं कृत्वा । तदनु जसूठाररामजीसाहिविहारयोर्भगवद्बिम्वप्रणमनादनु पश्चात्पुण्डरीक इत्यभिधा नाम तादृश गणधारिणमृषभजिनप्रथमगणधरम् । यदुक्तम्—'ऊसप्पिणीए पढम सिद्धो इह पढम चक्किपढमसुओ । पढमजिणस्सपपढमो गणहारीजच्चपुण्डरिओ ॥' इति शत्रुंजयकल्पे । प्रणम्य नमस्कृत्य । किभूतम् । नाभिनाम्नः कुलकरादुत्पत्तिर्यस्य तादृशो नाभिनन्दन एव प्रभुः स्वामी जगन्नाथस्तस्य पुरोऽग्रे दृग्गोचरे अनिशमहोरात्र तिष्ठतीत्येवंशी-

अदीक्षयत्तत्र स काश्चिदिभ्यतनूभवान्गोतमवद्गणीन्द्रः ।
काश्चित्ककुश्रेष्ठिमुखाङ्गभाजस्तुर्यव्रतोच्चारमकारयच्च ॥ ११४ ॥

तत्र प्रासादद्वारे गणिनामनूचानानामिन्द्रः पुरंदरः गणनायको वा कांश्चिदिभ्यतनूभवान् व्यवहारिनन्दनानदीक्षयत्प्राव्राजयद्दीक्षां ददाति स्म । किंवत् । गोतमवत् । यथा गोतमस्वामी इभ्यान्नृपराजान् दीक्षयति स्म । पुनः कांश्चित् अणहिल्लपाटकपत्तनसत्ककुनाम श्रेष्ठी प्रमुखो मुख्यो येषां तादृशानङ्गभाजो भव्यांस्तुर्यव्रतं ब्रह्मचर्यं तस्योच्चारं प्रत्याख्यानमकारयत् ब्रह्मचर्यमुच्चारयति स्म ॥

पुण्डरीकान्तिकस्थास्नुरथोद्दिश्य वशीव सः ।
श्रीशत्रुंजयमाहात्म्यं वृषाङ्कवदभाषत ॥ ११५ ॥

अथ दीक्षादानानन्तरं पुण्डरीकनाम्ना ऋषभदेवप्रथमभृत्तन्मूर्तेरन्तिके समीपे तद्देवकुलिकामागत्य तत्पार्श्वे एव स्थास्नुस्तिष्ठतीति एवंशीलः एतावता मूलप्रासादद्वारादुत्थाय पुण्डरीकमूर्तेः पार्श्वे आगत्योपविष्ट इत्यर्थः । तादृशो वशी जितेन्द्रियः सूरिर्विशो यात्रिकलोकानुद्दिश्य श्रीशत्रुंजयमाहात्म्यं विमलाचलमहिमानमभाषत कथयति स्म । किंवत् । वृषाङ्कवत् । यथा ऋषभदेवः पूर्वं सिद्धशैलमाहात्म्यं भाषते स्म ॥

यत्तीर्थेऽन्यत्र शुद्धाध्यवसितिविशदध्यानतः पूर्वकोट्या
प्राणी बध्नाति पुण्यं भवति भवभृता तत्क्षणेनाप्यमुष्मिन् ।
भेतव्यं पातकेभ्यो भुवि न भविजनैर्भेद्यनिर्भेददक्षे
क्ष्माभृत्यस्मिञ्शरण्ये पुनरहिमरुचीवान्धकारोत्करेभ्यः ॥ ११६ ॥

अन्यत्र अपरस्मिंस्तीर्थे शुद्धा निष्पापा या अध्यवसितिरध्यवसायः शुभपरिणामस्तेन कृत्वा यद्विशदं शुक्लध्यानं तस्मात्सप्ततिवर्षकोटिलक्षषट्पञ्चाशत्कोटिसहस्रवर्षमानपूर्वाणां कोट्या शतलक्षैः कृत्वा यत्पुण्यं शुभकर्म प्राणी बध्नाति जन्तुरुपार्जयति तत्पुण्यं तावत्प्रमाणं सुकृतममुष्मिन् शत्रुंजये तत्क्षणात्स एव क्षणस्तत्क्षणस्तस्मात् । तत्काल एवेत्यर्थः । अष्टादशनिमेषैरेका काष्ठा, द्वाभ्यां काष्ठाभ्यामेको लवः, पञ्चदशभिर्लवैरेका कला, द्वाभ्यां कलाभ्यामेको लेशः, पञ्चदशभिर्लेशैरेकः क्षणः, षड्भिः क्षणैरेका घटिका, द्वाभ्यां घटिकाभ्यां मुहूर्तम्, इत्यादिकालमानम् । भवभृता भविना भवति जायते । पुनर्भुवि पृथिव्यां शरणागतवज्रपञ्जरे अस्मिन् शत्रुंजयनाम्नि पर्वते पृथ्वीपतौ च सति भविजनैर्भव्यलोकैरनन्तदुःखदातृत्वाद्वैरिभूतेभ्यः पातकेभ्यः कथंचित्प्रमादात्पापानि कृत्वा न नैव भेतव्यं न भयमानेयम् । किंभूते । भेद्यानि भेत्तुं योग्यानि दुःकर्माणि तेषां निर्भेदे घातने निवारणे दक्षे निपुणे । यदुक्तं शत्रुंजयमाहात्म्ये—'न भेतव्यं पातकेभ्यः प्रमादिभिः । श्रूयतामेकवेलं श्रीसिद्धक्षेत्रकथानकम् ॥' कस्मिन्निव । अहिमरुचीव । यथा अभ्युदिते सहस्रकिरणे अन्धकाराणां ध्वान्तानां भयं नानीयते । हिमादन्या अ-

तदेव निशीथिनीमणिश्चन्द्रः । 'निशारत्नाकरौ च चन्द्रः' इति हैम्याम् । तस्य निरीक्षणेन दर्शनेन प्रोल्लसन्नुद्वेलीभवन् यो हृदन्तरे मनोमध्ये मुदानन्दस्तस्य एवाम्बुधिः समुद्रस्तस्य स्फुरन्तो विस्तरन्तो ये अभङ्गाः भङ्गाः कल्लोलास्तैरिव ॥

जय त्रिदशशेखरोन्मिषितपुष्पमालागल-
न्मरन्दकणमण्डलीस्नपितपादपद्मद्वय ।
जयामृतनितम्बिनीहृदयतारहारो जग-
त्त्रयीजनसमीहित त्रिदशसालवत्पूरयन् ॥ १०३ ॥

हे जिन, त्वं जय विजयस्व सर्वोत्कर्षेण प्रवर्तस्व। हे त्रिदशा देवास्तेषां शेखरा अवतंसाः। 'आपीडशेखरोत्तंसावतंसाः शिरसः स्रजि' इति हैम्याम्। तेषामुन्मिषितानि विकसितानि यानि पुष्पाणि कुसुमानि तेषां माला माल्यानि श्रेणयो वा ताभ्यो गलन्तो निष्पतन्तो ये मरन्दाः पुष्परसाः तेषां कणा बिन्दवस्तेषां मण्डलीभिः स्नपितं प्रक्षालितं धौतं पादौ चरणावेव पद्मौ कमलौ तयोर्द्वयं युगलं यस्य स तस्य संबोधनम्। पुनः हे जिन, त्वं जय। त्वं किंभूतः। अमृतं महानन्दस्तदेव नितम्बिनी दुर्वरारोहा महिला तस्या हृदये स्तनान्तरे उज्ज्वलः। अथ वा ताराणां निर्मलमौक्तिकानां हारो मुक्तावली। हारोपम इत्यर्थः। 'तारो निर्मलमौक्तिके' इत्यनेकार्थे। हे पूरयन् संपूर्णीकुर्वन् हे विश्राणयन्। संबोधने 'शत्रानशौ' इति प्रक्रियासूत्रेण संबोधने शतृप्रत्ययः। तथा च 'गतिस्तयोरेष जनस्तमर्दयन्' इति नैषधे संबोधनं पदं वृत्तौ व्याख्यातमस्ति। किंभूतः। जगतां विश्वेषां त्रयीणां स्वर्गपातालभूमीनां जनानामेतावता सुरासुरदानवमानवानां समीहितं मनसामभिलषितम्। किंवत्। त्रिदशसालवद्यथा कल्पद्रुमः सर्वेषां समीहितं पूरयति ॥

जयोल्लसितकेवलामलतमात्मदर्शोदरा-
नुबिम्बितजगत्त्रयाखिलपदार्थसार्थ प्रभो ।
जय त्रिभुवनाद्भुतातिशयपद्मिनीसद्मना
विनिद्रवनवीरुधा विटपिवत्समालिङ्गित ॥ १०४ ॥

हे प्रभो स्वामिन्, हे उल्लसितमावरणापगमात्प्रकटीभावं प्राप्तं यत्केवलं लोकालोकप्रकाशनप्रगुणपञ्चमज्ञानम्। 'केवलं त्वेककृत्स्नयोः। निर्णीते कुहने ज्ञाने' इत्यनेकार्थः। तदेवामलतमः अतिशयेन विशुद्धो य आत्मदर्शो दर्पणस्तस्योदरे मध्ये अनुबिम्बिता प्रतिबिम्बयुक्ता जाताः सक्रान्ता नागलोकस्वर्लोकभूलोकानां त्रयस्याखिलाः समस्ताः पदार्था यावद्वस्तूनि तेषां सार्थाः समूहा यस्य तस्य संबोधने त्वं जय। हे समालिङ्गित सम्यक्प्रकारेण कृताश्लेषक, या त्रिभुवने त्रैलोक्येऽपि अद्भुताश्चर्यकारिणी अतिशयरूपा स्वाभाविका आजन्मजाताश्चत्वारस्तथा कर्मणां घाताज्जाता एकादश तथा देवनिर्मिता

[illegible] पुत्राणां पौत्रादीनां [illegible] । [illegible] । निरगाधन् । यथा स्वर्गिणां [illegible] लोकप्रसिद्धया [illegible]नुनीते । उत्प्रेक्ष्यते—दैत्यो ह्येऽपि [illegible] विमलाद्रि [illegible] तुल्यमन्यत्तीर्थं नास्ति लोकान् [illegible] विधिना एषा प्रत्यक्षलक्ष्या [illegible] किंतु [illegible] ॥

[illegible]र्न पुरा ज्ञात्रनिर्मित्सयेशानजम्भद्विषा ।
[illegible] यस्मिन्नसौ जह्नुनेव प्रवाहो नगेऽष्टापदे ॥ १२० ॥

पुरा पूर्वं [illegible] केवलज्ञानिनाम्ना प्रथमतीर्थंकर- [illegible] शत्रुंजयनाम्नि नगे [illegible] अर्थात्केवलज्ञानितीर्थकृन्मूर्तेरेव ज्ञात्रस्य [illegible] जम्भद्विषा इन्द्रेण सिद्धसिन्धोर्गङ्गा- [illegible] शत्रुंजयाभिधाना सिन्धुरा नायता आनीता वा [illegible] शत्रुंजयमाहात्म्ये [illegible] । [illegible] । जह्नुनेव । यथा सगरचक्रिणः षष्टिसह- [illegible] अष्टापदाभिधाने नगे [illegible] अर्थात्काञ्चनप्रासादमणिमयप्रति- [illegible] । दण्डरत्न[illegible]रितसहस्रयोजनोद्वेध[illegible]शैलपरित खातिकाखातपूरणार्थमि- [illegible] । [illegible] मन्दाकिन्या एव प्रवाहो दण्डरत्नेनैव पानीयोऽथ आ- [illegible] शत्रुंजयमाहात्म्ये एवास्ते ॥

रसकूपीदिव्यौषधीसुवर्णमणिरत्नभूमिरेष गिरिः ।
शिव इव सकलाः सिद्धीः पुनर्दधानः श्रियं श्रयते ॥ १२१ ॥

एष शत्रुंजयाख्यो गिरिः पर्वतः श्रियमद्वैतवैभवत्वेन शोभां श्रयते धत्ते । किंभूतः । रसकूपीनां लोहताम्रादीनां हेमविधायकै रसैः परिपूर्णानां लघुकूपानां तथा दिव्यानां देवा- धिष्ठातृत्वेन महाप्रभावाणामोषधीनां सुवर्णरजतकारकाष्टमहाभयस्तम्भकरोगविनाशक- निधिदर्व्यादिदर्शकाञ्जिलकामितकारकादीनां विविधजटिकानां सुवर्णानामुपलक्षणाद्रूप्यत्र- पुसीसकताम्रलोहादीनां मणीनां चन्द्रकान्तादीनां रत्नानां कर्केतनप्रमुखाणां भूमिरर्थात्स्व- र्णादिखनीनामुत्पत्तिस्थानम् । पुनः किं कुर्वाणः । सकलाः सर्वजातीयाः सिद्धीर्दधानो धारयन् धत्ते । धारणं तु युक्तमेव । यतः स्वस्मिन् स्वस्य वा यद्भवति तत्परस्मै दीयते परं स्वस्मिन्नेव यन्न भवति तत्परस्मै कुतो दीयते । असौ तु एकतानो भवन्मानसानिशमाराधकानामैहिकामुष्मिकाः सर्वाः सिद्धीः प्रदत्ते । क इव धत्ते । शिव इव । यथा ईश्वरोऽणिमा लघिमा वशिता-ईशिता-प्राकाम्य महिमा-अणिमा-यत्रकामाव- सायसायित्व-प्राप्तिः इत्यष्टसिद्धीर्दधाति ॥

सूर्योद्यानं सुरेन्द्रोर्दिशि विपिनमिव स्वःसदा भाति यस्मि-
न्स्वर्गोद्यानं त्वपाच्या दिशि गिरिकमलानीलचेल किमेतत् ।

[illegible] न यस्य । 'गोरः [illegible]' [illegible] । पुनः किभूतः । [illegible] शीतलेश्या शीतलता न येन ॥

जय प्रशमयन्मनोभवभटं महाबोधित-
स्फुरत्कमलकाननोन्नमदकाण्डचण्डाम्बुद. ।
सलीलदलिताखिलप्रबलदोपदोपातमः-
स्फुरद्विमलकेवलाम्बुरुहबन्धुबिम्बोदयः ॥ १०७ ॥

हे नाभेय देव, त्व जय निरन्तर [illegible] । [illegible] । प्रशमयन्निरन् । 'प्रोनाशन प्रशमन प्रतिघातन [illegible]' इति हैम्याम् । यथा 'हसानि शमयति न दमयति न' इति क्रियाकलापे [illegible] । [illegible]म् । मनोभव. कन्दर्प स एव भट. [illegible] । [illegible] । महाबोधितन् । यथा बुद्धः स्मरशूर प्रशमयामास । 'बोधिसत्त्वो महाबोध', तथा 'मारलोकजयजित्' इति हैम्याम् । [illegible] । पुन. किभूत । [illegible] अन्यदर्शनिन एव कमलकाननानि पद्मवनखण्डानि तेषु उन्नमन् माडम्बरीभवन् जलभरेण भवन् वा महीं स्पृशन्वा अकाण्डे अप्रस्तावे प्राप्य विनैव चण्डः कठिनः मुशलप्रमाणजलधारावर्षी अम्बुदो मेघः । 'बालातपमिवाब्जानामकालजलदोदय' इति रघौ । 'निद्राणपङ्कजसरसि जलदानेहसि' इति चम्पूकथायाम् । पुनः किंभूत. । सलील लीलासहित यथा स्यात्तथा प्रयास विनैव दलितानि विध्वस्तानि चूर्णीकृतानि अखिलानि समस्तान्यपि प्रबन्धप्रसवानि अष्टादशसंख्याका प्रबला अनुकूलबलत्वात्परैर्मोहमूढतया कातरीभूतैरन्यैर्जेतुमशक्या दोषा दानान्तराय-लाभान्तराय-वीर्यान्तराय-भोगान्तराय-उपभोगान्तराय-हास्य-रति-अरति-भय-जुगुप्सा शोक-काम-मिथ्यात्व-अज्ञान-निद्रा-अविरति-राग-द्वेषरूपा अपगुणा एव दोषातमासि निशान्धकाराणि तै कृत्वा स्फुरन्दीप्यमानो विमलो हिमाम्बुदापगमाद्विशदः केवलमनन्यापेक्ष लोकालोकप्रकाशकारकमनुत्तर पञ्चमज्ञान तदेवाम्बुरुहबन्धोः कमलसुहृदो दिनकरस्य बिम्बोदय प्रादुर्भावो यस्य ॥

जयामृतविभूतिभाग्घन इवातिधीरध्वनि-
निरञ्जनतयोदितो जलजवद्विशुद्धाशयः ।
सुधारस इव प्रभो सकलजन्तुजीवातुको
भवाद्भवभृतोऽम्बुधेर्जगति पोतवत्तारयन् ॥ १०८ ॥

हे मारुदेवदेव, त्व जय । त्व किभूतः । घन इव मेघवत् अमृत निःश्रेयस सलिल च तस्य तेन वा विभूतिं सपत्तिं शोभा वा भजतीति । चिण्प्रलये भाक् । तथा अतिशयेन सर्वेभ्यश्चराचरेभ्योऽभ्यधिकतया धीरो देशनासमये गम्भीरो वा ध्वनिर्वाग्विलासो गर्जित गर्जारवो यस्य । पुन. किभूत. । जलजवत् शङ्ख इव । 'तत प्रियोपात्तरसेऽधरोष्ठे निवेश्य दध्मौ जलज कुमार' इति रघुवंशे । निर्गतमञ्जन रागद्वेषोपलेपो

चन्द्रोज्ज्वलं [illegible]

[illegible] लक्ष्मीनीरागि[illegible] ॥१२२॥

[illegible]

राकामृगाङ्का इव यत्र पद्माकरा रमां कांचन चिन्वते स्म ।

कुण्डान्यखण्डान्यपि नागगेहात्पीयूषकुण्डानि किमुद्धृतानि ॥ १२३ ॥

यत्र शत्रुंजये राकाणा यः सुपूर्ण षोडशकलाकलितश्चन्द्रो भवेत् । 'राका पूर्णे निशाकरे' इति हैम्याम् । पूर्णिमासीनां मृगाङ्काश्चन्द्रा इवामृतपूरिताः पद्माकरास्तटाकाः काचन वचनविषयातीता रमां लक्ष्मीं चिन्वते पुष्णन्ति । पुनर्यत्र गिरौ अखण्डानि अभग्नानि अक्षतानि कुण्डानि ह्रदभेदा जलाशयविशेषाः शोभन्ते । उत्प्रेक्ष्यते—नागगेहात्पातालादुद्धृतानि गृहीत्वा आनीतानि किं पीयूषकुण्डानि अमृतकुण्डानीव । पाताले हि नव सुधाकुण्डानि सन्ति । यदुक्तं पद्मसीस्तुतौ—'यात्वा देवाधिदेवागमदशमसुधाकुण्डमानन्दहेतु' इत्यागमरूपं दशमं सुधाकुण्डम् । तथा नैषधवृत्तौ—'क्षितिं फणामण्डलै रक्षन्ति धारयन्तीति क्षितिरक्षिणो नागाः । यथा यत्कथाश्रवणात् पूर्वं फणिप्रभृतयो नवसुधानां कुण्डानां रक्षिता कुण्डानि नामृतरोऽभूवस्तथा रक्षयन्ति' इति ॥

कलितललितरङ्गत्तुङ्गतारङ्गसङ्गी-

मिलदलिकुलकेलीस्मेरदम्भोजपुञ्जः ।

श्रियमयति तटाकश्चिल्लणाख्योऽत्र नन्दी-

सर इव दनुजारिश्रेणिभिः सेव्यमानम् ॥ १२४ ॥

अत्र शत्रुंजयशैले चिल्लण इति आख्या नाम यस्य तादृशः तटाकः श्रियं शोभामयति गच्छति । प्राप्नोतीत्यर्थः । किंभूत. । कलितं ललितं गमनागमनादिविलासो यैस्तादृशाः तथा रङ्गन्तश्चलन्तस्तुङ्गा उच्चैस्तरा गगनावगाहिनस्तारङ्गाः कल्लोलसमूहाः । अत्र समूहार्थेऽण्प्रत्ययः । तथा 'वारंवारं तारतरस्वरनिर्जितगङ्गातारङ्गाम्' इति पद्मसुन्दरकृ-

विल आशयो हृदय मध्यं यस्य । पुनः किं कुर्वन् । कुशेशय कमलं तस्य पलाश पत्र तदिव निर्गत उपलेपः संसाराभिष्वङ्गः लिम्पन च यस्मात्तस्य भावस्तत्ताम् । निर्लेपतामित्यर्थः । भजन्नाश्रयन् । च पुनः कदापि कस्मिन्नपि समये भारुण्डवद्भारुण्डपक्षीव प्रमद्वरपद प्रमादस्थानम् । प्रमत्ततामित्यर्थः । 'जनैव दधत् मा भू' क्वापि प्रमद्वरः' इति पाण्डवचरित्रे । पुनः किंभूतः । विमलभूधर शत्रुंजयशैल भूषयन्नलंकुर्वन् । क इव । विशेषक इव । यथा तिलको ललाट भूषयति ॥ इति हीरसूरिकृता ऋषभदेवस्तुतिः ॥

इत्यभिष्टुत्य सूरीश्वरः श्रीजिनं भालविन्यस्तहस्तद्वयाम्भोरुहः ।
इष्यशाखी फलाप्तेरिवामोदवान्प्राणमद्भूतलालम्बिमौलिस्थलः ॥१११॥

भूतल पृथ्वीपीठमालम्बते इत्येवशील मौलिस्थल मस्तक यस्य तादृश सन् सूरीश्वरो हीरविजयसूरिवासव. श्रीजिनमृषभदेव प्राणमत्प्रणनाम नमस्करोति स्म । किं कृत्वा । भाले ललाटे विन्यस्त स्थापित हस्तयोर्द्वय करयोर्युगलमेवाम्भोरुह कमल येन तादृशः सन् इति पूर्वोक्तकाव्यैरभिष्टुत्य स्तुतिं कृत्वा । किंभूतः सूरिः । फलाप्तेः श्रीशत्रुंजययात्राऋषभदेवदर्शनादिरूपफलस्य प्राप्तेः सकाशादामोदवान् परमानन्दकन्दकन्दलितहृदय । क इव । इष्यशाखीव । यथा वसन्ततरुर्भूतले मेदिनीमण्डले मिलन्तो मस्तकस्य शिखरस्य शाखा यस्य तादृशः फलानामुपलक्षणात्पल्लवपत्रकुसुमाना च लाभादामोदवान्परिमलकलित. प्रकर्षेण नमति ॥

निववृते प्रमदेन्दिरयान्वितः स जिनगर्भगृहान्तरतस्ततः ।
चतुरिकोदरतोऽभिनवोढया वर इवामृतदीधितिवक्त्रया ॥ ११२ ॥

ततो जिनस्तुतिनुतिकरणानन्तर स सूरिर्जिनस्य ऋषभदेवस्य यो गर्भगृहो गर्भागारस्तस्यान्तरतो मध्यान्निववृते निवृत्तः पश्चाद्वले । 'निवृतं स महार्णवरोधसः' इति रघौ । बहिराजगामेत्यर्थः । किंलक्षण. । प्रमदेन्दिरया प्रमोदलक्ष्म्या अन्वितो युक्तः । क इव । वर इव । यथा वरयिता परिणेता अभिनवोढया तात्कालिकपरिणीतया अमृतदीधितिवक्त्रया चन्द्रमुख्या आह्लादकृद्वदनया सहित । चतुरिकोदरत 'चउरी' इति प्रसिद्धाया मध्यत. गर्भान्निवर्तते बहिरागच्छति ॥

शानवाद्बहिरुपेत्य सज्जन पर्षदो वसुमतीपतेरिव ।
द्वारि वीमत्व इव प्रवेशने वर्गकृत्यविनये स आगितः ॥ ११३ ॥

स हीरसूरि द्वारि ... आगित ... [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

जम्भारीणामिन्द्राणां राजिः श्रेणी' जिनेन्दोः जिनचन्द्रस्य उत्तमाङ्गोपरि एककोटिषष्टि-लक्षप्रमितपञ्चविंशयोजनोत्तुङ्गद्वादशयोजनपृथुलकलशयोजनोन्मितनालनिर्मुक्तत्रिविधतीर्थोदकैर्वर्षति। पुनरियं राजादनी संगमकामुकेन मिलनाभिलाषुकेण पुंसा पुरुषेण सार्धं मुक्त्यङ्गनां सिद्धवधूमनुपश्यति सगमं कारयति। केव। वयस्यीव। यथा प्रियसखीसंगमं कर्तुं काङ्क्षता मनोभिलषितेन केनचित्तरुणेन समं तत्तरुणाङ्गसंगमकृते सुचिरमुत्कण्ठिता सा सखीमनुपश्यति मेलयति॥

संप्राप्तः पूर्ववारान्नवनवतिमितानादिदेवस्तलेऽस्या-
स्तत्रार्चेवार्चनीयास्त्यसुरनरमरुत्पुंगवैः पादुकास्य।
भ्रश्यत्पर्णादिचूर्णैर्भुवनतनुभृतां भूतवेतालरक्षो-
यक्षाद्याशेषदोषानपहरति पुनर्या च रोगान्सुधेव॥ १३३॥

अस्या राजादन्यास्तले अधःप्रदेशे मूलपार्श्वे छायाया वा नवनवत्या मितानेकोनशतप्रमाणीकृतान् पूर्ववारान् पूर्वाणां वर्षवासरसंख्याका वेला आदिदेवो वृषभस्वामी संप्राप्तः समवसृतः। यदुक्तम्—'नवनवतिपूर्ववारान् यस्मिन् समवसरद्युगादिजिनः। राजादनीतरुतले विमिलगिरिरयं जयति तीर्थम्॥' इति पूर्वाचार्यप्रणीतस्तवे। पुनस्तत्र राजादन्यास्तले अर्चेव अर्हत्प्रतिमेव। अर्चाशब्देन पूर्वसूरिभिः प्रतिमा प्रोक्तास्ति। यथा—'अवनितलगतानां कृत्रिमाकृत्रिमाणां वरभवनगतानां दिव्यवैमानिकानाम्। इह मनुजकृतानां देवराजार्चितानां जिनवरभवनानां भावतोऽर्चां नमामि॥' इति। अस्यादिदेवस्य पादुका पदप्रतिमा। पदद्वन्द्वप्रतिकृतिरित्यर्थः। अस्ति वर्तते। किंभूता। असुरा दानवा नरा मानवास्तथा मरुतो देवास्तेषां पुंगवैः प्रधानैरिन्द्रादिभिरर्चनीया पूजयितुं योग्या पूजिता च। पुनर्भ्रश्यतां स्वयं निपततां भूपीठे वातादिना न तु कराकर्षणादिना पर्णादीनां पल्लवपुष्पपत्रकलिकाफलशाखाछल्लिप्रमुखाणां चूर्णैः क्षोदैः कृत्वा भुवनतनुभृतां जगज्जनानां भूतवेताला देवविशेषा रक्षांसि रात्रिचरा मनुष्याः सिद्धराक्षसादिविद्या देवजातीया वा इति द्विधा यक्षा वटवासिनस्ते आद्याः प्रथमा येषां ते पिशाचप्रेतव्यन्तरयोगिनीशाकिन्यादयस्तेषामशेषाः समस्ता दोषा उपद्रवास्तान् या अपहरति निर्णाशयति। च पुनर्या रोगान् समस्तानप्यामयानपाकरोति। केव। सुधेव। यथा पीयूषं देवभोज्यं पीतं सन्निःशेषान् गदानपनयति॥

श्रीवाचंयमपञ्चकोटिकलितः श्रीपुण्डरीको गणी
चैत्र्यामत्र दिने महीमिव जयी सिद्धिं मुदासाधयत्।
यत्किंचित्क्रियते जनैरिह नगे दानोपवासादिकं
तत्स्यात्तेन दिनेऽत्र कोटिगुणितं दानं सुपात्रे यथा॥ १३४॥

श्रीभिर्ज्ञानदर्शनचारित्रलक्ष्मीभिर्युता वाचंयमा महामुनयस्तेषां पञ्चसंख्याकाभिः को-

हिमा उष्णा रुचः किरणा यस्य । यदुक्तं माघे—'उदयमहिमरश्मिर्याति शीतांशुरस्तं कुमुदवनमपश्रि श्रीमदम्भोजखण्डम् । त्यजति मदमुलूकः प्रीतिमांश्चक्रवाको हतविधिललितानां ही दुरन्तो विपाकः ॥'

अर्हद्देशनवेश्मनीव सततं संत्यज्यतेऽस्मिन्मिथः
पारीन्द्रद्विरदादिजन्मिनिवहैराजन्मविद्वेषिता ।
राज्ये नीतिमतः क्षितेरधिपतेर्व्राता इवोर्वीस्पृशा
सर्वे सन्त्यकुतोभया यदचलोत्सङ्गे पुनः स्थायुकाः ॥ ११७ ॥

भो भव्याः, अस्मिन् शत्रुंजये सततं निरन्तरं पारीन्द्रद्विरदादिभिः सिंहहस्तिप्रमुखैः। आदिशब्दाद्व्याघ्रधेनुचित्रमृगमार्जारमूषकमयूरनागाद्यैः। अन्यैरपि बहुभिरङ्गिभिः प्राणिगणैर्मिथः परस्परं जन्म मर्यादीकृत्याजन्म अवतारमुत्पत्तिमारभ्य। मरणान्तं यावदित्यर्थः । आजन्मनो विद्वेषिता वैरिभावः संत्यज्यते मुच्यते । कस्मिन्निव । अर्हद्देशनवेश्मनीव । यथा जिनेन्द्रसमवसरणे सर्वैः प्राणिभिर्मिथो वैरं संत्यज्यते । यदुक्तम्—'सारङ्गी सिंहशावं स्पृशति सुतधिया नन्दिनी व्याघ्रपोतं मार्जारी हंसबालं प्रणयपरवशा केकिकान्ता भुजङ्गम् । वैराण्याजन्मजातान्यपि गलितमदा जन्तवोऽन्ये त्यजन्ति श्रित्वा साम्यैकरूढप्रशमितकलुषं योगिनं क्षीणमोहम् ॥' पुनर्यदचलोत्सङ्गे यस्य शत्रुंजयस्य पर्वतस्योत्सङ्गे क्रोडे स्थायुका वसनशीलाः सर्वे स्वपरजातीयाः प्राणिनः न विद्यते कुतश्चित्कस्माच्चनापि भयं येषां ते अकुतोभया निर्भीका अज्ञातभयाह्वानाः सन्ति विद्यन्ते । कस्मिन्निव । राज्य इव । यथा नीतिमतो न्यायवतः क्षितेरधिपते राज्ञो राज्ये उर्वीस्पृशां मानवानां व्राताः समूहा अकुतोभया भवन्ति ॥

स्वर्णोदयार्बुदब्रह्मगिर्याद्यष्टशतोन्मितैः ।
सुतैरिवोत्तुङ्गशृङ्गैः परितः परिवारितः ॥ ११८ ॥

यः श्रीशत्रुंजयपर्वतः उत्तुङ्गैर्गगनावगाहिभिः शृङ्गैः शिखरैः परितः सर्वतश्चतुर्दिक्षु च परिवारः परिच्छेदः सञ्जातोऽस्येति परिवारितः । परिवारयुक्तो जात इत्यर्थः । किंभूतैः शृङ्गैः । स्वर्णगिरिः-उदयगिरि-अर्बुदगिरि-ब्रह्मगिरिः एते चत्वारः शैला आदौ प्रथमं यस्य तादृशेन अष्टाभिरधिकेन शतेन उन्मितैः प्रमाणीकृतैः । उत्प्रेक्ष्यते—उच्चैः शिरोभिः अथ वा उत्प्राबल्येन तुङ्गो योऽपि महद्भ्योऽपि तुङ्गैरद्रिः । 'त मानतुङ्गा ... भ्युपैति लक्ष्मीः' इति भक्तामरस्तवे । मानेन तुङ्गो महान् इति मानतुङ्गः । पुत्रैर्नन्दनैरिव परिवारकलितः ॥

तीर्थमाले न विवेऽप्यदःसंनिभं विश्वकर्तेति रेखा किमेषा कृता ।
स्वर्गिणां निम्नगायमुनानां जनान्यत्र शत्रुंजये भाति कल्लोलिनी ॥ ११९ ॥

यत्र शत्रुंजये चके शत्रुंजयाभिधा कल्लोलिनी भाति नदी शोभते । किं कुर्वाणा ।

माहात्म्यमेतस्य समग्रमेकैकस्यापि शृङ्गस्य कदापि वक्तुम् ।
प्रभुर्भवेत्कोऽपि तदाप्त एव तरीतुमब्धेरिव वारि पोतः ॥ १३७ ॥

एतस्य शत्रुंजयस्य एकैकस्यापि शृङ्गस्य शिखरस्य समग्रं समस्तं माहात्म्यं महिमानं वक्तुं कथयितुं यदि चेत्कदापि कस्मिन्नपि समये कोऽपि पुमान् प्रभुः समर्थो भवेत्तदा स आप्तः सर्वज्ञ एव नान्यः सर्वज्ञं विना अस्य महिमानं भाषितुं कोऽपि नालम् । क इव । पोत इव । यथा अब्धेर्महार्णवस्य वारि पानीयं यदि कदाचित्कोऽपि तरीतुमलं तदा स पोतो यानपात्रमेव न तारकादिः ॥

तदत्र प्राप्यतेऽनल्पं यद्वस्तु क्वापि नाप्यते ।
मेरौ न सन्त्यदभ्राः किं दुःप्रापाः स्वर्द्रुमा मरौ ॥ १३८ ॥

अत्र शत्रुंजये तत्तत्प्रसिद्धमप्रसिद्धं वा निविदर्शनकृतरजतकनककारिचित्रकमोहनवल्लीप्रमुखानेकौषधीरसकूपिकास्वर्णरत्नाकरादिकमनल्पं बहु । पदे पदे इत्यर्थः । वस्तु प्राप्यते लभ्यते भाग्यवद्भिः । अथ वा अत्र गिरौ बालवृद्धैरपि सिद्धिरासाद्यते । यदुक्तम्—'सर्वेषामपि शैलानामुन्नतो विमलाचलः । यदारोहेण लोकाग्रं प्राप्यते बालकैरपि ॥' इति पूर्वसूरिस्तवे । तत्किम् । यद्वस्तु अन्यत्रान्यस्मिन् स्थाने महायासोऽपि क्वापि कुत्रापि नाप्यते न लभ्यते । युक्तोऽयमर्थः—ये स्वर्द्रुमाः कल्पवृक्षा मरौ मरुस्थल्यां दुःप्रापाः । यदुक्तम्—'पातुं वाञ्छति चातकस्य रुदतो नेत्राम्बु यत्राम्बुदाच्छायामिच्छति निश्छदक्षितिरुहः प्रत्याशया धावताम् । अन्तर्गूढजलाशया श्रमजलं नेतुं नदीं काङ्क्षति प्राप्तास्तं मरुनीवृतं वयमितो दूरेण वाराणसीम् ॥' इति मरुमण्डललक्षणम् । तत्र ये दुर्लभास्ते कल्पशाखिनो मेरौ सुवर्णाचले अदभ्रा गणनातीताः किं न सन्ति न विद्यन्ते अपि त्वसंख्या आसते ॥

षष्ठैः सप्तभिरष्टमाष्टमयुतैर्यस्मिन्कृतैर्निर्जलै-
स्तार्तीयीकतया मिते किल भवे प्राप्नोति सिद्धिं सुधीः ।
यस्मिन्नार्षभिकारितां मणिमयीं मूर्तिं जिनेन्दोर्नम-
स्कुर्वन्स्वर्णगुहागतामपि भवेदेकावतारी भवे ॥ १३९ ॥

किलेति पूर्वाचार्यपरम्परया श्रूयते वृद्धग्रन्थेषु च दृश्यते । यस्मिन् शत्रुंजये तृतीय एव तार्तीयीकः । 'तीयादीकण् स्वार्थे वा वक्तव्यः' । तस्य भावस्तार्तीयीकता तया तार्तीयीकतया । यदुक्तम्—'तार्तीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महाकाव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः' इति नैषधे । मिते प्रमाणीकृते भवे जन्मनि सुधीर्धीमान् सिद्धिं मोक्षं प्राप्नोति । कैः । षष्ठैरुपवासद्वयमानैः 'छट्ठ' इति लोकप्रसिद्धैः । किंभूतैः । सप्तभिः सप्तसंख्याकैः मार्तण्डतुरगप्रमाणैः । पुनः किंभूतैः । अष्टमेन अष्टमनाम्ना उपोषणत्रिकेण 'अट्ठम' इति प्रसिद्धेन युतैः सहितैः । पुनः किंभूतैः ।

शक्यभावात्तदधित्यकायामेव तस्थिवानित्यर्थः । उत्प्रेक्ष्यते—स्वेनात्मनापि सिद्धाना क्षेत्रत्वेन सिद्धो मुक्तात्मा भविष्णुर्न भवनशीलेन अपि तु काकुत्स्था सिद्धो भवितैव। अथ वा विद्यामन्त्रतन्त्रौषधीविविधसिद्धिभिः कृत्वा सिद्धपुरुषो बुभूषुर्न अपि तु सर्वसिद्धिमान् भवितुमिच्छुरेव । यद्यपि विद्यामन्त्रादीनां साधूना प्रयोजन नास्ति, तथापि कदाचिदपि समयानुसारेण प्रयोजनमपि भवेत् । अथ वा पूर्वादिषु सर्वस्यापि सद्भावात् ज्ञेयस्वरूपमपि सर्वं भवेत् । किलक्षणो मुनीन्द्र. । श्रीभिस्त्रैलोक्यैश्वर्यलक्ष्मीभिः कलितस्य तीर्थभर्तुः ऋषभदेवस्य पदयोश्चरणयो परिचरणा उपासना तया हेतुभूतया य आनन्दः परमाह्लादस्तेन सान्द्रो मेदुरः । स्निग्ध इत्यर्थः । किंभूत' पुन । भगवान् जगत्पूज्यः । पुनः किं कुर्वाणः । श्रीमान् सातिशयज्ञानाश्चर्यकृतविमलक्ष्मीयुतः प्राचीनः प्राक्तन सूरीश्वर इवाङ्गभाजा यात्रिकजनाना समाजे सभाया विमलशिखरिण पुण्डरीकाद्रेरिति पूर्वव्यावर्णितप्रकारेण प्रभाव महिमान विशिष्य विशेषप्रकारेण भाषमाण' प्रकाशयन् ॥

यं प्रासूत शिवाह्साधुमघवा सौभाग्यदेवी च यं
श्रीमत्कोविदसिंहसीहविमलान्तेवासिनामग्रिमम् ।
तद्ब्राह्मीक्रमसेविदेवविमलव्यावर्णिते हीरयु-
क्सौभाग्याभिधहीरसूरिचरिते सर्गोऽभवत्षोडशः ॥ १४२ ॥

पण्डितदेवविमलगणिविरचिते हीरसौभाग्यनाम्नि महाकाव्ये षोडशाना संख्यापूरण द्विरष्टमस्य सर्गोऽविकारविशेष अभवत्सजात' ॥

इति पण्डितसीहविमलगणिशिष्यपण्डितदेवविमलगणिविरचितायां स्वोपज्ञहीरसौभाग्यनाममहाकाव्यवृत्तौ सङ्घागमनचैत्यपरिपाटीपूर्वकयात्राकरणप्रागादिवर्णनशत्रुंजयमाहात्म्यप्रकाशनो नाम षोडश सर्ग. ।

सप्तदश सर्गः ।

अथ व्रतीन्द्रोऽभ्युदयं दधाने बिम्बे नभस्यम्बुजबान्धवस्य ।
मूर्ध्ना धृते पूर्वदिशेव भट्कुम्भे स नाभेयजिनं ननाम ॥ १ ॥

अथ शत्रुंजये यात्रां कृत्वा सूरिर्विहारं [illegible] [illegible] हीरविजयसूरि [illegible]
[illegible]
[illegible]
[illegible]
[illegible] १ ॥

महीपालभूभृत्प्रमुखाणामिवैतन्नृणां कुष्ठकष्टादिनिर्घातनिष्णम् ।
मरुल्लोलकल्लोललीलायमानारविन्दव्रजं सूर्यकुण्डं विभाति ॥ १२९ ॥

एतत्प्रत्यक्षं पार्श्ववर्ति सूर्यकुण्डं विभाति । किंभूतम् । मरुता वायुवेगेन लोलाश्चञ्चलीभूता ये कल्लोलास्तरङ्गास्तेषु लीलायमानो लीलया आचरन् अरविन्दानां कमलानां व्रजो यत्र । पुनः किंभूतम् । नृणां सर्वजनानां कुष्ठान्यष्टादशजातीयमहारोगविशेषास्तेषां कष्टानि अङ्गादिगलनादिकृच्छ्राणि तान्यादौ प्रथमं येषां तादृशानि शोकापत्प्रमुखदुःखानि तेषां निर्घाते मूलोच्छेदने तत्र निष्णं निपुणम् । केषामिव । महीपालभूभृत्प्रमुखाणामिव । यथा साधिताप्रतिहतरसायनेकविद्यासिद्धस्य स्वयंवरपरिणीतगुणसुन्दरीभर्तुः रोगाकुल्येऽपि विजितप्रतिपक्षक्ष्माभृत्पक्षस्य महीपालनाम्नो राज्ञः कुष्ठकष्टनिर्भेदनमासीत्तथा परेषामपीति बोध्यम् । महीपालकथा तु शत्रुंजयमाहात्म्येऽस्तीति ॥

पुण्डरीकाचलोर्वीव महिम्नैकनिकेतनम् ।
राजादनी विभात्येषा मुषिताशेषकल्मषा ॥ १३० ॥

एषा प्रत्यक्षलक्ष्या राजादनी क्षीरिका 'रायणि' इति प्रसिद्धा विभाति । किंभूता । मुषितानि मूलादुच्छिन्नानि अशेषाणि समस्तानि कल्मषाणि पापानि यया । पुनः किंभूता । महिम्ना माहात्म्यानानेकमद्वैत निकेतनम् । केव । पुण्डरीकाचलस्य शत्रुंजयाद्रेरुर्वी भूमीव ॥

ऐहिकामुष्मिकानल्पसंकल्पितान्यङ्गभाजां सृजन्ती त्रिलोकीभुवाम् ।
वेधसा स्वर्गिणां गौरपूर्वेव या निर्मिता राजते यत्र राजादनी ॥१३१॥

यत्र शत्रुंजये राजादनी राजते । उत्प्रेक्ष्यते—या राजादनी वेधसा सृष्टिकर्त्रा अपूर्वान्याभ्य. कामधेनुभ्यो लक्षणैरसाधारणा गौर्धेनुः कामदुघा निर्मिता निष्पादिता । किं कुर्वती । त्रिलोकीभुवां जगत्त्रितयजन्मनां अङ्गभाजां देहभाजां सुरासुरनराणां प्राणिनामैहिकानि इहलोकभवानि रोगापनयनसपत्नकरणादिमानि आमुष्मिकाणि परलोकभवानि स्वर्गापवर्गादिकानि यान्यनल्पानि भूयांसि । समस्तानीत्यर्थः । संकल्पितानि मनःकामितानि । मनोरथानित्यर्थः । सृजन्ती कुर्वन्ती । संपूरयन्तीत्यर्थः ॥

वर्षत्यसौ शिरसि संघपतेः पयोभि-
र्जम्भारिराजिरिव जन्ममहे जिनेन्दोः ।
मुक्त्यङ्गना पुनरियं वयसीव रङ्गा-
त्पुंसानुषङ्गयति संगमकामुकेन ॥ १३२ ॥

असौ राजादनी संघपतेः संघनायकस्य 'संघवी' इति लोकप्रसिद्धस्य शिरसि मस्तके क्षीरवत्त्वेन पयोभिः क्षीरैर्वर्षति । जम्भारिराजिरिव । यथा जन्ममहे जननमहोत्सवे

स यतीन्द्रो हीरसूरिः द्वीपजनव्रजेन द्वीपबन्दिरसत्कसंघलोकनिकरेण स्वपत्तन सामान्यतो नगराभिधान पत्तनम् । यथा हैम्यां समुदितान्येव नगरनामानि—'नगरी पूः पुरीद्रङ्ग पत्तन पुटभेदनम्' इति । विशेषतस्तु 'पत्तनं रत्नयोनिः' इति द्वीपाभिधानं निजनगरं पावयितु पवित्रीकारयितुं प्रार्थितो याचितः । आगृहीत इत्यर्थः । क इव । केशीव । यथा चित्रमिति पदमादौ धुरि यस्य तेन चित्रादिना सारथिना श्रावस्त्यां नगर्यां राजकार्यार्थं गतेन तस्यैवोपदेशात् श्राद्धीभूतेन चित्रसारथिना केशीनामा वशीशिता मुनीन्द्रो गणधरः श्वेतविका इत्यभिधान नाम यस्य तादृश स्वपत्तन पावयितुं पावन निर्मापयितु प्रार्थितः । आगृहीत इत्यर्थः ॥

निश्चित्य चित्तेऽजयपार्श्वभर्तुर्यात्रां स शत्रुंजयवद्यतीन्द्रः ।
कथंचिदप्याग्रहमस्य मेने सेनेशवत्सोऽपि ततः प्रतस्थे ॥ ६ ॥

स यतीन्द्रो हीरसूरिः कथचिन्महता कष्टेन अस्य द्वीपबन्दिरस्य संघस्याग्रह मेने मानयति स्म । किं कृत्वा । अजयनाम्ना दशरथनृपपित्रा राज्ञा स्थापितस्याजयनाम्न अधुना 'अद्वारा' इति प्रसिद्धस्य पार्श्वभर्तुः श्रीपार्श्वनाथस्य यात्रा प्रणमन चित्ते समनसि निश्चित्य अवश्य मया अजयपार्श्वनाथयात्रा कार्येति निश्चय कृत्वा । किंवत् । शत्रुंजयवत् । यथा मया शत्रुंजययात्रा कृता, तथा अझारापार्श्वनाथस्य मया यात्रा कर्तव्येति विशेषः । अपि पुनः स सूरिरपि सेनेशवत्सेनापतिरिव राजेव वा ततः पादलिप्तपुरात्प्रतस्थे द्वीपबन्दिर प्रति प्रचलति स्म ॥ इति पादलिप्तपुरात् द्वीपबन्दिर प्रति प्रस्थानम् ॥

तत्प्रक्रमोपस्थितयात्रिकाणां तदावलीभिर्ववले गिरीन्द्रात् ।
अम्भोधिवेलाभिरिवोपकण्ठगिरेर्गभीरारवबन्धुराभिः ॥ ७ ॥

स चासौ प्रक्रमश्च प्रस्तावस्तत्प्रक्रम शत्रुंजयादियात्राकरणसमयः । 'वेला वारावसरः प्रस्ताव प्रक्रमान्तरम्' इति हैम्याम् । तत्रोपस्थितानामागतानाम् । 'उपस्थिता शोणितपारणा मे' इति रघौ । तथा 'आगमने गमनायां समभ्युपादेन [illegible] चिना । आपतति चोपतिष्ठत्युपनमति तथोपगीदति न ॥' इति क्रियारत्नाकरे । यात्रिकाणां शत्रुंजययात्राकारकाणामावलीभिः श्रेणीभिः [illegible] हीरसूरेर्द्वीपबन्दिरं प्रति [illegible] गिरीन्द्राद्विमलाचलाद्ववले पश्चाद्वाघुटितम् । [illegible] । अम्भोधिवेलाभिरिव । यथा समुद्रस्य [illegible] । [illegible] । किंभूत । [illegible] यात्रिकश्रेणिभिरपि श्रीशत्रुंजयादितीर्थानि [illegible] ॥

[illegible] ॥ ८ ॥

रिति पातकराशिः वहति नाशि । तथा कोटिशब्दो दक्ष' स्त्रीलिङ्गवाचिवदाका-रान्तः । यदुक्तम्—'रियती पलगती कियती लक्षा न कोटिरपि कीयती । औदार्यो-न्नतगमना रुवती रमनती कियती ॥' इति नूरेऽि लक्षाशब्द । तथा लिङ्गानुशासने—'मानो रक्ष माने वाच्य लक्षाशब्द स्त्रीलिङ्गो रक्ष लक्षा च' इति लिङ्गानुशासने । श्रिया प्रथमचक्रिप्रथमपुत्र प्रथमतीर्थङ्करप्रथमगणभृत्स्या युत पुण्डरीकनामा गणी श्री-ऋषभदेवचतुरशीतिगणभृत्प्रमुखो गणधर अत्र शत्रुजयाद्रौ चैत्र्याम् । चैत्रेण मासेन युक्ता पौर्णमासी चैत्रीत्युच्यते । चैत्रपौर्णमास्यामित्यर्थः । मुदा अनन्तानन्दसंदोहमेदु-रतया मोक्षमनायतत्साक्षयामास । मुक्तिं जगामेत्यर्थ । क इव । जयीव । यथा जयन-शीलो राजा प्रमोदेन महीमासमुद्रान्तमेदिनीं साधयति । तत इह नगे श्रीशत्रुजयप-र्वते यत्किंचिद्दानोपवासादिरत्र दिने अस्या चैत्र्या पूर्णिमाया जनैर्भविकलोकै क्रियते विधीयते । तस्मात्पुनाधीविश्राणनोपवसनादिरत्र चैत्रपूर्णिमावासरे एकस्मिन्नेवाहनि पञ्चकोटिमुनीना मुक्तिगमनकारणेन कोटिभि शतलक्षाभि गुण्यते इति कोटिगुणित स्यात् । किमिव । दानमिव । यथा सुपात्रे दान कोटिगुणं भवेत् । यदुक्तम्—'दानपात्र-मधमर्णमिहैकग्राहि कोटिगुणित दिवि दायि' इति नैषधे ॥

शाश्वताद्रिरिवानन्तसमयस्थायुकोऽस्त्ययम् ।
कालक्रमात्पुनर्धत्ते शशीवोपचयक्षयौ ॥ १२५ ॥

अय शत्रुजयाद्रिर्न विद्यते वदाप्यन्तोऽवसानं यस्य तावन्त समय काल यावत्ति-ष्ठतीत्येवंशीलः स्थायुक । क इव । शाश्वताद्रिरिव । यथा अनश्वरो मेरुप्रमुखशैल । जातिवाचित्वादेकवचनम् । अनन्त काल यावत्स्थालुरास्ते । परमस्मिन् शत्रुंजये एकोऽय विशेष । कालक्रमादुत्सर्पिण्यवसर्पिणी समयपरिपाट्या उपचयक्षयौ वृद्धि-क्षीणभावौ असौ धत्ते । क इव । शशीव । यथा चन्द्रः शुक्लकृष्णपक्षक्रमादुपचयक्षीणते धत्ते । यथा शशी शुक्ले पक्षे वर्धते कृष्णे च हीयते, तथा शत्रुजयोऽप्युत्सर्पिण्या वृद्धिं भजते अवसर्पिण्या क्षण क्षयमयते । किं च यथा कलावान्कलामात्रमेवावशि-ष्यते तथा विमलाद्रिरपि सप्तहस्तप्रमाणो मुण्डकमानोऽवशिष्यते ॥

तालध्वजढङ्काभिधकदम्बलौहित्यरैवताद्यचलाः ।
विलसन्महिमानोऽमी यत्प्रतिकाया इवाभान्ति ॥ १२६ ॥

अमी प्रत्यक्षा सन्निधौ निरीक्ष्यमाणाः तालध्वज', तथा ढङ्क इत्यभिधा ययोस्तौ 'तस्ताझो टकौ' इति नाम्ना प्रसिद्धौ, तथा कदम्ब , तथा लौहित्य , तथा रैवत्य उज्जयन्त. 'कोलम्बो लोहिचो गिरिनारि इति नाम्ना लोकप्रसिद्धा । एते पञ्चापि पर्वता आदौ कृत्वा येषा ते अचला' 'टुक' इति ख्याता पर्वता यत्प्रतिकाया यस्य शत्रुजयाद्रेः प्रतिबिम्बानीवाभान्ति आ सामस्त्येन शोभन्ते । किंभूता । विलसन् त्रैलोक्ये स्फु-रितमत्ता कलयन् महिमा माहात्म्यं येषामेते पञ्चापि गिरय. शत्रुजयाद्रेर्मुख्यशिखराणि विमलाचलतुल्यमाहात्म्यानि सन्ति ॥

प्रपूज्य पुष्पैः किसलैः फलैश्च यो वृक्षवृन्दैः क्षितिभृन्महेन्द्रः ।
उपासते त्यक्तुमिवात्मवानस्पत्यं गतिं वल्गुमिवाधिगन्तुम् ॥ ११ ॥

यो विमलाभिधानः क्षितिभृन्महेन्द्रः गिरिराजः वृक्षाणां द्रुमाणां वृन्दैः शालसहकारमुख्यैः उपास्यते सेव्यते। किं कृत्वा। प्रपूज्य प्रकर्षेण भावशुद्ध्या पूजयित्वा। कैः। पुष्पैः स्वकीयकुसुमैः। न पुनः कैः। किसलैः पल्लवैः। न पुनः फलैः आत्मीयशस्यैः। स्वजातीयप्रवालपत्रप्रसूनफलैरभ्यर्च्योत्सर्गैः। उत्प्रेक्ष्यते—आत्मवानस्पत्यं निजां वनस्पतितां स्वकीयतरुभावम्। काष्ठत्वमिति यावत्। त्यक्तुं विहातुमिव। अथ पुनरुत्प्रेक्ष्यते—वल्गुं मनोहरां स्वर्गादिकां गतिमधिगन्तुं प्राप्तुमिव। 'अधिगत्य जगत्यधीश्वरादथ मुक्तिं पुरुषोत्तमात्ततः' इति नैषधे। 'अधिगत्य प्राप्य' इति तद्वृत्तौ ॥

एते मिथः प्रीतिपरीतचित्ताः सिंहेभमुख्या अपि मुक्तवैराः ।
तिर्यग्भवेऽपि स्पृहयेव सिद्धेः सिद्धाचलेन्द्रं परिशीलयन्ति ॥ १२ ॥

एते प्रत्यक्षसूरिणा दृग्गोचरीक्रियमाणाः सिंहेभमुख्याः केसरिकुञ्जरादिकाः अर्थाद्वनजीवाः सिद्धाचलेन्द्रं परिशीलयन्ति सेवन्ते शत्रुंजयपर्वतपुरंदरं तथा सिद्धो मन्त्रतन्त्रादिसिद्धिमानचलेन्द्रनामा कोऽपि पुरुषस्तमपि सिद्ध्यभिलाषुकाः भजन्ते। किंभूताः। मिथः परस्परमाजन्मप्रतिबद्धमपि मुक्तं सर्वथापि मनोवाक्कायैस्त्यक्तं वैरं विरोधो यैः। अत एव पुनः किंभूताः। मिथोऽन्योन्यं प्रीत्या स्नेहेन परीतं व्याप्तं चित्तं मनो येषाम्। सिद्धानां तपस्विनां च प्रभावादिदमपि घटते। यदुक्तम्—'सिंही सारङ्गशावं स्पृशति सुतधिया द्वीपिनी तर्णकं गौर्मार्जारी मूषकार्भं रमयति नकुली व्यालबालं प्रमोदात्। मातङ्गी कुञ्जरारिं चटकशिशुमथो पत्रिणी यत्र सत्त्वा आजन्मद्वेषिणोऽपि प्रदधति सखितां तीर्थराजप्रभावात् ॥' इति। उत्प्रेक्ष्यते—तिर्यग्भवेऽपि तिरश्चामप्यवतारे जन्मनि सिद्धेर्मोक्षस्य स्पृहया वाञ्छयेव एवमन्यापि सेवनं सिद्धेः काङ्क्षया ॥

धात्रात्र विश्वाचलचारिमश्रीः पिण्डीकृतैकत्र दिदृक्षतेव ।
इत्यूहमानेन गिरीन्द्रलक्ष्मीं समीक्षमाणेन मुनीश्वरेण ॥ १३ ॥
शत्रुंजयोर्वीधरसंनिधाने शत्रुंजया शैवलिनी न्यभालि ।
परांहसा स्वं मलिनं विभाव्य पुत्रीव जह्नोः पवितुं समेता ॥ १४ ॥

मुनीश्वरेण हीरसूरिणा शत्रुंजयोर्वीधरस्य विमलाचलस्य सनिधाने समीपप्रदेशे शत्रुंजया नाम्नी शैवलिनी नदी न्यभालि विलोकिता दृष्टा। उत्प्रेक्ष्यते—परांहसा समागतापरपापीयोजनसंगमाज्जातपापेन मलिनं पातककलुषीकृतम्। यदुक्तम्—'महापातककल्लोलैर्नित्यस्नानविधानतः। मुक्त्वा पापं गतैः स्थानं तदादि मलिनास्म्यहम् ॥' तदुपरि च गङ्गोक्तश्लोकः—'परदारपरद्रव्यपरद्रोहपराङ्मुखः। गङ्गाप्याह कदाभ्येत्य मामयं पावयिष्यति ॥' इति परसमयोक्तानुसारेण परपातकागमनाद्रङ्गाया अपि

[illegible] । [illegible] । निर्जलैः पानीयरहितैः चतुर्विधाहारप्रत्याख्यानरूपैः । [illegible] ये निर्जलान [illegible] कुर्वन्तीति ते तृतीये भवे मोक्षं यान्तीत्यर्थः । अपि पुनरस्मिन् शत्रुञ्जये सार्वभौमेन ऋषभस्यापत्यमार्षभिर्भरतचक्रवर्ती तेन कारितां सार्वभौमेन निर्मापितां जिनेन्द्रो [illegible] ऋषभदेवस्यैव मूर्तिं प्रतिमां नमस्कुर्वन् प्रत्यक्षं [illegible] प्रणमन् नरः भवे संसारे एक एव नापरोऽवतारो जन्म अस्यास्तीति एकावतारी भवेत्स्यात् । मूर्तिं किंभूताम् । मणिमयीं रत्नस्वरूपाम् । पुनः किंभूताम् । स्वर्णगुहागताम् [illegible]पश्चिमप्रदेशे स्वर्णनाम्न्या गुहायां कंदरायां गतां प्राप्ताम् । आगामिन्यनन्तकालवशाल्लोककृताशातनाभयादिन्द्रवचसा सगरचक्रिणा स्वर्णगुहायां स्वयं गुप्तीकृत्य स्थापितामित्यर्थः ॥

यत्रानन्तजिना अनन्तमुनिभिः सिद्धा विशुद्धाशया
ध्यानैर्वह्निभिरिन्धनप्रकरवन्निर्दह्य कर्मव्रजम् ।
सिद्धक्षेत्रमतो निगद्यत इदं चेदीहते मानसं
सिद्धिं वस्तदिह स्वयं वसति सा सत्संगमाकाङ्क्षिणी ॥ १४० ॥

यत्र शत्रुञ्जये शैले न विद्यतेऽन्तोऽवसानं येषां तादृशैर्मुनिभिः साधुभिः सार्धमनन्ता प्रान्तातीता कालस्यानन्त्याज्जिनास्तीर्थकरा सिद्धाः मोक्षं प्राप्ताः । किंभूताः । विशुद्धो निर्मल आशयोऽध्यवसायः परिणामो येषां ते । किं कृत्वा । निर्दह्य नितरां ज्वालयित्वा । कम् । कर्मणां ज्ञानावरणीय–दर्शनावरणीय–मोहनीय–अन्तराय–वेदनीय–नाम–गोत्र–आयु–प्रमुखानामनेकजातीयानां प्राचीनाचीर्णशुभाशुभपरिणतीनां व्रजं समूहम् । कैः । ध्यानैः धर्मशुक्लप्रणिधानैः कृत्वा । किंवत् । इन्धनप्रकरवत् । यथा वह्निभिर्हुताशनैः काष्ठकलापो निर्दह्यते । अतः अनन्तानन्तभेदभिन्ना नगरे गणपरिकलिततीर्थकृतां सिद्धिगमनकारणादिदमपि तीर्थं सिद्धक्षेत्रं निगद्यते कथ्यते । ततो भो भव्याः, चेद्यदि वो युष्माकं मानसं मनः सिद्धिं समीहते, तत्तर्हि सा सिद्धिः स्वयमात्मनैव इह शत्रुञ्जये वसतिं वासं विधत्ते । किंभूता सा । सद्भिरुत्तमैः सम संगमं संयोगमा सामस्त्येन काङ्क्षतीत्येवंशीला ॥ इति शत्रुञ्जयाद्रिमाहात्म्यवर्णनम् ॥

इत्यद्वैतप्रभावं विमलशिखरिणो भाषमाणो विशिष्य
श्रीमत्प्राचीनसूरीश्वर इव भगवानङ्गभाजां समाजे ।
सिद्धक्षेत्रेऽवतस्थे कतिचन दिवसान्कि न सिद्धो भविष्णुः
स्वेन श्रीतीर्थभर्तुः पदपरिचरणानन्दसान्द्रो मुनीन्द्रः ॥१४१॥

मुनीन्द्रो हीरविजयसूरिः कतिचन कियत्संख्याकान् दिवसान् यावत्सिद्धक्षेत्रे श्रीशत्रुञ्जयशैलोपरि विमलगिरिम । 'उत्तिनिलउ सित्तुजो सिद्धखित्तपुण्डरीउ' इति शत्रुञ्जयकल्पेऽभिधानानि । अवतस्थे अवस्थितिं कृतवान् । वार्धकात्पुनः पुनश्चट्टितुमुत्तरीतु

णानामनेकानां विविधजातीयानां बहूनां वा पौरगणा नागरिकलोकानां पुंस्त्रीणां का- मिनीनां पुञ्जो समूहो विराजन्भाति स्म । उत्प्रेक्ष्यते—श्रमणानां साधूनां मध्ये जगतीन्दो क्षोणीयचन्द्रस्य राज्ञः हीरसूरीश्वरस्य पादाम्बुजं चरणारविन्दं नमस्कारिभिर्नमस्कर्तुमिच्छु । 'तावदेव कृपिरिन्द्रशिशुप्सु' इन्द्र स्तोतुमिच्छुः इति नैषधे । नागरपुरीभरः किं जलदेव- तासंदोह इव ॥

पतिव्रतापीश्वरवार्धिभर्तृद्वयेति कौलीनमपाचिकीर्षुः ।

शत्रुंजयं सेवितुमात्मनागान्मिषेण यस्या हरशेखरेव ॥ १८ ॥

या सरित् भातीति संबन्धः । उत्प्रेक्ष्यते—यस्याः शत्रुंजयाया नद्या मिषेण कपटेन आत्मना स्वकीयरूपेणैव शत्रुंजयं महातीर्थाधिराजं सेवितुं हरशेखरा गङ्गा इवागादा- गता । किं कर्तुमिच्छुः । इत्यमुना प्रकारेण कौलीनं स्वकीयापवादम् । 'जनप्रवादः कौ- लीनं विगानं वचनीयता' इति हैम्याम् । अपाचिकीर्षुः निराकर्तुमिच्छुः । इति किम् । स्वकान्तं विना परं पुमांसं मनसा वचसा कायेन स्वप्नेऽपि कदाचिदपि न कामयते इति सा पतिरेव व्रतं सतीलक्ष्यञ्जको नियमः शीलं यस्याः सा पतिव्रता सती ईदृश्यतोऽपि सार्धाङ्गहारिपार्वतीतोऽपि अतिप्रेमाविक्येन स्वशिरस्यारोपितापि मन्दाकिनी ईश्वरः शंभुः वार्धिः समुद्रः एतल्लक्षणं भर्तृद्वयं वल्लभद्वन्द्वं यस्याः सा द्वयोः पुरुषयोः पार्श्वे या वनिता व्रजति सा असती व्यभिचारिण्येव भवति सा सती सर्वथापि नोच्यते । अथ ईश्वरं भिक्षुकं मुक्त्वा समुद्रं रत्नाकरं भजते । तदियं पुंश्चली एव न पतिव्रता इति स्वनिन्दां निराकर्तुम् ॥

या शान्तनोर्वीमघवाङ्गजानां महामयापायवतां चतुर्णाम् ।

चिकित्सकीवात्र महीन्द्रमुक्तिश्रीसंगमेऽपि प्रतिभूरिवाभूत् ॥ १९ ॥

या शत्रुंजया नदी अत्र जगति महान्तः अतिशायिक्लेशापवादायशोविधायिनो ये *आमयाः कुष्ठादिदुष्टरोगास्त एवापायाः कष्टानि विद्यन्ते येषां ते महामयापायवन्तस्तेषां* चतुर्णां चतुःसंख्याकानां शान्तनुर्नामा इक्ष्वाकुवंशीयः उर्वीमघवा महीमहेन्द्रस्तस्याङ्ग- जानां पुत्राणां चिकित्सकीवागदकारिकेव अखिलव्याधिमूलोच्छेदकारिणीवाभूत् जायते स्म । अपि पुनस्तेषां शान्तनुनन्दनानां महीन्द्रमुक्तिश्रीसंगमे राज्यलक्ष्मीस्तथा मोक्ष- लक्ष्मीस्तयोः संगमे मिलने अङ्गीकरणे प्रतिभूः साक्षिणीव संजाता । अयं संबन्धः शत्रुंजयामाहात्म्ये सविस्तरोऽस्तीति ॥

तीर्थेषु पाथःप्रथितेषु गत्या पृथक्पृथक्खिद्यति लोक एषः ।

शत्रुंजयेतीव विचिन्त्य सर्वतीर्थावतारा विधिना व्यधायि ॥ २० ॥

सर्वेषां भूर्भुवःस्वस्त्रयीभवानां नदीनदीपतिकूपपुष्करिणीदीर्घिकाह्रदकुण्डतडागपुष्क- रप्रभृतीनां तीर्थानां पुण्यस्थानकानामवतारोऽवतरणमनुप्रवेशो यस्यां तादृशी शत्रुंजया- नाम्नी निर्झरिणी विधिना प्रजापतिना व्यधायि विहिता । उत्प्रेक्ष्यते—इत्यत्रैव वृत्ते

अन्यानमन्या हृदि मोदधानः पुनर्व्यनंसीत्स जिनावनीन्द्रान् ।
शत्रुंजयाद्रेरिव भूधरेषु शेषेषु चैत्येषु हिरण्मयेषु ॥ २ ॥

इत्यादिकवारं । यथा प्रथममेव प्रणतवांस्तथैव अन्यानपरानपि जिनावनीन्द्रानर्हत्प्रतिमान् स सूरिर्व्यनंसीत् विशेषेण नमस्यति स्म । स किं कुर्वाणः । अनन्या न विद्यते अन्या सदृक् यस्याः सा एवंविधामसाधारणीं मुदं प्रीतिं प्रह्लादं दधानः कुर्वाणः । अथ वा अन्या सामस्त्येन मनोवाक्कायैर्दधानो बिभ्राणः । क्वचिच्च पुनः प्रणामादिषु धरणार्थेऽप्यादधान इति दृश्यते । केषु । जिनराजान् व्यनंसीत् । शेषेषु शत्रुंजयव्यतिरिक्तपर्वतेषु चैत्येषु प्रासादेषु । किंभूतेषु चैत्येषु । हिरण्मयेषु काञ्चननिर्मितेषु । उत्प्रेक्ष्यते—शत्रुंजयशैलराजस्य भूधरेष्विव सुवर्णवर्णभरणेष्विव ॥

शत्रुंजयोर्वीधरसार्वभौममौलेर्दधानो विशदाशयत्वम् ।
अवातरन्निर्जरनिर्झरिण्या इव प्रवाहो तुहिनाद्रिशृङ्गात् ॥ ३ ॥

स सूरिः शत्रुंजयनाम्नः उर्वीधराणां सर्वपर्वतानां सार्वभौमस्य चक्रवर्तिनः मौलेर्मस्तकात् अधित्यकायाः सर्वोपरितनशिखरादित्यर्थः । अवातरत् उत्तरति स्म । क इव । प्रवाह इव । यथा निर्जराणां देवानां निर्झरिण्या नद्या गङ्गायाः प्रवाहः पयोधारा तुहिनाद्रिशृङ्गात् तुहिनाचलशिखरात् हिमहीधरशृङ्गादवतरति । किंभूतः स प्रवाहश्च । विशदं विमलं निष्पापमुज्ज्वलं च आशयं मनोमध्यं च दधानो बिभ्राणः । हिमाद्रिरप्युच्चलतरो ॥

अलंकरोति स्म स पादलिप्तपुरं पुरंध्रीगणगीयमानः ।
सहस्ररश्मेरिव रश्मिराशिरुदीयमानाद्द्विजराजबिम्बम् ॥ ४ ॥

स हीरसूरिः पादलिप्तपुरं कथंचित् उत्सवपरः श्रावकैर्नवनवानन्दरसवाहिनगणाकर्णितविधेयमानकल्पहृदि श्रीपादलिप्ताचार्यप्रतिष्ठितजिनबिम्बदर्शनोत्सुकचेतसां बहुदत्ताराधितनागेन्द्रविधानविधानप्रसादाधिगतगगनगामिविद्यासिद्धिमाहात्म्येन सिद्धसहस्रकोटिवेधिरससाधनेन नागार्जुननाम्ना स्वगुरुश्रीपादलिप्तसूरीणां नामधेयं स्मृतिविषयीकरणाय स्थापितं पादलिप्ताभिधानं नगरम् अधुना तु 'पालीताणु' इति लोके प्रसिद्धम् अलंकरोति स्म भूषयामास । किंभूतः । पुरंध्रीणां विविधनितम्बिनीजनानां गणगीयमानः । पुरंध्रीशब्दो ह्रस्वो दीर्घोऽप्यस्ति । यथा नैषधे—'अखिलपुरपुरंध्रीनेत्रनीलोत्पलानि' इति । गणैर्गीयमानः गणगीयमानः । क इव । रश्मिराशिरिव । यथा सहस्ररश्मेर्दिनकरस्य किरणनिकरः उदीयमानमभ्युदयं गच्छत् द्विजराजबिम्बं चन्द्रमण्डलमलंकरोति । सहस्रकिरणकिरणग्रहणादेव चन्द्रोऽभ्युदयतीति कविसमयः । 'पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः' इति रघुवंशे ॥

स प्रार्थितो द्वीपजनव्रजेन स्वपत्तनं पावयितुं यतीन्द्रः ।
चित्रादिना सारथिनेव केशी वशीकृतां श्वेतविकाभिधानम् ॥ ५ ॥

तमालास्तापिच्छाः, येषां तमालपत्राणि भवन्ति यत्पत्राणि पत्रच्छेदे दक्षिणदेशे कर्णाभरणीभवन्ति वा । यदुक्तं नैषधे—'श्रवणगतमालदलाग्रं शशिकरमुग्धं सखि विलोक्य । किमपि तुन्दलितः स्मरगरलासु स यदि तेन तदुन्मृगिति क्षणम् ॥' इति विरहावस्थायां चन्द्रोदये दमयन्तीवाक्यम् । तालास्ताडतरवो गुर्जरेषु प्रसिद्धाः । दक्षिणदिशि च राजताला अपि भवन्ति येषां पत्रैः पुस्तकानि लिख्यन्ते ते । तथा कदम्बनीपा धाराकदम्बा धूलीकदम्बा वा । द्रुमा अपि चम्पूटिप्पनके प्रोक्ताः सन्ति । जम्बीराः प्रसिद्धाः । सह निम्बेन पिचुमन्देन 'नींबडा' इति प्रसिद्धेन वर्तन्ते यास्ताहशाः, जम्बू श्यामफलाः प्रसिद्धाः । अथ वा निम्बजम्बूभिः सहितैः सर्जा देवदारवः । अर्जुनाः शास्त्रे देवविशेषे वार्बुदसमीपे च प्रसिद्धाः तैः, तथा अञ्जना वृक्षविशेषाः, वञ्जुला वानीरा, तथा कङ्केलयः अशोकाः केसरा नागकेसरा एतैर्वृक्षैर्या शत्रुंजया सरित् उपास्यते सर्वकालं सेव्यते । किंभूता । यावन्ति त्रैलोक्यलोकवर्तीनि सर्वजातीयानि वा मनसामभीप्सितानि कामितानि तेषां दाने प्रपूरणे दक्षा कुशला । कामितकामधेनुरित्यर्थः । उत्प्रेक्ष्यते—आत्मसुखेषु विषये स्वःसालतायाः कल्पद्रुमभावस्य स्पृहया वाञ्छया वृक्षलक्षैः संसेव्यते । कामितकामदुघां शत्रुंजया सरित ससेव्य वय कल्पवृक्षभावं भजाम इतीच्छयैव ॥ युग्मम् ॥

कदा पुनर्दर्शनमस्य भावि ध्यायन्निदं स्वीयहृदा मुनीन्दुः ।
तीर्थं स तीर्थेशमिव प्रणम्य पथि प्रतस्थे प्रथितावदातः ॥ २५ ॥

स मुनिर्हीरसूरीन्द्रस्तीर्थेश जिनमिव शत्रुंजयाद्रिं प्रणम्य ललाटघटितकुड्मलीकृतकरकमलो नमस्कृत्य पथि द्वीपोन्नतपुरपद्धतौ प्रतस्थे प्रचचाल । स किंलक्षणः । प्रथितो जगद्विख्यातोऽवदातः अकब्बरसाहिप्रतिबोधनलक्षणं चरितं यस्य । स किं कुर्वन् । इदमत्रैव वृत्ते प्रोच्यमानमेतत्स्वहृदा निजमनसा ध्यायन् चिन्तयन् । इदं किम् । यदस्य तीर्थाधिराजस्य पुनर्द्वितीयवारं कदा कस्मिन्काले मम दर्शनमवलोकनम् । यात्रा इत्यर्थः । भावि भविष्यति ॥

मेरूनिव क्वापि सुवर्णवर्ण्यान्कुत्रापि रौप्यानिव शर्वशैलान् ।
अप्याश्मगर्भानिव विन्ध्यभूध्रान्सिद्धाद्रिकूटान्पथि दृष्टवान्सः ॥ २६ ॥

पथि मार्गे सिद्धाद्रेः पुण्डरीकपर्वतस्य कूटान् शिखराणि । कूटशब्दः पुनपुंसकलिङ्गयोः । यथा—'ध्वजमलयजकूटाः कालकूटारकूटौ' इति लिङ्गानुशासने । दृष्टवान्पश्यति स्म । किंभूतान् कूटान् । क्वापि कुत्रापि प्रदेशे सुवर्णैः शोभनवर्णैर्वर्ण्यान् वर्णनीयान् । कानिव । मेरूनिव । मेरवः किंभूताः । सुवर्णैः काञ्चनैः वर्ण्याः प्रशस्याः । पुनः कुत्रापि स्थाने रौप्यान् रूप्याणामिमे रौप्याः । रजतमयानित्यर्थः । कानिव । शर्वशैलानिव । यथा कैलासाः कलधौतस्वरूपा भवन्ति । 'रजताद्रिस्तु कैलासः' इति हैम्याम् । अपि क्वचन भूभागे आश्मगर्भान् अश्मगर्भाणां हरिन्मणीनामिमे । मरकतमणिमयानि-॥ कानिव । विन्ध्यभूध्रानिव । विन्ध्योपमानं श्यामवर्णत्वात् । श्यामनीलवर्णयो

यथा भूरि वार 'श्रीशत्रुञ्जयगिरिसम्बन्धिन्यपि मार्गे प्रसर्पन् प्रचलन् मुहुर्वारंवारं कण्ठपीठं गलकन्दलं विभुज्य वक्रीकृत्य । 'गिरा विभुज्यारि विभुज्य कण्ठम्' इति नैषधे । पश्चाद्भागे । अर्धाक्षिनयनवत् विलोकयति स्म । क इव । पारीन्द्र इव । यथा केसरी अग्रे गच्छन् मुहुः पश्चात्कण्ठं वलयित्वा विलोकते । पुनरन्यार्थे असौ सूरिस्तत्रैवालोकये-ऽप्यवलोकनीयेऽतृप्ततया । अथवा पूर्वव्यावर्णितं वा शिखरधराधरं शत्रुंजयाद्रिं दर्शं दर्शं पुनः पुनर्दृष्ट्वा दृष्ट्वा सौहित्यं तृप्तिम् । 'तृप्तिः सौहित्यमाघ्राणः' इति हैम्याम् । न उवाह न दधौ स्म न प्राप । सरागः सरणरणकः च लोचनाभ्यां सादरमवलोकयन्नेव तृप्तिं प्राप्नोति स्म ॥

पञ्चभिः पार्श्वे विज्ञापकेषु सत्स्वपि सूरेर्मानसविकल्पानाभेकार्थनिष्ठतया कुलकमे-वावधीयते—

एता धरित्रीं त्रिजगत्पवित्रीकर्त्रीं सवित्रीमिव शर्मदात्रीम् ।
स्वजन्मभूमीमिव भूस्पृशो मे मोक्तुं मनो नोत्सहते कथंचित् ॥ ९ ॥

एतां श्रीशत्रुंजयसम्बन्धिनीं धरित्रीं पृथिवीं मोक्तुं विहातुं मे मम मनो मानसं कथ-ञ्चित्केनापि प्रकारेण महता कष्टेन वा नोत्सहते नोत्साहं कुरुते न प्रगल्भते । नोद्यमं निर्मातीत्यर्थः । 'उत्साहः प्रगल्भता । अभियोगोद्यमौ प्रौढिः' इति हैम्याम् । इमां भूमीं मोक्तुं न शक्नोतीत्यर्थः । कामिव । स्वजन्मभूमीमिव । यथा भूस्पृशो मनुष्यस्य निजज-न्मसम्बन्धिनीमवनीं त्यक्तुं चेतो नोयच्छते । किंभूतां धरित्रीम् । त्रिजगतां तात्स्थ्यात्त-द्व्यपदेशात्त्रैलोक्यलोकानां पवित्रीकर्त्रीं पावनीकारिकाम् । पुनः किंभूताम् । सवित्रीं जन-नीमिव । शर्मणां निःशेषसुखानां दात्रीं दायिकाम् ॥

कदम्बलौहित्यकढङ्कतालध्वजादिकूटैः कटकैरिवैषः ।
सगर्वगन्धर्वगजेन्द्रगर्जैः श्रितोऽस्ति शत्रुंजयभूधरेन्द्रः ॥ १० ॥

श्रीशत्रुंजयनामा भूधराणां पर्वतानां भूपानामिन्द्रः स्वामी त्रिभुवनभवनप्रवर्तमा-नसमस्तप्रशस्तमहातीर्थाधिराजत्वाच्चक्रवर्तित्वाच्च अस्ति विद्यते । साक्षात्प्रकारेण दृश्यते इत्यर्थः । किंभूतः । सगर्वा अद्वैतगीतकलाभिः पवनातिपातिगतिवेगा-तिशयवशेन साहङ्कारा गन्धर्वाः देवगायनाः । गन्धर्वजातिदेवविशेषाः स्वर्णम-णिमण्डितशिखरोदारकन्दरोदरनिषण्णाः स्वशशिमुखीसखा हाहादयः पारवासुरा यद्गु-णान् गायन्तीत्यर्थः । तथा गन्धर्वा वन्यवाजिनश्च येषु शिखरेषु तथा गजेन्द्रा गन्धहस्तिनो भद्रादिजातिगजा वा तेषां गर्जा बृंहितानि सजलजलदधीरगम्भीरध्वनयो येषु तादृशैः कदम्बनामा तथा लौहित्याहस्तथा कढङ्काख्यस्तथा तालध्वजाभिधाना इत्येवं-त्यारते आद्या प्रथमं येषां तादृशैरष्टोत्तरशतमितैः कूटैः शिखरैः श्रितः सेवितः । उत्प्रेक्ष्यते—कटकैः सैन्यैरिव शत्रुंजयाभिधानः सार्वभौमोऽपि बलैः कलितो भवेत् । सैन्यैरपि साभिमानः तुरङ्गमगजगर्जोर्जितैः भूयते अथ वा कटकैरिवेत्यभिधेयम् ॥

स यतिनां शक्रो मुनीन्द्रः हीरसूरिः अजय इत्यभिधान यस्यास्तादृशीं पुरं नगरीमाससाद प्राप । उत्प्रेक्ष्यते—अत्र द्वीपोन्नतनगरोपकण्ठे भूपीठे वस्वोकसाराया धनदनगर्याः अवरजां लघुभगिनीमिव । किं कृत्वा । क्रमद्वयी चरणयुगली । 'उच्चै राज्यप्रदानात्कलिकलुषमलक्षालनात्, तामसानामुच्छेदात्, त्रिदशपतिकरस्पर्शनात्, दर्शनस्य । हेतुत्वात्, सस्य सूर्याद्युदयफलपदस्वर्जनज्ञानभूत्वात् धत्ते नाभेयदेवप्रभुपदयुगलीगौरव गौरिवेह ॥' इति श्रीसोमसुन्दरसूरिकृतस्तवे युगलीशब्दः । तया यच्चङ्क्रमणं चलन तस्य क्रमेण परिपाट्या मार्गं पन्थानमतिक्रम्योल्लङ्घ्य ॥ इति मार्गोल्लङ्घनम् ॥

तत्राजयोर्वीरमणस्य पिण्डीभवद्यशः किं शशिजित्वरश्रि ।
सूरीन्दुरालोकयति स चैत्यमचिन्त्यमाहात्म्यजिनाङ्किताङ्कम् ॥ ३१ ॥

सूरीन्दुर्हीरसूरिसोमः तत्राजयपुरे चैत्य प्रासादमालोकयति स ददर्श । किंभूत चैत्यम् । अचिन्त्यं चिन्तयितुमशक्य विचारगोचरातीत माहात्म्य प्रभावो यस्य तादृशेन जिनेनाजयपार्श्वनाथप्रतिमारूपेण अर्हता अङ्कित कलित उत्सङ्गो मध्य यस्य तत् । उत्प्रेक्ष्यते—चैत्यम् । अजयो नामा उर्वीरमणो राजा दशरथनृपस्य जनकस्तस्य । 'अधुनाजयभूपालभाग्येन यमिहागता' इति शत्रुंजयमाहात्म्ये । पिण्डीभवत्पिण्डता प्राप्नुवद्यशः कि कीर्तिरिव । किंभूतं यशः । शशिनश्चन्द्रस्य जित्वरी जयनशीला श्रीः श्वेतिमलक्ष्मीर्यस्य ॥

प्रीत्या प्रणत्याजयपार्श्वमत्राभिष्टुत्य वृत्रारिरिव व्रतीन्दुः ।
अकीर्तयत्क्वाप्युपविश्य तस्य माहात्म्यमित्यङ्गभृतां पुरस्तात् ॥ ३२ ॥

व्रतीन्दुर्वाचंयमचन्द्रमाः सूरिः क्वापि कुत्रापि स्थाने तद्देवगृहवहिर्धर्मशालायामुपविश्यासित्वा अङ्गभृता भविकजन्तूनां पुरस्तादग्रे इत्यमुना प्रकारेणाग्रे वक्ष्यमाणं तस्याजयपार्श्वनाथविम्बस्य माहात्म्य प्रभावमकीर्तयत् विस्तारयति स । 'कीर्तण् यशति विस्तारे' इति धातुः । उक्तवान् । कि कृत्वा । अत्र प्रासादे प्रीत्या प्रमोदेन । 'मुत्प्रीत्यामोदसंमदाः । आनन्दानन्दथू' इति हैम्याम् । अजयपार्श्वमजयपार्श्वनाथप्रतिमां प्रणत्य नमस्कृत्य । व्यवस्थितविकल्पत्वान्मितानिटां वा तुक् । 'आगम्यागत्य प्रणम्य प्रणत्य' इति प्रक्रियाकौमुद्याम् । च पुनः किं कृत्वा । अभिष्टुत्य स्तुत्वा । क इव । वृत्रारिरिव । यथा इन्द्रः शक्रः स्तवादिना जिन स्तौति ॥

कश्चिन्महेभ्यो व्यवहर्तुमब्धिमध्याध्वना प्रास्थित सागराह्वः ।
कास्त्यत्र पुत्री जलधेर्निभाल्य गृह्णाम्यहं तामिति किं वितर्क्य ॥३३॥

कश्चित्कोऽप्यज्ञातपूर्वस्वरूप सागर इत्याह्वा नाम यस्य तादृशो महेभ्य इभप्रमाण धनमस्तीति इभ्यस्ततोऽप्यधिकद्रव्यो महेभ्यो व्यवहारी व्यवहर्तुम् । 'जहालहीतद्दालोद्दो लद्दो लोद्दो पवट्टई' इति वचनात् । अधिकधनाकाङ्क्षया व्यापार कर्तुमब्धिमध्याध्वना समुद्रान्तरालयायिना मार्गेण प्रास्थित प्रस्थितवान् । समुद्रे यानपात्रे चलति रंगे-

भातीव प्रतिभासते तत्परीक्षणमुत्प्रेक्षा । स्वमात्मानं विभाव्य दृष्ट्वा । ज्ञात्वेत्यर्थः । त पयितु पवित्रीकर्तुं समागता जह्नोः पुत्री गङ्गेव । 'तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वोः' इति रघुवंशे । अथ वा 'मलिनीमपि तु' इति पाठः । तत्र कल्मषेण कलुषीभवनशील स्वमात्मानं स्वमात्मानं पावनीकर्तुम् । मुनीश्वरेण किं कुर्वाणेन । समीक्षमाणेन विलोकमानेन । याम् । गिरीन्द्रलक्ष्मीं घनकुण्डशिखराणां सुषमाम् । पुनः किं कुर्वाणेन । इत्यमुना प्रकारेण ऊहमानेन वितर्कं कुर्वता । इति किम् । धात्रा सृष्टिकर्त्रा अत्र सौराष्ट्रमण्डले शत्रुंजयमूलभूमिरिव्या वा विश्वेषां त्रयाणां सप्तानां चतुर्दशानां वा एकविंशतिसंख्याकानां वा जगताम् । 'भुवनानि निवधीरणीणि सप्तचतुर्दश' इति वाग्भटालंकारे । वृत्तौ एकविंशतिरपि । सर्वेषां वा चतुर्दशकोटीब्रह्माण्डाधिपतिः पार्वतीपति' इति प्रसिद्धः । अचलानां पर्वतानां चारिमश्रीर्मनोहरलक्ष्मीः पिण्डीकृता पुण्डरीकाचलरूपे पिण्डता प्रापिता । उत्प्रेक्ष्यते—सर्वपर्वतानां श्रियमेकत्र पृथक् पृथक् अवतिष्ठमानामेकस्मिन्नेव स्थाने दिदृक्षता द्रष्टुमिच्छतेव पिण्डीकृता ॥ युग्मान्तर्भूतषट्कुलकं तुल्यम् । शत्रुंजयपर्वतात्प्रस्थानावसरे शत्रुंजयस्वरूपविचारणम् ॥

पद्मानि यस्या व्यलसन्मुखानि पयःसुरीभिः प्रकटीकृतानि ।
अमानमाहात्म्यमहीधरेन्द्रदिदृक्षयेव सितनेत्रपत्रैः ॥ १५ ॥

यस्या शत्रुंजयाभिधानतरङ्गिण्या पद्मानि कमलानि व्यलसन् विभान्ति स्म । उत्प्रेक्ष्यते—अमानं प्रमाणातीतं माहात्म्यं महिमा यस्य तादृशस्य महीधरेन्द्रस्य शत्रुंजयशैलराजस्य दिदृक्षया द्रष्टुमिच्छयेव पयःसुरीभिः जलदेवताभिः प्रकटीकृतानि जनलोचनगोचराणि निर्मितानि सितानि विकसितानि नेत्राणि नयनान्येव पत्राणि दलानि येषु तादृशानि स्ववदनानि निजमुखानीव ॥

नेदृक्परं तीर्थमुदेति मुक्तिक्षेत्रं त्रिलोक्यामपि तत्समीपे ।
शत्रुंजयासिन्धुमिषेण रेखाचिख्यासयेतीव कृता विधात्रा ॥ १६ ॥

त्रिलोक्यां जगत्त्रये ईदृक् ईदृशं शत्रुंजयशैलसदृशं मुक्तिक्षेत्रं मोक्षगमनस्थानं नागार्यानपूर्वकानन्तानन्तकोटिकोटिमिततीर्थकृद्गणधरसाधुगृहमेधिनां सिद्धिसाधनपदम् अन्यतीर्थमतादृग्विधं नैवोदेति जागर्ति । विद्यते इत्यर्थः । उत्प्रेक्ष्यते—इत्यमुना प्रकारेणाचिख्यासया अर्थाज्जगत्पुरः आख्यातुमिच्छयेव विधात्रा विश्वसृष्टिकर्त्रा तस्य शत्रुंजयस्य समीपे पार्श्वप्रदेशे शत्रुंजया नाम सिन्धुस्तस्या मिषेण कपटेन रेखा कृता विहितेव । एतस्य तुल्यमपरं किमपि तीर्थं नास्तीत्यतोऽयमेव रेखाभाक् । तस्मादस्य पार्श्वे शत्रुंजया सरिद्रूपा रेखा कृतास्तीत्यर्थः ॥

पयःप्लवक्रीडदनेकपौरपुरंध्रिपुञ्जः सरिति व्यराजत् ।
नमश्चिकीर्षुः श्रमणावनीन्दोः पादाम्बुजं वारिसुरीभरः किम् ॥ १७ ॥

सरिति शत्रुंजयाया नद्या पयसा पानीयानां प्लवे पूरे क्रीडन्तीनां जलक्रीडां कुर्वा-

पाठीनपीठाण्डजनक्रचक्रकुम्भीरपुञ्जैः प्रकटीभवद्भिः ।
वन्यैरिवारण्यमगण्यहिंस्रैर्भयानकोऽम्भोधिरभूत्तदास्य ॥ ३७ ॥

तदा तस्मिन्मेघागमप्रक्रमे तस्य सागरमहेभ्यस्य अम्भोधिः समुद्रो भयानको भयंकरो बभूव । कैः । प्रकटीभवद्भिः दृग्गोचरीभवद्भिः दृग्गोचरमागच्छद्भिः पाठीनपीठा मत्स्यविशेषा अण्डजाः सामान्यमत्स्याः नक्राश्चक्रास्तथा कुम्भीराणां पुञ्जा व्रजा मकरजातिविशेषास्तैः कृत्वा भीमम् । किमिव । अरण्यमिव । यथा वन्यैः काननजन्मभिः अगण्यैर्गणयितुमशक्यैर्गणनातीतैर्हिंस्रैः हिंसनशीलैः श्वापदैर्व्याघ्रसिंहाष्टापदादिकैर्जन्तुघातकसंततिभिरटवी भयकारिणी भवेत् ॥ इति जलदोदयः ॥

क्रोधोद्धतं व्यालमिवोपयान्तं प्रकोपितं दुष्टमिवाथ चण्डम् ।
स सागरो भैरवसागरं तं द्रष्टुं न दृष्ट्यापि तदा शशाक ॥ ३८ ॥

स यानपात्रेण समुद्रमध्ये समेतः सागरनामा व्यवहारी यदा यस्मिन् समये त स्फुरदमन्दमेदुरमुदिरमण्डलाकलितं प्रचण्डप्रभञ्जनप्रक्षुभ्यत्पयःप्रसरत्प्रतिदिगन्ततुङ्गतरङ्गभरं भैरव भयावहं सागरं समुद्रं दृष्ट्यापि लोचनेनापि द्रष्टु विलोकयितुं न शशाक नैव समर्थोबभूव । कमिव । व्यालमिव । यथा क्रोधेन कोपाटोपेन कृत्वा उद्धतमुत्कट सुभटकोट्यापि कलयितुमाक्रमितुमशक्यं तथा उपयान्तं संमुखमागच्छन्त व्यालं दुष्टगज 'पुनी' इति प्रसिद्धम् । अथ वा पूर्वोक्तविशेषणविशिष्टं गारुडिकैरपि कलयितुमशक्यं दुष्टसर्पमिव । अथ वा वन्यजीवैराक्रमितुमशक्य श्वापदमिव । अथ वा चित्रकव्याघ्रादिभिरनाक्रमणीय कण्ठीरवमिव । अथ वा गन्धसिन्धुरादिभिरनाकलनीय शरभमिव । 'व्यालो दुष्टगजे सर्पे खले श्वापदसिंहयोः' इत्यनेकार्थः । अथ पुनः कमिव । प्रकोपित केनापि प्रकारेण प्रकोपित महाकोप प्रापितम् । तथा चण्डं दुष्टाशय दुर्दन्तिनं वा दुष्ट दुर्जनमिव ॥

संवर्तवत्तत्र तदा स्वपोतलोकक्षयं प्रेक्षितुमक्षमः सन् ।
विलासवाप्यामिव वार्धिमध्ये यावत्स झम्पां प्रगुणः प्रदत्ते ॥ ३९ ॥

स सागरश्रेष्ठी यावत् यावत्प्रमाणेन समयेन प्रगुण उत्साहवान् सन् वस्त्रायश्चलसंवरणेन बद्धकच्छो वा वार्धिमध्ये समुद्रान्तः झम्पां संपातपाटवम् । जले निपतनमित्यर्थः । प्रदत्ते । कस्यामिव । विलासवाप्यामिव । यथा कश्चिज्जलकेलिकरणप्रवणः क्रीडादीर्घिकायां झम्पां दत्ते । किंभूतः सन् समुद्रसलिले पतति । तदा तस्मिन्मेघोत्पातसमये तत्र क्षुब्धपयोधिमध्ये संवर्तवत्कल्पान्तकाल इव स्वपोतलोकानां जिनयात्राद्यनेकधार्मिकजनानां क्षयं संहारं प्रेक्षितुं स्वयमालोकितुमक्षमः असमर्थः सन् । मया कथं कथंचिन्मद्यानपात्रमध्येऽधिरोपिता एतावन्तो लोका एककालं प्रलयं लप्स्यन्ते । तदेतेषां मदाश्रितानां लोकानां क्षयमहमात्मदृष्ट्या द्रष्टुं नालमिति तत्प्रथममेव मंक्षु यावज्जलधौ झम्पां प्रदत्ते इत्यर्थः ॥ इति सागरस्य सागरे पिपतिषा ॥

प्रोक्त[illegible] [illegible] प्रा[illegible] [illegible]. भेदावारणं [illegible] इदमेव विचारणीय । इति [illegible] । [illegible] नदी[illegible] जलस्नानकेषु प्रचितेषु तीर्णतया [illegible] [illegible] [illegible] पृथक् पृथक् गत्वा इतस्ततः [illegible] । [illegible] एष मद्गुपक्षमलोको मध्यमलोकसजातो [illegible] । पाद[illegible] पर्यटनं [illegible] भेद प्राप्नोति इत्येष विमर्शः ॥

शत्रुंजयाद्रेर्गिरिमौक्तिकसिन्धोः सांनिध्यतोऽसावपि सिन्धुरासीत् ।
माहात्म्यभूमिः किमु किं न गङ्गासङ्गेन गङ्गीयति सिन्धुरन्या ॥२१॥

महिमार्णव[illegible]माहात्म्यानामेक[illegible] सिन्धोः समुद्रस्य विमलाद्रेः पुण्डरीकगिरेः सांनिध्यतः सामीप्यात्पार्श्वे स्थिता । उत्प्रेक्ष्यते—असौ शत्रुंजया सरिदपि माहात्म्यानामसाधारणप्रभावाणां भूमिः स्थानं किमु आसीज्जातेव । दृष्टान्तेनार्थं स्पष्टयति—युक्तोऽयमर्थो वा । गङ्गायाः [illegible] मन्दाकिनीसंपर्केण अन्या परा यमुनाप्रमुखा सिन्धुर्नदी किमिति वितर्के प्रश्ने वा नैव गङ्गीयति गङ्गेव नाचरति । अपि तु गङ्गेव भवति ॥

उत्तीर्णवांस्तां सरितं यतीन्दुः सिन्धुं सुराणामिव चक्रपाणिः ।
ईर्यापथिक्याश्च कृते तटे स्थाद्द्रष्टुं क्षणं तामिव कल्मषघ्नीम् ॥ २२ ॥

यतीन्दुः यतिषु सुधाकरः सूरिः तां शत्रुंजयानाम्नीं नदीमुत्तीर्णवान् 'एक पाद जले कृत्वा' इति सिद्धान्तोक्तविधिना उत्ततार । क इव । चक्रपाणिरिव । यथा नारायणो धातुकीखण्डभरतक्षेत्रमण्डनामरकाभिधराजधानीनायकं पाण्डुधात्रीपतिपुत्रकलत्रापहारकमर्धनरसिंहरूपेण पद्मोत्तरपृथिवीपतिं परिभूय द्रौपदीं चादाय पद्मभी रथे. सुस्थितसुरानुभावाल्लवणार्णवमप्यवगाह्य पूर्वोत्तीर्णपाण्डवाप्रतिहतवहनाभावात्सुराणां सिन्धुं देवनदीं गङ्गां स्वयमुत्तरति स्म । अत्रागमविधेः किमपि प्रयोजनं न, किं तु केवलं नद्युत्तरणमेवोपमानम् । स पुनः सूरिरीर्यापथिक्या ईर्यापथिकीप्रतिक्रमणस्य कृते कार्याय तटे शत्रुंजयसरित्तीरे क्षणं क्षणमात्रं तिष्ठति स्म । उत्प्रेक्ष्यते—कल्मषाणि पापानि हन्तीति कल्मषघ्नीं शत्रुंजयां द्रष्टुं दृग्गोचरीकर्तुं क्षणं तस्थिवानिव । यतः सा पापहन्त्री ततस्तद्दर्शनमपवर्गजिगमिषया पापप्रहननोद्यतानां यतीनामप्युचितमेव दुरितघातसाधनत्वादिति ॥

पुंनागनारङ्गरसालसालप्रियालहन्तालतमालतालैः ।
कदम्बजम्बीरसनिम्बजम्बूसर्जार्जुनैरञ्जनवञ्जुलैश्च ॥ २३ ॥
कङ्केलिभिर्भूपतितीरभूमिर्यावन्मनोभीप्सितदानदक्षा ।
स्वसालतायाः स्पृहयात्मनीव सर्वैर्द्रुमैः सिन्धुरुपास्यतेव ॥ २४ ॥

पुंनागाः सुरपर्णिकाः पादपविशेषाः, नारङ्गाः प्रसिद्धाः, रसालाः सहकाराः वृक्षभेदोऽपि, सालाः असनाः, प्रियालाः राजादनाः, हन्तालाः नाम देशविशेषप्रसिद्धवृक्षाः,

मोद्घाटयेः स्वस्तरुपत्रपेटां संप्रापयेद्वीपपुरं पुनस्ताम् ।
परस्य पृथ्व्या इव वासवस्य तत्राजयोर्वीशितुरर्पयेस्त्वम् ॥ ४३ ॥

हे वत्स हे सागरव्यवहारिन्, मयोक्तां पयोधिपयोमध्यवर्तिनीं स्वस्तरोः कल्पद्रुमस्य पत्राणां दलानाम् । स्वर्द्रुमपर्णैर्निर्मितामित्यर्थः । पेटा मञ्जुषां मोद्घाटयेः त्वं माविकाशीकुर्याः । 'तुं म उघाडीश' इति लोकभाषा । पुनस्तां कल्पपादपपत्रपेटां द्वीपनाम्नि पुरे नगरे संप्रापयेः अनुद्घाटितद्वारकपाटामेव एनां द्वीपवन्दिरे त्व नयेः । गृहीत्वा यायाः इत्यर्थः । पुनस्तत्र द्वीपपुरे अर्थाद्दिग्जैत्रयात्रार्थं समेतस्याजयनाम्न उर्वीशितुः पृथ्वीपतेः राज्ञः अर्पयेः विश्राणयेः दद्याः । उत्प्रेक्ष्यते—पृथ्व्या भूमेः परस्य अन्यस्य वासवस्य पुरंदरस्येव एकः स्वर्गवासवो वर्तते अयमन्यो मेदिन्या वासव इव ॥

उद्घाट्य पेटां प्रकटां प्रणीय चित्रादिवल्लीमिव पार्श्वमूर्तिम् ।
छिनत्त्विदं स्नात्रजलाभिषेकाञ्शतं ससप्तोत्तरमङ्गरोगान् ॥ ४४ ॥

हे सागरेभ्य, अजयो नाम राजा इदं स्नात्रस्य अस्याः श्रीपार्श्वनाथमूर्तेः स्नात्रस्य स्नपनस्य जलस्य सलिलस्याभिषेकान्सिञ्चनान्सप्तसंख्या उत्तरे अग्रे यस्य तादृश शतमेतावता सप्तोत्तरं शतमङ्गरोगान् स्वशरीरामयान् छिनत्तु निराकरोतु । 'स दिशः सकला जिष्णुर्जयन्प्राग्भावकर्मणा । सप्तोत्तरशतेनाथ व्याधिना परिपीडित. ॥ आक्रामन्निति भूपालान् बलात्सौराष्ट्रमण्डलम् । क्रमात्प्रापदखण्डाज्ञस्त्रिखण्डावनिमण्डनः ॥' इति शत्रुंजयमाहात्म्ये । किं कृत्वा । पेटा कल्पद्रुदलमण्डलघटितां मञ्जूषामुद्घाट्य द्वारद्वयं विकाशीकृत्य । अपावृतद्वारा विधायेत्यर्थः । पुनश्चित्रमिति पदमादौ यस्यास्तादृशीं वल्लीमिव चित्रकवल्लीमिव 'चित्रावेलि' इति प्रसिद्धा द्रव्याद्यक्षयकारिकां पार्श्वमूर्तिं श्रीपार्श्वनाथप्रतिमां प्रकटां लोचनगोचरां प्रणीय कृत्वा ॥ इति पद्मावत्यादेश ॥

आसादितप्राणितवत्पुनः स्वं विदन्निशम्येति गिरं त्रिदश्याः ।
आनाययन्नीरधिनीरमध्याज्जनैः स्वपोते जिनमूर्तिपेटाम् ॥ ४५ ॥

स सागरव्यवहारी जनैः स्वनाविकलोकैः नीरधिनीरमध्यात्समुद्रसलिलान्तरालाज्जिनमूर्तिपेटां त्रयोविंशतितमभगवत्प्रतिमापवित्रितमध्यमञ्जूषां स्वपोते स्वयानपात्रमध्ये आनाययत् । किं कृत्वा । निशम्य श्रुत्वा । काम् । त्रिदश्या पद्मावत्या देवताया गिर वाणीम् । स सागरः किं कुर्वन् । पुनर्द्वितीयवारमासादित संप्राप्त प्राणित जीवितव्य येन तद्वत्स्वमात्मान विदन् जानन् ॥

क्षणाददृश्योऽभवदिन्द्रजालमिवोपसर्गोऽथ प्रभोः प्रभावात् ।
चमत्कृतस्तत्यविलोक्य पेटामभ्यर्च्य भोगादि पुरो व्यधत्त ॥ ४६ ॥

अथ पोते पार्श्वनाथप्रतिमागमागमनानन्तरमुपसर्गो [illegible] र्मीमूरवात्यादिजनितोपद्रवः क्षणा क्षणमात्राददृश्यो लोचनातीतः [illegible]

शाब्देनैवपदेनैव दृश्यते । यथा—'नीली विनीलं नभः' । तथा—'जरातणुकंतिकडप्पसिणिद्धउ । सोहइ फणमणिकिरणालिद्धउ नवजलहरतडिल्लयलंछिउ ॥' इति । अत्र पार्श्वनाथो मरकतवर्णः, जलधरः श्यामवर्णः, अनयोरुपमेयोपमानता जाता इति ॥ इति शत्रुंजयपरिसरभुवि विहाराभे प्रस्थानम् ॥

कुत्रापि बन्धूनिव नन्दनस्य निकुञ्जपुञ्जान्सुमनोभिरामान् ।
वेणीरिव व्योमपयोधिपत्न्याः कूलंकषाः क्वापि विशुद्धवारः ॥ २७ ॥
इवात्मदर्शान्धरणीन्दिरायाः क्वचित्तटाकांश्च पयःप्रपूर्णान् ।
मित्राणि सुत्रामपुरः किमत्र श्रीवासवेश्मानि पुनः पुराणि ॥ २८ ॥
हृल्लेखितामाकलयद्भिरात्मावतंसतां नेतुमिदं पदाब्जम् ।
श्राद्धैरिवानेकजनैः प्रणम्यमानः स पश्यन्पुरतोऽजिहीत ॥ २९ ॥

स प्रभुः सूरिः पुरतः शत्रुंजयाद्रिकूटानि निर्मुच्याग्रेतनमार्गे अजिहीत । 'ओहाङ् गतौ' धातुः । अद्यतनप्रयोगः । गच्छति स्म प्रचलितवान् । स किं क्रियमाणः । श्राद्धैः श्रावकैरिवानेकैर्विविधजातीयैर्बहुभिर्वा जनैः सौराष्ट्रराष्ट्रजन्मभिर्लोकैः प्रणम्यमानो नमस्क्रियमाणः । जनैः किं कुर्वद्भिः । हृल्लेखा उत्कण्ठा अस्त्येषामिति हृल्लेखिन उत्कण्ठावन्तस्तेषां भावो हृल्लेखिता औत्सुक्यम् । 'रणरणकोत्कण्ठे आयल्लकारतीहृल्लेखोत्कलिके' इति हैम्याम् । आकलयद्भिर्बिभ्राणैः । किं कर्तुम् । इदं पदाब्जं सूरिचरणारविन्दमात्मनः स्वस्य अर्थान्मस्तके अवतंसतां शेखरत्वं नेतुं प्रापयितुम् । पुनः स किं कुर्वन् । पश्यन्विलोकयन् । कान् । कुत्रापि प्रदेशे निकुञ्जपुञ्जान् वनप्रकरान् । उत्प्रेक्ष्यते—नन्दनस्य मन्दराद्रिद्वितीयमेखलावर्तिवासववनस्य बन्धून् सोदरान् इव । तत्तुल्यानित्यर्थः । किंभूतान् । सुमनोभिर्विविधजातिकुसुमैरभिरामान् देवैश्च रमणीयान् । पुनः क्वापि भूमिभागे कूलंकषाः अभङ्गरङ्गत्तुङ्गतरङ्गसंगमागादप्रचलप्रसरत्पयःपूरदत्तोनिष्पातिततटीस्तटिनीः पश्यन् । उत्प्रेक्ष्यते—व्योमपयोधिपत्न्याः गगनापगायाः गङ्गायाः वेणीः प्रवाहानिव । 'प्रवाहः पुनरोघः स्याद्वेणीधारारयश्च' इति हैम्याम् । किंभूताः । विशुद्धवारः विशुद्धं निर्मलमुज्ज्वलं च वाः पानीयं यस्याम् । पुनः कान् । तटाकान् सरोवराणि पश्यन् । उत्प्रेक्ष्यते—धरणीन्दिरायाः भूमिश्रियः आत्मदर्शान्दर्पणानिव । किंभूतान् । पयोभिः पानीयैः प्रकर्षेण कण्ठं यावत्पूर्णान् निर्भरभृतान् । पुनः कानि पुराणि नगराणि पश्यन् । उत्प्रेक्ष्यते—अत्र मेदिनीमण्डले सौराष्ट्रमण्डले वा सुत्रामपुरः इन्द्रनगरस्यामरावत्याः मित्राणीव । किंभूतानि पुराणि । श्रीवासवेश्मानि श्रीणां धनधान्यादिलक्ष्मीणां श्रियो हरिप्रियाया वा वासार्थं निवसनकृते मन्दिराणीव ॥ त्रिभिर्विशेषकम् ॥

क्रमद्वयीचङ्क्रमणक्रमेणातिक्रम्य शक्रो व्रतिनां स मार्गम् ।
वस्वोकसारावरजामिवात्राजयाभिधानां पुरमाससाद ॥ ३० ॥

[illegible] ॥

[illegible] ।

[illegible] ॥ ६० ॥

[illegible] ॥

पार्श्वेशितुः स्नात्रजलाभिषेकात्कृतोऽजयोर्वीन्द्रतनूलतायाः ।

महामयोत्थः प्रशशाम तापो भूमेरिव ग्रीष्मभवोऽब्दवर्षात् ॥ ६१ ॥

ततो मजूषामध्यात् श्रीपार्श्वनाथप्रतिमाप्रकटीभवनानन्तरं पार्श्वेशितुः पार्श्वप्रभुप्रतिमायाः स्नात्रजलस्य स्नपनसलिलस्य अभिषेकात्सिञ्चनात् अजयो नामा उर्वीन्द्र- वसुधासुधानाधीशः तस्य तनूलतायाः वपुर्यष्टेर्महान्तोऽत्युत्कृष्टा ये आमया कुष्ठज्वरादयो रोगास्तेभ्य उत्था उत्थान यस्य तादृशस्तापो निदाघज्वरः प्रशशाम शान्तिं प्राप्नोति स्म । कस्या इव । भूमेरिव । यथा पृथिव्या ग्रीष्मान्निदाघर्तोर्भवो जनितः संतापः अब्दवर्षान्मेघवर्षणात्प्रशाम्यति ॥

महामहः कोऽपि महीहिमांशौ प्रावर्ततानामयतामवाप्ते ।

मेने जनो यत्र निजं प्रपन्नस्वःप्राज्यसाम्राज्यमिव प्रमोदात् ॥ ६२ ॥

महीहिमांशौ अजयाभिधानवसुधासुधाकरे अनामयतां नीरोगतां समाधिं अवाप्ते प्राप्ते सति कोऽप्यद्भुतवैभवो महामहः अर्थाज्जनानामत्युत्सवः प्रावर्तत संजायते स्म । यत्र यस्मिन्नतिशायिनि उत्सवे प्रवर्तमाने सति जनस्तदजयराजपरिजनसेवकलोकः प्रमोदान्निजमात्मानं प्रपन्नमासादितं स्वः स्वर्गस्य प्राज्य प्रभूतं साम्राज्य मण्डलीकपदलक्षणाधिपत्य येन तादृश मेने मन्यते स्म जानीते स्म ॥

तदोपतापप्रकरैर्वियुक्तः साकेतनेताभ्यधिकं दिदीपे ।

घनात्ययन्यक्कृतनीरवाहोपरोधनिर्मुक्त इवामृतांशुः ॥ ६३ ॥

तदा न केवल सेवकलोकानां प्रमोदः समजनि, अपि पुन. पार्श्वनाथस्नात्रजलाभिषिञ्चनानन्तरमुपतापाना कुष्ठज्वरादिसप्तोत्तरशतरोगाणां प्रकरैर्वृन्दैः वियुक्तो विरहितः । 'आम

[illegible] । [illegible]—इति [illegible] विचारयितुमेव । इति किम् । यदनाम्भोधेर्जलधे-र्मौक्तिकानि [illegible] [illegible] [illegible] [illegible] निभाल्य सम्यग्निरीक्ष्य तां समु-[illegible] [illegible] महान्ति ॥

दुर्दैवयोगाज्जलधौ जजृम्भे तदा कुतश्चिज्जलदस्तमोवत् ।
चिखेल योषेव तडित्तदङ्के जगर्ज मत्तेभ इवोत्कटं सः ॥ ३४ ॥

तदा तस्मिन् सागरव्यवहारिणि वारिधिमध्यगमनसमये दुर्दैवयोगादभाग्योदयात् प्रभावाज्जलधौ पयोधेरुपरि गगनभागे जलदोऽतिप्रबलपयोधरः कुतश्चित्कस्माच्चन स्थानादागत्य जजृम्भे नभोमण्डले परितः प्रससार । किंवत् । तमोवत् । यथान्धकारं कुतश्चिद्गिरिगह्वरादिभ्य आगत्य जृम्भति द्यावाभूम्योः प्रसरति । पुनस्तस्य जलदस्याङ्के उत्सङ्गे मध्ये इत्यर्थः । तडिद्विद्युच्चिखेल चिक्रीड चमत्कारं कुरुते स्म । केव । योषेव । यथा कामिनी नायिका स्वनायकाङ्के खेलयति । पुनः स जलदो मत्तेभ इव । वारुणीपायिमदोद्धतीभूतानूनगन्धसिन्धुर इव उत्कटं कर्णकटुकं यथा स्यात्तथा भैरवं जगर्ज गर्जारवं चकार ॥

ततोऽद्रिकान्तः परिवर्तवात इव प्रवृत्तः परितः पयोधौ ।
कपोतपोता इव तस्य पोता निपेतुरुत्पत्य नभस्यधस्तात् ॥ ३५ ॥

ततः प्रबलपयोधिपटलप्रसरणानन्तरं परिवर्तवातः कल्पान्तकालसम्बन्धी समीरण इव । 'कल्पो युगान्तः कल्पान्तः संहारः प्रलयः क्षयः । संवर्तः परिवर्तश्च' इति हैम्याम् । अद्रिकान्तः प्रचण्डपवनः । 'वातोऽद्रिकान्तपवमानमरुत्प्रकम्पनाः' इत्यपि हैम्याम् । परितः समुद्रमध्ये सर्वत्र प्रवृत्तः प्रवर्तते स्म । प्रसरति स्मेत्यर्थः । ततः पवनप्रवृत्तेरनन्तरं तस्य सागरव्यवहारिणः पोता वहनानि नभसि उत्पत्य अत्युद्भटविकटप्रभञ्जनवहिमरंहःसंदोहोच्छालितानि गगनाङ्गणान्तरुड्डीयोड्डीय अधस्तात्पुनः पयोधिमध्ये निपेतुः पतन्ति स्म । के इव । कपोतपोता इव । यथा पारावतपृथुका व्योमन्युड्डीयाधस्ताद्धरणीपीठे निपतन्ति ॥

रङ्गत्तरङ्गावलिरम्बुराशेरालम्बमानाम्बरमम्बुपूरैः ।
राजी गिरीणामिव तुङ्गिमानमाबिभ्रती प्रादुरभूत्तदानीम् ॥ ३६ ॥

तदानीं निखिलाम्बरमण्डलाखण्डाडम्बरितदुर्धरवारिधराविर्भवनादनुपरितः प्रवृत्तपरिवर्तपवमानसमानामानाकाण्डप्रकटीभवत्प्रचण्डपवनप्रसरणसमये अम्बुराशेः समुद्रस्य रङ्गन्ती दशदिग्विभागेषु प्रचलन्ती तरङ्गाणां कल्लोलानामावलिः श्रेणिः प्रादुरभवत्प्रकटीभवति स्म । किं कुर्वाणा । अम्बुपूरैः पयःप्लवैः । जलभरैरित्यर्थः । कृत्वा अम्बरमाकाशमालम्बमाना आश्रयन्ती । प्रौढा पवनप्रोच्छलज्जालकल्लोलैर्जलधिव्योममण्डलावेकीभूताविव लक्ष्येते । किं कुर्वती तरङ्गावलिः । गिरीणां राजिः पर्वतानां पङ्क्तिरिव तुङ्गिमानमत्युच्चभावमाबिभ्रती धारयन्ती ॥

कान् वाञ्छति । तेजःशब्देन प्रतापोऽप्युच्यते । यथा भट्टिः—'स तमोऽपनयन् स-यमजनि स्वतेजसा दहने' 'रघुवंशानामधिरोहिण' इति । ॥ त्रिभिर्विशेषकम् ॥ इत्यजयराजरोगापहारकाजयपार्श्वनाथागमनम् ॥

नाम्नैव तस्याजयनिर्वृतस्य पार्श्वप्रभोरस्य बभूव नाम ।
तद्वासितस्यैव पुरस्य वाराणस्या इवैतस्य निवासभूमेः ॥ ९७ ॥

तस्याजयनिर्वृतस्य तस्य पूर्वोक्तस्याजयस्य राज्ञो नामाभिधानेनैव पार्श्वप्रभोः श्रीपार्श्वनाथस्य नाम बभूव । अजयपार्श्वनाथ इति संजातम् । तथैव । तेनाजयराजेन वासितस्य निवेशितस्य स्थापितस्य अजयपुरस्यापि । किंभूतस्य पुरस्य । अजयपार्श्वनाथस्य निवासभूमेः स्थितिस्थानकस्य । कस्या इव । वाराणस्या इव । यथा वाराणसी भगवतः श्री-पार्श्वनाथस्य जन्मभूमित्वाद्वासस्थानम् ॥ इति पाठान्तरम् ॥

ध्यातोऽधुनाप्येष पयोधिमध्ये प्रयाति वाते प्रतिकूलभावम् ।
निर्विघ्नयन्पोत इवाङ्गभाजः प्रभुः सुखं लम्भयति प्रतीरम् ॥ ९८ ॥

भो भव्याः, अधुनापि पञ्चमारके अस्मिन्कलौ प्रवर्तमानेऽपि वा पयोधिमध्ये जलधि-जलान्तराले ध्यातोऽर्थाल्लोकैर्ध्यानगोचरीकृतः स्मृतोऽपि वा वाते प्रचण्डपवने प्रतिकू-लभावं प्रतिकूलता याति गच्छति सति एष प्रभुरजयपार्श्वनाथः अङ्गभाजः पार्श्वनाथ-स्मरणप्रवणाः प्राणिनः निर्गता विलयं प्राप्ता विघ्नाः प्रत्यूहा येभ्यस्ते निर्विघ्नान्करो-तीति । 'तत्करोति तदाचष्टे' इति प्रक्रियासूत्रेण णिः । 'णिर्ङित्करणे' इति सारस्वते इति सारस्वतसूत्रेण णिप्रत्ययः । निर्विघ्नयति निर्विघ्नयतीति निर्विघ्नयन् । विघ्नरहितान्कु-र्वन्नित्यर्थः । निरन्तरायान् सृजन् सुखं यथा स्यात्तथा कुशलेनेत्यर्थः । प्रतीरं तटभूमीं स्वस्ववेलाकूलावनीं लम्भयति प्रापयति । क इव । पोत इव । यथा निर्वहनान्बोहित्थर-हितास्तथाम्भोधिमध्ये पतिताञ्जनान् यानपात्रे स्वस्मिन्नधिरोप्य सुखेन तीरं नयति ॥

बहूदितैः किं भवदीयभाग्यैरारोपितस्तेन महीधनेन ।
सुपर्वशाखीव समीहितानि यच्छंश्चिरं नन्दतु पार्श्वनाथः ॥ ९९ ॥

भो भव्याः, किं बहूदितैः बहुभिरनल्पैरुदितैः कथितैः किमस्तु । एषोऽजयपार्श्वनाथः वो युष्माकं समीहितानि सम्यगैहिकानि पुत्रकलत्रद्रविणादीनि आमुष्मिकाणि स्वर्गापवर्गा-दिकानि कामितानि मनोरथान् यच्छन् पूरयन् चिरं बहुसमयमाकल्पान्तकालं यावन्नन्दतु विजयवान् प्रवर्तताम् । किंभूतः । तेन महीधनेनाजयराजेन आरोपितः स्थापितः । उत्प्रेक्ष्यते—भवदीयभाग्यैः युष्मत्सबन्धिभिः सुकृतैः सुपर्वशाखी कल्पवृक्ष इवारोपि-तः ॥ इत्यजयपार्श्वनाथप्रबन्धः । विस्तरतस्त्वेतद्व्यतिकरः शत्रुंजयमाहात्म्यादवसेयः ॥

तत्रोपदिश्येति जनान्मुमुक्षुक्षोणीन्द्रभुक्षा क्षणमक्षिलक्ष्यम् ।
प्रणीय नत्वा च तमात्मना तत्पुरं पवित्रीकृतवान्स तद्वत् ॥ १०० ॥

कृष्टेव तद्भाग्यभरैस्तदाविर्भूयाभ्रमार्गेऽब्धिगभीररावा।
पद्मावती वाचमिमामुवाच मा वत्स कार्षीरिह साहसं त्वम् ॥ ४० ॥

तदा तस्मिन् सागरव्यवहारिणः सागरमध्ये पतनसमये अभ्राणां मेघानां मार्गे वर्त्मनि अभ्र एव मार्गे गगनाध्वनि वा आविर्भूय प्रकटीभूत्वा पद्मावती पार्श्वनाथशासनाधिष्ठायिका यक्षिणी धरणेन्द्राग्रमहिषी वा अनयोरन्यतरा वा इमां वक्ष्यमाणा वाच वाणीमुवाच वदति स्म। किंभूता। अब्धिवज्जलधिर्धीरध्वनितमिव गभीरो गम्भीरो रावो ध्वनिर्यस्याः। उत्प्रेक्ष्यते—तद्भाग्यभरैः सागरव्यवहारिणा प्राचीनाचीर्णमहासुकृतसंदोहैरिवाकृष्टे वा आकृष्यानीतेवात्र। इमा काम्। हे वत्स हे पुत्र सागरमहेभ्य, इहागाधपयोधिमध्ये साहसं झम्पालक्षणम् अतलस्पृक्जलमध्यनिपतनरूपं सत्त्व मा कार्षीः। मा इति निषेधे। सर्वथा मा कुर्वीथाः। चिरं जीव। 'मा कार्षीत्कोऽपि पापानि मा च भूत्कोऽपि दु:खित' इति हेमाचार्यकृतयोगशास्त्रे॥

मध्येऽम्बुधेरस्ति समस्तदुःखपाथोधिमन्थावनिभृत्प्रभावम्।
निधानमम्भोनिधिमेखलाया इवान्तरे पार्श्वजिनेन्द्रबिम्बम् ॥ ४१ ॥

हे वत्स, मध्येऽम्बुधे समुद्रसलिलान्तराले पार्श्वजिनेन्द्रस्य बिम्ब मूर्तिरस्ति विद्यते। किमिव। निधानमिव। यथा अम्भोनिधिमेखलाया. समुद्रः काञ्चीरूपो वृत्ताकार. परितोवर्तित्वायस्यास्तादृश्या. क्षोण्या अन्तरे मध्ये रूप्यसुवर्णमणिमाणिक्यमण्डित निधानं भवति। किंलक्षण बिम्ब निधान च। समस्तानि ऐहिकामुष्मिकाणि दु.खानि सकलानि दौस्थ्यभृत्यभावादीनि क्लेशानि। यदुक्तं भर्तृहरिकाव्ये—'सेवाधर्म. परमगहनो योगिनामप्यगम्य:' इति। परलोके देवादिषु परप्रेक्ष्यभावो महद्दुःख तान्येव बहुत्वात्पयोधिःपारावारस्तस्य मन्थने विलोडने मन्थावनिभृत् मन्दरगिरिस्तत्तुल्य' प्रभावो माहात्म्य यस्य तत्॥

जलात्तदानाय्य जनैः प्रपूज्य संस्थापितं स्वे वहने धनेश।
उत्तालवातूलमिवार्कतूलं विघ्नं पुरैतद्धरति त्वदीयम् ॥ ४२ ॥

हे धनेश धनपते व्यवहारिन्, जनैर्निजनाविकलोकैर्जलाज्जलधिसलिलात् आनाय्याकर्षयित्वा पुनः प्रपूज्य प्रकर्षेण चन्दनसुमकर्पूरागुरुभिरभ्यर्च्य तन्मयोक्तम् श्रीपार्श्वबिम्ब स्वे आत्मीये अर्थात्त्वत्संबन्धिनि वहने यानपात्रे सस्थापित सत् एतत्प्रत्यक्षमविरलजलदपटलप्रचण्डपवनवेगवहनोड्डयनप्रवर्तनरूप त्वदीय तव सबन्धिन विघ्न प्रत्यूहव्यूहमनिसर्गोद्भूतोपसर्ग पुरा हरति अवश्य हरिष्यतीति। 'यावत्पुरानिपातयोर्योगे भविष्यदर्थे वर्तमाना' इति सूत्रेणात्र पुरा हरति इति हरिष्यतीत्यर्थः प्रयोगः। तथा 'पुरेदमूर्ध्वं भवतीति वेधसा पद किमस्याङ्कितमूर्ध्वरेखया' इति नैषधे। किमिव। अर्कतूलमिव। यथा उत्तालवातूल त्वरिततरं प्रवर्तमान एव मानसमूहोऽर्कतूल हरति उड्डीय क्वचिदपि क्षिपति तथैतत्त्वद्विघ्न हरिष्यति॥

हैम्याम् । तथा [illegible] नाम [illegible]
तिष्ठते । तदुक्तम्—'[illegible]
[illegible] । भातीति [illegible] ॥'
इति । तथा '[illegible]' इति [illegible] ॥

अथ हीरसूरिसंघसंमुखागमनप्रस्तावमाह—

शिरोधृतश्वेतसुवर्णकुम्भाः काश्चिद्व्रजन्ति स्म नितम्बवत्यः ।
श्यामादिवालक्ष्म्य इवोद्वहन्त्यः संपूर्णचन्द्राम्बुजबन्धुबिम्बान् ॥ ६४ ॥

हीरसूरेः संमुखागमने काश्चिन्नितम्बिन्यो नितम्बवत्यः नितम्बो [illegible] नाभितः शृङ्गारादिविभ्रमो वा विद्यते यासां ता स्त्रियो वनिता लगन्ति शोभन्ते । किंभूताः । शिरसि मस्तके धृता आरोपिताः श्वेता उज्ज्वलास्तथा सु शोभनो वर्णो येषाम् । अथ वा श्वेतानां रूप्याणाम् । 'श्वेतं रूप्यं कलधौततारजतश्वेतानि' इति हैम्याम् । तथा सुवर्णानां काञ्चनानां कुम्भाः कलशा याभिस्ताः । उत्प्रेक्ष्यते—श्यामादिवालक्ष्म्य इव रजनीदिवसस्य श्रिय इव । किं कुर्वत्यः । उद्वहन्त्य बिभ्रत्यः । कान् । संपूर्णा अखण्डाश्चन्द्रास्तथा अम्बुजबन्धवो भास्करास्तेषां बिम्बान्मण्डलान् । अखण्डचन्द्रमण्डलानादाय निशाश्रियः सूर्यमण्डलान् गृहीत्वा दिवसलक्ष्म्य इव भगवत्संमुखसमेता इत्यर्थः ॥

अवाकिरन्काश्चन मुक्तिकाभिरभ्येत्य वाचंयमसार्वभौमम् ।
क्षीरोर्मयो मेरुमिव प्रमाथकालोच्छलद्भूरिपयःपृषद्भिः ॥ ६५ ॥

अभ्येत्य समुखमागत्य काश्चन संघमध्यात्कियत्यः त हीरविजयनामान वाचंयमाना साधूनां सार्वभौमं चक्रवर्तिन मुक्तिकाभिर्लघुमुक्ताफलैः । 'सिता वमन्त्यः खलु कीर्तिमुक्तिकाः' इति नैषधे । का इव । क्षीरोर्मय इव । यथा क्षीरसमुद्रवीचयः प्रकर्षेण सुरासुरादिभिः सर्वोजसा माथस्य मथनस्य काले समये उच्छलद्भिः उच्चैरुत्पतद्भि तथा भूरिभिरनल्पै पयःपृषद्भिः जलकणैर्मेरु काञ्चनाचलम् । किं च परसमये मन्दरशब्देन मेरुर्नोच्यते किं तु मन्दरशब्देन इन्द्रकीलनामा शैलः । जैनमते तु मन्दरो मेरुरेव । मन्दरनामगिरिं वर्धयन्ति ॥

मुक्ताफलैः काश्चिदवाकिरंस्तं नवोपयन्तारमिवात्र लाजैः ।
सिद्धाद्रियात्रोद्भवपुण्यलक्ष्म्या नवोढयालंक्रियमाणपार्श्वः ॥ ६६ ॥

काश्चिदपराः सीमन्तिन्यः त सूरिम् अत्र संघसंमुखागमनसमये मुक्ताफलैर्मौक्तिकै अवाकिरन् वर्धयन्ति स्म । कमिव । नवोपयन्तारमिव । यथा अत्र भूमिभुवने देवलोके नागलोके देवासुराणा परिणयनाभावाद्भुवो ग्रहणम् । सद्यस्कपरिणेतारं चार पुमास काश्चित्तद्वर्गसंबन्धिन्यो वर्णिन्यः लाजैरक्षतैर्वर्धयन्ति । किंभूतः सूरि वरश्च । सिद्धाद्रे शत्रुंजयशैलस्य यात्राया दर्शनस्पर्शनभावार्चाया उद्भव उत्पत्तिर्यस्यास्तादृश्या पुण्यलक्ष्म्या

नि८ । क्रमात्प्रभोः प्रभावात् श्रीमत्पार्श्वनाथमाहात्म्यातिशयात् । किमिव । इन्द्रजालमिव । यथा कुहकं क्षणाददृश्यीभावं भजेत् । 'इन्द्रजालं तु कुहकम्' इति हैम्याम् । स सागरधनी पेटां पार्श्वनाथप्रतिमासत्कमञ्जूषां चन्दनमृगमदघनसारादिभिरभ्यर्च्य पूजयित्वा पुरः पेटाया अग्रे भोगादि कृष्णागुरुकुन्दरुष्कतुरुष्कायुत्क्षेपणमारिदाब्दाद्बलिबाकुल्यादिकं च व्यधत्त विदधाति स्म । कृतवानित्यर्थः । स किंलक्षणः । चमत्कृतः जलदानिलाद्युपसर्गविलयादि विलोक्य स्वहृदये विस्मितः ॥ इत्यकाण्डोद्भूतोपसर्गप्रशमनम् ॥

ततोऽनुकूलैः पवनैः पयोनिधौ प्रवर्तितस्तद्व्यवहारिपोतः ।
मत्तद्विपः सादिभिरध्वनीवालानं सुखं द्वीपपुरं प्रपेदे ॥ ४७ ॥

ततो विघ्नापगमनानन्तरं तद्व्यवहारिपोतः तस्य सागरनाम्नो व्यवहारिणो महेभ्यस्य पोतो यानपात्रं सुखं यथा स्यात्तथा द्वीपपुरं द्वीपनाम नगरं प्रपेदे प्राप प्राप्तः द्वीपबन्दिरे सुखेनागतः । किंलक्षणः पोतः । पयोनिधौ रत्नीभूते समुद्रे अनुकूलैः गुरुप्रभृतिकारिभिः पवनैर्वातैः प्रवर्तितः प्रेरितः । 'प्रेरणं प्रवर्तनम् । तत्र तुदादयः' इति सारस्वतव्याकरणम् । क इव । मत्तद्विप इव । यथा मदोद्धतो हस्ती सादिभिराधोरणैः [illegible] मार्गे प्रवर्तितः सुखमालानं प्रपद्यते ॥

उत्तीर्य तर्याश्च बलिं विकीर्याप्येतामुपादाय सुतामिवाब्धेः ।
इवाह्वयन्नि हरितां महेन्द्रान्पार्श्वं प्रणन्तुं घनतूर्यरावैः ॥ ४८ ॥
भजन्नृपाभ्यर्णमथार्णवीयं वस्तूपदीकृत्य निवेद्य वृत्तम् ।
पेटां ढुढौके स पुरः क्षितीन्दोः रुजा चिकित्सामिव तां द्विधापि ॥ ४९ ॥

अथ द्वीपबन्दिरे समागमनानन्तरं स सागर [illegible] क्षितीन्दो [illegible] जनिजानेः पुरः पुरस्तादग्रे पेटां पत्पपादपपूर्णनिर्मितां मञ्जूषां [illegible] उत्प्रेक्ष्यते—द्विधापि द्वाभ्यां बाह्यान्तरद्व्यक्षणाभ्यामपि रुजाभ्यां [illegible] बाह्यरोगाणां ज्वरादीनां चिकित्सां स्वप्रतिक्रियामिव रोगाप[illegible] किं कृत्वा ढुढौके । आर्णवीयमर्णवसंबन्धि पयोधिमध्यगतद्वीपो[illegible] च वस्तु मुक्ताफलादिवस्तुपदीकृत्य ढौकयित्वा । स पुनः [illegible] प्रतिमाया यानपात्रान्तरानयनानन्तरं [illegible] सागर [illegible] [illegible] नृपाभ्यर्णं [illegible] अनेकजातीयाना तुरग [illegible] [illegible] सार्द्धं सालोद[illegible] । उत्प्रेक्ष्यते—[illegible] [illegible] [illegible] [illegible]

हैम्याम् । तस्याः प्राग्भागस्थःपूरान्मानसं नाम राजहंसनिागसरोवरं प्रति
तिष्ठते । यदुक्तम्—'मेघागम दिवि विभान्ति परागमास्म पूरागमेजन्मयातिलक्ष
सिन्धोः । भातीति चेतसि निविन्त्य न हंसमाला सा मानसं प्रति तनस्तारित प्रतस्थे ॥'
इति । तथा 'गङ्गानीरमपि त्यजन्ति कलुषं ते राजहंसा वरम्' इत्यपि सूक्ते ॥

अथ द्वीपोन्नतपुरादिसंघसंमुखागमनवर्णनप्रस्तावः—

शिरोधृतश्वेतसुवर्णकुम्भाः काश्चिल्लसन्ति स्म विलासवत्यः ।
श्यामादिवालक्ष्म्य इवोद्वहन्त्यः संपूर्णचन्द्राम्बुजबन्धुबिम्बान् ॥ ६४ ॥

हीरसूरेः संमुखागमने काश्चिदनिर्दिष्टनामानः विलासवत्यः विलासो हसहन्निगमनादिकः शृङ्गारादिविभ्रमो वा विद्यते यासां ता लीलावत्यो वनिता लसन्ति शोभन्ते । किंभूताः । शिरसि स्वमौलौ धृता आरोपिताः श्वेता उज्ज्वलास्तथा सु शोभनो वर्णो येषाम् । अथ वा श्वेताना रूप्याणाम् । 'स्याद्रूप्य कलधौततारजतश्वेतानि' इति हैम्याम् । तथा सुवर्णाना काञ्चनानां कुम्भाः कलशा याभिस्ताः । उत्प्रेक्ष्यते—श्यामादिवालक्ष्म्य इव रजनीदिवसस्य श्रिय इव । किं कुर्वत्यः । उद्वहन्त्यः बिभ्रत्यः । कान् । संपूर्णा अखण्डाश्चन्द्रास्तथा अम्बुजबन्धवो भास्करास्तेषा बिम्बान्मण्डलान् । अखण्डचन्द्रमण्डलानादाय निशाश्रियः सूर्यमण्डलान् गृहीत्वा दिवसलक्ष्म्य इव भगवत्संमुख समेता इत्यर्थः ॥

अवाकिरन्काश्चन मुक्तिकाभिरभ्येत्य वाचंयमसार्वभौमम् ।
क्षीरोर्मयो मेरुमिव प्रमाथकालोच्छलद्भूरिपयःपृषद्भिः ॥ ६५ ॥

अभ्येत्य संमुखमागत्य काश्चन संघमध्यात्कियत्यः तं हीरविजयनामानं वाचयमाना साधूना सार्वभौम चक्रवर्तिन मुक्तिकाभिर्लघुमुक्ताफलैः । 'सिता वमन्त्यः खलु कीर्तिमुक्तिकाः' इति नैषधे । का इव । क्षीरोर्मय इव । यथा क्षीरसमुद्रवीचयः प्रकर्षेण सुरासुरादिभिः सर्वौजसा माथस्य मथनस्य काले समये उच्छलद्भिः उच्चैरुत्पतद्भि' तथा भूरिभिरनल्पै' पय.पृषद्भिः जलकणैर्मेरु काञ्चनाचलम् । किं च परसमये मन्दरशब्देन मेरुर्नोच्यते किं तु मन्दरशब्देन इन्द्रकीलनामा शैलः । जैनमते तु मन्दरो मेरुरेव । मन्दरनामगिरिं वर्धयन्ति ॥

मुक्ताफलैः काश्चिदवाकिरंस्तं नवोपयन्तारमिवात्र लाजैः ।
सिद्धाद्रियात्रोद्भवपुण्यलक्ष्म्या नवोढयालंक्रियमाणपार्श्वः ॥ ६६ ॥

काश्चिदपरा सीमन्तिन्यः त सूरिम् अत्र संघसमुखागमनसमये मुक्ताफलैर्मौक्तिकै अवाकिरन् वर्धयन्ति स्म । कमिव । नवोपयन्तारमिव । यथा अत्र भूमिभुवने देवलोके नागलोके देवासुराणा परिणयनाभावाद्भुवो ग्रहणम् । सद्यस्कपरिणेतारं चारु पुमास काश्चित्तद्वर्गसंबन्धिन्यो वर्णिन्यः लाजैरक्षतैर्वर्धयन्ति । किंभूतः सूरिः वरश्च । सिद्धाद्रेः शत्रुंजयशैलस्य यात्राया दर्शनस्पर्शनभावार्चाया उद्भव उत्पत्तिर्यस्यास्तादृश्या पुण्यलक्ष्म्या

आमय आतङ्कमुपतापो गदः समाः' इति हैम्याम् । साकेतस्य कोशलानगर्या अयोध्याराजधान्या नेता अधिपतिरजयनृपोऽपि अधिकमतिशायितया दिदीपे शोभते स्म । क इव । अमृतांशुरिव । यथा घनात्ययेन शरत्कालेन न्यक्कृतो विध्वस्तो निराकृतो निर्वासितो यो नीरदाद्रो मेघजनितरोपपरोधः संरोधन तस्मान्निर्मुक्तः पृथग्भूतश्चन्द्र आश्विनपूर्णिमायां सुदीप्तितरभिव दीप्यते ॥ इत्यजयराजस्य रोगोपशमः ॥

ततोऽजयाख्यं नगरं निवास्य पुरीमयोध्यामपरामिवात्र ।
केनापि सिद्धायतनं सुरेण मुक्तं किमस्मिंश्च विधाप्य चैत्यम् ॥ ९४ ॥
सम्थाप्य तं तत्र जिनेन्द्रबिम्बं सिद्धिश्रिया वोपयमं स्वकीयम् ।
कान्त्यामिव द्वादशसूर्यतेजा दत्त्वार्चितुं द्वादश शासनानि ॥ ९५ ॥
भूमीभुजां शेखरयञ्शिरःसु स्वाज्ञां सुमानामिव मालिकां सः ।
स्वर्गीव नीरोगतनुः क्रमेण स्वां राजधानीं पुनरध्युवास ॥ ९६ ॥

ततो रोगापगमनानन्तरं सः अजयभूपालः पुनर्देशसाधनानन्तरं द्वितीयवारं स्वामात्मीयां तातसंबन्धिनीं राजधानीमयोध्यानाम्नीं नगरीमध्युवास आश्रयति स्म । केन । क्रमेण पूर्वपश्चिमदक्षिणोत्तरदिग्वर्तिदेशसाधनामनस्यपरिपाट्या । स किंभूतः । स्वर्गी देव इव नीरोगतनुर्विविधामयरहितशरीरः । स किं कुर्वन् । भूमीभुजां वैताढ्यभूधरपर्यन्तचतुर्दिग्भूपान्मलमण्डलानां शिरःसु मौलिषु सुमानां मालिकामिव स्वां स्वकीयामाज्ञां शासनं शेखरयन्नवतंसीकुर्वन् मुकुटमिवापादयन् । 'आपीडशेखरोत्तंसावतंसाः शिरसः स्रजि' इति हैमीवचनात् । किं कृत्वा राजधानीमधिवसति स्म । अत्र रोगनिर्मुक्तिस्थाने द्वीपसमीपे अजय इति स्वनामसमाना आख्या अभिधानं यस्य तादृशं नगरं महत्पुरं निवास्य वासयित्वा संस्थाप्य । उत्प्रेक्ष्यते—अपरामन्यां द्वितीयामयोध्यां कोशलापुरीमिव स्वकुलक्रमायातां साकेतनीनाम्नीं राजधानीमिव । 'साकेतं कोशलायोध्या' इति हैम्याम् । च पुनरस्मिन्नजयनामनगरे चैत्यं श्रीपार्श्वनाथप्रासादं विधाप्य शिल्पिभिर्निर्माप्य । उत्प्रेक्ष्यते—केनानिर्दिष्टनाम्ना सुरेण देवेन अस्मिन्नजयपुरे मुक्तं कुतश्चित्प्रदेशात्स्वयमानीय संस्थापितं सिद्धायतनं शाश्वतजिनचैत्यमिव । पुनः किं कृत्वा । तत्र स्वनिर्मापितप्रासादे तं पद्मावतीप्रकटितमाहात्म्यं सागरमहेभ्यमहामहानीतपार्श्वनाथं संस्थाप्योपवेशयित्वा । उत्प्रेक्ष्यते—सिद्धिश्रिया मोक्षलक्ष्म्या समं स्वकीयमात्मसंबन्धिनमुपयमं विवाहमिव संस्थाप्य स्थापयित्वा । 'पाणिग्रहणमुद्वाह उपायामयमावपि' इति हैम्याम् । उपयाम उपयमाविति शब्दद्वयं पुनरर्चितुं श्रीअजयपार्श्वनाथप्रतिमां पूजयितुं द्वादशसंख्याकानि शासनानि श्रीमान् दत्त्वा स्वेनार्पयित्वा । 'दीयतां दशलक्षाणि शासनानि चतुर्दश । हस्तन्यस्तचतुःश्लोकी यद्वा गच्छतु गच्छतु ॥' इति । अथ धूर्तकेशागतसिद्धसेनदिवाकरागमनसमये एव अदृष्टे एवंकश्लोकप्रेषणे विक्रमार्कदानपरे दानश्लोके दानम् । तत्र दशसौवर्णकलक्षाणि शासनानि ग्रामाश्च दत्ताः । उत्प्रेक्ष्यते—द्वादशानां सूर्याणां तेजः प्रताप

ऐरावणस्य समुद्रमध्यादुत्पन्नविनिःसृतत्वेन तद्वंशस्यापि सद्भावः संभाव्यते एव । यदुक्तं नैषधेऽपि—'पयोनिलीनाभ्रमुकामुक्तावलीरदाननन्तोरगपुच्छसच्छवीन्' इति । तथा समुद्रस्यापि अत्र सामीप्यादियमुत्प्रेक्षा घटत एव । अथ प्रस्तुतम् । इति किम् । यदनेन सूरिणा गत्वा पुरतो युगप्रमाणा धरणीं चक्षुषा प्रेक्षमाणा । ईर्यासमिति पूर्वक मन्थर- गमनेन अभ्रकुम्भी ऐरावण । 'ऐरावणोऽभ्रमातङ्गश्चतुर्दन्तार्कसोदरे' इति हैम्याम् । किं कथं कया रीत्या जितोऽभिभूतः ॥

पर्याणितास्तत्र तुरङ्गमास्ते रेजुर्जवाधःकृतवातवेगाः ।
यैर्निर्जिता भानुमतस्तुरङ्गा ह्रियेव नाद्यापि भुवं स्पृशन्ति ॥ ७१ ॥

तत्र संमुखागमनसमये ते तादृशा ये अग्रे स्वगुणोत्कर्षैरुत्प्रेक्षा प्रापिता । अथ वा ते काम्बोजकामरूपकच्छसिन्धुदेशोद्भवा विविधजातीयाः प्रसिद्धास्तुरङ्गमाः अश्वाः । यदुक्तं प्राकृतवाक्ये—'ये गगाजलनीअडा हरिअडा कालाकिह्नाडापुरा साणीसिंघल सिंधु आकलहला कस्मीरिया कुकुणा । टुंकेक्कानि अनेकवानिपिहुला पीठे पगे नीसला ते हेष्यन्त्रियकुं अरा जिमसुरा ते जीतुपारैवडा ॥' इति । पर्याणिताः पल्ययनकलिता कृताः । 'पर्याण तु पल्ययनः' इति हैम्याम् । रेजुः विभान्ति स्म । किंभूता । जवेन मानसातिपातिगतिरहसा अधःकृतो निरस्तो वाताना पवनाना वेगो रयो यैस्ते । ते के । यैस्तुरङ्गमैर्भानुमतो भास्वतस्तुरङ्गा वाजिनः निर्जिता गतिलराभिः परा- भूता. सन्त. । उत्प्रेक्ष्यते—अद्याप्यद्यतन वर्तमान वासर प्रभृति यावन्मण्डयित्वा ह्रिया लज्जयेव कृत्वा भुव क्षोणीं न स्पृशन्ति । लज्जिता हि स्वं मुख दर्शयितुमनलम्- ष्णवः पृथिव्या नायान्तीत्यर्थः ॥

रथाङ्गभाजस्त्वरमाणतार्क्ष्याः सुजातरूपा घननन्दकाश्च ।
अम्भोजनाभा इव कामरामशोभाः शताङ्गाः शतशः प्रचेलुः ॥ ७२ ॥

शतशः शतसहस्रसंख्याका शताङ्गा रथा । 'शताङ्ग. स्यन्दनो रथः' इति हैम्याम् । प्रचेलुः सूरेरभिमुख प्रचलन्ति स्म । उत्प्रेक्ष्यते—अम्भोजनाभाः कृष्णा इव । किंभूता रथा कृष्णाश्च । रथाङ्ग रथपाद चक्र 'पइडु' इति प्रसिद्ध सुदर्शन चक्र भजन्ति इति रथाङ्गभाज । पुन किंभूताः । त्वरमाणाः शीघ्रगामिनस्तार्क्ष्यास्तुरङ्गमा गरुडाश्च येषा ते । च पुनः किंभूताः । शोभन जातरूपं सुवर्ण काञ्चनजटितत्वेन । पक्षे जातमुत्पन्न रूपाति- शायिसुन्दरशरीराकारविशेषो येषाम् । पुनः किंभूता । घनान्बहुजनानानन्दयन्ति प्रसाद- यन्ति । तथा घनो निबिडोऽपराप्रतिहतो नन्दकनामा खड्गो येषा ते । च पुन किंभूता । काममतिशयेन रामा मनोज्ञा शोभा येषा ते । तथा काम. प्रद्युम्न रामो बलभद्र ताभ्या शोभा येषा ते ॥

तुरङ्गमैरश्विकृतनिर्भा रथाना हयालिंदपागजगर्जितैश्च ।
नृणा स्वरादिध्वनिनिर्भरैर्नान्दी श्रीकर्णिकापूरि गगनश्लोकः ॥ ७३ ॥

स हीरविजयनामा मुमुक्षूणां मुनीनां मध्ये क्षोण्यां भूमेः मघवा इन्द्रः । सूरीन्द्र इत्यर्थः । तदजयपार्श्वनाथ इव तत्पुरमजयपुरमधुना तु अजारग्रामः ग्रामनाम्ना च 'अजारोपार्श्वनाथ' इति प्रसिद्धिः । आत्मना स्वेनैव पवित्रीकृतवान् पावनीचकार । किं कृत्वा । तत्र चैत्ये बहिःप्रदेशवर्तिन्यां धर्मशालायां जनान् भविकलोकान् प्रति इति पूर्वोक्तप्रकारेण अजयपार्श्वागमनादिवृत्तमुपदिश्य उपदेशं देशनां दत्त्वा च पुनः क्षण क्षणमात्रं स जिनमूर्त्योर्दृशोर्लक्ष्यं गोचरं प्रणीय निर्माय पुनस्तं पार्श्वनाथं नत्वा प्रणम्य ॥

द्वीपस्य संघोऽप्यखिलो मुनीन्दोरभ्यागमत्तत्र सहाङ्गनाभिः ।
माहात्म्यमद्वैतमवेत्य तस्य शुश्रूषया लेखगणः किमेषः ॥ ६१ ॥

तत्राजयपुरे अङ्गनाभिः स्वकीयपरकीयपुरपुरंध्रीभिः सह सार्धमखिलोऽपि समस्तोऽपि द्वीपस्य द्वीपबन्दिरस्य संघः श्रावकसमुदायो मुनीन्दोर्हीरविजयसूरेरभ्यागमत्स-मुखमाजगाम । उत्प्रेक्ष्यते—तस्य सूरीशितुः अद्वैतमनन्यमसाधारणं माहात्म्यं वाङ्मन-सगोचरातीतं महिमानमवेत्य विज्ञाय शुश्रूषया सेवां कर्तुमिच्छया एष संघरूपो लेख-गणः सुरसमूहः समेतः समागत इव ॥

लोकंपृणान्वीक्ष्य गुणान्गणेन्दोः प्रीता प्रणीयागणितात्ममूर्तीः ।
नम्रागतस्त्रैणमिषेण लक्ष्मीर्नमस्यती स्तौति च गायतीव ॥ ६२ ॥ ✓

गणेन्दोः सूरेर्लोकंपृणान्विश्वाह्लादकान् गुणान् शमदममार्दवार्जवसंयमनिष्ठत्वादि-कान् वीक्ष्य स्वदृग्गोचरीकृत्य प्रीता संतुष्टचित्ता सती नम्रं नमनशीलं तथा आगतं भगवद्वन्दनार्थमायातं यत्स्त्रैणं स्त्रीणां समूहः सीमन्तिनीसमुदायस्तस्य मिषेण कपटेन अगणिता गणनातीता आत्मनः स्वस्य मूर्तीः शरीराणि प्रणीय लक्ष्मीर्जलधिनन्दना । उत्प्रेक्ष्यते—नमस्यतीव अर्धाङ्गणधरं नमस्करोतीव । च पुनः स्तौतीव स्तुतिगोचरीकरो-तीव । च पुनर्गायतीव गानविषयीकरोतीव । वार्धेः सामीप्यात्तन्नन्दनाया आगमनमु-चितमेव । पितुः पार्श्वे कदाचिदुत्कण्ठिता पुत्री मिलनार्थमागच्छतीति समुद्रे श्रिया स-द्भावोऽप्युचित एव ॥ इति द्वीपबन्दिरे समागमनम् ॥

ततः प्रतस्थे प्रभुरुन्नताख्यं पुरं प्रति प्रीतमना मुनीन्द्रः ।
मेघागमे मानसमभ्रमार्गवहाप्रवाहादिव राजहंसः ॥ ६३ ॥ ✓

ततो द्वीपोन्नतदेवलपाटकसत्कसंघसमागमनानन्तरं हीरविजयसूरिः ततोऽजयपुरा-दुन्नतमित्याख्या नाम यस्य तादृशं पुरं प्रति प्रतस्थे । उन्नतनगराभिमुखं प्रचलति स्म । किंभूतः । प्रभुः सर्वधर्मकार्यकरणप्रवणः समर्थः । पुनः किंभूतः । प्रीतमनाः श्रीपार्श्वनाथ-यात्रया कृत्वा हृष्टमानसः । क इव । राजहंस इव । यथा मेघागमे अभ्रमार्गो मेघाध्वा गगनम् । 'सुराभ्रोडुमरुत्पथोऽम्बरम्,' तथा 'अभ्रं धूमयोनिस्तनयित्नुमेघाः' इति द्वयमपि हैम्याम् । तस्य वहा नदी । गङ्गेत्यर्थः । 'सिद्धस्वःस्वर्गिखापगाः । ऋषिकुल्या हैमवती' इत्यपि हैम्याम् । तथा 'सिन्धुः शैवलिनी वहा च ह्रदिनी स्रोतस्विनी निम्नगा' इत्यपि

ऐरावणस्य समुद्रमध्यादुत्पन्ननिनिःसृतत्वेन तद्गन्धानि गन्धान् संभाव्यते एव । यदुक्तं नैषधेऽपि—'पयोनिलीनाभ्रमुकामुकालीरदाननन्तोरगपुच्छगर्भान्' इति । तत्र समुद्रस्यापि अत्र सामीप्यादिगमुत्प्रेक्षा घटत एव । अथ प्रस्तुतम् । इति किम् । यदनेन सूरिणा गत्वा पुरतो युगप्रमाणां धरणीं चक्षुषा प्रेक्षमाणा । ईर्यासमिति पूर्वकं मन्थर-गमनेन अभ्रकुम्भी ऐरावण । 'ऐरावणोऽभ्रमातङ्गश्चतुर्दन्तार्कसोदरे' इति हैम्याम् । किं कथं कया रीत्या जितोऽभिभूतः ॥

पर्याणितास्तत्र तुरङ्गमास्ते रेजुर्जवाधःकृतवातवेगाः ।
येर्निर्जिता भानुमतस्तुरङ्गा ह्रियेव नाद्यापि भुवं स्पृशन्ति ॥ ७१ ॥

तत्र समुखागमनसमये ते तादृशा ये अग्रे स्वगुणोत्कर्षरुत्प्रेक्षा प्रापिता । अथ वा ते काम्बोजकामरूपकच्छसिन्धुदेशोद्भवा विविधजातीयाः प्रसिद्धास्तुरङ्गमा अश्वा । यदुक्तं प्राकृतवाक्ये—'ये गगाजलनीअडा हरिअडा कालाकिहाडाएुरा साणीमिघल-सिंधु आकलहला कस्मीरिया कुकुणा । टुकेकानि अनेकवानिपिहुला पीठे पगे नीसला ते हेष्यन्त्रियकु अरा जिमसुरा ते जीतुपारवटा ॥' इति । पर्याणिताः पल्ययनकलिता कृताः । 'पर्याण तु पल्ययनः' इति हैम्याम् । रेजुः विभान्ति स्म । किंभूता । जवेन मानसातिपातिगतिरंहसा अध.कृतो निरस्तो वाताना पवनाना वेगो रयो यैस्ते । ते के । यैस्तुरङ्गमैर्भानुमतो भास्वतस्तुरङ्गा वाजिन निर्जिता गतिलराभिः पराभूता सन्त । उत्प्रेक्ष्यते—अद्याप्यद्यतन वर्तमान वासर प्रभृति यावन्मण्डयित्वा ह्रिया लज्जयेव कृत्वा भुव क्षोणीं न स्पृशन्ति । लज्जिता हि स्व मुख दर्शयितुमनलंभूष्णवः पृथिव्या नायान्तीत्यर्थः ॥

रथाङ्गभाजस्त्वरमाणतार्क्ष्याः सुजातरूपा घननन्दकाश्च ।
अम्भोजनाभा इव कामरामशोभाः शताङ्गाः शतशः प्रचेलुः ॥ ७२ ॥

शतशः शतसहस्रसंख्याका. शताङ्गा रथा । 'शताङ्गः स्यन्दनो रथ.' इति हैम्याम् । प्रचेलुः सूरेरभिमुख प्रचलन्ति स्म । उत्प्रेक्ष्यते—अम्भोजनाभाः कृष्णा इव । किंभूता रथाः कृष्णाश्च । रथाङ्ग रथपाद चक्र 'पइडु' इति प्रसिद्ध सुदर्शन चक्र भजन्ति इति रथाङ्गभाज । पुनः किंभूता. । त्वरमाणाः शीघ्रगामिनस्तार्क्ष्यास्तुरङ्गमा गरुडाश्च येषा ते । च पुनः किंभूताः । शोभन जातरूप सुवर्ण. काञ्चनजटितत्वेन । पक्षे जातमुत्पन्न रूपमतिशायिसुन्दरशरीराकारविशेषो येषाम् । पुनः किंभूताः । घनान्बहुजनानन्दयन्ति प्रह्लादयन्ति । तथा घनो निबिडोऽपराप्रतिहतो नन्दकनामा खड्गो येषा ते । च पुन किंभूता । काममतिशयेन रामा मनोज्ञा शोभा येषा ते । तथा कामः प्रद्युम्न. रामो बलभद्र. ताभ्या शोभा येषा ते ॥

तूरस्वरैश्चित्कृतिभी रथाना हयालिहेषागजगर्जितैश्च ।
.णा स्तवादिध्वनितैर्व्रतीन्दोः श्लोकैरिवापूरि समग्रलोकः ॥ ७३ ॥

सुहृद्भिना सम्मिलमाण भूयमाण पार्श्व जीवान्तिक यस्य। परिणेतापि तत्कालपरिणीयतया सम्मिलमाणवामाद्यान्तिक ॥ इद तु पाठान्तरम् ॥

गीतिं जगुर्नागरिकाः किरन्तीं सुधां सुधादीधितिमण्डलीवत्।
यां श्रोत्रपत्रैर्विनिपीय चित्रार्पितैरिवाभूयत मार्गमार्गैः ॥ ६७ ॥

काश्चन नागरिका द्वीपोन्नतपुरपुरंध्रयो गीतिं सूरिगुणगान जगुर्गायन्ति स्म। किं कुर्वतीम्। गीतिं किरन्तीं विस्तारयन्तीम् अर्थात्कर्णयोर्वर्षन्तीम्। काम्। सुधाममृतम्। किंवत्। सुधादीधितिमण्डलीवत्। यथा आश्विनमाससम्बन्धिराकामृगाङ्कमण्डलं पीयूषं किरन्ति, तथा नागरिका कर्णामृतवर्षिणीं गीतिं गायन्ति। या गीतिं श्रोत्रपत्रैः कर्णपर्णैः कृत्वा विनिपीय सादरं निशम्य मार्गस्य अजयोन्नतपुरयोरन्तरालाध्वनः मार्गैर्मृगगणैश्चित्रार्पितैरालेख्यस्थापितैर्लिखितैरिवाभूयत सजायते स्म ॥

गजाधिरूढा व्यरुचन्कुमारा विभूषिता भूषणधोरणीभिः।
प्रवालपुष्पावलिशालमानाः प्रस्थप्ररूढा इव बालसालाः ॥ ६८ ॥

भूषणानां मणिस्वर्णाभरणानां धोरणीभिः श्रेणीभिः विभूषिता अलङ्कृताङ्गाः। तथा गजाधिरूढाः सिन्धुरस्कन्धाध्यासिन केचन कुमाराः व्यरुचन् शुशुभिरे। उत्प्रेक्ष्यते—प्रवालाना पल्लवानां पुष्पाणां कुसुमानामावलीभिर्मालिकाभिः शालमानाः शोभमानाः प्रस्थेषु सानुषु प्ररूढा उद्गता बालसालाः लघुपादपा इव ॥

काश्चित्कुमार्यः शिबिकां श्रयन्त्यो माणिक्यभूषा वपुषा वहन्त्यः।
कुतूहलाद्भूवलयं भजन्त्यो विमानयाना इव नाकिकन्याः ॥ ६९ ॥

काश्चित्कुमार्यो लघुकन्यका भान्ति तदवसरे शोभन्ते। किं कुर्वन्त्यः। शिबिकां याप्ययान श्रयन्त्यः परिचरन्त्यः। शिबिकाधिरूढा इत्यर्थः। पुनः किं कुर्वन्त्यः। माणिक्याना रत्नविशेषाणां भूषा अलङ्कारान् वपुषा स्वशरीरेण वहन्त्यो धारयन्त्यः। 'धृता विभूषामणिरश्मिकार्मुकैः' इति नैषधे। उत्प्रेक्ष्यते—कुतूहलात्कौतुकाद्भूवलयं मेदिनीमण्डलं भजन्त्यः सेवमाना आश्रयन्त्यः। विमानेन देवयानेन यानं गमनं यासां ताः। दृश्यो नाकिकन्या देवकुमारिका इव। यथा इन्द्रस्य। 'तनयस्तु जयन्तः स्याज्जयदत्तो जयश्च सः। सुता जयन्ती तविषी ताविष्युच्चैःश्रवा हयः ॥' इति हैम्याम् ॥

गत्या जितोऽनेन किमभ्रकुम्भी द्रष्टुं तमीत्युत्सुकितोऽब्धिमध्यात्।
किमीयिवानेष तदन्ववायः शृङ्गारितास्तत्र गजा विरेजुः ॥ ७० ॥

तत्र तस्मिन् संमुखागमनसमये शृङ्गारिताश्च शृङ्गारभूषणतैलचामरायाडम्बरैरलङ्कृताः गजा हस्तिनो विरेजुः शोभन्ते स्म। उत्प्रेक्ष्यते—इत्यमुना प्रकारेण इति हेतोर्वा तं सूरिं द्रष्टुं प्रेक्षितुमुत्सुकित उत्कण्ठितः सन् अब्धिमध्यात्समुद्रान्तरालादेष प्रत्यक्षं लक्ष्यमाणं तस्यैरावणस्य अन्ववायो गजघटारूपो वंशः किमीयिवान् आगत इव।

'तूर्यं तूरं स्मरध्वजः' इति हैम्नाम् । ओना समूहास्तेषा भनिभिर्नानाप्रकारप्रसरनि॰ र्घोषैः पूर्यमाणः बहलीक्रियमाणे ॥ इति द्वीपोन्नतपुरसंमुखागमनवर्णनम् ॥

तदुत्सवे मूर्छति भूर्भुवःस्वस्त्रयीप्रसत्तिं प्रदिशत्यपूर्वाम् ।
अलंचकार प्रभुरुन्नताख्यां पुरं हरिर्द्वारवतीमिवासौ ॥ ७७ ॥

प्रभुर्हीरविजयसूरिरुन्नतमिति आख्या नाम यस्यास्तादृशीं पुरं नगरीमलंचकार भूष॰ यामास । क इव । हरिरिव । यथा नारायणो धनदनिर्मिता द्वारवतीं द्वारका नगरीमल॰ करोति । कस्मिन् सति । तदुत्सवे स चासावुत्सवश्च तदुत्सवः द्वीपोन्नतादिसंघप्राग्ग्वसू॰ रिप्रवेशमहामहस्तस्मिन्मूर्च्छति वृद्धिमतिशायिता श्रयति प्राप्नुवति सति । किं कु॰ र्वति तदुत्सवे । भूर्भुवःस्वस्त्रय्या नागलोकनाकिलोकभूमिलोकाना त्रिकस्य अर्थात्रिजगज्ज॰ नानां प्रसत्तिं मनःप्रसन्नतां प्रमोदप्रकर्षं प्रदिशति प्रयच्छति ददति ॥

तस्मिन्नतेर्गोचरयांचकार चैत्येषु तीर्थाधिपतिं मुदा सः ।
कण्ठीरवः शैलगुहामिवाथानैषीद्विभूषां वसतिं व्रतीन्द्रः ॥ ७८ ॥

स हीरसूरिस्तस्मिन्नुन्नताभिधाननगरे चैत्येषु ऋषभदेवप्रमुखजिनप्रासादेषु तीर्था॰ धिपतिं जिनाधिराजप्रतिमा मुदा हर्षेण नतेः प्रणामस्य गोचरयाचकार विषयीक॰ रोति स्म । नमस्कृतवानित्यर्थः । अथानन्तरं देववदनात्पश्चात् व्रतीन्द्रः सूरिः वसति॰ मुपाश्रयं विभूषां शोभामनैषीत्प्रापयति स्म । क इव । कण्ठीरव इव । यथा पारीन्द्रः शैलगुहां गिरिकंदरा विभूषां नयति ॥ इत्युपाश्रयागमनम् ॥

ततः समुद्दिश्य महेभ्यसभ्यान्धर्मोपदेशं स वशी दिदेश ।
पीयूषवत्तेऽपि निपीय वत्सा इवावहन्संमदमेदुरत्वम् ॥ ७९ ॥

ततो वसतावुपाश्रये आगमनानन्तर स वशी जितेन्द्रियः सूरिर्महेभ्या व्यवहारि॰ णस्ते एव सभ्याः सदस्याः सभाजनास्तानुद्दिश्य उद्देश कृत्वा धर्मोपदेश धर्मदेशना दिदेश ददाति स्म । तेऽपि महेभ्यसभ्या पीयूषवत्सुधारसमिव निपीय पीत्वा तद्दे॰ शना सादरं श्रुत्वा समदैरानन्दैः कृत्वा मेदुरत्वं पुष्टतामवहन्दधते स्म । के इव । वत्सा इव । यथा गवा तर्णका पीयूष स्वस्वमातुरूधोमध्यविनिःसरदभिनव पयो दुग्ध पीत्वा प्रमोदादास्वाद्य मेदुरत्वमुपचयभाव वहन्ते । 'पीयूषोऽभिनव पय. । पीयूषमपि' इति हैमीसूत्रवृत्त्या. ॥

क्षेत्रेष्विवाम्बूनि नभोम्बुवाहा द्युम्नांशुकान्यर्थिषु ते ववर्षुः ।
प्रभावनां श्रीफलपूगपूगैश्चक्रुस्ततो रूपकनाणकैश्च ॥ ८० ॥

ते सभ्यजना अर्थिषु तत्समयागतानेकयाचकविषयेषु द्युम्नांशुकानि द्रव्यवस्त्रादीनि ववर्षु । प्रददुरित्यर्थः । क इव । नभोम्बुवाहा इव । यथा श्रावणमेघाः क्षेत्रेषु विषयेषु अम्बू॰ नि पानीयानि वर्षन्ति । वर्षाकृतोरतिपूतलान्नभोमासोपादानम् । ततो याचकदानानन्तरं

सुकृतश्रिया अलक्रियमाण भूष्यमाण पार्श्वं जीवान्तिकं यस्य। परिणेतापि तत्कालपरिणीयतया अलक्रियमाणवामाङ्गान्तिकः॥ इद तु पाठान्तरम्॥

गीतिं जगुर्नागरिकाः किरन्तीं सुधां सुधादीधितिमण्डलीवत्।
यां श्रोत्रपत्रैर्विनिपीय चित्रार्पितैरिवाभूयत मार्गमार्गैः॥ ६७॥

काश्चन नागरिका द्वीपोन्नतपुरपुरंध्र्यो गीतिं सूरिगुणगान जगुर्गायन्ति स्म। किं कुर्वतीम्। गीतिं किरन्तीं विस्तारयन्तीम् अर्थात्कर्णयोर्वर्षन्तीम्। काम्। सुधाममृतम्। किंवत्। सुधादीधितिमण्डलीवत्। यथा आश्विनमाससवन्धिराकामृगाङ्कमण्डल्य पीयूष किरन्ति, तथा नागरिका कर्णामृतवर्षिणीं गीतिं गायन्ति। या गीतिं श्रोत्रपत्रैः कर्णपर्णैः कृत्वा विनिपीय सादरं निशम्य मार्गस्य अजयोन्नतपुरयोरन्तरालाध्वन' मार्गैर्मृगगणैश्चित्रार्पितैरालेख्यस्थापितैर्लिखितैरिवाभूयत सजायते स्म॥

गजाधिरूढा व्यरुचन्कुमारा विभूपिता भूपणधोरणीभिः।
प्रवालपुष्पावलिशालमानाः प्रस्थप्ररूढा इव बालसालाः॥ ६८॥

भूपणाना मणिस्वर्णाभरणाना धोरणीभि. श्रेणीभि. विभूपिता अलङ्कृता [illegible]। तथा गजाधिरूढाः सिन्धुरस्कन्धाध्यासिन केचन कुमारा व्यरुचन् शुशुभिरे। उत्प्रेक्ष्यते—प्रवालानां पल्लवानां पुष्पाणां कुसुमानामावलीभिर्मालिकाभिः शालमाना. शोभमाना प्रस्थेपु सानुपु प्ररूढा उद्गता बालसालाः लघुपादपा इव॥

काश्चित्कुमार्यः शिविकां श्रयन्त्यो माणिक्यभूपा वपुपा वहन्त्यः।
कुतूहलाङ्कूवलयं भजन्त्यो विमानयाना इव नाकिकन्याः॥ ६९॥

काश्चित्कुमार्यो लघुकन्यका' भान्ति तदवसरे शोभन्ते। किं कुर्वन्त्य। शिविकां [illegible] याप्ययान श्रयन्त्यः परिचरन्त्यः। शिविकाधिरूढा इत्यर्थ.। पुन' किं कुर्वन्त्य। माणिक्यानां रत्नविशेषाणां भूपा अलकारान् वपुषा स्वशरीरेण वहन्त्यो धारय[illegible]। '[illegible] विभूपामणिरश्मिकार्मुकं' इति नैपधे। उत्प्रेक्ष्यते—कुतूहला[illegible] [illegible] भजन्त्यः सेवमाना आश्रयन्त्य.। विमानेन देवयानेन या[illegible] [illegible] [illegible] इव। यथा इन्द्रस्य। '[illegible] [illegible] [illegible] नाकिकन्या देवकुमारिका इव। [illegible] ॥' इति [illegible]॥ जयश्च सः। सुता जयन्ती [illegible]

गत्या जितोऽनेन किमभ्रकुम्भी द्रागुं तमीत्युत्सुकितोऽ[illegible]।
किमीयिवानेप तदन्वयायः शृङ्गारिताराल गजा विरेजुः॥ ७०॥

तत्र तस्मिन् सगुरागमनसमये शृङ्गारिताः [illegible] [illegible] गजा हस्तिनो विरेजुः शोभन्ते स्म। उत्प्रेक्ष्यते—[illegible] सोर्वां स सूरि [illegible] [illegible] [illegible] [illegible]

क्रियते इत्यनुष्ठानं किंचिदधृष्यमनधृष्य वा कार्यादिनिर्माणं तस्य विधा प्रकारः एतावता मन्देहा नाम राक्षसास्तैः सार्धमुद्धतयुद्धक्रिया कर्म विदधाति करोतीत्येवशीलस्य । यदुक्तं नैषधे प्रातर्वर्णने—'इह हि समयेषु व्रजन्त्युदवज्रतामभिरविमुपस्थानोत्क्षिप्ता जलाञ्जलयः किल' अथ तद्वृत्तिः । अस्मिन्प्रातःसमयेऽवसरे सूर्यमुद्दिश्य उपस्थानोत्क्षिप्ता उपासनायामुद्धृता जलाञ्जलयः उदवज्रतां जलरूपाशनित्वं प्रपद्यन्ते । एतावता 'आपो वज्रीभूत्वा तानि रक्षांसि मन्देहान् अरुणद्वीपे क्षिपन्ति' इति श्रुतेः । 'तिस्रः कोट्योऽर्धकोटी च मन्देहा नाम राक्षसाः । उदयन्त सहस्रांशुमभ्ययुध्यन्त ते सदा ॥' इत्युक्तेः । अथ वा घोरा धूकान्धकारैः सोढुमशक्यामनुष्ठानविधां दिवसकिरणलक्षणा क्रियां कर्तुः । पुन. किं कुर्वतः । दोषाणां रात्रीणां घोरणीं घातयतो निर्णाशयतः । 'प्रवासनोद्वासनघातनिर्वासनानि संज्ञप्तिनिष्ठम्भहिंसानिर्वापणालम्भनिसूदनानि' इति हैम्याम् ॥

स्वश्राद्धसौधाहृतभक्तभोगाद्यभिग्रहान्साग्रहमग्रहीत्सः ।
श्रीवप्पभट्टिव्रतिशीतकान्तिरिव क्षितीन्द्रप्रतिबोधधुर्यः ॥ ८४ ॥

स सूरिः स्वश्राद्धानां निजश्रावकाणां तपापक्षीयगृहमेधिनां सौधाद्गेहादाहृतस्यानीतस्य भक्तस्य आहारस्य भोगो भोजनमादिर्येषां तादृक्षानभिग्रहान्निषेधरूपान्नियमान् भक्त भक्तस्य नो कल्प्युत इत्यादिकान् प्रत्याख्यानविशेषान् साग्रहमपरैर्वाचकप्रशांशसाधुभिरतिविज्ञप्तोऽपि निर्बन्धादग्रहीज्जग्राह । क इव । श्रीवप्पभट्टिव्रतिशीतकान्तिरिव । यथा श्रीआममहेन्द्रप्रतिबोधविधायकवप्पभट्टिसूरिः स्वश्रावकनिकेतनानीतभक्तभोगनिषेधादिकानभिग्रहान् गृहीतवान् । किंभूतः । क्षितीन्द्रोऽकब्बरपातिसाहिरामनृपश्च । तस्य प्रतिबोधे स्वभक्तीकरणे धुर्यो धुरीण· । प्रतिबोधविधातेत्यर्थः ॥

जिनं हृदम्भोजविलासराजहंसायमानं प्रणयन्कदाचित् ।
विधाय बाह्येन्द्रियमौनमुद्रां ध्यानं स योगीन्द्र इव व्यधत्त ॥ ८५ ॥

स सूरिः कदाचित्कस्मिन्नपि समये योगीन्द्रो मनोवचनकाययोगानां निरोधो विद्यते येषाम् । अथ वा यम-नियम करण प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधि-लक्षणनामभिरष्टभिर्योगोऽस्त्येषामिति वा योगिनस्तेषामिन्द्रः सर्वोत्कृष्टयोगिराजस्तद्वद्योगमार्गाविष्टवद्ध्यानं कस्मिन्नपि चेतश्चिन्तिते विषये एकप्रत्ययसंततिकरणं प्रणिधानं व्यधत्त चकार । किं कृत्वा । बाह्यानां स्पर्शन-रसन घ्राण-नयन-श्रवणाख्यानां पञ्चानामिन्द्रियाणां मौनेन स्वस्वव्यापारनिषेधेन मुद्रां चिरकालं विधाय । किं कुर्वन् । हृदम्भोजे हृदयकमलकर्णिकाया विलासे क्रीडाकरणे राजहंसमिवाचरन्तं जिनं वीतरागं प्रणयन् कुर्वन् ॥

नीरन्ध्रपाथःपरिपूर्यमाणपर्जन्यपुञ्जोर्जितगर्जितं किम् ।
कदापि रुच्यश्चरणेन्दिरायाः स्वाध्यायमान्द्रध्वनिमं दधार ॥ ८६ ॥

गुरवसंविविधवादित्रनिर्घोषैश्च पुनः रथानां स्यन्दनानां चित्कृतिभिस्त्वरितगमनावसरोद्भवचित्कृतिसंज्ञध्वनितविशेषै च पुनर्हयानामश्वानामालि श्रेणिस्तस्य हेषाभिर्हिंकारव इति प्रसिद्धैः तथा गजानां मदोद्धतसिन्धुराणां गर्जितैर्बृंहितैस्तथा नृणां श्राद्धभाटगायनादिजनानां जयादिध्वनितैः स्तुतिच्छन्दोगानादिभणितिभिः कृत्वा समग्रोऽपि दशदिक्पर्यन्त यावल्लोको भुवनमपूरि निर्भरं भृतः पूरितः । कैरिव । श्लोकैरिव । यथा व्रतीन्द्रोर्हीरसूरेर्यशोभिः समग्रोऽपि लोकः पूर्यते स्म । 'श्लोकः कीर्तिर्यशः' इति हैम्याम् ॥

नीभ्यस्तदा तद्गुणगायनीभ्यः पैञ्जूषपीयूषरसाभिषेकाम् ।

वाणीमधीत्याभ्यसितुं वनस्थाः शिष्या इवासन्कलकण्ठकान्ताः ॥ ७४ ॥

तस्य सूरेर्गुणान् गायन्तीत्येवंशीलाभ्यः स्त्रीभ्यः पौरपुरन्ध्रीभ्यः सकाशात्तदा तस्मिन् समागमनमहोत्सवव्यतिकरे पैञ्जूषयो श्रोतृजनश्रवणयोः पीयूषरसस्य सुधानिस्यन्दस्य अभिषेकोऽभिषिञ्चनं तत्तुल्यां वाणीं वाग्विलासमधीत्य पठित्वा कलकण्ठकान्ताः कोकिलकामिन्यः । उत्प्रेक्ष्यते—अभ्यसितुं सम्यगभ्यासं विधातुमिव वनस्था वनवासिन्य आसन्निव संजाता इव । का इव के इव वा । शिष्या इव । यथा विनेयाः कुतश्चिद्गुरोः सकाशात्किमप्यधीत्य एकान्ते वनादिषु गत्वा स्थिता वा तदभ्यसन्ति ॥

ध्वनन्नफेरीसखभूरिभेरीभाङ्काररावैः प्रतिशब्दितेन ।

नन्तुं सवेशाम्बुधिशायिशौरिः प्रबोध्यते सूरिसमागमे किम् ॥ ७५ ॥

ध्वनन्त्यः शब्दायमाना नफेर्यः पित्तलमय्यः वदनेन वादनीया वाद्यविशेषाः प्रसिद्धाश्च ता एव सख्यः सहाया यासां तादृश्यो भूरयः शतसंख्याका भेर्यो दुन्दुभयस्तासां भाङ्काररावैः भाङ्कृतिध्वनिभिः कर्तृभिः प्रतिशब्दितेन अर्थात्सनिधिवर्तिसागरमध्यप्रतिनादितेन । 'पयोधिमध्यप्रतिनादमेदुरः' इति नैषधे । कृत्वा । उत्प्रेक्ष्यते—सवेशे समीपे योऽम्बुधिः समुद्रस्तत्र तन्मध्ये शेते इत्येवंशीलो यः शौरिर्नारायणः स सूरेरागतपुरप्रवेशोत्सवे नन्तुमर्थात्सूरीन्द्रं नमस्कर्तुं किं प्रबोध्यते निर्निद्रीक्रियते जागर्यते इव ॥

तदाद्रिमध्यप्रतिशब्दसान्द्रैः सरध्वजौघध्वनिपूर्यमाणैः ।

प्रमोदमाद्यत्तुमुलैर्जनानां व्योमेव भूः शब्दगुणा किमासीत् ॥ ७६ ॥

तदा तस्मिन् सूरिप्रवेशोत्सवे जनानां समुपागतसकललोकानां प्रमोदेन हर्षातिशयेन माद्यद्भिर्मदं प्राप्नुवद्भिस्तुमुलैरतिबहुलव्याकुलताकलितकोलाहलैः । अथ वा 'अध्व यावत यात मुनत पुरः पन्थानम्—' एवंविधचम्पूकथाकथितकेवलव्याकुलशब्दैः कृत्वा व्योमेव गगनमिव भूरपि पृथिव्यपि शब्द एव गुणो यस्यास्तादृशी किमासीज्जातेव । किंभूता । तुमुलैरद्रीणां समीपभाजां नन्दीचेलकप्रमुखाणां स्वभावतस्तु शत्रुंजयाचलशिखराणां परं कालानुभावाद्गिरिपटनाश्च दूरीभूतानां पर्वतानां मध्ये कन्दरोदरे प्रतिशब्दाः प्रतिध्वनयस्तैः सान्द्रैर्निबिडीभूतैः । पुनः किंभूतैः । सरध्वजानां नानाविधवाद्यानाम् ।

रदेवस्येव तपस्तथानुष्ठानादिकमासीत्। तत्किंचिदिह ग्रन्थे देशमात्रं यथाश्रुत मया ग्रन्थकर्त्रोच्यते कथ्यते ॥

सूरीन्दुरेकाशनकं न यावज्जीवं जहौ न्यायमिव क्षितीन्द्रः।
पञ्चापि चासौ विकृतीरहासीद्गुणान्स्मरस्येव पराबुभूषुः ॥ ९० ॥

सूरीन्दुर्मुनिचन्द्रो यावदिति यावन्तं समयं जीव्यते प्राणा धार्यन्ते इति यावज्जीवं संयमजन्म मर्यादीकृत्य एकवारमशनमेकाशनं सकृद्भोजनं वा यत्र। एकाशनके स्वार्थे कः। न नैव जहौ तत्याज। सकृदेव भुक्तवानित्यर्थः। क इव। क्षितीन्द्र इव। यथा धर्मप्रधानो राजा न्यायं नीतिं न जहाति। च पुनरसौ सूरिः दधिदुग्धपक्वान्नतैलगुडघृताभिधाना पञ्चसंख्याका विक्रियते विकारयुक्तो जीवः क्रियते एभिरिति विकृतयः ताः विकृतीरहासीदत्याक्षीन्मुञ्चति स्म। उत्प्रेक्ष्यते—स्मरस्य कंदर्पस्य पञ्चप्रमाणान् शब्दरूपगन्धरसस्पर्शाभिधान् गुणान् पराबुभूषुः पराभवितुमिच्छुरिव ॥

द्रव्याणि वल्भावसरे व्रतीन्द्रः सदाददे द्वादश नाधिकानि।
किं भावना पोषयितुं विशिष्य भवाब्धिपारप्रतिलम्भयित्रीः ॥ ९१ ॥

यतीन्द्रः सदा सर्वकालं सूरिपदप्राप्तिं मर्यादीकृत्य वल्भावसरे आहारकरणसमये द्वादश सूर्यसंख्ययैव द्रव्याणि धान्यानां नामग्राहं विकृतेस्त्यक्तत्वे[illegible] शाकान्यपि नामग्राहं पानीयं च सर्वाण्यपि द्वादशान्तर्भावीनि आददे जग्राह नाधिकानि द्रव्याण्यग्रहीत्। कदाचिदपीत्यर्थः। उत्प्रेक्ष्यते—अनित्यता-अशरणत्व-संसारत्व-एकत्व-अन्यत्व-अशुचित्व-आश्रव-संवर-निर्जरा-धर्म-लोक-बोधिसंज्ञा द्वादश भावना पोषयितुं पुष्टीकर्तुमिव। कथम्। विशिष्य विशेषप्रकारेण कृत्वा। किंभूता भावनाः। भवः संसार एव अब्धिः समुद्रस्तस्य पारस्य परतीरस्य मोक्षस्य प्रतिलम्भं लम्भयित्रीः प्रापयित्रीः। 'अन्यथा कथमद्य प्रतिलम्भः' इति [illegible]। 'प्रतिलम्भः प्राप्तिः' इति [illegible] ॥

अनिश्चितेन्द्रेण स सप्तपञ्चत्रिंशन्मिता [illegible] ।
आहारदोषाः कृतपापपोषा [illegible] इव [illegible] निषिद्धाः ॥ ९२ ॥

अनिश्चितेन्द्रेण सूरिराजेन सह [illegible]

[illegible]

श्रीफलानि नालिकेराणि तथा पूगानि क्रमुकाणि 'सोपारी' इति प्रसिद्धानि तेषां पूगैः समूहैः कृत्वा प्रभावनां संमुखागतानामुपाश्रयागतानां च सकलबालवृद्धजनानामनिवारितदानं ददते स्म । च पुनः रूपकाणां नाणकैर्व्यारीमहमुदीप्रमुखैः प्रभावना व्यधुः ॥

अन्येऽपि संघाः पुरपत्तनेभ्योऽभ्येत्याभजन्सूरिसहस्ररश्मिम् ।
अश्वादिदानानि ददुर्महेन्द्रा इव प्रमोदाद्वयवादसान्द्राः ॥ ८१ ॥

अन्ये परेऽपि पुरपत्तनेभ्यः नवीननगरजीर्णदुर्गमङ्गलपुरवेलाकुलदेवपत्तनप्रमुखेभ्यो नगरेभ्यः संघाः श्राद्धवर्गा अभ्येत्यागत्य प्रमोदात्प्रभुपार्श्वे समेत्य सूरिषु सहस्ररश्मिं दिवाकरमभजन्संसेवन्ते स्म । पुनर्महेन्द्रा नृपा इव ते अश्वाः खुरङ्गा आदौ येषां तानि द्रव्यांशुकादीनि दानानि ददुर्ददते स्म । किंभूताः । प्रमोदानामानन्दानामद्वयवादेन असाधारणत्वेन सान्द्रा उपचिततनूलतिका. ॥

आग्रहतस्ताननुगृह्य लोकांस्तत्राशुसंघोऽशुमतीव तिष्ठन् ।
पर्जन्यकालोऽभ्रमिवोन्नताख्यं व्यातन्तनीदुन्नतिमत्पुरं सः ॥ ८२ ॥

स सूरिरुन्नताख्यं पुरम् उनानामनगरमुन्नतिमत् शोभासपन्नम व्यातन्तनीद्वितनोति स्म विशेषेण कृतवान् । क इव । पर्जन्यकाल इव । यथा वर्षासमयः अभ्रं मेघमुन्नतिमत्समुन्नत नीरभरैर्नम्रीभूत व्यातनुते । स किं कुर्वन् । तत्रोन्नतनगरे तिष्ठन् स्थितिं कुर्वन् । क इव । अंशुसंघ इव । यथा किरणगणोंऽशुमति भास्करे तिष्ठति । तत्र तिष्ठन् किं कृत्वा । तान् द्वीपोन्नतनगरसबन्धिनो लोकान् श्राद्धजनाननुगृह्य तेषामुपरि अनुग्रहं कृत्वा । तान्किं कुर्वतः । आग्रहतः श्रीपूज्या अस्मदुपरि प्रसादं प्रणीय अत्रैव चतुर्मासीं कुर्वन्तु इत्यमाग्रहं कुर्वतः ॥ इत्युन्नतनगरे चतुर्मासस्यावस्थानम् ॥

घोरामनुष्ठानविधां विधातुरभ्रं तपस्तेज उदीयते स्म ।
दोषालिमालम्भयतो व्रतीन्दोरिवोत्तराशां भजतो गभस्तेः ॥ ८३ ॥

व्रतीन्दोर्हीरसूरेरुम परपाक्षिकैरसह्य तपसां तेजो ज्योतिः प्रतापश्च उदीयते स्म प्रकटीबभूव । किंभूतस्य व्रतीन्दोः । घोरामपरेषां मन्दसत्त्वानां भयकरामनुष्ठानविधां क्रियाप्रकारं विधातुं विदधातीत्येवंशीलस्य । शीते तृणं चतुर्थं तृणं । किं कुर्वतः । दोषाणामपगुणानां दान-लाभ-वीर्य-भोग-उपभोगाख्या नाम पञ्चान्तरायकर्माणि हास्य-रति-अरति-भय-जुगुप्सा-शोक-काम मिथ्याज्ञान-निद्रा-विरति-राग-द्वेषा इत्येतेषामष्टादशसंख्याकानां दोषाणामालिं पङ्क्तिमालम्भयतो मूलमुन्छिन्दतो निघ्नतः । पुनः किंभूतस्य । उत्तरामभिमां मोक्षलक्षणामाशां वाञ्छां भजत भयतः । तेजः कस्येव । गभस्तेरिव । यथा उत्तराशां कौबेरीं दिशं भजतः सेवमानस्य दिवसपतेरभ्रं जनैरसह्य तपोवत्तेजः । अथ वा तपसे सतापयति जननभ ऊर्ध्वं चेति तस्मादस्य तेजो ज्योतिः प्रतापो वा उदीयते प्रकटीभवति । किंभूतस्य । घोरां [illegible]

रदेवस्येव तपस्तथानुष्ठानादिकमासीत् । तत्किंचिदिह ग्रन्थे देशमात्रं यथाश्रुत मया ग्रन्थकर्त्रोच्यते कथ्यते ॥

सूरीन्दुरेकाशनकं न यावज्जीवं जहौ न्यायमिव क्षितीन्द्रः ।
पञ्चापि चासौ विकृतीरहासीद्गुणान्स्मरस्येव पराबुभूपुः ॥ ९० ॥

सूरीन्दुर्मुनिचन्द्रो यावदिति यावन्तं समयं जीव्यते प्राणा धार्यन्ते इति यावज्जीवं संयमजन्म मर्यादीकृत्य एकवारमशनमेकाशनं सकृद्भोजनं वा यत्र। एकाशनके स्वार्थे कः। न नैव जहौ तत्याज। सकृदेव भुक्तवानित्यर्थः। क इव। क्षितीन्द्र इव। यथा धर्मप्रधानो राजा न्यायं नीतिं न जहाति। च पुनरसौ सूरिः दधिदुग्धपक्वान्नतैलगुडघृताभिधाना पञ्चसंख्याका विक्रियते विकारयुक्तो जीवः क्रियते एभिरिति विकृतयः ता विकृतीरहासीदत्याक्षीन्मुञ्चति स्म। उत्प्रेक्ष्यते—स्मरस्य कदर्पस्य पञ्चप्रमाणान् शब्दरूपगन्धरसस्पर्शाभिधान् गुणान् पराबुभूपुः पराभवितुमिच्छुरिव ॥

द्रव्याणि वल्भावसरे व्रतीन्द्रः सदाददे द्वादश नाधिकानि ।
किं भावना पोषयितुं विशिष्य भवाब्धिपारप्रतिलम्भयित्रीः ॥ ९१ ॥

व्रतीन्द्रः सदा सर्वकालं सूरिपदप्राप्तिं मर्यादीकृत्य वल्भावसरे आहारकरणसमये द्वादश सूर्यसंख्ययैव द्रव्याणि धान्यानां नामग्राहं विकृतेस्त्वेकैव शाकान्यपि नामग्राहं पानीयं च सर्वाण्यपि द्वादशान्तर्भावीनि आददे जग्राह नाधिकानि द्रव्याण्यग्रहीत्। कदाचिदपीत्यर्थः। उत्प्रेक्ष्यते—अनित्यता—अशरणत्व—संसारत्व—एकत्व—अन्यत्व—अशुचित्व—आश्रव—संवर—निर्जरा—धर्म—लोक—बोधिसंज्ञा द्वादश भावनाः पोषयितुं पुष्टाः कर्तुमिव। कथम्। विशिष्य विशेषप्रकारेण कृत्वा। किंभूता भावनाः। भवः संसारः स एवाब्धिः समुद्रस्तस्य पारस्य परतीरस्य मोक्षवेलाकूलस्य लम्भयित्रीः प्रापयित्रीः। 'अन्यथा कथमदः प्रतिलम्भः' इति नैषधे। 'प्रतिलम्भः प्राप्तिः' इति तद्वृत्तौ ॥

व्रतिक्षितीन्द्रेण स सप्तपञ्चत्रिंशन्मिताः कातरितान्यसत्त्वाः ।
आहारदोषाः कृतपापपोषा द्वेष्या इव द्वेषजुषा निषिद्धाः ॥ ९२ ॥

व्रतिक्षितीन्द्रेण सूरिराजेन सह सप्तभिर्वर्तते। सप्तयुक्ता इत्यर्थः। तादृशाः पञ्चत्रिंशत् तैर्मिताः प्रमाणीकृताः। एतावता सप्तान्विताः पञ्चत्रिंशत् द्विचत्वारिंशद्भवन्ति। द्वाचत्वारिंशत्संख्याकाः। 'सोलस उग्गमदोसा सोलस उप्पायणाय दोसाय। दस एसणाइ दोसा मिलीय सव्वे बियायाला ॥' इति वचनात्। अथ तानेव पृथक् विवृणोति। श्राद्धश्राद्धीभ्यः षोडश दोषाः समुत्पद्यन्ते। तानेव दर्शयति—आध्यधर्मिक—औद्देशिक—पूतिकर्म—मिश्रकर्म—स्थापनाकर्म—प्राभृतिकर्म—प्रादुःकरण—क्रीतदोष—प्रामित्य—परावृत्त्य—अभ्याहृत—उद्भिन्नक—मालापक—आच्छेद्यक—अनिसृष्ट—अध्यवपूरकाः। अथ साधुसाध्वीभ्यः षोडश दोषा जायन्ते। तानेव दर्शयति—धात्रीदोष—दूतीदोष—निमित्तदोष—आजीवक—वनीपक—चिकित्सा—क्रोधदोष—मान—माया—लोभ—पूर्वसंस्तव—पश्चात्संस्तव—विद्यादोष—

श्रीफलानि नालिकेराणि तथा पूगानि क्रमुकाणि 'सोपारी' इति प्रसिद्धानि तेषां पूगै. समूहै: कृत्वा प्रभावनां समुखागतानामुपाश्रयागतानां च सकलबालवृद्धजनानामनिवारितदानं ददते स्म । च पुनः रूपकाणां नाणकैर्त्यारीमहमुदीप्रमुखैः प्रभावना व्यधु ॥

अन्येऽपि संघाः पुरपत्तनेभ्योऽभ्येत्याभजन्सूरिसहस्ररश्मिम् ।
अश्वादिदानानि ददुर्महेन्द्रा इव प्रमोदाद्वयवादसान्द्राः ॥ ८१ ॥

अन्ये परेऽपि पुरपत्तनेभ्य. नवीननगरजीर्णदुर्गमल्लपुरवेलाकुलदेवपत्तनप्रमुखेभ्यो नगरेभ्यः संघाः श्राद्धवर्गा अभ्येत्यागत्य प्रमोदात्प्रभुपार्श्वे समेत्य सूरिषु सहस्ररश्मिं दिवाकरमभजन्नसेवन्ते स्म । पुनर्महेन्द्रा नृपा इव ते अश्वाः खुरका आदौ येषां तानि द्रव्यांशुकादीनि दानानि ददुर्ददते स्म । किंभूता । प्रमोदानामानन्दानामद्वयवादेन असाधारणत्वेन सान्द्रा उपचिततनूलतिका. ॥

आग्रहतस्ताननुगृह्य लोकांस्तत्रांशुसंघोंऽशुमतीव तिष्ठन् ।
पर्जन्यकालोऽभ्रमिवोन्नताख्यं व्यातन्तनीदुन्नतिमत्पुरं सः ॥ ८२ ॥

स सूरिरुन्नताख्य पुरम् उनानामनगरमुन्नतिमत् शोभासंपन्मय व्यातन्तनीद्वितनोति स्म विशेषेण कृतवान् । क इव । पर्जन्यकाल इव । यथा वर्षासमयः अभ्रं मेघमुन्नतिमत्समुन्नतं नीरभरैर्नम्रीभूतं व्यातनुते । स किं कुर्वन् । तत्रोन्नतनगरे तिष्ठन् स्थितिं कुर्वन् । क इव । अंशुसंघ इव । यथा किरणगणोऽशुमति भास्करे तिष्ठति । तत्र तिष्ठन् किं कृत्वा । तान् द्वीपोन्नतनगरसंबन्धिनो लोकान् श्राद्धजनाननुगृह्य तेषामुपरि अनुग्रहं कृत्वा । तान्किं कुर्वतः । आग्रहत श्रीपूज्या अस्मदुपरि प्रसादं प्रणीय अत्रैव चतुर्मासीं कुर्वन्तु इत्यमाग्रहं कुर्वतः ॥ इत्युन्नतनगरे चतुर्मास्यवस्थानम् ॥

घोरामनुष्ठानविधां विधातुरुग्रं तपस्तेज उदीयते स्म ।
दोषालिमालम्भयतो यतीन्दोरिवोत्तराशां भजतो गभस्तेः ॥ ८३ ॥

यतीन्दोर्हीरसूरेरुग्रं परपाक्षिकैरसह्यं तपसा तेजो ज्योतिः प्रतापश्च उदीयते स्म प्रकटीबभूव । किंभूतस्य यतीन्दोः । घोरामपरेषां मन्दसत्त्वानां भयंकरामनुष्ठानविधां क्रियाप्रकारं विधातुः विदधातीत्येवंशीलस्य । सीते तृष्णु ... । किं कुर्वतः । दोषाणामपगुणानां दान-लाभ-वीर्य-भोग-उपभोगाख्या नाम पञ्चान्तरायकर्माणि हास्य-रति-अरति-भय-जुगुप्सा-शोक-काम मिथ्याज्ञान-निद्रा विरति राग-द्वेषा इत्येवंनामाष्टादश-संख्याकानां दोषाणामालिं पङ्क्तिमालम्भयतो मूलादुच्छिन्दतो विनाशयतः । पुनः किंभूतस्य । उत्तरामग्रिमां मोक्षलक्षणामाशां वाञ्छां भजतः सेवतः । केन क इव । गभस्तेरिव । यथा उत्तराशां कौबेरीं दिशं भजतः सेवमानस्य दिवसपतेरपि ज... तपोऽतेज । ... या तपते संतापयति जनमथ ... तेजो ज्योतिः ... उदीयते प्रकटीभवति । किंभूतस्य । घोरां ... नामधारिते ...

[illegible] ॥

गुरोः समीपे [illegible] मुनीन्द्रः ।

आलोचनां द्विर्विहितामभूत् [illegible] विशुद्धये सः ॥ ९७ ॥

मुनीन्द्रो [illegible] गुरोः समीपे [illegible] शास्त्रोक्तप्रकारेण [illegible] ‘[illegible]’ इति [illegible] । उत्प्रेक्ष्यते—[illegible] युगलस्य विशुद्धये निर्मलीकरणायेव ॥

उपोषणानां त्रिशतीं व्यतानीत्सूरीन्दुरालोचनयोर्द्वयोः सः ।

समीहमानो मनसाधिगन्तुं पदं त्रिलोकाग्रभवं किमेष. ॥ ९८ ॥

य· पातिशाहिसंमानित· स जगद्विख्यात एष प्रत्यक्षलक्ष्योऽस्मदादीना दृग्गोचरीभवन् सूरीन्दुर्हीरसूरिचन्द्रो द्वयोरुभयोरालोचनयोर्द्विर्वारविहितदु·कृतालोचनप्रायश्चित्त·योरुपोषणानामुपवसनाना त्रिशतीं त्रयाणा शताना समाहारस्त्रिशती ता सर्वाग्रेणेति संभाव्यते । व्यतानीत्करोति स्म । उत्प्रेक्ष्यते—त्रिलोकस्य । ‘त्रिलोकनाथेन सता मखद्विप ’ इति रघौ । ‘त्रिलोकनाथास्त्रिलोकपूज्यास्त्रिलोकेश्वरा इति बृहच्छान्तौ । त्रैलोक्यस्याग्रे उपरितनप्रदेशे भवमुत्पन्न यत्पद यत्स्थान मनसा अधिगन्तुं प्राप्तुं मोक्षस्थानं लब्धुमधिगत्य प्राप्येत्यर्थ.’ इति तद्वृत्तिः । मनसा स्वचित्तेन कृत्वा समीहमान एष वाञ्छन्निव ॥

षष्ठात्सपादां द्विशतीं शमीन्द्रो व्यातन्तनीति स्म स नीतिचन्द्रः ।

साग्रेऽपि गव्यूतिशतद्वये स्वमाहात्म्यमिच्छञ्जिनवत्किमुर्व्याम् ॥ ९९ ॥

शमीन्द्रः शमवता साधूना मध्ये इन्द्रः पुरंदरो द्वयोरलोचनयोस्तथा अन्येऽपि सर्वे भूपतयः सपादां द्विशतीं पञ्चविंशत्यधिकशतद्वयीं षष्ठानामुपवासद्वयलक्षणाना व्यातन्तनीति स्म कृतवान् । स किलक्षण· । नीतौ न्याये चन्द्रः। अथ वा ‘सान्द्र’ इति पाठ. । दृढः अतिशायिन्यायविधाता । तत्र विषये वयमेवं विद्म. । उत्प्रेक्ष्यते वा—गव्यूतीनां क्रोशाना साग्रे पञ्चविंशत्यधिके शतद्वये । सपादक्रोशशतद्वयप्रमाणे इत्यर्थ । इति हैमनाममालानुगतव्याख्यानम् । ‘तस्या यथा साग्रे च गव्यूतिशतद्वये–’ इति । जिनवत्तीर्थंकरस्येव स्वस्य माहात्म्य निजस्य सप्तानामीतीना प्रशमनरूपादिक महिमानमुर्व्यां पृथिव्या किमिच्छन् काङ्क्षन्निव ॥

कदापि कस्मिन्नपि अवसरे अम्लाध्यायनिर्मुक्तविशाल[illegible] [illegible] मयाश्चारित[illegible] कान्तो भर्ता । 'विवोढा रमणो भोक्ता [illegible]' [illegible] [illegible] । [illegible] प्रौढ स्वरेण सिद्धान्ताधिगमन[illegible] [illegible] [illegible] । ध्वनि विधत्ते स्मेत्यर्थः । 'ध्वनिमाविभार' इत्यपि पाठ । [illegible] [illegible] [illegible]र्थः । उत्प्रेक्ष्यते—नीरन्ध्र गर्जनोऽपि [illegible] [illegible] पाथोभिः पयोभिः परिपूर्यमाणस्य [illegible] [illegible] [illegible] [illegible] पुनरपि घटाया [illegible] प्रोद्दाम [illegible] [illegible] ॥

तत्र प्रतिष्ठाजिनयीमनुष्ठोत्सवो[illegible] ।
[illegible] मुनीन्द्रो भुवनत्रयस्याधिपत्य[illegible] ॥ [illegible] ॥

[illegible]नगरे मुनीन्द्रो [illegible] [illegible] [illegible] प्रतिष्ठा [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ॥

[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible]

[illegible]

ब्रह्मव्रतधारिवराः क्रियारताः पूर्णपोषमतः ॥ न तनपसा न तपस्वी गुरुर्विभागेन गौतमस्वामी । वैयावृत्त्येन जिनाः समताभावाच्च चारित्रम् ॥ ज्ञानं नूतनपठनान्नवाविरचितैः श्रुतज्ञानम् । जिनशासनोन्नतिकृन्नेमीर्थं शोभितभक्त्यर्हन् ॥' एतदभिधानानि विंशतिस्थानकानि आतनुते स विदधे । उत्प्रेक्ष्यते—निजस्यात्मनः विंशतिसंख्याकानि असमाधिरिति पदं पूर्वं येषां तादृशानि स्थानानि । तानि यथा—अनित्वरित प्रवर्तते, अप्रमार्ज्य स्थानकं कुरुते, दुःप्रमार्ज्य स्थानकं कुरुते, अन्यजनैः सह नारदवत्क्लेशं कारयति, पीठशय्यापट्टकादीनि अधिकानि रक्षयति, आचार्योपाध्यायरत्नाधिकाना संमुख वक्ति, स्थविरादीन् घातयति, भूतानि विनाशयति, पुनः पुनः क्रोधं कुरुते, सर्वत्र क्रोधतो भापयितुमपि न शक्यते, पृष्ठे गुणवता विरुद्ध भापते, मुहुर्मुहुर्निश्चयभाषां भापते, अधिकरणान्युदीरयति, अकाले स्वाध्याय कुरुते, अस्थण्डिलात्स्थण्डिलं गच्छन् पादौ न प्रमार्जयति स्वय च सण्उितहस्ताभ्यां विहरति, अकाले दीर्घं वाडस्वरेण भापते, स्वय निःप्रयोजन क्लेश कुरुते, गच्छभेदं स्वय करोति पराश्च कारयति परैर्वा, यावद्भास्वानुदयत्यस्तमयति च तावद्भुङ्क्ते, अशुद्धमानमप्याहारं न मुञ्चति, एवंविधानि विंशत्यसमाधिस्थानकानि अपाकर्तुमना निराकर्तुकाम इवैपः ॥

चक्रे पुनर्निर्विकृतीः सहस्रे द्वे सूरिरद्वैतधृतिं दधानः ।
किं संसृतिं निर्विकृतिं विधातुं हृपीकपङ्क्तिं किमुत स्वकीयाम् ॥१००॥

सूरिः पुनर्यथा चाम्लानि तथैव द्वे सहस्रे सहस्रयोर्द्वयीमेतावता विंशतिशतीं दधि-दुग्ध-पक्वान्न-तैल-गुड-घृतरूपपट्विकृतिपरित्यागरूपा निर्विकृतीस्तपोग्रहविशेषाश्चक्रे कृतवान् । किंलक्षणः । धृतिं रसनारसलाम्पट्यपरित्यागमयीं सतोपं दधानो बिभ्राणः । उत्प्रेक्ष्यते—संसृतिं ससारं भूयो भूयो दोपोत्पादकत्वेन अनन्तजन्ममरणोपचयकारणलक्षणा विकृतिर्विकारस्तद्रहिताम् । विरलामित्यर्थः । कर्तुं विधातुमिव । उताथ वा स्वकीया स्वात्मसवन्धिनी हृपीकपङ्क्तिमिन्द्रियश्रेणीम् । पञ्चाक्षीमित्यर्थः । निर्विकृतिं विकारविकलां स्पर्शन-रसन-घ्राण-नयन-श्रवणानामिन्द्रियाणा स्पर्श-रस-गन्ध-रूप-शब्देपु प्रवृत्तिकरणलक्षणेपु तत्तद्व्यापारेपु मन्दीभवनान्निवृत्तिकारिका कर्तुमिव वा ॥

स एकदन्तिस्फुरदेकसिक्थमुखानि तीव्राणि तपांसि चक्रे ।
प्रभुः प्रणेतुं स्पृहयन्निवैकभवामनन्तामपि संसृतिं स्वाम् ॥ १०१ ॥

स सूरिरेकदन्तिरेकस्मिन्वारके पात्रे । यत्रानवच्छिन्न पानीयान्नादिक पतेत्सा एकदन्तिरुच्यते । यस्मिंश्चैकमेव सिक्थ भुज्यते नान्यत्तदेकसिक्थमेकदन्त्या स्फुरद्दीप्यमानम् । युक्तमित्यर्थः । एकसिक्थ तत्प्रमुखमाद्य येपु तादृशानि तीव्राणि अतिकठिनानि तपासि चक्रे विनिर्मितवान् । उत्प्रेक्ष्यते—अनन्ता स्वभावपरिणामेन न विद्यते अन्तोऽवसान यस्यास्तादृशीं स्वां स्वकीया संसृतिं ससारमेक एव भवोऽवतारो यस्यास्तादृशीं प्रणेतुं निर्मातुं स्पृहयन्निव ॥

मन्त्रदोष-चूर्णदोष-योगदोषाः। अथैषणादोषा दश साधुश्राद्धेभ्यः समुत्पद्यन्ते। तानपि दर्शयति—शङ्कितदोष-म्रक्षितदोष-बहिर्निक्षिप्त-पिहितदोष-संहृतदोष-दायकदोष-उन्मिश्रदोष-अपरिणत-लिप्तदोष-छर्दितदोषा.। तथा प्रभोजनं कुर्वतां साधूनां प्रसङ्गात्पञ्च दोषा भवेयुः। तेऽप्युच्यन्ते—संयोजन-अप्रमाण-इङ्गाल-धूमसामान्य-अकारणदोषाः। केचित्सप्तचत्वारिंशदपि दोषान्प्रतिपादयन्ति। तस्मात्तेऽपि प्रोक्ताः। परं मौलास्तु द्विचत्वारिंशत्सङ्ख्याका एव। आहारस्य भोजनस्य दोषा अपगुणास्ते निषिद्धाः निवारिता.। एतावता सूरि(रयो) द्वाचत्वारिंशद्दोषनिर्मुक्तमाहारमभ्यवहरन्ति। किंभूता दोषा। कातरं क्लीबं ततः शुद्धिविमुखं कुर्वन्तीति कातरयन्ति। कातरयन्ते स्मेति कातरिताः। 'तत्करोति तदाचष्टे' इति प्रक्रियासूत्रेण ञिप्रत्ययः। 'ञन्तन्तात् क्तः' इति क्तप्रत्ययः। ञिलोपे इट्प्रत्ययश्चेति सिद्धम्। उदाहरणं यथा नैषधे प्रथमकाव्ये—'नल. किंभूतः। सितच्छत्रितकीर्तिमण्डलः पूर्वोक्तयुक्तिरेव। सितं च छत्रं च सितच्छत्रं करोतीति सितच्छत्रयति सितच्छत्र्यते स्मेति सितच्छत्रिता कीर्तिमण्डले देशे येन' इति नरहर्याम्। कातरीकृता हीनसत्त्वा विहिता अन्ये अपरे सत्त्वा. कर्मपरिणतिवशाच्चारित्रपालनासमर्थाः प्राणिनो यैस्ते। पुनः किंभूताः। कृतं निर्मितं पापस्य दुःकृतस्य पोष. पुष्टिर्यैः। पापोपचयकारिभिरित्यर्थः। केनेव निषिद्धाः। द्वेषजुषेव। यथा विरोधवता अतीववैरभाजा भूभुजा द्विष्याः सर्वेऽरिण पराक्रमेण निषिध्यन्ते मूलतोऽप्युच्छिद्यन्ते॥

अंहोद्रुहामाभरणानि भिक्षोः किं द्वादशानां प्रतिमारमाणाम्।
तपांसि यो द्वादशभेदभिन्नान्यपूपुषत्कायमशूशुषच्च॥ ९२॥

यो भगवान् अनशन-ऊनोदरिका-वृत्तिसंक्षेप-रसत्याग-कायक्लेश-संलीनता इति षड्विधं बाह्यं तपः। तथा प्रायश्चित्त-विनय-वैयावृत्त्य-स्वाध्याय-ध्यान-कायोत्सर्गा इति षोढा आभ्यन्तरं तपः। षट् बाह्यानि षडाभ्यन्तराणीति द्वादशभिर्भेदैः प्रकारैः भिन्नानि पार्थक्यभाञ्जि तपांसि अपूपुषत् पुष्णाति स्म। उत्प्रेक्ष्यते—भिक्षोः साधोः प्रति अलेपाहारैकभक्तपानदत्तका प्रथमा एकमासस्य, द्वितीया द्विमासा, तृतीया त्रिमासा, चतुर्थी चतुर्मासा, पञ्चमी पञ्चमासा, षष्ठी षण्मासा, सप्तमी सप्तमासा। पूर्वविधिः सर्वास्वपि प्राग्वत्। अष्टमी सप्तरात्रिका। तत्र चतुर्विधाहारनिषेधकश्चतुर्थः। तथा ग्रामाद्बहिः कायोत्सर्गकरणम्। नवमी सप्तरात्रिकी। उत्कटिकासनेन दण्डासनेनैवावस्थानम्। दशमी सप्तरात्रिकी। षष्ठभक्तं चतुर्विधाहारप्रत्याख्यानं च गो दुहिकासनेनावस्थानम्। एकादशी एकरात्रिकीत्युच्यते। परमाष्टमभक्तेन एकं चतुर्विधाहारप्रत्याख्यानं च तृतीये दिने। ग्रामाद्बहिः कायोत्सर्गकरणम्। द्वादशी एकरात्रिकी। परं चतुर्विधाहारत्यागाष्टमभक्तेन पूर्वोक्ते स्थाने [illegible] कायोत्सर्गकरणम्। इत्थं सूत्रोक्तविधिविधानात्प्रतिमाना द्वादशानां [illegible] श्रमणानुष्ठानविशेषलक्ष्मीणामाभरणानीव भूषणानीवापूपुषत्। [illegible]।

[illegible] निपिना [illegible] ॥ [illegible]
स्म । किं क्रियमाण । [illegible]
[illegible]
[illegible] महाराज—[illegible] ॥

सूरीन्दुरेकाग्रमना यतस्मः [illegible] कोटीर्गणयांबभूव ।
निवेदिताशेषशरीरभाजां चतुर्गतानामिव जन्ममानान् ॥ १०६ ॥

सूरीन्दुरेकाग्रमना [illegible] निदान-करण-[illegible] कोटी. [illegible] गणयांबभूव गणयति स्म । उत्प्रेक्ष्यते—[illegible] प्राणिना [illegible] संसारवर्तिनः समस्ता शरीरभाजः प्राणिनो [illegible] नरकतिर्यग्मनुष्यदेवलक्षणानां चतसृणां गतीनां [illegible] जगनशीलान् [illegible] गणयांचकार ॥

ग्रन्थावलीं निर्मितवान्विशुद्धां निजां मनोवृत्तिमिव व्रतीन्द्रः ।
अदीक्षयद्यः शतशो वशीशः शिष्यान्स्वशिष्यीकृतशक्रसूरिः ॥ १०७ ॥

यो व्रतीन्द्रो ग्रन्थावलीं शास्त्रश्रेणीमशुद्धां विशुद्धां कूटवर्णविरहितां निर्मितवान् शोधयामास । कामिव । निजामात्मीयां मनोवृत्तिमिव स्वान्तव्यापृतिमिव विशुद्धां निष्पापां निर्मितवान् । पुनर्यो वशीशः जितेन्द्रियेन्द्रः योगिजम्भाराति शतशः शतसंख्याकान् शिष्यान् विनेयान् अदीक्षयत् दीक्षां ग्राहयति स्म । किंभूतः । शिष्यीकृतो बुद्ध्या शास्त्रपरिज्ञानेन च निजान्तेवासिविहितः शक्रसूरिः पुरंदराचार्यः बृहस्पतिर्येन । 'इदृशीं गिरमुदीर्य बिडौजाः जोपमासनविशिष्य बभाषे । नात्र चित्रमभिवाकुशलत्वे शैशवावधि गुरुर्गुरुरस्य' ॥ इति सूरेरातपस्यासमय तपःक्रियानुष्ठानादिवर्णनम् ॥

यत्पण्डिताः सार्धशतं बभूवुः संप्राप्तसिद्धान्तपयोधिपाराः ।
दिवेर्ष्ययैकं धिषणं दधत्या वागीश्वराः किं विधृता धरित्र्या ॥ १०८ ॥

यस्य सूरेः पण्डिताः प्रज्ञाशपदधारिणः सार्धशतमेकपञ्चाशदुत्तरं शत संख्या येषा तादृशा बभूवुः संजाताः । किंभूताः । सम्प्राप्तोऽधिगतः सिद्धान्तस्यागमस्य उपलक्षणात् स्वसमयपरसमयप्रवर्तमानशास्त्रसंदोहस्वरूपस्य पयोधेः समुद्रस्य पारो यैस्ते । उत्प्रेक्ष्यते—एकमेव धिषण बृहस्पतिम् । 'वाचस्पतिर्द्वादशार्चिर्धिषण. फाल्गुनीभवः' इति हैम्याम् । दधत्या धारयन्त्या दिवा स्वर्लोकेन अमरावत्या वा समम् ईर्ष्यया स्पर्धया धरित्र्या धरित्रीभुवा सार्धशत वागीश्वरा सुराचार्या विधृताः किं ध्रियन्ते स्म इव ॥

सप्ताभवन्वाचकवारणेन्द्रा यस्योल्लसद्वाग्लहरीविलासाः ।
गाम्भीर्यभाजो गुणरत्नपूर्णास्तरङ्गिणीनामिव जीवितेशाः ॥ १०९ ॥

यस्य भट्टारकस्य सप्तसंख्याका वाचकेषु उपाध्यायेषु विषये कुमतिमतप्रबलबलवि-

मन्त्रदोष-चूर्णदोष-योगदोषाः । अथैषणादोषा दश साधुश्राद्धेभ्यः समुत्पद्यन्ते । तानपि दर्शयति—शङ्कितदोष-म्रक्षितदोष-वह्निर्निक्षिप्त-पिहितदोष-संहृतदोष-दायकदोष-उन्मिश्रदोष-अपरिणत-लिप्तदोष-छर्दितदोषाः । तथा प्रभोजनं कुर्वतां साधूनां प्रसङ्गात्पञ्च दोषा भवेयुः । तेऽप्युच्यन्ते—संयोजन-अप्रमाण-इङ्गाल-धूमसामान्य-अकारणदोषाः । केचित्सप्तचत्वारिंशदपि दोषान्प्रतिपादयन्ति । तस्मात्तेऽपि प्रोक्ताः । पर मौलास्तु द्विचत्वारिंशत्संख्याका एव । आहारस्य भोजनस्य दोषा अपगुणास्ते निषिद्धाः निवारिताः । एतावता सूरि(रयो) द्वाचत्वारिंशद्दोषनिर्मुक्तमाहारमभ्यवहरन्ति । किंभूता दोषाः । कातरं क्लीबं ततः शुद्धिविमुखं कुर्वन्तीति कातरयन्ति । कातरयन्ते स्मेति कातरिताः । 'तत्करोति तदाचष्टे' इति प्रक्रियासूत्रेण णिप्रत्ययः । 'अन्तन्तात् क्त.' इति क्तप्रत्ययः । णिलोपे इट्प्रत्ययश्चेति सिद्धम् । उदाहरणं यथा नैषधे प्रथमकाव्ये—'नल किंभूत. । सितच्छत्रितकीर्तिमण्डल पूर्वोक्तायुक्तिरेव । सितं च छत्रं च सितच्छत्रं करोतीति सितच्छत्रयति सितच्छत्र्यते स्मेति सितच्छत्रिता कीर्तिमण्डले देशे येन' इति नरहर्याम् । कातरीकृता हीनसत्त्वा विहिता अन्ये अपरे सत्त्वा. कर्मपरिणतिवशाच्चारित्रपालनासमर्थाः प्राणिनो यैस्ते । पुनः किंभूता । कृतं निर्मितं पापस्य दुःकृतस्य पोषः पुष्टिर्यै. । पापोपचयकारिभिरित्यर्थः । केनेव निषिद्धाः । द्वेषजुषेव । यथा विरोधवता अतीववैरभाजा भुजा द्वेष्याः सर्वरिण पराक्रमेण निषिध्यन्ते मूलतोऽप्युच्छिद्यन्ते ॥

अंहोद्रुहामाभरणानि भिक्षोः किं द्वादशानां प्रतिमारमाणाम् ।
तपांसि यो द्वादशभेदभिन्नान्यपूपुषत्कायमशश्रुपश्च ॥ ९६ ॥

यो भगवान् अनशन-मूनोदरिका-वृत्तिसंक्षेप-रसत्याग-कायक्लेश-संलीनता इति षड्विधं बाह्यं तपः । तथा प्रायश्चित्त-विनय-वैयावृत्त्य-स्वाध्याय-ध्यान-कायोत्सर्ग इति षोढा आभ्यन्तरं तपः । षड् बाह्यानि षडाभ्यन्तराणीति द्वादशभिर्भेदैः प्रकारैर्भिन्नानि पार्थक्यभाञ्जि तपांसि अपूपुषत् पुष्णाति स्म । उत्प्रेक्षते—भिक्षोः [illegible] प्रति अल्पाहारैकभक्तपानसत्का प्रथमा एकमासिका, द्वितीया द्विमासिका, [illegible] त्रिमासिका, चतुर्थी चतुर्मासिका, पञ्चमी पञ्चमासिका, षष्ठी षण्मासि[illegible], [illegible] मासिका । पूर्वविधि. सर्वास्वपि ज्ञातव्या । अष्टमी सप्तरा[illegible] । [illegible] पोषकचतुर्थी । तथा ग्रामाद्बहि. कायोत्सर्गकरणम् । नवमी सप्तरा[illegible] । [illegible] दण्डासनेनैवावस्थानम् । दशमी सप्तरात्रिकी । [illegible] दुद्धिकासनेनावस्थानाम् । एकादशी एकरात्रिकी [illegible] चतुर्विधाहारप्रत्याख्यानं च [illegible] । ग्रामादि[illegible] कायोत्सर्गकरण[illegible] । [illegible] एकरात्रिकी । परं चतुर्विधाहार[illegible] [illegible] [illegible] [illegible] करणम् । इत्थं [illegible] । द्वादश [illegible] [illegible]

ल्पायुष्कानवानामेव सूर्यादिकानां मण्डले समूहे सत्यपि गुधागोश्चन्द्रस्येव एकं गर्भं ददिवान् ॥ इति परिवारः ॥

यस्योपदेशाद्बहवो विहाराः संजज्ञिरे मन्दिरचैत्ययुक्ताः ।
त्वष्ट्रा क्षितौ वस्तुमिवामृतस्वःश्रीभिर्व्यधाप्यन्त विलाससौधाः ॥११३॥

यस्य प्रभोरुपदेशाद्बहवोऽनल्पसङ्ख्याका विहारा जिनप्रासादाः संजज्ञिरे । किंभूताः । मन्दिरचैत्ययुक्ताः गृहदेवतावसरसहिताः । 'देहरासर' इति प्रसिद्धिः । एतावता गृहचैत्यान्यप्येकान्यासन् । उत्प्रेक्ष्यते—अमृतस्वःश्रीभिरपवर्गस्वर्गलक्ष्मीभिः कर्त्रीभिः क्षितौ भूमण्डले वस्तु निवासं कर्तुं त्वष्ट्रा विश्वकर्मणा कर्त्रा विलाससौधा लीलागृहा व्यधाप्यन्त कारिता इव ॥

पञ्चाशदर्हत्प्रतिमाप्रतिष्ठाः प्रभुः पृथिव्यामनुतिष्ठति स्म ।
दिशश्चतस्रोऽप्यपुनाद्विहारैः प्रभाप्रसारैरिव भानुमाली ॥ ११४ ॥

प्रभुः सूरिः अर्हत्प्रतिमाना शतसहस्रसंख्याकाना जिनबिम्बाना प्रतिष्ठा वासक्षेपाञ्जनशलाकादिकादिक्रियाभिः प्रतिष्ठापनानि पञ्चाशत्संख्याकाः पृथिव्या गुर्जरसौराष्ट्रमरुमेदपाटलाटमेवातकुशावर्तादि मण्डलभूमण्डलमध्ये अनुतिष्ठति स्म कृतवान् । पुनश्चतस्रश्चतु-संख्याकाः पूर्वपश्चिमदक्षिणोत्तरसंज्ञा दिशो हरितो विहारैः स्वविचरणैः कृत्वा अपुनात् पवित्रीचकार । क इव । भानुमालीव । यथा भास्वान् प्रभाप्रसारैः स्वकिरणविस्तारैः कृत्वा चतस्रोऽपि दिशः पुनीते ॥

यस्मिन्पुनाने भुवमर्बुदाद्रिसमेतसिद्धाचलरैवतेपु ।
संघाधिपाः पाण्डववच्छतानि त्रीणि त्रिकेणाभ्यधिकान्यभूवन् ॥११५॥

यस्मिन् सूरिशक्रे भुव पृथिवीपीठ पुनाने पवित्रीकुर्वाणे सति अर्बुदाद्रि- हिमाचलनन्दनगिरि वृषभदेववासुपूज्यारिष्टनेमिमहावीरवर्ज विंशतितीर्थकृता निर्वाणभूमाकल्याणकपावनीकृत संमेताचलः शत्रुंजयो विमलाचलः रैवतो गिरिनारगिरिः एतत्प्रमुखेषु तीर्थेषु पाण्डववत्पाण्डुनन्दना इव त्रिकेण त्रयेणाधिकानि त्र्युत्तराणि त्रीणि शतानि सघाधिपाः संघपतयः अभूवन् समजायन्त ॥

आत्मा भृतो येन जिनेश्वराद्रितीर्थादियात्रोद्भवपूर्णपुण्यैः ।
प्राक्शृङ्गिशृङ्गागमनोद्धतांशुभारैरिवाम्भोरुहिणीवरेण ॥ ११६ ॥

येन भगवता जिनेश्वराद्रिः शत्रुंजयशैलः । 'पञ्चाशदादौ किल मूलभूमेर्दशोर्ध्वभूमेरपि विस्तरोऽस्य । उच्चत्वमष्टैव तु योजनानि मानं वदन्तीह जिनेश्वराद्रेः ॥' इति नगरपुराणोक्तमन्तर्वाच्यान्तर्गतमत्र लिपीकृतमस्ति । स एव तीर्थः सिद्धिगमनस्थानम् । तीर्थशब्दः पुनपुंसकलिङ्गे । स एव तदेव वा आदौ येषा तेषा यात्रा दर्शन स्पर्शनं तदर्हतां द्रव्यभावस्तवार्चनातपोविधानादिकाः क्रियास्ताभ्यः उद्भव उत्पत्तिर्येषा तादृशैः पूर्णैरन्यूनैः

द्वासप्ततिं सूरिसहस्ररश्मिः स निर्मिमीते पुनरष्टमानाम्।
विभ्रश्चतुर्विंशतिकात्रिकस्य प्रसत्तिमाधातुमना जिनानाम् ॥ ९७ ॥

सूरिषु सहस्ररश्मिः राधिकप्रतापत्वेन भानुमाली पुनर्द्वयोरालोचनयोरन्येषां च ह्यष्टमानामुपवासत्रिकलक्षणानां द्वासप्ततिं निर्मिमीते स्म कृतवान्। उत्प्रेक्ष्यते—चतुर्विंशतिकानामतीतानागतवर्तमानरूपाणां त्रिकस्य त्रितयस्य जिनानां तीर्थकृताम्। चतुर्विंशतिस्त्रिभिर्गुणिता सती द्विसप्ततिर्भवेत्। एतावता द्वासप्ततिमिताईद्भट्टारकाणाम्। केवलज्ञानि–निर्वाणि–सागर–महायशः–विमल–सर्वानुभूति–श्रीधर–दत्त–दामोदर–सुतेजः–स्वामि–मुनिसुव्रत–सुमति–शिवगति–अस्ताघ–नमि–अनिल–यशोधर–कृतार्थ–जिनेश्वर–शुद्धमति–विवेक–स्यन्दन–संप्रतिनामान एतेऽतीतचतुर्विंशतिजिनाः। ऋषभ–अजित–शंभव–अभिनन्दन–सुमति–पद्मप्रभ–सुपार्श्व–चन्द्रप्रभ–सुविधि–शीतल–श्रेयांस–वासुपूज्य–विमल–अनन्त–धर्म–शान्ति–कुन्थु–अर–मल्लि–मुनिसुव्रत–नमि–नेमि–पार्श्व–वर्धमानाभिधा एते वर्तमानचतुर्विंशतितीर्थकराः। पद्मनाथ–सुरदेव–सुपार्श्वक–स्वयप्रभ–सर्वानुभूति–देवश्रुत–उदय–पेढाल–पोट्टिल–शतकीर्ति–सुव्रत–असम–निष्कषाय–निष्पुलाक–निर्मम–चित्रगुप्त–समाधि–संवर–यशोधर–विजय–मल्ल–देव–अनन्तवीर्य–भद्रकृत्संज्ञा एते त्वनागतचतुर्विंशतिरर्हन्तः। एतेषां चतुर्विंशतित्रितयजिनानां प्रसत्तिं स्वविषये प्रसन्नभावनामाधातुमनाः कर्तुकाम इव विभ्र इवार्थेऽत्र ॥

चक्रे य आचाम्लसहस्रयुग्मं स्वयं जिनं स्तोतुमवेक्षितुं वा।
पृथक्सहस्रे रसनेक्षणानां विभ्रः फणीन्द्रोरिव लिप्समानः ॥ ९८ ॥

यो भगवान् आचाम्लानां सहस्रस्य दशशत्या युग्मं द्वन्द्वं चक्रे विंशतिशतीं विधत्ते स्म तत्र विषये वचनेव विभ्रो जानीमः। उत्प्रेक्ष्यते वा—जिनं वीतरागं स्वयमात्मनैव स्तोतुं स्तवनगोचरीकर्तुं पुनरवेक्षितुं विलोचनविषयं विधातुं द्रष्टुं रसनेक्षणानां जिह्वानयनानां पृथक्पृथक् सहस्रे लिप्समानः काङ्क्षन्निव। भगवन्तं स्तोतुं रसनानां द्विसहस्रं तथा अनिमेषं विलोकयितुं लोचनानां विंशतिशतीमीहमान इव। केषामिव। फणीन्द्रो रसनेक्षणानामिव। यथा शेषनागस्य रसनानां तथा ईक्षणानां सहस्रे स्तः। तस्य नागराजस्य सहस्रफणत्वेन द्विजिह्वत्वेन द्विनेत्रत्वेन सहस्रफणेषु रसज्ञानां नयनानां च द्विसंख्याभाक्त्वेन द्विसहस्री स्यात्। तथा चम्पूकथायाम्—'यस्यास्मिन्नुरगप्रभोरिव भवेज्जिह्वासहस्रद्वयम्' इति ॥

आचाम्लकैर्विंशतिसंमितानि यः स्थानकान्यातनुते स सूरिः।
निजस्य विंशत्यसमाधिपूर्वस्थानान्यपाकर्तुमना इवैषः ॥ ९९ ॥

यः सूरिराचाम्लकैराचाम्लनामतपोविशेषैः कृत्वा विंशतिसंख्यया संमितानि प्रमाणीकृतानि स्थानकानि—'अर्हति सिद्धे प्रवचनसूरि स्थविरेषु वाचके साधौ। ज्ञाने भक्तिर्दर्शनशुद्धिः सद्विनयसंपन्ना ॥ संध्याद्वयेऽप्यवश्यावश्यककरणेन शुद्धचारित्रम्।

पुरीमथापामिव पत्तनं तां [illegible] जिनेन्द्रः पुनरप्यलंकृत् ।

.... ॥ १२० ॥

स जिनेन्द्रः सूरिरन्तिममायुर्भागं [illegible] चतुर्मासं [illegible] । [illegible] [illegible] विहारः [illegible] । पुनः [illegible] नाम [illegible] पुरीं नगरीं [illegible] निजपादपद्मैः पवित्रां [illegible] । [illegible] । [illegible] । यथा [illegible] महा [illegible] जिनानां [illegible] [illegible] पुरंदरः [illegible] पुरीं [illegible] [illegible] चतुर्मासं [illegible] ॥

[वाचंयमेन्दुर्निजमायुरल्पं] विदांचकाराथ हृदा तदानीम् ।
स्वेनोपचेतुं पुनरेष पुण्यमगण्यमैच्छद्द्रविणं धनीव ॥ १२१ ॥

अथ चतुर्मासकस्थितेरनन्तरं तदानीं तस्मिन् प्रस्तावे तच्चतुर्मासक एव वाचयमे-न्दुर्हीरविजयसूरि. हृदा कशाग्रधियमतज्ञानवता हृदयेन कृत्वा निजमात्मीयमा-युर्जीवितकालमल्प स्तोकं विदाचकार अज्ञासीत् ज्ञातवान् । पुनरित्यन्योक्ति । एष सूरिः स्वेनात्मना अगण्यमपरिमित स्वर्गापवर्गसाधकं पुण्य सुकृतमुपचेतु पुष्ट कर्तुमैच्छ-द्वाञ्छति स्म । क इव । धनीव । यथा व्यवहारी अगण्य गणयितुमशक्यं गणित द्रविण धनमुपचेतुमिच्छति ॥

संलेखनां तत्र तपोविचित्रां स वृत्रशत्रुर्व्रतिनां वितेने ।
विधित्सयेवोत्सुकितोत्तरात्मशुद्धेर्बहिःस्नानमिवाङ्गशुद्धेः ॥ १२२ ॥

तत्रोन्नतनगरे स व्रतिना वृत्रशत्रुर्वाचयमवासवो हीरविजयसूरिस्तपोभिरेकाशननि-र्विकृतिकाचाम्लचतुर्थषष्ठाष्टमादिभि कृत्वा विचित्रा नानाविधा सल्लिख्यन्ते सतन्यन्ते तुच्छीक्रियन्ते स्वकर्माण्यनयेति सलेखना तपोनुष्ठानविशेषस्तां वितेने करोति स्म । उत्प्रे-क्ष्यते—अन्तरात्मनो जीवस्य शुद्धेर्निर्मलतायाः कर्मराहित्यस्य विधित्सया कर्तुमिच्छया उत्सुकित उत्कण्ठित इव । किमिव । बहि.स्नानमिव । यथा कश्चिदङ्गस्य बाह्यशरीरस्य शुद्धेर्विशुद्धताया विधित्सया विधातुमिच्छयोत्सुकितो बहिःस्नान जलादिभिस्त्वङ्मलापह-सेवन वितनुते ॥ इति सलेखना ॥

प्राचीनसूरीन्द्र इव प्रणीय संलेखनामेष विशिष्य सूरिः ।
आराधनां प्रारभतेति शान्तरसारविन्दैकविलासहंसः ॥ १२३ ॥

एष सूरिः इत्यग्रे वक्ष्यमाणप्रकारेण आराध्यन्ते सर्वव्यापारपरित्यागेन पुराकृतदु-ष्कृतमिथ्यादुष्कृतप्रदानेन च त्रिधापि अर्हदादयः सेव्यन्ते यस्यां सा आराधना ता प्रारभत प्रारब्धवान् । किंभूतः । शान्तनामा नवमो रसः उपशमलक्षणः स एवारविन्द विकसितकमलं तत्रैकोऽद्वितीयो विलासः क्रीडा तत्राद्वैतखेलनविषये हसो राजमरालः हसोपमः आराधना प्रारभत । कि कृत्वा । प्राचीनसूरीन्द्रो वज्रस्वामीप्रमुखपूर्वाचार्य

उपोषणानामपुपत्सहस्रत्रयं स तस्योपरि षट्शतीं च ।

सरोजजन्मा धरणीधरेन्द्रं सुधाशनानामिव चारुचूलाम् ॥ १०२ ॥

स सूरिरुपोषणानामुपवासानां सहस्राणां दशशतीनां त्रयं त्रिक त्रिसहस्रीमपपुपत् पुष्णाति स्म । चकारेत्यर्थः । च पुनस्तस्य सहस्रत्रयस्य उपरि षट्शतीं षट्शतानि उपवासान् चकार । क इव । सरोजजन्मेव । यथा कमलभूर्ब्रह्मा सुधाशनानां देवानां धरणीधरेन्द्रं मेरुं व्यधात् । पुनस्तस्योपरि चार्वी प्रकृष्टां चूलां विधत्ते स्म । यद्यपि धरणीधरेन्द्र इति नाम्ना मेरुरायातस्तथापि धरणीधरेन्द्रो हिमाद्रिरप्युच्यते । तस्यापि नगाधिराजत्वं वर्तते । परं तस्मिन् चूला नास्ति, तन्निरासार्थं सुधाशनानामित्युक्तम् । सुराद्रिर्मेरुरेव नापरः ॥

एकाशनाचाम्लयुतैर्यतीन्दुरुपोषणैर्निर्गलितान्तरायम् ।

त्रयोदश व्यातनुते स्म मासान्शिक्षामिव स्वीयगुरोस्तपोऽर्थी ॥१०३॥

असौ यतीन्दुः सूरिः स्वीयगुरोः विजयदानसूरेः तपोऽनुष्ठानविशेषं व्यातनुते स्म निर्ममे । कान् । मासान् । त्रिंशद्वासरान्यावत् । किंभूतान् मासान् । त्रयोदश [illegible] प्रमितान् त्रयोदशसंख्याकान् । कथम् । निर्गलितान्तरायं निर्गतविघ्नजातम् । [illegible] । उपोषणैरुपवासैः । किंभूतैः । एकाशनाचाम्लयुतैः प्रथममुपवासः, तत [illegible] काम, तत आचाम्लं केवलं जलेन रूक्षाशनम्, पुनरुपवासः, [illegible] त्रयोदशमासीं यावद्विजयदानसूरेस्तपो विदधे । उत्प्रेक्ष्यते—स्वीयगुरोः [illegible] दिवां शिक्षामिवातनुते स्म ॥

त्रिधा समारान्मुमनाः समग्रज्ञानानि [illegible]

तपांसि तीव्राणि चकार योगैः परीषहांस्तेऽनुभिः [illegible] ॥ १०४ ॥

स सूरिरेकादशानां [illegible] एकादश [illegible] द्वाविंशतिमासान्यावद्योगैर्मनोवाक्कायरूपाणां [illegible] [illegible] रूपाणि तपांसि चकार [illegible] [illegible] मतिश्रुतावधिमनःपर्यवकेवलाख्यानि [illegible] [illegible] । उत्प्रेक्ष्यते—[illegible] [illegible] अरति-स्त्री-चर्या-निषद्या-शय्या-आक्रोश-वध-[illegible] [illegible] स्कार-प्रज्ञा-अज्ञान-सम्यक्त्वरूपान् द्वाविंशतिं [illegible]

[illegible] तपोभिर्विहितै [illegible]

[illegible] ॥ १०५ ॥

[illegible]

तत्त्वेषु कृपां दधानः । अजितनाथपूर्वकल्याणको धर्मः उत्तमः । क इव । सुधांशुरिव । चन्द्रो मध्ये निजमण्डलान्तराले सुधामसृतं भरो । सो धर्मः अतिभीमे अति भीतिकारिणि भववारिधौ संसारसमुद्रे मज्जतस्त्रुडतो लोकस्य करावलम्बं अवलम्बनमिवास्ति । हस्ते गृहीत्वा कर्षतीत्यर्थः । यथा कश्चिदगाधजलनिमग्नं कंचिज्जन्तु हस्ताभ्यां गाढमादाय बहिः कर्षति तद्वदास्ते ॥ इत्यर्हत्सिद्धसाधुधर्माणां चतुर्णां शरणम् ॥

ज्ञाने ममाष्टौ समयादिकातीचाराः प्रमादा इव शुद्धधर्मे ।
शङ्कादिका अष्ट च दर्शनेऽतीचारा मदा देहभृतीव जाताः ॥ १२८ ॥
कर्माणि जन्ताविव ये ममातीचाराः पुनर्मातृगताश्चरित्रे ।
मिथ्यासता ते वहुगर्ह्यवाचो व्याहारवन्मे निखिला इदानीम् ॥ १२९ ॥

ये ममाष्टौ अष्टसंख्याकाः ज्ञाने ज्ञानाचारे अतीचाराः संजाताः । किंभूताः । समयः कालः आदौ येषां कालविनयवहुमानोपधानहीननिह्नवव्यञ्जनार्थतदुभयहीना एतेऽष्ट ज्ञानातीचाराः । के इव । प्रमादा इव । यथा शुद्धे जिनभाषिते धर्मे मद्य-विषय-क्रोध-मान-माया-लोभ-निद्रा-विकथानामानोऽष्टप्रमादाः स्युर्धर्मविषयेऽमी प्रमादा भविना भवेयुः । च पुनर्ये मम दर्शने सम्यक्त्वे दर्शनाचारे शङ्का-आकाङ्क्षा-विचिकित्सा-मूढदृष्टता-अनुपमवृंहणा-अस्थिरीकरण-असाधर्मिकवात्सल्य-अप्रभावना इत्यभिधाना अष्टौ अष्टप्रमाणा अतीचाराः संपन्नाः । के इव । यथा जने जाति-कुल-बल-ज्ञान-ऐश्वर्य-रूप-तपो-लब्धिरूपा अष्टौ मदा भवन्ति । पुनर्ये चरित्रे चारित्राचारे अनिर्यासमिति-अभाषासमिति-अनेषणासमिति-अनादाननिक्षेपासमिति-अपारिष्ठापनिकासमिति-अमानागुप्ति-अवचनगुप्ति-अकायगुप्तिः इति सञ्ज्ञा मातृगता अष्ट प्रवचनमातृसंवन्धिनोऽतीचारा जाताः । कानीव । कर्माणीव । यथा जन्तौ प्राणिनिविषये ज्ञानावरणीय-दर्शनावरणीय-मोहनीय-वेदनीय-अन्तराय-नाम-गोत्र-आयुः इत्यष्टौ कर्माणि जायन्ते । सांसारिके जीवे इति शेषः । ते निखिलाः सर्वेऽपि चतुर्विंशतिरतीचाराः इदानीमस्मिन्नायुरन्तसमये मम ते ममातीचारा मिथ्या मृषा आसता भवन्तु । किंवत् । व्याहारवत् । यथा वहुगर्ह्यवाचो वाचालस्य । 'स्याज्जल्पाकस्तु वाचालो वाचाटो वहुगर्ह्यवाक्' इति हैम्याम् । व्याहारा वचांसि मिथ्या जायन्ते । 'व्याहारो भाषितं वचः' इत्यपि हैम्याम् ॥ युग्मम् ॥

तपःसु ये द्वादशभेदभिन्नेष्वहर्मणीनामिव मण्डलेषु ।
वीर्येऽभवन्येऽत्र भवे ममातीचारप्रचाराश्च मृषासतां मे ॥ १३० ॥

द्वादशभिर्भेदैः प्रकारैः भिन्नेषु पृथक्पृथग्भूतेषु । अनशनम्, ऊनोदरिका, वृत्तिसंक्षेपः, रसत्यागः, कायक्लेशः, संलीनता, इति षड्विधं वाह्यतपः । तथा प्रायश्चित्तम्, विनयः, वैयावृत्त्यम्, स्वाध्यायः, ध्यानम्, कायोत्सर्गश्च इति षड्विधं बाह्यतपः । सभूय द्वादशप्रकारेषु तपःसु तपआचारेषु समये अतीचाराणां प्रचारा विस्तारा लगनानि वा अभवन्

[illegible] भजन्ते वा । के इव । तरङ्गिणीनां जीवि-तेश इव । यथा नदीनां मध्ये [illegible] भवन्ति । यदुक्तं हैम्याम्—'द्वीपा-[illegible]' इति हैमे नाम्नि । किंभूताः । उच्छलन्तः स्फुरन्तो [illegible] पञ्चविंशतिः [illegible] पंक्तिभ्यो येषु येषां वा । पुनः [illegible] भजन्तीति । पुनः कथंभूताः । गुणा एव [illegible] ॥

क्षमां दधानस्य च गौरिमाणं पदाब्जभृङ्गायितचक्रिणश्च ।
द्वे यस्य जाते यतिनां सहस्रे विलोचनानामिव भोगिभर्तुः ॥ ११० ॥

यस्य सूरेर्यतिनां साधूनाम् । 'प्रव्रजितेभिक्षुश्रमणयतीन' इति नैषधे । अतो यतिशब्द [illegible] । द्वे सहस्रे विंशतिशती जाते । कस्येव । भोगिभर्तुरिव । यथा नागराजस्य विलोचनानां चक्षुषां द्वे सहस्रे स्तः सहस्रफनत्वात् । किंभूतस्य यस्य भोगि-भर्तुश्च । क्षमां क्षान्तिं सर्वंसहतां धरित्रीं दधानस्य बिभ्राणस्य । च पुनर्गौरिमाणं सुवर्ण-वर्णतां श्वेतिमानं च । 'गौरः श्वेतपीतयोः' इत्यनेकार्थे । पुनः किंभूतस्य । पदाब्जयो-श्चरणारविन्दयोः भृङ्गायिता भ्रमरपदाचरिताश्चक्रिणः चक्रवर्तिनो महाराजा नागाश्च यस्य । 'दर्वीकरः चक्रिनिगूढपात्' इति हैम्यां गुरुनागेन्द्रयोर्विशेषणानि ॥

शीलं परिष्कारमिवोद्वहन्त्यः सर्वानुवादा इव चन्दनायाः ।
यस्यासवाङ्मानसराजहंस्यः साध्व्यो बभूवुस्त्रिशतीमिताश्च ॥ १११ ॥

यस्य सूरेस्त्रयाणां शतानां समाहारस्त्रिशती त्रीणि शतानि तया मिताः प्रमाणीकृताः साध्व्यो यतिन्यो बभूवुः सञ्जाताः । किंभूताः । आप्तानां तीर्थकृतां वाग्वाणी सिद्धान्तः । 'आप्तोक्तिः समयागमौ' इति हैमीवचनात् । सैव मानसं राजहंसनिवाससरस्तत्र खेलने राजहंस्यः । सिद्धान्ताभ्यासध्यानपरा इत्यर्थः । किं कुर्वत्यः । उद्वहन्त्यः उत्साहबलेन वहन्त्यो धारयन्त्यः । किम् । शीलं त्रिधापि ब्रह्मचर्यम् । कमिव । परिष्कारमिव आभ-रणमिव । 'परिष्काराभरणे च' इति हैम्याम् । उत्प्रेक्ष्यते—चन्दनायाः चन्दनबालायाः सर्वानुवादा इव सर्वशीलागमादिकमनुवदन्ति अनुकुर्वन्तीति । चन्दनातुल्या इत्यर्थः ॥

व्रजे यतीनां विजयाद्यसेनप्रभोर्ददौ सूरिपदं य एकम् ।
नक्षत्रताराग्रहमण्डलेऽपि वेधा यथा राजपदं सुधांशोः ॥ ११२ ॥

यः सूरिर्यतीनां व्रजे श्रमणानां गणे सत्यपि विजय इति पदमाद्यं प्रथमं यस्य तादृशः सेन एतावता विजयसेननामा प्रभुर्मुनिः स्वामी तस्य नान्यस्य एकं सूरिपदमाचा-र्यपदं ददौ दत्तवान् । यथा इत्यर्थे । क इव । वेधा इव । यथा ब्रह्मा जैनमते नक्षत्राणाम-ष्टाविंशतिसंख्यानां ताराणां षट्षष्टिसहस्रकोटिकोट्यस्तथा पञ्चसप्ततिकोट्य एतावत्प्रमा-णानां तारकाणां तथा ग्रहाणामष्टाशीतिप्रमितानां कलिकालनाम्नि पञ्चमारके नराणाम-

तत्त्वेषु कृपां दधानः । अजिनाज्ञापूर्वकदयामयो धर्म इत्यर्थः । क इव । सुधांशुरिव । चन्द्रो मध्ये निजमण्डलान्तराले सुधामम्रतं धत्ते । यो धर्मः अतिभीमे अतिभीतिकारिणि भववारिधौ संसारसमुद्रे मज्जनस्य त्रुटतो लोकस्य करावलम्बो हस्तावलम्बनमिवास्ति । हस्ते गृहीत्वा कर्षतीत्यर्थः । यथा कश्चिदगाधजलनिधिमज्जन्तं कंचिज्जन्तुं हस्ताभ्यां गाढमादाय बहिः कर्षति तद्वदास्ते ॥ इत्यर्हत्सिद्धसाधुधर्माणां चतुर्णां शरणम् ॥

ज्ञाने ममाष्टौ समयादिकातीचाराः प्रमादा इव शुद्धधर्मे ।
शङ्कादिका अष्ट च दर्शनेऽतीचारा मदा देहभृतीव जाताः ॥ १२८ ॥
कर्माणि जन्ताविव ये ममातीचाराः पुनर्मातृगताश्चरित्रे ।
मिथ्यासतां ते बहुगर्ह्यवाचो व्याहारवन्मे निखिला इदानीम् ॥ १२९ ॥

ये ममाष्टौ अष्टसंख्याकाः ज्ञाने ज्ञानाचारे अतीचाराः संजाताः । किंभूताः । समयः कालः आदौ येषां कालविनयबहुमानोपधानहीननिह्नवव्यञ्जनार्थतदुभयहीना एतेऽष्ट ज्ञानातीचाराः । के इव । प्रमादा इव । यथा शुद्धे जिनभाषिते धर्मे मद्य–विषय–क्रोध–मान–माया–लोभ–निद्रा–विकथानामानोऽष्टप्रमादाः स्युर्धर्मविषयेऽमी प्रमादा भविना भवेयुः । च पुनर्ये मम दर्शने सम्यक्त्वे दर्शनाचारे शङ्का–आकाङ्क्षा–विचिकित्सा–मूढदृष्टता–अनुपबृंहणा–अस्थिरीकरण–असाधर्मिकवात्सल्य–अप्रभावना इत्यभिधाना अष्टौ अष्टप्रमाणा अतीचाराः संपन्नाः । के इव । यथा जने जाति–कुल–बल–ज्ञान–ऐश्वर्य–रूप–तपो–लब्धिरूपा अष्टौ मदा भवन्ति । पुनर्ये चरित्रे चारित्राचारे अनिर्यासमिति–अभाषासमिति–अनेषणासमिति–अनादाननिक्षेपासमिति–अपारिष्ठापनिकासमिति–अमानागुप्ति–अवचनगुप्ति–अकायगुप्तिः इति संज्ञा मातृगता अष्ट प्रवचनमातृसंबन्धिनोऽतीचारा जाताः । कानीव । कर्माणीव । यथा जन्तौ प्राणिनिविषये ज्ञानावरणीय–दर्शनावरणीय–मोहनीय–वेदनीय–अन्तराय–नाम–गोत्र–आयुः इत्यष्टौ कर्माणि जायन्ते । सांसारिके जीवे इति शेषः । ते निखिलाः सर्वेऽपि चतुर्विंशतिरतीचाराः इदानीमस्मिन्नायुरन्तसमये मम ते ममातीचारा मिथ्या मृषा आसता भवन्तु । किंवत् । व्याहारवत् । यथा बहुगर्ह्यवाचो वाचालस्य । 'स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक्' इति हैम्याम् । व्याहारा वचांसि मिथ्या जायन्ते । 'व्याहारो भाषित वचः' इत्यपि हैम्याम् ॥ युग्मम् ॥

तपःसु ये द्वादशभेदभिन्नेष्वहर्मणीनामिव मण्डलेषु ।
वीर्येऽभवन्येऽत्र भवे ममातीचारप्रचाराश्च मृषासतां मे ॥ १३० ॥

द्वादशभिर्भेदैः प्रकारैः भिन्नेषु पृथक्पृथग्भूतेषु । अनशनम्, ऊनोदरिका, वृत्तिसंक्षेपः, रसत्यागः, कायक्लेशः, संलीनता, इति षड्विध बाह्यतपः । तथा प्रायश्चित्तम्, विनयः, वैयावृत्त्यम्, स्वाध्यायः, ध्यानम्, कायोत्सर्गश्च इति षड्विध बाह्यतपः । सभूय द्वादशप्रकारेषु तपःसु तपआचारेषु समये अतीचाराणां प्रचाराः विस्ताराः लग्नानि वा अभवन्

[illegible] संकुचि[illegible] । केनेव । अम्भोरुहिणीवल्लभेनेव । [illegible] [illegible] [illegible] आगमनेनोपगमनेन उद्गताः [illegible] [illegible] [illegible]दोदयातकरा अपि [illegible] [illegible] । [illegible] [illegible]दर्शनादित्युत्प्रेक्षोपमा वा ॥

मार्गे धरित्र्या [illegible]ऽस्य पादन्यासे दुकूलान्यपि[illegible]न्त भव्यैः ।
तीर्थाधिराजस्य चतुर्निकायैरिव स्वर्णसरोरुहाणि ॥ ११७ ॥

[illegible] [illegible] [illegible] [illegible] [illegible] पादचारेण चरतः यस्य सूरेः पाद-न्यासे [illegible] [illegible] प्रायो बाहुल्येन भव्यैः श्राद्धवर्गैः दुकूलानि क्षौमाणि वि-[illegible] [illegible] [illegible] पादाधः [illegible]न्ते स्म । कस्येव । तीर्थाधिराजस्येव । यथा धरित्र्यां [illegible] [illegible] विहारं कुर्वतः श्रीभगवतश्चतुर्निकायसुरैः भवन-प[illegible]-[illegible]-ज्योतिष्क-[illegible]-देवैः स्वर्णसरोरुहाणि कनककमलानि पादन्यासे चरणारविन्दयो[illegible] [illegible] ॥

स्तम्भादितीर्थे जलदागमेऽस्मिन्स्थिते कदाचिद्गुरुविक्रमजेन ।
कोटिर्व्ययेऽसृज्यत टङ्ककानां श्रीविक्रमाम्भोरुहबन्धुनेव ॥ ११८ ॥ ✓

यदापि [illegible] जलदागमे वर्षाकाले स्तम्भ इति पदमादौ यस्य तादृशे तीर्थे स्तम्भतीर्थे 'खंभाति' इति लोकप्रसिद्धनाम्नि अस्मिन् मुनीन्द्रे चतुर्मासीमाश्रिते सति [illegible] अर्थात् स्तम्भतीर्थनिवासिलोकनिकरेण टङ्ककानां गुर्जरजनपदप्रसिद्धानां नाणकविशेषाणां कोटिरेका कोटिर्व्यये दानेऽसृज्यत व्ययीक्रियते स्म । केनेव । श्रीविक्र-माम्भोरुहबन्धुनेव । यथा श्रीमद्विक्रमादित्येन एकस्मिन् वारके दाने वा कोटिः कनकट-ङ्ककानाम् । [illegible] । दाने दीयमाना आसीत् । प्रतिश्लोक काव्य गाथा च प्रायो जनानां कोटिदातासीत्, न न्यूनमधिक बहु ॥

प्रेक्ष्य प्रियं शक्रवशा अहिल्यासक्तं क्षितावक्षमया किमेताः ।
मृगीदृशो न्युञ्छनकानि यस्य प्रायो व्यधू रूपकनाणकेन ॥ ११९ ॥

मृगीदृशो निखिलमेदिनीमण्डलसम्यक्मृगलोचनाः प्रायो बाहुल्येन यस्य प्रभोर्न्युञ्छ-नकानि निर्मितसतानि रूपकनाणकेन । जातिमाश्रित्यैकवचनम् । रजतसम्बन्धिमहमुदी-स्यारिका-आसेरी-मुद्रफारिया-रूपकादिकेन उपलक्षणादभिरामिकासुवर्णकायेनापि व्यधुः कुर्वन्ति स्म । मृगीदृश उत्प्रेक्ष्यन्ते—प्रियं भर्तारं शक्रमहिल्यायां गौतमर्षिपत्न्यां तपस्विन्यामासक्तं भोगलम्पटीभूतं प्रेक्ष्य दृग्गोचरीकृत्य अक्षमया असमात्सर्वोत्तमरूपला-वण्यसौभाग्यवपुर्विभवशीलशालिनीर्विहाय वल्कलमुञ्जदोरिकाजटादिरूपविकरालां ताप-सीमयं सेवते इति भर्तरि विषये रुषा ईर्ष्यया क्षितौ क्षोण्यां किमेताः शक्रवशा इन्द्राण्य इवायाताः ॥ इति माहात्म्यम् ॥

काश्च प्रसिद्धाः ते आद्याः पूर्वे येषां तादृशास्त्रीन्द्रिया जन्तवो देहिनो मया कथंचित्केन प्रकारेण जानता अजानता वा प्रमादिना सता व्यापादिताः ॥

चत्वारि येषां पुनरिन्द्रियाणि नाभीभवस्येव मुखानि सन्ति।

ते मक्षिकाभृङ्गपतङ्गकर्णकीटोर्णनाभप्रमुखा हताश्च ॥ १३४ ॥

पुनर्येषामसुमतां चत्वारि स्पर्शनरसनघ्राणनयनलक्षणानि शरीरजिह्वानासिकालोचनरूपाणि चतुःसंख्याकानि इन्द्रियाणि अक्षाणि सन्ति। कानीव। मुखानीव। यथा नाभीभवस्य ब्रह्मणः। 'नाभीमथैष श्लथवाससोऽस्याः' इति नैषधे दीर्घोऽपि नाभिशब्दः। प्राची-अपाची-प्रतीची-उदीचीलक्षणचतुर्दिक्संमुखानि वर्तन्ते। शक्रेण षष्टिसहस्रवर्षकृततपःप्रभावात्स्वपदाभिकवेधसस्तपोभ्रंश विधातुं प्रहिताप्सरोभिश्चतुर्दिक्प्रारब्धाखण्डताण्डवाडम्बरविलोकनकौतुकोत्कण्ठितचेताश्चतुर्दिक्षु चत्वारि वदनानि विदधाति स्मेति शीलतरङ्गिण्याम्। ते मक्षिका मधुवननीलसामान्याः प्रसिद्धाः। यदुक्तम्—'सरघा मधुमक्षिका। वर्वणा मक्षिका नीली पुत्तिका च पतङ्गिका॥ वनमक्षिका तु दंशो दंशी तत्रातिरल्पिका। तैलाटी वरटी गन्धोली' इति हैम्याम्। भृङ्गा भ्रमराः, पतङ्गाः शलभाः 'टील' इति लोके प्रसिद्धाः, कर्णकीटाः शतपद्यः खर्जूरकाः, ऊर्णनाभाः जालकारकाः 'कालियावडा' इति प्रसिद्धाः, ते प्रमुखा आदिमा येषु तादृशाश्चतुरिन्द्रियाः पुनर्मया हता व्यापादिताः॥

महाव्रतानीव मुनीश्वराणां पञ्चेन्द्रियाणीह भवन्ति येषाम्।

पापर्धिकेनेव महीचरास्ते संप्रापिताः प्रेतपतेर्निकेतम् ॥ १३५ ॥

इह जगति संसारे वा येषां जन्तूनां पञ्च स्पर्शनरसनघ्राणचक्षुःश्रवणलक्षणानि शरीरजिह्वानासिकानयनकर्णरूपाणि पञ्चसंख्याकानीन्द्रियाणि भवन्ति। कानीव। महाव्रतानीव। यथा मुनीश्वराणां साधुसिन्धुराणा महान्ति कातैररल्पसत्त्वैः सत्त्वैः मेरुवदुद्वर्तुमशक्यानि सर्वप्राणातिपातविरमण-सर्वमृषावादविरमण-सर्वादत्तादानविरमण-सर्वमैथुनविरमण-सर्वपरिग्रहविरमणलक्षणानि व्रतानि नियमविशेषाः पञ्च भवन्ति। ते च पञ्चेन्द्रियास्त्रिविधाः सन्ति। एके स्थलचराः, एके जलचराः, तृतीयाः खेचराः। तानेव प्रतिपादयति—महीचरा गोमहिषाजमृगशशशम्बरादिकाः स्थलचराः पञ्चेन्द्रिया जीवा मया भवान्तरे प्रेतपतेर्यमस्य निकेतं मन्दिरं संप्रापिता गमिताः। केनेव। पापर्धिकेनेव। यथा आखेटिकेन लुब्धकेन मृगाद्याः पञ्चेन्द्रियाः सत्त्वाः कृतान्तनिकेतनं नीयन्ते॥

जीवान्तिकेनेव वियद्विहारा आलेख्यशेषत्वमवापितास्ते।

कैवर्तकेनेव पयश्चरास्ते कथासु शेषत्वमवापिताश्च ॥ १३६ ॥

जीवान्तिकः शाकुनिको विहगमघातुकः तेनेव वियति आकाशे विहारो विहरणं गतिर्येषां ते खचराः। कलविङ्ककुक्कुटशुकसारिकाकाककपिञ्जलचाषखञ्जनशिखण्डिकपो-

तप सु। अत्रेदमुक्तं—द्वादशभेदभिन्नेषु द्वादशसंख्येषु अहर्मणीनां सूर्याणां मण्डलेषु बिम्बेष्विव। यथा भास्कराणां तेजो दुःसहं तथैव तपसामपि। तथा च यथा कर्मणा प्रभावसाया तपसामपीति। च पुनरत्र भवे अस्मिन् जन्मनि उपलक्षणादन्यस्मिन्नपि भवे ये मम वीर्ये वीर्याचारविषये अतीचारा अभवन् ते अतीचारा मे मम मृषा मिथ्या आसतां भवन्तु। सर्वेषामप्यतीचाराणां मम मिथ्यादुःकृतमस्त्वित्यर्थः॥ इति पञ्चज्ञानाचारादिपञ्चाचारातीचारालोचनम्॥

एकेन्द्रिया भूजलवह्निवायुवनान्यहन्यन्त मयाङ्गिनो ये।
विभ्राम्यता भूरिभवेषु कर्मवशेन देशेष्विव दैशिकेन॥ १३१॥

ये भुवः पृथिवीकायिका, जलान्यप्कायिका वह्नयस्तेजस्कायिका वायवो वायुकायिका वनानि वनस्पतिकायिका एकं स्पर्शनं शरीरं तल्लक्षणमिन्द्रियम् हृषीकं येषां ते एकेन्द्रिया अङ्गिनः पूर्वोक्ताः पञ्च स्थावराः प्राणिनः मया अहन्यन्त हताः। अत्र भवे अन्यत्र भवे वा इति शेषः। मया किं कुर्वता। कर्मणां ज्ञानावरणीयादीनामष्टसंख्याकानां वशेनायत्तत्वेन भूरिष्वनन्तेषु भवेष्ववतारेषु विभ्राम्यता विशेषेण एकद्वित्रिचतुःपञ्चेन्द्रियसंज्ञ्यसंज्ञित्वेन चतुरशीतिलक्षजीवयोनिषु भ्रमणीं कुर्वता। केनेव। दैशिकेनेव। यथा पान्थेन कर्मणा स्वपरकार्याणां वशेनाधीनतया देशेषु विविधजनपदेषु पर्यटनं प्रणीयते॥

संध्ये दिनानामिव जन्मिना द्वे येषां हृषीके भवतो हतास्ते।
मया जलौकःकृमिशुक्तिशङ्खमुखाः प्रमादैकवशंवदेन॥ १३२॥

येषां जन्मिना जन्तूनां द्वे द्विसंख्ये हृषीके स्पर्शनरसनलक्षणे शरीरजिह्वारूपे इन्द्रिये भवतः। केषामिव। दिनानामिव। यथा दिवसानां द्वे संध्ये दिनाननदिवसावसानलक्षणे पितृस्वौ स्याताम्। 'संध्या तु पितृसूः' इति हैम्याम्। ते जलौकसो जलसर्पिण्यः कृमयः कीटका गण्डोलका वा शुक्तयो मुक्तास्फोटाः। 'मुक्तास्फोटोऽब्धिमण्डूकी। शुक्तिः' इति हैम्याम्। मुक्ताफलोत्पत्तिभुवोऽन्या वा। शङ्खाः कम्बवः ते मुखा मुखे वा आदौ येषां तादृशा द्वीन्द्रिया जीवा मया हता विरोधिताः। किंभूतेन मया। प्रमादोऽनवधानता तस्य एकमद्वितीयतया वशंवदेनाधीनेन। प्रमादिना इत्यर्थः॥

विशां वयांसीव भवन्ति येषां त्रीणीन्द्रियाणीह शरीरभाजाम्।
गोपालिकामत्कुणकीटिकाद्या व्यापादितास्ते तु मया कथंचित् १३३

येषां शरीरभाजां जीवानामिह संसारे जगति वा तिर्यग्गतौ वा त्रीणि स्पर्शनं शरीरं रसनं जिह्वा घ्राणं नासिकालक्षणानि त्रिसंख्याकानि इन्द्रियाणि करणानि भवन्ति। कानीव। वयांसीव। यथा विशां मनुष्याणां त्रीणि बाल्ययौवनवार्धक्यलक्षणानि वयांस्यवस्थाविशेषाः स्युः। ते गोपालिका धनेढिकानि धान्यकीटका मत्कुणकाः कीटि-

मरुन्मृगाक्ष्या देवाङ्गनया समं दिव्यं देवतासंबन्धि यन्मया मैथुनमाचर्यंत मोक्षकृतः। केनेव। मरुतेव। यथा चतुर्निकायादिदेवेन देव्या सार्धं निधुवनं विधीयते। पुनर्नार्या मनुष्ययोषिता साकं मानवीयं मानवसंबन्धि मैथुनं कामकेलिराचर्यंत आचीर्णा। केनेव। नरेणेव। यथा नरेण नार्या समं कन्दर्पक्रीडा क्रियते। पुनस्तिरश्चा तिर्यग्जातीयया स्त्रिया सत्रा तैरश्च्य तिर्यक्संबन्धि मैथुनं ग्राम्यधर्मं आचर्यंत विहितम्। केनेव। तिरश्चेव। यथा तिर्यग्जातीयेन पुरुषेण तिरश्चा समं मैथुनं पशुक्रिया क्रियते। सर्वत्र इह भवेऽन्ये भवेऽपीति योज्यम्॥ इति चतुर्थव्रते मैथुनालोचनम्॥

सखीमिव स्वःशिवपद्मधाम्नोर्निरीहतां मुग्धतया विहाय।
दूतीमिवादृत्य च दुर्गतीनामृद्धिं मयादायि परिग्रहो यत्॥ १४१॥

यन्मया परिग्रहो धनधान्यद्विपदचतुष्पदादिक आदायि स्वीकृतः। किं कृत्वा। स्वःशिवपद्मधाम्नोः स्वर्गापवर्गलक्ष्म्योः सखीं वयसीमिव निरीहतां निःस्पृहभावं विहाय विमुच्य। कया। मुग्धतया मौग्ध्येनाज्ञानेन। च पुनर्दुर्गतीनां दुष्टानां महाधिव्याधिविधात्रीणां नारकतिर्यक्कुदेवकुमनुजलक्षणानां गतीनां दूतीमाकारणसंदेशहारिकामिव ऋद्धिं प्राप्ताप्राप्तेषु वस्तुषु सर्वेष्वैहलौकिकपदार्थेष्वासक्तिमादृत्याङ्गीकृत्य। तस्यामादरपरिभूयेत्यर्थः॥ इति पञ्चमव्रते परिग्रहालोचनम्॥

मरुद्रुमान्मेरुरिवेन्द्रियाणि प्राणीव बाणानिव पञ्चबाणः।
मुखान्यथा पञ्चमुखश्च सम्यङ्नाधारयं पञ्चमहाव्रतान्यत्॥ १४२॥

यदहं पञ्चमहाव्रतान् मेरूपमान्नियमविशेषान्। व्रतशब्दः पुंनपुंसके। सम्यक् त्रिकरणशुद्ध्या नाधारयं न धृतवान्। क इव। मेरुरिव। यथा काञ्चनाचलः कल्पपारिजातमन्दारहरिचन्दनसंतानाभिधानान्पञ्चसंख्याकान्मरुद्रुमान् कल्पवृक्षान् धारयति। पुनः क इव। प्राणीव। यथा जन्तुः शरीररसनानासिकानयनश्रवणलक्षणानि पञ्चेन्द्रियाणि धत्ते। पुनः क इव। पञ्चबाण इव। यथा मदनः संमोहन–उन्माद–तापन–शोषण–मारण–इति नाम्नः। तथा क्वचित् 'दिट्ठीहिं दिट्ठिपसरो दिट्ठिपसारणभाव अणुराओ। अणुराएण पिनेहो बाणा मयणस्स पञ्चेए॥' एतेऽपि पञ्च बाणाः प्रोच्यन्ते। पञ्चप्रमाणान्बाणान् सायकान्दधाति। पुनः क इव। पञ्चमुख इव। अत्र यथा इवार्थे। यथा नीलकण्ठः कण्ठीरवो वा पञ्चमुखान् धरति। मुखशब्दोऽपि पुनपुंसके। एवं यथा मेरुमनुष्यमदनपारीन्द्रपिनाकिनः कल्पद्रुमेन्द्रियमार्गणमुखानि धारयन्ति तथा अहं पञ्च महाव्रतान्नाधारयमित्यर्थः॥ इति पञ्चव्रताधारणलोचनम्॥

निशाचरेणेव निशाशनं यन्मया कथंचित्प्रविधीयते स्म।
कौसीद्यमाधन्मनसेव किंचिच्छैथिल्यमालम्ब्यत यत्क्रियासु॥ १४३॥

मया कथंचित्केनचिन्मिथ्याज्ञानमूढतादिप्रकारेण निशाचरेणेव राक्षसेनेव निशाशनं रात्रिभोजनं प्रविधीयते स्म। पुनर्यत्क्रियासु चारित्रानुष्ठानकरणेषु शैथिल्यं शिथि-

तपःसु । उत्प्रेक्ष्यते—द्वादशभेदभिन्नेषु द्वादशसंख्येषु अहर्मणीनां सूर्याणां मण्डलेषु बिम्बेष्विव । यथा भास्कराणां तेजो दुःसहं तथैव तपसामपि । तथा च यथा कर्मणां प्रभावस्तथा तपसामपीति । च पुनरत्र भवे अस्मिन् जन्मनि उपलक्षणादन्यस्मिन्नपि भवे ये मम वीर्ये वीर्याचारविषये अतीचारा अभवन् ते अतीचारा मे मम मृषा मिथ्या आसतां भवन्तु । सर्वेषामप्यतीचाराणां मम मिथ्यादुःकृतमस्त्वित्यर्थः ॥ इति पञ्चज्ञानाचारादिपञ्चाचारातीचारालोचनम् ॥

एकेन्द्रिया भूजलवह्निवायुवनान्यहन्यन्त मयाङ्गिनो ये ।
विभ्राम्यता भूरिभवेषु कर्मवशेन देशेष्विव दैशिकेन ॥ १३१ ॥

ये भुवः पृथिवीकायिका, जलान्यप्कायिका वह्नयस्तेजस्कायिका वायवो वायुकायिका वनानि वनस्पतिकायिका एकं स्पर्शनं शरीरं तल्लक्षणमिन्द्रियम् हृषीकं येषां ते एकेन्द्रिया अङ्गिनः पूर्वोक्ताः पञ्च स्थावराः प्राणिनः मया अहन्यन्त हताः । अत्र भवे अन्यत्र भवे वा इति शेषः । मया किं कुर्वता । कर्मणां ज्ञानावरणीयादीनामष्टसंख्याकानां वशेनायत्तत्वेन भूरिष्वनन्तेषु भवेष्ववतारेषु विभ्राम्यता विशेषेण एकद्वित्रिचतुःपञ्चेन्द्रियसंश्यसंज्ञित्वेन चतुरशीतिलक्षजीवयोनिषु भ्रमणीं कुर्वता । केनेव । दैशिकेनेव । यथा पान्थेन कर्मणा स्वपरकार्याणां वशेनाधीनतया देशेषु विविधजनपदेषु पर्यटनं प्रणीयते ॥

संध्ये दिनानामिव जन्मिनां द्वे येषां हृषीके भवतो हतास्ते ।
मया जलौकःकृमिशुक्तिशङ्खमुखाः प्रमादैकवशंवदेन ॥ १३२ ॥

येषां जन्मिनां जन्तूनां द्वे द्विसंख्ये हृषीके स्पर्शनरसनलक्षणे शरीरजिह्वारूपे इन्द्रिये भवतः । केषामिव । दिनानामिव । यथा दिवसानां द्वे संध्ये दिनाननदिवसावसानलक्षणे पितृसू स्याताम् । 'संध्या तु पितृसूः' इति हैम्याम् । ते जलौकसो जलसर्पिण्यः कृमयः कीटका गण्डोलका वा शुक्तयो मुक्तास्फोटाः । 'मुक्तास्फोटोऽब्धिमण्डूकी । शुक्तिः' इति हैम्याम् । मुक्ताफलोत्पत्तिभुवोऽन्या वा । शङ्खाः कम्बवः ते मुखा मुखे वा आदौ येषां तादृशा द्वीन्द्रिया जीवा मया हता विरोधिताः । किंभूतेन मया । प्रमादोऽनवधानता तस्य एकमद्वितीयतया वशंवदेनाधीनेन । प्रमादिना इत्यर्थः ॥

त्रिशा वयांसीव भवन्ति येषां त्रीणीन्द्रियाणीह शरीरभाजाम् ।
गोपालिकामत्कुणकीटिकाद्या व्यापादितास्ते तु मया कथंचित् १३३

येषां शरीरभाजां जीवानामिह संसारे जगति वा तिर्यग्गतौ वा त्रीणि स्पर्शनं शरीरं रसनं जिह्वा घ्राणं नासिकालक्षणानि त्रिसंख्याकानि इन्द्रियाणि करणानि भवन्ति । कानीव । वयांसीव । यथा दिवा मनुष्याणां त्रीणि बाल्ययौवनवार्धकलक्षणानि वयांस्यवस्थाविशेषाः स्युः । ते गोपालिका घृतेलिकाः मत्कुणाः कीटि-

इह भवे मया योगेषु यम–नियम–आसन–प्राणायाम–प्रत्याहार–धारणा–ध्यान–समाधिनामाष्टाङ्गवत्सु योगेषु । अथ वा मनोयोग–वचोयोग–काययोगलक्षणेषु विविधेषु । अथ वा सत्यमनोयोग–असत्यमनोयोग–मिश्रमनोयोग–सत्यासत्यमनोयोग–सत्यवचनयोग–असत्यवचनकाययोग–मिश्रवचनयोग–सत्यासत्यवचनयोग–औदारिककाययोग–औदारिकमिश्रकाययोग–विक्रियककाययोग–वैक्रियमिश्रकाययोग–आहारकाययोग–आहारमिश्रकाययोग–कार्मणयोग इत्यपि मनोवाक्कायैः कृत्वा पञ्चदशधापि योगा योजनानि । युज्यन्ते धावनवल्गनक्रियासु व्यापार्यतेऽसाविति वा युज्यन्ते संबध्यन्ते वल्गनक्रियया जीव एभिरिति वा व्युत्पत्तिमात्र योगो वीर्यं शक्तिः । उत्साह इति यावत् । योगेषु मोक्षप्राप्तिकरणीभूतेषु ध्यानविशेषेषु च मया वीर्यं पुरुषकारो न प्रयुक्तः सम्यगुद्यमो न विहितः । केनेव । योगिनेव । यथा योगभाजा आसन्नोत्पत्स्यमानकेवलज्ञानेन क्षपकश्रेणिमारूढेन योगेषु यत्नः क्रियते । किंभूतेषु योगेषु । त्रिदिवं स्वर्लोकस्तद्युक्तोऽपवर्गो मोक्षः स एव दुर्गः दुःखेन गम्यते प्राप्यते गृह्यते वा पर्वतादिविषमस्थानस्थकोट्टस्तस्य संसाधकेषु आत्मायत्तीकारकेषु मया कथंचित् गुर्वादिप्रेरणया पञ्चेन्द्रियपाटवशरीरसामर्थ्यसहायकरणसामग्र्यापि प्रमादेन अनवधानतया आलस्येन वा मन्दीकृत क्रियानुष्ठानकरणेषु कुण्ठीकृतं मानस मनो येन यस्य वा ॥

एतद्यदन्यच्च मयार्जि पापमस्मिन्भवेऽन्येषु पुनर्भवेषु ।
अधर्मिणानर्थ इव त्रिधापि निन्दामि सम्यक्तदहं समग्रम् ॥ १४७ ॥

अस्मिन् वर्तमाने भवे जन्मनि पुनरन्येष्वतिक्रान्तेष्वनन्तेषु भवेष्ववतारेषु मया भ्रान्तावस्थास्थायुकेन एतत्पूर्वोक्तमन्यदितरद्विस्मृतमविस्मृत वा यत्पाप दुष्कृतमार्जि उपार्जितं स्यात् । केनेव । अधर्मिणेव । यथा अधर्मकारिणा पापिना पुंसा अनर्थः परघातपरदारगमनपरद्रव्यापहारादिरुत्पातः क्रियते तत्समग्रं सर्वमपि पाप दुष्कृत त्रिधापि मनोवाक्कायैरपि त्रिकरणशुद्ध्या इदानीं निन्दामि आत्मसाक्षिक गर्हामि देवगुरुसाक्षिक व्युत्सृजामि ॥ 'एकेन्द्रियाः–' (१७।१३१) इत्यत आरभ्य 'एतद्यत्–' (१७।१४७) इति पर्यन्तं निन्दनादिना सप्तदशभिः कुलकम् ॥

अष्टादशात्रह्यवदंहसां तु स्थानानि यान्याचरितानि पूर्वम् ।
तान्यप्यशेषाणि मृषा भवन्तु क्षणाद्यथा द्यूतकृतां वचांसि ॥ १४८ ॥

तु पुनरष्टादशसंख्याकानि अंहसां पापानां स्थानानि प्राणातिपात–मृषावाद–अदत्तादान–मैथुन–परिग्रह–क्रोध–मान–माया–लोभ–राग–द्वेष–कलह–अभ्याख्यान–पैशुन्य–रत्यरति–परपरीवाद–मायामृषा–मिथ्यात्वशल्य इत्यष्टादश पापस्थानानि । पूर्वमस्मात्प्रस्तावान्मयाचरितानि यानि स्वयंकृतानि परैर्वा कारितानि अष्टादशसंख्याकानि । किंवत् । अत्रह्यवत् । यथा मनसौदारिकाब्रह्म न करोमि, वचसौदारिकाब्रह्म न करोमि, कायेनौदारिकाब्रह्म न करोमि, मनसौदारिकाब्रह्म न कारयामि, वचसौदारिकाब्रह्म न कार-

[illegible] न तु प्राणेनतामवापिता मा-[illegible] [illegible] पञ्चिद्रिया मत्स्य-[illegible] [illegible] दोषगतदिशताम-[illegible] । [illegible] जन्मान्तरापादनम् । अस्मिन् [illegible] ॥

[illegible]तपोऽति कृपापयोधौ ।

[illegible]मुनीन्दु[illegible] स्वात्मेव नामानि गणोऽङ्गभाजाम् ॥१३७॥

[illegible] स्वात्मेव निजजीव इव नामानि न गणितः । [illegible] । तदेव पक्षि—केनेव । मुनीन्दु-[illegible] । यथा [illegible] अन्यतनूनिकर निजजीवसदृशो [illegible] । [illegible] सर्वतीर्थकृता निदेश आज्ञा स एवोदित उदय [illegible] चन्द्रः अखण्डमण्डलेन्दुस्तस्य [illegible] उद्वेल उत्कण्ठितो यः कृपारूपः पयो-[illegible] । [illegible] ॥ इति प्रथमव्रते प्राणातजी-[illegible]लोचनम् ॥

अमर्षणेनेव रुषा हसेन वैहासिकेनेव च भीरुणेव ।

भयेन लोभेन च गृध्नुनेव मया यदप्यल्पमजल्प्यलीकम् ॥ १३८ ॥

यन्मया इह भवे परभवे वा यदल्प स्तोकमप्यलीक मिथ्यावाक्यमजल्पि भाषितम् । कया । रुषा रोषेण । केनेव । अमर्षणेनेव कोपनेनेव । यथा क्रोधातुरेण क्रोधेनालीक जल्प्यते । पुनः केन । हसेन हास्येन । केनेव । वैहासिकेनेव । यथा स्वभावातिभीरुकेण मृषा भाष्यते । न पुन. केन । लोभेन तृष्णया । केनेव । गृध्नुनेव । यथा लोलुभेन लोभाभिभूतेनासत्य निगद्यते ॥ इति द्वितीयव्रते मृषावादालोचनम् ॥

अदत्तं परेषा परिमोषिणेव मया कथंचिद्यददत्तमात्तम् ।

प्रयोजने सत्यपि यत्तृणाद्य क्वचिद्विनादेशमुपाददे च ॥ १३९ ॥

यन्मया कथंचित्केनापि प्रकारेण अदत्त केनापि स्वामिना अवितीर्णित परेषामन्ये-षामृक्थ द्रविण धनमात्त गृहीतम् । केनेव । परिमोषिणेव । यथा तस्करेणादत्त परद्रव्यमा-दीयते । च पुन. प्रयोजने कार्ये सत्यपि विद्यमानेऽपि कृत्ये आदेश स्वाम्यस्वामिनोर्वा अनुज्ञा विना तृणाद्य तृणशलाकाप्रमुख क्वचित्कुत्रापि स्थाने उपाददे जगृहे स्वय स्वी-कृतम् ॥ इति तृतीयव्रते अदत्तादानालोचनम् ॥

मरुन्मृगाक्ष्या मरुतेव दिव्य नार्या नरेणेव च मानवीयम् ।

मया तिरश्चेव पुनस्तिरश्च्या तैरश्चमाचर्यत मैथुनं यत् ॥ १४० ॥

इह भवे मया योगेषु यम–नियम–आसन–प्राणायाम–प्रत्याहार–धारणा–ध्यान–समाधिनामाष्टाङ्गवस्तु योगेषु । अथ वा मनोयोग–वचोयोग–काययोगलक्षणेषु त्रिविधेषु । अथ वा सत्यमनोयोग–असत्यमनोयोग–मिश्रमनोयोग–सत्यामत्यमनोयोग–सत्यवचनयोग–असत्यवचनकाययोग–मिश्रवचनयोग–सत्यासत्यवचनयोग–औदारिककाययोग–औदारिकमिश्रकाययोग–विक्रियकाययोग–वैक्रियमिश्रकाययोग–आहारकाययोग–आहारमिश्रकाययोग–कार्मणयोग इत्यपि मनोवाक्कायैः कृत्वा पञ्चदशधापि योगा योजनानि । युज्यन्ते धावनवल्गनक्रियासु व्यापार्यतेऽसाविति वा युज्यन्ते संबध्यन्ते वलगनक्रियया जीव एभिरिति वा व्युत्पत्तिमात्र योगो वीर्यं शक्तिः । उत्साह इति यावत् । योगेषु मोक्षप्राप्तिकारणीभूतेषु ध्यानविशेषेषु च मया वीर्यं पुरुषकारो न प्रयुक्त' सम्यगुद्यमो न विहितः । केनेव । योगिनेव । यथा योगभाजा आसन्नोरपरस्यमानकेवलज्ञानेन क्षपकश्रेणिमारूढेन योगेषु यत्नः क्रियते । किंभूतेषु योगेषु । त्रिदिवं स्वर्लोकस्तद्युक्तोऽपवर्गो मोक्षः स एव दुर्ग. दुःखेन गम्यते प्राप्यते गृह्यते वा पर्वतादिविषमस्थानस्थकोट्टस्तस्य ससाधकेषु आत्मायत्तीकारकेषु मया कथंचित् गुर्वादिप्रेरणया पञ्चेन्द्रियपाटवशरीरसामर्थ्यसहायकरणसामग्र्यापि प्रमादेन अनवधानतया आलस्येन वा मन्दीकृत क्रियानुष्ठानकरणेषु कुण्ठीकृत मानस मनो येन यस्य वा ॥

एतद्यदन्यच्च मयार्जि पापमस्मिन्भवेऽन्येषु पुनर्भवेषु ।
अधर्मिणानर्थ इव त्रिधापि निन्दामि सम्यक्तदहं समग्रम् ॥ १४७ ॥

अस्मिन् वर्तमाने भवे जन्मनि पुनरन्येष्वतिक्रान्तेष्वनन्तेषु भवेष्ववतारेषु मया भ्रान्तावस्थास्थायुकेन एतत्पूर्वोक्तमन्यदितरद्विस्मृतमविस्मृत वा यत्पापं दुष्कृतमार्जि उपार्जितं स्यात् । केनेव । अधर्मिणेव । यथा अधर्मकारिणा पापिना पुसा अनर्थः परघातपरदारगमनपरद्रव्यापहारादिरुत्पातः क्रियते तत्समग्रं सर्वमपि पाप दुष्कृत त्रिधापि मनोवाक्कायैरपि त्रिकरणशुद्ध्या इदानीं निन्दामि आत्मसाक्षिक गर्हामि देवगुरुसाक्षिक व्युत्सृजामि ॥ 'एकेन्द्रियाः–' (१७।१३१) इत्यत आरभ्य 'एतद्यत्–' (१७।१४७) इति पर्यन्त निन्दनादिना सप्तदशभि· कुलकम् ॥

अष्टादशाब्रह्मवदंहसां तु स्थानानि यान्याचरितानि पूर्वम् ।
तान्यप्यशेषाणि मृषा भवन्तु क्षणाद्यथा धूर्तकृता वचांसि ॥ १४८ ॥

तु पुनरष्टादशसंख्याकानि अहसा पापाना स्थानानि प्राणातिपात–मृषावाद–अदत्तादान–मैथुन–परिग्रह–क्रोध–मान–माया–लोभ–राग–द्वेष–कलह–अभ्याख्यान–पैशुन्य–रत्यरति–परपरीवाद–मायामृषा–मिथ्यात्वशल्य इत्यष्टादश पापस्थानानि । पूर्वमस्मात्प्रस्तावान्मयाचरितानि यानि स्वयंकृतानि परैर्वा कारितानि अष्टादशसंख्याकानि । किंवत् । अब्रह्मवत् । यथा मनसौदारिकाब्रह्म न करोमि, वचसौदारिकाब्रह्म न करोमि, कायेनौदारिकाब्रह्म न करोमि, मनसौदारिकाब्रह्म न कारयामि, वचसौदारिकाब्रह्म न कार·

ताद्याः पञ्चेन्द्रिया जीवा आलेख्ये चित्रे शेषत्वमवशिष्टतां न तु प्राणेनतामवापिता मारिता । तथा कैवर्तकेनेव धीवरेणेव पयश्चरा जलचारिणो जीवास्ते पञ्चेन्द्रिया मत्स्यनक्रचक्रपाठीनपीठग्राहमकराद्या कथासु वार्तासु आख्यानसंबन्धेषु शेषत्वमवशिष्टतामवापिता लम्भिताः । निहता इत्यर्थः । हिंसायां सर्वत्र जन्मान्तरापादनम् । अस्मिन् जन्मनि तु सयतत्वात्तदभाव एवेति तात्पर्यम् ॥

अर्हन्निदेशादितसान्द्रचन्द्रचन्द्रातपोद्वेलकृपापयोधौ ।
मीनायमानेन मुनीन्दुनेव स्वात्मेव नामानि गणोऽङ्गभाजाम् ॥१३७॥

पुनर्मया अङ्गभाजां प्राणिनां गणः समूहः स्वात्मेव निजजीव इव नामानि न गणितः । इदमपि प्राग्जन्मापेक्षयैव नास्मिञ्जन्मनीति शेषः । तदेव वक्ति—केनेव । मुनीन्दुनेव । यथा वैराग्यरङ्गतरङ्गितात्मना साधुसुधाकरेण अन्यतनूमन्निकरः निजजीवसदृशो गण्यते । किंभूतेन । मुनीन्दुना अर्हतां सर्वतीर्थकृतां निदेश आज्ञा स एवोदित उदयप्राप्तः सान्द्रस्नेहलोऽमृतवर्षी आश्विनपूर्णिमासंबन्धी चन्द्रः अखण्डमण्डलेन्दुस्तस्य चन्द्रातपश्चन्द्रिका तेनोद्वेलो वेलामुल्लङ्घ्य यात उद्वेल उत्कण्ठितो यः कृपारूपः पयोधिस्तत्र मीनो मत्स्य इवाचरितस्तेन । दयार्द्रहृदयेनेत्यर्थः ॥ इति प्रथमव्रते प्राकृतजीवहिंसालोचनम् ॥

अमर्षणेनेव रुषा हसेन वैहासिकेनेव च भीरुणेव ।
भयेन लोभेन च गृध्नुनेव मया यदप्यल्पमजल्प्यलीकम् ॥ १३८ ॥

यन्मया इह भवे परभवे वा यदल्पं स्तोकमप्यलीकं मिथ्यावाक्यमजल्पि भाषितम् । कया । रुषा रोषेण । केनेव । अमर्षणेनेव क्रोधनेनेव । यथा क्रोधातुरेण क्रोधेनालीकं जल्प्यते । पुनः केन । हसेन हास्येन । केनेव । वैहासिकेनेव । यथा स्वभावातिभीरुकेण मृषा भाष्यते । च पुनः केन । लोभेन तृष्णया । केनेव । गृध्नुनेव । यथा लोलुभेन लोभाभिभूतेनासत्यं निगद्यते ॥ इति द्वितीयव्रते मृषावादालोचनम् ॥

ऋक्थं परेषां परिमोषिणेव मया कथंचिद्यददत्तमात्तम् ।
प्रयोजने सत्यपि यत्तृणाद्यं क्वचिद्विनादेशमुपाददे च ॥ १३९ ॥

यन्मया कथंचित्केनापि प्रकारेण अदत्तं केनापि स्वामिना अवितीर्णं परेषामन्येषामृक्थं द्रविणं धनमात्तं गृहीतम् । केनेव । परिमोषिणेव । यथा तस्करेणादत्तं परद्रव्यमादीयते । च पुनः प्रयोजने कार्ये सत्यपि विद्यमानेऽपि क्वचित् आदेशं स्वामिदत्तानुज्ञां अनुज्ञां विना तृणाय तृणशलाकाप्रमुखं क्वचित्कुत्रापि स्थाने उपाददे जगृहे स्वयं स्वीकृतम् ॥ इति तृतीयव्रते अदत्तादानालोचनम् ॥

मरुन्मृगाक्ष्या मरुतेव दिव्यं नार्या नरेणेव च मानवीयम् ।
मया तिरश्चेव पुनस्तिरश्च्या तैरश्चमासेवित मैथुनं यत् ॥ १४० ॥

वृन्दं द्रुमाणामिव पुष्पकालावसानादृतेऽन्यद्विफलं व्रतादि ।
शुभः स भावोऽस्तु ममापवर्गमार्गानुलग्नाङ्गभृतां सहायः ॥ १९१ ॥

यस्मात् शुभभावादृते विना अन्यदितरद्व्रतादि सर्वनियमचारित्राभिपालनप्रमुखं सकलमपि विफलं वन्ध्यमेव । किमिव । वृन्दमिव । यथा पुष्पकालाद्वसन्तसमयादृते वसन्तं द्रुमाणां पादपानां वृन्दं कदम्बकं निष्फलं भवेत् । स शुभो भावो ममास्तु निर्मलपरिणामो मम भवतु । किंभूतः । अपवर्गो मोक्षः अर्थान्नगरं तस्य मार्गः पन्थाः तत्रानुलग्नास्तमनुप्रस्थिता येऽङ्गभृतो भव्यजनास्तेषां सहायः ॥

भुक्तेन येनात्र कदाचिदात्मा न दारुणा वह्निमिवाप तृप्तिम् ।
शिवंगमीव स्वजनानुषङ्गं कृत्स्नं तमाहारमहं जहामि ॥ १९२ ॥

अहं तं त्रिजगत्प्रसिद्धं यच्छब्दसंबद्धं च कृत्स्नम् अनशनपानखादिमस्वादिमरूपं सर्वजातीयं चतुर्विधाहारं जहामि । अत्र पानशब्देनापरपानकादि गृह्यते । जलमुत्कलं त्यजामि । क इव । शिवगमीव । यथा मोक्षं गमिष्यतीत्येवंशीलो नीरागः पुमान् सर्वस्वजनानां निजकुटुम्बानामनुषङ्गं निजपरिजनवर्गस्य संबन्धं जहाति । स कः । अत्र जगति संसारे वा येनाहारेण भुक्तेन भक्षितेन कृत्वा कदाचित्कस्मिन्नप्यतीतानागतवर्तमानलक्षणे काले आत्मा जीवस्तृप्तिं सतोषं नाप न लेभे । क इव । वह्निरिव । यथा दारुणा काष्ठेन । जातावेकवचनम् । हुताशो न तृप्यति । यदुक्तम्—'नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः' इति ॥

सर्वेऽस्ति यः पद्ममिवाष्टसिद्धिश्रीणां जगत्कल्पितकल्पसालः ।
अलीव पद्मे रमतां मदीये चित्ते चिरं श्रीपरमेष्ठिमन्त्रः ॥ १९३ ॥

स श्रीपरमेष्ठिमन्त्रः श्रीमन्नमस्कारश्चिरमासंसारं यावन्मदीये चित्ते रमतां मम मानसे हसवत्खेलतु । क इव । अलीव । यथा भृङ्गो भ्रमरः पद्मे विकसितकमले सुचिरं रमते । स कः । यः श्रीनमस्कारः अष्टानाम् अणिमा—वशिता—ईशित्वं—प्राकाम्य—महिमा—लघिमा—कामावसायित्व—प्राप्तिः इत्यभिधानामपरासां वा मनःकल्पितानामष्टानां महासिद्धीनामेव श्रीणां लक्ष्मीणां पद्ममिव स्मेरकमलमिव सद्म वाससौधमस्ति । पद्मवासेति लक्ष्म्या अभिधानत्वात् । परमेष्ठिमन्त्रो जगतां त्रिभुवनजनानां कल्पितेषु कामितेषु कल्पसालः वाञ्छितसंपूरणे कल्पद्रुमोऽस्ति ॥

वाध्रीणसस्येव विषाणमेको वर्तेत मे कश्चन वर्ततेऽन्यः ।
पुनर्धरित्र्या इव वृत्रशत्रुः कस्यापि न स्यामहमत्र विश्वे ॥ १९४ ॥

अत्र विश्वे अस्मिञ्जगति अहमेको वर्ते । किमिव । विषाणमिव । यथा वाध्रीणसस्य खड्गिनः गण्डको वन्यजीवविशेषजीवविशेषः तस्य विषाणं शृङ्गमेकमेव भवति । यदुक्तं कल्पसूत्रे—'खग्गिविसाणं व एगजाए' इति । तथा मे मम कश्चन कोऽप्यन्यः परो न वर्तते नास्ति ।

लता किंचित्कृतं किंचिन्न कृतं किंचिदिष्यते किंचिच क्रियते इत्याद्य श्लथलमालम्ब्यत । केनेव । कौसीद्येनालस्येन माद्यदुन्मत्तीभवन्मनश्चेतो यस्य तादृशेन पुंसेव । यथा अलसेन सर्वं कार्यं श्लथीक्रियते ॥ इति षष्ठव्रते रात्रिभोजनक्रियाशैथिल्यालोचनम् ॥

प्रमादभाजा नियमा मया ये बभञ्जिरे भ्रान्तिभृता भवेषु ।
छायाद्रुमं गण्डगलन्मदान्धं भविष्णुनेवोद्धुरसिन्धुरेण ॥ १४४ ॥

प्रमादमालस्यं शिथिलता वा अनवधानता वा मन्दभावं वा भजतीति प्रमद्वरेण प्रमत्ततायुक्तेन मया नियमा अभिग्रहविशेषा बभञ्जिरे भग्नाः गृहीत्वा मुक्ताः । किंभूतेन मया । भवेषु कर्मवैचित्र्यान्नानाविधजन्मपरम्परासु भ्रान्तिं भ्रमणं बिभर्तीति भ्राम्यतेत्यर्थः । केनेव । उद्धुरसिन्धुरेणेव । यथा गण्डयोः कपोलस्थलयोर्गलद्भिरनवरतनिष्पतद्भिर्मदैः दानवारिभिरन्धं भविष्णुनागतनयनीभवनशीलेन विचेतनीभावुकेन मदुद्धुरसिन्धुरेण उन्मादोत्कटकरटिना गम्भीरवेदिद्विरदेन छायया उपलक्षितास्तरवो येषां कदाचिदपि परावृत्तिं न भजते, पूर्वस्यां पश्चिमायां दक्षिणस्यामुत्तरस्यां च नायाति, यथास्थानमवस्थितैव तिष्ठति । अथ वा पल्लवपत्रपुष्पफलप्रमुखगुणमाविभूषितास्ते छायाद्रुमा भज्यन्ते ॥ इति सर्वनियमविरोधनालोचनम् ॥

अपेक्षया पञ्चमहाव्रताना स्वर्भूधराणामिव भूधरेषु ।
अणुष्वहर्बन्धुमितव्रतेषु मया विराद्धं गृहमेधिना यत् ॥ १४५ ॥

गृहमेधिना गृहस्थेन सता मया यदहर्बन्धवः सूर्या द्वादशादित्या [illegible] प्रमाणीकृतानि व्रतानि द्वादशव्रतानि । स्थूलप्राणातिपातविरमणम्, स्थूलमृषावाद[illegible], स्थूलादत्तादानविरमणम्, स्वदारसंतोषपरस्त्रीविधवावेश्यावन्यागिगमना[illegible], इच्छा-परिग्रह-परिमाणम्, सर्वदिग्गमनादिविरमण प्रमाण च, भोगोपभोग[illegible], अनर्थदण्डविरमणम्, सामायककरणम्, प्रतिदिन निशा च देशावकाशिक [illegible] करणम्, पर्वादिषु पोषधोपवासविधानम्, अतिथिसंविभागविधानम्, [illegible] गृहस्थानां पञ्चाणुव्रतानि । त्रीणि गुणव्रतानि । चत्वारि शिक्षाव्रतानि । [illegible] व्रतेषु यत्किंचिन्मया विराद्धम् अतिक्रम-व्यतिक्रम-[illegible] विराधना कृता । किंभूतानाम् । पञ्चानां महाव्रतानामपेक्षया । [illegible] सर्वेभ्योऽपि प्रोक्तवस्तुभ्यो विरमणम् । द्वादशव्रतेषु तु देश[illegible] क्षया अणुषु ह्रस्वेषु लघुषु । केष्विव । भूधरेष्विव । यथा स्वर्भूधर[illegible] जनप्रमाणत्वेन महत्त्व महत्त्वाच्च बृहद्वनम् । अपेक्षया [illegible] सुदर्शनमेरुं विना येऽन्येऽपि गिरिषु [illegible] ॥ [illegible] ॥

संसारपथेषु [illegible] ।
[illegible] प्रयुक्ता न मया [illegible] ॥ १४६ ॥

यामि, कायेनौदारिकाब्रह्म न कारयामि, मनसौदारिकाब्रह्म नानुमोदे, वचसौदारिकाब्रह्म नानुमोदे, कायेनौदारिकाब्रह्म नानुमोदे, इत्यौदारिकेन मनोवाक्कायैः करणकारणानुमोदनैर्नव भेदाः । तथैव वैक्रियेण सममनया रीत्या नव भेदा भवन्ति । सर्वीभूय सर्वेऽप्यष्टादश जाताः । एवमष्टादश प्रत्याख्यानानि । अथ तान्यशेषाणि समस्तान्यपि अष्टादश पापस्थानानि क्षणानिमेषमात्रादपि मृषा मिथ्या भवन्तु । कानीव । वचांसीव । यथा धृतकृता दरोदरिणां वचनानि क्षणान्मिथ्या भवन्ति ॥

कोपं हृदः शल्यमिव प्रहाय सत्त्वानशेषान्क्षमयामि सम्यक् ।
मयार्दिताः प्रागिह वैरिणेव क्षाम्यन्तु ते मय्यनुदीतवैराः ॥ १४९ ॥

एतस्यामवस्थायामहमशेषान् समस्तान् सप्त लक्षाः पृथ्वीकाययोनयः, सप्त लक्षाः अप्काययोनयः, सप्त लक्षाः तेजस्काययोनयः, दश लक्षाः प्रत्येकवनस्पतिकाययोनयः, चतुर्दश लक्षाः अनन्तवनस्पतिकाययोनयः, द्वे लक्षे द्वीन्द्रियाणां योनयः, द्वे लक्षे त्रीन्द्रिययोनयः, द्वे लक्षे चतुरिन्द्रिययोनयः, चतस्रो लक्षाः पञ्चेन्द्रियतिरश्चां योनयः, चतस्रो लक्षाः नारकाणां योनयः, चतस्रो लक्षा देवानां योनयः, चतुर्दश लक्षा मनुष्याणां योनयः । एवं सर्वा अपि संमिलिताः सन्त्यश्चतुरशीतिलक्षजीवयोनयो भवन्ति । एताश्चतुरशीतिलक्षयोनिसत्कान् सत्त्वान् जीवान् सम्यक् मनोवाक्कायैः कृत्वा क्षमयामि पादयोर्लगित्वा ममापराधं तितिक्षे विनयामि । किं कृत्वा । हृदो हृदयात्कोपं क्रोधं प्रहाय सत्यज्य । किमिव । शल्यमिव । यथा केनापि प्रकारेण केनचिद्वैरिणा परमवैरेण कृत्वा हृदि विषये निक्षिप्तमायसशस्त्रं नाराचं वा शङ्कुं वा काष्ठघटितकीलिका वा उद्ध्रियते । तथा ये सत्त्वा मया प्राग् जन्मनि इहास्मिन् भवे वा वैरिणेव शत्रुणेव अर्दिताः पीडिताः ते सर्वे मां क्षाम्यन्तु मयिविषये क्षमां कुर्वन्तु । उपशाम्यन्त्वित्यर्थः । किंभूताः । अनुदीतवैराः मयि विषये अप्रकटितविरोधाः मुक्तविद्वेषाः क्षाम्यन्तु ॥

मैत्री मम स्वेष्विव सर्वसत्त्वेष्वास्तां क्षितिस्वर्बलिवेश्मजेषु ।
धर्मोऽर्जितो वैभववन्मया यस्तं प्रीतचेता अनुमोदयामि ॥ १५० ॥

क्षितिः भूलोकः, स्वर्देवलोकः, बलिवेश्म पाताललोकः, तेषु जायन्ते स्मेति क्षितिस्वर्बलिवेश्मजास्तेषु त्रिजगज्जन्मसु सर्वतिर्यङ्नरनागासुरव्यन्तरज्योतिर्वैमानिकनाकिनामसकलसत्त्वेषु समस्तजन्तुजातेषु विषये मम मैत्री सखिता आस्ताम् । केष्विव । स्वेष्विव । यथा आत्मीयजनेषु सख्यं स्यात् । अथवा 'मैत्री मम स्वैरिव सर्वसत्त्वैरास्तां क्षितिस्वर्बलिवेश्मजातैः' इति पाठः । तत्र स्वर्बलिवेश्मजातैः सर्वसत्त्वैः सार्धं स्वैरिव मम मैत्री अस्तु । पूर्वपाठस्तु 'मित्ती मे सव्वभूएसु' इति प्रतिक्रमसूत्रानुसारेण । अथ पुनरर्थः—यो मया वैभववत् संपत्तिरिव धर्मोऽर्जितः संचितः । प्रीतचेता हृष्टमनाः सन् तं धर्मं पुण्यं सुकृतमनुमोदयामि प्रशंसामि ॥

नृपान । उत्प्रेक्ष्यते—मघोन इन्द्रस्य द्वितीयस्थानमिव आगच्छतीति । किं कर्तुम् । यां देवलोकं च पुनर्भुवं भूमण्डलं मम नाभिमेककालं भोक्तुं पालयितुं मुक्तिमिवाप्तौ वा । एतावता विक्रमार्कात् द्विपञ्चाशदधिकषोडशशतप्रमाणे वर्षे संवत् १६५२ वर्षे इत्युक्तम् ॥

नभस्यमासस्य नमत्पयोदकदम्बकाडम्बरिणो नभोवत् ।
प्रभोः प्रभावादिव शुभ्रितायां तिथौ सुरद्वेषिनिषूदनस्य ॥ १५८ ॥

सुराणां देवानां द्वेषिणो वैरिणो दानवा. । 'असुरा दितिदनुजाः पातालौकःसुरारयः' इति हैम्याम् । तेषां निषूदनस्य उच्छेदकस्य हरेः । 'दैत्यारिश्च पुराणयज्ञपुरुषस्तार्क्ष्यध्वजः' इति हैम्याम् । तिथौ दिवसे एकादशीदिने । किंभूतायां तिथौ । शुभ्रितायामुज्ज्वलीभूतायाम् । अर्थाच्चन्द्रमसश्चन्द्रिकाभिर्धवलितायाम् । तिथिशब्दः पुंलिङ्गे । उत्प्रेक्ष्यते—प्रभोर्हीरविजयसूरेः प्रभावान्महिम्नो माहात्म्यात् शुभ्रितायामिव । तिथिः कस्य । नभस्यमासस्य नभस्यो भाद्रपदसंज्ञो मासस्तस्य । 'श्रावणिकोघनभस्यः प्रोष्ठभाद्रपदः पद.' इति हैम्याम् । किंभूतस्य । नमन्तः पयोभरैर्नम्रीभवन्तो भूमौ लगन्तो ये पयोदा मेघास्तेषां कदम्बकानि पटलानि तेषामाडम्बर आटोपः अस्त्यस्मिंस्तस्य किंवत् । नभोवत् श्रावणमासस्येव । श्रावणभाद्रपदमासौ वर्षा ऋतुः । यथा श्रावणे तथा भाद्रपदे यथा भाद्रपदे तथा श्रावणे मेघः स्यादिति । तथा 'नभोनभस्यत्वमलम्भयद्दृशौ' इति नैषधे । सेवनावसरे दमयन्त्याः स्वदृशौ श्रावणभाद्रपदीकृते । अयं तु वर्षाऋतुत्वान्मासस्वभाव. । एकादशी तु स्वभावेनोज्ज्वला । तत्रेयमुत्प्रेक्षा । अथ वा नभोवद्गगनस्येव । यथा प्रावृट्काले नभो व्योम घनघनाघनमण्डलाडम्बरित भवेत् ॥ एतावता भाद्रपदमाससितैकादशीतिथौ निशासमये ॥

कान्ते तमीनामुदिते मुनीन्दोस्तत्प्रक्रमे वक्त्रदिदृक्षयेव ।
स्फुरत्सु तारेषु गुरोः पथीव यातुर्दिवं क्षिप्तसुमेषु देवैः ॥ १५९ ॥

पुनस्तमीना रात्रीणां कान्ते वल्लभे चन्द्रे उदिते सति उदयं प्राप्ते सति । उत्प्रेक्ष्यते—तत्प्रक्रमे तस्मिन्नवसरे अनशनिनो मुनीन्दोर्हीरविजयसूरेर्वक्त्रस्य वदनस्य दिदृक्षया द्रष्टुमिच्छयेव । पुनस्तारेषु उपलक्षणाद्ग्रहनक्षत्रतारकेषु स्फुरत्सु दीप्यमानेषु झगज्झगिति कुर्वत्सु । उत्प्रेक्ष्यते—दिवं स्वर्गलोकं यास्यति गमिष्यतीत्येवंशीलस्य यातुर्गुरोर्हीरसूरेः पथि मार्गे देवै. क्षिप्तेषु विकीर्णेषु सुमेषु पुष्पेष्विव पुष्पप्रकरेष्विव ॥ घनोपरोधनिर्मुक्तग्रहनक्षत्रतारकलितकौमुदीकान्तोदये जाते ॥

महेभ्यवत्संनिधिशालमानानाकार्य कार्यज्ञतयानगारान् ।
तदैहिकामुष्मिकसर्वशर्मनिर्माणदक्षाः प्रवितीर्य शिक्षाः ॥ १६० ॥

एवंविधे व्यतिकरे सति । किं कृत्वा । कार्यं जातावसरे कृत्याकृत्यविधिं जानातीति कार्यज्ञस्तस्य भावस्तया शिक्षाप्रदानादिषु निपुणत्वेन सनिधौ समीपे शालमानान् शोभ-

यामि, कायेनौदारिकमयत्र न कारयामि, मनसौदारिक[illegible] नानुमोदे, [illegible] नानुमोदे, कायेनौदारिकमयत्र नानुमोदे, इत्यौदारिकेन मनोगाद[illegible] र्दनैव भेदाः। तथैव वैक्रियेण समस्तनया रीत्या नव भेदा [illegible]। [illegible] [illegible] जाता। एवमष्टादश प्रत्याख्यानानि। अथ [illegible] प्रत्याख्यानानि क्षणान्निमेषमात्रादपि मृषा मिथ्या भवन्तु। [illegible] मृच्छ्या दौरोदरिकाणां वचनानि क्षणान्मिथ्या भवन्ति॥

कोप [illegible]: शल्यमिव प्रहाय मत्त्वानशेपान्[illegible]

गर्वाङ्किताः प्रागिह वैरिणोऽत्र [illegible] । ९४ ।

[illegible]

पुनरत्र भुवने अहं कस्यापि न स्यां भवेयम् । अहं कस्यापि नास्मीत्यर्थः । क इव । वृत्रशत्रुरिव । यथा धरित्र्या भूमेः शक्रो राजा कस्यापि न स्यान्न भवेत् । 'काके शौचं द्यूतकारेषु सत्यं सर्पे क्षान्तिः स्त्रीषु कामोपशान्तिः । क्लीबे धैर्यं मद्यपे तत्त्वचिन्ता राजा मित्रं केन दृष्टं श्रुतं वा ॥' इति वचनात् ॥

भवेन्मदीयेन्द्रियमन्दिरस्य यदि प्रमादोऽवसरेऽत्र दैवात् ।
त्रिधापि देहादिममात्मनाहं परिग्रहं बाह्यमिव त्यजामि ॥ १९५ ॥

यदि अत्रावसरे अस्मिन् प्रस्तावे दैवात्कर्मयोगादायुःकर्मणस्त्रुटेः क्षयान्मदीयेन्द्रियमन्दिरस्य मत्सम्बन्धिनः शरीरस्य । 'जुहाव यन्मन्दिरमिन्द्रियाणाम्' इति नैषधे । प्रमादो नाम जीवेन समं वियोगो भवेत् । मरणं स्यादित्यर्थः । तदाहमात्मना स्वयमेव देहादिमं कायप्रमुखमन्तरङ्गपरिग्रहं क्रोधमानमायालोभादिपरीवारोपध्यादिकं सर्वमपि त्रिधा मनोवाक्कायैः कृत्वा त्रिकरणशुद्ध्यै त्यजामि मुञ्चामि । कमिव । बाह्यमिव । यथा बहिर्भावो बाह्यं स चासौ परिग्रहश्च पुत्रकलत्रभ्रातृधनधान्यादिपरिग्रहः सर्वस्त्यक्तोऽस्ति, तथा वपुराद्यपि व्युत्सृजामीति ॥ इत्याराधनाविधानम् ॥

शमी शमीगर्भमिवैकतानमना दधानः प्रणिधानमन्तः ।
अर्हत्समक्षं दशमी दशम्यां व्यधाद्विधिज्ञोऽनशनं शमीशः ॥ १९६ ॥ ८

शमिनां प्रशमवतां योगिनामीशः स्वामी यतिपतिर्दशम्यां तिथौ यावज्जीवं त्रिविधाहारपरित्यागरूपमनशनं व्यधाच्चकार । कथम् । अर्हत्समक्षं भगवत्प्रत्यक्षं प्रति पुरस्तात्प्रत्याख्यानोच्चारपूर्वम् । दशमी वर्षीयान् प्रान्तावस्थावस्थितान् । 'निशि दशमितामालिङ्गन्त्या विबोधविधित्सुभिः' इति नैषधे । निशाया अवसानसमये दशमितेति पदं दृश्यते । पुनः किंभूतः । विधिज्ञः शास्त्रोक्तप्रकारवेत्ता प्रान्तसमये अनशनं विहितं विलोक्यते इति वा विधिः । किं कुर्वाणः । अन्तर्मनोमध्ये प्रणिधानं पञ्चपरमेष्ठिध्यानं दधानो बिभ्राणः । किंलक्षणः सन् । एकतानं लयानुगं मनो मानसं यस्य तादृशः सन् । कमिव । शमीगर्भमिव । यथा शमीद्रुमः खेजडिकाभिधानपादपः शमीगर्भं पावकमन्तर्धत्ते । 'अर्चिः शमीगर्भतमोघ्नशुक्राः' इति हैम्यामग्निनामसु । तथा 'शमीमिवाभ्यन्तरलीनपावकाम्' इति रघौ ॥

अथ सप्तभिः कुलकं प्रारभ्यते—

भोक्तुं भुवं द्यां च समं मघोनो द्वितीयरूपादिव विक्रमार्कात् ।
नेत्रत्रिनेत्राननकेकियानवक्त्रत्रियामापतिसंमितेऽब्दे ॥ १९७ ॥ ८

तत्र पञ्चमीमक्षमालां गणयितुमारभतेति सम्बन्धः । आदित एव काव्यानि पृथक् पृथक् व्याख्यायन्ते । नेत्रे द्वे चक्षुषी, त्रिनेत्रस्येश्वरस्याननानि मुखानि पञ्च । 'पञ्चमुखोऽष्टमूर्तिः' इति हैमीवचनात् पञ्चसंख्याकानि वदनानि, तथा केकियानस्य मयूरवाहनस्य स्वामिकार्तिकस्य वदनानि वक्त्राणि षट् । षण्मुखत्वात् । तथा त्रियामापतिश्चन्द्र एकः । एभिः पदार्थैः संमिते सम्यक्प्रमाणीकृते अब्दे वर्षे । कस्मात् । विक्रमार्कात् विक्रमादित्यनाम्नो

मानान् । किंवत् । महेभ्यवत् यथा महाव्यवहारिणः सद्भिर्विद्यमानै रत्नादिभिः शोभमानैर्या निधिभिर्निधानैः शालन्ते राजन्ते तान् तादृशाननगारान् निजपारिपार्श्वका-न्मुनीनाकार्याहूय पुनस्तेषामाकारितयतीनामैहिकानीहलोकसंबन्धीनि आमुष्मिकाणि परलोकसंबन्धीनि सर्वाणि समस्तानि शर्माणि सुखानि तेषां निर्माणे करणे दक्षाः कुशलाः शिक्षा अनुशास्तीः प्रवितीर्य दत्त्वा ॥

अहो युवाभ्यां विजयादिसेनव्रतिक्षितीन्द्रान्प्रति वाच्यमेतत् ।

युष्माकमङ्केऽस्ति गणोऽखिलोऽपि स शासनीयः शिशुवत्स्वकीयः ॥ १९१

अहो इति संबोधने । विमलहर्षसोमवाचकौ युवाभ्यां संभूय विजय इति पदमादौ यस्य तादृशः सन् एतावता विजयसेननामा प्रतिक्षितीन्द्रान् साधुवसुधाधिपान् प्रति एतदुच्यमानं वाच्यं कथनीयम् । तदेवोच्यते—अखिलोऽपि समस्तोऽपि गणस्तपागच्छो युष्माकं श्रीमतामङ्के उत्सङ्गेऽस्ति वर्तते । स तपागच्छश्रमणगणः शासनीयः सम्यक् पालनीयः । किंवत् । शिशुवत् । यथा स्वकीयो बालः पाल्यते । गण [illegible] । स्वकीयो गुरुपरम्परया आगतः । आत्मीयः अथ श्रीमदीय ॥

श्रीवाचकेन्द्रौ विमलादिहर्षसोमादिराजद्विजयाभिधानौ ।

सदाश्रवौ स्वौ सचिवाविवाथ संयोज्य वाचेति निजं मुखाब्जम् ॥ १९२ ॥

अथ पुनः किं कृत्वा । विमल इति पदमादौ यस्य तादृशो हर्षः, तथा [illegible] इति पदमादौ यस्य स सोमादिः, तेन राजत् शोभमानं विजय इति पदं [illegible] । विमलहर्ष-सोमविजय इत्यभिधाने ययोस्तौ । किंभूतौ । श्रीवाचकेन्द्रौ श्रीमदुपा[illegible]-राजौ प्रति इति पूर्वोक्तेन गणशासनलक्षणविजयसेनसूरिशिक्षापदानस्य [illegible] वाण्या समं निजं मुखाब्जं वदनकमलं संयोज्य योजयित्वा । [illegible] वाचकौ स्वौ सचिवाविव आत्मीयामात्याविव । किंभूतौ । सदा [illegible] वचनाश्रितौ निजकथनपारवौ ॥

प्रणीय पूर्णाश्चतुरक्षमालाश्चतुर्गतीनामिव दारयित्री ।

गन्तुं गतिं पञ्चमिकामिवाशो स पञ्चमीं पारगताद्भ[illegible] ॥ १९३ ॥

पुनः किं कृत्वा । चतुरक्षमालाश्चतस्रो जपमाला [illegible]

पेजाताः प्रणीय कृत्वा आदितो गणयित्वा । [illegible]—[illegible]

णानां गतीनां [illegible] [illegible]

सूरिः पञ्चमीं [illegible]

[illegible]

[illegible] ॥ [illegible] ॥

[illegible]

[illegible] ॥ १९४

मानान् । किंवत् । महेभ्यवत् यथा महाव्यवहारिणः सद्भिर्विद्यमानै रत्नादिभिः शोभमानैर्वा निधिभिर्निधानैः शालन्ते राजन्ते तान् तादृशाननगारान् निजपारिपार्श्विकान्मुनीनाकार्याहूय पुनस्तेषामाकारितयतीनामैहिकानीहलोकसंबन्धीनि आमुष्मिकाणि परलोकसंबन्धीनि सर्वाणि समस्तानि शर्माणि सुखानि तेषां निर्माणे करणे दक्षाः कुशलाः शिक्षा अनुशास्तीः प्रवितीर्य दत्त्वा ॥

अहो युवाभ्यां विजयादिसेनव्रतिक्षितीन्द्रान्प्रति वाच्यमेतत् ।
युष्माकमङ्केऽस्ति गणोऽखिलोऽपि स शासनीयः शिशुवत्स्वकीयः ॥ १९१

अहो इति संबोधने । विमलहर्षसोमवाचकौ युवाभ्यां संभूय विजय इति पदमादौ यस्य तादृशः सन् एतावता विजयसेननाम्नः व्रतिक्षितीन्द्रान् साधुवसुधाधिपान् प्रति एतदुच्यमानं वाच्यं कथनीयम् । तदेवोच्यते—अखिलोऽपि समस्तोऽपि गणस्तपागच्छो युष्माकं श्रीमतामङ्के उत्सङ्गेऽस्ति वर्तते । स तपागच्छश्रमणगणः शासनीयः सम्यक् पालनीयः । किंवत् । शिशुवत् । यथा स्वकीयो बालः पाल्यते । गणः किंभूतः । स्वकीयो गुरुपरम्परया आगतः । आत्मीयः अथ श्रीमदीयः ॥

श्रीवाचकेन्द्रौ विमलादिहर्षसोमादिराजद्विजयाभिधानौ ।
सदाश्रवौ स्वौ सचिवाविवाथ संयोज्य वाचेति निजं मुखाब्जम् ॥ १९२ ॥

अथ पुनः किं कृत्वा । विमल इति पदमादौ यस्य तादृशो हर्षः, तथा सोम इति पदमादौ यस्य स सोमादिः, तेन राजत् शोभमानं विजय इति पदं यस्य एतावता विमलहर्ष-सोमविजय इत्यभिधाने ययोस्तौ । किंभूतौ । श्रीवाचकेन्द्रौ श्रीमदुपाध्यायाधिराजौ प्रति इति पूर्वोक्तेन गणशासनलक्षणविजयसेनसूरिदीक्षाप्रदानरूपप्रकरणवाचा वाण्या समं निजं मुखाब्जं वदनकमलं संयोज्य योजयित्वा । उक्त्वेत्यर्थः । उत्प्रेक्ष्येते—वाचकौ स्वौ सचिवाविव आत्मीयामात्याविव । किंभूतौ । सदा सर्वदा आज्ञाकारौ वचनस्थितौ निजकथनकारकौ ॥

प्रणीय पूर्णाश्चतुरक्षमालाश्चतुर्गतीनामिव वारयित्रीः ।
गन्तुं गतिं पञ्चमिकामिवाथो स पञ्चमीं प्रारभताक्षमालाम् ॥ १९३ ॥

पुनः किं कृत्वा । चतुरक्षमालाश्चतस्रो जपमालिकाः पूर्णाः समाप्तिं प्राप्ताः संपूर्णसंजाताः प्रणीय कृत्वा आदितो गणयित्वा । उत्प्रेक्ष्यते—चतस्रो नरकतिर्यङ्मनुष्यदेवलक्षणानां गतीनां कुत्सितानां स्थानकानां वारयित्रीर्निषेधयित्रीर्निषेधिका इव । अथो पुनः सूरिः पञ्चमीं पञ्चानां संख्यापूरणीमक्षमालां प्रारभत । गणयितुमिति शेषः । उत्प्रेक्ष्यते—पञ्चमिकां पञ्चानां गतीनां पूरणीं पूरयित्रीं गतिं गमनं तद्रूपादारादासन्नभाविनीं मुक्तिं गन्तुमिव ॥ सप्तभिः कुलकम् ॥

अमोलिताल्पस्य पुरस्य पार्श्वे ग्रामे सपक्षे सरसीरतीव ।
समुद्रशायीव हृतोऽग्रजेन हिमाग्रणीः कोऽपि समुद्रभट्ट ॥ १९४ ॥